Almira -1
Shelf-3
17

श्रीमद् वाल्मीकि रामायणम्

८

नेनअनिक्लेशार्जिततपोव्ययभयेन ॥१५॥ रक्षकस्त्वंभवेतिशेषः त्वंनाथाःत्वन्नाथोयेषांते ॥१६॥ कार्त्स्न्येनसामस्त्येनरक्षःपीडानिवर्त्तनेन चतुर्दशवर्षपर्यंतंपितुराज्ञयाराज्य
त्यागेपिभरतेराज्यसंबंधस्यावश्यकत्वात्शरणागतरक्षास्यास्त्यधिकारःकिंचक्षत्रजातेर्वाचाधिकारोनतुराज्यपदस्थस्यैवेतिनात्रदोषःसंश्रुत्यप्रतिज्ञातंजीवमानःजी
वन्नपिश्रवंप्रतिज्ञातंनशक्ष्यामीत्यत्रहेतुः ॥१७॥ सत्यमिष्टमित्यादि ॥१८॥ यस्मैकस्माअपिप्रतिज्ञांप्रतिज्ञायनतस्याःकिंपुनर्ब्राह्मणेभ्यइत्यर्थः ॥१९॥ अनुक्तेनापिऋ

नेनशापंनमुंचामोभक्ष्यमाणाश्चराक्षसैः ॥ तदर्द्यमानान्रक्षोभिर्दण्डकारण्यवासिभिः ॥१५॥ रक्षकस्त्वंसहभ्रात्रात्वन्नाथाहिवयंवने
मयाचैतद्वचःश्रुत्वाकार्त्स्न्येनपरिपालनं ॥१६॥ ऋषीणांदण्डकारण्येसंश्रुतंजनकात्मजे ॥ संश्रुत्यचनशक्ष्यामिजीवमानःप्रतिश्रवं
॥१७॥ मुनीनामन्यथाकर्तुंसत्यमिष्टंहिमेसदा ॥ अप्यहंजीवितंजह्यांत्वांवासीतेसलक्ष्मणां ॥१८॥ नतुप्रतिज्ञांसंश्रुत्यब्राह्मणेभ्योविशेषतः
तदवश्यंमयाकार्यमृषीणांपरिपालनं ॥१९॥ अनुक्तेनापिवैदेहिप्रतिज्ञायकथंपुनः ॥ ममस्नेहाच्चसौहार्दादिदमुक्तंत्वयावचः ॥२०॥ प
रितुष्टोस्म्यहंसीतेनह्यनिष्टोनुशिष्यते ॥ सदृशंचानुरूपंचकुलस्यतवशोभने ॥ सधर्मचारिणीमेत्वंप्राणेभ्योपिगरीयसी ॥२१॥ इत्येवमुक्त्वा
वचनंमहात्मासीतांप्रियांमैथिलराजपुत्रीं ॥ रामोधनुष्मान्सहलक्ष्मणेनजगामरम्याणितपोवनानि ॥२२॥ इत्यार्षेश्रीमद्रामायणेआरण्य
कांडेदशमःसर्गः ॥१०॥ ॥अग्रतःप्रययौरामःसीतामध्येसुशोभना ॥ पृष्ठतस्तुधनुष्पाणिर्लक्ष्मणोनुजगामह ॥१॥ तौपश्यमानौवि
विधान्शैलप्रस्थान्वनानिच ॥ नदीश्चविविधारम्याजग्मतुःसहसीतया ॥२॥ सारसांश्चक्रवाकांश्चनदीपुलिनचारिणः ॥ सरांसिचसप
द्मानियुतानिजलजैःखगैः ॥३॥ ॥७॥

षिभिरनिकार्यमितिचशेषःप्रतिज्ञायकथंपुनर्नकार्यमितिशेषःस्नेहःप्रीतिःसौहार्दंशोभनहृदयतापीतौसत्यामपितादृशहृदयत्वाभावेएवमनुशासनादर्शनादु
भयमुक्तं ॥२०॥ नह्यनिष्टोनुशिष्यतेयस्मिन्यस्यप्रीतिर्नास्ति नासावनुशिष्यतेहितंनोपादिश्यतइत्यर्थःसदृशंतवस्नेहस्यत्वदुक्तंवचइतिशेषःकुलस्यानुरूपं ॥२१॥
॥२२॥ ॥इतिरामाभिरामेश्रीरामीयरामायणतिलकेआरण्यकांडेदशमःसर्गः ॥१०॥ ॥अग्रतइति ॥१॥२॥ जलजाःखगाःसारसादयः ॥३॥ ॥७॥

रामा ८

पृथवंशान्पृथुरूपेणासंबंधान् एषणाभिनिषष्ठी विषाणिनोमाङ्गिषानित्यन्वयः॥४॥ दिवाकरेलंबमानेसायाह्न इत्यर्थः योजनायतं चतुर्दिक्षुयोजनायतं॥५॥
पद्मपुष्करसंबाधं पद्मानिरक्तानि पुष्कराणिपुंडरीकानि तैः संबाधः सम्मर्दोयस्मिन्तं पद्मानांपुष्करोजलेसंबाधोनैविशंपत्रनमिनिकनकः गजयूथैरलंकृतं तीरेइतिशे-
षः हंसाराजहंसाः कारंडवाः कलहंसाः जलजातिभिः जलेजातिर्जन्मयेषांतैर्मत्स्यादिभिः॥६॥ गीतवादित्रनिर्घोषोगीतोपेतवाद्यशब्दः तत्तुकश्चनेतिगीतादिक

पृथवंशांश्चएषनोमस्तोन्मत्तान्विषाणिनः॥ महिषांश्चवराहांश्चगजांश्चद्रुमवैरिणः॥४॥ तेगत्वादूरमध्वानंलंबमानेदिवाकरे॥ ददृशुःस-
हितारम्यंतटाकंयोजनायतं॥५॥ पद्मपुष्करसंबाधंगजयूथैरलंकृतं॥ सारसैर्हंसकारंडवैःसंकुलंजलजातिभिः॥६॥ प्रसन्नसलि-
लेरम्येतस्मिन्स्तरक्षितुण्डवे॥ गीतवादित्रनिर्घोषोनतुकश्चनदृश्यते॥७॥ ततःकौतूहलाद्रामोलक्ष्मणश्चमहायशाः॥ मुनिंधर्मभृ-
तंनामप्रष्टुंसमुपचक्रमे॥८॥ इदमत्यद्भुतंश्रुत्वासर्वेषांनोमहामुने॥ कौतूहलंमहज्जातंकिमिदंसाधुकथ्यतां॥९॥ तेनैवमु-
क्तोधर्मात्माराघवेणमुनिस्तदा॥ प्रभावंसरसःक्षिप्रमाख्यातुमुपचक्रमे॥१०॥ इदंपंचाप्सरोनामतटाकंसार्वकालिकं॥ निर्मितं
तपसारामसुनिनामाण्डकर्णिना॥११॥ सहितेपेतपःस्तीव्रंमाण्डकर्णिर्महामुनिः॥ दशवर्षसहस्राणिवायुभक्षोजलाशये॥१२॥
ततःप्रव्यथिताःसर्वेदेवाःसाग्निपुरोगमाः॥ अब्रुवन्वचनंसर्वेपरस्परसमागताः॥१३॥ अस्माकंकस्यचित्स्थानमेषप्रार्थयतेमुनिः॥ इ-
तिसंविग्नमनसःसर्वेतत्रदिवौकसः॥१४॥ ततःकर्तुंतपोविघ्नंसर्वैर्देवैर्नियोजिताः॥ प्रधानाप्सरसःपंचविद्युच्चलितवर्चसः॥१५॥

तेत्यर्थः॥७॥ धर्मभृतनामधर्मभृतनामकं धर्मभृन्नामकंवाशरणागतेष्वनुयायिषु कः॥८॥९॥१०॥ पंचाप्सरसांक्रीडासाधनत्वात्पंचाप्सरोनामत्वेनप्रसिद्धं सर्व
कालोत्कर्षमादिगुणकं सार्वकालिकं॥११॥१२॥ अग्निरूपपुरोगमाः सर्वेप्रव्यथिताअभवन्ततःसर्वेब्रुवन्नित्यर्थः॥१३॥ इतिसंविग्नमनसोऽभवन्नितिशेषः
॥१४॥ ततउद्विग्नसर्वैर्देवैस्तपोविघ्नायनियुक्ताः विद्युच्चलितवर्चसः चलितविद्युत्कांतयः प्रधानाप्सरसः पंचेत्यनेनतत्परिवारभूतान्यसराश्चनितानाआगमन्नितिशेषः॥१५॥

1

दृष्टपरावरः दृष्टैहिकपारलौकिकधर्माधर्मः ॥१६॥ निर्मितं तेनैव मुनिनाक्रीडार्थमिति शेषः ॥१७॥ तत्रैव निर्मिते गृहे तपोयोगो यौवने हेतुः ॥१८॥ भूषणोन्मिश्रः वलयपरिभूषणाद्युन्मिश्रः ॥१९॥ वचनं तदर्थं आश्चर्यमिति निजगाद ॥१९॥ एवं कथयमानः आश्चर्यमित्येवं कथयन्· ब्राह्म्यालक्ष्म्या ब्रह्मविद्यानुष्ठानजलक्ष्म्या ब्रह्मवर्चसेनेति यावत् ॥२०॥ प्रविश्याश्रममण्डलमित्यनुषङ्गः आश्रममण्डले उवासेति शेषः ॥२१॥ तदा स प्रकारमाह उषित्वेति एकस्याश्रमे इति शेषः अथ पर्यायेण त

अप्सरोभिस्ततस्ताभिर्मुनिर्दृष्टपरावरः ॥ नीतो मदनवश्यत्वं देवानां कार्यसिद्धये ॥१६॥ ताश्चैवाप्सरसः पंच मुनेः पत्नीत्वमागताः ॥ तटाके निर्मितं तासां तस्मिन्नन्तर्हितं गृहं ॥१७॥ तत्रैवाप्सरसः पंच निवसन्त्यो यथासुखं ॥ रमयन्ति तपोयोगान्मुनिं यौवनमास्थितं ॥१८॥ तासां संक्रीडमानानामेष वादित्रनिःस्वनः ॥ श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥१९॥ आश्चर्यमिति तस्यैतद्वचनं भावितात्मनः ॥ राघवः प्रतिजग्राह सह भ्रात्रा महायशाः ॥१९॥ एवं कथयमानः स ददर्शाश्रममंडलं ॥ कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतं ॥२०॥ प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः ॥ तदा तस्मिन्स काकुत्स्थः श्रीमत्याश्रममंडले ॥२१॥ उषित्वा स सुखं तत्र पूज्यमानो महर्षिभिः ॥ जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनां ॥२२॥ येषामुषितवान् पूर्वं सकाशे स महास्त्रवित् ॥ क्वचित्परिदशान्मासानेकसंवत्सरं क्वचित् ॥२३॥ क्वचिच्च चतुरो मासान्पंच षट्चापरान्क्वचित् ॥ अपरत्राधिकान्मासानध्यर्धमधिकं क्वचित् ॥२४॥ त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखं ॥ तत्र संवसतस्तस्य मुनीनामाश्रमेषु वै ॥२५॥ रमतश्चानुकूल्येन ययुः संवत्सरा दश ॥ परिसृत्य च धर्मज्ञो राघवः सह सीतया ॥२६॥ सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह ॥ स तमाश्रममागम्य मुनिभिः परिपूजितः ॥२७॥ ॥७॥

तेषामाश्रमानजगाम ॥२२॥ किंच येषां महर्षीणामाश्रमे पूर्वमुषितवान्· पुनरपि तेषामाश्रमानजगाम· तत्क्रम निशम्यात यथा सुतीक्ष्णाश्रमे पुनरागमनं· एकत्रवासाभावादेवाह क्वचिदिति परिदशान् दशत्वसंख्यापरिगतान्· दशसंख्यान्मासानित्यर्थः ॥२३॥ परान् वर्षतोऽधिकान्· एवमधिकानित्याद्यपि ॥२४॥२५॥ रमतः रममाणस्य परिसृत्य सर्वमुन्याश्रमानटित्वा· परिहृत्येति पाठान्तरं· प्रतिश्रुत्येति पाङ्क्तः पाठः· यतः पुनरागन्तव्यमिति प्रतिज्ञायागतोऽतः पुनराजगामेत्यर्थः ॥२६॥२७॥

॥रा॰वा॰आ॥
॥७६॥

२८ ॥ उपासीनः समीपस्थः ॥ २९ ॥ कथाः कथयतां सकाशादिति शेषः ॥ ३० ॥ ३१ ॥ ३२ ॥ मनोरथाभिनयोयायदहमित्यादि ॥ ३३ ॥ एतच्छ्रुत्वोर्ध्वागस्त्यमित्यादि ॥ ३४ ॥ अस्मिन्नर्थे
मदुपदिदिक्षितार्थे ॥ ३५ ॥ योजनान्याश्रमादस्मादभि चत्वारि वसनइनिकतनकपाठे अस्मादाश्रमाद्योजनादभि अधिकं चत्वारि योजनानीत्यर्थः दक्षिणेनग

तत्रापि न्यवसद्रामः किंचित्कालमरिंदमः ॥ अथाश्रमस्थो विनयात्कदाचित्तं महामुनिं ॥ २८ ॥ उपासीनः सकाकुत्स्थः सुतीक्ष्णमिदमब्र
वीत् ॥ अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः ॥ २९ ॥ वसतीति मया नित्यं कथाः कथयतां श्रुतं ॥ न तु जानामि तं देशं वनस्यास्य महत्तया ॥ ३० ॥
कुत्राश्रमपदं रम्यं महर्षेस्तस्य धीमतः ॥ प्रसादार्थं भगवतः सानुजः सह सीतया ॥ ३१ ॥ अगस्त्यमधिगच्छेयमभिवादयितुं मुनिं ॥ मनोरथो
महानेष हृदि संपरिवर्तते ॥ ३२ ॥ यदहं तं मुनिवरं शुश्रूषेयमपि स्वयं ॥ इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ॥ ३३ ॥ सुतीक्ष्णः प्रत्युवा
चेदं प्रीतो दशरथात्मजं ॥ अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणं ॥ ३४ ॥ अगस्त्यमभिगच्छेति सीतया सह राघव ॥ दिष्ट्या त्विदानीमर्थेऽस्मि
न्स्वयमेव ब्रवीषि मां ॥ ३५ ॥ अयमाख्यामि ते राम यत्रागस्त्यो महामुनिः ॥ योजनान्याश्रमात्तात याहि चत्वारि वै ततः ॥ दक्षिणेन महाञ्छ्रीमान
गस्त्यभ्रातुराश्रमः ॥ ३६ ॥ स्थलीप्रायवनोद्देशे पिप्पलीवनशोभिते ॥ बहुपुष्पफले रम्ये नानाविहगनादिते ॥ ३७ ॥ पद्मिन्यो विविधास्तत्र प्र
सन्नसलिलाशयाः ॥ हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ ३८ ॥ तत्रैकां रजनीं व्युष्य प्रभाते राम गम्यतां ॥ दक्षिणां दिशमास्थाय वन
खण्डस्य पार्श्वतः ॥ ३९ ॥

तव्यानीति शेषः ततस्तत्र भ्रातुराश्रम इत्यर्थः पाठांतरे तु चतुर्योजनोत्तरमिति स्पष्ट एवार्थः ॥ ३६ ॥ तदाश्रमचिह्नं स्थलीप्रायवनोद्देशत्वादि ॥ ३७ ॥ ३८ ॥ तत्राग
स्त्यभ्रात्राश्रमे इध्मवाहेति अस्य नाम अगस्त्यः प्राग्दुहितरमुपयेमे भूतत्रुतो यस्माद्दृढच्युतो जात इध्मवाहात्मजो मुनिरिति भागवते नु देवरात्सुतो न्यतिरिति

टीकाशेषः ॥ ३८ ॥

॥राम॥
॥७६॥

2

दक्षिणां दिशमायोजनमंतरं अवकाशं गत्वा तत्रागस्त्याश्रमं द्रक्ष्यसि ॥४०॥४१॥४२॥ मुनेः श्रुत्वेति वचनमिति शेषः ॥४३॥ मार्गवशानुगान् मार्गवशान्प्राप्तान् ॥४४॥४५॥४६॥
नूनमेतद्देवन्यत्र हेतुमाह यथा यादृशचिह्नवन्त्या वनेभ्युनेनथैवास्य फलभारेण पुष्पभारेण च सन्नताः सहस्रशो द्रुमाः ज्ञाताः ज्ञायमाना वनेनेते ॥४७॥ असाधारणलिंगा

नत्रागस्त्याश्रमपदं गत्वा योजनमंतरं ॥ रमणीये वनोद्देशे बहुपादपशोभिते ॥४०॥ रंस्यते तत्र वैदेही लक्ष्मणश्च त्वया सह ॥ स हि रम्यो व
नोद्देशो बहुपादपसंयुतः ॥४१॥ यदि बुद्धिः कृता द्रष्टुमगस्त्यं तं महामुनिं ॥ अद्यैव गमने बुद्धिं रोचयस्व महामते ॥४२॥ इति रामो मुनेः श्रु
त्वा सह भ्रात्राभिवाद्य च ॥ प्रतस्थेगस्त्यमुद्दिश्य सानुजः सह सीतया ॥४३॥ पश्यन्वनानि चित्राणि पर्वतांश्चाभ्रसन्निभान् ॥ सरांसि स
रितश्चैव पथि मार्गवशानुगान् ॥४४॥ सुतीक्ष्णेनोपदिष्टेन गत्वा तेन पथा सुखं ॥ इदं परमसंहृष्टो वाक्यं लक्ष्मणमब्रवीत् ॥४५॥ एतदेवा
श्रमपदं नूनं तस्य महात्मनः ॥ अगस्त्यस्य मुनेर्भ्रातुर्दृश्यते पुण्यकर्मणः ॥४६॥ यथा हीमे वनस्यास्य ज्ञाताः पथि सहस्रशः ॥ सन्नताः फलभारेण पु
ष्पभारेण च द्रुमाः ॥४७॥ पिप्पलीनां च पक्वानां वनादस्मादुपागतः ॥ गंधोयं पवनोत्क्षिप्तः सहसा कटुकोदयः ॥४८॥ तत्र तत्र च दृश्यंते
संक्षिप्ताः काष्ठसंचयाः ॥ लूनाश्च परिदृश्यंते दर्भा वैडूर्यवर्चसः ॥४९॥ एतच्च वनमध्यस्थं कृष्णाभ्रशिखरोपमं ॥ पावकस्याश्रमस्थस्य धू
माग्रं संप्रदृश्यते ॥५०॥ विविक्तेषु च तीर्थेषु कृतस्नाना द्विजातयः ॥ पुष्पोपहारं कुर्वंति कुसुमैः स्वयमर्जितैः ॥५१॥ ततः सुतीक्ष्णावचनं
यथा सौम्य मया श्रुतम् ॥ अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति ॥५२॥ निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ॥ यस्य भ्रात्रा कृतेयं
दिक्शरण्या पुण्यकर्मणा ॥५३॥ ॥५३॥ ॥श्रीरामायनमः॥७॥

नुभवमप्याह पिप्पलीनामिति । पिप्पलीनामित्यर्थः कटुकोदयः कटुकरससंबंधुदयः ॥४८॥४९॥ कृष्णाभ्रं नीलाभ्रं शिखरं पर्वतशिखरं वोपमा यस्य ॥५०॥ विविक्तेषु निर्म
लेषु एकांतेषु च स्वयमेवार्जितैः देवपूजार्थमिति शेषः ॥५१॥ ॥५२॥ मृत्युं तत्तुल्यं दैत्यं शरण्या वासयोग्या लोकानां ॥५३॥ ॥५३॥ ॥७॥

श्री॰

कोसौ मन्त्रतुल्यो स्तुते योगबलेन निगृहीतो लोकात्क्षयणायतनत्वदास्याधिकामाहुः इहेति वनेइत्यर्थः एकदा कस्मिंश्चित्पूर्वकाले ॥५४॥ ब्राह्मणरूपं ब्राह्म
णसदृशवेषसंस्कृतं वदन् ब्राह्मणवदिति शेषः एतदुभयं विश्वासार्थं ॥५५॥ संस्कृतं कृत्वा श्राद्धोचितपाकसंस्कारसंस्कृतं कृत्वा ॥५६॥ ५७॥ मेषवन्नदन्

इहैकदा किल क्रूरो वातापिरपि चेल्वलः ॥ भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ॥५४॥ धारयन्ब्राह्मणं रूपं इल्वलः संस्कृतं व
दन् ॥ आमन्त्रयति विप्रान्स श्राद्धमुद्दिश्य निर्घृणः ॥५५॥ भ्रातरं संस्कृतं कृत्वा ततस्तं मेषरूपिणं ॥ तान्द्विजान्भोजयामास श्राद्धदृष्टेन
कर्मणा ॥५६॥ ततो भुक्तवतां तेषां विप्राणामिल्वलोब्रवीत् ॥ वातापे निष्क्रमस्वेति स्वरेण महता वदन् ॥५७॥ ततो भ्रातुर्वचः श्रुत्वा वा
तापिर्मेषवन्नदन् ॥ भित्वा भित्वा शरीराणि ब्राह्मणानां विनिष्पतत् ॥५८॥ ब्राह्मणानां सहस्राणि तैरेवं कामरूपिभिः ॥ विनाशितानि सं
हत्य नित्यशः पिशिताशनैः ॥५९॥ अगस्त्येन तदा देवैः प्रार्थितेन महर्षिणा ॥ अनुभूय किल श्राद्धे भक्षितः स महासुरः ॥६०॥ ततः संपन्नमि
त्युक्त्वा दत्वा हस्तेवनेजनं ॥ भ्रातरं निष्क्रमस्वेति इल्वलः समभाषत ॥६१॥ स तदा भाषमाणं तु भ्रातरं विप्रघातिनं ॥ अब्रवीत्प्रहसन्धीम
नगस्त्यो मुनिसत्तमः ॥६२॥ कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः ॥ भ्रातुस्तु मेषरूपस्य गतस्य यमसादनं ॥६३॥ अथ तस्य वचः श्रुत्वा भ्रा
तुर्निधनसंश्रितं ॥ प्रधर्षयितुमारेभे मुनिं क्रोधान्निशाचरः ॥६४॥ सोभ्यद्रवद्द्विजेंद्रं तं मुनिना दीप्ततेजसा ॥ चक्षुषानलकल्पेन निर्दग्धो नि
धनं गतः ॥६५॥ तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ॥ विप्रानुकंपया येन कर्मेदं दुष्करं कृतं ॥६६॥ एवं कथयमानस्य तस्य सौ[illegible]मि
त्रिणा सह ॥ रामस्यास्तंगतः सूर्यः संध्याकालोभ्यवर्तत ॥६७॥ उपास्य पश्चिमां संध्यां सह भ्रात्रा यथाविधि ॥ प्रविवेशाश्रमपदं तमृषिं चा
भ्यवादयत् ॥

मृतसंजीवनीवैभवादुदरान्निरिति शेषः विनिष्पतत् विनिर्गतवान् अडभाव आर्षः ॥५८॥ संहत्य समेत्य ॥५९॥ प्रार्थितेन प्रार्थितासुरक्षयसंहारेण महर्षिणाग
स्त्येन श्राद्धव्यापारमनुभूय भक्षितः सोसुरो वातापिः ॥६०॥ ततः इल्वलः श्राद्धान्ते संपन्नमित्युक्त्वा हस्तोदकं दत्वा भ्रातरं निष्क्रमस्वेत्यभ्यभाषत ॥६१॥६२॥ मया
जीर्णस्य भुक्तेनिः ॥६३॥ प्रधर्षयितुं हिंसितुं ॥६४॥ चक्षुषा चक्षुर्वीक्षणेन अनलकल्पेन ॥६५॥ ६६॥ ६७॥ ६८॥

3

॥६९॥७०॥अभिवादयेत्त्वोनपादेन वाक्षरन्वमार्थं॥७१॥७२॥निवाराननजलकंदवाः वंजुलोऽशोकः निनिशोधवः चिरिविल्वोनक्तमालः॥७३॥७४॥ ७५॥७६॥य(

ससत्कृतो निराहीनस्तुमनिनानेन राघवः॥न्यवसत्तां निशामेकां प्राश्य मूलफलानि च॥६९॥तस्यां रात्र्यां व्यतीतायां पुरःस्थिते रविमंडले॥आ
नरं तमगस्त्यस्य आमंत्रयत राघवः॥७०॥अभिवादयेत्वा भगवन्सुखमस्म्युषितो निशां॥आमंत्रयेत्वा गच्छामि गुरुणे तदृष्टुमनुज्ञं॥७१॥
गम्यतामिति तेनोक्तो जगाम रघुनंदनः॥यथोदिष्टेन मार्गेण वनं तच्चावलोकयन॥७२॥नीवारान्पनसान्सालांल्लांस्तिनिशांस्तथा
चिरिविल्वान्मधूकांश्च विल्वानथ च तिंदुकान॥७३॥पुष्पितान्पुष्पिताग्राभिर्लताभिरुपशोभितान॥ददर्श रामः शतशस्तत्र कांतार
पादपान॥७४॥हस्तिहस्तैर्विमर्दितान्वानरैरुपशोभितान॥मत्तैः शकुनिसंघैश्च शतशः प्रतिनादितान॥७५॥ततोऽब्रवीत्समीपस्थं रामो
राजीवलोचनः॥पृष्ठतोनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनं॥७६॥स्निग्धपत्रा यथा वृक्षा यथा क्षांता मृगद्विजाः॥आश्रमो नातिदूरस्थो म
हर्षेर्भावितात्मनः॥७७॥अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा॥आश्रमो दृश्यते तस्य परिश्रांतश्रमापहः॥७८॥प्राज्यधूमाकुलव
नश्चीरमालापरिष्कृतः॥प्रशांतमृगयूथश्च नानाशकुनिनादितः॥७९॥निगृह्य तरसा मृत्युं लोकानां हितकाम्यया॥दक्षिणा दिक्
कृता येन शरण्या पुण्यकर्मणा॥८०॥तस्येदमाश्रमपदं प्रभावाद्यस्य राक्षसैः॥दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते॥८१॥यदाप्र
भृति चाक्रांता दिगियं पुण्यकर्मणा॥तदाप्रभृति निर्वैराः प्रशांता रजनीचराः॥८२॥ ॥८२॥ ॥श्रीरामायनमः॥ ॥७॥

यान्तुनास्तथास्निग्धावाहृक्षादृश्यंते इति शेषः अतो निकट आश्रमः॥७७॥अगं विंध्यं स्तंभयतीत्यगस्त्यः पृषोदरादिः स्वेन कर्मणा विंध्यस्तंभनकर्मणा परिश्रांतश्रमापहः
ना॥७८॥प्राज्यैर्भूरिभिर्धूमैः पाकयज्ञधूमैः पाकयज्ञधूमैराकुलं वनं यस्मिन्॥७९॥८०॥यस्य प्रभावाद्राक्षसैरियमगस्त्याश्रमपदं शावर्जिनी दक्षिणा दिग्दृश्यते
केवलं त्रासान्महर्षिभीत्या नोपभुज्यते न स्वदेशत्वेनांगीक्रियत इत्यर्थः॥८१॥निर्वैराः प्राणिषु वैररहिताः प्रशांताः त्यक्तक्रूर(

ता॰ सुंज्यु ३

॥रा·बा·मा॥
॥१४॥

भगवतोऽगस्त्यस्य महिम्ना प्रदक्षिणास्तराम्प्रसादावच्छेदेन निर्वैरत्वादिसंपादनसमर्था क्रूरकर्मभी रक्षोभिर्दुर्धर्षाऽतो नाम्ना चनाम्नापि संपूर्णा दिगेव दक्षिणेति त्रि
षु लोकेषु प्रथिता ॥८३॥ मेरुस्पर्धया भास्करमार्गं निरोद्धुं वर्धितुकामो योसौ विंध्यस्तस्यागस्त्यस्य संदेशं मदागमनपर्यंतं मा वर्धस्वेत्येवमाज्ञां पालयन्न वर्धतेऽन्यथा
पीति शेषः ॥८४॥८५॥ अधिगतानस्मानाश्रमप्राप्तान्श्रेयसा योजयिष्यति दिव्यशस्त्रादिदानेनेति गूढाभिसंधिः ॥८६॥ प्रभो प्रभुणा समर्थेनेत्यर्थः ॥८७॥८८॥ क्रू

नाम्ना चेयं भगवतो दक्षिणा दिक् प्रदक्षिणा ॥ प्रथिता त्रिषु लोकेषु दुर्धर्षा क्रूरकर्मभिः ॥८३॥ मार्गं निरोद्धुं सततं भास्करस्याचलोत्त
मः ॥ संदेशं पालयंस्तस्य विंध्यशैलो न वर्द्धते ॥८४॥ अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः ॥ अगस्त्यस्याश्रमः श्रीमान्विनीतमृगसे
वितः ॥८५॥ एष लोकार्चितः साधुर्हिते [redacted] नित्यं रतः सतां ॥ अस्मानधिगतानेष श्रेयसा योजयिष्यति ॥८६॥ आराधयिष्याम्यत्राहमग
स्त्यं तं महामुनिं ॥ शेषं च वनवासस्य सौम्य वत्स्याम्यहं प्रभो ॥८७॥ अत्र देवाः सगंधर्वाः सिद्धाश्च परमर्षयः ॥ अगस्त्यं नियताहाराः सततं प
र्युपासते ॥८८॥ नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः ॥ नृशंसः पापवृत्तो वा मुनिरेष तथाविधः ॥८९॥ अत्र देवाश्च यक्षाश्च नागाश्च पत
गैः सह ॥ वसंति नियताहारा धर्ममाराधयिष्णवः ॥९०॥ अत्र सिद्धा महात्मानो विमानैः सूर्यसन्निभैः ॥ त्यक्त्वा देहान्नवैर्देहैः स्वर्याताः प
रमर्षयः ॥९१॥ यक्षत्वममरत्वं च राज्यानि विविधानि च ॥ अत्र देवाः प्रयच्छंति भूतैराराधिताः शुभैः ॥९२॥ आगताः स्माश्रमपदं सौमित्रे
प्रविशाग्रतः ॥ निवेदयेह मां प्राप्तमृषये सह सीतया ॥९३॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकांडे एकादशः सर्गः ॥११॥
स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः ॥ अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ॥१॥ ॥७॥ ॥७॥ ॥७॥

रः निर्दयः शठो गूढविप्रियकारी नृशंसो घातकः तथाविधः दुर्वृत्तासहिष्णुः ॥८९॥ पतंगा गरुडादयः धर्मं स्वर्गादिजनकं ॥९०॥ अत्र आश्रमे सिद्धाः तपसेति शेषः नवै
र्देहैर्दिव्यदेहैः ॥९१॥ अत्राश्रमे भूतैः प्राणिभिः कर्तृभिः शुभैः सत्कर्मभिराराधिता देवा अस्य आश्रममाहात्म्यादल्पकालेनैव राज्यादीनि प्रयच्छंतीत्यर्थः ॥९२॥
॥९३॥ ॥ इति रामाभिरामे आर० एकादशः सर्गः ॥११॥ ॥१॥

६९.४

७१
4

॥राम॥
॥१४॥

॥२॥ हितः शुभकरी अनुकूलस्त्वदिच्छावशवर्त्ती भज्यविषयानुरागो भक्तिस्तद्वान्भक्तिस्तद्वान्भक्तः यदीति संभावनायां वक्तुरिति वने वासादस्मच्छ्रवणं न वापि संभावितमित्यर्थः॥३॥ भगवंतं द्रष्टुमिच्छामहे तोर्दर्शनार्थमागता इति निवेद्यतामित्यर्थः॥४॥ अग्निशरणमग्निहोत्रगृहं निवेदितुं निवेदयितुं॥५॥ अंजसा शीघ्रं॥६॥ संमत इष्टः॥७॥ द्रष्टुं दर्शनं तं कियत्कालं शुश्रूषार्थं सेवार्थं चागतौ॥८॥ अनंतरं तत्त्वं वक्तव्यं यत्तत्त्वं उपश्रुत्य भगवदागमनश्रवणानंदमनुभूयेत्यर्थ इति तीर्थः

राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली॥ रामः प्राप्तो मुनिं द्रष्टुं भार्यया सह सीतया॥२॥ लक्ष्मणो नाम तस्याहं भ्राता त्ववरजो हितः॥ अनुकूलश्च भक्तश्च यदि ते श्रोत्रमागतः॥३॥ ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात्॥ द्रष्टुमिच्छामहे सर्वे भगवंतं निवेद्यतां॥४॥ तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः॥ तथेत्युक्त्वाग्निशरणं प्रविवेश निवेदितुं॥५॥ स प्रविश्य मुनिश्रेष्ठं तपसा दुष्प्रधर्षणं कृतांजलिरुवाचेदं रामागमनमंजसा॥६॥ यथोक्तं लक्ष्मणेनैव शिष्योगस्त्यस्य संमतः॥ पुत्रौ दशरथस्येमौ रामो लक्ष्मण एव च॥७॥ प्रविष्टावाश्रमपदं सीतया सह भार्यया॥ द्रष्टुं भवंतमायातौ शुश्रूषार्थमरिंदमौ॥८॥ यदत्रानंतरं तत्त्वमाज्ञापयितुमर्हसि॥ ततः शिष्यादुपश्रुत्य प्राप्तं रामं सलक्ष्मणं॥९॥ वैदेहीं च महाभागामिदं वचनमब्रवीत्॥ दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः॥१०॥ मनसा कांक्षितं ह्यस्य मयाप्यागमनं प्रति॥ गम्यतां सत्कृतो रामः सभार्यः सह लक्ष्मणः॥११॥ प्रवेश्यतां समीपं मे किमसौ न प्रवेशितः॥ एवमुक्तस्तु मुनिना धर्मज्ञेन महात्मना॥१२॥ अभिवाद्याब्रवीच्छिष्यस्तथेति नियतांजलिः॥ ततो निष्क्रम्य संभ्रांतः शिष्यो लक्ष्मणमब्रवीत्॥१३॥ ॥

॥९॥ मां द्रष्टुं समागत इति यत् दिष्ट्या मम भाग्येन किंचांतर्भावितण्यर्थो दृशिः मामात्मानं दर्शयितुं यत् वने वसतश्चिरस्य चिरकालस्यागमने प्यागतस्तत् दिष्ट मद्भाग्येनाद्भुतप्रेम्नेत्यर्थः॥१०॥ तदेवाह मनसेति एतदागमनमुद्दिश्य कांक्षितं इच्छाकृतमिति यावत् सत्कृतः आचारोपचारव्यवहारैरित्यर्थः॥११॥ किमसौ न प्रवेशितः कस्माद्धेतो विलंबः कृत इत्यर्थः॥१२॥ अभिवाद्य आगमननियोगप्रयुक्तं पुनरभिवादनं कृत्वा तथेति आनयामीत्येवं॥१३॥ ॥८॥

स्वयंप्रविश तु भगवतावगतं त्वं न त्वान्तरास्य शिष्यमुखापेक्षेति भावः आश्रमपदं आश्रमप्रान्तदेशं ॥१४॥ लक्ष्मणः काकुत्स्थं रामं प्रदर्शयामास शिष्यमिति शेषः नेदं रामं शिष्य अगस्त्यवचनं उद्यानशतिवचनं अगस्त्योक्तं वाक्यं प्रश्रितं प्रीतियुक्तं ब्रुवन् प्रावेशयदित्यन्वयः ॥१५॥ सुसत्कृतं पाद्यार्घ्यादिभिरागत्यमार्गप्रदर्शनेन वसत्कृतं ॥१६॥ अगस्त्याश्रमस्य देवतास्थानदर्शनमाह तत्रेति । तत्राश्रमे स रामः ब्रह्मणो हिरण्यगर्भस्य कल्पितं स्थानं अग्निरत्र रुद्रः सगः स्थूलमंडलाभिमानी

कौसल्यो मामुनिं द्रष्टुमेतु प्रविशतु स्वयं ॥ ततो गत्वाश्रमपदं शिष्येण सह लक्ष्मणः ॥१४॥ दर्शयामास काकुत्स्थं सीतां च जनकात्मजां ॥ तं शिष्यः प्रश्रितं वाक्यमगस्त्यवचनं ब्रुवन् ॥१५॥ प्रावेशयद्यथान्यायं सत्कारार्हं सुसत्कृतं ॥ प्रविवेश ततो रामः सीतया सह लक्ष्मणः ॥१६॥ प्रशान्तहरिणाकीर्णमाश्रमं ह्यवलोकयन् ॥ स तत्र ब्रह्मणः स्थानमग्नेः स्थानं तथैव च ॥१७॥ विष्णोः स्थानं महेन्द्रस्य स्थानं चैव विवस्वतः ॥ सोमस्थानं भगस्थानं स्थानं कौबेरमेव च ॥१८॥ धातुर्विधातुः स्थानं च वायोः स्थानं तथैव च ॥ स्थानं च पाशहस्तस्य वरुणस्य महात्मनः ॥१९॥ स्थानं तथैव गायत्र्या वसूनां स्थानमेव च ॥ स्थानं च नागराजस्य गरुडस्थानमेव च ॥२०॥ कार्त्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ॥ ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ॥२१॥ तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसं ॥ अब्रवीद्वचनं वीरो लक्ष्मणं लक्ष्मिवर्द्धनं ॥२२॥ बहिर्लक्ष्मण निष्क्रामत्यगस्त्यो भगवानृषिः ॥ औदार्येणावगच्छामि निधानं तपसामिमं ॥२३॥ एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसं ॥ जग्राह पततस्तस्य पादौ च रघुनन्दनः ॥२४॥ अभिवाद्य तु धर्मात्मा तस्थौ रामः कृताञ्जलिः ॥ सीतया सह वैदेह्या तदा रामः सलक्ष्मणः ॥२५॥

॥१७॥१८॥ धाता कार्यप्रजापतिः विधाता विश्वकर्मेति कतकः ॥१९॥ गायत्री सरस्वती सावित्र्योरप्युपलक्षणं ॥२०॥ एषां स्थानानि पश्यतीत्यन्वयः एतेन पूजास्थाने एतावतां देवतानां पूजा वन्यफलैः नित्यमिति भावः अभिनिष्पतत् अभ्यागमत् आर्षः अभ्युत्थानं कृतवानित्यर्थः ॥२१॥ मुनीनामग्रतः स्थितमिति शेषः ईदृशं तमगस्त्यं ददर्शेत्यन्वयः ॥२२॥ औदार्येण तेजोविशेषजनितोत्कर्षेण ॥२३॥ एवमगस्त्यमुक्त्वा लक्ष्मणं प्रतिबोधयित्वा आपततः आश्रमादागच्छतः तस्य अगस्त्यस्य पादौ जग्राह हस्ताभ्यामस्पृशच्च पादौ तस्य च्युतमप्युपकारेत्यर्थः ॥२४॥ आगहं ढिपाणमशद्दयापोनहं ॥२५॥ ॥२५॥

5

प्रतिगृह्य उत्थापन पूर्वमालिंग्येत्यर्थः ॥२४॥ अर्चनस्यैव विस्तरेणपदेशाग्निमिति वैश्वदेवहोमं कृत्वेत्यर्थः अतिथीनुरगमादीन् ॥२५॥ आसीनं पश्चादासीनमित्यर्थः इति पाठे:
ममनुमाति प्रथममिति भोजनं ददावित्यनेनान्वेति अथोपविश्य अतिथिपूजायागतयानावश्यर्थनमनुपवेशनमिति ॥२८॥ एवं क्षत्रियपूजानुचितेत्याशंकासमा
धित्सुः पक्षान्तं धर्ममुवाचेत्याह अन्यथेति अन्यथा समुदाचरन् एवमतिथिपूजनमकुर्वन्नित्यर्थः दुःसाक्षी कूटसाक्षी एवं च प्रत्यवायपरिहारायैवमतिथिपूजावश्य

प्रतिगृह्य च काकुत्स्थमर्चयित्वासनोदकैः॥ कुशलप्रश्नमुक्त्वा च आस्यतामिति सोब्रवीत् ॥२६॥ अग्निं हुत्वा प्रदायार्घ्यमतिथीन्प्रतिपूज्य च
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥२७॥ प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुंगवः॥ उवाच राममासीनं प्राञ्जलिं धर्मकोविदं ॥२८॥ अन्यथा
खलु काकुत्स्थ तपस्वी समुदाचरन् ॥ दुःसाक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥२९॥ राजा सर्वस्य लोकस्य धर्मचारी महारथः ॥ पूजनी
यश्च मान्यश्च भवान्प्राप्तः प्रियातिथिः ॥३०॥ एवमुक्त्वा फलैर्मूलैः पुष्पैश्चान्यैश्च राघवं ॥ पूजयित्वा यथाकामं ततोगस्त्यस्तमब्रवीत् ॥३१॥
इदं दिव्यं महच्चापं हेमवज्रविभूषितं ॥ वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥३२॥ अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः ॥ दत्तो मम म
हेन्द्रेण तूणी चाक्षय्यसायकौ ॥३३॥ संपूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः ॥ महाराजतकोशोयमसिर्हेमविभूषितः ॥३४॥ अनेन
धनुषा राम हत्वा संख्ये महासुरान् ॥ आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसां ॥३५॥ तद्धनुस्तौ च तूणी च शरं खड्गं च मानद ॥ जयाय प्रति
गृह्णीष्व वज्रं वज्रधरो यथा ॥३६॥

कीन्याशयः ॥२९॥ त्वदधिकोतिथिर्नास्तीत्याह राजेति सर्वलोकराजा सर्वलोकनियंतृत्वेनेश्वरत्वं गर्भितं धर्मचारी धर्माचरणेन तत्प्रवर्त्तकः ईदृशस्त्वं प्रियातिथिः सन् प्राप्तो
ऽतः पूजनीयो मान्यश्च मान्यत्वेनेतः परं त्वमेवास्माकमाराधनीय इति सूचितं ॥३०॥३१॥ हेम्ना वज्रेण च भूषितं वैष्णवमिति परशुरामात् गृहीत्वा वरुणहस्ते दत्तं यद्रामेणानदे
ववरुणाद्दाशरायमहेन्द्रोगस्त्ये निक्षिप्तवानिति कतकः योगेन महेन्द्रपदेनात्र वरुण एवोच्यते ॥३२॥ ब्रह्मणा दत्तो ब्रह्मदत्तः शरश्च तूणी चेति चेन धनुःशरयोरहमयोरिदं
स्त्रत्वं गम्यते ॥३३॥ महाराजतं सुवर्णं हेमविभूषितो मुष्टिदेशः ॥३४॥३५॥ वज्रं वज्रधरो यथेत्यनेन त्वरीयमेव त्वया स्वीक्रियत इति नः

वरायुधं वरस्य विष्णोरायुधं उत्तमायुधं च ॥ ३७ ॥ इति रामाभिरामे श्री रा० रा० ति० आर० द्वादशः सर्गः ॥ १२ ॥ ॥ रामप्रीतोस्मि लक्ष्मण त्वयि च परितुष्टोस्मि रामस्येवानन्य
रत्वेन परितोषः भगवद्विषयप्रीतेरेव भक्तित्वेन त्वद्भक्तोहमिति ध्वनितं स्थ इति अस्तेर्लिट्मध्यमपुरुषद्विवचनं ॥ १ ॥ अध्वश्रमेण अध्वगमनादिप्रयुक्तखेदादिकार्य
कारी श्रमः खेदः दुःख प्रचुरश्रमसम्बन्धदुःखं बाधते मैथिलीमिति शेषः मनस्वेयं यत्कसुन्कं रते कञ्चिद्विश्रान्तये इति शेषः ॥ २ ॥ न विमानिता नाशनः शाककरादिना पीडिता खेदे
खेदजनकं दुःखं वा रिनिपाठान्तरं प्राज्यदोषप्रभूतदोषं ॥ ३ ॥ ४ ॥ दुष्करकरणप्रतिपादनेन शेषवनवासे लोकव्यवहारमाह एषेति आसृष्टेः सृष्टिमारभ्य समस्थं धनधान्यादिषु

एवमुक्त्वा महातेजाः समस्तं तद्वरायुधं ॥ दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवीत् ॥ ३७ ॥ ॥ इत्यार्षे श्रीरामायणे आरण्यकाण्डे द्वादशः सर्गः ॥ १२ ॥
रामप्रीतोस्मि भद्रं ते परितुष्टोस्मि लक्ष्मण ॥ अभिवादयितुं यन्तौ प्राप्तौ स्थः सह सीतया ॥ १ ॥ अध्वश्रमेण वां खेदो बाधते प्रचुरश्रमः ॥ व्य
क्तमुत्कण्ठते वापि मैथिली जनकात्मजा ॥ २ ॥ एषा च सुकुमारी च दुःखैश्च न विमानिता ॥ प्राज्यदोषं वनं प्राप्ता भर्तृस्नेहप्रचोदिता ॥ ३ ॥ य
थैषा रमते राम इह सीता तथा कुरु ॥ दुष्करं कृतवत्येषा वने त्वामनुगच्छती ॥ ४ ॥ एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ॥ समस्थमनुर
ज्यन्ते विषमस्थं त्यजन्ति च ॥ ५ ॥ शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ६ ॥ इयं तु भवतो भा
र्या दोषैरेतैर्विवर्जिता ॥ श्लाघ्या च व्यपदेश्या च यथा देवी ह्यरुन्धती ॥ ७ ॥ अलंकृतोयं देशश्च यत्र सौमित्रिणा सह ॥ वैदेह्या चानया राम वत्स्यसि
त्वमरिंदम ॥ ८ ॥ एवमुक्तस्तु मुनिना राघवः संयताञ्जलिः ॥ उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलं ॥ ९ ॥ धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनि
पुंगवः ॥ गुणैः सभ्रातृभार्यस्य गुरुर्नः परितुष्यति ॥ १० ॥ किंतु व्यादिश मे [illegible] देशं सोदकं बहुकाननं ॥ यत्राश्रमपदं कृत्वा वसेयं निरतः सुखं ॥ ११ ॥ त
तोब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितं ध्यात्वा मुहूर्तं धर्मात्मा ततो वाच वचः शुभं ॥ १२ ॥ ॥ ७ ॥

काननयोस्समग्रवस्थितं विषमस्थं दरिद्ररोगादिग्रस्तं ॥ ५ ॥ एकत्रानवस्थानात् शीघ्रगतिं चाञ्चल्यमनुगच्छन्ति · तत्कालागतस्नेहं च्छेदेन शस्त्रतैक्ष्ण्यानुगमः नियकार्यकरणे वा
न्यादिशैघ्र्यानुगमः ॥ ६ ॥ श्लाघ्या दोषराहित्यपूर्वकं गुणसम्पन्नतया प्रशंसनीया व्यपदेश्या पतिव्रतासु अग्रगण्या ॥ ७ ॥ अयं देशो मदाश्रमरूपः आगमनमात्रेण अलंकृतः हे राम य
त्र देशे इतः परं त्वं वत्स्यसि सोलंकृतो भविष्यतीति किं वक्तव्यमित्यर्थः ॥ ८ ॥ ९ ॥ १० ॥ किन्तु किंविधं कृत्वा मल्लीनार्थः व्यादिश बोधय आश्रमपदं वासस्थानं निरतः प्रीतः ॥ ११ ॥ ध्या
त्वा वासोचितदेशमिति शेषः ततउवाचेत्यर्थः संधिरार्षः ॥ १२ ॥ ॥ १२ ॥

6

तत्रपंचवटसमूहसत्वात्पंचवटीतिनाम्नाभिविश्रुतःप्रसिद्धः॥१३॥१४॥एषवृत्तान्तोनःपितृवचनपरिपालनायवनवासरूपः तवस्नेहात्तपसःप्रभावेनचविदितः नस्वस्त्रिय
म्भ्रान्तेनतपसाज्ञातत्वात्तुयतनेकश्चित् दशरथस्यवृत्तान्तःकैकेयीवशगत्वप्राणत्यागादिरूपस्तनएवमेविदितः॥१५॥यदिहवासंप्रतिज्ञाय आराधयिष्यामस्त्वामहं अगस्त्यनेमह
र्षिशेषंचवनवासस्यसौम्यवत्स्याम्यहमित्यनेनममसमीपइहमदाश्रमेवासंप्रतिज्ञायपुनर्मांप्रतिव्यादिशसेवासमित्यनेनहृदसितन्मूलेनहृदयस्थश्छन्दअभिप्रायो
मयाज्ञातंअत्रावस्थानेप्रतिज्ञातराक्षसवधनिर्वाहोनभवति अत्रराक्षसागमनाभावादित्येवंरूपइतिभावः॥१६॥ ॥१६॥ ॥अतस्त्वदभिप्रायज्ञानात्त्वांपंचवटीं

इतोद्वियोजनेतातवहुमूलफलोदकः॥देशोवहुमृगःश्रीमानपंचवट्यभिविश्रुतः॥१३॥ तत्रगत्वाश्रमपदंकृत्वासौमित्रिणासह
रमस्वत्वंपितुर्वाक्यंयथोक्तमनुपालय॥१४॥विदितोह्येषवृत्तान्तोममसर्वस्तवानघ॥तपसश्चप्रभावेनस्नेहाद्दशरथस्यच॥१५॥हृद
यस्थश्चतेछन्दोविज्ञातस्तपसामया॥इहवासंप्रतिज्ञायमयासहतपोवने॥१६॥अतश्चत्वामहंब्रूमिगच्छपंचवटीमिति॥सहिर
म्योवनोद्देशोमैथिलीतत्ररंस्यते॥१७॥सदेशःश्लाघनीयश्चनातिदूरेचराघव॥गोदावर्याःसमीपेचमैथिलीतत्ररंस्यते॥१८॥प्राज्य
मूलफलश्चैवनानाद्विजगणायुतः॥विविक्तश्चमहाबाहोपुण्योरम्यस्तथैवच॥१९॥भवानपिसदाचारःशक्तश्चपरिरक्षणे॥अपि
चात्रवसन्रामस्तापसान्पालयिष्यति॥२०॥एतदालक्ष्यतेवीरमधूकानांमहद्वनं॥उत्तरेणास्यगन्तव्यंन्यग्रोधमपिगच्छता॥२१॥
ततःस्थलमुपारुह्यपर्वतस्याविदूरतः॥ख्यातःपंचवटीत्येवनित्यपुष्पितकाननः॥२२॥अगस्त्येनैवमुक्तस्तुरामःसौमित्रिणासह॥
सत्कृत्यामन्त्रयामासतमृषिंसत्यवादिनं॥२३॥तौतुतेनाभ्यनुज्ञातौकृतपादाभिवन्दनौ॥तमाश्रमंपंचवटींजग्मतुःसहसीतया॥

गच्छेतिब्रूमिब्रवीमिनतुशिष्यवद्व्यापारोपिचितमपीहनिष्ठेतिब्रवीमीत्यर्थः तद्वृत्तार्थवादस्माहसहीनि॥१७॥१८॥विविक्तःएकान्तःपुण्यःपुण्यजनकोरम्योदृष्टिमनसोः॥१९॥परिरक्ष
णाशक्तस्तापसानामितिशेषः भवानपीत्यनेनस्वस्यापितापसरक्षणसामर्थ्यंबोधनेनस्वाश्रमेराक्षसापीडासूचिता अत्रपंचवट्याश्रमे पालयिष्यसिप्रतिज्ञातपालननिर्वा
हंकरिष्यसि॥२०॥अस्यमधूकवनस्योत्तरेणेत्यर्थः न्यग्रोधस्तुउपलक्षितमाश्रमंगच्छता॥२१॥स्थलंनिर्वृतदेशंउपारुह्यप्राप्यकस्यचित्पर्वतस्याविदूरतःसमीपतःपंचव
टीत्येवख्यातोदेशः॥२२॥सत्कृत्यप्रदक्षिणनमस्कारादिभिः॥२३॥२४॥

विषक्ततूणी ययोस्ते सर्वे पदे पदे वृत्तं ॥२५॥ इत्यारण्ये रामाभिरामे श्रीरामीये रामायणतिलके त्रयोदशः सर्गः ॥१३॥ ॥अन्तरा मध्ये ॥१॥ तं पक्षिणं पक्षिरूपं राक्षसं मेनाते विज्ञातवन्तौ·
न राक्षसं ब्रुवाणौ परस्परं कथयन्तौ को भवानिति पृच्छन्तुरिति शेषः ॥२॥ आत्मनः पितुः श्रीरामस्य तत्व पितुरित्यर्थः ॥३॥ ४ वचनं वंशनामप्रश्नविषयकं वचनमित्यर्थः सोऽन्व
त्मिकथनपूर्वं सर्वभूतसमुद्भवमाचचक्षे इत्यर्थः आत्मानमात्मनाम चेत्यर्थः ॥५॥ पूर्वकाले ब्रह्मणोऽहरादिकाले तान् प्रजापतीन् ॥६॥ कर्दमाद्याः सप्तदश प्रजापतयो

गृहीतचापौ तु नराधिपात्मजौ विषक्ततूणी समरेष्वकातरौ ॥ यथोपदिष्टेन पथा महर्षिणा प्रजग्मतुः पंचवटीं समाहितौ ॥२५॥ ॥इत्यार्षे
श्रीमद्रामायणे वा० आरण्यकाण्डे त्रयोदशः सर्गः ॥१३॥ ॥अथ पंचवटीं गच्छन्नन्तरा रघुनन्दनः ॥ आससाद महाकायं गृध्रं भीमपराक्रमं
॥१॥ तं दृष्ट्वा तौ महाभागौ वनस्थं रामलक्ष्मणौ ॥ मेनाते राक्षसं पक्षिं ब्रुवाणौ को भवानिति ॥२॥ ततो मधुरया वाचा सौम्यया प्रीणयन्निव ॥
उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः ॥३॥ स तं पितृसखं मत्वा पूजयामास राघवः ॥ स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च ॥४॥ रामस्य व
चनं श्रुत्वा कुलमात्मानमेव च ॥ आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवं ॥५॥ पूर्वकाले महाबाहो ये प्रजापतयोऽभवन् ॥ तान्मे निगदितः स
र्वानादितः शृणु राघव ॥६॥ कर्दमः प्रथमस्तेषां विकृतस्तदनन्तरं ॥ शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ॥७॥ स्थाणुर्मरीचिरत्रिश्च
क्रतुश्चैव महाबलः ॥ पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ॥८॥ दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव ॥ कश्यपश्च महातेजास्तेषामा
सीच्च पश्चिमः ॥९॥ प्रजापतेस्तु दक्षस्य बभूवुरिति विश्रुताः ॥ षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥१०॥ कश्यपः प्रतिजग्राह तासाम
ष्टौ सुमध्यमाः ॥ अदितिं च दितिं चैव दनूमपि च कालकां ॥११॥ ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि ॥ तास्तु कन्यास्ततः प्रीतः कश्य
पः पुनरब्रवीत् ॥१२॥ पुत्रांस्त्रैलोक्यभर्तॄन्वै जनयिष्यथ मत्समान् ॥ अदितिस्तन्मना राम दितिश्च दनुरेव च ॥१३॥ ॥७॥

६१ 7

बभूवुः ॥७॥ ८ ॥ ९ ॥ दक्षस्य षष्टिर्दुहितरो बभूवुरित्यन्वयः महायशः इति रामसंबुद्धिः ॥१०॥ दक्षकन्यानां काश्यपपत्नीनां नामान्याह अदितिमित्यादि अष्टाविति पु
लक्षणं कश्यपाय त्रयोदश तन्मध्येऽष्टौ वक्ष्यमाणास्तासां नाम प्रयोगिन्योऽष्टाविति वा ॥११॥ ॥१२॥ ॥१३॥ ॥श्रीरामायनमः॥ ॥७॥

तन्मनास्तस्य दशपुत्राभिलाषवतीइदं दितिदनुकालानां विशेषणं अमनसस्तथामनोरथहीनाः तत्फलं नाम्नां कन्यासंतानं वक्ष्यति॥१४॥अश्विनौ चेत्यंतास्त्रयस्त्रिं
शत॥१५॥तेषां दितिपुत्राणां वनैरणीवैश्चसहितासवनार्णवा॥१६॥१७॥क्रौंच्यादिसंतानमाह उलूकानिति॥१८॥१९॥संबोधननाममध्येमध्येभद्रंतेइतिप्रयोगः हे राम

टी ५

कालकाचमहाबाहोशेषास्त्वमनसोभवन्॥अदित्यांजज्ञिरेदेवास्त्रयस्त्रिंशदरिंदम॥१४॥आदित्यावसवोरुद्राअश्विनौचपरंतप॥दितिस्त्वज
नयत्पुत्रान्दैत्यांस्तान्यशस्विनः॥१५॥तेषामियंवसुमतीपुरासीत्सवनार्णवा॥दनुस्त्वजनयत्पुत्रमश्वग्रीवमरिंदम॥१६॥नरकंका
लकंचैवकालकापिव्यजायत॥क्रौंचींभासींतथाश्येनींधृतराष्ट्रींतथाशुकीं॥१७॥ताम्रातुसुषुवेकन्याःपंचैतालोकविश्रुताः॥उलूका
ञ्जनयत्क्रौंचीभासीभासान्व्यजायत॥१८॥श्येनीश्येनांश्चगृध्रांश्चव्यजायतसुतेजसः॥धृतराष्ट्रीतुहंसांश्चकलहंसांश्चसर्वशः॥१९॥चक्र
वाकांश्चभद्रंतेविजज्ञेसापिभामिनी॥शुकीनतांविजज्ञेतुनतायाविनतासुता॥२०॥दशक्रोधवशारामविजज्ञेप्यात्मसंभवाः॥मृगींचमृ
गमंदांचहरींभद्रमदामपि॥२१॥मातंगीमथशार्दूलींश्वेतांचसुरभिंतथा॥सर्वलक्षणसंपन्नांसुरसांकद्रुकामपि॥२२॥अपत्यंतु
मृगाःसर्वेमृग्यानरवरोत्तम॥ऋक्षाश्चमृगमंदायाःसृमराश्चमरास्तथा॥२३॥ततस्त्विरावतींनामजज्ञेभद्रमदासुता॥तस्यास्त्वैरावतःपु
त्रोलोकनाथोमहागजः॥२४॥हर्यांश्चहरयोपत्यंवानराश्चतपस्विनः॥गोलांगूलांश्चशार्दूलीव्याघ्रांश्चाजनयत्सुतान्॥२५॥मातंग्यास्त्व
थमातंगाअपत्यंमनुजर्षभ॥दिशागजंतुकाकुत्स्थश्वेताव्यजनयत्सुतान्॥२६॥ततोदुहितरौरामसुरभिर्द्वेव्यजायत॥रोहिणींनामभद्रंतेगंधर्वीं
चयशस्विनीं॥२७॥रोहिण्यजनयद्गावोगंधर्वीवाजिनःसुतान्॥सुरसाजनयन्नागानरामकद्रूश्चपन्नगान्॥२८॥मनुर्मनुष्याञ्जनयत्कश्य
पस्यमहात्मनः॥ब्राह्मणान्क्षत्रियान्वैश्याञ्छूद्रांश्चमनुजर्षभ॥२९॥

तेभद्रमस्त्वितिशेषः॥२०॥क्रोधवशाकाश्यपस्य षष्ठपत्नीतस्यादशापत्यान्याह मृगींचेति॥२१॥२२॥सृमराः श्यामकेशपुच्छाः चमराः श्वेतकेशपुच्छाः इति भेदः॥२३॥
॥२४॥हरयःसिंहाःगोलांगूलाइतिपूर्वान्वयि॥२५॥२६॥२७॥गावोगाइत्यर्थः नागाबहुफणाःसर्पातदन्येपन्नगाइतितीर्थः निर्विषानागास्तदन्येपन्नगाइतिकतकः॥२८॥जनयत्

अजनयदित्यर्थः॥२९॥

उरसः वा कुम्भयान् क्वचित् वा कुम्भ्यामिति पाठः॥३०॥ अनलापि व्यजायतेत्यनेन कश्यपस्यापि नाम पिपत्नीनां संतानानुक्त्वा स्ववंशप्रदर्शनायाह विनता चेत्यादि पारि भु
कीपौत्री शुकीपुत्रीनता तस्या विनता पुत्रीत्यर्थः सुरसा कद्रुश्च नाम्ना सुते॥३१॥ नागसहस्रं पन्नगसहस्रमित्यर्थः अनेनोक्तेन विरोधः॥३२॥ श्येनीपुत्रमिति ननु ताम्रापुत्र्यौ
शुकी श्येन्यौ सा श्येनी शुकीपौत्री पुत्रस्यारुणस्य कथं भार्येति चेन्न तन्नाम्नान परं पर्यायपतिना अन्यैषा श्येनीत्यदोषः विधिनिषेधयोर्मनुष्याधिकारत्वात्॥ वाससहायः

मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा॥ ऊरुभ्यां जज्ञिरे वैश्याः पद्भ्यां शूद्रा इति श्रुतिः॥३०॥ सर्वान्पुण्यफलान्वृक्षाननलापि व्यजायत·
विनता च शुकीपौत्री कद्रूश्च सुरसास्वसा॥३१॥ कद्रुर्नागसहस्रंतु विजज्ञे धरणीधरान्॥ द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च॥३२॥ तस्मा
ज्जातोऽहमरुणात्संपातिश्च ममाग्रजः॥ जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम॥३३॥ सोऽहं वाससहायस्ते भविष्यामि यदीच्छसि॥ सीतां
च तात रक्षिष्ये त्वयि याते सलक्ष्मणे॥३४॥ जटायुषं तु प्रतिपूज्य राघवो मुदा परिष्वज्य च सन्नतोऽभवत्॥ पितुर्हि शुश्राव सखित्वमात्म
वान् जटायुषा संकथितं पुनः पुनः॥३५॥ स तत्र सीतां परिदाय मैथिलीं सहैव तेनातिबलेन पक्षिणा॥ जगाम तां पंचवटीं सलक्ष्मणो रिपू
न्दिधक्षन्स वनानि पालयन्॥३६॥ इत्यार्षे श्रीरामायणे आरण्यकाण्डे चतुर्दशः सर्गः॥१४॥ ॥ ततः पंचवटीं गत्वा नानाव्यालमृगायु
तां॥ उवाच लक्ष्मणं रामो भ्रातरं दीप्ततेजसम्॥१॥ आगताः स्म यथोद्दिष्टममुं देशं महर्षिणा॥ अयं पंचवटीदेशः सौम्य पुष्पितकाननः॥२॥ स
र्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि॥ आश्रमः कतरस्मिन्नो देशे भवति संमतः॥३॥ रमते यत्र वैदेही त्वमहं चैव लक्ष्मण॥ तादृशो दृ
श्यतां देशः सन्निकृष्टजलाशयः॥४॥ वनरामण्यकं यत्र जलरामण्यकं तथा॥ सन्निकृष्टं च यस्मिंस्तु समित्पुष्पकुशोदकं॥५॥ ॥६॥

वासस्थाने सीतारक्षणे सहायमतः यदीच्छसि उक्तार्थमिति शेषः तदेवाह सीतामिति त्वयि याते मृगयायामर्थं॥३३॥३४॥३५॥ परिदाय रक्षणार्थं जटायुषे इति शेषः परिधा
य इति पाठः परिवार्येत्यर्थः॥३६॥ इत्यारण्यके रा॰ चतुर्दशः सर्गः॥१४॥ ॥ व्यालः श्वापदे सर्पयोरिति कोशः मृगा हरिणादयः॥१॥ यं देशमुनिरब्रवीत् यथोद्दिष्टं तं देशमा
गताः स्म इत्यन्वयः॥२॥ दृष्टिश्चार्यतां प्रेष्यतामित्यर्थः निपुण आश्रमोचितदेशज्ञाने इति शेषः समतः सीताया इति शेषः॥३॥ तदेवाह रमत इति त्वमहं रमे इत्य
र्थः॥४॥ वनरामणीयकं वनस्य रमणीयत्वं॥५॥

संयतांजलिः बद्धांजलिः ॥६॥ हे काकुत्स्थ त्वयि स्थिते विद्यमाने वर्षशतमपि अहं परवानेव त्वदधीन एव न करा चिरपि मे स्थानं त्र मित्यर्थः स्वयं तु त्वं अयं रुचिरो देशः इति विचा
यन त्वं रुचिरे देशे क्रियतामिति निवद ॥७॥ विमृशन् पर्यालोचयन् ॥८॥ हस्ते न स्वहस्तेन हस्ते लक्ष्मणस्य हस्ते लक्ष्मणस्य गृहीत्वेत्यर्थः अनेन स्नेहाधिक्यमंतरंगत्वं स्वामित्वं च दर्शितं
॥९॥१०॥ आदित्यसंकाशैस्तद्वदुज्ज्वलैरिति शेषः पद्मशोभिना पद्मश्रिया शोभायुक्ता ॥११॥ यथाख्यानेन अर्थं पं गोदावरी दृश्यत इत्यर्थः ॥१२॥ मृगयूथैः पानार्थमागतैर्निपीडिता

एवमुक्तस्तु रामेण लक्ष्मणः संयतांजलिः ॥ सीतासमक्षं काकुत्स्थमिदं वचनमब्रवीत् ॥६॥ परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ॥ स्वयं
तु रुचिरे देशे क्रियतामिति मां वद ॥७॥ सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः ॥ विमृशन् रोचयामास देशं सर्वगुणान्वितम् ॥८॥ स तं
रुचिरमाक्रम्य देशमाश्रमकर्मणि ॥ हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ॥९॥ अयं देशः समः श्रीमान् पुष्पितैस्तरुभिर्वृतः ॥ इहाश्र
मपदं सौम्य यथावत्कर्तुमर्हसि ॥१०॥ इयमादित्यसंकाशैः पद्मैः सुरभिगंधिभिः ॥ अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिना ॥११॥ यथाख्या
नमगस्त्येन मुनिना भावितात्मना ॥ इयं गोदावरी रम्या पुष्पितैस्तरुभिर्वृता ॥१२॥ हंसकारंडवाकीर्णा चक्रवाकोपशोभिना ॥ नातिदूरे न चा
सन्ने मृगयूथनिपीडिता ॥१३॥ मयूरनादिता रम्याः प्रांशवो बहुकंदराः ॥ दृश्यंते गिरयः सौम्याः फुल्लैस्तरुभिरावृताः ॥१४॥ सौवर्णै राजतैस्ता
म्रैर्देशे देशे तथा शुभैः ॥ गवाक्षिता इवाभांति गजाः परमभक्तिभिः ॥१५॥ सालैस्तालैस्तमालैश्च खर्जूरैः पनसैर्द्रुमैः ॥ नीवारैस्तिमिशैश्चैव पु
न्नागैश्चोपशोभिताः ॥१६॥ चूतैरशोकैस्तिलकैः केतकैरपि चंपकैः ॥ पुष्पगुल्मलतोपेतैस्तैस्तैस्तरुभिरावृता ॥१७॥ स्यंदनैश्चंदनैर्नीपैः प
नसैर्लकुचैरपि ॥ धवाश्वकर्णखदिरैः शमीकिंशुकपाटलैः ॥१८॥ इदं पुण्यमिदं रम्यमिदं बहुमृगद्विजं ॥ इह वत्स्यामि सौमित्रे सार्धमेतेन पक्षि
णा ॥१९॥ एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ॥ अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥२०॥ ॥७॥ ॥७॥ ॥७॥

निविडे नियावन ॥१३॥ प्रांशवः उन्नताः फुल्लैः विकसितपुष्पवद्भिः ॥१४॥ सौवर्णैः सुवर्णाभैः परमभक्तिभिर्गवाक्षिता गजा इव भक्तिभिर्गवाक्षाकारनीलापीतादिवर्णरचनारूपालं
कारैरलंकृताः ॥१५॥ सालाद्या वृक्षविशेषाः ॥१६॥ ॥१७॥ ॥१८॥ इदं स्थलं पक्षिणा जटायुना ॥१९॥२०॥ ॥२०॥ ॥७॥ ॥७॥ ॥७॥

संघातमृत्तिकामिति निरूपेण संघातेन प्राप्ता मृत्तिका यस्यां सा दीर्घैर्मस्करैर्वेणुभिः कृतवंशां कृतवंशकार्यां ॥२१॥ आस्तीर्येति तिर्यग्वंशपरिक्षेपोपरीति शेषः दृढपाशा
वपाशितां दृढबंधनबद्धां ॥२२॥ तलेभ्यः तलं राघवस्यार्थे निवासस्थानभूतं चकारेति शेषः ॥२३॥ स गत्वेति एवं संपादनानन्तरमिति शेषः सफलः मार्गस्थवृक्षेभ्यो गृ
हीतफलः ॥२४॥ कृत्वा स्वयमेवेति शेषः शांतिं वास्तुशांतिं ॥२५॥ आहारयत प्राप्तवान् ॥२६॥२७॥ ईदृशे महति कर्मणि दानं प्रदेयार्थं उचितः यन्निमित्तं यत्प्रदेयनि

पर्णशालां सुविपुलां तत्र संघातमृत्तिकां ॥ सुस्तंभां मस्करैर्दीर्घैः कृतवंशां सुशोभनां ॥२१॥ शमीशाखाभिरास्तीर्य दृढपाशावपाशि
तां ॥ कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥२२॥ समीकृततलां रम्यां चकार सुमहाबलः ॥ निवासं राघवस्यार्थे प्रेक्षणीयमनुत्त
मं ॥२३॥ स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा ॥ स्नात्वा पद्मानि चादाय सफलः पुनरागतः ॥२४॥ ततः पुष्पबलिं कृत्वा शांतिं च स य
थाविधि ॥ दर्शयामास रामाय तदाश्रमपदं कृतं ॥२५॥ स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया ॥ राघवः पर्णशालायां हर्षमाहारयत्प
रं ॥२६॥ सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा ॥ अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् ॥२७॥ प्रीतोस्मि ते महत्कर्म त्वया कृतमिदं प्र
भो ॥ प्रदेयो यन्निमित्तं ते परिष्वंगो मया कृतः ॥२८॥ भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ॥ त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम
॥२९॥ एवं लक्ष्मणमुक्त्वा तु राघवो लक्ष्मिवर्द्धनः ॥ तस्मिन्देशे बहुफले न्यवसत्स सुखं सुखी ॥३०॥ कंचित्कालं स धर्मात्मा सीतया ल
क्ष्मणेन च ॥ अन्वास्यमानो न्यवसत्स्वर्गलोके यथामरः ॥३१॥ ॥इत्यार्षे श्रीमद्रामायणे आरण्यकांडे पंचदशः सर्गः ॥१५॥ ॥वस
तस्तस्य तु सुखं राघवस्य महात्मनः ॥ शरद्व्यपाये हेमंत ऋतुरिष्टः प्रवर्त्तत ॥१॥ स कदाचित्प्रभातायां शर्वर्यां रघुनंदनः ॥ प्रययावभिषेका
र्थं रम्यां गोदावरीं नदीं ॥२॥ प्रह्वः कलशहस्तस्तु सीतया सह वीर्यवान् ॥ पृष्ठतोनुव्रजन्भ्राता सौमित्रिरिदमब्रवीत् ॥३॥

मित्तं ते मया परिष्वंगः कृतो न्यून्यत्प्रदेयस्याभावात् ॥२८॥ भावोभिप्रायः कृतमुपकारं न संवृत्तः न मृतः किंतु जीवत्येव पितृवदेव त्वया परिपालनादिति भावः ॥२९॥
॥३०॥३१॥ ॥इति रामाभिरामे श्रीरामीये रा० आरण्यकांडे पंचदशः सर्गः ॥१५॥ अथ कविः स्वयं रामस्य दर्शनं वक्तुं कामो द्वीपकं हेमंतं वर्णयति लक्ष्मणमुखेन वसत इति प
ववृतामिति शेषः इष्टः रामस्येति शेषः कामिनां वा शरद्व्यपाये शरदनुगमने हेमंत ऋतुरिति ऋत्यक इति संधाभावः भिन्नपदत्वं वा ॥१॥२॥ पृष्ठतः रामस्येति शेषः ॥३॥

9

येन हेमंतेन प्रभोग्य संवत्सरः सुपक्वसस्यादिसंपत्त्या अलंकृत इव भाति ॥४॥ हेमंतधर्मानाह नीहारेणापहृतः कठिनस्पर्शशरीरः वस्त्रादिस्पर्शासह शरीर इति किंचिन्न जलानुपभोग
:शैत्यान्निशयान्तु भगाइव ॥५॥ काले आग्रयणानुष्ठानकाले नवाग्रयणपूजाभिः नवान्नप्राशनाय यस्याग्रयणाख्यकर्मन रूपपूजाभिः पितृन् देवांश्च संतर्पयन् कृताग्रयणका
संतो विगतकल्मषाश्च भवन्ति ॥६॥ प्राज्यं भूरि यथा भवति न तथा संपन्ना प्राप्तिविषयः कामो येषां ते प्राज्यकामाः संपन्ना नरे गोरसाः वकुलनर भोगरयोजनन प्रशम्भवन्तीति निशेष
: न यथा भूतेषु जनन परेषु यात्रार्थं दर्शनार्थं ॥७॥ अनंनकसेविनां रिशांदस्तिरणां ॥८॥ प्रकृत्या स्वभावेन हिमकोशेषु यनी भूतहिमसमूहे एणाहिमवानिति निसंप्रपन्नेयनो दूरस्थ

अयं स कालः संप्राप्तः प्रियायास्तु प्रियंवद ॥ अलंकृत इवाभाति येन संवत्सरः शुभः ॥४॥ नीहारापहृतो लोकः पृथिवी सस्यमालिनी ॥ जला
न्यनुपभोग्यानि [redacted] सुभगो हव्यवाहनः ॥५॥ नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ॥ कृताग्रयणकाः काले सन्तो विगतकल्म
षाः ॥६॥ प्राज्यकामा जनपदाः संपन्नतरगोरसाः ॥ विचरन्ति महीपाला यात्रार्थं विजिगीषवः ॥७॥ सेवमाने दृढं सूर्ये दिशमन्तकसेवि
तां ॥ विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते ॥८॥ प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सांप्रतं ॥ यथार्थनामा सुव्यक्तं हिमवान् हिमवा
न्गिरिः ॥९॥ अत्यन्तसुखसंचारा मध्याह्ने स्पर्शनः सुखाः ॥ दिवसाः सुभगादित्याः छायासलिलदुर्भगाः ॥१०॥ मृदुसूर्याः सुनीहाराः पटुशी
ताः समाहिताः ॥ शून्यारण्या हिमध्वस्ता दिवसा भान्ति सांप्रतं ॥११॥ निवृत्ताकाशशयनाः पुष्यनीता हिमारुणाः ॥ शीतवृद्धतरायामा यान्ति
सांप्रतं ॥१२॥ रविसंक्रान्तसौभाग्यस्तुषारारुणमण्डलः ॥ निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते ॥१३॥ ज्योत्स्ना तुषारमलिना पौर्णमा
स्यां न राजते ॥ सीतेव चातपश्यामा लक्ष्यते न च शोभते ॥१४॥

त्रियामा २

नः सुव्यक्तं प्रकटं हिमवान् सन् हिमवानिति यथार्थनामा भवति ॥९॥ मध्याह्ने सुखः संचारो येषु ते तथा मध्याह्ने स्पर्शन आतपस्पर्शनः सुखजनकाः अत एव सुभगादि
त्याः सुसेव्यादित्याः छायाः सलिलानि च दुर्भगानि असेव्यानि येषु ॥१०॥ नीहारः सूर्यावरके हिमं मृदुसूर्याः ईषदुष्णसूर्याः पटुसीताः शून्यारण्याः हिमनाशिन पर्णत्वात्
हिमध्वस्ता हिमध्वस्तपंकजाः ॥११॥ निवृत्ताकाशशयनाः निवृत्तानानावृत्तप्रदेशशयनाः पुष्यनीताः पुष्यनक्षत्रबोधितनाडिविकालपरिमाणाः हिमारुणाः हिमधूसराः
कपोतवर्णेप्यरुणशब्दः शीतवृद्धतरायामास्तुताः आयामादैर्घ्यं वल्गास्त्रियामा रात्रयः ॥१२॥ रवौ संक्रान्तं सौभाग्यं सुभगात्वं उपभोग्यरूपं यस्य सः तुषारधूसरमण्डलः नि
श्वासांधो निश्वासमलिन आदर्श इव न प्रकाशते ॥१३॥ आतपश्यामा आतपेन दैवर्ण्यं प्राप्ता सीतेव लक्ष्यते सन्नामावेणानतशोभत इत्यर्थः ॥१४॥

प्रकृत्याशीतलस्पर्शः पश्चिमदिग्वायुः सांप्रतं हिमविद्धत्वात्काले द्विगुणशीतलः ॥ १५ ॥ बाष्पउष्मा तेन छन्नानि अरण्यानि प्रातःकाले कूपोदकादिष्विव वनादपू
ष्माशादुर्भवति इत्यनुभवप्रमाणकमिति निर्णयः यवगोधूमाद्यंकुरेषवश्यायबिंदुदर्शनात्तद्वत्सु वनेषु दर्शनाद्वाष्पछन्नानि बाष्पो नेत्रजलेपीतमो ॥ १६ ॥ खर्जूरपु
ष्पाकृतित्वं प्रस्तंवत्वेन पीनत्वेन च किंचिदालंवाः किंचिन्नम्राः कनकप्रभाः परिणतत्वात् ॥ १७ ॥ नीहारो हिमानिशयरूपो वृक्षपर्वताद्यदर्शनसंपादनक्षमत

प्रकृत्या शीतलस्पर्शो हिमविद्धश्च सांप्रतं ॥ प्रवाति पश्चिमो वायुः काले द्विगुणशीतलः ॥ १५ ॥ बाष्पछन्नान्यरण्यानि यवगोधूमवंति च
शोभंतेभ्युदिते सूर्ये नदद्भिः क्रौंचसारसैः ॥ १६ ॥ खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतंडुलैः ॥ शोभंते किंचिदालंवाः शालयः कनकप्रभाः ॥
॥ १७ ॥ मयूखैरुपसर्पद्भिर्हिमनीहारसंवृतैः ॥ दूरमभ्युदितः सूर्यः शशांक इव लक्ष्यते ॥ १८ ॥ अग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतः सुखः ॥ संर
क्तः किंचिदापाण्डुरातपः शोभते क्षितौ ॥ १९ ॥ अवश्यायनिपातेन किंचित्प्रक्लिन्नशाद्वला ॥ वनानां शोभते भूमिर्निविष्टतरुणातपा ॥ २० ॥
स्पृशंस्तु विपुलं शीतमुदकं द्विरदः सुखं ॥ अत्यंततृषितो वन्यः प्रतिसंहरते करं ॥ २१ ॥ एते हि समुपासीना विहगा जलचारिणः ॥ नावगाहं
ति सलिलं अप्रगल्भा इवाहवे ॥ २२ ॥ अवश्यायतमोनद्धा नीहारतमसावृता ॥ प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २३ ॥ बाष्पसंछन्न
सलिला रुतविज्ञेयसारसाः ॥ हिमार्द्रवालुकास्तीरैः सरितो भांति सांप्रतं ॥ २४ ॥ तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ॥ शैत्यादगाग्रस्थ
मपि प्रायेण रसवज्जलं ॥ २५ ॥ जराजर्जरितैः पत्रैः शीर्णकेसरकर्णिकैः ॥ नालशेषा हिमध्वस्ता न भांति कमलाकराः ॥ २६ ॥ अस्मिंस्तु पु
रुषव्याघ्र काले दुःखसमन्वितः ॥ तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ॥ २७ ॥ त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान्बहून् ॥ तपस्वी
नियताहारः शेते शीते महीतले ॥ २८ ॥ सोपि वेलामिमां नूनमभिषेकार्थमुद्यतः ॥ वृतः प्रकृतिभिर्नित्यं प्रयाति सरयूं नदीं ॥ २९ ॥

त्संवृतैरुपसर्पद्भिर्मयूखैरुपलक्षितः शशांकसदृशइत्यर्थः ॥ १८ ॥ अग्राह्यवीर्यः ईषद्ग्राह्योष्णस्पर्शः सुखः सुखस्पर्शः ॥ १९ ॥ अवश्यायो हिमबिंदुः ॥ २० ॥ प्रतिसंहरते करं उः
स्पर्शशैत्यवशादिति भावः ॥ २१ ॥ समुपासीना जलसमीपदेशमिति निशेषः नावगाहंति नावगाहंते ॥ २२ ॥ अवश्यायतमोभ्यां नद्धा एते नीहारतमसावृताः प्रसुप्ते ॥ २३ ॥ बाष्पो धू
मः तुषारो वा ॥ २४ ॥ अगाग्रस्थं पर्वताग्रस्थं ॥ २५ ॥ जरया कालकृतया जर्जरितानि पर्णानि येषां तैः शीर्णानि केसराणि कर्णिकानि च येषां तैः ॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥

॥३०॥ निरुदरः अनुद्विग्नः क्रियापरः अरिविषये निग्रहधृष्ट क्षुद्रेन्द्रियनिवर्तनं यस्य सः तत्र हेतुर्जितेन्द्रियत्वं ॥३१॥ सौख्यानि सौख्यसाधनानि आर्यत्वं सर्वात्मनाश्रितः नन्वस्त्वेवं शव
वहारवान् सर्वात्मना इतरव्यासंगत्यागपूर्वकत्वद्विषयमननादिमानित्यर्थः इति कतनकः ॥३२॥ स्वर्गो जित एव स्वाधीनः कुतः यतो वनस्थमपि तातापस्येनापसधर्मास्थित्वा अ
नुविधीयते अनुकरोति सेवते इत्यर्थः धीऊरैर्वादिकस्य रूपं ॥३३॥ द्विपदा मनुष्याः पित्र्यं स्वभावं नानुवर्तन्ते किंतु मातृकं स्वभावमनुवर्तन्ते इति प्रसिद्धो लोकवादः भरतेन

अत्यंतसुखसंवृद्धः सुकुमारो हि मार्दिनः ॥ कथंत्वपराणेषु सरस्समवगाहते ॥३०॥ पद्मपत्रेक्षणः श्यामः श्रीमान्निरुदरो महान् ॥ धर्मज्ञः
सत्यवादी च क्षूनिषेधो जितेन्द्रियः ॥३१॥ प्रियाभिभाषी मधुरो दीर्घबाहुररिंदमः ॥ संत्यज्य विविधान्सौख्यानार्यं सर्वात्मनाश्रितः ॥३२॥ जि
तः स्वर्गस्तव भ्रात्रा भरतेन महात्मना ॥ वनस्थमपि तापस्ये यस्त्वामनुविधीयते ॥३३॥ न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ॥ ख्यातो लोकप्रवा
दोयं भरते नान्यथा कृतः ॥३४॥ भर्त्ता दशरथो यस्याः साधुश्च भरतः सुतः ॥ कथं नु सांबा कैकेयी तादृशी क्रूरदर्शिनी ॥३५॥ इत्येवं लक्ष्मणे वाक्यं स्ने
हाद्वदति धार्मिके ॥ परिवादं जनन्यास्तमसहन्राघवोब्रवीत् ॥३६॥ न तेंबा मध्यमा तात गर्हितव्या कदाचन ॥ तामेवेक्ष्वाकुनाथस्य भरतस्य क
थां कुरु ॥३७॥ निश्चितैव हि मे बुद्धिर्वनवासे दृढव्रता ॥ भरतस्नेहसंतप्ता बालिशी क्रियते पुनः ॥३८॥ संस्मराम्यस्य वाक्यानि प्रियाणि मधुरा
णि च ॥ हृद्यान्यमृतकल्पानि मनःप्रह्लादनानि च ॥३९॥ कदा ह्यहं समेष्यामि भरतेन महात्मना ॥ शत्रुघ्नेन च वीरेण त्वया च रघुनंदन ॥४०॥
इत्येवं विलपंस्तत्र प्राप्य गोदावरीं नदीं ॥ चक्रेभिषेकं काकुत्स्थः सानुजः सह सीतया ॥४१॥ तर्पयित्वाथ सलिलैस्ते पितॄन्दैवतानि च ॥
स्तुवंति स्मोदितं सूर्यं देवतांश्च तथानघाः ॥४२॥

न्यथाकृतः पितृस्वभाव एवांगीकृतो न मातुरित्यर्थः ॥३४॥ भरतं श्रुत्वा कैकेयीनिंदनिभर्त्सनादि ॥३५॥ स्नेहात् भरतरामयोः स्नेहात् ॥३६॥ न गर्हितव्यादेवकृतमत्वान्कुरुः
नामेव पूर्वोक्तामेव ॥३७॥ बालिशी क्रियते गुणाश्रयस्य भरतस्य वियोगमसहमाना चांचल्यं प्राप्नोतीत्यर्थः ॥३८॥ स्नेहमेव प्रकाशयति संस्मरामीति प्रियाण्यपि केनचिदुच्य
मानानि कर्णकठोराणि भवंतीति मधुराणीति हृद्यानि मंत्रवत्याहृदयंबधनानि सामान्यतो माधुर्यमुक्त्वातिशयेनाह अमृतकल्पानीति अतएव मनःप्रह्लादनानि
॥३९॥ त्वयेत्यस्य सहित इति शेषः ॥४०॥

रूढोपमयासंहारविषयचिन्तनंदर्शयति ॥४२॥ इतिरामाभिरामेश्रीरा० आरण्यकांडेषोडशःसर्गः ॥१६॥ ॥ततःअवगाहनोत्तरं ॥१॥ पौर्वाह्णिकंप्रातःकालिकंपर्ण
शालांवासं ॥२॥३॥ चित्रयाचित्रानक्षत्रेण ॥४॥५॥ पूर्वंराज्यप्रवासात्स्वसुखात्संस्नातयाभिनिवृत्त्याभावः ॥६॥ दीप्तास्यकांतिमत्त्वरूपंगजस्येवमंदगत्याविक्रांतंगमनंय

कृताभिषेकःसरराजरामःसीताद्वितीयःसहलक्ष्मणेन ॥ कृताभिषेकस्त्वगराजपुत्र्यारुद्रःसनंदिर्भगवानिवेशः ॥४३॥ ॥इत्यार्षेश्रीरामायणे
आरण्यकेषोडशःसर्गः ॥१६॥ ॥कृताभिषेकोरामस्तुसीतासौमित्रिरेवच ॥ तस्माद्गोदावरीतीरात्ततोजग्मुःस्वमाश्रमं ॥१॥ आश्रमंतदुपागम्य
राघवःसहलक्ष्मणः ॥ कृत्वापौर्वाह्णिकंकर्मपर्णशालामुपागमत् ॥२॥ उवाससुखितस्तत्रपूज्यमानोमहर्षिभिः ॥ सरामःपर्णशालायामासी
नःसहसीतया ॥३॥ विरराजमहाबाहुश्चित्रयाचंद्रमाइव ॥ लक्ष्मणेनसहभ्रात्राचकारविविधाःकथाः ॥४॥ तदासीनस्यरामस्यकथासंसक्त
चेतसः ॥ तंदेशंराक्षसीकाचिदाजगामयदृच्छया ॥५॥ सातुशूर्पणखानामदशग्रीवस्यारक्षसः ॥ भगिनीराममासाद्यददर्शत्रिदशोपमं ॥६॥
दीप्तास्यंचमहाबाहुंपद्मपत्रायतेक्षणं ॥ गजविक्रांतगमनंजटामंडलधारिणं ॥७॥ सुकुमारंमहासत्वंपार्थिवव्यंजनान्वितं ॥ राममिं
दीवरश्यामंकंदर्पसदृशप्रभं ॥८॥ बभूवेंद्रोपमंदृष्ट्वाराक्षसीकाममोहिता ॥ सुमुखंदुर्मुखीरामंवृत्तमध्यंमहोदरी ॥९॥ विशालाक्षंवि
रूपाक्षीसुकेशंताम्रमूर्धजा ॥ प्रियरूपंविरूपासासुस्वरंभैरवस्वना ॥१०॥ तरुणंदारुणावृद्धादक्षिणंवामभाषिणी ॥ न्यायवृत्तंसुदु
र्वृत्ताप्रियमप्रियदर्शना ॥११॥ शरीरजसमाविष्टाराक्षसीराममब्रवीत् ॥ जटीतापसवेषेणसभार्यःशरचापधृत् ॥१२॥ आगतस्त्व
मिमंदेशंकथंराक्षससेवितं ॥ किमागमनकृत्यंतेतत्वमाख्यातुमर्हसि ॥१३॥ ॥१३॥ ॥१३॥ ॥श्रीरामायनमः॥ ७॥

सा०१ व्यंजनंलक्षणं ॥८॥ सुमुखमित्यादिविषयालंकारेण ॥९॥१०॥ दारुणाभदारुणाभिनिशेषः दक्षिणंसुभाषिणं वामभाषिणीदुष्टभाषिणी ॥११॥ शरी
रजःकामः ॥१२॥ तत्वंयथातथाख्यातुमर्हसि ॥१३॥

शूर्पणख्यानियोगिकंऋजुबुद्धितयानयेव ॥१४॥१५॥१६॥ नियोगात्आज्ञाबलात्यंत्रितःनियतः [illegible] धर्मकांक्षीपितृवाक्यनिवर्हणरूपधर्माभिलाषी धर्मार्थंतसेवधर्म
स्यपरिपालनाय ॥१७॥ कस्यत्वंकन्येतिशेषःकासिकिंनामासिकस्यवंशजेतिशेषःराक्षसीएवमनोज्ञागतत्वस्यकामरूपत्वंविनाऽसंभवात्कामरूपत्वंचराक्षसीत्वंविनाने
निभाव ॥१८॥ मदनार्दितारामदर्शनादितिशेषः ॥१९॥२०॥ यस्मिन्प्रोत्तमागतःप्रायःश्रुनएवभविष्यतीतिभाव ॥२१॥ सदापवृद्धनिदृढइत्यन्वयः ॥२२॥ भ्रातरौखरदूषणौवि

एवमुक्तस्तुराक्षस्याशूर्पणख्यापरंतपः ॥ ऋजुबुद्धितयासर्वमाख्यातुमुपचक्रमे ॥१४॥ आसीद्दशरथोनामराजात्रिदशविक्रमः ॥ तस्याहम
ग्रजःपुत्रोरामोनामजनैःश्रुतः ॥१५॥ भ्रातायंलक्ष्मणोनामयवीयान्मामनुव्रतः ॥ इयंभार्याचवैदेहीममसीतेतिविश्रुता ॥१६॥ नियोगा
त्तुनरेंद्रस्यपितुर्मातुश्चयंत्रितः ॥ धर्मार्थंधर्मकांक्षीचवनंवस्तुमिहागतः ॥१७॥ त्वांतुवेदितुमिच्छामिकस्यत्वंकासिकस्यवा ॥ त्वंहितावन्म
नोज्ञांगीराक्षसीप्रतिभासिमे ॥१८॥ इहवाकिंनिमित्तंत्वआगताब्रूहितत्वतः ॥ साब्रवीद्वचनंश्रुत्वाराक्षसीमदनार्दिता ॥१९॥ श्रूयतांरामतत्वा
र्थंवक्ष्यामिवचनंमम ॥ अहंशूर्पणखानामराक्षसीकामरूपिणी ॥२०॥ अरण्यंविचरामीदमेकासर्वभयंकरा ॥ रावणोनाममेभ्रातायदितेश्रोत्र
मागतः ॥२१॥ विभीषणस्तुधर्मात्मानतुराक्षसचेष्टितः ॥ प्रवृद्धनिद्रश्चसदाकुंभकर्णोमहाबलः ॥२२॥ विख्यातवीर्यौचरणेभ्रातरौखरदूषणौ ॥
॥२३॥ तानहंसमतिक्रांताराममत्वापूर्वदर्शनात् ॥ समुपेतास्मिभावेनभर्तारंपुरुषोत्तमं ॥२४॥ अहंप्रभावसंपन्नास्वच्छंदबलगामिनी ॥ चिरा
यभवभर्तामेसीतयाकिंकरिष्यसि ॥२५॥ विकृताचविरूपाचनसेयंसदृशीतव ॥ अहमेवानुरूपातेभार्यारूपेणपश्यमां ॥२६॥ ॥७॥

भीषणवर्जिताशिराआक्षसस्वभावत्वान्नोक्तः ॥२३॥ तानरावणादीन्वीर्येणसमतिक्रांतानतेनोधिकाऽतस्तान्समतिक्रांतान्त्वदभिसरणोत्वन्निमित्तभयरहितेनत्वाहंत्वायोजंहे
राममत्वात्वांपूर्वदर्शनात्प्रथमदर्शनक्षणमारभ्ययद्वाऽपूर्वदर्शनात्देवादिष्वितःप्रागदृष्टदिव्यात्वद्रूपदर्शनाद्धेतोर्भावेनत्वांपुरुषोत्तमंभर्तारंसर्वजगतांभर्तारंसमुपेतास्मि
॥२४॥ प्रभावसंपन्नाप्रकृष्टेनभावेनशृंगारेणसंपन्नायद्वाप्रभावेनशक्त्यतिशयेनसंपन्ना अतएवस्वच्छंदेनस्वेच्छयाबलेनचसर्वलोकगमनशीलायद्वेवमतश्चिरायेति
आत्मनोदेवयोनिभेदत्वेनाभिमतत्वग्रहणसामर्थ्याभिमानेनत्वस्मिन्रामप्रवृत्तत्वयेसीतादूषणमाह· विकृताचेति· विकृतामायास्वरूपतयापरिणामरूपविकारवती विरूपा

नानारूपोच्चावचकार्यकारी·अतएवप्रभुप्रयुक्तस्वभावस्यतवनसदृशीतिपराशयः·यद्वातु
नार्थस्तुस्पष्टएव अहमेवानुरूपाऽ[illegible]पारोपमायाधिष्ठानत्वादित्यर्थः ॥२६॥

विविधान्नादान्ननाद स्वकारेत्यर्थः ॥२३॥ प्रगृह्य उद्यम्य ॥२४॥ अशनिरिव गगनाद्भूमौ पपात ॥२५॥ अथास्याः खरं प्रति निस्सरणं कथनं कविः संक्षिप्याह तत इति भयजनितमोहेन विसंज्ञतया मूर्छिताया प्राप्ता एवं वनमागतेन शशंस आत्मविरूपणं च शशंस अत्र इदं बोध्यं दशवर्षगमनोत्तरं पुनः सुतीक्ष्णाश्रमगमनं तत्र ततश्च वर्षाकालापगमपर्यन्तं स्थित्वा किंचिच्छिष्ट एकादशे ॥ अगस्त्याश्रमगमनं ततो वर्षाकालारंभे पंचवट्यां वासः मयूरनादिता रम्या इति तत्रोक्तेः एवं च तत्र सप्तशरद्धायारंभे तत्तु प्रविष्ट इत्युक्तेः त्रयोदशवर्षपूर्त्तिः पंचमे पंचमे वर्षे द्वौ द्वावधिकमासकावित्युक्तेः मार्गेप्वरभुक्ते कादशणात्रयोदशारंभः अतएव वाक्ये उक्तं ततस्तु द्वादशाद्वानि रामस्य अतिचक्रमुः कस्मिंश्चिदथ काले तु राक्षसी कामरूपिणी ततश्च शूर्पणखा वामे जराघवं रावणानुजनिकेचित् अन्ये तु त्रयो

सा विरूपा महाघोरा राक्षसी शोणितोक्षिता ॥ ननाद विविधान्नादान्यथा प्रावृषि तोयदः ॥२३॥ सा विक्षरन्ती रुधिरं बहुधा घोरदर्शना ॥ प्रगृह्य बाहू गर्जन्ती प्रविवेश महावनं ॥२४॥ ततस्तु सा राक्षससंघसंवृतं खरं जनस्थानगतं विरूपिता ॥ उपेत्य तं भ्रातरमुग्रतेजसं पपात भूमौ गगनाद्यथाशनिः ॥२५॥ ततः सभार्यं भयमोहमूर्छिता सलक्ष्मणं राघवमागतं वनं ॥ विरूपणं चात्मनि शोणितोक्षिता शशंस सर्वं भगिनी खरस्य सा ॥२६॥ ॥इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे अष्टादशः सर्गः ॥१८॥ ॥तां तथा पतितां दृष्ट्वा विरूपां शोणितोक्षितां ॥ भगिनीं क्रोधसंतप्तः खरः पप्रच्छ राक्षसः ॥१॥ उत्तिष्ठ तावदाख्याहि प्रमोहं जहि संभ्रमं ॥ व्यक्तमाख्याहि केन त्वमेवंरूपा विरूपिता ॥२॥ कः कृ[illegible]सर्पमासीनमाशीविषमनागसं ॥ तुदत्यभिसमापन्नमंगुल्यग्रेण लीलया ॥३॥ कालपाशं समासज्य कण्ठे मोहान्न बुध्यते ॥ यस्त्वामद्य स

दशे किंचिदवशिष्टे शूर्पणखागमनं ततो मारीचसीताहरणमित्याहुः भारते युधिष्ठिरवनवासस्य अधिकमाससंग्रहीत्वा ः वीगेव समाप्त पंचमे पंचमे वर्षे द्वौ मासावुपजायतः एषामभ्यधिका मासाः पंच च द्वादश क्षपाः त्रयोदशानां वर्षाणामिति निमिवलेते मतिरिति भीष्मेणोक्तत्वात् नडीत्यात्रापि तथैवाचितमिति पूर्वश्लोकेष्वप्युक्ते ति समभाति यत्तु तत्र त्रयोदशाद्वानि रामस्य अतिचक्रमुरिति पाम्ये पाठः क्वचित् तत्रापि प्रवेशमारभ्य त्रयोदशनिक्रमव्यवहारः यथा त्यनुवादितामर्थो वास्यवेनाव्रह्मा इति बोध्यं पत्रुरस्तु द्वादशाद्वानीत्येव पाठः ॥२६॥ इति रामाभिरामे श्रीरा० आरण्यकाण्डे अष्टादशः सर्गः ॥१८॥ ॥ अथ पूर्वसर्गान्ते संक्षिप्तं तया कथितार्थस्यैव विस्तारः तामिति ॥१॥ प्रमोहं विसंज्ञतां संभ्रमं चित्ताभ्रान्तिं जहि उत्तिष्ठ एवंरूपा एतत्प्रसिद्धसौंदर्या त्वं केन विरूपिणेत्यन्वयः ॥२॥ आशीविषं दर्शनमात्रे विषयस्मात्तं एषोरगः दिवान्साधुः अभिसमापन्नमभिसृत्य स्थितं तुदति व्यथयति ॥३॥ उत्तमं विषं त्वद्विरूपतालक्षणं ॥४॥ ॥४॥ ॥७॥

रामायणे वाल्मीकीये [illegible] ॥४॥

12

ध्न २

॥रा॰म॥
॥२७॥

अंतकसमात्वंकस्यसमीपंगतायेनेमामवस्थांनीताअंतकसमात्वंकेनेमामवस्थांनीतासतीअत्रागतेत्यर्थोवा॥५॥महात्मनांमध्येइतिशेषः॥६॥महेंद्रमितिसहस्रा
क्षंत्वंपाकशासनत्वेविशेषणंमहेंद्रप्रियस्यानरेणेतिशेषः पश्यामीत्यत्रतमित्यध्याहारः मनुष्यादीनांतस्याप्रियकरणेसंभावनैवनेतिभावः कश्चिद्गुंजनरेणसह
स्ताक्षमित्येवपाठः॥७॥जीवनस्यांतेगमयंतिप्रापयंतीतितैः तत्क्षणानिष्पिबन् सारसोहंसोयथासलिलेआसक्तंक्षीरमादत्तेएवंप्राणानादास्येइत्यर्थः॥८॥शारःसंक्ष

वलविक्रमसंपन्नाकामगाकामरूपिणी॥इमामवस्थांनीतात्वंकेनांतकसमागता॥५॥देवगंधर्वभूतानामृषीणांचमहात्मनां॥कोय
मेवंमहावीर्यस्त्वांविरूपांचकारह॥६॥नहिपश्याम्यहंलोकेयःकुर्यान्ममविप्रियं॥अमरेषुसहस्राक्षंमहेंद्रंपाकशासनं॥७॥अद्याहमा
र्गणैःप्राणानादास्येजीवितांतगैः॥सलिलेक्षीरमासक्तंनिष्पिबन्निवसारसः॥८॥निहतस्यमयासंख्येशरसंकृत्तमर्मणः॥सफेनंरुधि
रंकस्यमेदिनीपातुमिच्छति॥९॥कस्यपत्ररथाःकायान्मांसमुत्कृत्यसंगताः॥प्रहृष्टाभक्षयिष्यंतिनिहतस्यमयारणे॥१०॥तंनदेवानगं
धर्वानपिशाचानराक्षसाः॥मयापकृष्टंकृपणंशक्तास्त्रातुंमहाहवे॥११॥उपालभ्यशनैःसंज्ञांनमेशंसितुमर्हसि॥येनत्वंदुर्विनीतेनव
नेविक्रम्यनिर्जिता॥१२॥इतिभ्रातुर्वचःश्रुत्वाक्रुद्धस्यचविशेषतः॥ततःशूर्पणखावाक्यंसवाष्पमिदमब्रवीत्॥१३॥तरुणौरूपसंपन्नौ
सुकुमारौमहाबलौ॥पुंडरीकविशालाक्षौचीरकृष्णाजिनांबरौ॥१४॥फलमूलाशनौदांतौतापसौब्रह्मचारिणौ॥पुत्रौदशरथस्यास्तांभ्रा
तरौरामलक्ष्मणौ॥१५॥गंधर्वराजप्रतिमौपार्थिवव्यंजनान्वितौ॥देवौवादानवौवैनौनतर्कयितुमुत्सहे॥१६॥तरुणीरूपसंपन्नासर्वाभरणभू
षिता॥दृष्टातत्रमयानारीतयोर्मध्येसुमध्यमा॥१७॥ताभ्यामुभाभ्यांसंभूयप्रमदामधिकृत्यतां॥इमामवस्थांनीताहंयथानाथासतीतथा॥१८॥

नानिसमर्पितायस्यतस्यकंठकर्तनेनकालिकंसफेनमित्युपलक्षणंदीर्घधारंसोष्णं॥९॥संगताःमिलिताःपत्ररथाःपक्षिणः॥१०॥११॥विक्रम्यशौर्यंकृत्वा॥१२॥१३॥श्रीरामचं
द्रेदोषाणामभावाद्गुणोत्कर्षोवर्णनेबोधयति तरुणावित्यादिव्याख्यानप्रायं॥१४॥१५॥देवौवेति यद्यपिदशरथपुत्राविति तत्सकाशात्श्रुतंमयातथापि अमानुषचारित्वाद्द
र्शनान्निश्चयइतिभावः॥१६॥१७॥तांप्रमदामधिकृत्यनिमित्तीकृत्यताभ्यांसंभूयैकनियोगात्परेणइमामवस्थांनीता यथाऽनाथासतीकुलटातथेत्यन्वयः॥१८॥

तस्मा हन्तायाइति विपरिणामः रुधिरं पातुमिच्छामीत्यनेन तस्य स्यालत्वात्सुकीलत्वशंकां वारयति ॥१९॥ उक्तमेवार्थमुक्त्वा दृढयति तन्नायुतेन राक्षसेष्विति ॥२०॥ चतुर्दशेति प्रसुत
याराममातुः षड्भ्याश्चमेनारहितानामेव चतुर्दशानां प्रेषणं यद्यपि यावत्वल्कसुतारएजन्तुं त्वयावेलोकविश्रुताः चडकानमहानेघ्नविजयार्थमालमणान्नमाः खर
श्चदूषणाश्चैव त्रिशिराब्रह्मविन्नमाः आसनन्तेषां च शिष्याश्च चतुर्दशसहस्रधेनिशानिधर्मभीष्माक्रूरयेनघोशिवशापनराक्षसमन्वे दाशरथेर्विश्वामित्रेलनशाप

तस्याश्चानृजुवृत्तायास्तयोश्च हतयोरहं ॥ सफेनं पातुमिच्छामि रुधिरं रणमूर्धनि ॥१९॥ एष मे प्रथमः कामः कृतस्तत्र त्वया भवेत् ॥ तस्यास्त
योश्च रुधिरं पिबेयमहमाहवे ॥२०॥ इति तस्यां ब्रुवाणायां चतुर्दश महाबलान् ॥ व्यादिदेश खरः क्रुद्धो राक्षसानन्तकोपमान् ॥२१॥ मानु
षौ शस्त्रसंपन्नौ चीरकृष्णाजिनाम्बरौ ॥ प्रविष्टौ दण्डकारण्यं घोरं प्रमदया सह ॥२२॥ तौ हत्वा तां च दुर्वृत्तामुपावर्तितुमर्हथ ॥ इयं च भगि
नी मे या रुधिरं मम पास्यति ॥२३॥ मनोरथोयमिष्टोस्या भगिन्या मम राक्षसाः ॥ शीघ्रं संपाद्यतां गत्वा तौ प्रमथ्य स्वतेजसा ॥२४॥ युष्माभिर्नि
हतौ दृष्ट्वा तावुभौ भ्रातरौ रणे ॥ इयं प्रहृष्टा मुदिता रुधिरं युधि पास्यति ॥२५॥ इति प्रतिसमादिष्टा राक्षसास्ते चतुर्दश ॥ तत्र जग्मुस्तया सार्धं
घना वातेरिता इव ॥२६॥ ॥ इत्यार्षे श्रीमद्रामायणे वा० आरण्यकाण्डे एकोनविंशः सर्गः ॥१९॥ ॥ ततः शूर्पणखा घोरा राघवाश्रममा
गता ॥ राक्षसानाचचक्षे तौ भ्रातरौ सह सीतया ॥१॥ ते रामं पर्णशालायामुपविष्टं महाबलं ॥ ददृशुः सीतया सार्धं लक्ष्मणेनापि सेवितं ॥२॥
तान्दृष्ट्वा राघवः श्रीमानागतांस्तां च राक्षसीं ॥ अब्रवीद्भ्रातरं रामो लक्ष्मणं दीप्ततेजसम् ॥३॥ मुहूर्तं भव सौमित्रे सीतायाः प्रत्यनन्तरः ॥ इमानस्या
वधिष्यामि पदवीमागतानिह ॥४॥ वाक्यमेतत्ततः श्रुत्वा रामस्य विदितात्मनः ॥ तथेति लक्ष्मणो वाक्यं राघवस्य प्रपूजयन् ॥५॥

मोक्षश्चोक्तस्तथापि शापवशाद्रे राक्षसयोनित्वाद्भगवद्गुणश्रवणमात्रेण प्राणवियोगकाले च शापान्तस्मृत्वा तन्नामरूपज्ञानात्स्वस्वरूपप्राप्तिः ब्रह्मविन्नमा इत्य
त्रैवर्द्धिता इत्याहुः ॥२१॥२२॥ मम भगिनीयं मे या रुधिरं पास्यतीत्यन्वयः अत्र रुधिरं मम पास्यतीति विपरीतार्थासक्तियुक्तवाक्यं तेनेषां संनिधानप्रयुक्तो बुद्धिभ्रमो सू
:सूचितः कविना ॥२३॥ २४॥ २५॥ वाततुल्ला मेघा इव जग्मुरिति संबन्धः ॥२६॥ ॥ इत्यार्षे रामायणाभिरामे श्रीरा० रा० ति० एकोनविंशः ॥१९॥ ॥ ततइति सहसी
तया वर्तमाना विनिशेषः ॥१॥ २॥ प्रत्यनन्तरः प्रत्यासन्नः पालक इति यावत् अस्याः पदवीमार्गं अस्याः पक्षपातेनास्मद्वधार्थमागतानिति यावत् ॥४॥ ॥५॥

13

चामीकरं स्वर्णं ॥६॥ ७॥ उपहिंसथ यूयमस्मानिति शेषः ॥८॥ अनपकारिणामस्माकं हिंसार्थं यात युष्मत्प्रवृत्त्या युष्मद्वधार्थमस्मदपेक्षितं निमित्तं संपन्नमित्याह युष्मानिति
विप्रकारेण भवत्कृतपीडाहरणनिमित्तात् ज्ञानिनियोगेन युष्मान् हन्तुं सशरासनोऽहं संप्राप्तः संप्राप्तनिमित्तः यद्वा विप्रकारेण निमित्तार्थमायजेनास्मास्वस्मदीयेषु च वृथा वै
रवेनायुष्मानित्यर्थः ॥९॥ अतः संतुष्टामनः प्राप्तयुद्धसंतोषाः यूयमत्र तिष्ठतैव नोपावर्जितुमर्हथ उपसर्पितुं पाठे प्ययमेवार्थः इह लोके देहे चेत्यर्थः ॥१०॥ ब्रह्मघ्ना

राघवोऽपि महच्चापं चामीकरविभूषितम् ॥ चकार सज्यं धर्मात्मा तानि रक्षांसि चाब्रवीत् ॥६॥ पुत्रौ दशरथस्यावां भ्रातरौ रामलक्ष्मणौ ॥ प्रविष्टौ
सीतया सार्धं दुर्धर्षं दण्डकावनम् ॥७॥ फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ॥ वसन्तौ दण्डकारण्ये किमर्थमुपहिंसथ ॥८॥ युष्मान् पापात्म
कान् हन्तुं विप्रकारेण महाहवे ॥ ऋषीणां तु नियोगेन संप्राप्तः सशरासनः ॥९॥ तिष्ठतैवात्र संतुष्टा नोपसर्पितुमर्हथ ॥ यदि प्राणैरि
हार्थो वा निवर्तध्वं निशाचराः ॥१०॥ तस्य तद्वचनं श्रुत्वा राक्षसास्ते चतुर्दश ॥ ऊचुर्वाचं सुसंक्रुद्धा ब्रह्मघ्नाः शूलपाणयः ॥११॥ संरक्तनयना घो
राः रामं संरक्तलोचनम् ॥ परुषां मधुराभाषं हृष्टाः दृष्टपराक्रमम् ॥१२॥ क्रोधमुत्पाद्य नो भर्तुः खरस्य सुमहात्मनः ॥ त्वमेव हास्यसे प्राणान् सद्योऽस्मा
भिर्हतो युधि ॥१३॥ का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ॥ अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥१४॥ एभिर्बाहुप्रयुक्तैश्च परिघैः शू
लपट्टिशैः ॥ प्राणांस्त्यक्ष्यसि वीर्यं च धनुश्च करपीडितम् ॥१५॥ इत्येवमुक्त्वा संरब्धा राक्षसास्ते चतुर्दश ॥ उद्यतायुधनिस्त्रिंशा राममेवाभिदुद्रुवुः
॥१६॥ चिक्षिपुस्तानि शूलानि राघवं प्रति दुर्जयम् ॥ तानि शूलानि काकुत्स्थः समस्तानि चतुर्दश ॥१७॥ तावद्भिरेव चिच्छेद शरैः काञ्चनभूषितैः ॥ त
तः पश्चान्महातेजा नाराचान् सूर्यसन्निभान् ॥१८॥ जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान् ॥ गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान्
मुमोच राघवो बाणान् वज्रानिव शतक्रतुः ॥ ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिरप्लुताः ॥२०॥

इत्यर्थः ॥११॥ अदृष्टपराक्रममिति च्छेदः संधिरार्षः ॥१२॥ १३॥ स्थातुमपि का ते शक्तिरिति योजना ॥१४॥ १५॥ १६॥ १७॥ तावद्भिः चतुर्दशरक्षोविसृष्टचतुर्दशशूल
संख्याकैः ॥१८॥ शिलाशितान् शाणोपलनिघृष्टवान् ॥१९॥ ॥२०॥ ॥७॥ ॥७॥ ॥श्रीरामायनमः॥ ॥१९॥ ॥२०॥ ॥७॥

विनिपेतुः विनिषेतुः विनिषण्णाश्च निमग्नाः वल्मीकान् वल्मीकं प्राप्य पन्नगा इव निमग्ना इत्यर्थः ॥२१॥२२॥ नाऽस्याः कर्णाक्षनाशे किंचित्संपुष्कशोणितत्वात् सनिर्यासा वल्लरीव ॥२३॥२४॥ उक्तसर्गार्थस्य संक्षेपेण कथनं ॥२५॥ इत्यारण्ये रामाभिरामे श्रीरा०आ०ति० विंशतितमः सर्गः ॥२०॥ ॥अनर्थार्थं स्वकुलस्य निशेषः ॥१॥२॥ भक्ता अन

विनिष्पेतुस्तदा भूमौ वल्मीकादिव पन्नगाः ॥ तैर्भग्नहृदया भूमौ भिन्नमूला इव द्रुमाः ॥२१॥ निपेतुः शोणितस्नाता विकृता विगतासवः ॥ ता
न् भूमौ पतितान् दृष्ट्वा राक्षसी क्रोधमूर्छिता ॥२२॥ उपगम्य खरं सा तु किंचित्संपुष्कशोणिता ॥ पपात पुनरेवार्ता सनिर्यासेव वल्लरी ॥२३॥ 6
भ्रातुः समीपे शोकार्ता ससर्ज निनदं महत् ॥ सस्वरं मुमुचे बाष्पं विवर्णवदना तदा ॥२४॥ निपातितान् प्रेक्ष्य रणे तु राक्षसान् प्रधाविता शूर्पण
खा पुनस्ततः ॥ वधं च तेषां निखिलेन रक्षसां शशंस सर्वं भगिनी खरस्य सा ॥२५॥ ॥इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे विंशतितमः सर्गः ॥२०॥

स ४

॥ ॥स पुनः पतितां दृष्ट्वा क्रोधाच्छूर्पणखां पुनः ॥ उवाच व्यक्तया वाचा तामनर्थार्थमागताम् ॥१॥ मया त्विदानीं शूरास्ते राक्षसाः पिशिताश
नाः ॥ त्वत्प्रियार्थं विनिर्दिष्टाः किमर्थं रुद्यते पुनः ॥२॥ भक्ताश्चैवानुरक्ताश्च हिताश्च मम नित्यशः ॥ हन्यमाना न हन्यन्ते न नः कुर्युर्वचो मम ॥३॥ कि
मेतच्छ्रोतुमिच्छामि कारणं यत्कृते पुनः ॥ हा नाथेति विनर्दन्ती सर्पवच्चेष्टसे क्षितौ ॥४॥ अनाथवद्विलपसि किं नु नाथे मयि स्थिते ॥ उत्तिष्ठो
त्तिष्ठ मा मैवं वैक्लव्यं त्यज्यतामिति ॥५॥ इत्येवमुक्ता दुर्धर्षा खरेण परिसान्त्विता ॥ विमृज्य नयने सास्रे खरं भ्रातरमब्रवीत् ॥६॥ अस्मीदानी
महं प्राप्ता हतश्रवणनासिका ॥ शोणितौघपरिक्लिन्ना त्वया च परिसान्त्विता ॥७॥ प्रेषिताश्च त्वया शूरा राक्षसास्ते चतुर्दश ॥ निहन्तुं राघ
वं घोरं मत्प्रियार्थं सलक्ष्मणम् ॥८॥ ते तु रामेण सामर्षाः शूलपट्टिशपाणयः ॥ समरे निहताः सर्वे सायकैर्मर्मभेदिभिः ॥९॥ तान् भूमौ प
तितान् दृष्ट्वा क्षणेनैव महाजवान् ॥ रामस्य च महत्कर्म महांस्त्रासोऽभवन्मम ॥१०॥ ॥७॥

एवमप्यनुरक्ता अनन्य एव मम हिताः पौरुषसमाना अपि येन हन्यन्ते तु शङ्कायां ते मम वचो न कुर्युरिति वचनं तत्किमर्थं रुद्यत इत्यर्थः ॥३॥ यत्कृते यच्छोकनिमित्तं ॥४॥५॥६॥ अस्मि
इदानीं पूर्वं त्वत्समीपं प्राप्ताऽस्मि त्वया च परिसान्त्विताऽस्मि शूराश्च मत्संप्रेषितास्तद्वृत्तान्तं वक्ष्यामीति ॥७॥८॥९॥ क्षणेनैव ननु चिरकालयुद्धं पूर्वमित्यर्थः रामस्य च
महत्कर्म दृष्ट्वेत्यनुषङ्गः ॥१०॥

16

भीताअतएवसमुद्विग्नाकंपमानाअतएवविषण्णादुःखिता सर्वतोभयदर्शिनी सर्वतोरामप्रतिभासनात् ॥११॥१२॥ येचमेपदवींप्राप्तास्तएतेभूमौस्थितेनपरानि
नारामेणहताः ॥१३॥ यदितेशक्तिर्योद्धुमितिशेषः ॥१४॥१५॥ निरपत्रपाछिन्नकर्णनासिकत्वात् स्वरस्यक्रोधेन्यत्यर्थमाह बुध्येति ॥१६॥ सबलोपिचतुरंगबलोपेतो
पि महारणेइत्युत्तरान्वयि मिथ्यामेघवत्स्तनितनादोपिनोविक्रमोयेन ॥१७॥ अतःत्वंसहबांधवस्त्वरितोजनस्थानादपयाहिनिर्गच्छ समरेतौत्वंजहिहेकुलपांसन अन्य

सास्मिभीतासमुद्विग्नाविषण्णाचनिशाचर ॥ शरणंत्वांपुनःप्राप्तासर्वतोभयदर्शिनी ॥११॥ विषादनक्राध्युषितेपरित्रासोर्मिमालिनि ।
किंमांनत्रायसेमग्नांविपुलेशोकसागरे ॥१२॥ एतेचनिहताभूमौरामेणनिशितैःशरैः ॥ येचमेपदवींप्राप्ताराक्षसाःपिशिताशनाः ॥१३॥
मयितेयद्यनुक्रोशोयदिरक्षःसुतेषुच ॥ रामेणयदिशक्तिस्तेतेजोवास्तिनिशाचर ॥१४॥ दंडकारण्यनिलयंजहिराक्षसकंटकं ॥ यदिरा
ममामित्रंघ्नंनत्वमद्यवधिष्यसि ॥१५॥ तवचैवाग्रतःप्राणांस्त्यक्ष्यामिनिरपत्रपा ॥ बुध्याहमनुपश्यामिनत्वंरामस्यसंयुगे ॥१६॥
स्थातुंप्रतिमुखेशक्तःसबलोपिमहारणे ॥ शूरमानीनशूरस्त्वंमिथ्यारोपितविक्रमः ॥१७॥ अपयाहिजनस्थानात्त्वरितःसहबांधवः ॥
जहित्वंसमरेमूढान्यथातुकुलपांसन ॥१८॥ मानुषौतौनशक्नोषिहंतुंवैरामलक्ष्मणौ ॥ निःसत्वस्याल्पवीर्यस्यवासस्तेकीदृशस्त्विह ॥१९॥
रामतेजोभिभूतोहित्वंक्षिप्रंविनशिष्यसि ॥ सहितेजःसमायुक्तोरामोदशरथात्मजः ॥२०॥ भ्राताचास्यमहावीर्योयेनचास्मिविरूपि
ता ॥ एवंविलप्यबहुशोराक्षसीप्रदरोदरी ॥२१॥ भ्रातुःसमीपेशोकार्तानष्टसंज्ञाबभूवह ॥ कराभ्यामुदरंहत्वारुरोदभृशदुःखिता ॥२२॥
इत्यार्षेश्रीमद्रामायणेआर०एकविंशःसर्गः ॥२१॥ एवमाधर्षितःशूरःशूर्पणख्याखरस्ततः ॥ उवाचरक्षसांमध्येखरःखरतरंवचः ॥१॥ तवाप

मानप्रभवोक्रोधोयमतुलोमम नशक्यतेधारयितुंलव
णांभइवोल्वणं ॥२॥

धातु ॥१८॥ नदेवत्वाद्वयमानुषाविति तौहंतुंयदिनशक्नोषितदानिर्वीर्यत्वादिगुणस्यतेइहकीदृशोवासोजुगुप्सितएवेत्यर्थः ॥१९॥ तामेवशक्तिंद्रढयति रामतेजइति ॥२०॥
प्रदरोदरीनिम्नोदरी ॥२१॥२२॥ इतिरामाभिरामेश्रीरा०आर०एकविंशःसर्गः ॥२१॥ ॥आधर्षितःकोपाद्वमानितःखरस्तीक्ष्णगुणःखरतरंतीक्ष्णतरं ॥१॥ तवापमानेन
स्यत्वत्कृतापमानेनेत्यर्थः धारयितुमात्मनीतिशेषः ममेतिसंबंधेषष्ठीलवणांभइवोल्वणंव्रणेइतिशेषः व्रणेनिक्षिप्तंलवणयुक्तमंभइवधारयितुंनशक्य
नइत्यर्थःइतितीर्थः लवणांभोलवणसमुद्रांभइवेत्यर्थइतिकतकः ॥२॥

भान्मदुष्प्रवरिनैस्तद्विरूपकरणाद्रूपैः स्वयं हन्तव्यमदर्शनात्प्राणान्मोक्ष्यनेनं रामं नगराणयेइत्यन्वयः वीर्यात्स्वपराक्रमात् ३ ॥ संप्रमोमर्य ॥४॥ पश्च्वधहन्तस्येति पश्वधस्तस्य
मुखामायुधमित्यनेनज्ञायते रुधिरं रक्तं रक्तवर्णमित्यर्थः ॥५॥ मोऽर्थ्यानभयवस्थितचिन्ननालक्षणात् पुनः प्रशसंसचन्द्रमोवीरेणास्तीत्यवसारि ॥६॥ नरेवाहनयेति
॥७॥ यानिलोकानांप्राणिनांहिंसेवासाधारणेनविहारः क्रीडायेषांराक्षसांचतुर्दशसहस्राणिवर्द्धनेनेषांसर्वेषांयोगंसर्वप्रकारेणायोगंचतुरंगवत्तोपेननयासर्वायुधसाम

नरामं गणये वीर्यान्मानुषं क्षीणजीवितं ॥ आत्मदुश्चरितैः प्राणान्हतो योद्य विमोक्ष्यते ॥३॥ बाष्पः संधार्यतामेष संभ्रमश्च विमुच्यतां·
अहं रामं सह भ्रात्रा नयामि यमसादनं ॥४॥ परश्वधहतस्याद्य मंदप्राणस्य भूतले ॥ रामस्य रुधिरं रक्तमुष्णं पास्यसि राक्षसि ॥५॥
संप्रहृष्टा वचः श्रुत्वा खरस्य वदनाच्युतं ॥ प्रशशंस पुनर्मौर्ख्याद्भ्रातरं रक्षसां वरं ॥६॥ तया परीषितः पूर्वं पुनरेव प्रशंसितः ॥ अब्रवी
त्दूषणं नाम खरः सेनापतिं तदा ॥७॥ चतुर्दशसहस्राणि मम चित्तानुवर्तिनां ॥ रक्षसां भीमवेगानां समरेष्वनिवर्तिनां ॥८॥ नीलजी
मूतवर्णानां लोकहिंसाविहारिणां ॥ सर्वोद्योगमुदीर्णानां रक्षसां सौम्य कारय ॥९॥ उपस्थापय मे क्षिप्रं रथं सौम्य धनूंषि च ॥ शरांश्च चि
त्रान् खड्गांश्च शक्तीश्च विविधाः शिताः ॥१०॥ अग्रे निर्यातुमिच्छामि पौलस्त्यानां महात्मनां ॥ वधार्थं दुर्विनीतस्य रामस्य रणको
विदः ॥११॥ इति तस्य ब्रुवाणस्य सूर्यवर्णं महारथं ॥ सदश्वैः शबलैर्युक्तमाचचक्षेथ दूषणः ॥१२॥ तं मेरुशिखराकारं तप्तकांचनभूषणं·
हेमचक्रमसंबाधं वैदूर्यमयकूबरं ॥१३॥ मत्स्यैः पुष्पैर्द्रुमैः शैलैश्चंद्रकानैश्च कांचनैः ॥ मांगल्यैः पक्षिसंघैश्च ताराभिश्च समावृतं ॥१४॥
ध्वजनिस्त्रिंशसंपन्नं किंकिणीवरभूषितं ॥ सदश्वयुक्तं सोमर्षादारुरोह खरस्तदा ॥१५॥ खरस्तु तन्महत्सैन्यं रथचर्मायुधध्वजं ॥ निर्यातेत्य
ब्रवीत्प्रेक्ष्य दूषणः सर्वराक्षसान् ॥१६॥ ततस्तद्राक्षसं सैन्यं घोरचर्मायुधध्वजं ॥ निर्जगाम जनस्थानान्महानादं महाजवं ॥१७॥

र्थामस्तेनतनयाचोद्योगंकारय ॥८॥९॥ ॥१०॥ पौलस्त्यानांराक्षसानामग्रे रामस्यवधार्थंनिर्यातुमिच्छामीत्यन्वयः ॥११॥ शबलैश्चित्रवर्णैः आचचक्षे उपस्थितमितिशेषः ॥१२॥ वैदूर्यमयो
कूबरोयुगंधरोपस्थानं असंबाधं विशालं ॥१३॥ मांगल्यमलंकारस्तद्योजनैः कांचनैरितिमत्स्यादिसर्वान्वयि ॥१४॥ किंकिणीक्षुद्रघंटिका अमर्षात्क्रोधात् ॥१५॥ तन्महत्सैन्यं

स्यनत्पुनि निर्यातेत्यब्रवीत् दूषणः दूषणाश्चेत्यर्थः ॥१६॥ ततः उभयनियोगानन्तरं
राक्षसं रक्षसामिदं ॥१७॥

15

मुद्गरादय आयुधविशेषाः वज्रैर्वज्राकारैरस्त्रैरायुधैः ॥ १८ ॥ १९ ॥ २० ॥ खरस्य रथोपि सेनास्थानात्किंचिदन्तरं सर्वसेनानिर्याणं किंचित्कालं प्रतीक्ष्य जगामेत्यर्थः ॥ २१ ॥ मन
मात्रायामीषं ज्ञात्वा ॥ २२ ॥ संचोदित इत्यादि श्लोकद्वयं कनकसंख्यारोन्याप्रक्षिप्तं ॥ २३ ॥ २४ ॥ इति रामाभिरामे श्रीरा० आरण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥ ॥ अथ खरापस्य

मुद्गरैः पट्टिशैः शूलैः सुतीक्ष्णैश्च परश्वधैः ॥ खड्गैश्चक्रैश्च रथस्थैर्भ्राजमानैः सतोमरैः ॥ १८ ॥ शक्तिभिः परिघैर्घोरैरतिमात्रैश्च कार्मुकैः ॥ गदासिमुसलैर्वज्रैर्गृहीतैर्भीमदर्शनैः ॥ १९ ॥ राक्षसानां सुघोराणां सहस्राणि चतुर्दश ॥ निर्यातानि जनस्थानात्खरचित्तानुवर्तिनां ॥ २० ॥ तांस्तु निर्धावतो दृष्ट्वा राक्षसान्भीमदर्शनान् ॥ खरस्यापि रथः किंचिज्जगाम तदनन्तरं ॥ २१ ॥ ततस्तान्शबलानश्वांस्तप्तकांचनभूषितान् ॥ खरस्य मतमाज्ञाय सारथिः पर्यचोदयत् ॥ २२ ॥ संचोदितो रथः शीघ्रं खरस्य रिपुघातिनः ॥ शब्देनापूरयामास दिशः सप्रदिशस्तथा ॥ २३ ॥ प्रवृद्धमन्युस्तु खरः खरस्वनो रिपोर्वधार्थं त्वरितो यथान्तकः ॥ अचूचुदत्सारथिमुन्नदन्पुनर्महाबलो मेघ इवाश्मवर्षवान् ॥ २४ ॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे द्वाविंशः सर्गः ॥ २२ ॥ ॥ तत्प्रयाते बले घोरमशिवं शोणितोदकं ॥ अभ्यवर्षन्महाघोरस्तुमुलो गर्दभारुणः ॥ १ ॥ निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः ॥ समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥ श्यामं रुधिरपर्यन्तं बभूव परिवेषणं ॥ अलातचक्रप्रतिमं प्रतिगृह्य दिवाकरं ॥ ३ ॥ ततो ध्वजमुपागम्य हेमदण्डं समुच्छ्रितं ॥ समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥ जनस्थानसमीपे च समाक्रम्य खरस्वनाः ॥ विस्वरान्विविधान्नादान्मांसादा मृगपक्षिणः ॥ ५ ॥ व्याजह्रुरभिदीप्तायां दिशि वै भैरवस्वनं ॥ अशिवं यातुधानानां शिवा घोरा महास्वनाः ॥ ६ ॥ प्रभिन्नगजसंकाशास्तोयशोणितधारिणः ॥ आकाशं तदना काशं चक्रुर्भीमा बलाहकाः ॥ ७ ॥

ते उत्पातवर्णनं शोणितमिश्रितमुदकं प्रयाते प्रस्थिते गर्दभारुणो धूसरः तुमुलस्तुमुलशब्दः अभ्यवर्षत् मेघ इति शेषः ॥ १ ॥ रथयुक्ताः रथे युक्ताः पुष्पचिते पुष्पयुते अनेन यान
निमित्तराहित्यं ॥ २ ॥ रुधिरो रक्तवर्णः पर्यन्तः प्रान्तभागो यस्य अलातचक्रप्रतिमं तद्वर्तुलं दिवाकरं प्रतिगृह्य सूर्यमण्डलेनान्यूनं संबध्य ॥ ३ ॥ ४ ॥ खरस्वनाः पारुषशब्दाः ॥ ५ ॥ अ
भिदीप्तायां रविसंयुक्तायां विवस्वदाश्रामवति प्रदीप्तेति वसन्तराजोक्तेः शिवा यातुधानानां नामशिवमशुभं व्याजह्रुः ॥ ६ ॥ प्रभिन्नगजेति पाठे मत्तगजेत्यर्थः प्रभिन्नगिरिरिति पा
ठे गैरिकादिधातुस्राविण इत्यर्थः तोयमिव शोणितं धारयन्ति अनाकाशमप्रकाशं ॥ ७ ॥ ॥ ७ ॥

उद्धतं सांद्रं ॥८॥ क्षतजार्द्रसवर्णाभा रुधिरार्द्रवस्त्रादिसमानवर्णा संध्येति विशेषणं कालं विना बभौ मेघ इति शेषः ॥९॥ युद्धे नित्यमशिवकराः अशुभशंसिनः शिवा घोरनिद
र्शना भयप्रदर्शिकाः खरबलस्याभिमुखं नेदुः पूर्वं दिगभिमुखं शिवाशब्द उक्तः इदानीं खरसैन्याभिमुख्येनेति भेदः परिघाभासः परिघाभासः परिघआयुधविशेषस्त
त्सदृशः कबंधो धूमकेतुरिति तीर्थः ॥१०॥११॥ शीघ्रं प्रचंडं यथा भवति तथेत्यर्थः सम्मुखत्वमिति शेषः ॥१२॥ खद्योतसप्रभत्वं निस्तेजस्कत्वेन चांचल्येन च ॥१३॥ विना पुष्पफ

बभूव तिमिरं घोरमुद्धतं रोमहर्षणं ॥ दिशो वा प्रदिशो वापि स्वभ्रयुक्ता न चकाशिरे ॥८॥ क्षतजार्द्रसवर्णाभा संध्याकालं विना बभौ ॥ खरं चा
भिमुखं नेदुस्तदा घोरा मृगाः खगाः ॥९॥ कंकगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः ॥ नित्याशिवकरा युद्धे शिवा घोरनिदर्शनाः ॥१०॥ ने
दुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः ॥ कबंधः परिघाभासो दृश्यते भास्करान्तिके ॥११॥ जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥
प्रवाति मारुतः शीघ्रं निष्प्रभोऽभूद्दिवाकरः ॥१२॥ उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः ॥ संलीनमीनविहगा नलिन्यः शुष्कपंकजाः
॥१३॥ तस्मिन्क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः ॥ उद्धूतश्च विना वातं रेणुर्जलधरारुणः ॥१४॥ चीचीकूचीति वाशंत्यो बभूवुस्तत्र सारि
काः ॥ उल्काश्चापि सनिर्घोषा निपेतुर्घोरदर्शनाः ॥१५॥ प्रचचाल मही चापि सशैलवनकानना ॥ खरस्य च रथस्थस्य नर्दमानस्य धीम
तः ॥१६॥ प्राकंपत भुजः सव्यः स्वरश्चास्यावसज्जत ॥ सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः ॥१७॥ ललाटे च रुजो जाता न च मोहान्न्य
वर्तत ॥ तान्समीक्ष्य महोत्पातानुत्थितान्रोमहर्षणान् ॥१८॥ अब्रवीद्राक्षसान्सर्वान्प्रहसन्स खरस्तदा ॥ महोत्पातानिमान्सर्वानुत्थिता
न्घोरदर्शनान् ॥१९॥ न चिंतयाम्यहं वीर्याद्बलवान्दुर्बलानिव ॥ ताराअपि शरैस्तीक्ष्णैः पातयेयं नभस्तलात् ॥२०॥ मृत्युं मरणधर्मेण सं
क्रुद्धो योजयाम्यहं ॥ राघवं तं बलोत्सिक्तं भ्रातरं चापि लक्ष्मणं ॥२१॥ अहत्वा सायकैस्तीक्ष्णैर्नोपावर्तितुमुत्सहे ॥ यन्निमित्तं तु रामस्य लक्ष्म
णस्य विपर्ययः ॥२२॥

लैः पुष्पादिरहिताः बभूवुरित्यर्थः उद्धूतः उत्क्षिप्तः जलधरारुणः धूसरः ॥१४॥ चीचीकूचीति शब्दानुकरणं वाशंत्यः आर्षं नतु शिक्षितं शब्दमित्यर्थः ॥१५॥१६॥ सव्यो वामः स्व
रश्चावसज्जत हीनोऽभूदित्यर्थः ॥१७॥ तानुत्पातानुत्थितान्समीक्ष्यापि मोहात् न न्यवर्तत युद्धयात्राया इति शेषः ॥१८॥१९॥२०॥ बलोत्सिक्तं बलाधिकं ॥२१॥ यन्निमित्तं शू
र्पणखानिमित्तं विपर्ययः क्रूरखड्गरूपः ॥२२॥

16

॥२३॥ एतन्नस्मैमपराजयाभावरूपं वस्तु ॥२४॥२५॥२६॥ पुण्यकर्मणः पुण्यकर्माण इत्यर्थे आर्षं ॥२७॥ ये लोकानां सम्मता गोब्राह्मणव्यतिरिक्तास्तेभ्यश्च स्वस्तिरस्त्वित्यर्थः
॥२८॥२९॥३०॥ सैन्यस्याग्राद्विनिःसृतः पूर्वं सैन्यसंबध एव न त्वग्रभागे स्थितः इदानीन्तु सेनां वकुद्रूरे पश्चात्तस्य त्वा स्वयमेवाग्रगत इत्यर्थः श्येनगाम्यादयः

सकामा भगिनी मेस्तु पीत्वा तु रुधिरं तयोः ॥ न क्वचित्प्राप्तपूर्वो मे संयुगेषु पराजयः ॥२३॥ युष्माकमेतत्प्रत्यक्षं नानृतं कथयाम्यहं ॥ देवरा
जमपि क्रुद्धो मत्तैरावतगामिनं ॥२४॥ वज्रहस्तं रणे हन्यां किं पुनस्तौ च मानवौ ॥ सा तस्य गर्जितं श्रुत्वा राक्षसानां महाचमूः ॥२५॥ प्रहर्ष
मतुलं लेभे मृत्युपाशावपाशिता ॥ समेयुश्च महात्मानो युद्धदर्शनकांक्षिणः ॥२६॥ ऋषयो देवगंधर्वाः सिद्धाश्च सह चारणैः ॥ समेत्य
चोचुः सहितास्तेऽन्योन्यं पुण्यकर्मणः ॥२७॥ स्वस्ति गोब्राह्मणेभ्यस्तु लोकानां ये च संमताः ॥ जयतां राघवो युद्धे पौलस्त्यान् रजनीचरान्
॥२८॥ चक्रहस्तो यथा विष्णुः सर्वानसुरसत्तमान् ॥ एतच्चान्यच्च बहुशो ब्रुवाणाः परमर्षयः ॥२९॥ जातकौतूहलास्तत्र विमानस्थाश्च दे
वताः ॥ ददृशुर्वाहिनीं तेषां राक्षसानां गतायुषं ॥३०॥ रथेन तु खरो वेगात्सैन्यस्याग्राद्विनिःसृतः ॥ श्येनगामी पृथुग्रीवो यज्ञशत्रुर्विहं
गमः ॥३१॥ दुर्जयः परवीराक्षः परुषः कालकार्मुकः ॥ मेघमाली महामाली सर्पास्यो रुधिराशनः ॥३२॥ द्वादशैते महावीर्याः प्रतस्थु
रभितः खरं ॥ महाकपालः स्थूलाक्षः प्रमाथस्त्रिशिरास्तथा ॥३३॥ चत्वार एते सेनाग्र्या दूषणं पृष्ठतोऽन्वयुः ॥ सा भीमवेगा समराभिकां
क्षिणी सुदारुणा राक्षसवीरसेना ॥ तौ राजपुत्रौ सहसाभ्युपेता माला ग्रहाणामिव चंद्रसूर्यौ ॥३४॥ इत्यार्षे श्रीमद्रामायणे वा० आरण्यकांडे
त्रयोविंशः सर्गः ॥२३॥ आश्रमं प्रतियाते तु खरे खरपराक्रमे ॥ तानेवोत्पातिकान्रामः सह भ्रात्रा ददर्श ह ॥१॥ तानुत्पातान्महाघोरान् रामो दृष्ट्वात्य
मर्षणः ॥ प्रजानामहितान्दृष्ट्वा वाक्यं लक्ष्मणमब्रवीत् ॥२॥ इमान्पश्य महाबाहो सर्वभूतापहारिणः ॥ समुत्थितान्महोत्पातान्संहर्तुं सर्वराक्षसान् ॥३॥

महोत्पाता२

द्वारशरवरमान्याः ॥३१॥३२॥३३॥ सा सेना तौ राजपुत्रौ सहसान्तरेणैवाभ्युपेतेत्यन्वयः ॥३४॥ इति रामाभिरामे श्री रा० आरण्यकांडे त्रयोविंशः सर्गः ॥२३॥ औत्पातिकानुत्
पातानस्वार्थे ठक् ॥१॥ अत्यमर्षणोऽत्यस्वस्थचित्तः प्रजानां प्रवृत्तान्त्वा राक्षसा एवात्र प्रजाः ॥२॥ सर्वभूतापहारिणस्तत्सूचकान् प्रवृत्तान् सर्वराक्षसान् संहर्तुं नत्वास्म

६ख

॥४॥ राक्षसानां दुर्निमित्तान्युक्त्वा स्वस्य जयसूचकान्याह सधूमा इति॰ उत्पातवशाद्धूमसंबद्धाः मम युद्धे अभिनंदं आनंदः येषां संजातस्तादृशाः अत एव चेष्टंते न तूणीरेषु
चलंति स्वगतानंतरस्पर्शरूपव्यापारं चापानि च विचेष्टंते स्वाधिष्ठानदेवतासान्निध्यात् स्फुरज्ज्यानि भवंति॥५॥ अग्रतः आसन्नदेशकालेन: भयं जीवितसंशयश्च प्राप्तः अ
भयप्राप्तिचारस्तु राक्षसानां जीवितस्य संशयः प्राप्त इत्यर्थ इति तीर्थः॥६॥ संप्रहारो रणः एवं भयं परेषामस्माकं जयसूचकनिमित्तमाह अयमिति स्फुरमाणः स्फुरन् दक्षिण

अमी रुधिरधारास्तु विसृजंते खरस्वनाः॥ व्योम्नि मेघा विवर्तंते परुषा गर्दभारुणाः॥४॥ सधूमाश्च शराः सर्वे मम युद्धाभिनंदिनाः॥ रु
क्मपृष्ठानि चापानि विचेष्टंते च लक्ष्मण॥५॥ यादृशा इह कूजंति पक्षिणो वनचारिणः॥ अग्रतो नो भयं प्राप्तं संशयो जीवितस्य च॥६॥
संप्रहारस्तु सुमहान्भविष्यति न संशयः॥ अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः॥७॥ सन्निकर्षे तु नः शूर जयं शत्रोः पराजयं॰
सुप्रभं च प्रसन्नं च तव वक्त्रं हि लक्ष्यते॥८॥ उद्यतानां हि युद्धार्थं येषां भवति लक्ष्मण॥ निष्प्रभं वदनं तेषां भवत्यायुःपरिक्षयः॥९॥ रक्ष
सां नर्दतां घोरः श्रूयतेयं महाध्वनिः॥ आहतानां च भेरीणां राक्षसैः क्रूरकर्मभिः॥१०॥ अनागतविधानं तु कर्तव्यं शुभमिच्छता॥ आपदं शंक
मानेन पुरुषेण विपश्चिता॥११॥ तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः॥ गुहामाश्रय शैलस्य दुर्गां पादपसंकुलां॥१२॥ प्रतिकूलितु
मिच्छामि न हि वाक्यमिदं त्वया॥ शापितो मम पादाभ्यां गम्यतां वत्स मा चिरं॥१३॥ त्वं हि शूरश्च बलवान् हन्या एतान्न संशयः॥ स्वयं निहंतु
मिच्छामि सर्वानेव निशाचरान्॥१४॥ एवमुक्तस्तु रामेण लक्ष्मणः सह सीतया॥ शरानादाय चापं च गुहां दुर्गां समाश्रयत्॥१५॥

इति शेषः तीर्थव्याख्याने जयसूचकान्तरमाहेति व्याख्येयं॥७॥ सन्निकर्षे आसन्नकाले जयं भित्वारेः ख्यातीत्यनेनान्वयः तवाप्यंगं शुभसूचकमित्याह सुप्रभमिति
॥८॥ येषां च वदनं निष्प्रभं भवति तेषामायुःक्षयो भवति वर्तमानसामीप्ये लट् तेन च अस्माकमिति शेषः येषामायुःक्षयो भवति तेषां वदनं निष्प्रभमिति व्याख्याने वीजं चिं
त्यं॥९॥१०॥ अनागतस्याजिगमिषितस्यानिष्टस्य विधानं प्रतिविधानं परिहारः॥११॥ आश्रमं हित्वा शैलस्य दुर्गामितरैर्गंतुमशक्यां गुहामाश्रय॥१२॥ इदं वाक्यं मयोच्यमा
नं त्वया प्रतिकूलितुं विपरीतं कर्तुं नेच्छामि भिन्नकर्तृके तुमुन्नार्थः उक्तकर्तुर्विन्यर्थः मा चिरं मा विलंबेन॥१३॥ त्वं हीति अनेनासामर्थ्यान्मां वारयतीति शंका निरस्ता॰ स्व
यं त्विति तत्रैव शापोद्धारस्य सत्त्वादिति भावः॥१४॥१५॥

17

हंनेति हर्षे निर्युक्तं शीघ्रमस्मदुक्तं निर्युंठमित्युक्त्वा कवचमाविशत् धृतवान्॥१६॥ नानारत्नकान्त्याग्निसादृश्यं कवचे॥१७॥ संवभूवास्थितः सम्यगास्थितो वभूवे
त्यर्थः॥१८॥१९॥ लोके ब्रह्मर्षिसत्तमाः ते लोकोपि ब्रह्मर्षित्वेन प्रसिद्धा इत्यर्थः पुण्यकर्मणः पुण्यकर्माणः अरीरंत्वमाधं॥२०॥ गोब्राह्मणानामिति षष्ठी चतुर्थ्यर्थे आ
र्षीनभ्य इत्यर्थः लोकानां येभिसंगता इति पाठे लोकानां लोकपालानां संगताः हविर्होमादिदानोपकारका इत्यर्थः॥२१॥२२॥ धर्मात्मा अच्छमप्रेपाधीत्यर्थः॥२३॥ सगणाः

तस्मिन्प्रविष्टे नृगृहं लक्ष्मणेन सह सीतया। हंत निर्युक्तमित्युक्त्वा एवं कवचमाविशत्॥१६॥ स तेनाग्निनिकाशेन कवचेन विभू
षितः। बभूव रामस्तिमिरे महानग्निरिवोत्थितः॥१७॥ स चापमुद्यम्य महच्छरानादाय वीर्यवान्। संबभूवास्थितस्तत्र ज्यास्वनैः पूरयन्दि
शः॥१८॥ ततो देवाः सगंधर्वाः सिद्धाश्च सह चारणैः। समेयुश्च महात्मानो युद्धदर्शनकांक्षया॥१९॥ ऋषयश्च महात्मानो लोके ब्रह्म
र्षिसत्तमाः। समेत्य चाब्रुवन् सहितास्तेऽन्योन्यं पुण्यकर्मणः॥२०॥ स्वस्ति गोब्राह्मणानां च लोकानां चेति संस्थिताः। जयतां राघवो युद्धे पौल
स्त्यान् रजनीचरान्॥२१॥ चक्रहस्तो यथा युद्धे सर्वानसुरपुंगवान्। एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परं॥२२॥ चतुर्दशसहस्राणि
रक्षसां भीमकर्मणां। एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति॥२३॥ इति राजर्षयः सिद्धाः सगणाश्च द्विजर्षभाः। जातकौतू
हलास्तस्थुर्विमानस्थाश्च देवताः॥२४॥ आविष्टं तेजसा रामं संग्रामशिरसि स्थितं। दृष्ट्वा सर्वाणि भूतानि भयाद्विव्यथिरे तदा॥२५॥
रूपमप्रतिमं तस्य रामस्याक्लिष्टकर्मणः। बभूव रूपं क्रुद्धस्य रुद्रस्येव महात्मनः॥२६॥ इति संभाष्यमाणे तु देवगंधर्वचारणैः। ततो
गंभीरनिर्ह्रादं घोरवर्मायुधध्वजं॥२७॥ अनीकं यातुधानानां समंतात्प्रत्यदृश्यत। वीरालापान्विसृजतामन्योन्यमभिगच्छतां

विद्याधरादिदशदेवयोनिगणसहिताः इतीत्यस्यावदंत इति शेषः॥२४॥ तेजसा वैष्णवेन क्षात्रेण एतेन सहजस्वभावो भगवतो ब्राह्मएव क्षात्रं सुजैवछया कार्याय
भगवतास्वीक्रियत इति सूचितम्॥२५॥ रुद्रस्य रूपमिव रामस्य रूपमप्रतिमं॥२६॥ इति वाक्यसंभाष्यमाणेष्वित्यर्थः॥२७॥ अन्योन्यमभिगच्छतामेवं युद्धं कर्तुं वभि
निवबोधनार्थमिति शेषः॥२८॥

भि.

जृंभमाणं रेऌममनाग्यहित्वेनयुद्धप्रवृत्तं येषां रक्तद्रवसीकारा जंजंभमाणां अभीक्ष्णशः पुनःपुनः कश्चित्तु नः पुनः रित्येव पाठः विप्रयुक्ताः अतिशयेन त्यक्ताः स्वनो येषां तेषां ॥२९॥३०॥ य
तनिःशब्दः शब्दाभावस्तं देशं दुद्रुवुः यत्नेनावलोकयन् भीनिवशादिति शेषः ॥३१॥३२॥३३॥ सर्वराक्षसानां वधार्थं सर्वराक्षसवधः तस्मात्त्वारत्वात्स्यायुद्धस्येति भावः क्रोधमाहा

चापानि विस्फारयतां जृंभतां चाप्यभीक्ष्णशः ॥ विप्रघुष्टस्वनानां च दुंदुभींश्चापि निघ्नतां ॥२९॥ तेषां सुविपुलः शब्दः पूरयामास तद्वनं ॥ तेन श
ब्देन वित्रस्ताः श्वापदा वनचारिणः ॥३०॥ दुद्रुवुर्यत्र निःशब्दं पृष्ठतो नावलोकयन् ॥ तत्त्वनीकं महावेगं रामं समनुवर्त्तत ॥३१॥ धृतना
नाप्रहरणं गंभीरं सागरोपमं ॥ रामोपि चारयंश्चक्षुः सर्वतो रणपण्डितः ॥३२॥ ददर्श खरसैन्यं तद्युद्धायाभिमुखो गतः ॥ वितत्य च धनु
र्भीमं तूण्याश्चोद्धृत्य सायकान् ॥३३॥ क्रोधमाहारयत्तीव्रं वधार्थं सर्वरक्षसां ॥ दुष्प्रेक्ष्यश्चाभवत्क्रुद्धो युगान्ताग्निरिव ज्वलन् ॥३४॥
तं दृष्ट्वा तेजसाविष्टं प्राव्यथन्वनदेवताः ॥ तस्य रुष्टस्य रूपं तु रामस्य ददृशे तदा ॥३५॥ दक्षस्येव क्रतुं हन्तुमुद्यतस्य पिनाकिनः ॥ तत्कार्मुकै
राभरणै रथैश्च तद्वर्मभिश्चाग्निसमानवर्णैः ॥ बभूव सैन्यं पिशिताशनानां सूर्योदये नीलमिवाभ्रजालं ॥३७॥ इत्यार्षे श्रीरामायणे आरण्य
काण्डे चतुर्विंशः सर्गः ॥२४॥ अवष्टब्धधनुं रामं क्रुद्धं च रिपुघातिनं ॥ ददर्शाश्रममागम्य खरः सह पुरस्सरैः ॥१॥ तं दृष्ट्वा सगुणं चापमुद्यम्य
खरनिस्वनं ॥ रामस्याभिमुखं सूतं चोद्यतामित्यचोदयत् ॥२॥ स खरस्याज्ञया सूतस्तुरगान्समचोदयत् ॥ यत्र रामो महाबाहुरेको धुन्वन्
धनुः स्थितः ॥३॥ तं तु निष्पतितं दृष्ट्वा सर्वे ते रजनीचराः ॥ मुंचमाना महानादं सचिवाः पर्यवारयन् ॥४॥ स तेषां यातुधानानां मध्ये रथगतः ख
रः ॥ बभूव मध्ये ताराणां लोहिताङ्ग इवोदितः ॥५॥ ततः शरसहस्रेण राममप्रतिमौजसं ॥ अर्दयित्वा महानादं ननाद समरे खरः ॥६॥ ततस्तं
भीमधन्वानं क्रुद्धाः सर्वे निशाचराः ॥ रामं नानाविधैः शस्त्रैरभ्यवर्षन्त दुर्जयं ॥७॥

रयत् प्राप्तवान् ॥३४॥ प्राव्यथन्त्राव्यथंत ॥३५॥ नीलाभ्रजालस्थानीया राक्षसाः सूर्योदयः सूर्यकिरणस्थानीयः कार्मुकादिसंबंधः ॥३७॥ इति श्रीरामाभिरामे आरण्यकाण्डे
चतुर्विंशः सर्गः ॥२४॥ उकारान्तोपि धनुःशब्दो धनुर्वाचकः अवष्टब्धं समवलंबितं धनुर्येन तं ॥१॥ रामस्याभिमुखं रथं चोद्यतामिति सूतमचोदयत् ॥२॥३॥ सचिवाः श्येन
गाम्यादयः ॥४॥ लोहिताङ्गो भौमः स इव क्रोधेनास्यापि रक्ताङ्गत्वात् ॥५॥ अर्दयित्वा अर्दयित्वेव ॥६॥७॥

18

॥८॥ बलाहका मेघाः॥९॥१०॥११॥ तिथिषु प्रदोषतिथिषु पारिषदांनुडभाव आर्षः॥१२॥ प्रतिजग्राह तानि शस्त्राणि स्वशरीरे वहरोधन नद्योघाः नदीप्रवाहाः॥१३॥ वज्रैरिव महाचलः इत्यनेन लेशतोपि व्यथाभावः स विद्धः अनेन द्रष्टॄणां किंचिद्व्रणानि तत्सूचयति आदिग्धः आलिप्तः॥१४॥ अत एव देवादयो विषेदुः॥१५॥१६॥ दुरावारान् अशक्यानि

मुद्गरैरायसैः शूलैः प्रासैः खड्गैः परश्वधैः॥ राक्षसाः समरे शूरं निजघ्नू रोषतत्पराः॥८॥ ते बलाहकसंकाशा महाकाया महाबलाः॥ अभ्यधावंन काकुत्स्थं रथैर्वाजिभिरेव च॥९॥ गजैः पर्वतकूटाभै रामं युद्धे जिघांसवः॥ ते रामे शरवर्षाणि व्यसृजन् रक्षसां गणाः॥१०॥ शैलेन्द्रमिव धाराभिर्वर्षमाणा महाघनाः॥ सर्वैः परिवृतो रामो राक्षसैः क्रूरदर्शनैः॥११॥ तिथिष्विव महादेवो वृतः पारिषदां गणैः॥ तानि मुक्तानि शस्त्राणि यातुधानैः स राघवः॥१२॥ प्रतिजग्राह विशिखैर्नद्योघानिव सागरः॥ स तैः प्रहरणैर्घोरैर्भिन्नगात्रो न विव्यथे॥१३॥ रामः प्रदीप्तैर्बहुभिर्वज्रैरिव महाचलः॥ स विद्धः क्षतजादिग्धः सर्वगात्रेषु राघवः॥१४॥ बभूव रामः संध्याभ्रैर्दिवाकर इवावृतः॥ विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः॥१५॥ एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतं॥ ततो रामस्तु संक्रुद्धो मंडलीकृतकार्मुकः॥१६॥ ससर्ज निशितान्बाणाञ्छतशोथ सहस्रशः॥ दुरावारान्दुर्विषहान्कालपाशोपमान्रणे॥१७॥ मुमोच लीलया कंकपत्रान्काचनभूषणान्॥ ते शराः शत्रुसैन्येषु मुक्ता रामेण लीलया॥१८॥ आददू रक्षसां प्राणान्पाशाः कालकृता इव॥ भित्त्वा राक्षसदेहांस्तांस्ते शरा रुधिराप्लुताः॥१९॥ अन्तरिक्षगता रेजुर्दीप्ताग्निसमतेजसः॥ असंख्येयास्तु रामस्य सायकाश्चापमंडलात्॥२०॥ विनिष्पेतुरतीवोग्रा रक्षःप्राणापहारिणः॥ तैर्धनूंषि ध्वजाग्राणि वर्माणि कवचानि च॥२१॥ बाहून्सहस्ताभरणानूरून्करिकरोपमान्॥ चिच्छेद रामः समरे शतशोथ सहस्रशः॥२२॥ हयान्काञ्चनसन्नाहान्रथयुक्तान्ससारथीन्॥ गजांश्च सगजारोहान्स्त हयान्सादिनस्तदा॥२३॥ ॥७॥ ॥७॥ ॥७॥

वारणान् दुर्विषहान् अतिपीडाजनकानि नियावन॥१७॥ कंकपत्रान्नतपुनशरान् लीलये निपुण पञ्चकलपं चसहारस्वरूपस्मरणावन्मात्रं लीलेव निनाश्चर्याय निभावः॥१८॥ रुधिराप्लुताः स्तत्सिक्ताः॥१९॥ अत एव दीप्ताग्निसमतेजसः चापमंडलात् संधानमोचनशैघ्र्यान्मंडलाकारता चापस्य॥२०॥ वर्माणि फलकानि॥२१॥ सहस्ताभरणान्सागदान्॥२२॥२३॥

छेदाभेदोद्वैधीभावविदारणाद्रूपो परानीनन्द्रत्वायमगत्समपापयरिन्वयः ॥२४॥ नालीकाः सुखमात्रायः संयुक्ताः नाराचाः सर्वतआयसाः विकर्णिनअर्धाकशाः उद्धारेप्रा
णहराः ॥२५॥२६॥२८॥ आवार्यवारिनानिकृत्वा ॥२७॥ सुपर्णवातेनगरुडपक्षवातेनाम्नन्हरणाद्विक्षिप्ताः भग्नाः पादपानेदनस्थाकल्पवृक्षादयोयथानद्वत्समे

चिच्छिदुर्विभिदुश्चैव रामबाणा गुणच्युताः ॥ परानीकं समरे हत्वा अनयद्यमसादनं ॥२४॥ ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ भी
ममार्तस्वरं चक्रुश्छिद्यमाना निशाचराः ॥२५॥ तत्सैन्यं विविधैर्बाणैरर्दितं मर्मभेदिभिः ॥ न रामेण सुखं लेभे शुष्कं वनमिवाग्निना ॥२६॥
केचिद्भीमबलाः शूराः प्रासाञ्छूलान्परश्वधान् ॥ चिक्षिपुः परमाः क्रुद्धा रामाय रजनीचराः ॥२७॥ तेषां बाणैर्महाबाहुः शस्त्राण्यावार्य वीर्यवा
न् जहार समरे प्राणांश्चिच्छेद च शिरोधराः ॥२८॥ ते छिन्नशिरसः पेतुश्छिन्नचर्मशरासनाः ॥ सुपर्णवातविक्षिप्ता जगत्यां पादपा यथा ॥२९॥
अवशिष्टाश्च ये तत्र विषण्णास्ते निशाचराः ॥ खरमेवाभ्यधावंत शरणार्थं शराहताः ॥३०॥ तान्सर्वान्धनुरादाय समाश्वास्य च दूषणः ॥ अभ्य
धावत्सुसंक्रुद्धः क्रुद्धं क्रुद्ध इवांतकं ॥३१॥ निवृत्तास्तु पुनः सर्वे दूषणाश्रयनिर्भयाः ॥ राममेवाभ्यधावंत सालतालशिलायुधाः ॥३२॥ शूलमु
द्गरहस्ताश्च पाशहस्ता महाबलाः ॥ सृजंतः शरवर्षाणि शस्त्रवर्षाणि संयुगे ॥३३॥ द्रुमवर्षाणि मुंचंतः शिलावर्षाणि राक्षसाः ॥ तद्बभूवाद्भुतं
युद्धं तुमुलं रोमहर्षणं ॥३४॥ रामस्यास्य महाघोरं पुनस्तेषां च रक्षसां ॥ ते समंतादभिक्रुद्धा राघवं पुनरार्दयन् ॥३५॥ ततः सर्वा दिशो दृष्ट्वा
प्रदिशश्च समावृताः ॥ राक्षसैः सर्वतः प्राप्तैः शरवर्षाभिरावृतः ॥३६॥ स कृत्वा भैरवं नादमस्त्रं परमभास्वरं ॥ समयोजयद्गांधर्वं राक्षसेषु महा
बलः ॥३७॥ ततः शरसहस्राणि निर्ययुश्चापमंडलात् ॥ सर्वा दश दिशो बाणैरापूर्यंत समागतैः ॥३८॥ ॥३८॥ ॥ श्रीरामायन

हं

19

यालंकारयुतशरीरत्वाद्भ्रष्टसकलतत्राकल्पवृक्षादिसाम्यमितिकतकः ॥२९॥ अवशिष्टाहता वशिष्टा ~~स्तान्यविरुत~~ः ॥३०॥ तान्सर्वान्शरणार्थिनः क्रुद्धं रामं क्रुद्धोन्तकइवाभ्यधा
वत् ॥३१॥ दूषणाश्रयेणदूषणाश्रयबलेननिर्भयाः ॥३२॥३३॥३४॥३५॥ ततः सर्वादिशः प्रदिशश्चावृतादृष्ट्वारामः भैरवंनादंकृत्वासर्वतःप्राप्तैःराक्षसैःशरवर्षाभिःशरवृष्टि
भिरावृतः कालोचितंपरमभास्वरंगांधर्वमस्त्रंराक्षसेषुराक्षसविषयेसमयोजयत्धनुषीनार्थः ॥३६॥ ॥३७॥ ॥३८॥ ॥७॥

नाददानमिति अतिशैघ्र्यवशान्शरग्रहणमोचनेन न पश्यतः किंतु विकर्षमाणमेव धनुः पश्यन्ति ॥३९॥ दिवाकरसहितमाकाशं कर्म शरांधकारं कर्तृ आवृणोत् ॥ अंध-
कारोस्त्रियां प्रक्षिपन्निव भूयोभूयः प्रक्षिपन्निवेत्यर्थः इवशब्दः स्वार्थे ॥४०॥ विकीर्णाकृताच्छादना विस्तीर्णेति पाठे यथापूर्वमेवार्थः ॥४१॥ निहताः सयाहताः पतिताः पाता-

नाददानं शरान्घोरान्विमुंचंतं शरोत्तमान् ॥ विकर्षमाणं पश्यंति राक्षसास्ते शरार्दिताः ॥३९॥ शरांधकारमाकाशमावृणोत्सदिवाकरं ॥ बभू-
वावस्थितो रामः प्रक्षिपन्निव तान्शरान् ॥४०॥ युगपत्पतमानैश्च युगपच्च हतैर्भृशं ॥ युगपत्पतितैश्चैव विकीर्णा वसुधाभवत् ॥४१॥ निह-
ताः पतिताः क्षीणाश्छिन्ना भिन्ना विदारिताः ॥ तत्र तत्र स्म दृश्यन्ते राक्षसास्ते सहस्रशः ॥४२॥ सोष्णीषैरुत्तमांगैश्च सांगदैर्बाहुभिस्तथा ॥ ऊ-
रुभिर्बाहुभिश्छिन्नैर्नानारूपैर्विभूषणैः ॥४३॥ हयैश्च द्विपमुख्यैश्च रथैर्भिन्नैरनेकशः ॥ चामरव्यजनैश्छत्रैर्ध्वजैर्नानाविधैरपि ॥४४॥ रामे-
ण बाणाभिहतैर्विच्छिन्नैः शूलपट्टिशैः ॥ विच्छिन्नैः समरे भूमिर्विस्तीर्णाभूद्भयंकरा ॥४५॥ तान्दृष्ट्वा निहतान्सर्वे राक्षसाः परमातुराः ॥ न
तत्र चलितुं शक्ता रामं परपुरंजयं ॥४६॥ ॥ इत्यार्षे श्रीमद्रामायणे वा० आरण्यकांडे पंचविंशतितमः सर्गः ॥२५॥ ॥ दूषणस्तु स्वकं
सैन्यं हन्यमानं विलोक्य च ॥ संदिदेश महाबाहुर्भीमवेगान्दुरासदान् ॥१॥ राक्षसान्पंचसाहस्रान्समरेष्वनिवर्तिनः ॥ ते शूलैः पट्टिशैः खड्गैः
शिलावर्षैर्द्रुमैरपि ॥२॥ शरवर्षैरविच्छिन्नं ववृषुस्तं समंततः ॥ स द्रुमाणां शिलानां च वर्षं प्राणहरं महत् ॥३॥ प्रतिजग्राह धर्मात्मा राघवस्ती-
क्ष्णसायकैः ॥ प्रतिगृह्य च तद्वर्षं निमीलित इवर्षभः ॥४॥ रामः क्रोधं परं लेभे वधार्थं सर्वरक्षसां ॥ ततः क्रोधसमाविष्टः प्रदीप्त इव तेज-
सा ॥५॥ शरैरभ्यकिरत्सैन्यं सर्वतः सहदूषणं ॥ ततः सेनापतिः क्रुद्धो दूषणः शत्रुदूषणः ॥६॥ शरैरशनिकल्पैस्तं राघवं समवारयत् ॥ त-
तो रामः सुसंक्रुद्धः क्षुरेणास्य महद्धनुः ॥७॥ चिच्छेद समरे वीरश्चतुर्भिश्चतुरो हयान् ॥ हत्वा चाश्वांछरैस्तीक्ष्णैरर्धचंद्रेण सारथेः ॥८॥

सा

नंनरंमताः क्षीणाः कंठगतप्राणाः छिन्नभिन्नौ व्याख्यातौ ॥४२॥ विभूषणोपलक्षितराक्षसैरिति शेषः ॥४३॥ ॥४४॥ विच्छिन्नैर्विशेषतश्छिन्नैः चामरादिभिर्विशेषतश्छि-
न्नैः शूलपट्टिशैश्चेत्यर्थः ॥४५॥ रामं चलितुं रामं प्रति संमुखं गंतुं ॥४६॥ इति रामाभिरामे श्रीरामीयरामा० आरण्यकांडे पंचविंशः सर्गः ॥२५॥ ॥ दूषणस्त्विति ॥१॥ पंच-
साहस्रान्स्वसैन्यरूपान् ॥२।३॥ प्रतिजग्राह रुरोध निमीलितः वर्षधारया निमीलिताक्ष ॥४।५।६॥ क्षुरेण चक्षुधारेण शरेण ॥७।८॥

नइषः कर्मवधनेयमः कर्त्ता ॥९॥१०॥ परेषांशत्रूणांवसयोक्षितंक्षितंशत्रूणांगात्रइंद्रियाणिनेषांपरंशरीरंतस्यदारकं यत्नानेषांप्रहारविहारकं ११ १२॥१३॥ हस्तछेदानंतरंभ
ष्टःपतितेनतस्यानानभ्रष्टः तथाछिन्नहस्तस्यपरिघःपपात ॥१४॥ विकीर्णाभ्यांविक्षिप्ताभ्यांभुजाभ्यांसुपलक्षितोदूषणश्चपपातविगतासुरितिशेषः विषाणाभ्यांदं

शिरोजहारतद्रक्षस्त्रिभिर्विव्याधवक्षसि ॥ सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः ॥९॥ जग्राहगिरिशृंगाभंपरिघंलोमहर्षणं ॥ वेष्टितं
काञ्चनैःपट्टैर्देवसैन्याभिमर्दनम् ॥१०॥ आयसैःशंकुभिस्तीक्ष्णैःकीर्णंपरवसोक्षितं ॥ वज्राशनिसमस्पर्शंपरगोपुरदारणं ॥११॥ तंमहो
रगसंकाशंप्रगृह्यपरिघंरणे ॥ दूषणोभ्यपतद्रामंक्रूरकर्मानिशाचरः ॥१२॥ तस्याभिपतमानस्यदूषणस्यसराघवः ॥ द्वाभ्यांशराभ्यां
चिच्छेदसहस्ताभरणौभुजौ ॥१३॥ भ्रष्टस्तस्यमहाकायः पपातरणमूर्धनि ॥ परिघःछिन्नहस्तस्यशक्रध्वजइवाग्रतः ॥१४॥ कराभ्यांच
विकीर्णाभ्यांपपातभुविदूषणः ॥ विषाणाभ्यांविशीर्णाभ्यांमनस्वीवमहागजः ॥१५॥ दृष्ट्वातंपतितंभूमौदूषणंनिहतंरणे ॥ साधुसा
ध्विनिकाकुत्स्थंसर्वभूतान्यपूजयन् ॥१६॥ एतस्मिन्नंतरेक्रुद्धास्त्रयःसेनाग्रयायिनः ॥ संहत्याभ्यद्रवन्रामंमृत्युपाशावपाशिनाः ॥१७॥
महाकपालःस्थूलाक्षःप्रमाथीचमहाबलः ॥ महाकपालोविपुलंशूलमुद्यम्यराक्षसः ॥१८॥ स्थूलाक्षःपट्टिशंगृह्यप्रमाथीचपरश्वधं ॥ दृ
ष्ट्वैवापततस्तांस्तुराघवःसायकैःशितैः ॥१९॥ तीक्ष्णाग्रैःप्रतिजग्राहसंप्राप्तानतिथीनिव ॥ महाकपालस्यशिरश्चिच्छेदरघुनंदनः ॥२०॥ असंख्ये
यैस्तुबाणौघैःप्रममाथप्रमाथिनं ॥ स्थूलाक्षस्याक्षिणीस्थूलेपूरयामाससायकैः ॥२१॥ सपपातहतोभूमौविटपीवमहाद्रुमः ॥ दूष
णस्यानुगान्पंचसाहस्रान्कुपितःक्षणात् ॥२२॥ हत्वातुपंचसाहस्रैर्नयद्यमसादनं ॥ दूषणंनिहतंश्रुत्वातस्यचैवपदानुगान् ॥२
३॥ व्यादिदेशखरःक्रुद्धःसेनाध्यक्षान्महाबलान् ॥ अयंविनिहतःसंख्येदूषणःसपदानुगः ॥२४॥ महत्यासेनयासार्धंयुद्ध्वारामंकुमानुषं

शस्त्रैर्नानाविधाकारैर्हनध्वंसर्वराक्षसाः ॥२५॥

ताभ्यां ॥१५॥१६॥ संहत्यमिलित्वामृत्युपाशेनावपाशिनाःबद्धाः ॥१७॥१८॥१९॥ ॥२०॥ ॥२१॥ ॥२२॥ पंचसाहस्रानपंचसाहस्रैरित्यनेनभगवतोऽमोघत्वंसूचितं ॥२३॥
॥२४॥ हनध्वमितिशेषः ॥२५॥ ॥२६॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥श्रीरामायनमः ॥छ॥

20

॥२६॥२७॥२८॥२९॥३०॥ शतं एकेन शतेन तत्संख्याकेन कर्णिनाबाणविशेषेण एवंसहस्रंसहस्रेण ॥३१॥ शोणितादिग्धाः शोणितलिप्ताः ॥३२॥ विस्तीर्णा विशेषेणछन्ना म
हावेदिः अश्वमेधादिवेदिः ॥३३॥३४॥ मानुषेण मानुषवेषेणापि ॥३५॥ त्रिशिराश्चैवेति स्वस्वमूलबलेन सहेति शेषः ॥३६॥३७॥ उद्यताशनिः उद्यतवज्रः ॥३८॥ इति रामाभिरामे श्रीरा० षड्विं

एवमुक्त्वाखरःक्रुद्धोराममेवाभिदुद्रुवे ॥ श्येनगामीपृथुग्रीवोयज्ञशत्रुर्विहंगमः ॥२६॥ दुर्जयःकरवीराक्षःपरुषःकालकार्मुकः ॥ हेम
मालीमहामालीसर्पास्योरुधिराशनः ॥२७॥ द्वादशैतेमहावीर्याः बलाध्यक्षाःससैनिकाः ॥ राममेवाभ्यधावन्तविसृजन्तःशरोत्तमा
न् ॥२८॥ ततःपावकसंकाशैर्हेमवज्रविभूषितैः ॥ जघानशेषंतेजस्वीतस्यसैन्यस्यसायकैः ॥२९॥ तेरुक्मपुंखाविशिखाःसधूमाइव
पावकाः ॥ निजघ्नुस्तानिरक्षांसिवज्राइवमहाद्रुमान् ॥३०॥ रक्षसांतुशतंरामःशतेनैकेनकर्णिना ॥ सहस्रंतुसहस्रेणजघानरणमूर्ध
नि ॥३१॥ तैर्भिन्नवर्माभरणाश्छिन्नभिन्नशरासनाः ॥ निपेतुःशोणितादिग्धाधरण्यांरजनीचराः ॥३२॥ तैर्मुक्तकेशैःसमरेपतितैःशो
णितोक्षितैः ॥ विस्तीर्णावसुधाकृत्स्नामहावेदिःकुशैरिव ॥३३॥ क्षणेनतुमहाघोरंवनंनिहतराक्षसं ॥ बभूवनिरयप्रख्यंमांसशोणि
तकर्दमं ॥३४॥ चतुर्दशसहस्राणिरक्षसांभीमकर्मणां ॥ हतान्येकेनरामेणमानुषेणपदातिना ॥३५॥ तस्यसैन्यस्यसर्वस्यखरःशेषोमहारथः ॥
राक्षसस्त्रिशिराश्चैवरामश्चरिपुसूदनः ॥३६॥ शेषाहताखरस्तेनःसमासमासादेंद्रइवोद्यताशनिः ॥३८॥ ॥ इत्यार्षे श्रीमद्रामायणे
आर० षड्विंशःसर्गः ॥२६॥ ॥ खरंतुरामाभिमुखंप्रयान्तंवाहिनीपतिः ॥ राक्षसस्त्रिशिरानामसन्निपत्येदमब्रवीत् ॥१॥ मांनियोज
यविक्रान्तंत्वंनिवर्तस्वसाहसात् ॥ पश्यरामंमहाबाहुंसंयुगेविनिपातितं ॥२॥ प्रतिजानामितेसत्यमायुधंचाहमालभे ॥ यथारामंवधिष्यामिव
धार्हंसर्वरक्षसां ॥३॥ अहंवास्यरणेमृत्युरेषवासमरेमम ॥ विनिवर्त्यरणोत्साहंमुहूर्तंप्राश्निकोभव ॥४॥ ॥५॥

शःसर्गः ॥२६॥ ॥ खरमिति सन्निपत्य त्वरया तत्समीपमागम्य ॥१॥ विनिपातितं मयेति शेषः ॥२॥ आलभे स्पृशामि यथा वधिष्यामि तथा प्रयतिष्य इति शेषः सर्वरक्षसां वधार्हं [illegible]
[illegible] सर्वरक्षसां वध्यमित्यर्थः ॥३॥ अहं वा समरे इति पाठे मृत्युरित्यस्यास्येति शेषः रणोत्साहादिति पाठे न तोमनो निवर्त्येत्यर्थः प्राश्निकः मध्यस्थः उभययुद्धसाक्षीत्यर्थः ॥४॥

महावीर्या रक्षसा रणमूर्द्धनि ॥ घोरा दुर्विषहाः सर्वे लक्ष्मणस्याग्रजेन ते ३७ ततस्तद्भीममहाबलंहवे समीक्ष्य
र्मेणाहतंबलीयसा रथेन रामं महता ४

॥रा·वा·आ॥
॥२६॥

संयुगाय संयुगं कर्तुं ॥ ४ ॥ मृत्युलोभात् मृत्युकृतयुद्धलोभात् मृत्युसमये रसः प्रकृतिविपर्ययात् न स्वभगवन्तं ज्ञात्वात इत्यलं मृत्युलोभादित्यर्थः युद्धे युद्धे कुरुष्व अनुज्ञातः खरे
णानिशेषः ॥ ६ ॥ ७ ॥ जलार्द्रस्येति अनेन नादस्य वैपरीत्येन मृत्युसान्निध्यं सूचितं ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ अहो इत्यादि व्यङ्ग्योक्तिः प्रशंसैव विपरीतलक्षितेत्यनेनान्वगपिदनविक्रमत्वाशयः ॥ १२ ॥ १३
वाजिनस्तुरगान् वेगवतोऽश्वानित्यर्थः ॥ १४ ॥ १५ ॥ हतरथात् हतस्यसारथिकाद्रथात् ॥ १६ ॥ जडः आयुधपरिग्रहहीन इति शेषः ॥ १७ ॥ १८ ॥ पूर्वं पतितैः शिरोभिरुपलक्षितः पश्चान्न्यप

प्रहृष्टो वा हतो वा मे जनस्थानं प्रयास्यसि । मयि वा निहते रामं संयुगायोपयास्यसि ॥ ५ ॥ खरस्त्रिशिरसा तेन मृत्युलोभात्प्रसादितः । गच्छ युद्ध्येत्य
भिज्ञातो राघवाभिमुखो ययौ ॥ ६ ॥ त्रिशिराश्च रथेनैव वाजियुक्तेन भास्वता । अभ्यद्रवद्रणे रामं त्रिशृङ्ग इव पर्वतः ॥ ७ ॥ शरधारासमू
हान्स महामेघ इवोत्सृजन् । व्यसृजत्सदृशं नादं जलार्द्रस्येव दुन्दुभेः ॥ ८ ॥ आगच्छन्तं त्रिशिरसं राक्षसं प्रेक्ष्य राघवः । धनुषा प्रतिजग्राह वि
धुन्वन्सायकाञ्छितान् ॥ ९ ॥ स सम्प्रहारस्तुमुलो रामत्रिशिरसोर्महान् । संबभूवातिबलिनोः सिंहकुञ्जरयोरिव ॥ १० ॥ ततस्त्रिशिरसा बाणै
र्ललाटे ताडितस्त्रिभिः । अमर्षी कुपितो रामः संरब्ध इदमब्रवीत् ॥ ११ ॥ अहो विक्रमशूरस्य राक्षसस्येदृशं बलं । पुष्पैरिव शरैर्योऽहं ललाटेऽस्मि परि
क्षितः ॥ १२ ॥ ममापि प्रतिगृह्णीष्व शरांश्चापगुणाच्च्युतान् । एवमुक्त्वा सुसंरब्धः शरानाशीविषोपमान् ॥ १३ ॥ त्रिशिरोवक्षसि क्रुद्धो निजघान चतुर्द
श । चतुर्भिस्तुरगानस्य शरैः सन्नतपर्वभिः ॥ १४ ॥ न्यपातयत तेजस्वी चतुरस्तस्य वाजिनः । अष्टाभिः सायकैः सूतं रथोपस्थे न्यपातयत् ॥ १५ ॥ राम
श्चिच्छेद बाणेन ध्वजं चास्य समुच्छ्रितं । ततो हतरथात्तस्मादुत्पतन्तं निशाचरं ॥ १६ ॥ चिच्छेद रामस्तं बाणैर्हृदये सोऽभवज्जडः । सायकैश्चाप्रमे
यात्मा सामर्षस्तस्य रक्षसः ॥ १७ ॥ शिरांस्यपातयत्त्रीणि वेगवद्भिस्त्रिभिः शरैः । स धूमशोणितोद्गारी रामबाणाभिपीडितः ॥ १८ ॥ न्यपतत्प
तितैः पूर्वं समरस्थो निशाचरः । हतशेषास्ततो भग्ना राक्षसाः खरसंश्रयाः ॥ १९ ॥ द्रवन्ति स्म न तिष्ठन्ति व्याघ्रत्रस्ता मृगा इव । तान्खरो द्रवतो दृ
ष्ट्वा निवर्त्य रुषितस्त्वरन् ॥ २० ॥ राममेवाभिदुद्राव राहुश्चन्द्रमसं यथा २०

नत् चतुर्दशसहस्राणि मम चित्तानुवर्त्तिनामिति सेनायोगः खरेणोक्तेश्चतुर्दशसहस्राणि हतानि खरस्त्रिशिरसावेवावशिष्टाविति पूर्वसर्गान्त उक्तेर्हतशेषान्निवर्त्य निजत्र
न्योक्तेश्चतुर्दशसहस्रसंयूथपा अत्रैव निजयने हतशेषा इति तु खरीयमूलबलाभिप्रायं बोध्यं ॥ १९ ॥ ॥ २० ॥ ॥ १९ ॥ ॥ ७ ॥ ॥ २० ॥ ॥ ७ ॥

21

॥राम॥
॥३६॥

॥२०॥ इति रामाभिरामे आर० सप्तविंशतितमः सर्गः ॥२७॥ ॥ निहतमिति ॥१॥ रक्षसामिदं राक्षसं सैन्यं हतं दृष्ट्वा त्वयः ॥२॥ हतभूयिष्ठं अल्पावशेषं ॥३॥४॥ शिक्षया धनुर्विद्याभ्यासेन मार्गान् शरसंधानक्षेपणादिप्रकारभेदान् दर्शयन् रथस्थः खरः समरे चचार अनेकविधरथसंचारैः ॥५॥६॥ स रामः नभः आकाशम् अविवरं नीरंध्रं चकार ॥७॥ पर्याकाशं परितो वियमानमाका

इत्यार्षे श्रीमद्रामायणे आरण्य० सप्तविंशः सर्गः ॥२७॥ ॥ निहतं दूषणं दृष्ट्वा रणे त्रिशिरसा सह । खरस्याप्यभवत्त्रासो दृष्ट्वा रामस्य विक्रमं ॥१॥ स दृष्ट्वा राक्षसं सैन्यमविषह्यं महाबलं ॥ हतमेकेन रामेण दूषणस्त्रिशिरा अपि ॥२॥ तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः ॥ आससाद खरो रामं नमुचिर्वासवं यथा ॥३॥ विकृष्य बलवच्चापं नाराचान् रक्तभोजनान् ॥ खरश्चिक्षेप रामाय क्रुद्धानाशीविषानिव ॥४॥ ज्यां विधुन्वन् सुबहुशः शिक्षयास्त्राणि दर्शयन् ॥ चचार समरे मार्गान् शरै रथगतः खरः ॥५॥ स सर्वांश्च दिशो बाणैः प्रदिशश्च महारथः ॥ पूरयामास तं दृष्ट्वा रामोपि सुमहद्धनुः ॥६॥ स सायकैर्दुर्विषहैर्विस्फुलिंगैरिवाग्निभिः ॥ नभश्चकाराविवरं पर्जन्य इव वृष्टिभिः ॥७॥ तद्बभूव शितैर्बाणैः खररामविसर्जितैः ॥ पर्याकाशमनाकाशं सर्वतः शरसंकुलं ॥८॥ शरजालावृतः सूर्यो न तदा स्म प्रकाशते ॥ अन्योन्यवधसंरंभादुभयोः संप्रयुध्यतोः ॥९॥ ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णिभिः ॥ आजघान रणे रामं तोत्रैरिव महाद्विपं ॥१०॥ तं रथस्थं धनुःपाणिं राक्षसं पर्यवस्थितं ॥ ददृशुः सर्वभूतानि पाशहस्तमिवांतकं ॥११॥ हंतारं सर्वसैन्यस्य पौरुषे पर्यवस्थितं ॥ परिश्रांतं महासत्त्वं मेने रामं खरस्तदा ॥१२॥ तं सिंहमिव विक्रांतं सिंहविक्रांतगामिनं ॥ दृष्ट्वा नोद्विजते रामः सिंहः क्षुद्रमृगं यथा ॥१३॥ ततः सूर्यनिकाशेन रथेन महता खरः ॥ आससाद रणे रामं पतंग इव पावकं ॥१४॥ ततोस्य सशरं चापं मुष्टिदेशे महात्मनः ॥ खरश्चिच्छेद रामस्य दर्शयन् हस्तलाघवं ॥१५॥ स पुनस्त्वपरान् सप्त शरानादाय मर्मणि ॥ निजघान रणे क्रुद्धः शक्राशनिसमप्रभान् ॥१६॥ ततः शरसहस्रेण राममप्रतिमौजसं ॥ अर्दयित्वा महानादं ननाद समरे खरः ॥१७॥ ततस्तत्प्रहतं बाणैः खरमुक्तैः सुपर्वभिः ॥ पपात कवचं भूमौ रामस्यादित्यवर्चसं ॥१८॥ स शरैरर्पितः क्रुद्धः सर्वगात्रेषु रा

भूतानि प

शमनाकाशं निरवकाशं बभूव ॥८॥९॥१०॥११॥ सर्वसैन्यस्य हंतारं रामं खरः परिश्रांतं मेने अनेनायं प्रहारावसरः इति खरबोधः सूचितः अतएवानुपदं तेन रामधनुश्छेदः ॥१२॥१३॥ ॥१४॥ मुष्टिदेशे धनुर्ग्रहणप्रदेशोपरिदेशे ॥१५॥ स खरः मर्मणि कवचबंधसंधिषु ॥१६॥१७॥ प्रहतं कवचं पपात ॥१८॥ शरैरर्पितः संक्षतः हतः ॥१९॥

॥२०॥ महर्षिणा अगस्त्येन अतिसृष्टं दत्तं ॥२१॥२२॥ देवतानामाज्ञया सूर्य इवेति कविकल्पितोपमा निर्बाधेयं ॥२३॥२४॥२५॥ अभिलक्षितान् अभिलक्षितविषयान् ॥२६॥ नाने
वविषयानाह शिरस्येकेनेत्यादि ॥२७॥२८॥ भास्करोपमानित्यस्य गृहीत्वेति शेषः उपात्तत्रयोदशानां विनियोगमाह रथस्येत्यादि ॥२९॥ त्रिवेणुर्नाम रथमुखस्थायुगाधा-

ततो गंभीरनिर्ह्रादं रामः शत्रुनिवर्हणः ॥ चकारांताय स रिपोः सज्यमन्यन्महद्धनुः ॥२०॥ सुमहद्वैष्णवं यत्तदतिसृष्टं महर्षिणा ॥ वरं तद्धनुरुद्य-
म्य खरं समभिधावत ॥२१॥ ततः कनकपुंखैस्तु शरैः सन्नतपर्वभिः ॥ चिच्छेद रामः संक्रुद्धः खरस्य समरे ध्वजम् ॥२२॥ स दर्शनीयो बहुधा वि-
च्छिन्नः कांचनो ध्वजः ॥ जगाम धरणीं सूर्यो देवतानामिवाज्ञया ॥२३॥ तं चतुर्भिः खरः क्रुद्धो रामं गात्रेषु मार्गणैः ॥ विव्याध हृदि मर्मज्ञो मातं-
गमिव तोमरैः ॥२४॥ स रामो बहुभिर्बाणैः खरकार्मुकनिःसृतैः ॥ विद्धो रुधिरसिक्तांगो बभूव रुषितो भृशं ॥२५॥ स धनुर्धन्विनां श्रेष्ठः संगृह्य
परमाहवे ॥ मुमोच परमेष्वासः षट् शरानभिलक्षितान् ॥२६॥ शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्पयत् ॥ त्रिभिश्चंद्रार्धवक्त्रैश्च वक्षस्यभिज-
घान ह ॥२७॥ ततः पश्चान्महातेजा नाराचान्भास्करोपमान् ॥ जघान राक्षसं क्रुद्धस्त्रयोदश शिलाशितान् ॥२८॥ रथस्य युगमेकेन चतुर्भिः शबला-
न्हयान् ॥ षष्ठेन च शिरः संख्ये चिच्छेद खरसारथेः ॥२९॥ त्रिभिस्त्रिवेणुं बलवान्द्वाभ्यामक्षं महाबलः ॥ द्वादशेन तु बाणेन खरस्य सशरं ध-
नुः ॥३०॥ छित्वा वज्रनिकाशेन राघवः प्रहसन्निव ॥ त्रयोदशेनेंद्रसमो बिभेद समरे खरं ॥३१॥ प्रभग्नधन्वा विरथो हताश्वो हतसारथिः ॥ गदापा-
णिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥३२॥ तत्कर्म रामस्य महारथस्य समेत्य देवाश्च महर्षयश्च ॥ अपूजयन्प्रांजलयः प्रहृष्टास्तदा विमानाग्रग-
ताः समेताः ॥३२॥ ॥ इत्यार्षे श्रीरामायणे आरण्यकांडे ऽष्टाविंशः सर्गः ॥२८॥ खरं तु विरथं रामो गदापाणिमवस्थितं ॥ मृदु-
पूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥१॥ ॥७॥ ॥७॥ ॥७॥ ॥श्रीरामाय नमः॥ ॥७॥

22
शिला ६

रदंडः ॥३०॥ प्रहसन्निव लीलयैवेति विभेद खरं हृदीति शेषः ॥३१॥३२॥ महारथस्य पूज्यस्य तत्कर्म दृष्ट्वेति शेषः अपूजयन्नमस्कारस्तुत्यादिभिस्तमतोषयन्नित्यर्थः ॥३२॥ इति
रामाभिरामे श्रीरा॰ आर॰ ऽष्टाविंशः सर्गः ॥२८॥ ॥ मृदुपूर्वं न्यायमवलंब्य सदुक्तिपूर्वं परुषं परुषार्थकं ॥१॥

त्वन्नश्यन्नायेनायंनवनाशः इत्याहगजेत्यादि बलेतिष्ठताबलविषयत्वाभिमानेनतिष्ठताईदृशेनयद्दारुणंकर्मकृतंभवतितत्सर्वलोकनिंद्यंभवति ॥२॥ एवंविधकर्मकर्त्तुर्नेहसुख
मित्याह उद्वेजनीयइतिउद्वेजकइत्यर्थः नृशंसोघातुकः क्रूरः एवंगुणकईश्वरोपिनतिष्ठति ॥३॥ नरेवाहकर्मेत्यादि सर्वजनोहंति· अकृतापकारोपिहंतिसत्सर्ववध्यइति
यावत ॥४॥ अप्राप्तप्राप्तीच्छाकामःप्राप्ताधिकेच्छालोभःतस्यपापस्यांतंस्वनाशरूपंपरिपाकंपश्यति पापफलमनुभवतीत्यर्थः करकावर्षोपलास्तानत्तिकरकान्ताब्राह्मणीर
क्तपुच्छिकेवारक्तपुच्छिकायाःकरकाविषंतन्निगरणमात्रेणतन्मृत्युरितिप्रसिद्धिःसायथास्वानर्थमपश्यतीतद्भक्षेभोजनोत्तरंतन्नाशंलोकःपश्यति एवंयःकर्मकारका

गजाश्वरथसंबाधेबलेमहतितिष्ठता ॥ कृतंतेदारुणंकर्मसर्वलोकजुगुप्सितं ॥२॥ उद्वेजनीयोभूतानांनृशंसःपापकर्मकृत ॥ त्रयाणाम
पिलोकानामीश्वरोपिनतिष्ठति ॥३॥ कर्मलोकविरुद्धंतुकुर्वाणंक्षणदाचर ॥ तीक्ष्णंसर्वजनोहन्तिसर्पंदुष्टमिवागतम ॥४॥ लोभात्पा
पानिकुर्वाणःकामाद्वायोनबुध्यते ॥ हृष्टःपश्यतितस्यान्तंब्राह्मणीकरकादिव ॥५॥ वसतोदण्डकारण्येतापसान्धर्मचारिणः ॥ किन्नुहत्वा
महाभागान्फलंप्राप्स्यसिराक्षस ॥६॥ नचिरंपापकर्माणःक्रूरालोकजुगुप्सिताः ॥ ऐश्वर्यंप्राप्यतिष्ठन्तिशीर्णमूलइवद्रुमाः ॥७॥ अव
श्यंलभतेकर्ताफलंपापस्यकर्मणः ॥ घोरंपर्यागतेकालेद्रुमःपुष्पमिवार्तवम ॥८॥ नचिरात्प्राप्यतेलोकेपापानांकर्मणांफलं ॥ सविषा
णामिवान्नानांभुक्तानांक्षणदाचर ॥९॥ पापमाचरतांघोरंलोकस्याप्रियमिच्छतां ॥ अहमासादितोराज्ञाप्राणान्हन्तुंनिशाचर ॥१०॥ अ
द्यभित्वामयामुक्ताःशराःकाञ्चनभूषणाः ॥ विदार्यानिपतिष्यन्तिवल्मीकमिवपन्नगाः ॥११॥ येत्वयादण्डकारण्येभक्षिताधर्मचारिणः ॥
तानद्यनिहतःसंख्येससैन्योनुगमिष्यसि ॥१२॥ अद्यत्वांनिहतंबाणैःपश्यन्तुपरमर्षयः ॥ निरयस्थंविमानस्थायेत्वयानिहताःपुरा ॥१३॥

स्वनाशकमिदमितिनबुध्यतेतस्यतत्कर्मप्रायस्तंतन्नाशंलोकोहृष्टःसन्पश्यतीत्यर्थइतिकतकः ॥५॥ ततःकिंतत्राह वसतइति किंफलमग्रेप्राप्स्यसिनत्विष्टइतिशेषः
॥६॥ इदंतुप्रत्यक्षमित्याहनेति पापकर्मणःपूर्वपुण्येनैश्वर्यंप्राप्यापिनचिरंतिष्ठति ॥७॥ कालेपापानुभवकालेघोरंदुःखरूपफलं ॥८॥ ९॥ घोरंकर्मणःफलभवतीतिशेषः
अतोहेतोरहंराजादुष्टनिग्रहाधिकारीहेनिशाचरराक्षसाप्राणान्हंतुंआसादितोऋषिभिरितिशेषः त्वयेतिवाराज्ञेतिनिपाठेराज्ञारदशरथेनासादितोनियुक्तइत्यर्थइतितीर्थः ॥१०॥
अद्यमयामुक्ताबाणाःत्वद्वपुर्भित्वाभूमिंविदार्यनिपतिष्यंतिभुवमतिक्रम्यपतिष्यंति पातालंगमिष्यंतीतियावत अत्रत्वदनुगमनेप्राणनाशमात्रेणअनएवनिरयस्यामि
निवस्यति ॥१२॥ निरयस्थमिति नतुभगवताहननस्यान्तिसमयेभगवद्दर्शनवतःकथंनिरयस्थमितिचेत्तदुग्रस्यब्रह्मवधकर्मणःफलस्यावश्यंभोक्तव्यत्वेनादौभगवदिच्छ
येवानिरयभोगपूर्वकंजन्ममेयद्प्राप्तेःसत्वेनादोषात ॥१३॥

अ१

५२

कुलाधम कुलेनाधम॥१४॥१५॥१६॥गर्विता अतिनकथयंतीत्यन्वयः॥१७॥अकृतात्मानः कल्मषचित्ताः॥१८॥कुलंव्यपदिशन्कुलीनत्वंप्रकटयन्मृत्युकालेनतुल्ययुद्धकालेसंप्रा
प्तेअप्रस्तवेप्रस्तावेप्रसंगाभावआर्षः स्तवंस्वरूपंवचनंकोभिधास्यतिनकोपीत्यर्थःअहंमासादिनोयजेनिरामोक्तेरिदमुक्तवान्॥१९॥कथनेनप्राकृतेनतेनत्वयासर्वथैवात्मनोल
घुत्वंदर्शितंयथासुवर्णप्रतिरूपेणस्वर्णतुल्यरूपेणापितप्तेनकुशाग्निनास्वर्णादिशोधनाग्निनातप्तेनयथास्वस्यकृष्णवर्णत्वरूपंलाघवंदर्शितंभवतिमन्दृत्तापादपूर्वेहितत्र
स्वर्णताद्विःसानापेयथातत्प्रतिनथात्वयास्वस्मिन्स्थिताप्राकृष्टरत्वद्वद्धिकत्थनेनापहृतेत्यर्थः तुषाग्निनेतिपाठांतरं॥२०॥अयमेवतत्कत्थनेहेतुरित्याह नत्विति गदाधरं

प्रहरस्वयथाकामंकुरुयत्नंकुलाधम॥अद्यतेपातयिष्यामिशिरस्तालफलंयथा॥१४॥एवमुक्तस्तुरामेणक्रुद्धःसंरक्तलोचनः॥प्रत्युवा
चततोरामंप्रहसन्क्रोधमूर्छितः॥१५॥प्राकृतान्राक्षसान्हत्वायुद्धेदशरथात्मज॥आत्मनाकथमात्मानमप्रशस्यंप्रशंससि॥१६॥विक्रां
ताबलवंतोवायेभवंतिनरर्षभाः॥कथयंतिनतेकिंचित्तेजसाचातिगर्विताः॥१७॥प्राकृतास्त्वकृतात्मानोलोकेक्षत्रियपांसनाः॥निरर्थकं
विकत्थंतेयथारामविकत्थसे॥१८॥कुलंव्यपदिशन्वीरःसमरेकोभिधास्यति॥मृत्युकालेतुसंप्राप्तेस्वयमप्रस्तवेस्तवं॥१९॥सर्वथातुलघुत्वं
तेकत्थनेनविदर्शितं॥सुवर्णप्रतिरूपेणतप्तेनेवकुशाग्निना॥२०॥नतुमामिहतिष्ठंतंपश्यसित्वंगदाधरं॥धराधरमिवाकंप्यंपर्वतंधातुभि
श्चितं॥२१॥पर्याप्तोहंगदापाणिर्हंतुंप्राणान्रणेतव॥त्रयाणामपिलोकानांपाशहस्तइवांतकः॥२२॥कामंबह्वपिवक्तव्यंत्वयिवक्ष्यामि
नत्वहं॥अस्तंप्राप्नोतिसवितायुद्धविघ्नस्ततोभवेत्॥२३॥चतुर्दशसहस्राणिराक्षसानांहतानिते॥त्वद्विनाशात्करोम्यद्यतेषामश्रुप्रमार्जनं
॥२४॥इत्युक्त्वापरमक्रुद्धःसगदांपरमांगदां॥खरश्चिक्षेपरामायप्रदीप्तामशनिंयथा॥२५॥ ॥२५॥ ॥श्रीरामायनमः॥छ॥

23

मांयतोनपश्यसिमारतोनजानासिअतोविकत्थसेइत्यन्वयः धराधरमितिपर्वतविशेषणंतेनकुलाचलसादृश्यंबोधनं॥२१॥स्वकंसारंदर्शयति पर्याप्तइति गदापाणिरितिगदा
हस्तइत्यर्थः त्रयाणांलोकानांवेत्यर्थः २२ यद्यपित्वद्विषयेकामंबहुवक्तव्यमस्तिअथाप्यहंनवक्ष्यामितद्धेतुत्वापतेःहेत्वंतरमेवाह अस्तमिति॥२३॥यानितेनत्वयाहता
नितेषांतत्संबंधिस्त्रीपुत्रादीनांअश्रुप्रमार्जनंकरिष्यामित्वद्विनाशात्त्वन्मारणात्॥२४॥परमांगदाःकनकवलयानियस्यास्तांप्रदीप्तांहस्तस्थांगदांचिक्षेप॥२५॥ ॥छ॥

भस्मकृत्वास्वज्वालयेतिशेषःतत्समीपतःरामसमीपतः॥२६॥२७॥मेघारिवबलैर्विनिपातितावालीव॥२८॥ ॥इतिरामाभिरामेश्रीरा०आरण्यकांडेएकोनत्रिंशःसर्गः॥२९॥
भित्वेति॥१॥लब्धावसरोभगवान्त्वयैवकत्थनंकृतमित्याहएतदितिशक्तिहीनतरःशक्त्याहीनतरः॥२॥अभिधानेकेवलप्रगल्भस्यतवानयाशत्रुवधोभवत्येवेत्यसंशयःप्रत्ययो।
विश्वाससत्वस्यस्वनाशेनघातिका॥३॥४॥५॥६॥स्वलस्थानात्भ्रतएवभ्रंसोन्यस्तंभुजद्वयंयेनसः गास्तुवं॥७॥प्रवृद्धनिद्रेवप्रवृद्धदीर्घनिद्रेशरण्याःसुखवासभूताःशरण्यानां

खरबाहुप्रमुक्तासाप्रदीप्तामहतीगदा॥भस्मवृक्षांश्चगुल्मांश्चकृत्वागात्तत्समीपतः॥२६॥तामापतंतींमहतींमृत्युपाशोपमांगदां॥अं
तरिक्षगतांरामश्चिच्छेदबहुधाशरैः॥२७॥साविशीर्णाशरैर्भिन्नापपातधरणीतले॥गदामंत्रौषधिबलैर्व्यालीवविनिपातिता॥२८॥इ
त्यार्षेश्रीमद्रामायणेआरण्यकांडेएकोनत्रिंशःसर्गः॥२९॥ ॥भित्वातुतांगदांबाणैराघवोधर्मवत्सलः॥स्मयमानइदंवाक्यंसंर
ब्धमिदमब्रवीत्॥१॥एतत्तेबलसर्वस्वंदर्शितंराक्षसाधम॥शक्तिहीनतरोमत्तोवृथात्वमुपगर्जसि॥२॥एषाबाणविनिर्भिन्नागदाभू
मितलंगता॥अभिधानप्रगल्भस्यतवप्रत्ययघातिनी॥३॥यत्वयोक्तंविनष्टानामिदमश्रुप्रमार्जनं॥राक्षसानांकरोमीतिमिथ्यात
दपितेवचः॥४॥नीचस्यक्षुद्रशीलस्यमिथ्यावृत्तस्यरक्षसः॥प्राणानपहरिष्यामिगरुत्मानमृतंयथा॥५॥अद्यतेभिन्नकंठस्यफेनबु
द्बुदभूषितं॥विदारितस्यमद्बाणैर्महीपास्यतिशोणितं॥६॥पांसुरूषितसर्वांगःस्रस्तन्यस्तभुजद्वयः॥स्वप्स्यसेगांसमाश्लिष्यदुर्ल
भांप्रमदामिव॥७॥प्रवृद्धनिद्रेशयितेत्वयिराक्षसपांसने॥भविष्यंतिशरण्यानांशरण्यादंडकाइमे॥८॥जनस्थानेहतस्थानेतव
राक्षसमच्छरैः॥निर्भयाविचरिष्यंतिसर्वतोमुनयोवने॥९॥अद्यविप्रसरिष्यंतिराक्षस्योहतबांधवाः॥बाष्पार्द्रवदनादीनाभयाद
न्यभयावहाः॥१०॥अद्यशोकरसज्ञास्ताभविष्यंतिनिरर्थिकाः॥अनुरूपकुलाःपत्न्योयासांत्वंपतिरीदृशः॥११॥

नयोमहिम्नासर्वजनशरण्यानां॥८॥हतस्थानेहतराक्षसवासे॥९॥विप्रसरिष्यंतिमद्भयेनजनस्थानात्पलायिष्यंतीत्यर्थः॥१०॥शोकरसज्ञाःशोकस्थायिकरसज्ञाःनिरर्थि
काःनिःशेषतोनष्टार्थःकामादिपुरुषार्थोयासांताःअनुरूपकुलाःत्वत्सदृशदुर्वृत्तत्वादिगुणवत्कुलाःईदृशःपापकर्म्मा॥११॥ ॥ ॥

॥रा॰बा॰भा॥
॥३२॥

अस्यैव विवरं गत्वा शंसेत्यादि शं किनैस्त्वङ्गेभ्यः यद्यपि भगवन ईदृशो युद्धे ऽपेयं वादोऽनुचितस्तथापि निरयस्थमिति सो क्किं सन्ध्यां कर्तुं मरणकाले कोऽथ जनकनमागु णागतिसंचारकस्याङ्गवायेनिबोध्यं ॥१२॥१३॥ ननो हि अवलिप्तत्वाद्देवमन्युवशोपि वाच्यावाच्यं न जानीषे ॥१४॥ परिक्षेपो वधः निरस्तषड्विन्द्रियाः सानः करणं च सुरदि पंचेन्द्रियैर्निरस्ता विनाशितस्त्वानन्त्याः मृत्युकाले स्फुरितं भगवद्रूपः प्लवेष गणस्वावितं यक्षमाप्रयतिवकाले तिभूनस्त्वयामङ्गलः यःक्षत्वा इतियं यस्मिन्नन्येनैवानिरयस्थमि तिभगवदुक्ते रस्मगतिः स्पष्टैव ॥१५॥ महत्विंशमिति हृत्थस्त निवध्य ॥१६॥ प्रहरणमायुधं तस्यैव सर्वतः प्रस्तुतमिति शेषः नाट्यमाल्लमवलोकयदित्यर्थः दर्शनच्छरमधरंसंद

रणेशंसशीलस्तुदान्मन्निनं ब्राह्मणकंटकैः ॥ त्वन्तकेनेशंकिनैरंगैनासुनिभिः पात्यनेहवि ॥१२॥ तमेवमभिसंरब्धं ब्रुवाणं राघवं वने ॥ खरश्चनिर्भर्त्सयामास रोषात्खरतरः स्वरः ॥१३॥ दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः ॥ वाच्यावाच्यं ततो हि त्वं मृत्युवश्यो न बुध्यसे ॥१४॥ कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये ॥ कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥१५॥ एवमुक्त्वा ततो रामं संरुध्य भ्रुकुटिं ततः ॥ स ददर्श महासालमविदूरे निशाचरः ॥१६॥ रणे प्रहरणस्यार्थे सर्वतो ह्यवलोकयन् ॥ स तमुत्पाटयामास संदष्टदशनच्छदं ॥१७॥ तं समुत्क्षिप्य बाहुभ्यां विनर्द्य च महाबलः ॥ राममुद्दिश्य चिक्षेप हतस्त्वमिति चाब्रवीत् ॥१८॥ तमापतन्तं बाणौघैश्छित्त्वा रामः प्रतापवान् ॥ रोषमाहारयत्तीव्रं निहन्तुं समरे खरं ॥१९॥ जातस्वेदस्ततो रामो रोषाद्रक्तान्तलोचनः ॥ निर्बिभेद सहस्रेण बाणानां समरे खरं ॥२०॥ तस्य बाणान्तराद्रक्तं बहु सुस्राव फेनिलं ॥ गिरेः प्रस्रवणस्येव धाराणां च परिस्रवः ॥२१॥ विकलः स कृतो बाणैः खरो रामेण संयुगे ॥ मत्तो रुधिरगन्धेन तमेवाभ्यद्रवद्द्रुतम् ॥२२॥ तमापतन्तं संक्रुद्धं कृतास्त्रो रुधिराप्लुतं ॥ अपासर्पत्प्रतिपदं किंचित्त्वरितविक्रमः ॥२३॥ ॥७॥ ॥७॥

24

सदृशनच्छदं यथा भवति तथा ॥१७॥ समुत्क्षिप्योद्यम्य चित्वा हतोऽसीति ॥१८॥१९॥ जातस्वेदो रोषाद्रिति शेषः ननु अस्मादिति भयं रोषोऽपि भगवतोऽपि न स्वभावस्तत्र ननु वास्त वः स्मानुचन्तस्थिरीकरणायेति बोध्यं रक्तवर्णनभागः पांगभागे लोचने यस्य सः सहस्रेणानेन ॥२०॥ बाणानामन्तरेण बाणक्षतविवरेण प्रस्रवणस्य पर्वतस्रवणस्य परि स्रवः प्रवाहः ॥२१॥ विकलः परवशः कृतो न तु मत इत्यर्थः मत्तो हृत इति ॥२२॥ आपतन्तं बाणक्षेपावकाशो यथा न भवति तथा पतन्तं खरं दृष्ट्वा ऽन्यासत्तो धनुर्व्यापारो नस्या दिति स्वशरीरेण रुधिरपानमिया वदीनो णिपदानि त्वरितेन पदन्यासाः बाणस्य दूरं बहुलिनो पासर्पत् अनेन महावलत्वं खरस्योक्तं न त्वन्यथा रामचन्द्रनुच्छेदेन ननं हाणसह नं वाक्तु शक्य अनन्यथा येन तथा यथा विशिष्टस्वशक्ति रूपवेक्ष्य बाणग्रहणम् ॥२३॥ ॥२३॥

॥राम॥
॥३२॥

ब्रह्मदंडमिव ब्रह्मास्त्रमिवामोघं ॥२४॥ मघवता दत्तमग्रास्त्रं धाराः ॥२५॥ धनुरायम्य विमुक्तः स्वबाहोः खरस्योरसि अपतदित्यन्वयः ॥२६॥ श्वेतारण्ये यथान्धकः अंधकासुरः श्वेतारण्ये रु
द्रेण हतः इति पुराणप्रसिद्धं रुद्रेणेव निर्दग्धः शब्दो वाक्यालंकारे श्वेतारण्ये यथान्तकः इति पाठः तत्र कावेरीतीरवर्तिनि श्वेतारण्ये मार्कंडेयचिरजीवित्वार्थं यानकस्य हरणे
रुद्रेणाहननं इति तत्स्थानमाहात्म्ये प्रसिद्धिः कोऽयं तन्त्र रखवे श्वेतस्य राजर्षेः परमशैवस्य कालंजरे पर्वते नेत्रपस्तमिरतस्य मारणायागतस्यान्तकस्य शिवेन वामपादप्रहारेण सं

ततः पावकसंकाशं वधाय समरे खरं ॥ खरस्य रामो जग्राह ब्रह्मदंडमिवापरं ॥२४॥ स तद्दत्तं मघवता सुरराजेन धीमता ॥ संदधे च स धर्मा
त्मा मुमोच च खरं प्रति ॥२५॥ स विमुक्तो महाबाणो निर्घातसमनिःस्वनः ॥ रामेण धनुरायम्य खरस्योरसि चापतत् ॥२६॥ स पपात
खरो भूमौ दह्यमानः शराग्निना ॥ रुद्रेणेव विनिर्दग्धः श्वेतारण्ये यथान्धकः ॥२७॥ स वृत्र इव वज्रेण फेनेन नमुचिर्यथा ॥ बलो वेन्द्राश
निहतो निपपात हतः खरः ॥२८॥ एतस्मिन्नंतरे देवाश्चारणैः सह संगताः ॥ दुंदुभींश्चाभिनिघ्नंतः पुष्पवर्षं समंततः ॥२९॥ रामस्योपरि
संहृष्टा ववृषुर्विस्मितास्तदा ॥ अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ॥३०॥ चतुर्दश सहस्राणि रक्षसां कामरूपिणां ॥ खरदूषणमुख्या
नां निहतानि महामृधे ॥३१॥ अहो बत महत्कर्म रामस्य विदितात्मनः ॥ अहो वीर्यमहो दार्ढ्यं विष्णोरिव हि दृश्यते ॥३२॥ इत्येवमुक्त्वा ते सर्वे
पर्युर्देवा यथागतं ॥ ततो राजर्षयः सर्वे [redacted] संगताः परमर्षयः ॥३३॥ सभाज्य मुदिता रामं सागस्त्या इदमब्रुवन् ॥ एतदर्थं
महातेजा महेन्द्रः पाकशासनः ॥३४॥ शरभंगाश्रमं पुण्यमाजगाम पुरंदरः ॥ आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ॥३५॥ एषां व
धार्थं शत्रूणां रक्षसां पापकर्मणां ॥ तदिदं नः कृतं कार्यं त्वया दशरथात्मज ॥३६॥ स्वधर्मं प्रचरिष्यंति दंडकेषु महर्षयः ॥ एतस्मिन्नंतरे वी
रो लक्ष्मणः सह सीतया ॥३७॥ गिरिदुर्गाद्विनिष्क्रम्य संविवेशाश्रमं सुखी ॥ ततो रामस्तु विजयी पूज्यमानो महर्षिभिः ॥३८॥

हारः हत इति षट्त्रिंशोध्याये उक्तं ॥२७॥ वज्रेण वृत्र इव फेनेन नमुचिः शारिन वज्रेण मुचिरिव नेभुक्ष्केण नाद्रेणेनि ब्रह्मणा तस्मै वरदानात् अशनिहतो बलो वा वा शब्द इवार्थे व
लश्च एवं च अनेकाश्विवधस्य रुद्रेन्द्रातिरिक्तसाध्यत्ववत् खरवधस्य रामातिरिक्तसाध्यत्वप्रकाशितं कविना ॥२८॥ २९॥ अर्धाधिकमुहूर्तेनेति किंचिदूनघटिकाद्वयेण ॥३०॥
३१॥ ३२॥ राजर्षयो नहुषाद्याः परमर्षयो अगस्त्याद्याः ॥३३॥ सभाज्य पूजयित्वा एतदर्थं रक्षसां वधाय एतद्देशवासनियोजनार्थं क्षणं स्थित्वा रामं प्रस्थाप्य मवाड्डिब्रह्मलोकाय प्र
स्थानं यान्मिति तत्का शरभंगं प्रति इन्द्रागतन इत्याशयः ॥३४॥ ३५॥ ३६॥ एतस्मिन्नंतरे देवानां ऋषीणां च निर्गमनसमये ॥३७॥ ३८॥

॥ २२ ॥ ४० ॥ ४१ ॥ हर्षान्निशायां तु नरलिंगनं इदं युक्तं प्रायः शिशिरार्थे ॥ ४२ ॥ इति रामाभिरामे श्री रा० आरण्यकांडे त्रिंशः सर्गः ॥ ३० ॥ ॥ त्वरमाण इति खरसेनायामान्यत्वा यिनः प्रसूर्पणस्वागम
नात्पूर्वमेव लंकां प्रविवेशेत्यर्थः संपूर्णदंडकारण्यं जनस्थानपदवाच्यमतो गोदावरीतीरगतोपि जनस्थानागत इत्युक्तः १ खरश्चेति चेन दूषणत्रिशिरसोः संग्रहः कथं चिदहमा

प्रविवेशाश्रमं वीरो लक्ष्मणेनाभिपूजितः ॥ तं दृष्ट्वा शत्रुहंतारं महर्षीणां सुखावहम् ॥ ३९ ॥ बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ मुदा परमया
युक्ता दृष्ट्वा रक्षोगणान्हतान् ॥ ४० ॥ रामं चैवाव्यथं दृष्ट्वा तुतोष जनकात्मजा ॥ ४१ ॥ ततस्तु तं राक्षससंघमर्दनं संपूज्यमानं मुदितैर्महात्म
भिः ॥ पुनः परिष्वज्य मुदान्विताननाबभूव हृष्टा जनकात्मजा तदा ॥ ४२ ॥ ॥ इत्यार्षे श्रीमद्रामायणे वा० आरण्यकांडे त्रिंशः सर्गः ॥ ३० ॥
त्वरमाणस्ततो गत्वा जनस्थानादकंपनः ॥ प्रविश्य लंकां वेगेन रावणं वाक्यमब्रवीत् ॥ १ ॥ जनस्थानस्थिता राजन् राक्षसा बहवो हताः ॥
खरश्च निहतः संख्ये कथंचिदहमागतः ॥ २ ॥ एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः ॥ अकंपनमुवाचेदं निर्दहन्निव तेजसा ॥ ३ ॥ केन भी
मं जनस्थानं हतं मम परासुना ॥ को हि सर्वेषु लोकेषु गतिं नाधिगमिष्यति ॥ ४ ॥ न हि मे विप्रियं कृत्वा शक्यं मघवता सुखं ॥ प्राप्तुं वैश्रवणेनापि
न यमेन च विष्णुना ॥ ५ ॥ कालस्य चाप्यहं कालो दहेयमपि पावकं ॥ मृत्युं मरणधर्मेण संयोजयितुमुत्सहे ॥ ६ ॥ वातस्य तरसा वेगं निहंतुमपि चोत्स
हे ॥ दहेयमपि संक्रुद्धस्तेजसादित्यपावकौ ॥ ७ ॥ तथा क्रुद्धं दशग्रीवं कृतांजलिरकंपनः ॥ भयात्संदिग्धया वाचा रावणं याचतेऽभयं ॥ ८ ॥ दशग्रीवोऽभ
यं तस्मै प्रददौ रक्षसां वरः ॥ स विस्रब्धोऽब्रवीद्वाक्यमसंदिग्धमकंपनः ॥ ९ ॥ पुत्रो दशरथस्यास्ति सिंहसंहननो युवा ॥ रामो नाम महास्कंधो वृत्ताय
तमहाभुजः ॥ १० ॥ श्यामः पृथुयशाः श्रीमानतुल्यबलविक्रमः ॥ हतस्तेन जनस्थाने खरश्च सहदूषणः ॥ ११ ॥ ॥ छ ॥ ॥ छ ॥

25

६३

गतः केवलं प्रेक्षकतया स्थितत्वात् रामबाणाविषयीकृततयेत्याशयः ॥ २ ॥ ३ ॥ भीमं सर्वलोकभयदं जनस्थानं परासुनेति क्रोधात् मुमूर्षुणेत्यर्थे प्रयुक्तं गतिं स्थितिं ॥ ४ ॥ ५ ॥ ६ ॥
निहंतुं संक्रुद्ध आदित्यपावकौ उभावपि युगपद्दिनेशेषु ॥ ७ ॥ असंदिग्धया संदिग्धाक्षरया अभयमिति च्छेदः ॥ ८ ॥ ९ ॥ वांगरूपोपेतो यः सिंहसंहननो हि स इति कोशः ॥ १० ॥ अतुल्य
केनापि तुल्यं न इदं बलं विक्रमश्च यस्य सः दूषणः खरश्च हत इत्यन्वयः ॥ ११ ॥

नागेंद्रः सर्पश्रेष्ठः ॥१२॥ स रामः सर्वामरसहितेनेंद्रेण जनस्थानं कच्चिदुपागत इत्यन्वयः ॥१३॥१४॥ परं धर्मं अतिशयितं शौर्यं ॥१५॥ राकाशशिनिभानन इति राका पूर्णिमा पूर्णरा
कानिशाकरे इत्यमरः पूर्णनिशाकरवदानन इत्यर्थः ॥१६॥ राजवरः राजराज इति यावत् ॥१७॥ महात्मानो देवा नैवागता इति शेषः रामेणानुलक्ष्मणेनापीत्यर्थः ॥१८॥ भयात्पला
यनाय येन मार्गेण गच्छंति राक्षसास्तेन तेन मार्गेण गत्वा यत्र स्थितमेव राममपश्यंति अनेनानंताकारताप्रदर्शनेन रामस्यापरिच्छिन्नशक्तित्वं च सूचितं ॥१९॥२०॥२१॥व

अकंपनवचः श्रुत्वा रावणो राक्षसाधिपः। नागेंद्र इव निःश्वस्य इदं वचनमब्रवीत् ॥१२॥ स सुरेंद्रेण संयुक्तो रामः सर्वामरैः सह। उपयातो ज
नस्थानं ब्रूहि कच्चिदकंपन ॥१३॥ रावणस्य पुनर्वाक्यं निशम्य तदकंपनः। आचचक्षे बलं तस्य विक्रमं च महात्मनः ॥१४॥ रामो नाम महा
तेजाः श्रेष्ठः सर्वधनुष्मतां। दिव्यास्त्रगुणसंपन्नः परं धर्मं गतो युधि ॥१५॥ तस्यानुरूपो बलवान् रक्ताक्षो दुंदुभिःस्वनः। कनीयान् लक्ष्म
णो भ्राता राकाशशिनिभाननः ॥१६॥ स तेन सह संयुक्तः पावकेनानिलो यथा। श्रीमान् राजवरस्तेन जनस्थानं निपातितम् ॥१७॥ नैव
देवा महात्मानो नात्र कार्या विचारणा। शरा रामेण तूत्सृष्टा रुक्मपुंखाः पतत्रिणः ॥१८॥ सर्वाः पंचाननाभूत्वा भक्षयंति स्म राक्षसान्। येन
येन च गच्छंति राक्षसा भयकर्षिताः ॥१९॥ तेन तेन स्म पश्यंति राममेवाग्रतः स्थितं। इत्थं विनाशितं तेन जनस्थानं तवानघ ॥२०॥ अकंपन
वचः श्रुत्वा रावणो वाक्यमब्रवीत्। गमिष्यामि जनस्थानं रामं हंतुं सलक्ष्मणं ॥२१॥ अथैवमुक्ते वचने प्रोवाचेदमकंपनः। शृणु राजन्य
थावृत्तं रामस्य बलपौरुषं ॥२२॥ असाध्यः कुपितो रामो विक्रमेण महायशाः। आपगायास्तु पूर्णाया वेगं परिहरेच्छरैः ॥२३॥ सताराग्रहनक्षत्रं न
भश्चाप्यवसादयेत्। असौ रामस्तु सीदंतीं श्रीमानभ्युद्धरेन्महीं ॥२४॥ भित्वा वेलां समुद्रस्य लोकानाप्लावयेद्विभुः। वेगं वापि समुद्रस्य वायुं वा

॥४२॥ रा॰ [illegible]

लं पराभिभवसामर्थ्यं पौरुषं महापुरुषकर्म वृत्तं चरित्रं यथा यथावदर्शनात्सर्वं शृणु इति अर्थः ॥२२॥ कुपितः कुपितोंतक इव संहारे प्रवृत्तो रामः पराक्रमेण तेनानिवर्तयितुमसा
ध्यो ब्रह्मादिभिरपीति शेषः परिहरेत् परावर्तयेत् अनेन तस्य बलमद्भावनारस्यापि सूचनं ॥२३॥ नभोप्यवसादयेत् नाशरहितं कुर्यात् त्रिविक्रमावतार इव महीमभ्युद्धरेत् यज्ञवरा
ह इव शक्यार्थेन लिङ् ॥२४॥ वेलां मर्यादां आप्लावयेत् प्रलयकाल इव समुद्रस्य वेगं विधमेत् समुद्रे सेतुबंधनसामर्थ्यदर्शिनेवायुमित्युपलक्षणं भूतपंचकस्य ॥२५॥ ॥७॥

संहृत्य पुनः स्वयंभुः शक्रः अत्र पुनरपि शब्दाभ्यां सर्वस्य सृष्टिसंहारणं तदधीनत्वमुक्तं अनेन जगत्स्थितिसंहारकर्तृत्वमस्य यंगं अकंपनस्यापि भगवद्यशाहादेवं ज्ञानं ॥२६॥ लोकेन सम्
हितेन सहितेन नापीति शेषः ॥२७॥ अपि नात्वयापि एतेनेन्द्रजिन्निर्जितेन्द्रादि सहायेपि तस्य जयोऽस्तु करदूनिष्ठ्व नितम्भेनेति सुखादिनि शेषः ॥२८॥ श्यामा यौवनमध्यस्था ॥२९॥ कुतो भ
वेन्न तु स्त्री निशेषः ॥३०॥ तं रामं प्रमथ्य केनाप्युपायेनोच्चाट्येति यावत् तस्या भार्यामपहर वलात्कारेणाहर ॥३१॥ अरोचयत इष्टत्वेन ज्ञातवान् चिंतयित्वा रामस्य सीतया सहितत्वस्या
नोपायं ॥३२॥ कल्यं प्रातः सारथिना सह एकः इति अकंपनवाक्यं श्रुत्वा तेनासुखं श्रीरामो वनेऽरिघातीति सनत्कुमाराद्वा कश्मरणात् हृष्टः तदेतद्गुरुत्तरा रामायणस्य वृद्धं न त्व हि सनत्कुमा

वी
संहृत्य पुनर्लोकान्विक्रमेण महायशाः ॥ शक्रः श्रेष्ठः स गुह्यः स्वयं पुनरपि प्रजाः ॥२६॥ नहि रामो दशग्रीव शक्यो जेतुं रणे त्वया ॥ रक्षसा
वापि लोकेन स्वर्गः पापजनैरिव ॥२७॥ न तं वध्यमहं मन्ये सर्वैर्देवासुरैरपि ॥ अयं तस्य वधोपायस्तन्ममैकमनाः शृणु ॥२८॥ भार्या तस्
योत्तमा लोके सीता नाम सुमध्यमा ॥ श्यामा समविभक्ताङ्गी स्त्रीरत्नभूषिता ॥२९॥ नैव देवी न गन्धर्वी नासुरी न च पन्नगी ॥ तुल्या सी
मन्तिनी तस्या मानुषीषु कुतो भवेत् ॥३०॥ तस्यापहर भार्यां त्वं तं प्रमथ्य महावने ॥ सीतया रहितो रामो न चैव हि भविष्यति ॥३१॥ अ
रोचयत तद्वाक्यं रावणो राक्षसाधिपः ॥ चिन्तयित्वा महाबाहुरकम्पनमुवाच ह ॥३२॥ वाढं कल्यं गमिष्यामि एकः सारथिना सह ॥ आने
ष्यामि च वैदेहीमिमां हृष्टो महापुरीं ॥३३॥ तदेवमुक्त्वा प्रययौ खरयुक्तेन रावणः ॥ रथेनादित्यवर्णेन दिशः सर्वाः प्रकाशयन् ॥३४॥ [redacted]

रत्नं ३

रप्रोक्तिविषयहस्तमस्तानां कामनिर्दितिरावणेन यथेष्टेन हतानां न स्वोकपाश्विरिति सनत्कुमारवचः श्रुत्वा एवं श्रुत्वा महाबाहुरक्षसेंद्रप्रतापवान् त्वया सह विरोधेप्युः
क्तिं तयाभासाप एव एतदर्थं महाबाहो रावणेन तु रामात्मना सुताज्ञानकहरणस्य हृताराम महावने इत्युक्तमिति ता धः उत्तमस्त्रीलाभो भविष्यतीति हृष्ट इत्यर्थ उचित
भुतस्यापि तस्यार्थस्य तामसत्वेन विस्मरणात्तत्पर्येतुं तथाभुतार्थवक्ष्यमाणाविस्मरणाविरोधात् किंतु श्रीरामस्य स्वमत्या रावणात्श्रुत्वा त्वया सह समस्तु विधानक
विरोधे कुतो हतवान् नहि योगेनवसरणमित्याशयेनेति तत्पार्थ इत्यन्ये वस्तुतस्तु एतेषां श्लोकानां तत्कर्तास्वर्गाणां चयपाक्षिप्तत्वान् नतेप्रमाणभूताः अत एव तेस्वर्ग
कतकादिभिस्तीर्थेन च न व्याख्याताः एतेन एतदर्थं महाबाहो रावणेन तु रामात्मना विज्ञाय पहृता सीता नात्वतो मरणं कांक्षयेतिति च पाठोऽपास्तः नत्रेवं त्वदुक्तार्थास्य

[illegible]

26

चंचूर्यमाणः भृशं चरन् जलदमध्ये शंगगाने चंद्र स इशोरम्यः ॥३५॥ मारीचाश्रमं पूर्वं रामनिरस्तस्स कुः ख्यातनपः प्रवृत्तोरदमुक्तिः नाटके यं नाटकापत्यं ॥३६॥ अर्थोपहितया किं
प्रयोजनमत्रागमनमिति प्रयोजनयुक्तया वाक्यं चिन्तासुकुशलमिति सामान्यप्रश्नः लोकानां राक्षस लोकानां आशंके भयमिति शेषः नाधिजाने क्षेममिति शेषः यतस्त्वमे
काकी तूर्णमागतः ॥३८॥३९॥ आरक्षः समाजस्थानं जनस्थानाख्यं आरक्षो नृपालः खरादिरित्यर्थं इत्यन्ये ॥४०॥४१॥ सा सीता केनाख्याता केनेयं त्वं न कथिता येन कथिता ॥
स मित्ररूपश्शत्रुः त्वया राक्षसादिनानन्दितो को न नन्दति निन्दितः निनिइति पाठे निंदितो वमानितः कस्त्वां न नन्दति न समनुध्यति कुध्यतीति यावत् त्वया निस्कृतस्तावकमेव यम

स रथो राक्षसेन्द्रस्य नक्षत्रपथगो महान् ॥ चंचूर्यमाणः शुशुभे जलदे चंद्रमा इव ॥३५॥ स दूरे चाश्रमं गत्वा नाटके यमुपागमत् ॥ मा
रीचेनार्चितो राजा भक्ष्यभोज्यैरमानुषैः ॥३६॥ तं स्वयं पूजयित्वा तु आसनेनोदकेन च ॥ अर्थोपहितया वाचा मारीचो वाक्यमब्रवीत् ॥
॥३७॥ कच्चित्सुकुशलं राजन् लोकानां राक्षसाधिप ॥ आशंके नाधिजाने त्वं यतस्तूर्णमुपागतः ॥३८॥ एवमुक्तो महातेजा मारीचेन स रावणः
ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥३९॥ आरक्षो मे हतस्तात रामेणाक्लिष्टकर्मणा ॥ जनस्थानमवध्यं तत्सर्वं युधि निपा
तितं ॥४०॥ तस्य मे कुरु साचिव्यं तस्य भार्यापहारणे ॥ राक्षसेन्द्रवचः श्रुत्वा मारीचो वाक्यमब्रवीत् ॥४१॥ आख्याता केन वा सीता मित्र
रूपेणाहितैषिणा ॥ त्वया राक्षसशार्दूल को न नन्दति नन्दितः ॥४२॥ सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे । रक्षोलोकस्य सर्वस्य कः शृंग
छेत्तुमिच्छति ॥४३॥ प्रोत्साहयति यश्च त्वां स च शत्रुरसंशयं ॥ आशीविषमुखाद्दंष्ट्रामुद्धर्तुं चेच्छति त्वया ॥४४॥ कर्मणानेन केनासि कापथं प्र
तिपादितः ॥ सुखसुप्तस्य ते राजन् प्रहृतं केन मूर्द्धनि ॥४५॥ विशुद्धवंशाभिजनाग्रहस्तस्तेजोमदः संस्थितदोर्विषाणः ॥ उदीक्षितुं रावण
नेहयुक्तः स संयुगे राघवगंधहस्ती ॥४६॥

ऽरानुरा

सहमानः सन् त्वया सहहृष्टं निमिषमिव भावं प्राप्तः सन् नवेदृशी वृद्धिमुपरिशनीतिभावः ॥४२॥ सीतामिहानयेति को ब्रवीति तं ब्रवीहि ईदृशः शृंगमोन्नतं ॥४३॥ स च शत्रुरसं
शयमित्यत्र हेतुमाह आशीविषेत्यादि च यस्मात्त्वया प्रयोज्य नाशीविषमुखाद्दंष्ट्रामुद्धर्तुमुद्धारयितुमिच्छति ॥४४॥ केन शत्रुणानेन कर्मणा एतत्कर्मोपदेशेन का
पथं नाशमार्गं प्रतिनियावत् प्रहृतं हृत्ये वदुःखसुप्तादितमित्यर्थः ॥४५॥ राघवरूपो गन्धहस्ती यस्य गन्धसमाघ्राय अन्ये गजाः पलायन्ते स गन्धहस्ती मत्तगजः उदीक्षितुम
पि इह रहे शकालेन युक्तः किं पुनर्योद्धुमित्यर्थः विशुद्धवंशाभिजनोभिजननमेवाग्रहस्तः शुण्डाग्रं यस्य तेजः प्रताप एव मदो यस्य सः संस्थितौ समीचीनावस्थानौ दोषावा
हू एव विषाणं दन्तेयस्य ॥४६॥

रणांतःस्थितिरूपारणमध्यावस्थानरूपाःसंधयोवालाग्रंयस्यविदग्धरक्षसांरणेचतुराणांराक्षसमृगाणांहंताशररूपैरंगैःपूर्णः॥४७॥चापएवापहारःप्राणिप्राणापहार
कोयाहोयस्मिन्भुजयोःशरग्रहणसंधानमोक्षविषयोवेगएवपंकोयस्मिन्उत्तरत्वात्तत्रशराएवोर्मिमालासंगायस्मिन्सुमहानाहवएवओघोजलंयस्यतस्मिन्रण
मएवपातालप्रविष्टमहार्णवमस्यमुखेवडवामुखरूपेप्रस्कंदितुंपतितुं॥४८॥ ४९॥ ५०॥ ॥इतिरामाभिरामेश्रीरा०ति०आरण्यकांडेएकत्रिंशःसर्गः॥३१॥ ॥

भसोरणांतःस्थितिसंधिवालोविदग्धरक्षोमृगहानृसिंहः॥सुप्तस्त्वयाबोधयितुंनशक्यःशरांगपूर्णोनिशितासिदंष्ट्रः॥४७॥चापापहारे
भुजवेगपंकेशरोर्मिमालेसुमहाहवौघे॥नरामपातालमुखेतिघोरेप्रस्कंदितुंराक्षसराजयुक्तं॥४८॥एवमुक्तोदशग्रीवोमारीचेनसराव
णः॥न्यवर्ततपुरीलंकांविवेशचगृहोत्तमं॥४९॥प्रसीदलंकेश्वरराक्षसेंद्रलंकांप्रसन्नोभवसाधुगच्छ॥त्वंस्वेषुदारेषुरमस्वनित्यंरामः
सभार्योरमतांवनेषु॥५०॥ ॥इत्यार्षेश्रीमद्रामायणेवा० आरण्यकांडेएकत्रिंशःसर्गः॥३१॥ ॥ततःशूर्पणखादृष्ट्वासहस्राणि
चतुर्दश॥हतान्येकेनरामेणरक्षसांभीमकर्मणां॥१॥दूषणंचखरंचैवहतंत्रिशिरसंरणे॥दृष्ट्वापुनर्महानादान्ननादजलदोपमा
॥२॥सादृष्ट्वाकर्मरामस्यकृतमन्यैःसुदुष्करं॥जगामपरमोद्विग्नालंकांरावणपालितां॥३॥साददर्शविमानाग्रेरावणंदीप्ततेजसं॥उपो
पविष्टंसचिवैर्मरुद्भिरिववासवं॥४॥आसीनंसूर्यसंकाशेकांचनेपरमासने॥रुक्मवेदिगतंप्राज्यंज्वलंतमिवपावकं॥५॥देवगंधर्वभू
तानामृषीणांचमहात्मनां॥अजेयंसमरेघोरंव्यात्ताननमिवांतकं॥६॥देवासुरविमर्देषुवज्राशनिकृतव्रणं॥ऐरावतविषाणाग्रैरुत्कृ
ष्टकिणवक्षसं॥७॥विंशद्भुजंदशग्रीवंदर्शनीयपरिच्छदं॥विशालवक्षसंवीरंराजलक्षणलक्षितं॥८॥ ॥७॥

ततइति॥१॥महानादान्ननादशोकादितिशेषः॥२॥३॥४॥रुक्मवेदिंप्राप्तंहिरण्यघटकचित्रांवेदिंप्राप्तंप्राज्यंसर्वोत्साहोमहांतंअतएवज्वलंतं॥५॥६॥विमर्देषुयुद्धेषुवज्रा
शनिकृतव्रणमित्यनेनतदवध्यत्वमुक्तं ऐरावतदंताग्रैरुत्कृष्टंविलेखनंतेनजातोयःकिणस्तदंकितवक्षसं॥७॥परिच्छदःछत्रचामरालंकरणादीनि॥८॥ ॥७॥

27

वैडूर्यंशणमरकेश्यामभिन्नत्वेपत्नशरीरनवैडूर्यकांनिसदृशशरीरकांनीत्यर्थः स्निग्धवैडूर्यनिपातोवकुलं॥२॥१०॥क्षोभणंक्षोभकर्त्तारं॥११॥१२॥परदाराभिमर्षणाविदूर
रोगानिवृत्तीमिति॥१३॥१४॥नलिनीचैत्ररथवनमध्यवर्त्तिनीसरसी॥१५॥उन्निद्रनाबुदयेनौ॥१६॥१७॥उपजहारउपहारान्वेनदत्तवान्॥१८॥यस्यसंग्रामेमृत्युनोऽभयंम
नुष्यातिरिक्तेनोमरणभयहीनइत्यर्थः मंत्रैःश्वानरानुवाकस्यावलोक्यारिभिःरभिष्टुतस्तामहर्षिवर्यैर्नेषुसोमाभिषवशालासुउपहर्तिनाशयनिधात्तानरक्षिणाकालेष

क्षो२

नभ्रवैडूर्यसंकाशंतप्तकांचनभूषणं॥सुभुजंशुक्लदशनंमहास्यंपर्वतोपमं॥२॥विष्णुचक्रनिपातैश्चशतशोदेवसंयुगे॥अन्यैःशस्त्रैःप
हारैश्चमहायुद्धेषुताडितम॥१०॥आहतांगैःसमस्तैस्तैर्देवप्रहरणैस्तदा॥अक्षोभ्याणांसमुद्राणांक्षोभणंक्षिप्रकारिणं॥११॥क्षेप्तारंपर्व
ताग्राणांसुराणांचप्रमर्दनं॥उच्छेत्तारंचधर्माणांपरदाराभिमर्षणं॥१२॥सर्वदिव्यास्त्रयोक्तारंयज्ञविघ्नकरंसदा॥पुरींभोगवतींगत्वाप
राजित्यचवासुकिं॥१३॥तक्षकस्यप्रियांभार्यांपराजित्यजहारयः॥कैलासंपर्वतंगत्वाविजित्यनरवाहनं॥१४॥विमानंपुष्पकंतस्यका
मगंवैजहारयः॥वनंचैत्ररथंदिव्यंनलिनींनंदनंवनं॥१५॥विनाशयतियःक्रोधाद्देवोद्यानानिवीर्यवान्॥चंद्रसूर्यौमहाभागावुत्तिष्ठं
तौपरंतपौ॥१६॥निवारयतिबाहुभ्यांयःशैलशिखरोपमः दशवर्षसहस्राणितपस्तप्त्वामहावने॥१७॥पुरास्वयंभुवेधीरःशिरांस्युप
जहारयः॥देवदानवगंधर्वपिशाचपतगोरगैः॥१८॥अभयंयस्यसंग्रामेमृत्युतोमानुषादृते॥मंत्रैरभिष्टुतंपुण्यमध्वरेषुद्विजातिभिः
॥१९॥हविर्धानेषुयःसोममुपहंतिमहाबलः॥प्राप्तयज्ञहरंदुष्टंब्रह्मघ्नंक्रूरकारिणं॥२०॥कर्कशंनिरनुक्रोशंप्रजानामहितेरतं॥राव
णंसर्वभूतानांसर्वलोकभयावहं॥२१॥राक्षसीभ्रातरंक्रूरंसाददर्शमहाबलं॥तंदिव्यवस्त्राभरणंदिव्यमाल्योपशोभितम॥२२॥आसने
सूपविष्टंकालेकालमिवोद्यतं॥राक्षसेंद्रंमहाभागंपौलस्त्यकुलनंदनम॥२३॥उपगम्याब्रवीद्वाक्यंराक्षसीभयविह्वला॥रावणंशत्रु
हंतारंसचिवैःपरिवारितं॥२४॥तमब्रवीद्दीप्तविशाललोचनंप्रदर्शयित्वाभयलोभमोहिता सुदारुणंवाक्यमभीतचारिणीमहात्मनाशू

[illegible]

प्राप्तयज्ञान्हरतीति॥१९॥२०॥सर्वभूतानांरावणं आक्रोशशब्दकारणं॥२१॥राक्षसीशूर्पणखा॥२२॥कालेप्रलयकालेपौलस्त्याराक्षसाः॥२३॥२४॥उपगम्याब्रवीदि
त्युक्तेनस्यविवरणं तमिति प्रदर्शयित्वास्वकंवैरूप्यमितिशेषः भयंराक्षसवधेनरामजं लोभस्तत्सौंदर्याद्विषयस्ताभ्यांमोहिताअभीतंयथासर्वलोकेषुचरतीतिशीला॥२५॥

इति रामाभिरामे श्रीरा० आरण्यकाण्डे द्वात्रिंशः सर्गः ॥३२॥ ॥ततइति॥१॥ कामभोगेषु प्रमत्तः अनिशायप्रसक्तः निरंकुशः सन् बोद्धव्यं नावबुध्यसे इत्यन्वयः ॥२॥ हेयोपादेयप
जगुणानाह रावणस्य गुणहीनत्वं वक्तुं सक्तमिति निशाम्य भोगः स्यादिभोगः तदेवाह कामवृत्तमिति कामचेष्टापरं लुब्धं भोगलोलुपं स्मशानाग्निमिव अस्पृश्यत्वेन साहश्यं ॥३॥ तैः
कार्यैरनुष्ठितैः ॥४॥ अयुक्तचारमनियोजितचारं दुर्दर्शमुचिते काले प्रजाभ्यो दर्शनदानरहितं अस्वाधीनं स्त्र्यादिपरजवं ॥५॥ विषयं देशं अस्वाधीनं स्वभिन्नाधीनं पूर्वं स्वाधीनं

इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे द्वात्रिंशः सर्गः ॥३२॥ ॥ततः शूर्पणखा दीना रावणं लोकरावणं ॥ अमात्यमध्ये संक्रुद्धा परुषं वाक्यम
ब्रवीत् ॥१॥ प्रमत्तः कामभोगेषु स्वैरवृत्तो निरंकुशः ॥ समुत्पन्नं भयं घोरं बोद्धव्यं नावबुध्यसे ॥२॥ सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिं ·
लुब्धं न बहु मन्यन्ते श्मशानाग्निमिव प्रजाः ॥३॥ स्वयं कार्याणि यः कालेनानुतिष्ठति पार्थिवः ॥ स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥४॥ अ
युक्तचारं दुर्दर्शमस्वाधीनं नराधिपं ॥ वर्जयन्ति नरा दूरान्नदीपंकमिव द्विपाः ॥५॥ ये न रक्षन्ति विषयमस्वाधीनं नराधिपाः ॥ ते न वृद्ध्या प्रका
शन्ते गिरयः सागरे यथा ॥६॥ आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः ॥ अयुक्तचारश्चपलः कथं राजा भविष्यति ॥७॥ त्वं तु बालस्वभाव
श्च बुद्धिहीनश्च राक्षस ॥ ज्ञातव्यं तन्न जानीषे कथं राजा भविष्यसि ॥८॥ येषां चारश्च कोशश्च नयश्च जयतां वर ॥ अस्वाधीना नरेन्द्राणां प्रा
कृतैस्ते जनैः समाः ॥९॥ यस्मात्पश्यन्ति दूरस्थान्सर्वानर्थान्नराधिपाः ॥ चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥१०॥ अयुक्तचारं मन्ये त्वां प्रा
कृतैः सचिवैर्युतः ॥ स्वजनं च जनस्थानं निहतं नावबुध्यसे ॥११॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ॥ हतान्येकेन रामेण खरश्च
सहदूषणः ॥१२॥ ऋषीणामभयं दत्तं कृतक्षेमाश्च दंडकाः ॥ धर्षितं च जनस्थानं रामेणाक्लिष्टकारिणा ॥१३॥ त्वं तु लुब्धः प्रमत्तश्च प
राधीनश्च राक्षस ॥ विषये स्वे समुत्पन्नं यद्भयं नावबुध्यसे ॥१४॥

देशं पश्चात् परायत्तं येन रक्षन्ति स्वाधीनीकरणेन विशेषः तेन प्रकाशन्ते सागरे मग्ना गिरय इव ॥६॥ आत्मवद्भिर्वशीकृतान्तर्बाह्येन्द्रियैः विगृह्य विरुध्य ॥७॥८॥ प्राकृतैः राजव्यव
हारानभिज्ञैः दासीदासजनैः ॥९॥१०॥ स्वजनं स्वस्वजनाश्रयस्थानं जनस्थानं ॥११॥ ॥१२॥ कृतं क्षेमं येषु ते कृतक्षेमाः ॥१३॥ ॥१४॥ ॥१७॥ ॥१४॥ श्रीरामाय नमः ॥ ॥७॥

26

तीक्ष्णं स्वामात्यादिविषये तैक्ष्ण्यादिगुणविशिष्टं शठो गूढविप्रियंकारी नादृशं राजानं सर्वभूतानि भृत्यामात्यादिसर्वप्रजा नाभिधावंति न द्रक्षणाय न प्रवर्तंते ॥१५॥ अ
ग्राह्यं स्वीयैरनुपसर्प्यं आत्मसंभाविनं आत्मनात्मनैव संभावितं बहुमानं प्राप्तं ॥१६॥ नानुतिष्ठति यस्तस्य अमात्यादिस्वजनोपि प्रीत्या कर्षः स राज्यात् च्युतो भवेदित्यन्वय
ः ॥१७॥१८॥१९॥ सर्वज्ञः स्वपरसर्ववृत्तांतज्ञः ॥२०॥ प्रसुप्तो वा प्रसुप्तोपि व्यक्तक्रोधप्रसादः फलदानेन ॥२१॥ अविदितः येन त्वया न ज्ञायत इत्यर्थः ॥२२॥ परोक्षमवमंत

तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठं ॥ व्यसने सर्वभूतानि नाभिधावंति पार्थिवं ॥१५॥ अतिमानिनमग्राह्यमात्मसंभाविनं नरं ॥ क्रो
धनं व्यसने हंति स्वजनोपि नराधिपं ॥१६॥ नानुतिष्ठति कार्याणि भयेषु न बिभेति च ॥ क्षिप्रं राज्याच्च्युतो दीनस्तृणैस्तुल्यो भवेदिह ॥
॥१७॥ शुष्ककाष्ठैर्भवेत्कार्यं लोष्टैरपि च पांसुभिः ॥ न तु स्थानात्परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः ॥१८॥ उपभुक्तं यथा वासः स्रजो वा मृदिता य
था ॥ एवं राज्यात्परिभ्रष्टः समर्थोपि निरर्थकः ॥१९॥ अप्रमत्तश्च यो राजा सर्वज्ञो विजितेंद्रियः ॥ कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरं ॥
॥२०॥ नयनाभ्यां प्रसुप्तो वा जागर्ति नयचक्षुषा ॥ व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥२१॥ त्वं तु रावण दुर्बुद्धिर्गुणैरेतैर्विवर्जितः ॥ यस्य
तेऽविदितश्चारै रक्षसां सुमहान्वधः ॥२२॥ परावमंता विषयेषु संगवानदेशकालप्रविभागतत्त्ववित् ॥ अयुक्तबुद्धिर्गुणदोषनिश्चये वि
पन्नराज्यो न चिराद्विपत्स्यसे ॥२३॥ इति स्वदोषान्परिकीर्तितांस्तया समीक्ष्य बुद्ध्या क्षणदाचरेश्वरः ॥ धनेन दर्पेण बलेन चान्वितो विचिंतया
मास चिरं स रावणः ॥२४॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकांडे त्रयस्त्रिंशः सर्गः ॥३३॥ ॥ ततः शूर्पणखां क्रुद्धां ब्रुवतीं प
रुषं वचः ॥ अमात्यमध्ये संक्रुद्धः परिपप्रच्छ रावणः ॥१॥ कश्च रामः कथंवीर्यः किंरूपः किंपराक्रमः ॥ किमर्थं दंडकारण्यं प्रविष्ट
श्च सुदुश्चरं ॥२॥ आयुधं किं च रामस्य येन ते राक्षसा हताः ॥ खरश्च निहतः संख्ये दूषणस्त्रिशिरास्तथा ॥३॥ तत्त्वं ब्रूहि मनोज्ञांगि केन त्वं

केवलं मंत्रैव न तु तत्त्वाशविषयबुद्धिः न चिरात्क्षिप्रं विपत्स्यसे आपदं प्राप्स्यसीत्यर्थः ॥२३॥ धनेनाक्षय्यकोशेन दर्पेण राजत्वाहंकारेण बलेन प्राणबलेन च विचिंतयामास
मारीचः कलहं निवारयति एष कलहार्थं प्रोत्साहयति किमत्र कर्तव्यमिति विचारयामासेत्यर्थः ॥२४॥ ॥ इति रामाभिरामे श्रीरा० आरण्यकांडे त्रयस्त्रिंशः सर्गः ॥३३॥

च विरूपिता ॥ इत्युक्ता राक्षसेंद्रेण

तत इति ॥१॥२॥३॥ ॥ राक्षसी क्रोधमूर्छिता ॥४॥

किंरूप इत्यस्योत्तरं दीर्घबाहुरित्यादि ॥५॥ कश्च राम इत्यस्योत्तरं दशरथात्मजः कनकांगदं कनकवलयभूषितं चापं ॥६॥७॥८॥९॥ खरश्च सहदूषणो हत इत्यर्थः ॥१०॥ किमर्थं दं
डकारण्यप्रविष्ट इत्यस्योत्तरं ऋषीणामित्यादि ॥११॥ धर्षेन नस्त्वद्वृत्तं गोपयंतीत्याह एकेति परिभूय नासाकर्णहीनां कृत्वा ॥१२॥१३॥ रामस्य दक्षिणो बाहुरित्यनेन सर्वं तत्का

ततो रामं यथान्यायमाख्यातुमुपचक्रमे ॥ दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनांबरः ॥५॥ कंदर्पसमरूपश्च रामो दशरथात्मजः ॥ शक्रचाप
निभं चापं विकृष्य कनकांगदः ॥६॥ दीप्तान्क्षिपति नाराचान्सर्पानिव महाविषान् ॥ नाददानं शरान्घोरान्विमुंचंतं महाबलं ॥७॥ न कार्मुकं वि
कर्षंतं रामं पश्यामि संयुगे ॥ हन्यमानं तु तत्सैन्यं पश्यामि शरवृष्टिभिः ॥८॥ इंद्रेणेवोत्तमं सस्यमाहतं त्वश्मवृष्टिभिः ॥ रक्षसां भीमवीर्याणां
सहस्राणि चतुर्दश ॥९॥ निहतानि शरैस्तीक्ष्णैस्तेनैकेन पदातिना ॥ अर्धाधिकमुहूर्तेन खरश्च सहदूषणः ॥१०॥ ऋषीणामभयं दत्तं कृत
क्षेमाश्च दंडकाः ॥११॥ एका कथंचिन्मुक्ताहं परिभूय महात्मना ॥ स्त्रीवधं शंकमानेन रामेण विदितात्मना ॥१२॥ भ्राता चास्य महातेजा
गुणतस्तुल्यविक्रमः ॥ अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥१३॥ अमर्षी दुर्जयो जेता विक्रांतो बुद्धिमान्बली ॥ रामस्य दक्षिणो बा
हुर्नित्यं प्राणो बहिश्चरः ॥१४॥ रामस्य तु विशालाक्षी पूर्णेंदुसदृशानना ॥ धर्मपत्नी प्रिया नित्यं भर्तुः प्रियहिते रता ॥१५॥ सा सुकेशी सुना
सोरुः सुरूपा च यशस्विनी ॥ देवतेव वनस्यास्य राजते श्रीरिवापरा ॥१६॥ तप्तकांचनवर्णाभा रक्ततुंगनखी शुभा ॥ सीता नाम वरारोहा वैदे
ही तनुमध्यमा ॥१७॥ नैव देवी न गंधर्वी न यक्षी न च किन्नरी ॥ तथारूपा मया नारी दृष्टपूर्वा महीतले ॥१८॥ यस्य सीता भवेद्भार्या यं च हृष्टा
परिष्वजेत् ॥ अभिजीवेत्स सर्वेषु लोकेष्वपि पुरंदरात् ॥१९॥ सा सुशीला वपुःश्लाघ्या रूपेणाप्रतिमा भुवि ॥ तवानुरूपा भार्या सा त्वं च तस्याः
पतिर्वरः ॥२०॥ तां तु विस्तीर्णजघनां पीनतुंगपयोधरां ॥ भार्यार्थे तु तवानेतुमुद्यताहं वरानना ॥२१॥ ॥२१॥ ॥श्रीरामाय नमः॥

र्यधुरंधरत्वं बहिश्चरः प्राण इत्यनेन निरतिशयप्रेमास्पदत्वं सूचितं ॥१४॥१५॥१६॥१७॥१८॥ यस्य सीता भार्या यं च हृष्टा परिष्वजेत् स एव सर्वेषु कालेषु लोकेषु च पुरंदरा
दपि अभ्यधिकं जीवेत् तस्मात्तद्भार्यात्वादि निर्वाच्यं ॥१९॥२०॥ तवानेतुमुद्यताहमिति निस्पृहावचो रावणसंतोषार्थं ॥२१॥ ॥२१॥ ॥श्रीरामाय नमः॥७॥

27

॥२२॥भार्यात्वेभार्यात्वेनसंपादने॥२३॥२४॥एषांगमादीनामशक्तिंनेषामज्ञायभावात्त्वत्कारणत्वशक्तिंचविज्ञायसीतानवभार्यात्वेक्रियतांभार्यात्वेनव्यवहारेयथाविषयोभवति
तथाक्रियतांतापनयतामित्यर्थः॥२५॥अयंकृत्यमेतत्कालोचितंकृत्यंकर्तुंयोग्यंतत्प्रतिपत्तुंनिश्चित्यज्ञात्वाप्रवर्तयितुमर्हसीत्यर्थः॥२६॥ ॥इतिरामाभिरामेश्रीरा॰आरण्य
काण्डेचतुस्त्रिंशःसर्गः॥३४॥ ॥ततइतिशूर्पशोणितभाजनेननयवद्विदूषणादितिधातुःशूर्पणखाशोणितभाजनेननयज्ञादिसत्क्रियातस्वयंनिविदूषयतिइतिशूर्पणखेतिनी
र्थःशूर्पाकारनखवतीत्यर्थेसंज्ञायांशूर्पणखाअन्यत्रशूर्पनखीतिपरेरामहर्षणंशूर्पणखावाक्यस्यकामविकारजनकयारोमांचकात्वंसचिवेभ्यस्तदाकास्यप्रतिपाद्यका

विरूपितास्मिक्रूरेणलक्ष्मणेनमहाभुज॥तांतुदृष्ट्वाद्यवैदेहींपूर्णचंद्रनिभाननां॥२२॥मन्मथस्यशराणांचत्वंविधेयोभविष्यसि॥यदि
तस्यामभिप्रायोभार्यात्वेतवजायते॥शीघ्रमुद्ध्रियतांपादोजयार्थमिहदक्षिणः॥२३॥रोचतेयदितेवाक्यंममैतद्राक्षसेश्वर॥क्रिय
तांनिर्विशंकेनवचनंममरावण॥२४॥विज्ञायेषामशक्तिंचक्रियतांचमहाबल॥सीतातवानवद्यांगीभार्यात्वेराक्षसेश्वर॥२५॥निश ५२
म्यरामेणशरैरजिह्मगैर्हतान्जनस्थानगतान्निशाचरान्॥खरंचबुद्ध्वानिहतंचदूषणंत्वमद्यकृत्यंप्रतिपत्तुमर्हसि॥२६॥ ॥इत्या
र्षेश्रीमद्रामायणेआरण्यकाण्डेचतुस्त्रिंशःसर्गः॥३४॥ ॥ततःशूर्पणखावाक्यंतच्छ्रुत्वारोमहर्षणं॥सचिवानभ्यनुज्ञायकार्यंबु
द्ध्वाजगामह॥१॥तत्कार्यमनुगम्याथयथावदुपलभ्यच॥दोषाणांचगुणानांचसंप्रधार्यबलाबलं॥२॥इतिकर्तव्यमित्येवकृत्वा
निश्चयमात्मनः॥स्थिरबुद्धिस्ततोरम्यांयानशालांजगामह॥३॥यानशालांततोगत्वाप्रच्छन्नंराक्षसाधिपः॥सूतंसंचोदयामासरथः
संयुज्यतामिति॥४॥एवमुक्तःक्षणेनैवसारथिर्लघुविक्रमः॥रथंसंयोजयामासतस्याभिमतमुत्तमं॥५॥कामगंरथमास्थायकांच
नंरत्नभूषितं॥पिशाचवदनैर्युक्तंखरैःकनकभूषणैः॥६॥

र्यंबुद्ध्वातत्संमतिपूर्वंकृत्यकर्तव्यत्वेननिर्धार्यतानभ्यनुज्ञायदत्ताभ्यनुज्ञान् कृत्वाजगाममारीचाश्रममितिशेषः १ तत्कार्यंसीतापहाररूपंअनभिव्यक्तेअनुगम्यादिश्यदोषा
णांगुणानांचस्वरूपंयथावदुपलभ्यसीतापहारेएतावंतोगुणाइतिनिश्चित्यबलाबलंचयथावत्संप्रधार्यइत्येवकर्तव्यमित्यात्मनःस्वस्यनिश्चयंकृत्वाअकंपनभूपेण
खाभ्यामुक्तत्वात्सीताहरणमवश्यकर्तव्यमितिनिश्चित्ययानशालांजगाम॥२॥३॥इष्टकर्मणिप्रवृत्तौवहज्ञादिनिरोधशंकयाप्रच्छन्नंगूढं॥४॥५॥स्ववशानिभेदाःपि
शाचावदनभागेतत्सदृशैरित्यर्थः॥६॥

नरनरीपतिःसमुद्रःतंनीर्न्नायपयो॥७॥८॥९॥ विद्युत्स्थानेआभरणानिमेघस्थानेरावणःबलाकास्थानेछत्रं॥१०॥ शैलसहितसागरानूपंतत्कूलंतस्यैववर्णनंनानापुष्पेत्यादि
ना॥११॥१२॥ कदल्याटविःकदलीवनंतेनशोभावत्॥१३॥ अत्यंतमतिशयेनपर्णवानादिरूपानियतआहारोयेषांतैः॥१४॥ अजोब्रह्मातत्सुतैर्वैखानसैरयोनिजैःप्रसिद्धैःमाषैः

मेघप्रतिमनादेनसतेनधनराजुजः॥ राक्षसाधिपतिःश्रीमान्ययौनरनरीपतिं॥७॥ सप्तेनतालवजनःश्वेनछत्रोदशाननः॥ स्निग्धवैदु
र्यसंकाशस्तप्तकांचनभूषणः॥८॥ दशास्योविंशतिभुजोदर्शनीयापरिछदः॥ त्रिदशारिर्मुनींद्रघ्नोदशशीर्षइवाद्रिराट्॥९॥ कामगंरथमास्था
यशुशुभेराक्षसाधिपः॥ विद्युन्मंडलवान्मेघःसबलाकइवांबरे॥१०॥ सशैलसागरानूपंवीर्यवाननवलोकयन्॥ नानापुष्पफलैर्वृक्षैरनुकी
र्णंसहस्रशः॥११॥ शीतमंगलतोयाभिःपद्मिनीभिःसमंततः॥ विशालैराश्रमपदैर्वेदिमद्भिरलंकृतं॥१२॥ कदल्याटविसंशोभंनारिकेलोप
शोभितं॥ सालैस्तालैस्तमालैश्चतरुभिश्चसुपुष्पितैः॥१३॥ अत्यंतनियताहारैःशोभितंपरमर्षिभिः॥ नागैःसुपर्णैर्गंधर्वैःकिन्नरैश्चसहस्रशः
॥१४॥ जितकामैश्चसिद्धैश्चचारणैश्चोपशोभितं॥ आजैर्वैखानसैर्माषैर्वालखिल्यैर्मरीचिपैः॥१५॥ दिव्याभरणमाल्याभिर्दिव्यरूपाभिरावृतं
क्रीडारतिविधिज्ञाभिरप्सरोभिःसहस्रशः॥१६॥ सेवितंदेवपत्नीभिःश्रीमतीभिरुपासितं॥ देवदानवसंघैश्चचरितंत्वमृताशिभिः॥१७॥ हं
सक्रौंचप्लवाकीर्णंसारसैःसंप्रणादितं॥ वैदूर्यप्रस्तरंस्निग्धंसांद्रंसागरतेजसा॥१८॥ पांडुराणिविशालानिदिव्यमाल्ययुतानिच॥ तूर्यगीता
भिजुष्टानिविमानानिसमंततः॥१९॥ तपसाजितलोकानांकामगान्यभिसंपतन्॥ गंधर्वाप्सरसश्चैवददर्शधनराजुजः॥२०॥ निर्यासरसमू
लानांचंदनानांसहस्रशः॥ वनानिपश्यन्सौम्यानिघ्राणतृप्तिकराणिच॥२१॥ अगरूणांचमुख्यानांवनान्युपवनानिच॥ नक्कोलानांच
जात्यानांफलानांचसुगंधिनां॥२२॥

माषसंज्ञकैः॥१५॥१६॥ अमृताशिभिःअमृतभोजनैः॥१७॥ प्लवाःमंडूकाःवैदूर्यप्रस्तरंवैदूर्यसदृशपाषाणमयप्रस्तरंसागरतेजसासागरोर्मिवैभवेनस्निग्धंसांद्रंशीतलं॥१८॥१९॥
अभिसंपतन्गछन्मार्गवशाद्विमानानिगंधर्वाप्सरसश्चददर्श॥२०॥ निर्यासरूपरसयुक्तमूलानांचंदनानांनिर्मित्यर्थः यद्वानिर्यासरसस्यमूलानांउपादानकारणानांगुग्गुला
दिवृक्षाणां चंदनानांचवनानिपश्यन्॥२१॥ जात्यानांसुमनसानांनक्कोलाःसुगंधफलावृक्षविशेषास्तेषांवनानिपश्यन्॥२२॥ ॥७॥

28

शैलानि शिलासमूहान् ॥२४॥ प्रस्रवाणि निर्झराः ॥२५॥ समं सममभूतलं देशं ॥२६॥ न च समुद्रानूपे ॥२७॥ यस्य दिव्यवटस्य प्रसंगात्तन्माहात्म्यं कविराह यस्येति षड्भिः श्लोकैः
गरुडेऽमृताहरणप्रस्तावे भक्षार्थं महाकायं गजकच्छपं चादाय क्वचित्स्थित्वा भक्षणाय यस्य शाखामाजगाम गत्वा च यस्य शाखां भारेण बभंज तस्या भग्नशाखाया अधो वैखान-
साद्या अनेके ऋषयः समागता बभूवुस्तेषां शाखापातेन नाशो माभूदिति तां शाखां तौ गजकच्छपौ च महाबलत्वादादायान्यत्र जगाम तदा गच्छन्नेव तेनो शाखां चैकपदेन धृत्वा

शैलानि प्रवराण्येव प्रवालनिचयांस्तथा ॥ कांचनानि च शृंगाणि राजतानि तथैव च ॥२४॥ प्रस्रवाणि मनोज्ञानि प्रसन्नानि ह्रदानि च ।
धनधान्योपपन्नानि स्त्रीरत्नैरावृतानि च ॥२५॥ हस्त्यश्वरथगाढानि नगराणि विलोकयन् ॥ त समं सर्वतः स्निग्धं मृदुसंस्पर्शमारुतं ॥२६॥
अनूपं सिंधुराजस्य ददर्श त्रिदिवोपमं ॥ तत्रापश्यत्स मेघाभं न्यग्रोधं मुनिभिर्वृतम् ॥२७॥ समन्ताद्यस्य ताः शाखाः शतयोजनमायताः ॥
यस्य हस्तिनमादाय महाकायं च कच्छपं ॥२८॥ भक्षार्थं गरुडः शाखामाजगाम महाबलः ॥ तस्य तां सहसा शाखां भारेण पतगोत्तमः ॥
॥२९॥ सुपर्णः पर्णबहुलां बभंजाथ महाबलः ॥ तत्र वैखानसा माषा वालखिल्या मरीचिपाः ॥३०॥ आजा बभूवुर्धूम्राश्च संगताः पर-
महर्षयः ॥ तेषां दयार्थं गरुडस्तां शाखां शतयोजनां ॥३१॥ भग्नामादाय वेगेन तौ चोभौ गजकच्छपौ ॥ एकपादेन धर्मात्मा भक्षयित्वा
तदामिषं ॥३२॥ निषादविषयं हत्वा शाखया पतगोत्तमः ॥ प्रहर्षमतुलं लेभे मोक्षयित्वा महामुनीन् ॥३३॥ स तु तेन प्रहर्षेण द्विगुणीकृ-
तविक्रमः ॥ अमृतानयनार्थं वै चकार मतिमान्मतिं ॥३४॥ अयोजालानि निर्मथ्य भित्त्वा रत्नगृहं वरं ॥ महेंद्रभवनाद्गुप्तमाजहारामृ-
तं ततः ॥३५॥ तं महर्षिगणैर्जुष्टं सुपर्णकृतलक्षणं ॥ नाम्ना सुभद्रं न्यग्रोधं ददर्श धनदानुजः ॥३६॥ तं तु गत्वा परं पारं समुद्रस्य नदीप-
तेः ॥ ददर्शाश्रममेकान्ते पुण्ये रम्ये वनान्तरे ॥३७॥ तत्र कृष्णाजिनधरं जटामंडलधारिणं ॥ ददर्श नियताहारं मारीचं नाम राक्षसं ॥३८॥

तदिदं एवं तदामिषं गजकच्छपरूपं भक्षयित्वा तया शाखया उत्क्षिप्तया निषादविषयं निषाददेशं हत्वा मुनींश्च वधान्मोक्षयित्वा प्रहर्षं लेभे ॥२८॥२९॥३०॥३१॥ ३२॥३३॥
स तेनैव हर्षेणामिषभक्षणनिषादनाशनमुनिरक्षणजन्यतोषेण ॥३४॥ अयोजालानि अयःशृंखलानिर्मितजालानि रत्नमयगेहोपरि पक्षिप्रवेशपरिहाराय वज्रजा-
लानि निर्मथ्य छित्त्वा रत्नमयगृहं च भित्त्वा गुप्तममृतं महेंद्रभवनादाजहार ॥३५॥ सुपर्णेन कृतं भग्नैकमहाशाखत्वरूपं लक्षणं यस्य तं ॥३६॥ ३७॥ ३८॥

सर्वकामैरभिलषितसर्वभोग्यवस्तुभिरर्चितो बभूवेति शेषः ॥ ३९।४० ॥ पूजोनन्तरं कुशलं पप्रच्छेति कच्चिदिति ॥ ४१ ॥ इदं अग्रिमसर्गे वक्ष्यमाणं ॥ ४२ ॥ ॥ इति रामाभिरामे श्रीरा॰
आरण्यकाण्डे पञ्चत्रिंशः सर्गः ॥ ३५ ॥ ॥ मारीचेति तातेत्युपलालनेन कार्यवदिष्यन्पूर्वं हितं स्मारयति ॥ १ ॥ जानीषे इति अत्रात्र खरो मन्नियोगाज्जनस्थानं प्राप्य वसन्तीति
जानीषे किलेत्यन्वयः लब्धलक्षाः लब्धयुद्धोत्साहाः ॥ २ ॥ अथ तत्र स्थित्वा क्रियमाणं हेतुं च जानीषे इत्याह अधिवासं चेति मुनीन्बाधमाना बाधहेतुं वहेतो शासनं च अधि

रावणः समागम्य विधिवत्तेन रक्षसा ॥ मारीचेनार्चितो राजा सर्वकामैरमानुषैः ॥ ३९ ॥ तं स्वयं पूजयित्वा च भोजनेनोदकेन च ॥ अर्थोप
हितया वाचा मारीचो वाक्यमब्रवीत् ॥ ४० ॥ कच्चित्ते कुशलं राजन्लंकायां राक्षसेश्वर ॥ केनार्थेन पुनस्त्वं वै तूर्णमेवमिहागतः ॥ ४१ ॥ एव
मुक्तो महातेजा मारीचेन स रावणः ॥ ततः पश्चादिदं वाक्यमब्रवीद्वाक्यकोविदः ॥ ४२ ॥ ॥ इत्यार्षे श्रीमद्रामायणे वा॰ आरण्यकाण्डे पञ्च
त्रिंशः सर्गः ॥ ३५ ॥ ॥ मारीच श्रूयतां तात वचनं मम भाषतः ॥ आर्तोऽस्मि मम चार्तस्य भवान्हि परमा गतिः ॥ १ ॥ जानीषे त्वं जनस्थानं भ्रा
ता यत्र खरो मम ॥ दूषणश्च महाबाहुः स्वसा शूर्पणखा च मे ॥ २ ॥ त्रिशिराश्च महाबाहू राक्षसः पिशिताशनः ॥ अन्ये च बहवः शूरा लब्ध
लक्षा निशाचराः ॥ ३ ॥ वसन्ति मन्नियोगेन अधिवासं च राक्षसाः ॥ बाधमाना महारण्ये मुनीन्ये धर्मचारिणः ॥ ४ ॥ चतुर्दशसहस्राणि रक्षसां
भीमकर्मणां ॥ शूराणां लब्धलक्षाणां खरचित्तानुवर्तिनां ॥ ५ ॥ ते त्विदानीं जनस्थाने वसमाना महाबलाः ॥ संगताः परमायत्ता रामेण सह
संयुगे ॥ ६ ॥ नानाशस्त्रप्रहरणाः खरप्रमुखराक्षसाः ॥ तेन संजातरोषेण रामेण रणमूर्धनि ॥ ७ ॥ अनुक्त्वा परुषं किंचिच्छरैर्व्यापारितं धनुः
चतुर्दशसहस्राणि रक्षसामुग्रतेजसां ॥ ८ ॥ निहतानि शरैर्दीप्तैर्मानुषेण पदातिना ॥ खरश्च निहतः संख्ये दूषणश्च निपातितः ॥ ९ ॥

वासं च कुर्वन्तीति मन्नियोगादिति शेषः अधिवासः उपद्रव इति कतकः निवासमिति पाठे निवासं स्थाप्रीत्या वासो यत्र कर्मणि तथा ॥ ४ ॥ ५ ॥ चतुर्दशसहस्राणि यानि संनिते
त्विदानीमित्यन्वयः वसमानाः वसन्तः रामेण संयुगे संगताः तेन सहसमरसकामुकरित्यर्थः परमत्यर्थमायत्ताः सन्नद्धाः ॥ ६ ॥ ७ ॥ किंचिदपि परुषमनुक्त्वा शनैः शरमोक्षण
व्यापारैर्व्यापारितं संजातव्यापारं कृतं ॥ ८ ॥ ९ ॥

29

अथ भगिनीवैरूप्यनिष्करणं मन्यमानः क्रोधात् दूषयन्निरागसमपि इत्यादिना क्षीणजीवितः निरपराधं स्त्रीवैरूप्यकरणादेव तथा त्वं मन्यते ॥१०॥ अत एवाशीलो ऽजितेन्द्रियश्च अ-
स्थाने क्रोधात् ॥११॥ सत्त्वं बलमेव केवलमाश्रित्य न तु धर्मं ॥१२॥१३॥१४॥ भ्रातृभिः कुम्भकर्णादिभिः नाभिचिन्तये न गणयामि ॥१५॥ उपायतः उपायेष्वित्यर्थः तत्त्वे वर्हेतुगर्भं विशे-

हत्वा त्रिशिरसं चापि निर्भया दण्डकाः कृताः ॥ पित्रा निरस्तः क्रुद्धेन सभार्यः क्षीणजीवितः ॥१०॥ स हन्ता तस्य सैन्यस्य रामः क्षत्रियपांसनः ॥ अ-
शीलः कर्कशस्तीक्ष्णो मूर्खो लुब्धोऽजितेन्द्रियः ॥११॥ त्यक्तधर्मा त्वधर्मात्मा भूतानामहिते रतः ॥ येन वैरं विनारण्ये सत्त्वमास्थाय केवलं ॥१२॥ कर्णना-
सा विरूपेण भगिनी मे विरूपिता ॥ अस्य भार्यां जनस्थानात् सीतां सुरसुतोपमां ॥१३॥ आनयिष्यामि विक्रम्य सहायस्तत्र मे भव ॥ त्वया ह्यहं सहा-
येन पार्श्वस्थेन महाबल ॥१४॥ भ्रातृभिश्च सुरान् सर्वान्नाहमत्रानुचिन्तये ॥ तत्सहायो भव त्वं मे समर्थो ह्यसि राक्षस ॥१५॥ वीर्ये युद्धे च दर्पे
च न ह्यस्ति सदृशस्तव ॥ उपायतो महान् शूरो महामायाविशारदः ॥१६॥ एतदर्थमहं प्राप्तस्त्वत्समीपं निशाचर ॥ शृणु तत्कर्म साहाय्ये यत्कार्यं व-
चनान्मम ॥१७॥ सौवर्णस्त्वं मृगो भूत्वा चित्रो रजतबिन्दुभिः ॥ आश्रमे तस्य रामस्य सीतायाः प्रमुखे चर ॥१८॥ त्वां तु निःसंशयं सीता दृष्ट्वा तु मृगरू-
पिणं ॥ गृह्यतामिति भर्त्तारं लक्ष्मणं चाभिधास्यति ॥१९॥ ततस्तयोरपाये तु शून्ये सीतां यथासुखं ॥ निराबाधो हरिष्यामि राहुश्चन्द्रप्रभामिव ॥२०॥
ततः पश्चात् सुखं रामे भार्याहरणकर्शिते ॥ विस्रब्धं प्रहरिष्यामि कृतार्थेनान्तरात्मना ॥ तस्य रामकथां श्रुत्वा मारीचस्य महात्मनः ॥ शुष्कं समभ-
वद्वक्त्रं परित्रस्तो बभूव च ॥२२॥ ओष्ठौ परिलिहन् शुष्कौ नेत्रैरनिमिषैरिव ॥ मृतभूत इवार्त्तस्तु रावणं समुदैक्षत ॥२३॥ स रावणं त्रस्तविषण्ण-
चेता महावने राममपराक्रमज्ञः ॥ कृताञ्जलिस्तत्त्वमुवाच वाक्यं हितं च तस्मै हितमात्मनश्च ॥२४॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यका-
ण्डे षट्त्रिंशः सर्गः ॥३६॥ ॥ तच्छ्रुत्वा राक्षसेन्द्रस्य वाक्यं वाक्यविशारदः ॥ प्रत्युवाच महातेजा मारीचो राक्षसेश्वरं ॥१॥ ॥७॥

घरणं महामायेत्यादि ॥१६॥ मम साहाय्ये यत्कर्म त्वया कार्यं तत्कर्म शृणु इत्यन्वयः ॥१७॥१८॥ १९॥ अपाये अपगमे ॥२०॥ ततः सुखं क्लेशरहितं यथा भवति तथा विस्रब्धं यथा भ-
वति तथा प्रहरिष्यामि ॥२१॥ रामकथां रामप्रसंगं श्रुत्वा मारीचस्त्रस्तो बभूव तेन त्रासेन च तस्य मुखं शुष्कमभवत् ॥२२॥ चिन्तावशात् अनिमिषैरिव नेत्रैरुपलक्षित इति शे-
षः मृतभूतो मृतप्रायः ॥२३॥ आत्मनो हितमित्यार्षी षष्ठी ॥२४॥ ॥ इति रामाभिरामे श्रीरा० आरण्यकाण्डे षट्त्रिंशः सर्गः ॥३६॥ तद्धिति ॥१॥

प्रियवादिनः स्वामिहिताहितविचारमुपेक्ष्य राज्ञ आपातप्रियं तथा संतोषायतत्कालमधुरवाक्यवक्तारः पुरुषाः सुलभाः अपितु अप्रियस्यापि तत्कालमप्रियतया प्रतीयमान
स्यापि कालान्तरे पथ्यस्य वक्ता वक्तान्तरस्य च श्रोता ॥ हितवस्तुनि भासमानप्रियत्वस्य पथ्यमेवेति गृहीता राज्ञा विवेकी दुर्लभः अतो मयोच्यमानं आपातनोऽप्रियमिव भासमान
मपि उदर्के परमहितं त्वं गृहाण इति शेषः ॥२॥ अवाधे हेतुः अयुक्तचारत्वं अनियुक्तचारत्वं ॥२॥ इतरदेवाध्यक्षेण न श्च नवानर्थो भावीत्याह अपीति रक्षसां स्वस्तीत्यर्थं अपि स्वस्ति म

ते१ सुलभाः पुरुषा राजन् सततं प्रियवादिनः ॥ अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥२॥ न नूनं बुध्यसे रामं महावीर्यगुणोन्नतं ॥ अ
युक्तचारश्चपलो महेन्द्रवरुणोपमं ॥३॥ अपि स्वस्ति भवेत्तात सर्वेषां भुवि रक्षसां ॥ अपि रामो न संक्रुद्धः कुर्याल्लोकानराक्षसान् ॥४॥ अपि
ते जीवितान्ताय नोत्पन्ना जनकात्मजा ॥ अपि सीतानिमित्तं च न भवेद्व्यसनं महत् ॥५॥ अपि त्वामीश्वरं प्राप्य कामवृत्तं निरंकुशं ॥ न वि
नश्येत्पुरी लंका त्वया सह सराक्षसा ॥६॥ त्वद्विधः कामवृत्तो हि दुःशीलः पापमंत्रितः ॥ आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥७॥ न
च पित्रा परित्यक्तो नामर्यादः कथंचन ॥ न लुब्धो न च दुःशीलो न च क्षत्रियपांसनः ॥८॥ न च धर्मगुणैर्हीनः कौसल्यानंदवर्धनः ॥ न च ती
क्ष्णो हि भूतानां सर्वभूतहिते रतः ॥९॥ वंचितं पितरं दृष्ट्वा कैकेय्या सत्यवादिनं ॥ करिष्यामीति धर्मात्मा ततः प्रव्रजितो वनं ॥१०॥ कै
केय्याः प्रियकामार्थं पितुर्दशरथस्य च ॥ हित्वा राज्यं च भोगांश्च प्रविष्टो दण्डकावनं ॥११॥ न रामः कर्कशस्तात नाविद्वान्नाजितेन्द्रियः
अनृतं न श्रुतं चैव नैव त्वं वक्तुमर्हसि ॥१२॥ रामो विग्रहवान्धर्मः साधुः सत्यपराक्रमः ॥ राजा सर्वस्य लोकस्य देवानामिव वासवः ॥१३॥

30

हे।२

वेदपि क्षेमं संपद्येनापि किं न बुद्धिनिर्हन्येति शेषः तथा संक्रुद्धो रामो लोकमराक्षसं न कुर्यादपि किं एवमग्रेपि बोध्यं ॥४॥५॥६॥ पापमंत्रितः पापैः सह कृतमन्त्रः
स्वार्थविचारः ॥७॥ एवं महावीर्यत्वं रामे प्रतिपाद्य वरुणोक्तदृष्टान्तानि निराचष्टे न पित्रेत्यादि ॥८॥ न क्षणाभावेऽनुः सर्वभूतहिते रतत्वं ॥९॥ कैकेय्या वंचितं पितरं दृष्ट्वा तं सत्य
वादिनं करिष्यामीति वनं स्वयमेव प्रव्रजितो न तु किंचित्पापाद्भित्त्वा प्रवासित इत्यर्थः ॥१०॥ कैकेय्याः प्रियस्य कामस्य मनोरथस्य पूरणार्थं ॥११॥ अनृतं न श्रुतं चैव
अनृतप्रसंगमापन्नानानि नेननतत्कथनं दूरापास्तमित्यर्थः एवं वक्तुं रामं दुर्गुणवक्तुं ॥१२ ॥१३॥

अथसीताप्रहारस्याशक्यत्वमाह कथंत्विति स्वेनतेजसापातिव्रत्यवैभवेनकिंचतस्यरामस्यस्वेनतेजसासहजप्रतापेनेत्यर्थः॥१४॥शरार्चिषंशरज्वालं स्वकृचाप
पेनेनज्ञनशत्रुवस्तकृपमिंधनंयस्य॥१५॥रामेनेनकरूपकोपायादकविशेषणान्याह धनुरिति धनुर्वेव्यादितयान्नमिति यावत् दीप्तज्वालादीप्तमास्ययस्यरामरूपा
नकस्यज्वालादीप्तत्वमेवशरार्चिषमित्यनेनोक्तं॥१६॥अन्यासादयितुअत्यन्तप्राप्तुं॥१७॥अप्रमेयहितत्तेजइत्यनेनावाङ्मानसगोचरत्वंध्वमितयस्मात्त्यनेननतस्याअपित
त्वंसहचिन १८ नरसिंहस्येत्यनेनहिरण्यकशिपुप्रभृतिहननायमेवतिसहचिन नित्यमनुव्रतेनत्यनेननतस्यास्तछक्तित्वसहचिन॥१९॥नसेतिराजसत्तमः प्रधानेनत्वाष्टशेनेत्य

कथंनुतस्यवैदेहींरक्षितांस्वेनतेजसा॥इछसिप्रसभंहर्तुंप्रभामिवविवस्वतः॥१४॥शरार्चिषमनाधृष्यंचापखड्गेंधनंरणे॥रामाग्निंसह
सादीप्तंनप्रवेष्टुंत्वमर्हसि॥१५॥धनुर्व्यादितदीप्तास्यंशरार्चिषममर्षणं॥चापबाणधरंतीक्ष्णंशत्रुसेनापहारिणं॥१६॥ राज्यंसुखं
चसंत्यज्यजीवितंचेष्टमात्मनः॥नात्यासादयितुंतातरामान्तकमिहार्हसि॥१७॥अप्रमेयंहितत्तेजोयस्यसाजनकात्मजा॥नत्वंसमर्थस्तांहर्तुं
रामचापाश्रयांवने॥१८॥तस्यवैनरसिंहस्यसिंहोरस्कस्यभामिनी॥प्राणेभ्योपिप्रियतराभार्यानित्यमनुव्रता॥१९॥नसाधर्षयितुंशक्यामै
थिल्योजस्विनःप्रिया॥दीप्तस्येवहुताशस्यशिखासीतासुमध्यमा॥२०॥किमुद्यममिमंकृत्वानेराक्षसाधिप॥दृष्टश्चेत्त्वंरणेनेनतदं
तमुपजीवितं॥२१॥जीवितंचसुखंचैवराज्यंचैवसुदुर्लभं॥ससर्वैःसचिवैःसार्द्धंविभीषणपुरस्कृतैः॥२२॥मन्त्रयित्वासधर्मिष्ठैःकृत्वानि
श्चयमात्मनः॥दोषाणांचगुणानांचसंप्रधार्यबलाबलं॥२३॥आत्मनश्चबलंज्ञात्वाराघवस्यचतत्त्वतः॥हिताहितंचनिश्चित्यक्षमंत्वं
कर्तुमर्हसि॥२४॥अहंतुमन्येतवनक्षमंरणेसमागमंकोसलराजसूनुना॥इदंहिभूयःशृणुवाक्यमुत्तमंक्षमंचयुक्तंचनिशाचराधि
प॥२५॥ ॥इत्यार्षेश्रीमद्रामायणेआरण्यकांडेसप्तत्रिंशःसर्गः॥३७॥ ॥७॥ ॥७॥ ॥श्रीरामायनमः॥७॥

र्थः॥२०॥वार्थमिममुद्यमंकृत्वानेनकिमपिहितमित्यर्थः तेनचेत्त्वंरणेदृष्टस्तदानदंतंनदृष्टोनावसानंनवजीवितमित्यर्थः॥२१॥जीवितमिति जीवितायुद्दिश्यसत्त्वंभी
षणपुरोगमैर्धर्मिष्ठैर्मंत्रयित्वाअनंतरंनिश्चयंकृत्वादोषगुणबलाबलनिर्धारणविषयआत्मनोरामस्यचदोषगुणबलाबलंसंधार्यविचार्यतदनंतरंस्वस्यरामस्यचब
लंतत्त्वतोज्ञात्वानिश्चित्यानवआत्मनोहितमिदमितिनिश्चित्यायत्क्षमंतत्कर्तुमर्हसीत्यर्थः॥२२॥२३॥२४॥सततसचिवान्तर्गतस्यममत्वेषनिश्चयइत्याह अहंत्विति

६६ इत्यार्षेरामायणे २५ इत्यारण्यकांडेसप्तत्रिंशःसर्गः॥७॥

वि१

अथ स्वानुभवसिद्धं रामबलमाह कदाचिदित्यादि अहमपीति संबंधः ॥१॥२॥ मद्वित्रस्तः मत्तो वित्रस्त इत्यर्थः ॥३॥ पर्वकाले यागकाले ॥४॥५॥ पंचदशवर्षोपि तथा दशरथेना
नुदितोप्यनेन बाल्ययोगेन नाय अतिबालेनापीदृशं हतं किमधुना नावाच्यमिति निस्तब्धास्यात्यन्तभयायमारीचेन तथा दशरथेनोक्त इत्यूनद्वादशवर्ष इत्युक्तं ऊनषोडशवर्षोप
मितिपाठान्तरं ॥६॥७॥८॥ यद्यपि भवान् देवानामपि सहायः कृत आसीत् अथाप्यनेन त्वया कृतं कर्म त्रिलोकविदितं त्रिषु लोकेषु विदितं तथापि रामाद्बलेन स्यरक्षसा

कदाचिदप्यहं वीर्यात्पर्यटन्पृथिवीमिमां ॥ बलं नागसहस्रस्य धारयन्पर्वतोपमः ॥१॥ नीलजीमूतसंकाशस्तप्तकांचनकुंडलः ॥ भ
यं लोकस्य जनयन् किरीटी परिघायुधः ॥२॥ व्यचरं दंडकारण्यमृषिमांसानि भक्षयन् ॥ विश्वामित्रोथ धर्मात्मा मद्वित्रस्तो महामुनिः ॥३॥
स्वयं गत्वा दशरथं नरेंद्रमिदमब्रवीत् ॥ अयं रक्षतु मां रामः पर्वकाले समाहितः ॥४॥ मारीचान्मे भयं घोरं समुत्पन्नं नरेश्वर ॥ इत्येवमुक्तो धर्मा
त्मा राजा दशरथस्तदा ॥५॥ प्रत्युवाच महाभागं विश्वामित्रं महामुनिं ॥ ऊनद्वादशवर्षोयमकृतास्त्रश्च राघवः ॥६॥ कामं तु मम तत्
सैन्यं मया सह गमिष्यति ॥ बलेन चतुरंगेण स्वयमेत्य निशाचर ॥७॥ वधिष्यामि मुनिश्रेष्ठ शत्रुं तव यथेप्सितं ॥ एवमुक्तः स तु मुनी रा
जानमिदमब्रवीत् ॥८॥ रामान्नान्यद्बलं लोके पर्याप्तं तस्य रक्षसः ॥ देवतानामपि भवान्समरेष्वभिपालकः ॥९॥ आसीत्तव कृतं कर्म त्रि
लोकविदितं नृप ॥ काममस्ति महत्सैन्यं तिष्ठत्विह परंतप ॥१०॥ बालोप्येष महातेजाः समर्थस्तस्य निग्रहे ॥ गमिष्ये राममादाय स्वस्ति
स्तेस्तु परंतप ॥११॥ इत्येवमुक्त्वा स मुनिस्तमादाय नृपात्मजं ॥ जगाम परमप्रीतो विश्वामित्रः स्वमाश्रमं ॥१२॥ तं तथा दंडकारण्ये यज्ञमुद्दि
श्य दीक्षितं ॥ बभूवोपस्थितो रामः चित्रं विस्फारयन्धनुः ॥१३॥ अजातव्यंजनः श्रीमान्बालः श्यामः शुभेक्षणः ॥ एकवस्त्रधरो धन्वी शि
खी कनकमालया ॥१४॥ शोभयन्दंडकारण्यं दीप्तेन स्वेन तेजसा ॥ अदृश्यत तदा रामो बालचंद्र इवोदितः ॥१५॥ ॥९॥

31

नृपर्याप्तमतः कामं तव बलं यदस्ति तदत्रैव तिष्ठतु तत्र युद्धयोग्याभावात् अतएव बालोपि यतस्तन्निग्रहसमर्थो नोदेयस्त्वमेवेति शेषः ॥९॥१०॥११॥१२॥ उपस्थितो रामः तद्रक्षणा
र्थं समीपं प्राप्तः सन् ॥१३॥ अजातव्यंजनः श्मश्र्वादिपुरुषचिह्नप्रादुर्भावहीन इत्यर्थः एकवस्त्रधरः ब्रह्मचर्यस्थितः शिखी काकपक्षधरः कनकमालयोपलक्षितः ॥१४॥१५॥

आजगामेत्युत्तमपुरुषः अत्र पारोक्ष्यार्थकल्पितादेवपाठवशादेवाहमागतोनतुतदागमनंममप्रत्यक्षमितिनिश्चिनयति यद्वावक्तुकालिकत्वेनविस्मृतत्वाद्यातत्वारोपः
आषांवालितं आश्रमांतरं आश्रममध्यं दत्तवरो ब्रह्मदत्तदेवादव्यत्ववा ॥१६॥ प्रविष्टोहंतेनदृष्टइत्यन्वयः ॥१७॥१८॥ शतयोजनेनतातंतन्यर्थंनदेशस्थितेसमुद्रेक्षिप्तः
१९ नेच्छतामितिच्छतामनत्वाक्षणांकेवलंकृपाजन्यमारीचाशयः भाविकार्यार्थमितिवस्तुतत्वं ॥२०॥२१॥ येमेसहायाअपरेगतास्तेनिपातिताइत्यन्वयः ॥२२॥२३॥

ततोहंमेघसंकाशस्तप्तकांचनकुंडलः ॥ बलीदत्तवरोदर्पादाजगामाश्रमांतरं ॥१६॥ तेनदृष्टःप्रविष्टोहंसहसैवायतायुधः ॥ मांतुदृष्ट्वाधनुः
सज्यमसंभ्रांतश्चकारह ॥१७॥ अवजानन्नसंमोहाद्बालोयमितिराघवं ॥ विश्वामित्रस्यतांवेदिमभ्यधावंकृतत्वरः ॥१८॥ तेनमुक्तस्ततो
बाणःशितःशत्रुनिबर्हणः ॥ तेनाहंताडितःक्षिप्तःसमुद्रेशतयोजने ॥१९॥ नेच्छतातातमांहंतुंतदावीरेणरक्षितः ॥ रामस्यशरवेगेननिर
स्तोभ्रांतचेतनः ॥२०॥ पातितोहंतदातेनगंभीरेसागरांभसि ॥ प्राप्यसंज्ञांचिरात्तातलंकांप्रतिगतःपुरीं ॥२१॥ एवमस्मितदामुक्तःसहा
यास्तेनिपातिताः ॥ अकृतास्त्रेणरामेणबालेनाक्लिष्टकर्मणा ॥२२॥ तन्मयावार्यमाणस्तुयदिरामेणविग्रहं ॥ करिष्यस्यापदंघोरांक्षिप्रं
प्राप्यनशिष्यसि ॥२३॥ क्रीडारतिविधिज्ञानांसमाजोत्सवदर्शिनां ॥ रक्षसांचैवसंतापमनर्थंचाहरिष्यसि ॥२४॥ हर्म्यप्रासादसंबाधां
नानारत्नविभूषितां ॥ द्रक्ष्यसित्वंपुरींलंकांविनष्टांमैथिलीकृते ॥२५॥ अकुर्वंतोपिपापानिशुचयःपापसंश्रयात ॥ परपापैर्विनश्यं
तिमत्स्यानागह्रदेयथा ॥२६॥ दिव्यचंदनदिग्धांगान्दिव्याभरणभूषितान ॥ द्रक्ष्यस्यभिहतान्भूमौतवदोषात्तुराक्षसान ॥२७॥ हृतदारा
न्सदारांश्चदशविद्रवतोदिशः ॥ हतशेषानशरणान्द्रक्ष्यसित्वंनिशाचरान ॥२८॥ शरजालपरिक्षिप्तामग्निज्वालासमावृतां ॥ प्रदग्धभव
नांलंकांद्रक्ष्यसित्वमसंशयं ॥२९॥

अनर्थंमरणरूपंआहरिष्यसियत्नात्संपादयिष्यसि ॥२४॥२५॥ संगदोषाद्रक्षःकुलमात्रस्यनाशःप्राप्तोनीत्याह अकुर्वंतोपीतिपरपापैःपरेषांपापान्मनांपापैर्निमि
त्तैःनागह्रदेसर्पयुक्तह्रदेसर्पनिग्रहायप्रविष्टेनराजप्रेरितधीवरादिनागरुडेनवायथाप्रसंगान्मत्स्यानश्यंतितद्वत ॥२६॥२७॥ हृतदारानपरिहृतदारानसक
लत्रानितियावत ॥२८॥२९॥

नवपरिग्रहैनः पुरे प्रमदानां सहस्राणि भनन्त्यास्वेव रमस्व नान्यत्र मनो धेहीत्यर्थः ॥३०॥३१॥३२॥३३॥ इति रामाभिरामे॰ आरण्यकांडे अष्टत्रिंशः ३८ ॥ ॥पुनः स्वानु
भवसिद्धरामहत्त्वमाह एवमस्मीति तदा विश्वामित्रयज्ञरक्षणसमये तेन कथंचिन्मुक्तोस्मि इदानीं प्रौढावस्थायामपि यद्वृत्तं मद्विषयं यदुत्तरं यत्सर्वलोको

परदाराभिमर्षात्तु नान्यत्पापतरं महत् ॥ प्रमदानां सहस्राणि तव राजन्परिग्रहे ॥३०॥ भव स्वदारनिरतः स्वकुलं रक्ष राक्षस ॥ मानं वृ
द्धिं च राज्यं च जीवितं चेष्टमात्मनः ॥३१॥ कलत्राणि च सौम्यानि मित्रवर्गं तथैव च । यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियं ॥
३२॥ निवार्यमाणः सुहृदा मया भृशं प्रसह्य सीतां यदि धर्षयिष्यसि ॥ गमिष्यसि क्षीणबलः सबान्धवो यमक्षयं रामशरात्तजीवि
तः ॥३२॥ ॥इत्यार्षे श्रीमद्रामायणे वा॰ आ॰ अष्टत्रिंशः सर्गः ॥३८॥ ॥एवमस्मि तदा मुक्तः कथंचित्तेन संयुगे ॥ इदानीमपि
यद्वृत्तं तच्छृणुष्व यदुत्तरं ॥१॥ राक्षसाभ्यामहं द्वाभ्यामनिर्विण्णस्तथाकृतः ॥ सहितो मृगरूपाभ्यां प्रविष्टो दंडकावने ॥२॥ दीप्तजिह्वो
महादंष्ट्रस्तीक्ष्णशृंगो महाबलः ॥ व्यचरं दंडकारण्ये मांसभक्षो महामृगः ॥३॥ अग्निहोत्रेषु तीर्थेषु चैत्यवृक्षेषु रावण ॥ अत्यन्तघो
रो व्यचरं तापसान्तान्प्रधर्षयन् ॥४॥ निहत्य दंडकारण्ये तापसान्धर्मचारिणः ॥ रुधिराणि पिबंस्तेषां तन्मांसानि च भक्षयन् ॥५॥
ऋषिमांसाशनः क्रूरस्त्रासयन्वनगोचरान् ॥ तदा रुधिरमत्तोहं व्यचरं दंडकावनं ॥६॥ तदाहं दंडकारण्ये विचरन्धर्मदूषकः ॥ आसाद
यं तदा रामं तापसं धर्ममाश्रितं ॥७॥ वैदेहीं च महाभागां लक्ष्मणं च महारथं ॥ तापसं नियताहारं सर्वभूतहिते रतं ॥८॥ सोहं वनगतं रा
मं परिभूय महाबलं ॥ तापसोयमिति ज्ञात्वा पूर्ववैरमनुस्मरन् ॥९॥ अभ्यधावं सुसंक्रुद्धस्तीक्ष्णशृंगो मृगाकृतिः ॥ जिघांसुरकृत
प्रज्ञस्तं प्रहारमनुस्मरन् ॥१०॥ तेन मुक्तास्त्रयो बाणाः शिताः शत्रुनिबर्हणाः ॥ विकृष्य सुमहच्चापं सुपर्णानिलतुल्यगाः ॥११॥

त्तरं तदाकर्ण्यासाध्यं न कुरुष्व अपि विनियावन ॥१॥ पूर्वं तथाकृतः प्राणसंकटं प्रापितोप्यहमनिर्विण्णः अप्राप्तनिर्वेदपुनर्वैरागः ताभ्यां मृगरूपाभ्यां सहि
तोहमपि मृगरूपः सन्प्रविष्ट इत्यन्वयः ॥२॥ तदेवाह दीप्तेति ॥२॥३॥४॥५॥ वनगोचरान् ऋषीन् अत्यन्तजीवान्वा ॥६॥ आसादयं प्राप्तवान् तापसं धर्मं तापससंबन्धि धर्ममा
श्रितं ॥७॥८॥९॥ अकृतप्रज्ञः अकृतविचारः तं प्रहारं पूर्वं रामदत्तप्रहारं ॥१०॥११॥

32

सन्नतपर्वणः अरीर्यन्तमार्थं ॥१२॥ शठो गूढविप्रियकारी दृष्टभयः रामादिति शेषः समुत्क्रान्तः पलायितः ॥१३॥ प्रव्राजितः परिव्राजितः कृतसकलदुःखनपरित्यागः प्र
क्रोधागाम्यासरतः अत एव तापसस्तपोनिष्ठः समाहितः स्थिरान्तःकरणः ॥१४॥१५॥१६॥ रहितेन रामरहितेपि वने उद्भ्रमामि भीतो भवामि इत्यवचेतनः सुषुप्तो नष्टचेतन
न्योपि पुनर्दर्शनवशात्स्वश्च चेतनः प्रलापामित्यर्थः ॥१७॥ रकारादीनीति एवं च साक्षाद्दर्शने पश्चात्त्रासः स च क्रमशः क्व इति भावः तन्नामैकदेशस्तत्रापि नाम भयज
नकं किं वक्तव्यं सम्पूर्णनाम्नो भयजनकत्वमिति स्याने हृषीकेशनवप्रकीर्त्या निगीनाश्लोकार्थात्त्रयः ॥१८॥ १९॥ तस्माद्रामेण रणे युध्यस्व एतदुचितं नतु

ते बाणा वज्रसंकाशाः सुघोरा रक्तभोजनाः ॥ आजग्मुः सहिताः सर्वे त्रयः सन्नतपर्वणः ॥१२॥ पराक्रमज्ञो रामस्य शठो दृष्टभयः पुरा ॥ समुत्क्रान्त
स्ततो मुक्तस्तावुभौ राक्षसौ हतौ ॥१३॥ शरेण मुक्तो रामस्य कथंचित्प्राप्य जीवितं ॥ इह प्रव्राजितो युक्तस्तापसोऽहं समाहितः ॥१४॥ वृक्षे वृक्षे
हि पश्यामि चीरकृष्णाजिनाम्बरं ॥ गृहीतधनुषं रामं पाशहस्तमिवान्तकं ॥१५॥ अपि रामसहस्राणि भीतः पश्यामि रावण ॥ रामभूतमिदं
सर्वमरण्यं प्रतिभाति मे ॥१६॥ राममेव हि पश्यामि रहिते राक्षसेश्वर ॥ दृष्ट्वा स्वप्नगतं राममुद्भ्रमामि विचेतनः ॥१७॥ रकारादीनि नामा
नि रामत्रस्तस्य रावण ॥ रत्नानि च रथाश्चैव वित्रासं जनयन्ति मे ॥१८॥ अहं तस्य प्रभावज्ञो न युद्धं तेन ते क्षमं ॥ बलिं वा नमुचिं वापि हन्याद्धि रघु
नंदनः ॥१९॥ रणे रामेण युध्यस्व क्षमां वा कुरु रावण ॥ न ते रामकथा कार्या यदि मां द्रष्टुमिच्छसि ॥२०॥ बहवः साधवो लोके युक्ता धर्ममनुष्ठिताः
परेषामपराधेन विनष्टाः सपरिच्छदाः ॥२१॥ सोऽहं परापराधेन विनशेयं निशाचर ॥ कृतं यत्ते क्षमं तत्त्वमहं त्वां नानुयामि वै ॥२२॥ रामश्च हि
महातेजा महासत्त्वो महाबलः ॥ अपि राक्षसलोकस्य भवेदन्तकरोऽपि हि ॥२३॥ ॥७॥ ॥७॥ ॥७॥

नदारापहारउचितः सर्वकुलनाशकत्वात् युद्धे एकस्यैव नाशादिति भावः सुखापेक्षमाह क्षमां वेति यदि मां जीवन्तं द्रष्टुमिच्छसि तदा रामकथा न कार्या तत्कथा
यारक्षस्तेजोपहारकत्वादुभयोरपि तेजोनाशे मरणादप्यधिकादुःखस्थितिभावः ॥२०॥ साधवः अकृतपरापवादाः युक्ता योगवन्तः अनुष्ठिता इति कर्तरि निष्ठा ॥२१॥ प
रापराधेन नवापराधेनेत्यर्थः विनशेयं विनशिष्यामि अतो हे राक्षसपते क्षमंरणाः क्षमावान्त्वमेव कुरु अहं तु त्वां नानुयामि त्वद्बुद्धिं नानुगच्छामीत्यर्थः ॥२२॥ नन्वहेतु
माह रामश्च हीति तेजः पराक्रमः सत्त्वं बुद्धिबलं बलं शारीरं हि यतो महातेजस्त्वादिगुणैः रामः प्रसिद्धोऽत एव ईदृशो रामः राक्षसलोकस्यान्तकरः हि निश्चयेन भवे
दिति अपि संभावने आनुयामि त्वद्बुद्धिं सकलराक्षसकुलनाशभियेति भावः ॥२३॥

खरादिनाशस्यतत्कृतान्याय्यमूलत्वात् तत्क्षमेवयुक्तमित्याह यदीति सीताहरणप्रयत्नदोषविरूपितशूर्पणखाहेतोरनिवृत्तस्तूष्णीमवस्थितेनरामेणयदिशूर्पण
खावाक्यजनितरोषात्खरप्रयोक्तृगतोरामेणहतस्तदाकोरामस्यव्यतिक्रमोऽन्याय्यत्वमेवब्रूहि ॥२४॥ सिद्धान्तमाह इदमिति यथोच्यमानंपरमार्थेनउच्यमानंयदिना
भिपत्स्यसे नाङ्गीकरिष्यसि तदारणेहतःसबान्धवस्त्वंजीवितंत्यक्ष्यसि इतिमयाजयेयनिश्चीयते ॥२५॥ ॥इतिरामाभिरामेआरण्यकाण्डेएकोनचत्वारिंशःसर्गः ॥३९॥
मारीचस्यमारीचेनक्षमंनिवृत्तिसमर्थंयुक्तंन्याय्यंकालोचितंचवाक्यमुक्तःउपदिष्टोरावणोमुमूर्षुरौषधमिवनउक्तंनप्रतिजग्राह ॥१॥ ॥२॥ शत्रोर्मानुषस्यालावकत्वात्रौ

यदिशूर्पणखाहेतोर्जनस्थानगतःखरः ॥ अतिवृत्तोहतःपूर्वंरामेणाक्लिष्टकर्मणा ॥२४॥ अत्रब्रूहियथातत्त्वंकोरामस्यव्यतिक्रमः ॥२४॥ इ
दंवचोबन्धुहितार्थिनामयायथोच्यमानंयदिनाभिपत्स्यसे ॥ सबान्धवस्त्यक्ष्यसिजीवितंरणेहतोद्यरामस्यशरैरजिह्मगैः ॥२५॥ इत्यार्षे
श्रीमद्रामायणेआरण्यकाण्डेएकोनचत्वारिंशःसर्गः ॥३९॥ ॥मारीचस्यतुतद्वाक्यंक्षमंयुक्तंचरावणः ॥ उक्तोनप्रतिजग्राहमर्तुकामइवौ
षधं ॥१॥ तंपथ्यहितवक्तारंमारीचंराक्षसाधिपः ॥ अब्रवीत्परुषंवाक्यमयुक्तंकालचोदितः ॥२॥ दुष्कुलैतदयुक्तार्थंमारीचमयिकथ्यते ॥ वा
क्यंनिष्फलमत्यर्थंबीजमुप्तमिवोषरे ॥३॥ त्वद्वाक्यैर्नतुमांशक्यंभेत्तुंरामस्यसंयुगे ॥ मूर्खस्यपापशीलस्यविशेषतः ॥४॥ यस्त्यक्त्वासुहृदोरा
ज्यंमातरंपितरंतथा ॥ स्त्रीवाक्यंप्राकृतंश्रुत्वावनमेकपदेगतः ॥५॥ अवश्यंतुमयातस्यसंयुगेखरघातिनः ॥ प्राणैःप्रियतरासीताहर्तव्या
तवसन्निधौ ॥६॥ एवंमेनिश्चिताबुद्धिर्हृदिमारीचविद्यते ॥ नव्यावर्तयितुंशक्यासेन्द्रैरपिसुरासुरैः ॥७॥ दोषंगुणंवासंपृष्टस्त्वमेवं
वक्तुमर्हसि ॥ अपायंवाउपायंवाकार्यस्यास्यविनिश्चये ॥८॥ ॥७॥ ॥७॥ ॥श्रीरामायनमः॥७॥

33.

मानुषस्य ४

धेनाह दुष्कुलेति अयुक्तार्थंराजविद्वत्प्रतिकूलत्वादयुक्तार्थंनिष्फलंतन्मांगुणाक्रान्तेममहृदयेतस्यानवकाशात् ॥३॥ संयुगेपापशीलत्वाद्गुणकस्यस्त्रीनारकोऽहंत्वा
त् रामस्यभार्याहरणविषयेस्थितंमांत्वद्वाक्यैर्भेत्तुंनिवर्तयितुंनशक्यमित्यर्थः मामिति द्वितीयाछान्दसत्वात् ॥४॥ तत्रमूर्खत्वमुपपादयति यइति प्राकृतमसारं स्त्रीकै
केयीएकपदेझटिति ॥५॥ संयुगेखरहन्तुरित्यन्वयः ॥६॥ ॥७॥ अपिचाहंत्वयानत्वप्रलापस्त्वयासंगतइत्याह दोषंगुणंवेति कस्यचित्संदिग्धस्यकार्यस्यनिश्चयेनिश्चयसिद्ध्यर्थं
मन्त्रानुष्ठिनेकोगुणःकोदोषःकउपायःकोऽपायइति यदिपृष्टस्तदाएवंवक्तुमर्हसि गुणदोषादिकमित्यर्थः मयातुनिश्चितेकार्येकेवलंसाहाय्यंनियुज्यसे

नानेनेत्यक्षःस्यात्सइतिभावः ॥६॥

पृष्टोजगमेवराज्ञानिसचिवेनविनीतेनवाच्यमित्याह· संप्रष्टेनत्विति· उद्यतांजलिनेत्यनेनविनीतेननादर्शिनाउपचारेणराजनीत्युक्तमार्गेणयुक्तं ॥१०॥ सावमर्दंतुराज
एष्यावमर्दसहितं अथवायद्यप्यर्थेयद्यपिहितंतथापिनाभिनंदेत त्वंत्वपृष्ठएवममाहितममवमर्दसहितंमानहीनंवदसीत्यनुचितमितिभावः ॥११॥ ततोवक्तुरनिष्ट
मपीत्याहपंचेति केपंचेत्यत्राह अग्नेरिति ॥१२॥ कानितद्रूपाणितत्राह क्रमेणओष्ण्यमिति ओष्ण्यंतेक्ष्ण्यंसौम्यंदयार्द्रचित्तत्वंदंडंदुष्टनिग्रहं एवंचतादृशेवक्तरिती

संप्रष्टेनतुवक्तव्यंसचिवेनविपश्चिता ॥ उद्यतांजलिनाराज्ञोयइछेद्भूतिमात्मनः ॥९॥ वाक्यमप्रतिकूलंतुमृदुपूर्वंशुभंहितं ॥ उपचारेण
वक्तव्योयुक्तंचवसुधाधिपः ॥१०॥ सावमर्दंतुयद्वाक्यमथवाहितमुच्यते ॥ नाभिनंदेततद्राजामानार्थीमानवर्जितं ॥११॥ पंचरूपाणिरा
जानोधारयंत्यमितौजसः ॥ अग्नेरिंद्रस्यसोमस्ययमस्यवरुणस्यच ॥१२॥ औष्ण्यंतथाविक्रमंचसौम्यंदंडंप्रसन्नतां ॥ धारयंतिमहात्मा
नोराजानःक्षणदाचर ॥१३॥ तस्मात्सर्वास्ववस्थासुमान्याःपूज्याश्चनित्यदा ॥ त्वंतुधर्ममविज्ञायकेवलंमोहमास्थितः ॥१४॥ अभ्याग
तंतुदौरात्म्यात्परुषंवदसीदृशं ॥ गुणदोषौनपृछामिक्षमंचात्मनिराक्षस ॥१५॥ मयोक्तमपिचैतावत्त्वांप्रत्यमितविक्रम ॥ अस्मिंस्तुस
भवान्कृत्येसाहाय्यंकर्तुमर्हसि ॥१६॥ शृणुतत्कर्मसाहाय्येयत्कार्यंवचनान्मम ॥ सौवर्णस्त्वंमृगोभूत्वाचित्रोरजतविंदुभिः ॥१७॥ आ
श्रमेतस्यरामस्यसीतायाःप्रमुखेचर ॥ प्रलोभयित्वावैदेहींयथेष्टंगंतुमर्हसि ॥१८॥ त्वांहिमायामयंदृष्ट्वाकांचनंजातविस्मया ॥ आ
नयैनमितिक्षिप्रंरामंवक्ष्यतिमैथिली ॥१९॥ अपक्रांतेचकाकुत्स्थेदूरंगत्वाप्युदाहर ॥ हासीतेलक्ष्मणेत्येवंरामवाक्यानुरूपकं ॥२०॥
तच्छ्रुत्वारामपदवींसीतयाचप्रचोदितः ॥ अनुगच्छतिसंभ्रांतंसौमित्रिरपिसौहृदात् ॥२१॥ अपक्रांतेचकाकुत्स्थेलक्ष्मणेचयथासुखं
आहरिष्यामिवैदेहींसहस्राक्षःशचीमिव ॥ एवंकृत्वात्विदंकार्यंयथेष्टंगच्छराक्षस ॥ राज्यस्यार्धंप्रदास्यामिमारीचतवसुव्रत ॥२२॥

क्षणदंडयानइत्याशयः ॥१३॥ धर्मंराजधर्मं ॥१४॥ अभ्यागतमतिथिमित्यनेनपूज्यत्वातिशयंसूचयति· गुणदोषप्रश्ने किंममहितमितिप्रश्नेवाईदृशंवक्तुंयुक्तंनचैतदे
कमपिमयापृष्ठमितिभावः ॥१५॥ अपिचअपितुमयात्वांप्रतिएतावदेवोक्तंकिंतत्राह अस्मिंसीतापहाररूपेकृत्येसभवान्मयानियुक्तःसाहाय्यंकर्तुमर्हसीति ॥१६॥
किंतत्कर्तव्यंसाहाय्यंतत्राह शृणिवति साहाय्येममवचनाद्यत्कार्यंतत्कर्मशृणुइतिसंबंधः ॥१७॥ ॥१८॥ ॥१९॥ रामवाक्यानुरूपकंरामध्वनिसदृशध्वनियुक्तं ॥२०॥

॥२१॥२२॥२३॥

शिवं मार्गं गच्छ सौम्य मा भूत्वा प्रस्थितो भवेत्यर्थः। किंतु शिवं मनोहरं मार्गं मद्गृहं गच्छ प्राप्नुहि ।।२४।।२५।। अथ राजन्वान्त्ववाक्याकरणे दंडमाह नो चेदिति मद्वचनाननुष्ठाने मरण
मेवाननुष्ठाने तु जीवनं मत्तो वसुधनादिप्राप्तिश्च एवं प्रार्थनयाः करणे बलान्मद्बले हेतुकमरणभयात्त्वं च करिष्यस्येव ।।२६।। रामात्प्रायद्वये इव कदाचिज्जीवनसंभावन स्
वमद्वचनाकरणे तु सर्वथा यमत्सुरेवेत्याह आसाद्येति नं रामं संशयानतु नाशनिश्चयः एतन्मदुक्तवचनं ।।२७।। ।।इति रामाभिरामे॰ आरण्यकांडे चत्वारिंशः सर्गः ।।४०।।

गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवृद्धये ।। अहं त्वानुगमिष्यामि सरथो दंडकावनं ।।२४।। प्राप्य सीतामयुद्धेन वंचयित्वा तु राघवं ।। लंका
प्रतिगमिष्यामि कृतकार्यः सह त्वया ।।२५।। नो चेत्करोषि मारीच हन्मि त्वामहमद्य वै ।। एतत्कार्यमवश्यं मे बलादपि करिष्यसि ।।२६।। रा
ज्ञो न प्रतिकूलस्थो न जातु सुखमेधते ।।२६।। आसाद्य तं जीवितसंशयस्ते मृत्युर्ध्रुवो ह्यद्य मया विरुध्यतः ।। एतद्यथावत्परिगण्य बुद्ध्या
यदत्र पथ्यं कुरु तत्तथा त्वं ।।२७।। ।।इत्यार्षे श्रीमद्रामायणे वा॰ आरण्यकांडे चत्वारिंशः सर्गः ।।४०।। ।।आज्ञप्तो रावणेने
त्थं प्रतिकूलं च राजवत् ।। अब्रवीत्परुषं वाक्यं निःशंको राक्षसाधिपम् ।।१।। केनायमुपदिष्टस्ते विनाशः पापकर्मणा ।। सपुत्रस्य सरा
ज्यस्य सामात्यस्य निशाचर ।।२।। कस्त्वया सुखिना राजन्नाभिनंदति पापकृत् ।। केनेदमुपदिष्टं ते मृत्युद्वारमुपायतः ।।३।। शत्रवस्तव सु
व्यक्तं हीनवीर्या निशाचर ।। इच्छंति त्वां विनश्यंतमुपरुद्धं बलीयसा ।।४।। केनेदमुपदिष्टं ते क्षुद्रेणाहितबुद्धिना ।। यस्त्वामिच्छति नश्यंतं
स्वकृतेन निशाचर ।।५।। वध्याः खलु न वध्यंते सचिवास्तव रावण ।। ये त्वामुत्पथमारूढं न निगृह्णंति सर्वशः ।।६।।

राजवत् राजयोग्यं रावणेनाज्ञप्तः रामलक्ष्मणप्रतारणरूपं कार्यं प्रतिकूलं अन्यथा वधं करिष्यामीत्येवं प्रतिकूलवाक्यसहितं यथा तथाज्ञप्तो मन्त्रो निःशंको मारीचः परुषं शब्द
नोपेक्ष्य वाक्यमब्रवीत् ।।१।। विनाशः [illegible] विनाशोपायः ।।२।। सुखिना त्वया सह त्वस्थानभिनिवेशः को नाभिनंदति केन पापकृता उपायतः उपायव्याजेन ।।३।। तथोपदेष्टारस्त
नो हीनवीर्यास्तव शत्रवः ये त्वां त्वत्तो बलवत्तरेण शत्रुणोपरुद्धं विनश्यंतं द्रष्टुमिच्छंति ।।४।। स्वकृतेन स्वनिमित्तविनाशोपायेन ।।५।। ये त्वामेवं कुपथमारूढं न विगृह्णंति न वा
यंतीति अमात्यास्ते वध्या वधयोग्याः कुतस्त्वया न वध्यंत इत्यर्थः ।।६।। ।।८।। ।।७।।

नचनीतिशास्त्रमाह अमात्यैरिति॥७॥ अनतैरेवमनुष्ठेयं नत्राह धर्ममिति॥८॥ विपर्यये स्वामिवैगुण्ये न त्वन केवलं तेषामेव व्यसनप्राप्तिः किंतु सर्वजनानां नराह इतो
ज्ञनाइनि अपीनिशेषः॥९॥१०॥ तीक्ष्णेन क्रूरदंडेन प्रतिकूलेन स्वप्रकृतीनामिति शेषः॥११॥ तीक्ष्णमंत्राः तीक्ष्णोपायप्रयोक्ताः तेन तन्मंत्रग्राहिणा राज्ञा सह भुज्यते स्व
संमतयास्थापने मंदोमंदबुद्धिः सारथिर्येषां ते रथा यथा विषमे सारथिभिः सह नश्यंति तथा ते राजानो मंत्रिभिः सह नश्यंति॥१२॥ युक्तधर्ममनुष्ठिताः युक्तधर्मानुष्ठानाः स
धवो नीतिमार्गनिष्ठाः सपरिछदः [redacted] सपरिजनाः॥१३॥ तीक्ष्णदंडेन प्रजानां प्रतिकूलेन रक्ष्यमाणाः प्रजा न वर्धंते गोमायुना मृगयानकजीवेन रक्ष्यमाणा मृ

अमात्यैः कामवृत्तो हि राजा कापथमाश्रितः॥ निग्राह्यः सर्वथा सद्भिः स निग्राह्यो न गृह्यसे॥७॥ धर्ममर्थं च कामं च यशश्च जयतां
वर॥ स्वामिप्रसादात्सचिवाः प्राप्नुवंति निशाचर॥८॥ विपर्यये तु तत्सर्वं व्यर्थं भवति रावण॥ व्यसनं स्वामिवैगुण्यात्प्राप्नुवंतीतरे
जनाः॥९॥ राजमूलो हि धर्मश्च यशश्च जयतां वर॥ तस्मात्सर्वास्ववस्थासु रक्षितव्यो नराधिपः॥१०॥ राज्यं पालयितुं शक्यं न तीक्ष्णेन न
निशाचर॥ न चाति प्रतिकूलेन नाविनीतेन राक्षस॥११॥ ये तीक्ष्णमंत्राः सचिवा भुज्यंते सह तेन वै॥ विषमे तुरगाः शीघ्रं मंद
सारथयो यथा॥१२॥ बहवः साधवो लोके युक्तधर्ममनुष्ठिताः॥ परेषामपराधेन विनष्टाः सपरिछदाः॥१३॥ स्वामिना प्रतिकूलेन प्र
जास्तीक्ष्णेन रावण॥ रक्ष्यमाणा न वर्धंते मृगा गोमायुना यथा॥१४॥ अवश्यं विनशिष्यंति सर्वे रावण राक्षसाः॥ येषां त्वं कर्कशो राजा
दुर्बुद्धिरजितेंद्रियः॥१५॥ नरिदं काकतालीयं घोरमासादितं मया॥ अत्र त्वं शोचनीयोसि ससैन्यो विनशिष्यसि॥१६॥ मां निह
त्यतु रामोसावचिरात्त्वां वधिष्यति॥ अनेन कृतकृत्योस्मि म्रिये चाप्यरिणा हतः॥१७॥

गाइव॥१४॥ कर्कशः क्रूरबुद्धिः कठिनश्च॥१५॥ नरिदं त्वत्तो मरणरूपं घोरं काकतालीयमाकस्मिकं मयासादितं यद्यपि तथापि न तु तेन मया शोकः क्रियते जातस्य
हि ध्रुवो मृत्युरिति न्यायात् तथापि त्वं ससैन्यो विनशिष्यसि यन्नयत्राथे त्वं मया शोचनीयोसि॥१६॥ ननु मम मरणं कथं निश्चितं तत्राह मामिति मां निहत्य रामस्त्वां सब
धवमचिराद्वधिष्यति तस्मादुभयथापि मरणं निश्चितं त्वत्तो वा रामाद्वा तत्रानेन वधेन कृतकृत्योस्मि यत मध्ये रणेऽरिणा हतो म्रियेय राजतो बलान्मरणापेक्षया रणेश
त्रुतो मृत्योः स्वर्गदत्वात् आयमत्योरपमृत्युत्वेन दुर्मरणत्वेन शास्त्रेउक्तेः राज्ञा मारितस्य शोचोदकदानाद्यभावश्रवणात् रामतो मरणेन कृतकृत्योहमिति वा यद्वेद
शंज्ञानं चास्य तपसा गेन च प्रवृद्धचिन्नत्वादिति बोध्यं॥१७॥

॥रा॰बा॰मा॥
॥५२॥

आत्मानंरावणंसबांधवमात्मानमित्यन्वयः॥१८॥कदाचिद्यदिमयाजीवतासहैवसीतांमानयिष्यसितदापश्चादपिसर्ववधोनिश्चितइत्यर्थः॥१९॥नमृष्यसेप्रतिकूलत्वद्ध्यान्न
परिरक्षितासीत्यर्थः।परेतकल्पाःमृतप्रायाः॥२०॥ इतिश्री॰आरण्यकाण्डेएकचत्वारिंशःसर्गः॥४१॥ ॥रात्रिंचरप्रभोःरावणाद्युद्धंयंअशुभैवनियममरणरूपंतस्माद्ग
च्छावेत्यब्रवीत्त्वमहंचेत्यर्थः॥१॥यावदन्तेवनिजन्तुःखमभ्याह दृष्टश्चाहमितिपुनःयदायतेनदृष्टोक्षविध्यामितदोचमानविशेषणेनरामेणजीवितेनिहननमेवचका

दर्शनादेवरामस्यहतंमामवधारय॥आत्मानंचहतंविद्धिहत्वासीतांसबांधवं॥१८॥आनयिष्यसिचेत्सीतामाश्रमात्सहितोमया।
नैवत्वमपिनाहंवैनैवलंकानराक्षसाः॥१९॥निवार्यमाणस्तुमयाहितैषिणानमृष्यसेवाक्यमिदंनिशाचर॥परेतकल्पाहिगतायुषोनरा
हितंनगृह्णन्तिसुहृद्भिरीरितं॥२०॥ इत्यार्षेश्रीमद्रामायणेआरण्यकाण्डेएकचत्वारिंशःसर्गः॥४१॥ ॥एवमुक्त्वातुपरुषंमा
रीचोरावणंततः॥गच्छावेत्यब्रवीद्दीनोभयाद्रात्रिंचरप्रभोः॥१॥दृष्टश्चाहंपुनस्तेनशरचापासिधारिणा॥मद्वधोद्यतशस्त्रेणनिहतंजीवि
तंचमे॥२॥नहिरामंपराक्रम्यजीवन्प्रतिनिवर्तते॥वर्ततेप्रतिरूपोसौयमदण्डहतस्यते॥३॥किन्नुकर्तुंमयाशक्यमेवंत्वयिदुरात्मनि
एषगच्छाम्यहंतातस्वस्तितेस्तुनिशाचर॥४॥प्रहृष्टस्त्वभवत्तेनवचनेनसराक्षसः॥परिष्वज्यसुसंश्लिष्टमिदंवचनमब्रवीत्॥५॥एत
च्छौंडीर्ययुक्तंतेमच्छंदवशवर्तिनः॥इदानीमसिमारीचःपूर्वमन्योहिराक्षसः॥६॥आरुह्यतामयंशीघ्रंखगोरत्नविभूषितः॥मयासह
रथोयुक्तःपिशाचवदनैःखरैः॥७॥प्रलोभयित्वावैदेहींयथेष्टंगन्तुमर्हसि॥तांशून्येप्रसभंसीतामानयिष्यामिमैथिलीम्॥८॥ततस्त
थेत्युवाचैनंरावणंताटकासुतः॥ततोरावणमारीचौविमानमिवतंरथं॥९॥ ॥७॥ ॥७॥ ॥७॥

35

नर
रान्तरंचजीवितंनष्टं॥२॥यमदंडहतस्यते।सोरामःप्रतिरूपोयमदंडप्रतिरूपोवर्तते॥३॥अथाशक्यंपरिहारमनर्थंशोचतिकिंत्विति॥४॥तेनवचनेनगच्छामीतिवचनेनसुसं
श्लिष्टंगाढं॥५॥मच्छंदवशवर्तिनः[redacted]मदभिप्रायवशवर्तिनः।शौंडीर्यंवीर्ययुक्तंएतद्वचोयोग्यमितिशेषः।इदानींमारीचोसिस्वप्रकृतिंप्राप्तोसिपूर्वम
न्योहिराक्षसस्तदाविष्टइतिशेषः॥६॥खगःआकाशगामीरथः॥७॥शून्येरामलक्ष्मणरहितेसमये॥८॥ ॥२॥ ॥७॥

॥राम॥
॥५२॥

आश्रमंमंडलादित्यर्थः पत्तननगरयोराजधानीत्वेनभेदः पत्तनशब्दोऽर्धर्चादिः ॥१०॥११॥१२॥१३॥१४॥ १५॥ मणिप्रवरशृंगाग्रः इंद्रनीलरत्नकारशृंगाग्रः मणिशब्दः
केवलइंद्रनीलेइतिकविसमयप्रसिद्धिकनकः क्वचित्सिताः क्वचिदसितामुखस्याकृतिशोभायस्यसः परेवाह रक्तपद्मोत्पलेति उत्पलंनीलोत्पलं इंद्रनीलवदुत्पलवत्श्रवः
श्रवणायस्यसः ॥१६॥ मधुकपुष्पसदृशपार्श्वद्वयः कंजपद्मतत्किंजल्कसदृशवर्णाः ॥१७॥ सुसंहतः स्निग्धसंधिबंधः ॥१८॥१९॥ प्रज्वलयन्प्रदीप्तयन् ॥२०॥ शाड्वलानिवि

भाकृस्याययतुःशीघ्रंतस्मादाश्रममंडलात् ॥ तथैवतत्रपश्यन्तौपत्तनानिवनानिच ॥१०॥ गीरींश्चसरितःसर्वाराष्ट्राणिनगराणिच ॥ स
मेत्यदंडकारण्यंराघवस्याश्रमंततः ॥११॥ ददर्शसहमारीचोरावणोराक्षसाधिपः ॥ अवतीर्यरथात्तस्मात्ततःकांचनभूषणात् ॥१२॥
हस्तेगृहीत्वामारीचंरावणोवाक्यमब्रवीत् ॥ एतद्रामाश्रमपदंदृश्यतेकदलीवृतं ॥१३॥ क्रियतांतत्सखेशीघ्रंयदर्थंवयमागताः ॥ स
रावणवचःश्रुत्वामारीचोराक्षसस्तदा ॥१४॥ मृगोभूत्वाश्रमद्वारिरामस्यविचचारह ॥ सतुरूपंसमास्थायमहदद्भुतदर्शनम् ॥१५॥ म
णिप्रवरशृंगाग्रःसितासितमुखाकृतिः ॥ रक्तपद्मोत्पलमुखइंद्रनीलोत्पलश्रवाः ॥१६॥ किंचिदभ्युन्नतग्रीवइंद्रनीलनिभोदरः ॥ मधू
कनिभपार्श्वश्चकंजकिंजल्कसन्निभः ॥१७॥ वैडूर्यसंकाशखुरस्तनुजंघसुसंहतः ॥ इंद्रायुधसवर्णेनपुच्छेनोर्ध्वंविराजितः ॥१८॥ म
नोहरस्निग्धवर्णोरत्नैर्नानाविधैर्वृतः ॥ क्षणेनराक्षसोजातोमृगःपरमशोभनः ॥१९॥ वनंप्रज्वलयन्रम्यंरामाश्रमपदंचतत् ॥ मनोह
रंदर्शनीयरूपंकृत्वासराक्षसः ॥२०॥ प्रलोभनार्थंवैदेह्यानानाधातुविचित्रितः ॥ विचरन्गच्छतेशष्पशाड्वलानिसमंततः ॥२१॥ रौप्य
बिंदुशतैश्चित्रोभूत्वाचप्रियदर्शनः ॥ विटपीनांकिसलयान्भक्षयन्विचचारह ॥२२॥ कदलीगृहकंगत्वाकर्णिकारानितस्ततः ॥ समा
श्रयन्मंदगतिःसीतासंदर्शनंततः ॥२३॥ राजीवचित्रपृष्ठःसविरराजमहामृगः ॥ रामाश्रमपदाभ्याशेविचचारयथासुखं ॥२४॥ पुनर्ग
त्वानिवृत्तश्चविचचारमृगोत्तमः ॥ गत्वामुहूर्तंत्वरयापुनःप्रतिनिवर्तते ॥२५॥ विक्रीडंश्चपुनर्भूमौपुनरेवनिषीदति ॥ आश्रमद्वार
मागम्यमृगयूथानिगच्छति ॥२६॥

रन्भक्षयन्गच्छति ॥२१॥ चित्रमितिक्रियाविशेषणं विटपीनामितिदीर्घ आर्षश्छंदोनुरोधात्मक्कारस्त्वितिपाठे आर्षअनुनासिकलोपः ॥२२॥ कदलीगृहंकदलीवा
टिकांकर्णिकारानितस्ततश्चगत्वात्यक्तासीतासंदर्शनमपेक्षेतेस्ततोमंदगतिसमाश्रयन् विचचारविरराजच ॥२३॥२४॥२५॥ मृगयूथानिगच्छति नत्यक्तोगच्छतीत्यर्थः ॥२६॥

॥२७॥ विनिष्पतन् प्रागल्भ्येन कुर्वन्नित्यर्थः ॥२८॥ विद्रवंति अमृगत्वनिश्चयादिति शेषः ॥२९॥ मृगवधे रतोपि भावस्य राक्षसस्य संछादनार्थं संस्पृशन्नपि मृगान्न भक्षयति ॥३०॥ अथ च योग्रहणं अशोककरवीरकुसुमानामपचयोर्थ्या शिशिरान्तकालोयं गंधवान् सुरभिमासो जातः पुष्पफलवृक्षः इति सेनायपनिषेधोमित्रं करप्तैव वनानि लइति चपणानीरंमोक्ष्य किंचायंशरद्वारशमासो नंरंयंशासांगीकरणमिति मदनोहन्मी निरावरणा प्रतिज्ञा· ततो हनुमद्दर्शनकाले चत्रप्रति सीतावाक्यवर्तनं दशाशोमा

मृगयूथैरनुगतः पुनरेव निवर्तते ॥ सीतादर्शनमाकांक्षन्राक्षसो मृगतां गतः ॥२७॥ परिभ्रमति चित्राणि मंडलानि विनिष्पतन् ॥ समुद्वीक्ष्य च सर्वे तं मृगा येन्ये वनेचराः ॥२८॥ उपगम्य समाघ्राय विद्रवंति दिशो दश ॥ राक्षसः सोपि तान्वन्यान्मृगान्मृगवधे रतः ॥२९॥ प्रच्छादनार्थं भावस्य न भक्षयति संस्पृशन् ॥ तस्मिन्नेव ततः काले वैदेही शुभलोचना ॥३०॥ कुसुमापचये व्यग्रा पादपानत्यवर्तत ॥ कर्णिकारानशोकांश्च चूतांश्च मदिरेक्षणा ॥३१॥ कुसुमान्यपचिन्वंती चचार रुचिरानना ॥ अनर्हारण्यवासस्य सा तं रत्नमयं मृगं ॥३२॥ मुक्तामणिविचित्रांगं ददर्श परमांगना ॥ तं वै रुचिरदंतोष्ठं रूप्यधातुतनूरुहं ॥३३॥ विस्मयात्प्रफुल्लनयना स[illegible]स्नेहं समुदैक्षत ॥ स च तां रामदयितां पश्यन्मायामयो मृगः ॥३४॥ विचचार ततस्तत्र दीपयन्निव तद्वनं ॥ अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगं ॥ विस्मयं परमं सीता जगाम जनकात्मजा ॥३५॥

॥ ॥इत्यार्षे श्रीमद्रामायणे आर० द्विचत्वारिंशः सर्गः ॥४२॥

॥सा तं संप्रेक्ष्य सुश्रोणी कुसुमानि विचिन्वती ॥ हेमराजतवर्णाभ्यां पार्श्वाभ्यामुपशोभितं ॥१॥ प्रहृष्टा चानवद्यांगी मृष्टहाटकवर्णिनी ॥ भर्तारमपि चक्रंद लक्ष्मणं चैव सायुधं ॥२॥ आहूयाहूय च पुनस्तं मृगं साधु वीक्षते ॥ आगच्छागच्छ शीघ्रं वै आर्यपुत्र सहानुज ॥३॥ ॥७॥ ॥७॥ श्रीरामायनमः ॥७॥

सोऽध्येतुं शक्योऽग्रं वंगमे निसंगच्छते मायेप्युक्तास्त्यां हरणेहि· मार्गमुक्ताक्ष्यानतो वीगे ववारशमसमाघ्रानस्य वर्तमानत्वोक्तिरसंगनैव स्यात्· न च्युत्कपक्षांते हनूमतल्लद्र्शनात् ॥३१॥ अनर्हवनवासस्येत्यनेन नगरवासः सूचितः ॥३२॥ रूप्यरजतं धातवो गैरिकाद्यास्तन्मयतनूरोमयुक्तं ॥३३॥ ३४॥ ३५॥ ॥इति रामाभिरामे श्रीरा० आर० द्विचत्वारिंशः सर्गः ॥४२॥ सातमिति ॥१॥ मृष्टहाटकं शुद्धहेमतत्सदृशवर्णा चक्रंद आह्वानं कृतवती चक्रंदेति रोदनार्थेन भावप्रसज्यपि सूचितं कविना ॥१॥२॥ ॥७॥

36

नावाहृतोसीतयेतिशेषः ॥४॥५॥ मृगयांचरैनःनोकुर्वनः उपाधिनामृगरूपछलेन ॥६॥ अस्यमायाविदोमायायाभूतासामृगरूपमिदंकृतंमायैवमृगरूपेणपरिणतेत्यर्थः मा
नुमन्तुकाशपुनगन्धर्वपुरवदापानरमणीयं ॥७॥ नास्त्येवमुपादानकमृगासंभवात् ॥८॥ काकुत्स्थलक्ष्मणाग्रनिवारयनायराक्षसोपितुचित्रमृगोनेननग्रहणविभ्रमस्त्वयाका
यहत्युक्तोनार्थः छद्मनावंचनेनहननचेननासेव ॥९॥ नोस्माकंअयोध्यागमनोत्तरं नत्वन्यस्यत्वभिप्रायेणवक्रुवचनं ॥१०॥ समास्त्वमरोकल्पभुक्पृष्ठौ ॥११॥ १२॥ अन्यःसदृशः

नावाहृतोनरव्याघ्रौवैदेह्यारामलक्ष्मणौ ॥ वीक्ष्यमाणौतुतंदेशंतदाददृशतुर्मृगं ॥४॥ शंकमानस्तुतंदृष्ट्वालक्ष्मणोवाक्यमब्रवीत्
तमेवैनमहंमन्येमारीचंराक्षसंमृग ॥५॥ चरंतोमृगयांहृष्टाःपापेनोपाधिनावने ॥ अनेननिहतारामराजानःपापरूपिणा ॥६॥ अ
स्यमायाविदोमायामृगरूपमिदंकृतं ॥ भानुमत्पुरुषव्याघ्रगंधर्वपुरसन्निभं ॥७॥ मृगोह्येवंविधोरत्नविचित्रोनास्तिराघव ॥ जग
त्यांजगतीनाथमायैषाहिनसंशयः ॥८॥ एवंब्रुवाणंकाकुत्स्थंप्रतिवार्यशुचिस्मिता ॥ उवाचसीतासंहृष्टाछद्मनाहृतचेतना ॥९॥
आर्यपुत्राभिरामोसौमृगोहरतिमेमनः ॥ आनयैनंमहाबाहोक्रीडार्थंनोभविष्यति ॥१०॥ इहाश्रमपदेस्माकंबहवःपुण्यदर्शनाः ॥ मृ
गाश्चरंतिसहिताश्चमराःसृमरास्तथा ॥११॥ ऋक्षाःपृषतसंघाश्चवानराःकिन्नरास्तथा ॥ विहरंतिमहाबाहोरूपश्रेष्ठामहाबलाः ॥१२॥
नचान्यःसदृशोराजन्दृष्टःपूर्वंमृगोमया ॥ तेजसाक्षमयादीप्त्यायथायंमृगसत्तमः ॥१३॥ नानावर्णविचित्राङ्गोरत्नभूतोममाग्रतः ॥ द्यो
तयन्वनमव्यग्रंद्योततेशशिसन्निभः ॥१४॥ अहोरूपमहोलक्ष्मीःस्वरसंपच्चशोभना मृगोद्भुतोविचित्राङ्गोहृदयंहरतीवमे ॥१५॥ यदि
ग्रहणमभ्येतिजीवन्नेवमृगस्तव ॥ आश्चर्यभूतंभवतिविस्मयंजनयिष्यति ॥१६॥ समाप्तवनवासानांराज्यस्थानांचनःपुनः ॥ अंतःपुरेवि
भूषार्थोमृगएषभविष्यति ॥१७॥ भरतस्यार्यपुत्रस्यश्वश्रूणांममचप्रभो ॥ मृगरूपमिदंदिव्यंविस्मयंजनयिष्यति ॥१८॥ ॥७॥

एतत्सदृशोन्यइत्यर्थः तेजसाविचित्रगतिसामर्थ्येन क्षमयासौम्यभावेन दीप्त्यादेहकान्त्या ॥१३॥ शशिसन्निभत्वेनाह्लादकत्वं ॥१४॥ स्वरसंपत्ध्वनिसमृद्धिः ॥१५॥ नवग्रहणं
त्वत्कर्तृग्रहणं जीवतोग्रहणमाश्चर्यभूतंभवतियतोनोविस्मयंजनयिष्यति ॥१६॥ ॥१७॥ ॥१८॥ ॥१८॥ ॥ श्रीरामायनमः ॥७॥

रुतोपियदितेग्रहणंयाप्नोतितदापिमेप्रयोजनमित्याह अजिनमिति॥१९॥शष्पबृस्यांबालतृणपरिकल्पितेनातप्रसास्तनेविनीतायांप्रसारितायामस्यजांबूनदमयत्वचि
उपासितुंतत्समीपेस्थातुमिच्छामि·यद्वाभगवदुपासनांकर्त्तुमित्यर्थः॥२०॥इदंकामेनसत्वयोजनेच्छापतिनियोजनरूपंरौद्रंअतएवस्त्रीणामसदृशंकेकेयीवदितिमत्
निर्णीतं·तथापिअस्यसत्वस्यवपुषाममविस्मयोजनितइतिज्ञानकौतुकनिहत्यर्थमनुचितंममनिर्णीतं तथापिअस्यसत्वस्यवपुषाममविस्मयोजनितइतिज्ञानकौ
तुकनिहत्यर्थमनुचितमपिकरोमीतिशेषः॥२१॥कांचनरूपैरोमभिपाठेरूपेणमृगेणरूपमृगोपिविज्ञेयमिति·हत्वायुधः नक्षत्रसहशनानाबिंदूपलक्षितत्वात्तत्पथस

जीवन्नयदितेभ्येतिग्रहणंमृगसत्तमः॥अजिनंनरशार्दूलरुचिरंतुभविष्यति॥१९॥ निहतस्यास्यसत्वस्यजांबूनदमयत्वचि॥शष्पबृ
स्यांविनीतायामिच्छाम्यहमुपासितुं॥२०॥कामवृत्तमिदंरौद्रंस्त्रीणामसदृशंमतं॥वपुषात्वस्यसत्वस्यविस्मयोजनितोमम॥२१॥तेनकांचन
रोम्णातुमणिप्रवरशृंगिणा॥तरुणादित्यवर्णेननक्षत्रपथवर्चसा॥२२॥बभूवराघवस्यापिमनोविस्मयमागतम्॥इतिसीतावचः
श्रुत्वादृष्ट्वाचमृगमद्भुतं॥२३॥लोभितस्तेनरूपेणसीतयाचप्रचोदितः॥उवाचराघवोहृष्टोभ्रातरंलक्ष्मणंवचः॥२४॥पश्यलक्ष्मणवै
देह्याःस्पृहांमृगगतामिमां॥रूपश्रेष्ठतयाह्येषमृगोद्यनभविष्यति॥२५॥नवनेनंदनोद्देशेनचैत्ररथसंश्रये॥कुतःपृथिव्यांसौमित्रेयोस्यक
श्चित्समोमृगः॥२६॥प्रतिलोमानुलोमाश्चरुचिरारोमराजयः॥शोभंतेमृगमाश्रित्यचित्राःकनकबिंदुभिः॥२७॥पश्यास्यजृंभमाणस्य
दीप्तामग्निशिखोपमां॥जिह्वांमुखान्निःसरंतींमेघादिवशतह्रदां॥२८॥मसारगल्वर्कमुखःशंखमुक्तानिभोदरः॥कस्यनामानिरूप्योसौ
नमनोलोभयेन्मृगः॥२९॥कस्यरूपमिदंदृष्ट्वाजांबूनदमयप्रभं॥नानारत्नमयंदिव्यंनमनोविस्मयंव्रजेत्॥३०॥ ॥७॥

सनैस २

37

ष्टोन॥२२॥राघवस्यापिसंभाविताऽसंभावितवस्तुतत्वनिरूपणकुशलमनसोपिमनोविस्मयमागतंप्राप्तंनदिव्यवस्तुत्वभवितत्वतायाःप्राबल्यात्॥२३॥तदेवाहलो
भितइति॥२४॥रूपेणाऽलौकिकविचित्रस्वरूपेणश्रेष्ठः सर्वश्रेष्ठरूपेणहेतुना अयएषमृगोनभविष्यतिनजीविष्यति जीवनमस्यनसंभावितमित्यर्थः प्रायेणाम
गत्वमत्रनसंभावितमित्यर्थइतिकतकः॥२५॥नंदनइत्युद्देशःदेशोनंदनस्य नचवनेचैत्ररथसंश्रयेनरेववनेपिनयोस्यकश्चित्समोमृगःसपृथिव्यामस्तीति
कुतःसंभावनेत्यर्थः॥२६॥तदेवाहप्रतिलोमेत्यादि·कनकबिंदुभिःसहितारोमराजयइत्यन्वयः॥२७॥शतहृदाविद्युत्॥२८॥मसारगल्वर्कमुखःशंखमुक्ता
निभोदरइतिपाठेमसारइंद्रनीलस्तस्यगल्वर्कंपात्रंतत्सदृशंमुखंयस्यसइत्यर्थइत्यर्थइतितीर्थःअनिरूप्यःइदमित्थमितिनिरूपयितुमशक्यः पाठांतरेयस्यन्यादि

मांसहेतोरपि विहारार्थं च घ्नंति किंपुनरेवंविधत्वग्लाभार्थमिति भावः॥३१॥ महावने राजभिरिति शेषः व्यवसायेन मृगवधोद्यमेन धनानि चीयंते संगृह्यंते· ननु वने
कुतो धनं तत्राह धातवइति मणिरत्नसुवर्णं च येषु तादृशा धातवः वज्रादिमणिसुवर्णादियुक्ता लाक्षादिधातवइति यावत्॥३२॥ निचयवर्द्धनेन कोशवर्धनेन धन्यं
धनं नृणां सारमतिप्रशस्तं भवति· भुक्तं ब्रह्मसतपर्ययागाद्युक्तमकाम्यप्रणमितिश्रुतेः एवं च भुक्तस्य ब्रह्मलोकं प्राप्तस्य तद्रूपमापन्नस्य मनसा चिंतितं सर्वं संकल्पमा
त्रासिद्धं सर्वभोग्यवस्तु यथा सर्वस्मात्सारतरं तद्धनं॥३३॥ ननु तथापि विचार्यं कर्तव्यं तत्राह अर्थीति अर्थी अर्थापेक्षः पुमान् येनार्थकृत्येन अर्थनिमित्तेन कर्तव्येन क
र्मणानन्तोरयोराक्षिप्तहृदयोऽविचारयन्नेव व्रजति तन्न स पारं नार्थं तमेवार्थाः अर्थसंपादनचतुराः अर्थशास्त्रज्ञा अर्थ अर्थपरवाच्यमाहुः॥३४॥ अतोऽविचा

मांसहेतोरपि मृगान्विहारार्थं च धन्विनः॥ घ्नंति लक्ष्मण राजानो मृगयायां महावने॥३१॥ धनानि व्यवसायेन विचीयंते महावने॥ धात
वो विविधाश्चापि मणिरत्नसुवर्णिनः॥३२॥ तत्सारमखिलं नृणां धनं निचयवर्द्धनं॥ मनसा चिंतितं सर्वं यथा भुक्तस्य लक्ष्मण॥३३॥
अर्थी येनार्थकृत्येन संव्रजत्यविचारयन्॥ तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्यास्तु लक्ष्मण॥३४॥ एतस्य मृगरत्नस्य परार्ध्ये कांचनत्वचि॰
उपवेक्ष्यति वैदेही मया सह सुमध्यमा॥३५॥ न कादली न प्रियकी न प्रवेणी न चाविकी॥ भवेदेतस्य सदृशी स्पर्शनेनेति मे मतिः॥३६॥ ए
ष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः॥ उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ॥३७॥ यदि वायं तथा यन्मां भवेद्वदसि लक्ष्मण॥ मा
यैषा राक्षसस्येति कर्तव्योऽस्य वधो मया॥३८॥ एतेन हि नृशंसेन मारीचेनाकृतात्मना॥ वने विचरता पूर्वं हिंसिता मुनिपुंगवाः॥३९॥
उत्थाय बहवो येन मृगयायां जनाधिपाः॥ निहताः परमेष्वासास्तस्माद्वध्यस्त्वयं मृगः॥४०॥ ॥७॥ ॥७॥

रेणैवात्र प्रहर्तव्यमित्याह एतस्येति अत्र विचारेण कर्तव्य एतन्मृगेण न महतोऽर्थस्य सिद्धिरिति गूढतात्पर्यं॥३५॥ अस्य परार्ध्यत्वमेव दर्शयति नेति कदल्याद्यं त्व
क्कादली मृदुत्वकबुरनीलाग्रलोमा मृगविशेषः कदली प्रियकी मृदुत्वमसृणघनरोमयुक्तो मृगः प्रियकस्तस्येयं प्रियकी प्रवेणी अजविशेषसंबंधिनी आ
विकी अवित्वक् प्रत्येकं न भुक्तिः सर्वथा सादृश्याभावबोधनाय अनेन एतदीयत्वचा॥३६॥ यश्च नभश्चरो मृगः मृगशिरोनक्षत्ररूपान्देवाहनाराममृगेति॥३७॥ अथ लक्ष्म
णामतमंगीकृत्यापि प्रहर्तव्यमित्याह यदि वेति राक्षसमायेषा न मृगइति यथा मां वदसि यदि वा तथैवैष भवेत्तथाप्यस्य वधो मया कर्तव्य एव राक्षसवधस्य प्रतिज्ञान
त्वात्॥३८॥३९॥ उत्थाय प्रादुर्भूय उत तत्तुनाया॥४०॥

पुरस्तात् पूर्वं इह दण्डकारण्ये स्वगर्भोऽश्वतरीमिवेति अश्वतरी स्वगर्भेण म्रियत इति प्रसिद्धिः अश्वतरी गर्दभादश्वायामुत्पन्नेति तीर्थः अश्वतरी कर्कटी नियते इत्यभिकइ
निकनकः अन्नाय यार्थेव ज्यायसी तस्याः गर्भस्योदरपाटनं विना न निःसरणमिति सर्वजनप्रसिद्धिः ॥४१॥ ॥४२॥ समुत्थाने प्राक्तनेन रूपेण रक्षःस्वरूपं उत्स्मयित्वा ईषद्धसि-
त्वा ॥४३॥ अविगण्य अविचार्य पापेन तस्मात् द्विजपरिभवजपापेन जरां जीर्णतां ॥४४॥ यो मारीचो मद्विधमतिमन्येत नातिक्रामेत तद्रक्षोऽपि मारीचाख्यं वातापिरिव न भवेदेव
न जीवेत् ॥४५॥ उक्तमेवार्थं पुनराह हत इत्यादि यथा वातापिरिति मा मां गतः प्राप्तो मारीचोऽगस्त्येन वातापिरिव मया हतो भवेत् भविष्यतीत्यर्थः सन्नद्धः धनुःकवचादियुक्तः यन्त्रितः य

पुरस्तादिह वातापिः परिभूय तपस्विनः ॥ उदरस्थो द्विजान्हन्ति स्वगर्भोऽश्वतरीमिव ॥४१॥ स कदाचिच्चिराल्लोके आससाद महामुनिं
अगस्त्यं तेजसा युक्तं भक्ष्यस्तस्य बभूव ह ॥४२॥ समुत्थाने च तद्रूपं कर्तुकामं समीक्ष्य तं ॥ उत्स्मयित्वा तु भगवान्वातापिमिदमब्रवीत्
॥४३॥ त्वयाऽविगण्य वातापे परिभूताश्च तेजसा ॥ जीवलोके द्विजश्रेष्ठास्तस्मादसि जरां गतः ॥४४॥ तद्रक्षोऽपि न भवेदेव वातापिरिव ल-
क्ष्मण ॥ मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियं ॥४५॥ भवेद्धतोऽयं वातापिरगस्त्येनेव मा गतः ॥ इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीं ॥४६॥
अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन ॥ अहमेनं वधिष्यामि ग्रहीष्याम्यथवा मृगं ॥४७॥ यावद्गच्छामि सौमित्रे मृगमानयितुं द्रुतं ॥ पश्य ल-
क्ष्मण वैदेहीं मृगत्वचि गतस्पृहां ॥४८॥ त्वचा प्रधानया ह्येष मृगोऽद्य न भविष्यति ॥ अप्रमत्तेन ते भाव्यं आश्रमस्थेन सीतया ॥४९॥ यावत्पृ-
षतमेकेन सायकेन निहन्म्यहं ॥ हत्वैतच्चर्म आदाय शीघ्रमेष्यामि लक्ष्मण ॥५०॥ प्रदक्षिणेनातिबलेन पक्षिणा जटायुषा बुद्धिमता च ल-
क्ष्मण ॥ भवाप्रमत्तः प्रतिगृह्य मैथिलीं प्रतिक्षणं सर्वत एव शङ्कितः ॥५१॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे त्रिचत्वारिंशः सर्गः

रा ३४

त्वा नद्धः यन्त्रितो नियतः हीनः ॥४६॥ अस्माकं यत्कृत्यमावश्यकं कर्म यत्न रक्षार्थं तेन ऽस्यां विषये आयत्तं स्थितं तन्मुख्यत्वात् तेन त्वं सावधानस्तिष्ठ त्वकर्तव्यमाह अहमिति अत्रपूर्वं श्लो-
कचतुर्थचरणश्लेषेण अयं त्रिलोकयन्त्रणायाहीनो नियन्त्ररक्षितः सीतारक्षयस्माकं कृत्यमवतारग्रहणप्रयोजनं तद्रूपया सायत्त अनयैव साधनीयमित्यपि सूचितं ॥४७॥
यावद्गच्छामि गमिष्यामीत्यर्थः आनयितुं आनेतुं तत्र हेतुः पश्येति ॥४८॥ प्रधानया सर्वोत्तमया न भविष्यति [illegible] नजीविष्यति अनेन जीवतो ग्रहणमशक्यमिति दर्शितं
तेन त्वया सीतया सह तिष्ठ अनया प्रेरितः कर्तव्यं यत्पृषतमित्यर्थः ॥४९॥ यावदिति तावदप्रमत्तेन भाव्यमित्यन्वयः ॥५०॥ प्रदक्षिणेन समर्थेन सर्वतः सर्वदिग्वर्तिराक्षसेभ्यः
॥१५॥ इति रामाभिरामे आरण्यकाण्डे त्रिचत्वारिंशः सर्गः ॥४३॥

त्सरुः खड्गमुष्टिः ॥१॥ मध्ये स्थलत्रये विनतं त्रिविनतं आत्मविभूषणं चापस्य वीरालंकारत्वात् आत्मविभूषणमित्यनेनागस्त्यदत्तं वैष्णवमिति सूचितं कलापौ तूणीरौ
२॥ वन्यराजः वन्यानां मृगाणां राजा विचित्रमगत्वा न पुनः संदर्शने दृष्टिविषये ॥३॥ रूपेणास्त्ररूपेणाग्रतो योनयनं योतमानमिव स्थितं ॥४॥ अतिवृत्तं अतिक्रांतं कदाचन
लोभयानं हस्तप्राप्तमिव दृश्यमानं ॥५॥ शंकितमिनिपानादिति शेषः वनोद्देशेषुक्वचित् दृश्यमानं क्वचिददृश्यमानं ॥६॥ छिन्नाभ्रसंवीतं चद्रसादृश्यापपादकमुत्त

शंकितमिषुपातादि
तिशेषः १५

तथा तु तं समुद्दिश्य भ्रातरं रघुनंदनः ॥ बबंधासिं महातेजा जांबूनदमयत्सरुं ॥१॥ ततस्त्रिविनतं चापमादायात्मविभूषणं ॥ आबध्य
च कलापौ द्वौ जगामोदग्रविक्रमः ॥२॥ तं वन्यराजो राजेंद्रमापतंतं निरीक्ष्य वै ॥ बभूवांतर्हितस्त्रासात्पुनः संदर्शने भवत् ॥३॥ बद्धासि
धनुरादाय प्रदुद्राव यतो मृगः ॥ तं स्म पश्यति रूपेण द्योतयंतमिवाग्रतः ॥४॥ अवेक्ष्यावेक्ष्य धावंतं धनुष्पाणिर्महावने ॥ अतिवृत्तमिषोत्पाता
लोभयानं कदाचन ॥५॥ शंकितं तु समुद्भ्रांतमुत्पतंतमिवांबरं ॥ दृश्यमानमदृश्यं च वनोद्देशेषु केषुचित् ॥६॥ छिन्नाभ्रैरिव संवीतं शारदं चंद्र
मंडलं ॥ मुहूर्त्तादेव ददृशे मुहुर्दूरात्प्रकाशते ॥७॥ दर्शनादर्शनेनैवं सोपाकर्षत राघवं ॥ सुदूरमाश्रमस्यास्य मारीचो मृगतां गतः ॥८॥ आसीत
क्रुद्धस्तु काकुत्स्थो विवशस्तेन मोहितः ॥ अथावतस्थे सुश्रांतः छायामाश्रित्य शाद्वले ॥९॥ स तमुन्मादयामास मृगरूपो निशाचरः ॥ मृगैः प
रिवृतोऽथान्यैरदूरात्प्रत्यदृश्यत ॥१०॥ ग्रहीतुकामं दृष्ट्वा तं पुनरेवाभ्यधावत ॥ तत्क्षणादेव संत्रासात्पुनरंतर्हितोऽभवत् ॥११॥ पुनरेव ततो दू
राद्वृक्षखंडाद्विनिःसृतः ॥ दृष्ट्वा रामो महातेजास्तं हंतुं कृतनिश्चयः ॥१२॥ भूयस्तु शरमुद्धृत्य कुपितस्तत्र राघवः ॥ सूर्यरश्मिप्रतीकाशं ज्वल
तमर्द्दनं ॥१३॥ संधाय सुदृढे चापे विकृष्य बलवद्बली ॥ तमेव मृगमुद्दिश्य ज्वलंतमिव पन्नगं ॥१४॥ मुमोच ज्वलितं दीप्तमस्त्रं ब्रह्मविनिर्मितं·
·समर्शं मृगरूपस्य विनिर्भिद्य शरोत्तमः ॥१५॥ मारीचस्यैव हृदयं विभेदाशनिसन्निभः ॥ तालमात्रमथोत्प्लुत्य न्यपतत्स शरातुरः ॥१६॥

२ मी

राघवं ॥७॥ दर्शनादर्शने निर्द्वंद्वैकवज्ञावः स मृगतां गतो मारीचोऽस्याश्रमस्य दूरं गत इत्यर्थः ॥८॥ तेन दर्शनादर्शनेन विलोभ्य मोहयता मारीचेन मोहितो वंचितः विवशस्तत्वक(
लोभयवशश्च पुनरपि छायामाश्रित्यावनस्थे ॥९॥ उन्मादयामास वकुदूरं धावनेन चित्तविभ्रमं चकार ॥१०॥११॥१२॥ भूयः कुपित इति शेषः ॥१३॥१४॥ ब्रह्मविनिर्मितं
मस्त्रं ब्रह्मास्त्रं ब्रह्मदत्तं वाणं च मृगरूपसदृशरूपस्य मायाकृतरूपस्य वनप्रविश्य स्थितस्य ॥१५॥ मारीचस्यैव हृदयं न तु तत्कृतमायामृगाकारमात्रस्य तालमात्रमुत्प्लुत्य
शरवेगकृतवेधादिति शेषः ॥१६॥

॥१७॥ तद्वचनं रावणवचनं रक्षो ध्यानं कृत्वा न केनमन्यतेनोपायेन सीता लक्ष्मणं प्रस्थापयेन्नेतां वनं नेरावणो हरेदिति रक्ष्यो ॥१८॥ प्राप्तकालमाज्ञाय रावणोक्तमुपायमे
व बुद्ध्वेमतवा ॥१९॥ मर्माणि प्राणास्थाने रक्षस इदं राक्षसरूपमास्थितः पूर्वोक्तशरं चक्रेइत्यन्वयः ॥२०॥ सुमहाकायः महाशरीरम् ॥२१॥२२॥ लक्ष्मणं वचएवाह मारीचस्य
विनि ॥२३॥ सीता कथं भवेत् किंअर्थेसंनारयित्वा लक्ष्मणं प्रेषयेनउन धी राम वदिन्यर्थः ॥२४॥ कामवस्थां भधैर्यादि विशेषः हृष्टतनूरुहः त्रासादिव रोमांचिततनुः व

वान[illegible]स्वनार्तस्वरं धरण्यामल्पजीवितः ॥ म्रियमाणस्तु मारीचो जहौतांकृत्रिमंतनुं ॥१७॥ स्मृत्वा तद्वचनं रक्षोदध्यौ केन तु लक्ष्मणं ॥ इ
हप्रस्थापयेत्सीतांतांशून्येरावणोहरेत ॥१८॥ संप्राप्तकालमाज्ञाय चकार च ततः स्वनं ॥ सदृशं राघवस्येव हा सीते लक्ष्मणेति च ॥१९॥ तेन म
र्मणि निर्विद्धः शरेणानुपमेन हि ॥ मृगरूपं तु तत्त्यक्त्वा राक्षसं रूपमास्थितः ॥२०॥ चक्रे स सुमहाकायो मारीचो जीवितं त्यजन् ॥ तं दृष्ट्वा प
तितं सो राक्षसं भीमदर्शनम् ॥२१॥ रामो रुधिरसिक्ताङ्गं वेष्टमानं महीतले ॥ जगाम मनसा सीतां लक्ष्मणस्य वचः स्मरन् ॥२२॥ मारीचस्य
तु मायैषा पूर्वोक्ता लक्ष्मणेन तु ॥ तत्तथा ह्यभवच्चाद्य मारीचोयं मया हतः ॥२३॥ हा सीते लक्ष्मणेत्येवमाक्रुश्य तु महास्वनं ॥ ममार राक्षसः
सोयं श्रुत्वा सीता कथं भवेत ॥२४॥ लक्ष्मणश्च महाबाहुः कामवस्थां गमिष्यति ॥ इति संचिन्त्य धर्मात्मा रामो हृष्टतनूरुहः ॥२५॥ तत्र राम
भयं तीव्रमाविवेश विषादजं ॥ राक्षसं मृगरूपं तं हत्वा श्रुत्वा च तत्स्वनं ॥२६॥ निहत्य पृषतं चान्यं मांसमादाय राघवः ॥ त्वरमाणो जन
स्थानं ससाराभिमुखस्तदा ॥२७॥ ॥इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥४४॥ ॥आर्तस्वरं तु
तं भर्तुर्विज्ञाय सदृशं वने ॥ उवाच लक्ष्मणं सीता गच्छ जानीहि राघवं ॥१॥ ॥७॥ ॥७॥ ॥श्रीरामाय नमः ॥७॥

सुतस्तन्मूलेन सर्वकार्यनिष्पत्तिरिति हर्षाद्रोमांचिततनुः ॥२५॥ तत्रतदावने भगवान मनुष्यरूपत्वाद्भयशोकादिमत्त्वं नाटयतीति· कविरपि सर्वलोकवेद्यं तथैवाह तत्र
रामं भयमिति सात्त्विकमर्थं तु हृष्टतनूरुहः इति हृष्टपदेन शोकवत्त्वं ध्वनितवान ॥२६॥ पृषतं मृगं जनस्थानमभिमुखं जनस्थानवर्त्तिनिजाश्रमाभिमुखं ॥२७॥ ॥इतिरा
माभिरामश्रीरा॰ आरण्यकाण्डे चतुश्चत्वारिंशः सर्गः ॥४४॥ अथ सीता रामविषयशोकनाटनेन लक्ष्मणं प्रस्थापयति आर्तेति भर्तुः स्वरेण सदृशं स्वरं भर्तुः स्वर

[illegible] ॥१॥

39

कोशनः रामस्य॥२॥३॥ आज्ञायशासनं अप्रमत्तेनत्वेभाव्यमाश्रमस्थेनसीनयेसुक्रमनुचिंत्येत्यर्थः॥४॥सुमित्रासुमित्रेवशत्रुवत्शत्रुयोग्यत्वतः॥५॥नतेदेवाहं यत्नमि
नि नाभिपद्यसेनप्राप्तोभवसि मत्कृतेमत्परिग्रहार्थं॥६॥७॥विश्रब्धं विप्रवस्तंयथातथाविप्रवस्तंयथातथाविश्रब्धइतिपाठांतरं त्वद्रक्षणंविहायकथंगच्छामीत
त्राहं किंहीनिषागमः प्रधानंयस्यसत्यनुधानस्त्वमिहागतस्तस्मिन्रामेमसंशयमापन्नेसति· मयानिष्क्रान्त्यात्वद्रक्षणेनजीवंत्याकिंकर्तव्यंभवेत् नदभावेमर

नहिमेजीवितंस्थानेहृदयंवावतिष्ठते॥क्रोशतःपरमार्तस्यश्रुतःशब्दोमयाभृशम॥२॥आक्रंदमानंतुवनेभ्रातरंत्रातुमर्हसि॥तंक्षिप्रम
भिधावत्वंभ्रातरंशरणैषिणं॥३॥रक्षसांवशमापन्नंसिंहानामिवगोवृषं॥नजगामतथोक्तस्तुभ्रातुराज्ञायशासनं॥४॥तमुवाचतत
स्तत्रक्षुभिताजनकात्मजा॥सौमित्रेमित्ररूपेणभ्रातुस्त्वमसिशत्रुवत्॥५॥यस्त्वमस्यामवस्थायांभ्रातरंनाभिपद्यसे इच्छसित्वंवि
नश्यंतंरामंलक्ष्मणमत्कृते॥६॥लोभात्तुमत्कृतेनूनंनानुगच्छसिराघवं॥व्यसनंतेप्रियंमन्येस्नेहोभ्रातरिनास्तिते॥७॥तेननिष्ठसिवि
स्रब्धंतमपश्यन्महाद्युतिं॥किंहिसंशयमापन्नेतस्मिन्निहमयाभवेत्॥८॥कर्तव्यमिहतिष्ठन्त्यायत्प्रधानस्त्वमागतः॥एवंब्रुवाणां
वैदेहींबाष्पशोकसमन्वितां॥९॥अब्रवील्लक्ष्मणस्त्रस्तांसीतांमृगवधूमिव॥पन्नगासुरगंधर्वदेवदानवराक्षसैः॥१०॥अशक्य
स्तववैदेहिभर्ताजेतुंनसंशयः॥देविदेवमनुष्येषुगंधर्वेषुपतत्रिषु॥११॥राक्षसेषुपिशाचेषुकिन्नरेषुमृगेषुच॥दानवेषुचघोरेषुन
सविद्येतशोभने॥१२॥योरामंप्रतियुध्येतसमरेवासवोपमं॥अवध्यःसमरेरामोनैवंत्वंवक्तुमर्हसि॥१३॥नत्वामस्मिन्वनेहातु
मुत्सहेराघवंविना॥अनिवार्यंबलंतस्यबलैर्बलवतामपि॥१४॥त्रिभिर्लोकैःसमुदितैःसेश्वरैःसामरैरपि॥हृदयंनिर्वृतंतेस्तु
संतापस्त्यज्यतामय॥१५॥

रामेवध्येयत्नपेनकेनापिभवतुराक्षसमायाःयेनजंतुनावास्वनोबहिःप्रवेशादिनावेतिभावः अत्रायंध्वनिः राक्षससंहारप्रधानकार्यकारणायागतस्यनवनन
भ्रातुर्वोनस्मिन्कार्ये इहमदवस्थित्यासंशयमापन्ने इहजीवंत्यासंशयमापन्ने इहजीवंत्यामयाकिंकार्यंभवेत्· सर्वत्रोत्पत्तिस्थितिसंहारेषुनवशानुरहमेव
सहकारिणी प्रकृतिनश्चसंहारोत्तमनःस्थित्यानिवर्ततइति॥८॥२॥एवंवादिनंतत्वोपिमानुष्यनटनेनलोकव्यवहारानुसारेणलक्ष्मणोऽवदद्दित्याह अब्रवी
दिति॥१०॥११॥१२॥नसविद्येतनेशब्देत्यर्थः नसविद्येनेत्युक्तंनचसकलत्राह योराममिति॥१३॥बलवतामिंद्रादीनामपिबलैस्तस्यबलमनिवार्यम

तिवासक्षे॥४८॥सर्गः॥४८॥

सस्वरोव्यक्तंस्पष्टंतस्यरामस्यनभवतिदैवतःअशरीरदेवतासंबंधीकश्चित्स्वरइत्यपिनेत्यर्थःतदापिशंकायुक्तानत्वेवमपीत्यर्थः॥१६॥ किंतर्हिगंधर्वनगरप्रख्या[redacted]
नभसिमिथ्यातस्यरक्षसोमायैववंचनार्थंतेनकृतोयंस्वरइत्यर्थः त्वंन्यासरूपतयामयिनिक्षिप्तासि अतःत्वांत्यक्तुंनोत्सहेइत्युत्तरेणान्वयः॥१७॥ ॥१८॥ खरस्यनिधनेरामेण
कृतेसतिजनस्थानवधंजनस्थानवर्त्तिखरपरिकरराक्षोवधंप्रतिलक्ष्यकृतवैराइत्यन्वयः व्याहरंतिअस्माभ्यामोहनार्थमतस्त्वांत्यक्तुंनोत्सहे॥१९॥ हिंसैवसाधुजनपी

आगमिष्यतितेभर्त्ताशीघ्रंहत्वामृगोत्तमं॥ नसतस्यस्वरोव्यक्तंनकश्चिदपिदैवतः॥१६॥ गंधर्वनगरप्रख्यामायासातस्यरक्षसः॥ न्या
सभूतासिवैदेहिन्यस्तामयिमहात्मना॥१७॥ रामेणत्वंवरारोहेनत्वांत्यक्तुमिहोत्सहे॥ कृतवैराश्चकल्याणिवयमेतैर्निशाचरैः
॥१८॥ खरस्यनिधनेदेविजनस्थानवधंप्रति॥ राक्षसाविविधावाचोव्याहरंतिमहावने॥१९॥ हिंसाविहारावैदेहिनचिंतयितुमर्ह
सि॥ लक्ष्मणेनैवमुक्तातुक्रुद्धासंरक्तलोचना॥२०॥ अब्रवीत्परुषंवाक्यंलक्ष्मणंसत्यवादिनं॥ अनार्यकरुणारंभनृशंसकुलपांस
न॥२१॥ अहंतवप्रियंमन्येरामस्यव्यसनंमहत्॥ रामस्यव्यसनंदृष्ट्वातेनैतानिप्रभाषसे॥२२॥ नैवचित्रंसपत्नेषुपापंलक्ष्मणयद्भ
वेत्॥ त्वद्विधेषुनृशंसेषुनित्यंप्रच्छन्नचारिषु॥२३॥ सुदुष्टस्त्वंवनेराममेकमेकोनुगच्छसि॥ ममहेतोःप्रतिच्छन्नःप्रयुक्तोभरतेनवा
॥२४॥ तन्नसिध्यतिसौमित्रेतवापिभरतस्यवा॥ कथमिंदीवरश्यामंरामंपद्मनिभेक्षणं॥२५॥ उपसंश्रित्यभर्त्तारंकामयेयंपृथक्
जनं॥ समक्षंतवसौमित्रेप्राणांस्त्यक्ष्याम्यसंशयं॥२६॥ रामंविनाक्षणमपिनैवजीवामिभूतले॥ इत्युक्तःपरुषंवाक्यंसीतयारोमहर्ष णं॥२७॥

॥२५॥ उपसंश्रुत्य उपसृज्य ॥२६॥ २७॥

डैवविहारोयेषांतेतथाहंपूर्वोक्तंत्वयिअतस्त्वंरामस्यक्लेशंनचिंतयितुमर्हसि॥२०॥ अनार्यकरुणारंभअनार्ययाकुत्सितयाकरुणयाआरंभोयस्यसतेपुंसद्विषयायाआरंभोमहक्षरणा
रंभोयस्यतत्संबोधनं॥२१॥ तेनरामव्यसनप्रियत्वेनअजयरामव्यसनेत्वप्रतिज्ञानार्थस्यसर्वस्यात्मवधरूपस्यहानिलिप्रियत्वेनेतिरुदंतान्यायं अतएवग्रामसद्विषयाकरुणाअ
नार्याकुत्सितापधानकार्यविरोधित्वादितिबोध्यं॥२२॥ अथपुनर्नृशंसत्वमाह नैवेत्यादि सपत्नेषुज्ञातिष्वितान॥२३॥ सुदुष्टःसुतरांदुष्टहृदयः॥२४॥ तन्नसिध्यतिमत्परिग्रहरूपं

40

॥२८॥अप्रतिरूपमत्यंतानुचितं॥२९॥तीक्ष्णाःक्रूराःभेदकराःक्रूरोहेत्वितिरःसुनशान्पिशाचादेरितिशेषः॥३०॥वनेचराद्वाइतिशेषः॥३१॥यन्तुहृष्टमुक्तमस्तुपश्च
रावत्वितिनियोजनाययस्मान्मामेवंवागगोचरंदुर्भावंवचनंविशंकसेतन्नएवदोषादयविनश्यंतीमासन्नविनाशाविपरीतगतिस्त्वांधिकइत्यर्थःअत्रनशेर्नाशेच्छार्थःने
नराक्षसकुलस्यनाशेच्छावतीत्वांधिकयतोयदर्थंमामेवंविशंकसेवदसिइतिगूढंयद्वाविनश्यंतीशक्तिनयाप्रतिक्षणपरिणामरूपेणविनश्यंतीत्वांधिकयतःमात्व

अब्रवील्लक्ष्मणःसीतांप्रांजलिःसजितेंद्रियः॥उत्तरंनोत्सहेवक्तुंदैवतंभवतीमम॥२८॥वाक्यमप्रतिरूपंतुनचित्रंस्त्रीषुमैथिलि॥स्व
भावस्त्वेषनारीणामेषुलोकेषुदृश्यते॥२९॥विमुक्तधर्माश्चपलास्तीक्ष्णाभेदकराःस्त्रियः॥नसहेहीदृशंवाक्यंवैदेहिजनकात्मजे॥३०॥श्रो
त्रयोरुभयोर्मध्येतप्तनाराचसन्निभं॥उपशृण्वंतुमेसर्वेसाक्षिणोहिवनेचराः॥३१॥न्यायवादीयथावाक्यमुक्तोहंपरुषंत्वया॥धि
क्त्वामद्यविनश्यंतीयन्मामेवंविशंकसे॥३२॥स्त्रीत्वाद्दुष्टस्वभावेनगुरुवाक्येव्यवस्थितं॥गच्छामियत्रकाकुत्स्थःस्वस्तितेस्तुवरा
नने॥३३॥रक्षंतुत्वांविशालाक्षिसमग्रावनदेवताः॥निमित्तानिहिघोराणियानिप्रादुर्भवंतिमे॥अपित्वांसहरामेणपश्येयंपुनरागतः
॥३४॥लक्ष्मणेनैवमुक्तातुरुदतीजनकात्मजा॥प्रत्युवाचततोवाक्यंतीव्रबाष्पपरिप्लुता॥३५॥गोदावरींप्रवेक्ष्यामिहीनारामेणलक्ष्मण
आवंधिष्येथवात्यक्ष्येविषमेदेहमात्मनः॥३६॥ ॥७॥ ॥७॥ ॥७॥ ॥श्रीरामायनमः॥७॥

दस्त्वयंत्वदाक्रमणायोग्यमेवंविशंकसेत्वदाक्रांतेपुंक्लिबैवंसंभावनेति॥३२॥पुनर्द्वेषानुसारेणाहस्त्रीत्वात्दुष्टस्वभावेनक्रौर्येणपुनात्वंगुरुवाक्येज्येष्ठनियोगेस्थितंमां
मेवद्वेषइतिशेषःगतोयत्रकाकुत्स्थस्तत्रगच्छामित्येतेस्वस्त्यस्तुसर्वंतइतिशेषः॥३३॥यानिघोराणिनिमित्तानिमेप्रादुर्भवंतितैस्त्वत्पीडाशंकमानोहंरामेणसह
पुनरागतस्त्वांपश्येयंएतदपिसंभवेदित्यर्थः॥३४॥किमनेनममान्यपुरुषप्रसंगःशंक्यतइतिमन्यमानास्वदार्ढ्यंप्रकाशयतिलक्ष्मणेनेति॥३५॥ ॥३६॥

भावं धिक्ष्व रज्वा कंठमिति शेषः विषमे भयवादि विषमे स्थितत्वाननतः प्रपाते नेति शेषः सर्वथा कर्तव्यमर्थमाह प्रवेक्ष्यामि हुताशनं अत एवात्र वाशब्दानुक्तिः अनेन स्या सा
वणाग्रहं न गमिष्यामि किंत्वहं स्वरूपेणाग्नौ स्थित्वा माययैव तद्गृहं गमिष्यामीति ध्वनितं नतु कंकर्तपुराणे रामस्य सुभगा भार्या एव रावणापक्षसंभवः सीता विशा
लनयना चकमेकालतोदितः गृहीत्वा मायया देहं वर्तती विजने वने समाहर्तुं मनप्वके नाप्यसत्किल कामिनी विश्वासयमाचतद्भावं स्वनावारार्थिं पतिनद्वारं लंकाया
मेव हृदि कृत्वा तपसा भूत्वा हरिष्यामीति भाव इत्यर्थः जगाम शरणं वह्निमावसथ्यं शुचिस्मिता उपप्रयाव केरेवं साक्षिणं विश्वतोमुखं आत्मानं दीप्तवपुषं सर्वभूतह्र
दिस्थितमित्याद्यं श्लोका नुक्ता इति वक्ष्यथ कंजप्राणस्य पत्नी यशस्विनी ध्यायंती मनसा तस्थौ राममुन्मीलितेक्षणा मथावसथ्याद्भगवान् हव्यवाहो महेश्वरः आवि
रासीत्सुदीप्तात्मा तेजसा निर्दहन्निव सृष्ट्वा मायामयीं सीतां स रावणवधेच्छया सीतामादाय धर्मिष्ठां पावकोन्तरधीयत कृत्वा तु तेन रावणवधं रामो लक्ष्मणसंयु

८२

पिबामि वा विषं तीक्ष्णं प्रवेक्ष्यामि हुताशनं ॥ न त्वहं राघवादन्यं कदापि पुरुषं स्पृशे ॥ ३७ ॥ इति लक्ष्मणमाश्रुत्य सीता शोकसमन्वि
ता ॥ पाणिभ्यां रुदती दुःखादुदरं प्रजघान ह ॥ ३८ ॥ तां मातरूपां विमनां रुदंतीं सौमित्रिरालोक्य विशालनेत्रां ॥ आश्वासयामास न चै
व भर्तुस्तं भ्रातरं किंचिदुवाच सीता ॥ ३९ ॥

नः समारायामभवन्सीतां शंकाकुलितमानसः साप्यन्यथा यसूतां सीतां मायामयीं पुनः विवेश पावकं दीप्तं दग्ध्वा हव्यवहनोपि तां दग्ध्वा मायामयीं सीतां भग
वानुग्रदीधितिः रामायादर्शयत्सीतां पावकोसौ सुरप्रियः एतत्परिवेत्तानां वैसाहात्म्यकथितं मया स्त्रीणां सर्वाधिशमनं प्रायश्चित्तमिदं स्मृतमिति उत्तरखंडे
वनुस्थितेशः ध्याये अनेन स्त्रीणां जातिभ्रंशकरं परद्रअग्निप्रवेशो न दोषाय सर्व प्रायश्चित्तं चेति ध्वनितं कदापि अन्यं पुरुषं न स्पृशे इत्यन्वयः अत्र पत्युः सन्निधाने इति शेषः तेन
विराधस्पर्शेपि न हानिः तदा पतिसन्निधानात् किंच सा साक्षाद्भगवती स्पर्शे रावण विराधवत् तत्क्षणादेव भस्मीभवेदेवं च सर्वराक्षसवधो न स्यादिति मायासीतारचना किंवा
स्वकार्यं हनुमत्पुच्छाग्निना लंकादाहः अन्यथा रावणावेशेन लोकपालाग्निना कथं तन्नगरदाहः स्यात् एतच्छक्तिप्रवेशेन तु न तत्कार्यसामर्थ्यं तस्या इति मंतव्यं किंवे वप
तिता यद्रावणस्पर्शे जगन्मातुः प्रतिज्ञाभंगः स्यात् ॥ ३७ ॥ आश्रुत्य लक्ष्मणोप निष्ठुरवाक्यं दुःखात् सकलकरणतापादिव उदरं प्रजघानेत्यनेन सर्वरक्षोमरणं विना
तमउदरपूर्तिरिति सूचितं अन्यथा शोके वक्ष आघात एव स्यात् वक्षोपि प्रसिद्धाः संगतिः स्यात् ॥ ३८ ॥ विमनाः सौमित्रिः तां रुदतीं मातेव रूपं यस्यास्तद्रूपामालोक्य तां
कानुसारेण आश्वासयामास सा च तेन न किंचिदुवाच आश्वासनव्याजेन गमनविलंबकारिणीति कोपेनेति शेषः ॥ ३९ ॥

अभिवाद्यमनसेतिशेषः किंचिदभिप्रणम्येतिकायिकः सउक्तः अत्रकिंचिदित्यनेनकोपः सूचितः ब्रह्मचारिण्यागोलक्ष्मणस्यानुचितस्तथापिप्रतिज्ञोत्तरंतथैवस्वच्छायांसंदर्शन
स्याअग्निप्रवेशायमेनच्छायाउध्याकिंचित्वाजलिस्त्वकिंचिदेवनमनमित्यनेनसूचितं कथमेताः यद्यपिकोपोपियथोचितः रामेणविनात्यक्ष्यामीतिवकुशोवेक्ष्यमाणः
अग्निप्रवेष्टानवेतिचवीक्ष्यमाणः ॥४०॥ ॥इतिरामाभिरामेआरण्य० पंचचत्वारिंशः सर्गः ॥४५॥ ॥नचिरादितिवशीघ्रमेवेत्यर्थः विकांक्षन्विशेषेणकांक्षमाणः तन्मध्येविधगम
नमिच्छन्नित्यर्थः काक्षितःशंकायासमयेनरामविरहक्लेशकमानःशीघ्रमितोऽन्यप्रसरणकार्यनाशान् एषोपिविरहक्लेशःस्यादितिशंकमानःशीघ्रजगामेतिविवरण अतएवपवचहितप्र

ततस्तुसीतामभिवाद्यलक्ष्मणः कृतांजलिः किंचिदभिप्रणम्य ॥ अवेक्ष्यमाणोबहुशःसमैथिलींजगामरामस्यसमीपमात्मवान् ॥४०॥ इत्या
र्षेश्रीमद्रामायणेवा० आरण्यकाण्डेपंचचत्वारिंशः सर्गः ॥४५॥ ॥तयापरुषमुक्तस्तुकुपितोराघवानुजः ॥ सविकांक्षन्भृशंराम
प्रतस्थेनचिरादिव ॥१॥ तदासाद्यदशग्रीवः क्षिप्रमन्तरमास्थितः ॥ अभिचक्रामवैदेहीं परिव्राजकरूपधृक् ॥२॥ श्लक्ष्णकाषायसंवीतः
शिखीछत्रीउपानही ॥ वामेचांसेवसज्याथशुभेयष्टिकमण्डलू ॥३॥ परिव्राजकरूपेणवैदेहीमन्ववर्तत ॥ तामाससादातिबलोभ्रातृभ्यां
रहितांवने ॥४॥ रहितांसूर्यचन्द्राभ्यांसन्ध्यामिवमहत्तमः ॥ तामपश्यत्ततोबालांराजपुत्रींयशस्विनीं ॥५॥ रोहिणींशशिनाहीनांग्रहवद्भृशदारुणः
तमुग्रंपापकर्माणंजनस्थानगताद्रुमाः ॥६॥ संदृश्यनप्रकम्पन्तेनप्रवातिचमारुतः ॥ शीघ्रस्रोताश्चतंदृष्ट्वावीक्षन्तंरक्तलोचनं ॥७॥ स्तिमि
तंगन्तुमारेभेभयाद्गोदावरीनदी ॥ रामस्यत्वन्तरंप्रेप्सुर्दशग्रीवस्तदन्तरे ॥८॥ उपतस्थेचवैदेहींभिक्षुरूपेणरावणः ॥ अभव्योभव्यरूपेण
भर्तारमनुशोचन्ती ॥९॥ अभ्यवर्ततवैदेहींचित्रामिवशनैश्चरः ॥ सहसाभव्यरूपेणतृणैःकूपइवावृतः ॥१०॥ अतिष्ठत्प्रेक्ष्यवैदेहींराम
पत्नींयशस्विनीं ॥ तिष्ठन्संप्रेक्ष्यचतदापत्नीं[redacted]रामस्यरावणः ॥११॥ ॥७॥

र्वसर्गेनेमारीचस्यतथाशेषान्तरंसीताविषयंमहत्तोचिन्तामुक्ताततःपुनरपिमांसार्थमितरमृगवधप्रवृत्तिहृत्कामाविलंवायेव ॥१॥ तदालक्ष्मणस्यापगमेऽन्तरंरामलक्ष्मण
योरपसरणेनावकाशमासाद्यप्राप्य ॥२॥ शिखीउपानहीतिद्वौहारित्वादिभिः अनेनत्रिदण्डिसंन्यासिवेषःसूचितः तदुक्तंभारते रावणस्तुयतिर्भूत्वामुण्डःकुण्डीत्रिदण्डधृगिति
तत्रमुण्डत्वमनेनजटित्वव्याहतिः कुण्डकमण्डलुः यष्टिस्त्रिदण्डात्मिका भ्रातृभ्यांपरस्परभ्रातृभ्यांरामलक्ष्मणाभ्यां ॥४॥५॥ ग्रहवत्केतुवत् तंसंदृश्येत्यन्वयः ॥६॥ शीघ्रस्रोताःशीघ्र
प्रवाहापिनदीतंवीक्षन्तंवीक्षमाणंदृष्ट्वातद्भयात्स्तिमितंसंगन्तुमारेभेइत्यन्वयः ॥७॥ अन्तरंअपकारयोग्यंछिद्रं तदन्तरेउभयरहितेदेशकाले ८ उपतस्थेअतिसमीपंप्राप्येत्य
र्थः अतिशोचन्तीनामिव ॥९॥ चित्रांचित्राख्यनक्षत्रंभव्यरूपेणपरमशान्ततयनिरूपेण ॥१०॥११॥

बाष्पःशोकेनचाभिपीडितांस्वयममैनोप्रविश्य· मांरक्षसेयत्नवतीनिशोकबाष्पोरामवासनशंकयेत्यानतोर्थः॥१२॥१३ ब्रह्मघोषंब्राह्मणत्वप्रत्यभिज्ञानायवेदघोषंउदीरयन्उक्त
वंत् १४ १५ रौप्यकांचनमुत्तमकांचनं १६ ह्रीर्गौरीश्रीरैश्वर्यप्रधानाभगवच्छक्तिःलक्ष्मीःसौभाग्यप्रधाना भूतिरणिमादिसिद्धिःरतिःकामपत्नीस्वैरचारिणीत्वंवन
मागमनात्·प्रशशंसेत्यस्यान्वयःसमाइत्यादि· समाइति· समसंस्थानाःशिखरिणःकुंदकुड्मलवत्प्रशस्ताग्राः १७ १८ संप्रगल्भितौआलिंगनादौसज्जातप्रागल्भ्यौ सं

शुभांरुचिरदंतोष्ठीं पूर्णचंद्रनिभाननां आसीनांपर्णशालायांबाष्पशोकाभिपीडितां॥१२ सतांपद्मपलाशाक्षीं पीतकौशेयवासिनीं·
अभ्यगच्छतवैदेहींहृष्टचेतानिशाचरः १३ दृष्ट्वाकामशराविद्धोब्रह्मघोषमुदीरयन्॥ अब्रवीत्प्रश्रितंवाक्यंरहितेराक्षसाधिपः॥१४
तामुत्तमांत्रिलोकानांपद्महीनामिवश्रियं विभ्राजमानांवपुषारावणःप्रशशंसह॥१५॥रौप्यकांचनवर्णाभेपीतकौशेयवासिनि॥क
मलानांशुभांमालांपद्मिनीवचबिभ्रती॥१६ ह्रीःश्रीःकीर्तिःशुभालक्ष्मीरप्सरावाशुभानने॥भूतिर्वात्वंवरारोहेरतिर्वास्वैरचारिणी·
१७॥समाःशिखरिणःस्निग्धाःपाण्डुरादशनास्तव विशालेविमलेनेत्रेरक्तांतेकृष्णतारके॥१८॥विशालंजघनंपीनमूरूकरिकरोपमौ·
एतावुपचितौवृत्तौसंहतौसंप्रगल्भितौ १९॥पीनोन्नतमुखौकांतौस्निग्धतालफलोपमौ॥मणिप्रवेकाभरणौरुचिरौतेपयोधरौ॥२०॥
चारुस्मितेचारुदतिचारुनेत्रेविलासिनि मनोहरसिमेरामेनदीकूलमिवांभसा॥२१॥करांतमितमध्यासिसुकेशीसंहतस्तनि॥नैव
देवीनगंधर्वीनयक्षीनचकिन्नरी २२ नैवंरूपामयानारीदृष्टपूर्वामहीतले॥रूपमग्र्यंचलोकेषुसौकुमार्यंवयश्चते॥२३ इहवासश्चकांतारे
चित्तमुन्माथयंतिमे सप्रतिक्रामभद्रंतेनत्वंवस्तुमिहार्हसि॥२४॥राक्षसानामयंवासोघोराणांकामरूपिणां॥प्रासादाग्र्याणिरम्याणिनगरोपवना
निच २५ संपन्नानिसुगंधीनियुक्तान्याचरितुंत्वया॥वरंमाल्यंवरंगंधंवरंवस्त्रंचशोभने॥२६॥ ॥२६॥ ॥श्रीरामायनमः॥

प्रवल्गितावितिपाठेआलिंगनोद्यतावित्यर्थः मणिप्रवेकोमणिश्रेष्ठः॥२०॥नदीकूलंसकलं॥२१॥करांतेनांगुष्ठप्रदेशिनीचक्रप्रमाणेनमितंमध्यंयस्याःसातथोक्ते॥२२॥
रूपंसुकुमारतावयःकांतारवासइतिचत्वारिचित्तमुन्माथयंतिविकलनंकुर्वंति॥२३॥प्रतिक्रामनिर्गच्छरामवडाधिष्ठितस्थानेराक्षसपराक्रमासंभवादेवंवचनं॥२४॥२५॥आ
चरितुंसुपभोक्तुंत्वयुक्तंत्वन्नंयुक्तमास्यादिवरंअन्यत्तुविफलमितिभावः॥२६॥ ॥२६॥

॥२८॥ द्वीपिव्याघ्रौ मसविडु निर्विंहः॥२९॥ तरक्षुर्मृगादनः विभ्यसे विभेषि॥३०॥३१॥ प्रशस्ता कृतप्रशंसा॥३२॥ द्विजातिवेषेणागतं रावणं दृष्ट्वा द्विजातिवेषोयं रावण इति ज्ञा
त्वापि अतिथियोग्यसत्कारैः पाद्येनाभिनिमंत्र्य सत्कृतः॥३३॥ तदा यायद्यदानीं तत्काले सौम्यदर्शनं नमस्कृत्य पूर्वकमनन्तरमित्यब्रवीत्॥३४॥ पात्रं कमंडलुः कुसुंभं तद्रक्तवस्त्रं तदुभय
धारिणं उपायानां ब्राह्मणत्वप्रतिपत्त्यै रावणेन कृतानां काषायवस्त्रब्रह्मसूत्रयोगदंडादीनां दर्शनात् उद्वेष्टुमुपेक्षितुमशक्यमिति विचार्य निशेषः तथागतं ब्राह्मणवेषेण

भर्तारं च वरां मन्ये त्वयुक्तमसितेक्षणे॥ कां त्वं भवसि रुद्राणां मरुतां वा शुचिस्मिते॥२७॥ वसूनां वा वरारोहे देवता प्रतिभासि मे॥ नेह ग
च्छंति गंधर्वा न देवा न च किंनराः॥२८॥ राक्षसानामयं वासः कथं नु त्वमिहागता॥ इह शाखामृगाः सिंहा द्वीपिव्याघ्रमृगावृकाः॥२९॥ ऋ
क्षास्तरक्षवः कंकाः कथं तेभ्यो न बिभ्यसे॥ मदान्वितानां घोराणां कुंजराणां तरस्विनां॥३०॥ कथमेका महारण्ये न बिभेषि वरानने॥ कासि कस्य
कुतश्चत्वं किंनिमित्तं च दंडकान्॥३१॥ एका चरसि कल्याणि घोरान्राक्षससेवितान्॥ इति प्रशस्ता वैदेही रावणेन महात्मना॥३२॥ द्विजातिवे
षेण हि तं दृष्ट्वा रावणमागतं॥ सर्वैरतिथिसत्कारैः पूजयामास मैथिली॥३३॥ उपानीयासनं पूर्वं पाद्येनाभिनिमंत्र्य च॥ अब्रवीत्सिद्धमित्येव
तदा तं सौम्यदर्शनम्॥३४॥ द्विजातिवेषेण समीक्ष्य मैथिली समागतं पात्रकुसुंभधारिणं॥ अशक्यमुद्वेष्टुमपायदर्शनान्न्यमंत्रयद्ब्राह्मण
वत्तथागतं॥३५॥ इयं बृसी ब्राह्मण काममास्यतामिदं च पाद्यं प्रतिगृह्यतामिति॥ इदं च सिद्धं वनजातमुत्तमं त्वदर्थमव्यग्रमिहोपभुज्यतां
॥३६॥ निमंत्र्यमाणः प्रतिपूर्णभाषिणीं नरेंद्रपत्नीं प्रसमीक्ष्य मैथिलीं॥ प्रसह्य तस्याहरणे दृढं मनः समर्पयामास वधाय रावणः॥३७॥ ततः
सुवेषं मृगयागतं पतिं प्रतीक्षमाणा सहलक्ष्मणं तदा॥ निरीक्षमाणा हरितं ददर्श तन्महद्वनं नैव तु रामलक्ष्मणौ॥३८॥ ॥इत्यार्षे
श्रीरामायणे वा० आरण्यकांडे षट्चत्वारिंशः सर्गः॥४६॥ ॥७॥ ॥७॥ ॥श्रीरामाय नमः॥७॥

गतं रावणं ब्राह्मणवदेवन्यमंत्रयत् पाठांतरं त्वन्नाशकृकल्पितं अयमेव रक्षःसंहारोपायश्च इति दर्शनादित्यपि गूढमत्र॥३५॥ निमंत्रणप्रकारः इयं बृसीत्यादि वनजातं वन्यपदा
र्थमेव सिद्धं कृतं तदिहोपभुज्यतां॥३६॥ एवं निमंत्र्यमाणो रावणः आत्मवधाय स्वनाशाय तस्याः प्रसह्य हरणे मनो दृढं निश्चितं समर्पयामास सम्यग्वधाय कृतवानित्यर्थः
॥३७॥ सुवेषं शोभनाकारं मृगयागतं मृगयां प्रतिगतं हरितं श्यामं॥३८॥ ॥इति रामाभिरामे श्रीरामा० रामेति० आर० षट्चत्वारिंशः सर्गः॥४६॥ ॥७॥ ॥७॥

रावणेन त्विति आत्मानं जिहीर्षुणा परिव्राजकरूपेण रावणेन पृष्टा वैदेही आत्मना स्वयमेवात्मानं शशंस ॥१॥ ननु पृष्टा मात्रं कर्तव्यं किं प्रतिवचनेनेत्याह ब्राह्मणश्चेति एवमनु
क्त इत्यार्षः सन्धिः अनुक्तः अनुक्तप्रतिवचनः ॥२॥३॥ सर्वकामसमृद्धिनि ब्राह्मणादित्वादिनिः ॥४॥ राजमंत्रीभिः राज्ञो राज्यनिर्वाहकैर्मंत्रिभिरित्यर्थः ॥५॥ सम्भ्रियमाणे संपाद्यमाने
संभार इत्यर्थः भर्तारं दशरथं ममार्या मम पूज्या श्वश्रूः अनार्येति क्वचित्पाठः श्वशुरं सुकृतेन परिग्रहवररूपेण सुकृतेन वशीकृत्य यद्वा धर्मेण शापयित्वेत्यर्थः मम भ
र्तुः प्रव्राजनं भरतस्याभिषेचनमिति ॥७॥ द्वौ वरौ अयाचत ॥८॥९॥ अन्वर्थैः अनुगतार्थैः सप्रयोजनैः रूपसौभाग्यक्षेमैरर्थैः याचनं सर्वाण्युक्तमवक्तनितु भर्तुर्दास्यामि रामाभिषे

रावणेन तु वैदेही तदा पृष्टा जिहीर्षुणा ॥ परिव्राजकरूपेण शशंसात्मानमात्मना ॥१॥ ब्राह्मणश्चातिथिश्चैष अनुक्तो हि शपेत मां ॥ इति ध्या
त्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥२॥ दुहिता जनकस्याहं मैथिलस्य महात्मनः ॥ सीता नाम्नास्मि भद्रं ते रामस्य महिषी प्रिया ॥३॥ उषित्वा
द्वादश समा इक्ष्वाकूणां निवेशने ॥ भुंजाना मानुषान्भोगान्सर्वकामसमृद्धिनि ॥४॥ तत्र त्रयोदशे वर्षे राजामंत्रयत प्रभुः ॥ अभिषेचयितुं रा
मं समेतो राजमंत्रिभिः ॥५॥ तस्मिन्संभ्रियमाणे तु राघवस्याभिषेचने ॥ कैकेयी नाम भर्तारं ममार्या याचते वरं ॥६॥ परिगृह्य तु कैकेयी श्वशुरं
सुकृतेन मे ॥ मम प्रव्राजनं भर्तुर्भरतस्याभिषेचनम् ॥७॥ द्वावयाचत भर्तारं सत्यसंधं नृपोत्तमम् ॥ नाद्य भोक्ष्ये न च स्वप्स्ये न पास्ये च कदाचन ॥८॥
एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥ इति ब्रुवाणां कैकेयीं श्वशुरो मे स पार्थिवः ॥९॥ अयाचतार्थैरन्वर्थैर्न च याचां चकार सा ॥ मम भर्ता महातेजा
वयसा पंचविंशकः ॥१०॥ अष्टादश हि वर्षाणि मम जन्मनि गण्यते ॥ रामेति प्रथितो लोके सत्यवान्शुचिः ॥११॥ विशालाक्षो महाबाहुः सर्वभू
तहिते रतः ॥ कामार्तश्च महाराजः पिता दशरथः स्वयम् ॥१२॥ कैकेय्याः प्रियकामार्थं तं रामं नाभ्यषेचयत् ॥ अभिषेकाय तु पितुः समीपं राम
मागतं ॥१३॥ कैकेयी मम भर्तारमित्युवाच द्रुतं वचः ॥ तव पित्रा समाज्ञप्तं ममेदं शृणु राघव ॥१४॥ ॥७॥

43

१-वर्षे ४
-ह्रीववान् ३

वने विप्रमाकुर्विनिपातयामासापि नृपाश्चांचकारांगीकृतवती · वयसा पंचविंशकः वननिर्गमनकाले इति शेषः ननु विंदमयुक्तं तु तत्षोडशवर्षोयमिति विश्वामित्रप्रति द
शरथोक्तेः उषित्वा द्वादश समा इति अत्रोक्तेश्चेति चेन्न अत्यन्तरत्नोत अनितरहृणावस्थायामपि राज्यपत्नकवानित्यर्थेनात्यर्थेणास्य यानर्थोक्तेः सद्या निक्रान्तपंचविंश
क इत्यर्थः मम भर्ता वयसा महातेजा अतितरुणा इत्यर्थः पंचविंशकः सार्द्धोस्मि पंचविंशतत्वेन न्यक्षायमेव एतच्चेत्यनेनैव जगद्व्याप्तनतनोधिकं किंचिदस्तीति सूचयि
तुं न यो कि किरिनिनत्व ॥१०॥ तथा मम जन्मतो वनप्रवेशसमये ऽतीतानीत्यर्थः गणयत इत्यार्षं मे कन्त्वमम पञ्चतन्मात्रपंचमहाभूतपंचेन्द्रियाहंकारबुद्धिमनोरूपाणि अष्टा
दश वर्षाणि पर्वाणि जन्मनि कार्ये गण्यंत इति तन्मूलीभूता प्रकृतिरहमिति सूचितं ॥११॥ कामार्तः कैकेयी कामार्तः ॥१२॥१३॥१४॥

॥१५॥ अनृतान्मोचयनस्तत्र राज्यपालनेनेति शेषः॥१६॥१७॥ वैमात्रः पुत्र्यादिषु विमातृशब्द पाठेपि आर्षोणा असमेहोरसेणानेत्यर्थः विभिन्नायां मातुरपत्यं वैमात्रः॥१८॥१९॥
॥२०॥ कैकेय्याः कृतेन तन्निमित्तं॥२१॥ यदि वस्तुं शक्नोतर्हि मुहूर्तं समाश्वस विश्रामं कुर्वित्यर्थः॥२२॥ हत्वा आदायेति छेदः अदनमाइस्लदर्थमित्यर्थः॥२३॥ गोत्रमार्षकुलं प्रसिद्धवंश्य
क्तं यथा गोत्रं पितृकुलं मातुः॥२४॥२५॥२६॥ इत्थं पूर्वं श्रुत्वा यद्दृष्ट्वा चेत्यर्थः॥२७॥२८॥२९॥ वनेषु उपवनेषु॥३०॥ पञ्चेत्यादि रक्षोयोनौ तमोगुणप्रधानायां जन्मत्वात्

भरतायप्रदातव्यंइदंराज्यमकंटकं॥ त्वयातुखलुवस्तव्यंनववर्षाणिपंचच॥१५॥ वनेप्रव्रजकाकुत्स्थपितरंमोचयन्ननृतात्॥ तथेत्युवा
चतांरामःकैकेयीमकुतोभयः॥१६॥ चकारतद्वचःश्रुत्वाभर्ताममदृढव्रतः॥ दद्यान्नप्रतिगृह्णीयात्सत्यंब्रूयान्नचानृतं॥१७॥ एतद्ब्रा
ह्मणरामस्यव्रतंध्रुवमनुत्तमं॥ तस्यभ्रातातुवैमात्रोलक्ष्मणोनामवीर्यवान्॥१८॥ रामस्यपुरुषव्याघ्रःसहायःसमरेरिहा॥ सभ्रातालक्ष्म
णोनामब्रह्मचारीदृढव्रतः॥१९॥ अन्वगच्छद्धनुष्पाणिःप्रव्रजंतंमयासह॥ जटीतापसरूपेणमयासहसहानुजः॥२०॥ प्रविष्टोदंडका
रण्यंधर्मनित्योदृढव्रतः॥ तेवयंप्रच्युताराज्यात्कैकेय्यास्तुकृतेनत्रयः॥२१॥ विचरामद्विजश्रेष्ठवनंगंभीरमोजसा॥ समाश्वसमुहूर्तंतुशक्यंव
स्तुमिहत्वया॥२२॥ आगमिष्यतिमेभर्तावन्यमादायपुष्कलं॥ रुरून्गोधान्वराहांश्चहत्वादायामिषंबहु॥२३॥ सत्वंनामचगोत्रंचकुलमा
चक्ष्वतत्वतः॥ एकश्चदंडकारण्येकिमर्थंचरसिद्विज॥२४॥ एवंब्रुवत्यांसीतायांरामपत्न्यांमहाबलः॥ प्रत्युवाचोत्तरंतीव्रंरावणोराक्षसाधिपः
॥२५॥ येनवित्रासितालोकाःसदेवासुरमानुषाः॥ अहंसरावणोनामसीतेरक्षोगणेश्वरः॥२६॥ त्वांतुकांचनवर्णाभांदृष्ट्वाकौशेयवासिनीं
रतिंस्वकेषुदारेषुनाधिगच्छाम्यनिंदिते॥२७॥ बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः॥ सर्वासामेवभद्रंतेममाग्रमहिषीभव॥२८॥ लंकाना
मसमुद्रस्यमध्येमममहापुरी॥ सागरेणपरिक्षिप्तानिविष्टागिरिमूर्धनि॥२९॥ तत्रसीतेमयासार्धंवनेषुविचरिष्यसि॥ नचास्यवन
वासस्यस्पृहयिष्यसिभामिनि॥३०॥ पंचदास्यःसहस्राणिसर्वाभरणभूषिताः॥ सीतेपरिचरिष्यंतिभार्याभवसिमेयदि॥३१॥ ॥

उद्रिक्तेनतमसाभगवन्मायया ज्ञानाच्छादनादेवमुक्तिः सर्वथानत्वज्ञोरावणः कथमेवंवदेदितितुश्रद्धाजाड्यमेवतत्त्वतश्चिह्नानुपलंभात् सीतारामौसर्वेश्वरावितितन्मात्रज्ञानंरा
वणस्यास्त्येवेत्यपिश्रद्धाजाड्यमेव विष्णुपुराणादिविरोधात् तथाचोक्तं विष्णुपुराणे मैत्रेयउवाच हिरण्यकशिपुत्वेचरावणत्वेचविष्णुना अवापनिहतोभोगानप्रा
प्यानमरैरपि नलयंतत्रतेनैवनिहतःसकथंपुनः संप्राप्तःशिशुपालत्वेसायुज्यंशाश्वतेहरौ एतदिच्छाम्यहंश्रोतुंसर्वधर्मभृतांवर कौतूहलपरेणैतत्पृष्टोमेवक्तुम

॥रा·वा·भा॥
॥६२॥

इति पराशरउवाच मैत्रेयेत्यस्यानुवधायाखिललोकोत्पत्तिस्थितिविनाशकारिणः पूर्वेन नृसहरूनानरसिंहरूपमाविष्कृतं तत्र हिरण्यकशिपोर्विष्णुरयमित्येवं न मनस्य
भूत निरतिशयपुण्यज्ञानसंभूतमेतत्त्वमिति निरजोद्रेकश्चेति कारणमिति स्तज्ञावनायोगान्नोवाप्रवधर्द्धेनुकीतिरतिशयामेवाखिलत्रैलोक्याधिकाधारिणीं दृशानतत्वेन
भोगासंपदसवाप्तमानस्तस्मिन्ननादिनिधने परब्रह्मभूते भगवत्यनालंबनीकृतेमनस्यलवलयं दृशाननत्वेष्वनेगपराधीनतयाज्ञानकौसमासक्तचेतसोदाशारथिरूपधारि
णस्तद्रूपदर्शनमेवासीत् नायमच्युतेइत्यासक्तिर्विषयतोनतः कारणस्यमानुषवुद्धिरेवके वलमभूत् विषयत इति विषयतोपीत्यर्थः तस्मिन्नपि समये विस्रुत्ववुद्धिर्नासीदिति
भावः पुनर[illegible]च्युतविनिपातनमात्रफलमखिलभूमंडलश्लाघ्ये चेदिराजकुलजन्माव्याहतं चैश्वर्यं शिशुपालत्वे चावाप तत्राप्यखिलान्येव भगवन्नामकारणानि अभवत्
न् नामानि गोविंदादीनि कारणानि गवांरक्षणादीनीत्यर्थः ततश्च तत्कारणकृतानां तेषामशेषाणामेवाच्युतनाम्ना मनवरतमनेकजन्मसंवर्धितविद्वेषानुवंधि
तो विनिंदन् संतर्जनादिषूच्चारणमकरोत् तच्च रूपमुत्फुल्लपद्मदलामलाक्षमत्युज्वलपीतवस्त्रधार्यमलकिरीटकेयूरकटकोपशोभितमुदारपीवरचतुर्बाहुशंखच
क्रगदाधरमिति पीठवैरानुभावादटनभोजनस्नानासनशयनादिष्ववस्थान्तरेष्वेवापरयावस्थान्यचेतसः ततस्तमेवाक्रोशेषूच्चारयंस्तमेव हृदयेधारयन्नात्मवधाय
भगवद्धस्तचक्रांशुमालोज्वलमक्षयतेजःस्वरूपं परमब्रह्मस्वरूपमपगतरागद्वेषादिदोष ~~रागद्वेषादिदोषं~~ भगवंतमद्राक्षीत् तावच्च भगवच्चक्रेणाशुव्यापादितः तेनैतत्स्म
रणदग्धाखिलाघसंचयो भगवतैवांतमुपनीतस्तस्मिन्नेवलयमुपययौ एतत्तवाभिहितं भगवान् कीर्तितः संस्मृतश्च द्वेषानुवंधेनापिखिलसुरासुरादिदुर्लभं फलंप्रय
च्छति किमुत सम्यक् भक्तिमतामिति लोकरक्षानुसीनात्सादृश्यात् सीतादुर्ध्याहरणाज्ञानतापि त्वसंपत्यानष्टधे भगवतः प्रवृत्तिः एवं चतुर्द्दशोक्तीनामपवादकारणान्यथा
याजनप्रयासस्तीर्थादीनां विफल एव विष्णुपुराणोक्तीत्येव भागवतेउक्तं एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयमिति एतेइत्यनेन पूर्वोक्ताअवताराश्चत्वारः स्वपरा
मृष्यंते पुंसः परमेश्वरस्य तत्रावताराः अंशाः अन्ये च द्याद्यः कलाः यद्यपि कृष्णोप्यंश एव तथैव दशमे तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंसनइत्याद्युक्तेः उज्जहारात्मनः केशौ
सितकृष्णौ महामुने इति विष्णुपुराणाद्युक्तेः द्वितीये भागवते प्येवं भारतेप्येवमेव एतेनामिवाम्यावतीर्णस्येति दशमस्थश्लोकव्याख्यानमपास्तं तथापि तत्कारणकृतनामं
तबलानामंकुशोःतानकार्यानाटनाच्च शंखचक्रादीनां प्रत्यक्षतो दर्शनाच्च स्वयं भगवानित्युक्तिः तेनावताराणां वताराणां न तेऽन्यूनत्वमिति भ्रमः कार्यः श्रीधरोपि मत्स्याद्य
वताराणां सर्वज्ञत्वसर्वशक्तिमत्वेपि यावदुपयोगमेवज्ञानशक्त्याविष्कारः अज्ञानाविष्काराद्धवदृश्याः कृष्णे त्वनल्पः यथाभिमन्युमरणेनाद्य न च सन्ति इति आसमंततस्त
स्यांराणमिति यथाद्रौपद्याः समाधानयतकालेनाद्वारकायां सन्निहितः किंतु सोभवधार्थं गतोभवतामयं क्लेशः इति सोभवधे च मायिकं वसुदेवशरीरं दृष्ट्वामोह इत्या
युज्ञानतापमल्पं रामावतारेपिज्ञानाविष्कारस्तत्रतत्र दर्शितोदर्शयिष्यते च अवताराण्यष्टमे विराज एवांशाः भागवतेप्रथमेतनो येध्याय जगृहे पौरुषं रूपं भगवान्महदादि
भिः संभूतं षोडशकलमादौ लोकसिसृक्षयेत्यादिनावैराजरूपमुक्त्वा एतन्नानावताराणां निधानं वीजमव्ययं यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादय इत्युक्तेः एतत्तु उक्तं वै
राजं निधानं कार्यावसाने प्रवेशस्थानं वीजमुद्गमकारणं अव्ययं स्वयं चिरस्थायि न केवलमवताराणामेव वीजं किंतु सर्वेषामित्याहयस्येति यद्यपि विराड्जीव एव तथा

७ नींरा

44

नदा १०

॥रामः॥
॥६२॥

पिनद्धंनर्यामिग्राम्लत्योपासनायेवमुक्तं सिनकृत्स्नकेशोच्चारेणचनेषांमूर्धन्यत्वेनमुखत्वानघनमुखयोः प्रधानयोर्मदंशयोस्तन्वज्जयोस्तद्वर्णयोर्वैकुंठस्यमृतलस्ययोर्विसृशोष
यारवनाइतिसूचितमनएवानेकृत्स्नप्रनिर्देवदृतेनत्वांविनास्वर्गोनशोभतेःनस्त्वमागच्छेतिनिवदिनामिनिस्पष्ठंपुराणेषु अत्ररामंप्रन्यपिनर्थेवाक्तंअंशत्वंवैष्णोपाधिकंमा
मायाःसांशत्वादित्यलम॥३१॥ ॥रावणेनेति ऊपिनाऊपिनेव॥३२॥पर्वतनसमुद्रोपमाभ्यांधैर्यगांभीर्यंदर्शितं॥३३॥न्यग्रोधपरिमंडलेनन्यग्रोधपरिणाह तद्व

रावणेनैवमुक्तानुकुपिनाजनकात्मजा॥प्रत्युवाचानवद्यांगीनमनादृत्यराक्षसं॥३२॥महागिरिमिवाकंप्यंमहेंद्रसदृशंपतिं॥महोदधिमि
वाक्षोभ्यमहंराममनुव्रता॥३३॥सर्वलक्षणसंपन्नंन्यग्रोधपरिमंडलं॥सत्यसंधंमहाभागमहंराममनुव्रता॥३४॥महाबाहुंमहोरस्कंसिंह
विक्रांतगामिनं॥नृसिंहंसिंहसंकाशमहंराममनुव्रता॥३५॥पूर्णचंद्राननंरामंराजवत्संजितेंद्रियं॥पृथुकीर्तिंमहाबाहुमहंराममनुव्र
ता॥३६॥त्वंपुनर्जंबुकःसिंहीमामिहेच्छसिदुर्लभां॥नाहंशक्यात्वयास्प्रष्टुमादित्यस्यप्रभायथा॥३७॥पादपान्कांचनान्नूनंबहून्पश्यसिमंदभा
क॥राघवस्यप्रियांभार्यांयस्त्वमिच्छसिराक्षस॥३८॥क्षुधितस्यचसिंहस्यमृगशत्रोस्तरस्विनः॥आशीविषस्यवदनानदंष्ट्रामादातुमिच्छसि
॥३९॥मंदरंपर्वतश्रेष्ठंपाणिनाहर्तुमिच्छसि॥कालकूटविषंपीत्वास्वस्तिमानगंतुमिच्छसि॥४०॥अक्षिसूच्याप्रमृजसिजिह्वयालेढिच
क्षुरं॥राघवस्यप्रियांभार्यामधिगंतुंत्वमिच्छसि॥४१॥अवसज्यशिलांकंठेसमुद्रंतर्तुमिच्छसि॥सूर्यचंद्रमसौचोभौपाणिभ्यांहर्तुमिच्छ
सि॥४२॥योरामस्यप्रियांभार्यांप्रधर्षयितुमिच्छसि॥अग्निप्रज्वलितंदृष्ट्वावस्त्रेणाहर्तुमिच्छसि॥४३॥कल्याणवृत्तांयोभार्यांरामस्याहर्
तुमिच्छसि॥अयोमुखानांशूलानामग्रेचरितुमिच्छसि॥रामस्यसदृशींभार्यांयोधिगंतुंत्वमिच्छसि॥४४॥यदंतरंसिंहसृगालयोर्वनेय
दंतरंस्यंदनिकासमुद्रयोः॥४५॥

न्सर्वोप्यरामश्चरणमनुदिश्यानुसरणमेवव्रतंयस्याःसा॥३४॥ सिंहस्यविक्रांतंपदक्षेपस्तद्वत्पदनिक्षेपसगमनशीले सिंहसंकाशंपराक्रमेइतिभावः नृसिंहमित्युपहिर
ण्यकशिपुहंतृत्वंव्यंग्यं॥३५॥राजाचासौवत्सःश्रेष्ठराजवत्सः यद्वादशरथपुत्रं॥३६॥यथाआदित्यप्रभाआदित्यात्पृथक्कृत्यकेनापिस्प्रष्टुमशक्यातथाहंशक्तिमतोरवियोगादि
तिगूढं॥३७॥कांचनेवृक्षदर्शनमुमूर्षुलक्षणं मंदेक्षीणभाग्यरादिभजनिसमंदभाक॥३८॥क्षुधितस्यसिंहस्यसर्पस्यवदनाद्दंष्ट्राग्रहणेच्छासदृशीमदिच्छाएवसर्वत्रनिद
र्शनालंकारः॥३९॥४०॥लेढिलेक्षि॥४१॥४२॥४३॥ ४४॥स्यंदनिकाक्षुद्रनदी॥४५॥

सौवीरमद्यदिति शेषः

सुराग्र्यमुत्तमं सौवीरकमारनालं काञ्जिकं काञ्चनसीससदृशलोहयोरित्यर्थः॥४६॥ हस्ती गजः बिडालो मार्जारः मद्गुर्जलकाकः॥४७॥ जरां जीर्णावस्थां सुखोदर्कां मक्षिकयावगीर्णं भुक्तमाज्यं यथा नाशयति तद्वत्॥४८॥ इतीव इत्येवमदुष्टभावा अत्यन्तदुःखजनकं तत्पूर्वोक्तं वाक्यं · वातोद्धता महावातप्रकम्पमाना॥४९॥ भयकारणार्थं भयोत्पादनार्थं॥५०॥ इति रामाभिरामे श्रीरा॰आर॰सप्तचत्वारिंशः सर्गः॥४७॥ ॥एवमिति परुषं क्रोशवशेन वर्णानां च वर्णनं वा चारणानन्तरमुनिकृतं भक्षणमित्यर्थः साध्वसः ऊर्ध्वः॥१॥ सापत्नः शिवाय एनसा प

सुराग्र्यसौवीरकयोर्यदन्तरं तदन्तरं दाशरथेस्तवैव च॥ यदन्तरं काञ्चनसीसलोहयोर्यदन्तरं चन्दनवारिपङ्कयोः॥४६॥ यदन्तरं हस्तिबिडालयोर्वने तदन्तरं दाशरथेस्तवैव च॥ यदन्तरं वायसवैनतेययोर्यदन्तरं मद्गुमयूरयोरपि॥४७॥ यदन्तरं हंसकगृध्रयोर्वने तदन्तरं दाशरथेस्तवैव च॥४७॥ तस्मिन्सहस्राक्षसमप्रभावे रामे स्थिते कार्मुकबाणपाणौ॥ हृतापि तेहं न जरां गमिष्ये आज्यं यथा मक्षिकयावगीर्णं॥४८॥ इतीव तद्वाक्यमदुष्टभावा सुदुष्टमुक्त्वा रजनीचरं तं॥ गात्रप्रकम्पाद्व्यथिता बभूव वातोद्धता सा कदलीव तन्वी॥४९॥ तां वेपमानामुपलक्ष्य सीतां स रावणो मृत्युसमप्रभावः॥ कुलं बलं नाम च कर्म चात्मनः समाचचक्षे भयकारणार्थं॥५०॥ ॥इत्यार्षे श्रीमद्रामायणे वा॰ आरण्यकाण्डे सप्तचत्वारिंशः सर्गः॥४७॥ ॥एवं ब्रुवत्यां सीतायां संरब्धः परुषं वचः॥ ललाटे भ्रुकुटिं कृत्वा रावणः प्रत्युवाच ह॥१॥ भ्राता वैश्रवणस्याहं सापत्न्यो वरवर्णिनि॥ रावणो नाम भद्रं ते दशग्रीवः प्रतापवान्॥२॥ यस्य देवाः सगन्धर्वाः पिशाचपतगोरगाः॥ विद्रवन्ति सदा भीता मृत्योरिव सदा प्रजाः॥३॥ येन वैश्रवणो भ्राता वैमात्रः कारणान्तरे॥ द्वन्द्वमासादितः क्रोधाद्रणे विक्रम्य निर्जितः॥४॥ मद्भयार्त्तः परित्यज्य स्वमधिष्ठानमृद्धिमत्॥ कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः॥५॥ यस्य तत्पुष्पकं नाम विमानं कामगं शुभं॥ वीर्यादावर्जितं भद्रे येन यामि विहायसं॥६॥ मम संजातरोषस्य मुखं दृष्ट्वैव मैथिलि॥ विद्रवन्ति परित्रस्ताः सुराः शक्रपुरोगमाः॥७॥

त्न्य इति पाठे भ्रातुः सपत्नीपुत्रस्तेन प्रसिद्ध इत्यर्थः भ्रातेत्यत्र च सापत्न्यादिति तत्रायं पाठः एतेन तत्कलत्रग्रहणस्यायुक्तं॥२॥३॥ वैमात्रः पाठे द्वैमात्र इति पाठे द्वितीयामाता द्वैमातानरपत्यमित्यर्थे मातुरदित्युल्लाभाव आर्षः भस्य द्विशब्दस्य द्विपूरणार्थत्वे पित्रंशस्वार्थत्वाभावान्नामित्यन्ये कारणान्तरे निमित्तविशेषे द्वन्द्वं द्वन्द्वयुद्धं आसादितः प्रापितः॥४॥ स्वमधिष्ठानं स्वां पुरीं लंकां कैलासाश्रयणात् प्रवलाश्रयणाद्वा॥५॥ येन पुष्पकेन वीर्यादावर्जितं आच्छिद्य गृहीतं मयेति शेषः येन पुष्पकेण॥६॥ ॥७॥ ॥श्रीरामायनमः॥ ॥७॥

45

नीत्रांभुरणिममभयाद्धिशिरंभुः संपद्यते।८। यत्र च रामिथेन सर्गेण गाछामीनि यावत् यत्र च निष्क्रामितं तत्र भवंतीत्यन्वयः।९ समुद्रस्य पारे मम लंकानामपुरीत्यन्वयः॥१०॥ प्राका
स्य पांडुरत्वं सुधालेपात् राजनत्वाद्याहे स्तः कक्ष्या अवष्ठदायस्यास्ता तोरणं प्राकारं॥११॥१२॥ मानुषीणां नारीणां न स्मरिष्यसि शोभे पक्षी मन्नगरे दिव्यनारीसमागमादिति भा
वः सुपतन्मानुषदिव्यभोगसत्त्वान्यत्र नृभयं सुगापतन् तुलेभमिति भावः॥१३॥ गतायुषः एकादशसहस्रसंख्यामितायुषः रवणादिव धजक्रोधेन मयावधाद्यानत्वं॥१४॥ योग

यत्र निष्क्राम्यहं तत्र मारुतो वाति शंकितः॥ नीत्रांभुः शिशिरांभुश्च भयात्संपद्यते रवि॥८॥ निष्कंपपत्रास्तरवो नद्यश्च स्तिमितोदकाः॥ भवंति यत्र तत्रा
हं निष्क्रामि च चरामि च॥९॥ मम पारे समुद्रस्य लंकानामपुरी शुभा॥ संपूर्णा राक्षसैर्घोरैर्यथेंद्रस्यामरावती॥१०॥ प्राकारेण परिक्षिप्ता पांडुरेण विरा
जिता॥ हेमकक्ष्या पुरी रम्या वैदूर्यमयतोरणा॥११॥ हस्त्यश्वरथसंबाधा तूर्यनादविनादिता॥ सर्वकामफलैर्वृक्षैः संकुलोद्यानभूषिता॥१२॥ तत्र
त्वं वसहे सीते राजपुत्रि मया सह॥ न स्मरिष्यसि नारीणां मानुषीणां मनस्विनी॥१३॥ भुंजाना मानुषान्भोगान्दिव्यांश्च वरवर्णिनि॥ न स्मरि
ष्यसि रामस्य मानुषस्य गतायुषः॥१४॥ स्थापयित्वा प्रियं पुत्रं राज्ञा दशरथेन यः॥ मंदवीर्यस्ततो ज्येष्ठः सुतः प्रस्थापितो वनं॥१५॥ तेन किं भ्रष्टरा
मेण गतचेतसा॥ करिष्यसि विशालाक्षि तापसेन तपस्विना॥१६॥ रक्षराक्षसभर्तारं कामय स्वयमागतं॥ न मन्मथशराविष्टं प्रत्याख्यातुं त्वमर्ह
सि॥१७॥ प्रत्याख्याय हि मां भीरु पश्चात्तापं गमिष्यसि॥ चरणेनाभिहत्येव पुरूरवसमुर्वशी॥१८॥ अंगुल्या न समो रामो मम युक्तः स मानुषः॥ तव भा
ग्येन संप्राप्तं भज स्व वरवर्णिनि॥१९॥ एवमुक्ता तु वैदेही क्रुद्धा संरक्तलोचना॥ अब्रवीत्परुषं वाक्यं रहिते राक्षसाधिपं॥२०॥ कथं वैश्रवणं देवं सर्व
देवनमस्कृतं॥ भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि॥२१॥ अवश्यं विनशिष्यंति सर्वे रावण राक्षसाः॥ येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेंद्रि
यः॥२२॥ अपहृत्य शचीं भार्यां शक्यमिंद्रस्य जीवितुं॥ न हि रामस्य भार्यां मामानीय स्वस्तिमान्भवेत्॥२३॥

मो मंदवीर्य इति ज्ञात्वा ज्येष्ठोपि ~~राज्येष्ठो~~ यि राज्ये प्रियं भरतं स्थापयित्वा वनं प्रस्थापितः॥१५॥ तेन गतस्त्वेन सा किं करिष्यसीत्यन्वयः भ्रष्टराज्यत्वाच्चेतोहीनत्वं तापसेन तप
स्विना तापसश्चेष्ठेन तपस्विना यद्वा तापसेन शोचनत्वेन तपस्विना अपूरेण॥१६॥ रक्षरक्षणो रक्षपालय॥१७॥ उर्वशी पुरूरवसं चरणेनाभिहत्य यथा पश्चात्तापं गतेति पुराणेषु
सिद्धं तथा पश्चात्तापं गमिष्यसि॥१८॥ अंगुल्या न समः अंगुलीनापि तुल्यो न अनेन मया नीतां पुनः राम आनयिष्यतीति न शंक्यमिति भावः संप्राप्तं मामिति शेषः॥१९॥ रहिते
रामरहिते आश्रमे स्थितेति शेषः ईदृशावंशस्य दशोक्तत्वमनुचितमिति मिथ्यैवान्यवंशं स्ववंशत्वेन कथयसीति भावः।२१। एवंभूतराज्ञः प्रजानां सर्वथा नाशः स्मम नयने न व

तस्मेन ५

अथ प्रतिरूपरूपां अनुपमसौंदर्यां मोक्षः मत्वारिनिशेषः अतिमलिनांतःकरणत्वान्मोक्षो ज्ञानैकसाध्यस्तद्वनात्सीवेतिभावः॥२४॥ अत्र सर्गे रावणोक्तौ सप्तसप्तकवेत्ताहमष्टाष्ट
कविभूषितः पंचपंचकतत्त्वज्ञो रावणोहमजस्त्वमाप्तितिश्लोकः कश्चित्पद्य तेनतमेवव्याचक्षते सप्तसप्तकं षडंगसहितवेदोपवेदसहितचतुर्दशविद्यारूपं तद्वेत्ता
हमष्टाष्टकविभूषितः चतुःषष्टिकलाभूषितः पंचपंचकतत्त्वज्ञः पंचविंशतितत्त्वज्ञः पंचविंशतितत्त्वस्वरूपवेत्ता नित्यानित्यवस्तुविवेकवानितियावत्तदितिसकतत्का
यथाख्यानत्वान्प्रेक्षितुमिति ज्ञायते आर्षपाठेऽर्थासंगतिरिति परपाठपर्यालोचनयात्तृतीयपाठोक्तज्ञानवत ईदृशकर्मणि प्रवृत्तिरयुक्तैवेति निभाति॥२४॥ ॥इतिरा

जीवेच्छिरं वज्रधरस्य पश्चाच्छचीं प्रधृष्याप्रतिरूपां ॥ न मादृशीं राक्षस धर्षयित्वा पीतामृतस्यापि तवास्ति मोक्षः॥२४॥ ॥इत्यार्षे श्रीमद्रामा
यणे आरण्यकांडे अष्टचत्वारिंशः सर्गः॥४९॥ ॥सीतायावचनं श्रुत्वा दशग्रीवः प्रतापवान्॥ हस्ते हस्तं समाहत्य चकार सुमहद्वपुः॥१॥ स
मैथिलीं पुनर्वाक्यं बभाषे वाक्यकोविदः॥ नोन्मत्तया श्रुतौ मन्ये मम वीर्यपराक्रमौ॥२॥ उद्वहेयं भुजाभ्यां तु मेदिनीमंबरे स्थितः॥ आपिबेयं समु
द्रं च मृत्युं हन्यां रणे स्थितः॥३॥ अर्कं रुंध्यां शरैस्तीक्ष्णैर्विभिंद्यां हि महीतलं॥ कामरूपेण उन्मत्ते पश्य मां कामरूपिणं॥४॥ एवमुक्तवतस्तस्य राव
णस्य शिखिप्रभे॥ क्रुद्धस्य हरिपर्यंते रक्ते नेत्रे बभूवतुः॥५॥ सद्यः सौम्यं परित्यज्य तीक्ष्णरूपं स रावणः॥ स्वं रूपं कालरूपाभं भेजे वैश्रवणानुजः॥६॥
[redacted]ः॥ संरक्तनयनः श्रीमांस्तप्तकांचनभूषणः॥ क्रोधेन महताविष्टो नीलजीमूतसन्निभः॥७॥ दशास्यो
विंशतिभुजो बभूव क्षणदाचरः॥ स परिव्राजकच्छद्म महाकायो विहाय तत्॥८॥ प्रतिपेदे स्वकं रूपं रावणो राक्षसाधिपः॥ रक्तांबरधरस्त
स्थौ स्त्रीरत्नं प्रेक्ष्य मैथिली॥९॥

माभिरामे श्रीरा० आरण्यकांडे अष्टचत्वारिंशः सर्गः॥४८॥ ॥हस्ते हस्तं समाहत्य समाहत्येत्यर्थः विनिश्चयोऽनियावत् सहिष्णुरयमित्येवं कस्मात्तथा कदाचिदेषा हरणसमये
क्रौर्यं कुर्यादिति निशंक्याक्रूरस्त्रीयमहद्रूपांगीकारः यद्वा कपटेनापि शांतस्वभावपतिवेषधारणात् नह्यपस्वाभाव्येन हरणे तस्य पतिवद्गता द्दृष्ट्वा स्वरूपग्रहणं मम रावणस्यापि भ
यं वेषः क्रौर्यप्रतिबंधक इत्यनेनाश्च हस्ते हस्तं ताडनं इति बोध्यं॥१॥ न श्रुतौ अग्रे वक्ष्यमाणौ विनिशेषः॥२॥ नाने वाह उद्वहेयमित्यादि अपिबेयमिति अइनियमविस्मयार्थं च स्वयं॥३॥
कामेन च्छिन्नजेन रूपेण च उन्मत्ते इत्यर्थः॥४॥ हरिपर्यंते श्यामप्रांते॥५॥ सौम्यं भिक्षुरूपं तीक्ष्णरूपं प्रशस्ततीक्ष्णरूपं स्वमन्यतुल्यरूपं भेजे॥६॥ ॥७॥ परिव्राजकच्छद्म कपटपरिव्राज

॥८॥ ॥९॥ ५ क

भास्करस्यप्रभामिवनष्टाअपिपूर्यंनेरुपामरूपतायांछंदोरागप्रउक्तेः ॥१०॥ ११ ॥१२॥ मानुषोभावःमनुष्याणाम्विषयकोभावःस्नेहबंधः ॥१३॥१४॥ प्रियवादिनीरावणाद्न्यामि
निशेषः ॥१५॥ काममोहितेनजयार्हेन्यन्यतानोचिन्तेहृष्टानःक्षुब्धःरवेरोहिणीमिवखरवआकाशेभूम्येचरोहिणीयाबुधोरोहिणीस्वमानरपरिकामानरा स्त्रीयानं नदानत्सहश
मिरंदेयारं यथायथोक्तोचक्रत्वनमिन्तनिशयोक्तिरत्नव्यंगया सीनयासयोमरणपर्यवसायिशापदानंनुसमूलनाशनस्यवेदवत्येशनप्रतिज्ञानस्यनिर्वाहाय ऋषीणांदेवा

सतामसितकेशांतां भास्करस्य प्रभामिव ॥ वसनाभरणोपेतां मैथिलीं रावणोब्रवीत् ॥१०॥ त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि
मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥११॥ मां भजस्व चिराय त्वमहं श्लाघ्यः पतिस्तव ॥ नैव चाहं क्वचिद्भद्रे करिष्ये तव विप्रियं ॥१२॥
त्यज्यतां मानुषो भावो मयि भावः प्रणीयतां ॥ राज्याच्च्युतमसिद्धार्थं रामं परिमितायुषं ॥१३॥ कैर्गुणैरनुरक्तासि मूढे पंडितमानिनि ॥
यः स्त्रिया वचनाद्राज्यं विहाय ससुहृज्जनं ॥१४॥ अस्मिन्व्यालानुचरिते वने वसति दुर्मतिः ॥ इत्युक्त्वा मैथिली वाक्यं प्रियार्हां प्रियवा
दिनीं ॥१५॥ अभिगम्य सुदुष्टात्मा राक्षसः काममोहितः ॥ जग्राह रावणः सीतां बुधः खे रोहिणीमिव ॥१६॥ वामेन सीतां पद्माक्षीं मूर्द्धजे
षु करेण सः ॥ ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥१७॥ तं दृष्ट्वा गिरिशृंगाभं तीक्ष्णदंष्ट्रं महाभुजं ॥ प्राद्रवन्मृत्युसंकाशं भयार्त्ता वनदेवताः ॥१८॥
स च मायामयो दिव्यः खरयुक्तः खरस्वनः ॥ प्रत्यदृश्यत हेमांगो रावणस्य महारथः ॥ ततस्तां परुषैर्वाक्यैरभितर्ज्य महास्वनः ॥ अंकेनादाय
वैदेहीं रथमारोपयत्तदा ॥२०॥ सा गृहीतानुचुक्रोश रावणेन यशस्विनी ॥ रामेति सीता दुःखार्त्ता रामं दूरंगतं वने ॥२१॥ तामकामां स कामार्त्तः पन्न
गेंद्रवधूमिव ॥ विचेष्ठमानामादाय उत्पपाताथ रावणः ॥२२॥ ततः सापक्षसेंद्रेण ह्रियमाणा विहायसा ॥ भृशं चुक्रोश मत्तेव भ्रांतचित्ता यथा

महा ८

नामग्रेरामप्रतिज्ञानस्यचनिर्वाहाय ॥१६॥ वामेनेति अननुरक्तयाशापदानभियास्ववामांगासनत्वनिवारणायैवंग्रहणमित्याकूः ॥१७॥१८॥१९॥ परुषैःइतःपरंरामप्रत्याशा
त्याज्येत्येवमादिभिः अंकेनहस्तान्तरेणेत्यर्थः ॥२०॥ अतिचुक्रोशेत्यादिनाछायायाअपिमनुष्यभावनासा ॥२१॥ अकामांविरागिणींविचेष्टमानां ततआत्मानंमोचयि
तुं ॥२२॥ मत्तेवअतिदुःखवशाउन्मत्तेवतथाभ्रांतचित्ताआतुराशोकातुरायथाक्रोशतितथाचुक्रोशअत्रैवयथाभ्यासवचेष्टानांनाटयत्वंसूचितं ॥२३॥ ॥७॥

॥२४॥२५॥ ननु नामेति प्रसिद्धौ विनेता शिक्षकः न शाधि प्राप्तकालं शासनं न करोषि हिर्वाक्यालंकारे शोकातुरत्वाद्धाधिकपदं न दोषाय ॥२६॥ स्वयमेव वनंत्रमुक्तयनिनन्वि
नि अविनीतस्य पुरुषस्याविनयरूपकर्मणः फलं सद्यो न दृश्यते यतस्तत्र कालोप्यंगी भवति सहकारिकारणं भवति पक्तिः पाकः ॥२७॥ अधुना स्वयं शापमाह

हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक ॥ ह्रियमाणां न जानीषे रक्षसा कामरूपिणा ॥२४॥ जीवितं सुखमर्थं च धर्महेतोः परित्यज
न् ॥ ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥२५॥ ननु नामाविनीतानां विनेतासि परंतप ॥ कथमेवंविधं पापं न त्वं शाधि हि राव
णं ॥२६॥ ननु सद्योऽविनीतस्य दृश्यते कर्मणः फलं ॥ कालोप्यंगी भवत्यत्र सस्यानामिव पक्तये ॥२७॥ त्वं कर्म कृतवानेतत्कालोपह
तचेतनः ॥ जीवितान्तकरं घोरं रामाद्व्यसनमाप्नुहि ॥२८॥ हन्तेदानीं सकामा तु कैकेयी बान्धवैः सह ॥ ह्रियेयं धर्मकामस्य धर्मपत्नी यश
स्विनः ॥२९॥ आमन्त्रये जनस्थानं कर्णिकारांश्च पुष्पितान् ॥ क्षिप्रं रामाय शंसध्वं सीतां हरति रावणः ॥३०॥ हंससारससंघुष्टां वन्दे गोदा
वरीं नदीं ॥ क्षिप्रं रामाय शंस त्वं सीतां हरति रावणः ॥३१॥ दैवतानि च यान्यस्मिन्वने विविधपादपे ॥ नमस्करोम्यहं तेभ्यो भर्तुः शंसत मां हृ
तां ॥३२॥ यानि कानिचिदप्यत्र सत्त्वानि विविधानि च ॥ सर्वाणि शरणं यामि मृगपक्षिगणानपि ॥३३॥ ह्रियमाणां प्रियां भर्तुः प्राणेभ्योपि
गरीयसीं ॥ विवशा ते हृता सीता रावणेनेति शंसत ॥३४॥ विदित्वा मां महाबाहुरमुत्रापि महाबलः ॥ आनेष्यति पराक्रम्य वैवस्वतहृता
मपि ॥३५॥ सा तदा करुणा वाचो विलपन्ती सुदुःखिता ॥ वनस्पतिगतं गृध्रं ददर्शायतलोचना ॥३६॥ सा तमुद्वीक्ष्य सुश्रोणी रावणस्य
वशंगता ॥ समाक्रन्दद्भयपरा दुःखोपहतया गिरा ॥३७॥ जटायो पश्य मामार्य ह्रियमाणामनाथवत् ॥ अनेन राक्षसेन्द्रेण करुणं पापकर्मणा
॥३८॥ नैष वारयितुं शक्यस्त्वया क्रूरो निशाचरः ॥ सत्त्ववान्जितकाशी च सायुधश्चैव दुर्मतिः ॥३९॥ रामाय तु यथातत्त्वं जटायो हरणं मम ॥

लक्ष्मणाय च तत्सर्वमाख्यातव्यमशेषतः ॥४०॥

त्वमिति नियसनं पुत्रपौत्रादिनाशरूपं ॥२८॥ सकामा नु जाने निशेषः यत इत्यादि ॥२९॥ हरतीति शंसध्वमिति संबंधः ॥३०॥३१॥३२॥३३॥ तेभ्य इति नेसीनेत्यन्वयः ॥३४॥ अमुत्रापि प
रलोके पि गतां वैवस्वतहृतामपि मां विदित्वा पराक्रम्य पराक्रमं कृत्वा आनेष्यत्येव अतो यूयं शंसतेत्यन्वयः ॥३५॥ गृध्रं जटायुः ॥३६॥ ॥३७॥ ॥३८॥ तुभ्यमिति निपाठे त्वयेत्यर्थे
आधेनन न शक्य इत्यत्र हेतुः सत्त्ववानित्यादि ॥३९॥ ४०॥ ॥७॥

इति रा० आ० एकोनपंचाशः ॥ ४९ ॥ ॥ तं शब्दं जटायो पक्ष्यमासि निशब्दं । अवसुप्तः । भोजनोत्तरं दिवैव गाढसुप्तोपि शुश्रुवे । ततस्तेन शब्देन प्रबुद्धो रावणं निरैक्षत ॥ १ ॥ २ ॥ दश-
ग्रीवेति संबुद्धिः अहं सत्यसंश्रवः सत्यप्रतिज्ञः सीतापहरणे ऽदृष्टसहायस्त्वमुक्तत्वादिति भावः नाम्ना जटायुरिति प्रसिद्धः ऽतो मृत्युमक्ष्मसीदृशं कर्म कर्तुं नार्हसि भ्रातरिति
साम प्रयोगः यद्येवं तत्त्वस्यापि मित्रत्वात्सत्यप्रतिज्ञत्वान्मया सह युद्धं भावीति दृढप्रयोगश्च बोध्यः ॥ ३ ॥ राजेति सर्वलोकराजत्वेन तवापि राजेति ध्वनितं ॥ ४ ॥ धर्मपत्नीत्यनेन तद्र-
णं महापापं सूचितम् ॥ ५ ॥ कथं राजेति भवानिति शेषः धर्मप्रजापालनरूपे ॥ ६ ॥ राजदारा इति तद्धरणस्य गुरुतरत्वसमत्वादिति भावः ॥ ७ ॥ यस्य पुरुषस्य परः स्वेतरः पा-

इत्यार्षे श्रीरामायणे वा० आरण्यकांडे एकोनपंचाशः सर्गः ॥ ४९ ॥ ॥ तं शब्दमवसुप्तस्तु जटायुरथ शुश्रुवे ॥ निरैक्षद्रावणं क्षिप्रं वैदेहीं च द-
दर्श सः ॥ १ ॥ ततः पर्वतकूटाभस्तीक्ष्णतुंडः खगोत्तमः ॥ वनस्पतिगतः श्रीमान्व्याजहार शुभां गिरं ॥ २ ॥ दशग्रीव स्थितो धर्मे पुराणे सत्य-
संश्रवः ॥ भ्रातस्त्वं निंदितं कर्म कर्तुं नार्हसि सांप्रतं ॥ ३ ॥ जटायुर्नाम नाम्नाहं गृध्रराजो महाबलः ॥ राजा सर्वस्य लोकस्य महेंद्रवरुणोपमः
॥ ४ ॥ लोकानां च हिते युक्तो रामो दशरथात्मजः ॥ तस्यैषा लोकनाथस्य धर्मपत्नी यशस्विनी ॥ ५ ॥ सीता नाम वरारोहा यां त्वं हर्तुमिहेच्छसि
कथं राजा स्थितो धर्मे परदारान्परामृशेत ॥ ६ ॥ रक्षणीया विशेषेण राजदारा महाबल ॥ निवर्तय मतिं नीचां परदाराभिमर्शनात् ॥ ७ ॥
न तत्समाचरेद्धीरो यत्परोस्य विगर्हयेत ॥ यथात्मनस्तथान्येषां दारा रक्ष्या विमर्शनात ॥ ८ ॥ अर्थं वा यदि वा कामं शिष्टाः शास्त्रेष्वनागतं ॥ व्य-
वस्यंत्यनु राजानं धर्मं पौलस्त्यनंदन ॥ ९ ॥ राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः ॥ धर्मः शुभं वा पापं वा राजमूलं प्रवर्तते ॥ १० ॥
पापस्वभावश्चपलः कथं त्वं रक्षसां वर ॥ ऐश्वर्यमभिसंप्राप्तो विमानमिव दुष्कृती ॥ ११ ॥ ॥ ७ ॥ ॥ १ ॥

णीयत्कर्म विगर्हयेत् न तत्समाचरेत् स्वदारवत् परदाराश्च विमर्शनात् परस्पर्शाद्रक्ष्याः ॥ ८ ॥ शास्त्रेष्वनागतं शास्त्रेष्वनुद्गतं परमसूक्ष्मत्वाच्छास्त्रतोनवगतमपि अर्थं
वा कामं वा धर्मं वा राजानमनुसृत्य व्यवस्यंति शास्त्रे ऽस्फुटमपि राज्ञो आचरणं दृष्ट्वा प्रजा आचरंतीति तस्माद्राज्ञो धर्मप्रवृत्तिरनुचितेति तात्पर्येण व्यवस्यंति राजानमिति पा-
ठ शास्त्रेष्वनागतं तत्राप्रतिपादितं धर्मं राजानो न व्यवस्यंति नेच्छंतीत्यर्थः तस्माच्छास्त्रानुसारि धर्ममेव मतिं कुर्यादित्याशयः ॥ ९ ॥ तथा राजा द्रव्याणामुत्तमवस्तूनामुत्त-
मो निधिः तथा धर्मश्च कामश्चेति पाठे प्रजानामिति राजेति च शेषः द्रव्याणामिति पाठे वदेव यतो धनादिकं राजमूलं अतो राजा प्रधानं धर्मादिरूप इत्यर्थः शुभं कामं ॥ १० ॥
एवंभूतराजधर्महीनेन त्वयि कथमैश्वर्यागम इत्याह पापेति दुष्कृती स्वायोग्यदेवयानमिव ॥ ११ ॥

ननु ऐश्वर्येण प्रणयमपि मय्यनुमीयतां तत्राह कामेति यः पुमान् कामस्वभावो भवति सोसौ तं स्वभावं प्रमार्जितुं न शक्यः तन्मार्जने हि धर्मेण पापं नुदतीति श्रुतेः धर्मे
णास्मात्त्वत्तस्मिन्नस्तीत्याह नहीति यस्माद्दुष्टात्मनामार्ये पुण्यं चिरं चिरकालेनापि नावसति ॥१२॥ यदा रामः यस्माद्रामः इत्यर्थः ॥१३॥ मनपराधोऽसि
द्धः खरादिवधादित्याशंक्याह पूर्वमिति अनपराधे हेतुः पूर्वमतिहतः अतिक्रान्तो विन्नहन्तः ॥१४॥ गमिष्यसीत्यत्र काकुः न जीवन् गमिष्यसीत्यर्थः ॥१५॥ त्वा त्वां घोरेण
वसुधां मा दहेद्राम इति शेषः इन्द्राशनिरिव प्रयुक्तं वज्रं ॥१६॥ १७॥ भारः भारवत्तदन्नमनामयं रोगानुत्पादकं ॥१८॥ यत्कर्म कृत्वा धर्मः कीर्तिः पारलौकिकी प्रणयाति

कामस्वभावो यः सोसौ न शक्यस्तं प्रमार्जितुं ॥ न हि दुष्टात्मनामार्यमावसन्त्यालये चिरम् ॥१२॥ विषये वा पुरे वा ते यदा रामो महाबलः ॥ ना
पराध्यति धर्मात्मा कथं न स्थापयध्यसि ॥१३॥ परिभूयं परा स्वाहं तेनो जनस्थानगतः सदा ॥ अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥१४॥
अत्र ब्रूहि यथा तत्त्वं को रामस्य व्यतिक्रमः ॥ यस्य त्वं लोकनाथस्य हृत्वा भार्यां गमिष्यसि ॥१५॥ क्षिप्रं विसृज वैदेहीं मा त्वा घोरेण चक्षु
षा ॥ दहेद्दहनभूतेन वृत्रमिन्द्राशनिर्यथा ॥१६॥ सर्पमाशीविषं बद्ध्वा वस्त्रान्तेन नावबुध्यसे ॥ ग्रीवायां प्रतिमुक्तं च कालपाशं न पश्यसि
॥१७॥ स भारः सौम्य भर्तव्यो यो नरं नावसादयेत् ॥ तदन्नमपि भोक्तव्यं जीर्यते यदनामयं ॥१८॥ यत्कृत्वा न भवेद्धर्मो न कीर्तिर्न यशो ध्रु
वम् ॥ शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत् ॥१९॥ षष्टिवर्षसहस्राणि जातस्य मम रावण ॥ पितृपैतामहं राज्यं यथावदनुतिष्ठ
तः ॥२०॥ वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ॥ न चाप्यादाय कुशली वैदेहीं मे गमिष्यसि ॥२१॥ न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्य
तः ॥ हेतुभिर्न्यायसंयुक्तैर्ध्रुवां वेदश्रुतीमिव ॥२२॥ युध्यस्व यदि शूरोऽसि मुहूर्तं तिष्ठ रावण ॥ शयिष्यसे हतो भूमौ यथा पूर्वं खरस्तथा ॥२३॥

शयता बलात्पैश्वर्यातिशयजं यशस्तन्न भवेत् नोत्पद्येत पूर्वार्जितं च धर्मादि न भवेत् नश्येत् किं च येन शरीरस्य खेदः तत्कर्म कः स्वहितः समाचरेत् न कोपीत्यर्थः ॥१९॥
षष्टिवर्षसहस्राणि गतानीत्यर्थः राज्यं पक्षिराजमित्यर्थः पितृपैतामहं पितृपितामहक्रमागतमित्यर्थः ॥२०॥ मे वैदेहीं दशरथमित्रत्वान्मम स्नुषां वैदेहीमादा
यन कुशली गमिष्यसीत्यर्थः ॥२१॥ मम पश्यतः मां पश्यन्तमनादृत्येत्यर्थः न्यायसंयुक्तैर्विशेषिकायुक्ततर्काभासयुक्तैर्हेतुभिर्हेत्वाभासैर्ध्रुवां सनातनीं धर्मव्यव
स्थापयां वेदश्रुतीं छान्दसो दीर्घः तच्छास्त्राधीना यथा पूर्वापरमीमांसा न्यायविरोधहेतुभिरन्यथा कर्तुं न शक्नोति तद्वदित्यर्थः ॥२२॥ ॥७॥ ॥२॥

मुहूर्तं रामागमनपर्यंतं ॥ २३ ॥ संयुगे रामेणानिशेषः न वधिष्यन्ति अपि तु वधिष्यन्तीत्यर्थः अनेन रामस्याभ्युदयत्वं व्यंग्यं ॥ २४ ॥ न श्यसे पलायसि न संशय इत्यन्वयः ॥ २५ ॥ जीव
मानस्य जीवनः न यियिष्यसि नेष्यसि ॥ २६ ॥ २७ ॥ २८ ॥ यथा प्राणं यथावलमित्यर्थः ॥ २९ ॥ ॥ इति आरण्यकाण्डे पंचाशः सर्गः ॥ ५० ॥ ॥ इतीति ॥ १ ॥ वातोद्धुतयो

~~पुरा स्ववादि शैलेऽस्मि मुहूर्तं तिष्ठ रावण ॥ शयिष्यसे हतो~~ यथापूर्वं खरस्तथा ॥ २३ ॥ असकृत्संयुगे येन निहता दैत्यदानवाः ॥ न चिराच्ची
रवासास्त्वां रामो युधि वधिष्यति ॥ २४ ॥ किं नु शक्यं मया कर्तुं गतो दूरं नृपात्मजे ॥ क्षिप्रं त्वं नश्यसे नीच तयोर्भीतो न संशयः ॥ २५ ॥ न हि
मे जीवमानस्य नयिष्यसि शुभामिमां ॥ सीतां कमलपत्राक्षीं रामस्य महिषी प्रियां ॥ २६ ॥ अवश्यं तु मया कार्यं प्रियं तस्य महात्मनः ॥ जीविते
नापि रामस्य तथा दशरथस्य च ॥ २७ ॥ तिष्ठ तिष्ठ दशग्रीव मुहूर्तं पश्य रावण ॥ वृंतादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ २८ ॥ युद्धाति
थ्यं प्रदास्यामि यथाप्राणं निशाचर ॥ २९ ॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे पंचाशः सर्गः ॥ ५० ॥ ॥ इत्युक्तः क्रोधताम्राक्षस्त
प्तकांचनकुंडलः ॥ राक्षसेंद्रोभिदुद्राव पतगेंद्रममर्षणः ॥ १ ॥ स संप्रहारस्तुमुलस्तयोस्तस्मिन्महामृधे ॥ बभूव वातोद्धुतयोर्मेघयोर्गग
ने यथा ॥ २ ॥ तद्बभूवाद्भुतं युद्धं गृध्रराक्षसयोस्तदा ॥ सपक्षयोर्माल्यवतोर्महापर्वतयोरिव ॥ ३ ॥ ततो नालीकनाराचैस्तीक्ष्णाग्रैश्च विकर्णि
भिः ॥ अभ्यवर्षन्महाघोरैर्गृध्रराजं महाबलः ॥ ४ ॥ स तानि शरजालानि गृध्रः पत्ररथेश्वरः ॥ जटायुः प्रतिजग्राह रावणास्त्राणि संयुगे ॥ ५ ॥ तस्य
तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ॥ चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥ ६ ॥ अथ क्रोधाद्दशग्रीवो जग्राह दश मार्गणान ॥ मृत्युदंड
निभान्घोराञ्शत्रोर्निधनकांक्षया ॥ ७ ॥ स तैर्वाणैर्महावीर्यः पूर्णमुक्तैरजिह्मगैः ॥ विभेद निशितैस्तीक्ष्णैर्गृध्रं घोरैः शिलीमुखैः ॥ ८ ॥ स
राक्षसरथे पश्यन्जानकीं वाष्पलोचनां ॥ अचिंतयित्वा वाणांस्तान्राक्षसं समभिद्रवत् ॥ ९ ॥ ॥ ९ ॥ श्रीरामायनमः ॥ ७ ॥

र्वातेन प्रवर्तितयोः ॥ २ ॥ माल्यवतोः द्वौ माल्यवंतौ एको दंडकारण्ये अपरो महत्पार्श्वे सपक्षयोः पक्षसहितयोः यद्वा यथार्थोक्तौ कल्पनेयं यद्वि द्वौ माल्यवंतौ सपक्षौ युद्ध्येयातां न
दानन्सद्दशभिर्निनेनाश्रयमनवफलनि ॥ ३ ॥ ४ ॥ प्रतिजग्राह सेहे रावणास्त्राणि रावणक्षिप्तानि शरजालविशेषणं अस्यतेरौणादिकस्त्रन् रावणास्त्रानीति पाठस्तु सु
गमस्त्व ॥ ५ ॥ तस्य रावणस्य गात्रे इत्यन्वयः ॥ ६ ॥ ७ ॥ पूर्णमुक्तैः आकर्षपूर्णकृष्टधनुर्मुक्तैः ॥ ८ ॥ ९ ॥

स १

॥१०॥११॥ आवारितः आसमंताद्घ्राणः कुलायं वासस्थानं संप्राप्तो यः पक्षी स इव बभौ ॥१२॥१३॥ नन्वस्मिन्प्रशरावरं कवचं च व्यधुनोत्पातयामास शरप्रक्षेपकारणं नन्वद्धितीयं धनुरुश्च
बभंजेत्यन्वयः व्यधुनोत्कंपयतिस्म रावणमिति शेषः ॥१४॥१५॥ त्रिवेणुर्युगंधरः ॥१६॥ ग्राहिभिश्छत्रादिधारकैः ॥१७॥१८॥ अंकेन कटिभागेन ॥१९॥२०॥२१॥ प्रनष्टानि

तेनास्य सशरं चापं मुक्तामणिविभूषितं ॥ चरणाभ्यां महातेजा बभंज पतगोत्तमः ॥१०॥ ततोन्यद्धनुरादाय रावणः क्रोधमूर्छितः ॥ ववर्ष श
रवर्षाणि शतशोथ सहस्रशः ॥११॥ शरैरावारितस्तस्य संयुगे पतगेश्वरः ॥ कुलायमभिसंप्राप्तः पक्षिवच्च बभौ तदा ॥१२॥ स तानि श
रजालानि पक्षाभ्यां तु विधूय ह ॥ चरणाभ्यां महातेजा बभंजास्य महद्धनुः ॥१३॥ तच्चाग्निसदृशं दीप्तं रावणस्य शरावरं ॥ पक्षाभ्यां च महा
तेजा व्यधुनोत्पतगेश्वरः ॥१४॥ काचनोरश्छदान्दिव्यान्पिशाचवदनान् ॥ तांश्चास्य जवसंपन्नान् जघान समरे बली ॥१५॥ अथ त्रिवेणु
संपन्नं कामगं पावकार्चिषं ॥ मणिसोपानचित्रांगं बभंज च महारथं ॥१६॥ पूर्णचंद्रप्रतीकाशं छत्रं च व्यजनैः सह ॥ पातयामास वेगेन ग्राहि
भी राक्षसैः सह ॥१७॥ सारथेश्चास्य वेगेन तुंडेन च महच्छिरः ॥ पुनर्व्यपहरच्छ्रीमान्पक्षिराजो महाबलः ॥१८॥ स भग्नधन्वा विरथो हताश्वो
हतसारथिः ॥ अंकेनादाय वैदेहीं पपात भुवि रावणः ॥१९॥ दृष्ट्वा निपतितं भूमौ रावणं भग्नवाहनं ॥ साधु साध्विति भूतानि गृध्रराजम
पूजयन् ॥२०॥ परिश्रांतं तु तं दृष्ट्वा जरया पक्षियूथपं ॥ उत्पपात पुनर्हृष्टो मैथिलीं गृह्य रावणः ॥२१॥ तं प्रहृष्टं निधायांके रावणं जनकात्मजां
गच्छंतं खड्गशेषं च प्रणष्टहतसाधनं ॥२२॥ गृध्रराजः समुत्पत्य रावणं समभिद्रवत् ॥ समावार्य महातेजा जटायुरिदमब्रवीत् ॥२३॥ व
ज्रसंस्पर्शबाणस्य भार्यां रामस्य रावण ॥ अल्पबुद्धे हरस्येनां वधाय खलु रक्षसां ॥२४॥ समित्रबंधुः सामात्यः सबलः सपरिच्छदः ॥ विषपानं पिब
स्येतत्पिपासित इवोदकं ॥२५॥ अनुबंधमजानंतः कर्मणामविचक्षणाः ॥ शीघ्रमेव विनश्यंति यथा त्वं विनशिष्यसि ॥२६॥ बद्धस्त्वं कालपाशेन क्व
गतस्तस्य मोक्ष्यसे ॥ वधाय बडिशं गृह्य सामिषं जलजो यथा ॥२७॥

स्वरान ४

48

स्वनष्टव नष्टानि हतानि गृध्रेण नाशितानि साधनानि युद्धसाधनानि यस्य तं ॥२२॥ समावार्य सन्निरुध्य ॥२३॥ वज्रतुल्यः स्पर्शो येषां तादृशा बाणा यस्य ॥२४॥ सबलः सचतु
रंगबलः परिच्छदः दासीदासादिः निदर्शनार्थं नत्वसहितो न शिष्यसीति नान्वयः ॥२५॥ अनुबंधं फलं ॥२६॥ तस्य ततः कालपाशान्मोक्ष्यसे इत्यर्थः बडिशं मत्स्यवेधनं जल
जो मत्स्यः ॥२७॥

मस्याश्रमस्यनवधर्षणंत्वत्कृतमभिभवंनहिक्षमिष्येते॥२८॥ यथायादृशंत्वयाकृतंकर्मननत्तस्कराचरितोमार्गःनवीरसेवितः॥२९॥३०॥ परेणकालेनमृत्युकालेअधर्म्येणन ज्जनकंप्रतिपन्नोसि [illegible] प्राप्नोसि॥३१॥ अस्यकर्मणःकर्तुःपापानुबन्धःपापफलसंबन्धआवश्यकःशास्त्रदृष्टःकोनुपुमान्वैनिश्चयेनतत्कर्मकुर्वीत लोकाधिपतिरपि इन्द्रादिरपिसमर्थोपि पापफलंकर्मनकुर्यात् स्वयंभूर्भगवानपिपापपुण्ययोस्तत्फलनरधिकारिस्वयमपिकर्तुमकर्तुं [illegible] मन्यथाकर्तुंशक्तोपिनेदृशंकर्मकुर्यात्

नहिजातोदुराधर्षौकाकुत्स्थौनवरावण॥ धर्षणंचाश्रमस्यास्यक्षमिष्येतेनुराघवौ॥२८॥ यथात्वयाकृतंकर्मभीरुणालोकगर्हितं॥ तस्कराचरितोमार्गोनैषवीरनिषेवितः॥२९॥ युध्यस्वयदिशूरोसिमुहूर्त्तंतिष्ठरावण॥ शयिष्यसिहतोभूमौयथाभ्राताखरस्तथा॥३०॥ परेतकालेपुरुषोयत्कर्मप्रतिपद्यते॥ विनाशायात्मनोधर्म्यंप्रतिपन्नोसिकर्मतत्॥३१॥ पापानुबंधोवैयस्यकर्म्मणःकोनुतत्पुमान्॥ कुर्वीतलोकाधिपतिःस्वयंभूर्भगवानपि॥३२॥ एवमुक्त्वाशुभंवाक्यंजटायुस्तस्यरक्षसः॥ निपपातभृशंपृष्ठेदशग्रीवस्यवीर्यवान्॥३३॥ तंगृहीत्वानखैस्तीक्ष्णैर्विददारसमन्ततः॥ अधिरूढोगजारोहोयथास्याद्दुष्टवारणं॥३४॥ विददारनखैरस्यतुंडंपृष्ठेसमर्पयन्॥ केशांश्चोत्पाटयामासनखपक्षमुखायुधः॥३५॥ सतदागृध्रराजेनक्लिश्यमानोमुहुर्मुहुः॥ अमर्षस्फुरितोष्ठःसन्प्राकंपतचराक्षसः॥३६॥ संपरिष्वज्यवैदेहींवामेनांकेनरावणः॥ तलेनाभिजघानार्त्तोजटायुंक्रोधमूर्छितः॥३७॥ जटायुस्तमतिक्रम्यतुंडेनास्यखगाधिपः वामबाहून्दशतदाव्यपाहरदरिंदमः॥३८॥ सछिन्नबाहुःसद्योवैबाहवःसहसाभवन्॥ विषज्वालावलीयुक्तावल्मीकादिवपन्नगाः॥३९॥ ततःक्रोधाद्दशग्रीवःसीतामुत्सृज्यवीर्यवान्॥ मुष्टिभ्यांचरणाभ्यांचगृध्रराजमपोथयत्॥४०॥ ततोमुहूर्त्तंसंग्रामोबभूवातुलवीर्ययोः॥ राक्षसानांचमुख्यस्यपक्षिणांप्रवरस्यच॥४१॥

नादृशमैश्वर्यमनेनत्वयाक्रियमाणंकर्माचिरादेवफलदंभविष्यतीतितात्पर्यं॥३२॥ पृष्ठेपश्चाद्भागे॥३३॥ दुष्टवारणमधिरूढोगजारोहोहस्तिपकोगजविषयेयथास्यात् यादृशव्यापारोभवेत् गजरक्षणकरणव्यापारोभवेत् तथाविदारणेनिपाठेपिक्षतानिचकारेत्यर्थः॥३४॥ अस्यविददारएनंविददारेत्यर्थःतादृशक्रियाणांबाहुल्यात् पुनरुक्तिः॥३५॥३६॥ वैदेहींसंपरिष्वज्यपतनेनपलायनभिया॥३७॥ ततलप्रहारमतिक्रम्यसोढ्वाव्यपाहरत् युगपद्दशापितुंडेनछित्वात्रोटितवान्॥३८॥ सछिन्नबाहुःकीर्तिनवाहुरपितस्यबाहवःपुनःसहसासमभवन्वल्मीकान्पन्नगाइव॥३९॥ ४०॥४१॥

यायच्छमानस्यव्यायामंपराक्रमंकुर्वाणस्य॥४३॥अल्पजीविनःघटीमात्रावस्थानोचितप्राणाः॥४३॥४४॥अग्निदावंदावाग्निंपरिपानआर्षः॥४५॥संगृह्यबाहुभ्यांसा(
लिंग्य॥४६॥ ॥इतिरामाभिरामेश्रीरा०आरं०एकपंचाशःसर्गः॥५१॥ ॥सान्त्विति नृपाणांसुखदुःखेषुनिमित्तसूचनं वामदक्षिणाक्षिस्पंदनादिरूपंलक्षणंचिह्नं
थाजलादर्शादावात्मनोऽशिरसोदर्शनंचलक्षणंस्वप्नःपुरुषंकृष्णंकृष्णदंतंप्रपश्यतिसएनंहन्तीत्यादिस्वप्नाध्यायोपदिष्टंतथाशकुनीनांवामदक्षिणगमनविशेषद(

नस्यव्यायच्छमानस्यरामस्यार्थेसरावणः॥पक्षौपादौचपार्श्वौचखड्गमुद्धृत्यसोच्छिनत्॥४२॥सच्छिन्नपक्षःसहसारक्षसारौद्रकर्मणा॥नि(
पपातमहागृध्रोधरण्यामल्पजीविनः॥४३॥तंदृष्ट्वापतितंभूमौक्षतजार्द्रंजटायुषं॥अभ्यधावतवैदेहीस्वबंधुमिवदुःखिता॥४४॥
तंनीलजीमूतनिकाशकल्पंसपांडुरोरस्कमुदारवीर्यं॥ददर्शलंकाधिपतिःपृथिव्यांजटायुषंशांतमिवाग्निदावम्॥४५॥ततस्तुतं
पत्ररथंमहीतलेनिपातितंरावणवेगमर्दितं॥पुनश्चसंगृह्यशशिप्रभाननारुरोदसीताजनकात्मजातदा॥४६॥ इत्यार्षे
श्रीमद्रामायणेवा०आरण्यकांडेएकपंचाशःसर्गः॥५१॥ ॥सातुताराधिपमुखीरावणेननिरीक्ष्यतं॥गृध्रराजंविनिहतंविलला
पसुदुःखिता॥१॥निमित्तंलक्षणंस्वप्नंशकुनिस्वरदर्शनं॥अवश्यंसुखदुःखेषुनराणांपरिदृश्यते॥२॥ननूनंरामजानासिमहद्व्यस
नमात्मनः॥धावंतिनूनंकाकुत्स्थमदर्थंमृगपक्षिणः॥३॥अयंहिकृपयाराममांत्रातुमिहसंगतः॥शेतेविनिहतोभूमौममभाग्या
द्विहगमः॥४॥त्राहिमामद्यकाकुत्स्थलक्ष्मणेतिवरांगना॥सुसंत्रस्तासमाक्रंदच्छृण्वतांतुयथांतिके॥५॥तांक्लिष्टमाल्याभरणां
विलपंतीमनाथवत्॥अभ्यधावतवैदेहींरावणोराक्षसाधिपः॥६॥तांलतामिववेष्टंतीमालिंगंतींमहाद्रुमान्॥मुंचमुंचेतिबहुशःप्रा

५२
र्शनं·तथानेत्रयोःस्वप्नेतोदर्शनमनुभवः एतत्सर्वंयथायोगंपरिदृश्यतेसर्वेणलक्षणशब्दानमितिपाठेअंगस्फुरणादिज्ञानमित्यर्थःशकुनिरुतंमृगाद्युपलक्षणं॥२॥
कितनस्त्राहननूनमिति·मदर्थंमद्यशःसूचनप्रयोजनमुद्दिश्यमृगपक्षिणोऽशुभसूचनमार्गेणधावंति·त्वंतुमेःसूचितमपिव्यसनंमहद्व्यसनंनजानासिनूनंजानी(
यास्वेच्छेयापेक्षयाइतिमात्यर्थंमितिलोकाभिनयेनरामोपालंभः॥३॥४॥यथांतिकेनिकटस्थितानामपिएवतांश्रवणंभवेत्तथासमाक्रंदत्·ननुस्त्रेःशीघ्रंरामागमनंमाभू
दितिमात्यर्थेण॥५॥क्लिष्टानिपरिमृदितानिमाल्याभरणानियस्याःसा॥६॥वेष्टंतीलतामिववृक्षानालिंगंती मुंचमुंचेतिबहुशोवृक्षानवदंतीमितिशेषःसोचय
सोवचयेत्यर्थोवाप्रापइत्यन्वयःधावंतीसमीपगतआसीत्॥७॥

॥२॥ [illegible]

49

जीवितनाथमनेनपरस्त्रीकेशस्पर्शोयस्यकस्यापिजीवितापहारीतिबोधितं ॥८॥ अमर्यादंत्यक्तस्वस्वप्रकृतिकंजलमुष्णमग्निःशीतइत्येवमादि॰अंधेनतमसावायुना
स्पंनरेणच ॥९॥ मर्यादात्यागमेवाहनवातीति॰देवोत्रस्थापिबत लोकस्यएवदिव्येनचक्षुषा सीतांपरामृष्टांरक्षसाकेशेषुगृहीतांदृष्ट्वा ॥१०॥ श्रीमाननिखिलसकलैश्वर्यवान्
पितामहः कृतंयदर्थमवतीर्णादेवानानेनतत्कार्यंकृतंसिद्धमित्यब्रवीत् ॥११॥ प्रहृष्टव्यथयोर्हेतुमाहदृष्ट्वेति॰तत्कालंनारीनदेव्यायाहरणंदृष्ट्वातन्मायामोहितत्वाद्व्यथिताः
परेच्छयाआयासंविनैवसपरिवारस्यरावणस्यनाशंप्राप्तंबुद्ध्वाहृष्टाइत्यर्थः भावसंधिरत्र ॥१२॥१३॥ तप्ताभरणवर्णांगीतप्तकांचनाभरणवत्सदृशवर्णयुक्तांगी॰सौदा

क्रोशंतींरामरामेतिरामेणरहितांवने ॥ जीवितांतायकेशेषुजग्राहांतकसन्निभः ॥८॥ प्रधर्षितायांवैदेह्यांबभूवसचराचरं ॥ जगत्स
र्वममर्यादंतमसांधेनसंवृतं ॥९॥ नवातिमारुतस्तत्रनिष्प्रभोभूद्दिवाकरः ॥ दृष्ट्वासीतांपरामृष्टांदेवोदिव्येनचक्षुषा ॥१०॥
कृतंकार्यमितिश्रीमान्व्याजहारपितामहः ॥ प्रहृष्टाव्यथिताश्चासन्सर्वेतेपरमर्षयः ॥११॥ दृष्ट्वासीतांपरामृष्टांदंडका
रण्यवासिनः ॥ रावणस्यविनाशंचप्राप्तंबुद्ध्वायदृच्छया ॥१२॥ सतुतांरामरामेतिरुदंतींलक्ष्मणेतिच ॥ जगामादायचाकाशं
रावणोराक्षसेश्वरः ॥१३॥ तप्ताभरणवर्णांगीपीतकौशेयवासिनी ॥ रराजराजपुत्रीतुविद्युत्सौदामिनीयथा ॥१४॥ उद्धूतेनच
वस्त्रेणतस्याःपीतेनरावणः ॥ अधिकंपरिबभ्राजगिरिर्दीप्तइवाग्निना ॥१५॥ तस्याःपरमकल्याण्यास्ताम्राणिसुरभीणिच ॥ पद्मप
त्राणिवैदेह्याअभ्यकीर्यंतरावणं ॥१६॥ तस्याःकौशेयमुद्धूतमाकाशेकनकप्रभं ॥ बभौचादित्यरागेणताम्रमभ्रमिवातपे ॥१७॥ तस्यास्तद्वि
मलंवक्त्रमाकाशेरावणांकगं ॥ नरराजविनारामंविनालमिवपंकजं ॥१८॥ बभूवजलदंनीलंभित्वाचंद्रइवोदितः ॥ सुललाटंसुकेशांतंपद्म
गर्भाभमव्रणं ॥१९॥

मिनीविद्युत्इतिसुदाम्नोवकुरन्नादिमत्वात्तद्वाविद्युदतिप्रकाशमानाभवतितत्कन्तीनेत्यर्थः ॥१४॥ अग्निनादीप्तोगिरिरिवेत्यनेनासत्तुमस्मता॰असंगायाअपिचिरकालस्या
रावणविनाशसान्निध्यद्योतनायकविःरावणेनतस्याआसक्तिंवर्णयति ॥१५॥ पद्मपत्राणिरावणमभ्यकीर्यंतरावणांगपतितान्यभूवन्नित्यर्थः ॥१६॥ आतपइत्यनेनदृ
ष्टतपइत्यर्थकेनसंध्याकालंलक्षयति॰तत्कालेआदित्यरागेणतत्किरणेनयुक्तमभ्रमिवतत्करयुतंवासोबभौ ॥१७॥ विनालमिवपंकजंशोकशुष्कत्वात् ॥१८॥ नीलंजल
दंभित्वातत्क्षणोदितश्चंद्रइवबभौ तत्कालेधूसरोहिसततंउदेतिवक्त्रंविशिनष्टिसुललाटमितिपद्मगर्भवदाभायस्यतत् ॥१९॥ ॥७॥ ॥७॥

रावणांकगं नव भाति विशेषः॥२०॥ रुदितं रदनवत्तत्वर्ग आपव अनएवापमस्पृष्टास्रं अपमार्जिताश्रुकं॥२१॥ स्विवोदितचंद्रवदयगनशोभं॥२२॥ शुशुभेशोभयनिस्मनीलंगजमाश्रि
ताकांचनीकांचीव॥२३॥ पद्मपीतापद्मकेसरवत्पीतदेहान तप्तभूषणा तप्तकांचनभूषणा॥२४॥ अभ्रमत्र चपलो नील इति पाठे चपला विद्युत्तया सहितो योघवान्मेघइवाभूदित्य
र्थः॥२५॥ उत्तमांगइति मानस्त्वयाऽसयादितोऽस्मन्मनोरथ इति हृष्टानदेवैः क्रियमाणा पुष्पवृष्टिस्तद्रुतमांगाच्युतानान्तकालेऽभूषोपपाने निकमकः वस्तुतो रावणसन्निधौ देवानां
तथाधैर्यासंभवात् उत्तमांगे धृतपुष्पाणां तद्वेगेन तन्नाश्रुतो तमांगच्युतेत्युक्तं अत एवाग्रे भूमौ पुष्पपुतमांगे दृष्ट्वा एभ्रावक्ष्यति॥ अभिज्ञानानि पुष्पाणि तानीमानीह लक्ष्मण अ

शुक्लैः सुविमलैर्दन्तैः प्रभावद्भिरलंकृतं॥ तस्याः सुनयनं वक्त्रमाकाशे रावणांकगं॥२०॥ रुदितं व्यपमृष्टास्रं चंद्रवत्प्रियदर्शनं॥ सुनासं चारु
ताम्रौष्ठमाकाशे हाटकप्रभं॥२१॥ राक्षसेंद्रसमाधूतं तस्यास्तद्वदनं शुभं॥ शुशुभे न विना रामं दिवा चंद्र इवोदितः॥२२॥ सा हेमवर्णा
नीलांगं मैथिली राक्षसाधिपं॥ शुशुभे काञ्चनी [redacted] काञ्चीनीलं गजमिवाश्रिता॥२३॥ सा पद्मपीता हेमाभा रावणं जनकात्मजा॥ वि
द्युद्घनमिवाविश्य शुशुभे तप्तभूषणा॥२४॥ तस्या भूषणघोषेण वैदेह्या राक्षसेश्वरः॥ बभूव विमलो नीलः सघोष इव तोयदः॥२५॥
उत्तमांगच्युता तस्याः पुष्पवृष्टिः समंततः॥ सीताया ह्रियमाणायाः पपात धरणीतले॥२६॥ सा तु रावणवेगेन पुष्पवृष्टिः समंततः॥ समा
धूता दशग्रीवं पुनरेवाभ्यवर्तत॥२७॥ अभ्यवर्तत पुष्पाणां धारा वैश्रवणानुजं॥ नक्षत्रमाला विमला मेरुं नगमिवोत्तमं॥२८॥ चरणान्नू
पुरं भ्रष्टं वैदेह्या रत्नभूषितं॥ विद्युन्मंडलसंकाशं पपात धरणीतले॥२९॥ तरुप्रवालरक्ता सा नीलांगं राक्षसेश्वरं॥ प्राशोभयत वैदेही गजं क
क्ष्येव काञ्चनी॥३०॥ तां महोल्कामिवाकाशे दीप्यमानां स्वतेजसा॥ जहाराकाशमाविश्य सीतां वैश्रवणानुजः॥३१॥ तस्यास्तान्यग्निवर्णानि भूषणानि महीतले
सघोषाण्यवशीर्यन्त क्षीणास्तारा इवांबरात्॥३२॥ तस्याः स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः॥ वैदेह्या निपतन्भाति गंगेव गगनाच्च्युता॥३३॥ उत्पा
तवाताभिहता नानाद्विजगणायुताः॥
मा भैरिति विधूताग्रा व्याजह्रुरिव पादपाः॥३४॥ नलि
न्यो ध्वस्तकमलास्त्रस्तमीनजलेचराः॥ सखीमिव ग
तोत्साहां शोचन्तीव स्म मैथिलीं॥३५॥

पितृकानि वैदेह्यामयाद्रत्नानि कानने इति॥२६॥ रावणागमने वेगजनितवायुना समाधूतापि पुनर्दशग्रीवमेवाभ्यवर्तत अभितो वर्तितेत्यर्थः अनुवृत्तेत्यायमानत्वात्॥२७॥२८॥२९॥
तरुप्रवालरक्ता रक्तवर्णा रक्तकिसलयवर्णेत्यर्थः कक्ष्या वा निशयादेवं वंशीस्याः कक्ष्या गजाच्छादिनि॥३०॥ तां सीतां मितन्नयः अत्र प्रकरणे वारं वैश्रवणानुजत्वोक्तिरीदृश
क्रियायामनर्हत्वोचितप्रदर्शनेन तच्छीघ्रफलदत्वं सूचयति॥३१॥ क्षीणाः क्षीणपुण्यास्ताराः ताराः रूपा विस्थिताः पुण्यक्षयेन च्युतार्थः॥३२॥३३॥ उत्पातवाताः दुष्टवाताः द्विजगणैः प
क्षिगणैर्युक्ताः व्याजह्रुरिव उत्प्रेक्षालंकारः॥३४॥ त्रस्तमीनप्रमृतिजले चरा यासां ताः सखीमिव मैथिलीं गतोत्साहां गतोत्साहमिति पाठे रावणेनास्याः कृष्णजलनया
गतप्राणा इत्यर्थः॥३५॥

तार

वैश्र २
भूषणानि २

50

रोषात्रावणविषयात् ॥३६॥ जलप्रपातरूपाण्यस्राणि मुखे येषां ते ॥३७॥३८॥ आर्जवमजैह्म्यं अनृशंसता दया यत्र यस्मादित्यर्थः ॥३९॥ गणशः संघशः वित्रस्तकाः स्वार्थे कः म
गवालकाः ॥४०॥ विलक्षणैः विगतलक्षणैः विगतशोभैरिति यावत् ॥४१॥ विक्रोशंती भिन्नार्थे पूर्वान्वयि ॥४२॥ धरणीतलमवेक्षमाणा रामलक्ष्मणागमनकांक्षया वस्तुतस्तद
जगमनाकांक्षयेति तत्त्वं विषमस्थो विलुलितो विशेषकस्तिलको यस्यास्ता ॥४३॥ भयभारपीडितास्तत्र विवर्णा वक्त्रेत्यर्थः ॥४४॥ ॥ इति रामाभिरामे श्रीरा० रा० नि० आ

समंतादभिसंपत्य सिंहव्याघ्रमृगद्विजाः ॥ अन्वधावंस्तदा रोषात्सीताछायानुगामिनः ॥३६॥ जलप्रपातास्रमुखाः शृंगैरुच्छ्रितबाहुभिः ॥ सी
तायां ह्रियमाणायां विक्रोशंतीव पर्वताः ॥३७॥ ह्रियमाणां तु वैदेहीं दृष्ट्वा दीनो दिवाकरः ॥ प्रविध्वस्तप्रभः श्रीमानासीत्पांडुरमंडलः
॥३८॥ नास्ति धर्मः कुतः सत्यं नार्जवं नानृशंसता ॥ यत्र रामस्य वैदेहीं सीतां हरति रावणः ॥३९॥ इति भूतानि सर्वाणि गणशः पर्यदेवयन् ॥ वि
त्रस्तका दीनमुखा रुरुदुर्मृगपोतकाः ॥४०॥ उद्वीक्ष्योद्वीक्ष्य नयनैर्भयादिव विलक्षणैः ॥ सुप्रवेपितगात्राश्च बभूवुर्वनदेवताः ॥४१॥ वि
क्रोशंतीं दृढं सीतां दृष्ट्वा दुःखं तथा गतां ॥ तां तु लक्ष्मण रामेति क्रोशंतीं मधुरस्वरां ॥४२॥ अवेक्षमाणां बहुशो वैदेहीं धरणीतलं ॥ स तामाकु
लकेशांतां विषमस्थविशेषकां ॥४३॥ जहारात्मविनाशाय दशग्रीवो मनस्विनीं ॥४३॥ ततस्तु सा चारुदती शुचिस्मिता विनाकृता बंधुजने
न मैथिली अपश्यती राघवलक्ष्मणावुभौ विवर्णवक्त्रा भयभारपीडिता ॥४४॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकांडे द्वि
पंचाशः सर्गः ॥५२॥ ॥ खमुत्पतंतं तं दृष्ट्वा मैथिली जनकात्मजा ॥ दुःखिता परमोद्विग्ना भये महति वर्तिनी ॥१॥ रोषरोदनताम्राक्षी भी
माक्षं राक्षसाधिपं ॥ रुदती करुणं सीता ह्रियमाणा तमब्रवीत् ॥२॥ न व्यपत्रपसे नीच कर्मणानेन रावण ॥ ज्ञात्वा विरहितां यो मां चोरयित्वा
पलायसे ॥३॥ त्वयैव नूनं दुष्टात्मन् भीरुणा हर्तुमिच्छता ॥ ममापवाहितो भर्ता मृगरूपेण मायया ॥४॥ यो हि मामुद्यतस्त्रातुं सोप्ययं
विनिपातितः ॥ गृध्रराजः पुराणोसौ श्वशुरस्य सखा मम ॥५॥ परमं खलु ते वीर्यं दृश्यते राक्षसाधम ॥ विश्राव्य नामधेयं हि युद्धे नास्मि जि

॥ ध ॥

रण्यकांडे द्विपंचाशः सर्गः ॥५२॥ ॥ अथ सीताया ह्रियमाणाया रुदत्या एव तां हरति स्मेत्याह खमिति वर्तिनीत्यत्र सुप्यपि णिनिरार्षः ॥१॥ रोषरोदनाभ्यां हेतुभ्यां ताम्राक्षी ॥२॥ विरहितां
रामलक्ष्मणाभ्यामिति शेषः अनेन कर्मणा चौर्येण ॥३॥ अपवाहितः अन्यत्र नापितः मायया मृगरूपेण मारीचेनेति शेषः ॥४॥ पुराणो वृद्धः अत एवास्य निपातनेन न तु त्वद्वीर्येणे
त्युक्तमिति भावः ॥५॥ परमं खल्विति व्यंग्योक्तिः ॥६॥

र्दा प्रान१

स्त्रियाहरणमेव गर्हितं एसाद्विवाहानां शास्त्रगर्हितत्वा पियापरविवाहितायाः तत्रापि रहिते पतिरहिते [illegible] काले देशे च त्वमिति निंद्यं तेन कर्मेति भावः ॥७॥ शौंडीर्यमानिनः शू
रमानिनः तादृशस्यादृशी लोके निरामरणादप्यधिकेति भावः ॥८॥ सत्त्वं शारीरबलं तदा अपहरणपूर्वकाले कुलाक्रोशः कुलनिंदा चारित्रमाचारः ॥९॥ हियतः एवं रूपेण हृत्वा धा
वसि अतः किं कर्तुं शक्यं मुहूर्तमपि तिष्ठ त्वं यदि शूर इति शेषः अवस्थितौ किं स्यात्तदाह नेति ॥१०॥ तदेवोपपादयति नहीति ॥११॥१२॥ साधु आत्मनः पथ्यं कृत्वा विचार्य

इदं च गर्हितं कर्म कथं कृत्वा न लज्जसे॥ स्त्रियाश्चाहरणं नीच रहिते च परस्य च॥७॥ कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितं॥ सुनृशं
समधर्मिष्ठं तव शौंडीर्यमानिनः॥८॥ धिक्ते शौर्यं च सत्त्वं च यत्त्वया कथितं तदा॥ कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशं॥९॥ किं शक्यं क
र्तुमेवं हि यज्जवेनैव धावसि॥ मुहूर्तमपि तिष्ठ त्वं न जीवन् प्रतियास्यसि॥१०॥ न हि चक्षुःपथं प्राप्य तयोः पार्थिवपुत्रयोः॥ ससैन्योपि स
मर्थस्त्वं मुहूर्तमपि जीवितुं॥११॥ न त्वं तयोः शरस्पर्शं सोढुं शक्तः कथंचन॥ वने प्रज्वलितस्येव स्पर्शमग्नेर्विहंगमः॥१२॥ साधु कृत्वात्मनः
पथ्यं साधु मां मुंच रावण॥ मत्प्रधर्षणसंक्रुद्धो भ्रात्रा सह पतिर्मम॥१३॥ विधास्यति विनाशाय त्वं मां यदि न मुंचसि॥ येन त्वं व्यवसायेन ब
लान्मां हर्तुमिच्छसि॥१४॥ व्यवसायस्तु ते नीच भविष्यति निरर्थकः॥ न ह्यहं तमपश्यन्ती भर्तारं विबुधोपमं॥१५॥ उत्सहे शत्रुवशगा प्राणान्
धारयितुं चिरं॥ न नूनं चात्मनः श्रेयः पथ्यं वा समवेक्षसे॥१६॥ मृत्युकाले यथा मर्त्यो विपरीतानि सेवते॥ मुमूर्षूणां तु सर्वेषां यत्पथ्यं तन्न रो
चते॥१७॥ पश्यामीह हि कंठे त्वां कालपाशावपाशितं॥ यथा चास्मिन् भयस्थाने न बिभेषि निशाचर॥१८॥ व्यक्तं हिरण्मयांस्त्वं हि संपश्यसि
महीरुहान्॥ नदीं वैतरणीं घोरां रुधिरौघविवाहिनीं॥१९॥ खड्गपत्रवनं चैव भीमं पश्यसि रावण॥ तप्तकांचनपुष्पां च वैदूर्यप्रवरच्छदां
॥२०॥ द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः कंटकैश्चितां॥ न हि त्वमीदृशं कृत्वा तस्यालीकं महात्मनः॥२१॥

त्यर्थः साधु कुर्वात्मन इति पाठांतरं साधु मां मुंच यावत् भर्ता नायाति इत्यर्थः ॥१३॥ विनाशाय विधास्यति यत्नमिति शेषः येन व्यवसायेन स्त्रीभोगव्यवसायेन ॥१४॥
तत्तेर्थस्तमेवाह नहीति ॥१५॥ श्रेयः सत्कालसुखावहं पथ्यं वा परिणामसुखावहं वा न समवेक्षसे न विचारयसि ॥१६॥ यथा मर्त्यो मृत्युकाले विपरीतानि सेवते तथा त्वमपी
ति भावः ॥१७॥१८॥ हिरण्मयवृक्षदर्शनं मृत्युचिह्नं वैतरण्यादियातनास्थानं पश्यसि निवर्तमानसामीप्ये लट् ॥१९॥२०॥ शाल्मलीयातनावृक्षः धरितुं धर्तुं जीवितमिति शेषः ॥२१॥

॥२२॥ ममभर्त्तुः अपराधं कृत्वेति शेषः आनतं विना एकाकिनेति पात्वन ॥२३॥२४॥२५॥ आगतगात्रवेपथुः आगतिशयात् ॥२६॥ ॥इति रामाभिरामे श्रीरा० आरण्यकांडे त्रिपंचाशः ५३॥
अपश्यन्ति अपश्यन्ती ॥१॥ यदि रामाय शंसेयुरिति रैवगत्या दृष्ट्वा रामाय शंसेयुरिति प्रत्याशयेति शेषः वस्तुनो यथा दिशब्दो वेदाः प्रमाणपरिस्फुरिति वने. वस्त्रमुत्तरीयमुत्सृ
ज्यतन्मध्ये वानरमध्ये सहभूषणानां भूषणासहितं कर्णोत्पलादि च निक्षिप्तं तत्पतितेति शेषः ॥३॥ तत्कर्म च तत्कर्म अनुवस्त्रभूषणप्रक्षेपकर्म अनुसंभ्रमात् सभयहरणाजनितन्वि

धरितुं शक्ष्यसि चिरं विषंपीत्वेव निर्घृण ॥ वद्धस्त्वं कालपाशेन दुर्निवारेण रावण ॥२२॥ क्व गतो लप्स्यसे शर्म मे मम भर्त्तुर्महात्मनः ॥ निमेषां
तरमात्रेण विना भ्रातरमाहवे ॥२३॥ राक्षसा निहता येन सहस्राणि चतुर्दश ॥ कथं स राघवो वीरः सर्वास्त्रकुशलो वली ॥२४॥ न त्वां हन्या
च्छरैस्तीक्ष्णैरिष्टभार्यापहारिणं ॥ एतच्चान्यच्च परुषं वैदेही रावणांकगा ॥ भयशोकसमाविष्टा करुणं विललाप ह ॥२५॥ तथा भृशार्त्तां ब
हु चैव भाषिणीं विलापपूर्वं करुणं च भामिनीं ॥ जहार पापस्तरुणीं विचेष्टतीं नृपात्मजामागतगात्रवेपथुः ॥२६॥ ॥इत्यार्षे श्रीमद्रामा
यणे वा० आरण्यकांडे त्रिपंचाशः सर्गः ॥५३॥ ह्रियमाणा तु वैदेही कंचिन्नाथमपश्यती ॥ ददर्श गिरिशृंगस्थान् पंच वानरपुंगवान् ॥१॥ तेषाम
ध्ये विशालाक्षी कौशेयं कनकप्रभं ॥ उत्तरीयं वरारोहा शुभान्याभरणानि च ॥२॥ मुमोच यदि रामाय शंसेयुरिति भामिनी ॥ वस्त्रमुत्सृज्य त
न्मध्ये निक्षिप्तं सहभूषणं ॥३॥ संभ्रमात्तु दशग्रीवस्तत्कर्म च न बुद्धवान् ॥ पिंगाक्षास्तां विशालाक्षीं नेत्रैरनिमिषैरिव ॥४॥ विक्रोशंतीं तदा सीतां
ददृशुर्वानरोत्तमाः ॥ स च पंपामतिक्रम्य लंकामभिमुखः पुरीं ॥५॥ जगाम मैथिलीं गृह्य रुदतीं राक्षसेश्वरः ॥ तां जहार सुसंहृष्टो रावणो मृ
त्युमात्मनः ॥६॥ उत्संगेनेव भुजंगीं तीक्ष्णदंष्ट्रां महाविषां ॥ वनानि सरितः शैलान् सरांसि च विहायसा ॥७॥ स क्षिप्रं समतीयाय शरश्चापादि
वच्युतः ॥ तिमिनक्रनिकेतं तु वरुणालयमक्षयं ॥८॥

त्क्षोभात् अंतिभारेणाशिरसामधोमुखतया च ॥४॥५॥ सुसंहृष्टः मत्तोऽसत्वेनात्मानात् केचित्तु लब्धो रामहस्तान्मृत्युस्तमभिनिसंहृष्टः विना चोत्कटं पापं पुण्यक्षयाभावेन न मृ
त्युः सन्निहितः स्यादिति. तमोगुणाहतः सन्मानयपि विरुद्धशब्दवदाहारहतवान इति वदति. तथा मेतत्सर्गान्ते वक्ष्यमाणं वभूव मोहात्तु दिन इत्यसंगतं स्यात् तथात्मानंतु
क्षिवेङ्क्यात्कृतक्तस्यमममत्यातत्वनुनरसर्गादिस्थवाक्यानां नैस्यात् ॥६॥ विहायसाऽकाशमार्गेण क्षिप्रं समतीयायेत्यन्वयः ॥७॥ तिमिर्मत्स्यविशेषः ॥८॥ ॥७॥

संभ्रमात्जगन्मात्रपहारदर्शनजक्षोभात्परिवृत्तोर्मिः स्वभावप्राप्तोर्मिषट्कनिरहितः रुधाहृद्रुप्रचाराः सीताहरणे यस्मिन् ॥९॥१०॥ तनन्तरं ततः सीताहरणकर्मावसानः सिद्धाः सिद्धा
श्च ॥११॥ रूपिणीमात्मनो मृत्युमित्यन्वयः ॥१२॥ संरूढकक्षां बहुजनाकीर्णद्वारां बहुलां विपुलां संरूढकक्ष्यां बहुलामिति पाठे नादशब्दकुनाद्वारवदित्यर्थः प्रविशेषणं ॥१३॥ माया
मिवासुरीमित्यनेन मायारूपैवेयं सीतायालंकागमने सिद्धनितं· सुरव्यामानातु अभिनिश्चिवियेति पूर्वमेव ध्वनितं अनन्तवरावणस्य वहनीये धाज्ञानामायान्वारेद्वरावणस्यनद्रष्टा

सरितां सरणं गत्वा समनीयाय सागरं ॥ संभ्रमात्परिवृत्तोर्मी रुद्धमीनमहोरगः ॥९॥ वैदेह्यां ह्रियमाणायां बभूव वरुणालयः ॥ अंतरिक्ष
गता वाचः ससृजुश्चारणास्तथा ॥१०॥ एतदंतो दशग्रीव इति सिद्धास्तदाब्रुवन् ॥ सतु सीतां विचेष्टंतीमंकेनादाय रावणः ॥११॥ प्रविवे
२ ५ शपुरीं लंकां रूपिणीं मृत्युमात्मनः ॥ सोभिगम्य पुरीं लंकां सुविभक्तमहापथां ॥१२॥ संरूढकक्ष्यां बहुलां स्वमंतःपुरमाविशत् ॥ तत्र तामसि
तापांगीं शोकमोहसमन्वितां ॥१३॥ निदधे रावणः सीतां मयो मायामिवासुरीं ॥ अब्रवीच्च दशग्रीवः पिशाचीर्घोरदर्शनाः ॥१४॥ यथा नैनां पु
मान् स्त्री वा सीतां पश्यत्यसंमतः ॥ मुक्तामणिसुवर्णानि वस्त्राण्याभरणानि च ॥१५॥ यद्यदिच्छेत्तदेवास्या देयं मच्छंदतो यथा ॥ या च वक्ष्यति
वैदेहीं वचनं किंचिदप्रियं ॥१६॥ अज्ञानाद्यदि वा ज्ञानान्न तस्या जीवितं प्रियं ॥ तथोक्त्वा राक्षसीस्तास्तु राक्षसेंद्रः प्रतापवान् ॥१७॥ निष्क्रम्यांतःपुरा
त्तस्मात्किं कृत्यमिति चिंतयन् ॥ ददर्शाष्टौ महावीर्यान्राक्षसान्पिशिताशनान् ॥१८॥ स तान्दृष्ट्वा महावीर्यो वरदानेन मोहितः ॥ उवाच ता
निदं वाक्यं प्रशस्य बलवीर्यतः ॥१९॥ नानाप्रहरणाः क्षिप्रमितो गच्छत सत्वराः ॥ जनस्थानं हतस्थानं भूतपूर्वं खरालयं ॥२०॥ तत्रास्यतां जनस्था
ने शून्ये निहतराक्षसे ॥ पौरुषं बलमाश्रित्य त्रासमुत्सृज्य दूरतः ॥२१॥ बहुसैन्यं महावीर्यं जनस्थाने निवेशितं ॥ सदूषणखरं युद्धे निहतं
रामसायकैः ॥२२॥

नं पिशाचीः राक्षसीरित्यर्थः इतिनीर्थः ॥१४॥ असंमतः अस्मदननुज्ञातः पुमान् तथा स्त्री वा न पश्यति तथा रक्षतेति शेषः ॥१५॥ मच्छंदतो मदाज्ञया यद्यद्वस्तु यदा इच्छेत्तदेव यथा
स्याः इष्टमवनितथैव तत्सर्वं देयं मच्छंदतः इत्यस्य मदाज्ञयापि इति यथार्थमित्यर्थः इति कतकः अस्या अप्रियं वचनं वा वक्ष्यतीत्याह या चेति तस्या जीवितं न प्रियं मारयामीत्यर्थः ॥१६॥
॥१७॥१८॥ वरदानेन पितामहदत्तेन मोहितः रामशरादपि न मे भीतिरिति चिंतयानः मोहकौतेघाचिंतानान्बलवीर्यतः प्रशस्येत्यन्वयः ॥१९॥ हतस्थानं रामेण शून्यंकृतमित्यर्थः
पूर्वं खरालयत्वं भूतं प्राप्तं ॥२०॥२१॥२२॥

52

॥२२॥ धैर्यस्योपरि क्रोधः धैर्योपमर्दकः क्रोध इत्यर्थः ततः खरादिवधात् न तु भीत्या नापि तथा क्रोध इत्यर्थः ॥२३॥ निर्यातयितुं प्रत्यपकारेणापनेतुं ॥२४॥२५॥ षड्भिर्निर्वाणो उपने
तव्या ममप्रापणीया ॥२६॥२७॥२८॥ महार्थं महानर्थो मिथः येयस्य तत्तथ नः यद्दिशि जनस्थानं तद्दर्शी इत्यर्थः अलक्ष्यदर्शनाः अन्तर्धानविद्यया ॥२९॥ उपलभ्य प्राप्य सन्नद्धां च परिगृह्य
खरहस्याप पिन्वायारिग्रहत्वेन विभाव्य चपमज्य संपाद्य मोहात् सुहृदितः खरहन्तुर्वधो मम सुकरस्त्वो वियोगेनातिखिन्नस्य मिति धित्वितः ॥३०॥ ॥इति रामाभिरामे श्री रा० आ० च

ततः क्रोधो ममापूर्वो धैर्यस्योपरि वर्धते ॥ वैरं च सुमहज्जातं रामं प्रति सुदारुणं ॥२३॥ निर्यातयितुमिच्छामि तच्च वैरं महारिपोः ॥ नहि लप्स्या
म्यहं निद्रामहत्वा स सुयोगरिपुं ॥२४॥ तं त्विदानीमहं हत्वा खरदूषणघातिनं ॥ रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥२५॥ जनस्थाने व
सन्हि तु भवक्ष्रीणं ममाप्तिना ॥ प्रवृत्तिरुपनेतव्या किं करोतीति तत्त्वतः ॥२६॥ अप्रमादाच्च गन्तव्यं सर्वैरेव निशाचरैः ॥ कर्तव्यश्च सदा य
त्नो राघवस्य वधं प्रति ॥२७॥ युष्माकं तु बलं ज्ञातं बहुशो रणमूर्धनि ॥ अतश्चास्मिन् जनस्थाने मया यूयं निवेशिताः ॥२८॥ ततः प्रियं
वाक्यमुपेत्य राक्षसा महार्थमष्टाव भिवाद्य रावणं ॥ विहाय लंकां सहिताः प्रतस्थिरे यतो जनस्थानमलक्ष्यदर्शनाः ॥२९॥ ततस्तु सी
तामुपलभ्य रावणः सुसंप्रहृष्टः परिगृह्य मैथिलीं ॥ प्रसज्य रामेण च वैरमुत्तमं बभूव मोहान्मुदितः स रावणः ॥३०॥ ॥इत्यार्षे
श्रीमद्रामायणे आरण्यकाण्डे चतुःपंचाशः सर्गः ॥५४॥ ॥संदिश्य राक्षसान्घोरान् रावणोष्टौ महाबलान् ॥ आत्मानं बुद्धिवैक्लव्यात्कृ
तकृ त्यममन्यत ॥१॥ स चिन्तयानो वैदेहीं कामबाणैः प्रपीडितः ॥ प्रविवेश गृहं रम्यं सीतां द्रष्टुमभित्वरन् ॥२॥ स प्रविश्य तु तद्वेश्म रावणो
राक्षसाधिपः ॥ अपश्यद्राक्षसीमध्ये सीतां दुःखपरायणां ॥३॥ अश्रुपूर्णमुखीं दीनां शोकभारावपीडितां ॥ वायुवेगैरिवाक्रान्तां मज्जन्तीं ना
वमर्णवे ॥४॥ मृगयूथपरिभ्रष्टां मृगीं श्वभिरिवावृतां ॥ अधोगतमुखीं सीतामभ्येत्य निशाचरः ॥५॥ तां तु शोकवशां दीनामवशां राक्षसा
धिपः ॥ स बलाद्दर्शयामास गृहं देवगृहोपमं ॥६॥ हर्म्यप्रासादसंबाधं स्त्रीसहस्रनिषेवितं ॥ नानापक्षिगणैर्जुष्टं नानारत्नसमन्वितं ॥७॥ दांत
कैस्तापनीयैश्च स्फाटिकै राजतैस्तथा ॥ व
ज्रवैडूर्यचित्रैश्च स्तम्भैर्दृष्टिमनोरमैः ॥८॥

तुःपंचाशः ॥५४॥ ॥बुद्धिवैक्लव्यात् बुद्धिवैपरीत्यात् ॥१॥२॥३॥ शोको वायुस्थाने अश्रवोर्णवजलस्थाने अनेनाश्रुवेगातिशय उक्तः ॥४॥ अधोगतमवनतं मुखं यस्याः ॥५॥ अनि
च्छन्तीमपि तद्दर्शनं बलाद्दर्शयामासेत्यन्वयः ॥६॥७॥ दांतैर्गजदन्तकृतैः तपनीयस्वर्णस्तम्भैर्युतमिति शेषः ॥८॥ ॥७॥ ॥७॥

Nepal Saṇskrit University, Balmeeki Campus, Kathmandu

तया सीतया ।।९।। हेममयजालकैरावृताः ।।१०।। सुधया मणिभिश्च विचित्राणि भूमिभागानि नीन्यार्यभङ्गीवत्त्वं ।।११।। दीर्घिका वाप्यः ।।१२।। लोभितुं सामनिग्रहाभ्यां प्रलोभयितुं ।।१३।। दशेति
द्वात्रिंशत्कोटिसंख्याः ।।१४।। तेषामपि एकस्यैकस्य क्रमेकं सहस्रं मम कार्ये प्रयोजने साध्वकनयाप्रगः सरभसलीनिशेषः ।।१५।। सेममयपरिवेरमुक्तरूपं राज्यं नेत्रेणाजपरिकरस्तत्र
यिप्राप्तिष्ठिन्नत्वरथीनमित्यर्थः ।।१६।। बहूनामुत्तमस्त्रीणामंतःपुरसंचारिणीनां यो मम परिग्रहः भार्याः नित्यपुंल्लिंगः परिग्रहशब्दो भार्यावाची मम भार्या समीनासां त्वमी

दिव्यदुंदुभिनिर्घोषं तप्तकांचनभूषणं ।। सोपानं कांचनं चित्रमारुरोह तया सह ।।९।। दांतका राजताश्चैव गवाक्षाः प्रियदर्शनाः ।। हेमजालावृ-
ताश्चासंस्तत्र प्रासादपंक्तयः ।।१०।। सुधामणिविचित्राणि भूमिभागानि सर्वशः ।। दशग्रीवः स्वभवने प्रादर्शयत मैथिलीं ।।११।। दीर्घिकाः पु-
ष्करिण्यश्च नानापुष्पसमावृताः ।। रावणो दर्शयामास सीतां शोकपरायणां ।।१२।। दर्शयित्वा तु वैदेहीं कृत्स्नं तद्भवनोत्तमं ।। उवाच वाक्यं पापा-
त्मा सीतां लोभितुमिच्छया ।।१३।। दश राक्षसकोट्यश्च द्वाविंशतिरथापराः ।। वर्जयित्वा जरावृद्धान्बालांश्च रजनीचरान् ।।१४।। तेषां प्रभु-
रहं सीते सर्वेषां भीमकर्मणां ।। सहस्रमेकमेकस्य मम कार्यपुरःसरं ।।१५।। यदिदं राज्यतंत्रं मे त्वयि सर्वं प्रतिष्ठितं ।। जीवितं च विशाला-
क्षि त्वं मे प्राणैर्गरीयसी ।।१६।। बह्वीनामुत्तमस्त्रीणां मम योसौ परिग्रहः ।। तासां त्वमीश्वरी सीते मम भार्या भव प्रिये ।।१७।। साधु किं तेन्यथा
बुध्या रोचयस्व वचो मम ।। भजस्व माभितप्तस्य प्रसादं कर्तुमर्हसि ।।१८।। परिक्षिप्ता समुद्रेण लंकेयं शतयोजना ।। नेयं धर्षयितुं शक्या सेंद्रै-
रपि सुरासुरैः ।।१९।। न देवेषु न यक्षेषु न गंधर्वेषु नर्षिषु ।। अहं पश्यामि लोकेषु यो मे वीर्यसमो भवेत् ।।२०।। राज्यभ्रष्टेन दीनेन तापसेन प-
दातिना ।। किं करिष्यसि रामेण मानुषेणाल्पतेजसा ।।२१।। भजस्व सीते मामेव भर्ताहं सदृशस्तव ।। यौवनं त्वध्रुवं भीरु रमस्वेह मया सह-
।।२२।। दर्शने मा कृथा बुद्धिं राघवस्य वरानने ।। कास्य शक्तिरिहागंतुमपि सीते मनोरथैः ।।२३।। न शक्यो वायुराकाशे पाशैर्बद्धुं महाजवः ।। दीप्यमा-
नस्य वाप्यग्नेर्ग्रहीतुं विमलां शिखां ।।२४।।

श्वरी स्वामिनी भव ।।१७।। साधु हितं मम वचो रोचयस्व त्वन्त्वयः अन्यथा बुध्यानेन न किं न किमपि फलमित्यर्थः मां मां भजस्व अभितप्तस्य कामाभितप्तस्य [redacted] १८
शतयोजना भूमेरिति शेषः अशक्याधर्षणीत्वे पूर्वार्धे हेतुः एवं च रामस्यागमनमसंभावितमिति भावः ।।१९ ।।२०।।२१।। २२।। अस्य रामस्य ।।२३।। यथा वायुर्बद्धुमशक्यः
यथा वाग्निशिखा गृहीतुमशक्या न थेहागंतुमशक्य इत्यर्थः ।।२४।। ।।२५।। ।।छ।। ।।छ।। ।।छ।। ।।रामः।।

॥२५॥मद्विधास्त्वन्येषामविषयंनि॰ सांवेदंगीकरिष्यतिनदासेवककवन्वदासास्तावशोभविष्यामितथाभूतेनमयिएक्षसारेवाश्रमद्वशास्त्वद्वशाः संपन्नाएव किंविशेषेणसर्वेचरा
चरंत्वन्येषांभवतिनरेत्यर्थः॥२६॥अभिषेकःश्रमनिवृत्तिद्वाराभोगयस्नानेनउदकेनक्लिन्नार्द्रुंश्रमापनयनानुष्ठाचमारमयस्त्वयत्न्वेंसंचितंकिंचदुष्कृतंमासीनतनक्षत्रासे
नतकृतनदुःखेनगतंक्षीणं॥२७॥इहस्वलंकायांमदंगीकारादिविशेषः॥२८॥२९॥३०॥३१॥३२॥शोकेनअन्वस्थामिवचिन्तयाहतप्रभामिवध्यायन्तीमिवतामुवाचेत्यन्वयः॥३३॥नृपा
मवस्थानाद्व्रीडयानृपंसीस्थितेनिमन्यमानआह अलमिति धर्मलोपः स्वभर्तृत्यागपरांगीकाररूपस्तत्कृतेनव्रीडेनलज्जयालंमास्त्वित्यर्थः॥३४॥कृतस्तत्राह आर्षइति दे

त्रयाणामपिलोकानांननंपश्यामिशोभने॥ विक्रमेणनयेयस्त्वांमद्बाहुपरिपालिता॥२५॥ लंकायाःसुमहद्राज्यमिदंत्वमनुपालय॥ त्व
त्प्रेष्यामद्विधाश्चैवदेवाश्चापिचराचरं॥२६॥ अभिषेकजलक्लिन्नातुष्टाचासमयस्त्वच॥ दुष्कृतंयत्पुराकर्मवनवासेननन्दनं॥२७॥ यच्च
नेसुकृतंकर्मतस्यफलमाप्नुहि॥ इहसर्वाणिमाल्यानिदिव्यगंधानिमैथिलि॥२८॥ भूषणानिचमुख्यानिनानानिसेवमयासह॥ पु
ष्पकंनामसुश्रोणिभ्रातुर्वैश्रवणस्यमे॥२९॥ विमानंसूर्यसंकाशंतरसानिर्जितंरणे॥ विशालंरमणीयंचतद्विमानंमनोजवं॥३०॥ तत्रा
सीनेमयासार्धंविहरस्वयथासुखं॥ वदनंपद्मसंकाशंविमलंचारुदर्शनं॥३१॥ शोकार्त्तंतुवरारोहेनभ्राजतिवरानने॥ एवंवदतितस्मि
न्सावस्त्रान्तेनवरांगना॥३२॥ पिधायवदुनिर्भसीनामंदसमश्रूण्यवर्तयत्॥ ध्यायन्तीनामिवास्थासीनाचिन्ताहतप्रभा॥३३॥ उवाचवचनंवी
रोरावणोरजनीचरः॥ अलंव्रीडेनवैदेहिधर्मलोपकृतेननु॥३४॥ आर्षोयंदेविनिस्यंदोयस्त्वामभिभविष्यति॥ एतौपादौमयास्निग्धौशि
रोभिः परिपीडितौ॥३५॥ प्रसादंकुरुमेक्षिप्रंवश्योदासोहमस्मिते॥ इमाःशून्यामयावाचःशुष्यमाणेनभाषिताः॥३६॥ नचापिरावणःका
ञ्चिन्मूर्ध्नास्त्रीप्रणमेन्नरः॥ एवमुक्त्वादशग्रीवोमैथिलीजनकात्मजां॥ कृतान्तवशमापन्नाममेयइतिमन्यते॥३७॥ ॥७॥

देविनामभिसुदृश्यमयाक्रियमाणेनिर्बंधःस्नेहबंधःप्रार्थनारूपःयस्त्वांभविष्यतिसोयमार्षोऋषिदृष्टएव क्षत्रियाणामुचितत्वेनवेदोक्तएवबलात्कारेणराक्षसइविवाहे
षुस्मृत्यागणनात् एवमुक्तिरपितेमायुगणप्राधान्येनैवकन्यायाबलात्कारेणग्रहणस्यैवराक्षसविवाहपदार्थत्वात्इतिबोध्यम्पुनः प्रसादयति एताविति॥३५॥इमाद्दासोहमि
त्यंताःशुश्रूषमाणेनकामपीडितेनमयाभाषिताउक्तावाचःसत्यायथानभवंतितथाकुर्विति शेषः॥३६॥एवंविधंप्रसादनंनक्वाप्यभूदित्याहनचापीतिमन्यतेःसंमत॥३७॥

रा २

स्व ४

नि १

मत्तरसाभासः इति रामाभिरामे॰ आरं॰ पंचपंचाशस्सर्गः ॥५५॥ ॥ निर्भया ह्रियोवलादुपभोगेऽप्यधर्षणे विपन्निष्पत्तीत्यप्सरसो रावणं प्रति शापं पश्चिते विज्ञाय निर्भया वलात्का रेणागव शाइच्छाऽस्य रावणस्य विद्यामीति धिया निर्भया वा तृणमंतरतः कृत्वा साक्षान्नायान्यक परप्रहृत्य सम्भाषणजदोषपरिहारायेति शेषः ॥१॥ धर्मसेतुरिवेत्यत्र धर्मसेतिपथक पस्तु प्रष्ठोके धर्मस्याचलसेतुरिव मर्यादायाप्रतिष्ठापकः परिज्ञातः प्रसिद्धः ॥२॥३॥ सकलत्राहृयइति ॥४॥ शयितानाशयनकर्त्तास्तेनोस्तेनो भूरि निशेषः इदार्थः ॥५॥ प्रोक्ता

इत्यार्षे श्रीमद्रामायणे आरंण्यकांडे पंचपंचाशः सर्गः ॥५५॥ ॥ सा तथोक्तातु वैदेही निर्भया शोककर्षिता ॥ तृणमंतरतः कृत्वा रावणं प्रत्यभाषत ॥१॥ राजा दशरथो नाम धर्मसेतुरिवाचलः ॥ सत्यसंधः परिज्ञातो यस्य पुत्रः स राघवः ॥२॥ रामो नाम स धर्मात्मा त्रिषु लोकेषु विश्रुतः ॥ दीर्घवाहुर्विशालाक्षो दैवतं स पतिर्मम ॥३॥ इक्ष्वाकूणां कुले जातः सिंहस्कंधो महाद्युतिः ॥ लक्ष्मणेन सह भ्रात्रा यस्ते प्राणान्वधिष्यति ॥४॥ प्रत्यक्षं यद्यहं तस्य त्वया वै धर्षिता वलात् ॥ शयिता त्वं हतः संख्ये जनस्थाने यथा खरः ॥५॥ य एते राक्षसाः प्रोक्ता घोररूपा महावलाः ॥ राघवे निर्विषाः सर्वे सुपर्णे पन्नगा यथा ॥६॥ तस्य ज्याविप्रमुक्तास्ते शराः कांचनभूषणाः ॥ शरीरं विधमिष्यंति गंगाकूलमिवोर्मयः ॥७॥ असुरैर्वा त्वं यद्यवध्योसि रावण ॥ उत्पाद्य सुमहद्वैरं जीवंस्तस्य न मोक्ष्यसे ॥८॥ स ते जीवितशेषस्य राघवोंतकरो वली ॥ पशोर्यूपगतस्येव जीवितं तव दुर्लभम् ॥९॥ यदि पश्येत्स रामस्त्वां रोषदीप्तेन चक्षुषा ॥ रक्षस्त्वमद्य निर्दग्धो यथा रुद्रेण मन्मथः ॥१०॥ यश्चंद्रं नभसो भूमौ पातयेन्नाशयेत वा ॥ सागरं शोषयेद्वापि स सीतां मोचयेदिह ॥११॥ गतायुस्त्वं गतश्रीको गतसत्वो गतेंद्रियः ॥ लंकावैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥१२॥ न ते पापमिदं कर्म सुखोदर्कं भविष्यति ॥ याहं नीता विना भावं पतिपार्श्वात्त्वया वलात् ॥१३॥ सा हि दैवरसंयुक्ता मम भर्त्ता महाद्युतिः ॥ निर्भयो वीर्यमाश्रित्य शून्ये वसति दंडके ॥१४॥

सुरैर्वा ५

54

स्त्वया मन्तुरइति शेषः ॥६॥७॥ तस्य रामस्य वैरं क्रोधमुत्पाद्य त्वं निधिं प्राप्तस्ततो जीवन्न मोक्ष्यसे न समनुष्यत्वादिति भावः ॥८॥ तदेवाह अंतकरः नाशकरः ॥९॥ रक्षइति रावणसंबोधनं निर्दग्धोभवेदिति शेषः ॥१०॥ यो रामः पातयेदित्यादि शक्यार्थे लिङ् यश्चनवशनयोजनसमुद्रमध्यगा लंकाऽगम्येति वुद्धिः सा वृथैवेत्याह सागरं शोषयेद्वापि वा शब्दएवार्थे स इह स्थितां सीतां मोचयेदेवेत्यर्थः ॥११॥ त्वत्कृतेन त्वत्कृतापराधेन ॥१२॥ पतिपार्श्वात् विनाभावं पतिपार्श्वं वियोगं ॥१३॥ देवरसंयुक्तो लक्ष्मणयुतः स खराद्दिहनादेवन संयुक्तइति पाठे देवानुकूल्यवानित्यर्थः ॥१४॥

वीर्यंपराक्रमः वलंशारीरं दर्पमदंउत्सेकअमर्षोदत्तं॥१५॥कार्येषुप्रमाद्यंतिउचितेकार्येवैपरीत्यंप्राप्नुवंतीत्यर्थः॥१५॥मांप्रधृष्यास्थितस्येतिशेषः सनेकालइतिनाशकालइत्यर्थः
स्वमरणेनैवधव्यमेवानःप्रारब्धः॥१७॥यज्ञमध्यस्थायज्ञशालामध्यस्था स्रुगादियज्ञोपकरणमंडितावेदिःश्वगालेनाभिमर्षितुंस्प्रष्टुंनशक्यातथात्वयाहंइत्योजना॥१८॥१९॥पद्मखं
डानिपद्मसमूहाःतृणमध्यस्थजलनलादितृणमध्यस्थंद्रक्ष्येनपश्येयन् मद्गुकंजलवायसं॥२०॥एवंनिर्भयोक्तौलोकानुसारेणापनिद्रेनोचितहेतु [illegible] माहइदमिति निःसंज्ञं

सनैवीर्यंवलंदर्पमुत्सेकंचनथाविधं॥व्यपनेष्यतिगात्रेभ्यःशरवर्षेणसंयुगे॥१५॥यदाविनाशोभूतानांदृश्यतेकालचोदितः॥नदाका
र्येप्रमाद्यंतिनराःकालवशंगताः॥१६॥मांप्रधृष्यसनेकालःप्राप्तोयंराक्षसाधम॥आत्मनोराक्षसानांचवधायांतःपुरस्यच॥१७॥नशक्या
यज्ञमध्यस्थावेदिःस्रुग्भांडमंडिता॥द्विजातिमंत्रसंपूताचंडालेनावमर्दितुं॥१८॥तथाहंधर्मनित्यस्यधर्मपत्नीदृढव्रता॥त्वयास्प्रष्टुं
नशक्याहंराक्षसाधमपापिना॥१९॥क्रीडंतीराजहंसेनपद्मखंडेषुनित्यशः॥हंसीसातृणमध्यस्थंकथंद्रक्ष्येतमद्गुकं॥२०॥इदंशरीरं
निःसंज्ञंवंधवाघातयस्ववा॥नेदंशरीरंरक्ष्यंमेजीवितंवापिराक्षस॥२१॥नतुशक्ष्याम्यपक्रोशंपृथिव्यांदातुमात्मनः॥एवमुक्त्वातु
वैदेहीक्रोधात्सुपरुषंवचः॥२२॥रावणोजानकींतत्रपुनर्नोवाचकिंचन॥सीतायावचनंश्रुत्वापरुषंरोमहर्षणम्॥२३॥प्रत्युवाचततः
सीतांभयसंदर्शनंवचः॥शृणुमैथिलिमद्वाक्यंमासान्द्वादशभामिनि॥२४॥कालेनानेननाभ्येषियदिमांचारुहासिनि॥ततस्त्वांप्रा
तराशार्थंसूदाश्छेत्स्यंतिलेशशः॥२५॥इत्युक्त्वापरुषंवाक्यंरावणःशत्रुरावणः॥राक्षसीश्चततःक्रुद्धइदंवचनमब्रवीत्॥२६॥शीघ्रमेव
हिराक्षस्योविरूपाघोरदर्शनाः॥दर्पमस्यापनेष्यंतुमांसशोणितभोजनाः॥२७॥वचनादेवतास्तस्यसुघोराघोरदर्शनाः॥कृतप्रांजल
योभूत्वामैथिलींपर्यवारयन्॥२८॥सताःप्रोवाचराजासौरावणोघोरदर्शनाः॥प्रचलंश्चरणोत्कर्षैर्दारयन्निवमेदिनीं॥२९॥अशोकव
निकामध्येमैथिलीनीयतामिति॥तत्रेयंरक्ष्यतांगूढंयुष्माभिःपरिवारिता॥३०॥तर्जैर्नानाजनैर्घोरैःपुनःसांत्वैश्चमैथिली॥आनयध्वं

स्वनोजनं॥२१॥अपक्रोशंसीताअसतीजानेतिनिंदांसुपरुषंसुनरांपरुषंअंजनप्रवंधेनरजस्तमोगुणानामीश्वरालाभोदर्शितः॥२२॥२३॥भयसंदर्शनंभयोत्पादकंद्वादशपतीक्षे
इतिशेषःयत्तुयाम्ये दशमासान्परंसीतायदिमांनभजिष्यसि नदाहंनेष्यंतुअपनयंतु॥२७॥कृतप्रांजलयोरावणंप्रतीतिशेषः॥२८॥चरणोत्कर्षैःपदाक्षेपैःमेदिनींदारय
न्निव प्रचलत्पादविन्यासानिचलित्वा॥२९॥नीयतामितिप्रोवाचेत्यन्वयः परिवारिताक्षराणामप्यविमुक्तारक्षणामित्यर्थः॥३०॥ ३१॥

॥३२॥ सर्वे कामाः फलं नियेभ्यस्तादृशैर्वृक्षैः कल्पवृक्षैरित्यर्थः सर्वकालमदैः सर्वकालं मदयुक्तैर्द्विजैः पक्षिभिः ॥३३॥ ३४॥ शोकेनत्रस्तासेवइनरजनयनारण्यायनटवह्नोकरी

इति प्रतिसमादिश्य राक्षसो रावणेन ना: ॥ अशोकवनिकां जग्मुर्मैथिलीं परिगृह्य तु ॥३२॥ सर्वकामफलैर्वृक्षैर्नानापुष्पफलैर्वृतां ॥ सर्वका
लमदैश्चापि द्विजैः समुपसेविता ॥३३॥ सानुशोकपरीतागी मैथिली जनकात्मजा ॥ राक्षसीवशमापन्ना व्याघ्रीणां हरिणी यथा ॥३४॥ शोकेन म
हताग्रस्ता मैथिली जनकात्मजा ॥ न शर्म लभते भीरुः पाशबद्धा मृगी यथा ॥३५॥ न विंदते तत्र तु शर्म मैथिली विरूपनेत्राभिरतीव तर्जिता
पतिं स्मरन्ती दयितं च देवरं विचेतनाभूद्भयशोकपीडिता ॥३६॥ इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे षट्पंचाशः सर्गः ॥५६॥ ॥ प्रवेशिता
यां लंकां प्रति पितामहः ॥ नराधावाचदेवेन्द्रं परितुष्टः शतक्रतुं ॥१॥ त्रैलोक्यस्य हितार्थाय रक्षसामहिताय च ॥ लंकां प्रवेशिता रावणेन दुरा
त्मना ॥२॥ पतिव्रता महाभागा नित्यं चैव सुखैधिता ॥ अपश्यन्ती च भर्तारं पश्यन्ती राक्षसीजनं ॥३॥ राक्षसीभिः परिवृता भर्तृदर्शनलालसा ॥
निविष्टा हि पुरी लंका तीरे नदनदीपतेः ॥४॥ कथं ज्ञास्यति तां रामः तत्रस्थां तामनिन्दितां ॥ दुःखं संचिंतयन्ती सा बहुशः परिदुर्बला ॥५॥ प्राण
यात्रामकुर्वाणा प्राणांस्त्यक्ष्यत्यसंशयं ॥ स भूयः संशयो जातः सीतायाः प्राणसंक्षये ॥६॥ स त्वं शीघ्रमितो गत्वा सीतां पश्य शुभाननां ॥ प्रवि
श्य नगरीं लंकां प्रयच्छ हविरुत्तमं ॥७॥ एवमुक्तोऽथ देवेन्द्रः पुरीं रावणपालितां ॥ अगच्छन्निद्रया सार्धं भगवान्पाकशासनः ॥८॥ निद्रां चोवा
च गच्छ त्वं राक्षसान्संप्रमोहय ॥ सा तथोक्ता मघवता देवी परमहर्षिता ॥९॥ देवकार्यार्थसिद्ध्यर्थं प्रामोहयत राक्षसान् ॥ एतस्मिन्नन्तरे देवः स
हस्राक्षः शचीपतिः ॥ आससाद वनस्थां तां वचनं चेदमब्रवीत् ॥ देवराजोऽस्मि भद्रं ते [illegible] इह चास्मि शुचिस्मिते ॥११॥ अहं त्वां का
र्यसिद्ध्यर्थं राघवस्य महात्मनः ॥ साहाय्यं कल्पयिष्यामि मा शुचो जनकात्मजे ॥१२॥ मत्प्रसादात्समुद्रं स तरिष्यति बलैः सह ॥ मयैव हव्यरा
क्षसा मायया मोहिताः शुभे ॥१३॥ तस्मादन्नमिदं सीते हविष्यान्नं महत्स्वयं ॥ सत्त्वमुष्टबलैर्देवि आगतः सह निद्रया ॥१४॥ एतदत्स्यसि मद्धस्ता
न्न त्वां बाधिष्यते शुभे ॥ क्षुधा तृषा च रंभोरु वर्षाणामयुतैरपि ॥१५॥ एवमुक्ता तु देवेन्द्रमुवाच परिशंकिता ॥ कथं जानामि देवेन्द्रं त्वामिह स्थं शच

त्यनुसरणामनर्थो लोको यथावास्तवमसमन्यनन तथैवक विरपि वर्णयति नन्यनारण्यायेवनिमंनव्यं ॥३५॥ ३६॥ ॥ इति रामाभिरामे श्रीरामीये रामायणतिलके
आरण्यकाण्डे षट्पंचाशः सर्गः ॥५६॥ ~~[illegible]~~ ॥

५सीतायां

सीता ५

55

आत्रौंघरघाटीवनस्नानकुसुमस्तपा तेन्ना सावन्धरो: सीता वास्नवं परिहृ बिना ११ एवं वादं नो म्हत दती भगवद्राघवं प्र
ति सहभ्राता महाबाहु दिदृक्षु मेथिली तिमागतः २० मू २

मृगरूपकविरामहन्त्वोनमाह राक्षसमिति॥१॥यदायथिवृन्नस्तदानस्य मैथिलीद्रष्टुकामस्यतांद्रष्टुंसत्वरमाणस्यतस्यपथिवस्थितस्यपश्यतोगोमायुःशिवाननादेत्यन्वयः॥२॥३॥य
थाभावप्रभुसंनथावाशन इत्यर्थः वेदेह्यावैदेह्येराक्षसैर्भक्षणांविनानन्यकर्तृकभक्षणाभावरूपंस्वस्तिस्यादित्यर्थः अपिकामप्रवेदने॥४॥मारीचेनमामकस्वरंविज्ञाय

देवलिंगानिदृष्टानिरामलक्ष्मणसन्निधौ॥तानिदर्शयदेवेंद्रयदित्वंदेवराट्स्वयं॥१७॥सीतायावचनंश्रुत्वातथाचक्रेशचीपतिः॥पृथि
वींनास्पृशत्पद्भ्यामनिमेषेक्षणानिच॥१८॥यथामेश्वशुरोराजायथाचमिथिलाधिपः॥तथात्वामद्यपश्यामिसनाथोमेपतिस्त्वया॥
॥२१॥नवात्तयावदेवेंद्रयथो[illegible]भूतमिदंहवि॥अशिष्यामित्वयादत्तंरघूणांकुलवर्धनं॥२२॥इंद्रहस्ताद्गृहीत्वातुपायसंसाशुचिस्मि
ता॥न्यवेदयतभर्त्रेसालक्ष्मणायचमैथिली॥२३॥परिजीवतिमेभर्तासहभ्रात्रामहाबलः॥इदमश्नुतनेयोभक्त्वानदंश्चान्यायसंप्रयपं॥२४॥
इतीवतत्याशयहविर्दत्तंननाजरोक्षुधाउःखसमुद्भवंवन॥इदानीहृत्रिसुपलभ्यजानकीकाकुत्स्थयोःप्रीतमनावभूव॥२५॥सचापिश
क्रस्त्रिदिवालयंनराधीनायमयोराघवकार्यसिद्धये॥आमंत्र्यसीतांसततोमहात्माजगामनिद्रासहितःस्वमालयं॥२६॥ ॥इत्यार्षे
श्रीमद्रामायणेआरण्यकांडेषट्पंचाशःसर्गः॥५६॥ ॥राक्षसंमृगरूपेणचरंतंकामरूपिणं॥निहत्यरामोमारीचंतूर्णंप
थिनिवर्तत॥१॥तस्यसंत्वरमाणस्यद्रष्टुकामस्यमैथिलीं॥क्रूरस्वनोथगोमायुर्विननादास्यपृष्ठतः॥२॥सतस्यस्वरमाज्ञायदारु
णंरोमहर्षणं॥शंकयामासगोमायोःस्वरेणपरिशंकितः॥३॥अशुभंबतमन्येहंगोमायुर्वाशतेयथा॥स्वस्तिस्यादपिवैदेह्याराक्ष
सैर्भक्षणंविना॥४॥मारीचेनतुविज्ञायस्वरमालक्ष्यमामकं॥विक्रुष्टंमृगरूपेणलक्ष्मणःशृणुयाद्यदि॥५॥ससौमित्रिःस्वरंश्रुत्वा
तांचहित्वाथमैथिलीं॥तयैवप्रहितःक्षिप्रंमत्सकाशमिहैष्यति॥६॥राक्षसैःसहितैर्नूनंसीतायाईप्सितोवधः॥कांचनश्चमृगोभू
त्वाव्यपनीयाश्रमात्तुमां॥७॥दूरंनीत्वाथमारीचोराक्षसोभूच्छराहतः॥हालक्ष्मणहतोस्मीतियद्वाक्यंव्याजहारह॥८॥ ॥७॥

मामकस्वरध्वनिंज्ञात्वाआलक्ष्यमदप्रकारेणापापमवधार्यपन्मृगरूपेणतेनाक्रुष्टंहासीतेलक्ष्मणेतिचतद्यदिलक्ष्मणःशृणुयात् तदातंस्वरंश्रुत्वामदीयस्वरान्वे
नमैथिलीतयैवप्रहितःतांहित्वेष्यति॥५॥६॥सहितैरीप्सितःकर्तुमिष्टःनूनंनिश्चयेन तच्चैवानुकलनकमाह कांचनइत्यादि यतःकांचनमृगोभूत्वामाव्यपनीयाश्रमाद्दूरंनीत्वारा
क्षसोभूत ननुचमेप्रयोजनमृगएवस्थितःइतिवाक्यंव्याजहारचयतयस्मात्तस्यावधईप्सितइत्यन्वयः काव्यलिंगालंकारः॥७।८॥

अथ चिंतां नाटयति अपीति स्वस्त्यभवने हेतुर्जनस्थानेति· जनस्थानं स्थानविशेषः जनानां लोकानां राक्षसेभ्यो भयनिवृत्त्या इह स्थाननिमित्तं चेत्यर्थः ॥९॥ हे त्वं नाम
पि निमित्तानीति ॥१०॥ मृगरूपेणात्मनोपनयनं दूरमाकर्षणं दृष्ट्वा परिशंकितो जनस्थानं स्वरं दिवा समभूत् माजगाम अनेनेनतोपि परतो मारीचवधस्थानेन गत इति सूचितं
॥११॥ दीनमानसं दीनमानसत्वं नाटयति दीनशरीरेणापि म्लानं आसेदुः विपरीतार्थसूचकत्वेन पापः ॥१३॥ नदेवाः सव्यमप्रदक्षिणं ॥१३॥ अविदूरं समीपे समीपाय

अपि स्वस्ति भवेद्द्वाभ्यां रहिताभ्यां मया वने ॥ जनस्थाननिमित्तं हि कृतवैरोस्मि राक्षसैः ॥९॥ निमित्तानि च घोराणि दृश्यंतेद्य बहूनि च ॥ इत्येवं
चिंतयन् रामः श्रुत्वा गोमायुनिस्वनं ॥१०॥ निवर्तमानस्त्वरितो जगामाश्रममात्मवान् ॥ आत्मनश्चापनयनं मृगरूपेण रक्षसा ॥११॥ आजगाम
जनस्थानं राघवः परिशंकितः ॥ तं दीनमानसं दीनमासेदुर्मृगपक्षिणः ॥१२॥ सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वनान् ॥ तानि दृष्ट्वा नि
मित्तानि महाघोराणि राघवः ॥१३॥ ततो लक्ष्मणमायांतं ददर्श विगतप्रभं ॥ ततोविदूरे रामेण समीयाय स लक्ष्मणः ॥१४॥ विषण्णः सन् विषण्णेन दुः
खभागिना ॥ संजगर्हेथ तं भ्राता दृष्ट्वा लक्ष्मणमागतं ॥१५॥ विहाय सीतां विजने वने राक्षससेविते ॥ गृहीत्वा च करं सव्यं लक्ष्मणं रघुनंदनः ॥१६॥
उवाच मधुरोदर्कमिदं परुषमार्तवत् ॥ अहो लक्ष्मण गर्ह्यं ते कृतं यत्त्वं विहाय तां ॥१७॥ सीतामिहागतः सौम्य कच्चित् स्वस्ति भवेदिति ॥ न मेस्ति
संशयो वीर सर्वथा जनकात्मजा ॥१८॥ विनष्टा भक्षिता वापि राक्षसैर्वनचारिभिः ॥ अशुभान्येव भूयिष्ठं यथा प्रादुर्भवंति मे ॥१९॥ अपि लक्ष्मण
सीतायाः सामग्र्यं प्राप्नुयामहे ॥ जीवंत्याः पुरुषव्याघ्र सुतायाः जनकस्य वै ॥२०॥ यथा वै मृगसंघाश्च गोमायुश्चैव भैरवं ॥ वाशंते शकुनाश्चापि प्र
दीप्तामभितो दिशं ॥ अपि स्वस्ति भवेत्तस्या राजपुत्र्या महाबल ॥२१॥ इदं हि रक्षो मृगसन्निकाशं प्रलोभ्य मां दूरमनुप्रयातं ॥ हतं कथंचिन्मह
ताश्रमेण स राक्षसोभूत् म्रियमाण एव ॥२२॥ मनश्च मे दीनमिहाप्रहृष्टं चक्षुश्च सव्यं कुरुते विकारं ॥ असंशयं लक्ष्मण नास्ति सीता हृता
मृता वा पथि वर्त्तते वा ॥२३॥

संगतोभूत् ॥१४॥ समदुःखः सन् मिलित्वा सरामो लक्ष्मणस्य भ्राता सीतां विहायागतं लक्ष्मणं दृष्ट्वा लक्ष्मणं पक्षमर्थे द्वितीया लक्ष्मणस्य सव्यं करं गृहीत्वा जगर्हे ॥१५॥१६॥
गर्हणामाह उवाचेति मधुरोदर्कं शब्दतो माधुर्योत्तरं अर्थतः परुषमिदं वक्ष्यमाणं आर्तवदार्त्तः ईदृ उवाच यद्वा मधुरोदर्कं नात्यर्थं नो मधुरं मा पानतः परुषं नेकृतं त्वया हृतं ॥१७॥
क्वचित् स्वस्ति भवेत् कल्याणं न संभावयत इत्यर्थः ॥१८॥ विनष्टा अपहृता यथा प्रादुर्भवंति विनष्टत्वादिनि चिह्निते ॥१९॥ अथोपि वा पश्ये सामग्र्यं क्षेमं अनपहरणरूपं ॥२०॥
वाशंते नदंति प्रदीप्तां सूर्याधिष्ठितां ॥२१॥२२ मृगसन्निकाशं मृगवत्प्रतिभासमानं म्रियमाण एव न तु ततः पूर्वमित्यर्थः ॥२३॥ सव्यं वामं वामस्तु वमर्थमाह पथि वर्त्तते वा ह्रिया
माणवर्त्तते वेत्यर्थः इदं वक्ष्युत्तरत्वसर्गे ॥२४॥

रिा र ४

रियतोदु: ४

56

इति रामाभिरामे श्रीरा० आरण्यकाण्डे सप्तपंचाशः सर्गः ॥५७॥ ॥एनमत्तदेव विस्तरेणाह· सह इति शून्यं संमनोऽपाश्रितीन चिह्नं वैदेहीं विनागतं नान्यत्कागतं ॥१॥२॥ प्राणसहायानां
विनाः सहायाः प्राणाः कथं स्थास्यन्तीति भावः ॥४॥५॥ अभरणां पतित्वमिदं तत्व ॥६॥ मे प्रव्राजने चतुर्दश समावनप्रव्राजनवनधारणात् सीताजीवने ममजीवनात्त्वमिथ्या भविष्यति
नद्भावे मध्ये स्वममरणेन ज्ञानिरिति भावः ॥६॥ सीतानिमित्तं मयि समेतं त्वयि समेतं त्वयि वैकाकिन्यया आगते इत्यर्थः सकामा सर्वा मनोरथा ॥७॥ सौम्येन विनयेन ॥८॥ सवृत्ता स

इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे सप्तपंचाशः सर्गः ॥५७॥ ॥स दृष्ट्वा लक्ष्मणं दीनं शून्यं दशरथात्मजः॥ पर्यपृच्छत धर्मात्मा वैदेहीमागतं वि-
ना ॥१॥ प्रस्थितं दण्डकारण्यं या मामनुजगाम ह॥ क्व सा लक्ष्मण वैदेही यां हित्वा त्वमिहागतः ॥२॥ राज्यभ्रष्टस्य दीनस्य दण्डकान्परिधावतः॥ क्व सा
दुःखसहाया मे वैदेही तनुमध्यमा ॥३॥ यां विना नोत्सहे वीर मुहूर्तमपि जीवितुं॥ क्व सा प्राणसहाया मे सीता सुरसुतोपमा ॥४॥ पतित्वममरा-
णां हि पृथिव्याश्चापि लक्ष्मण॥ विना तां तपनीयाभां नेच्छेयं जनकात्मजां ॥५॥ कच्चिज्जीवति वैदेही प्राणैः प्रियतरा मम॥ कच्चित्प्रव्राजनं
वीर न मे मिथ्या भविष्यति ॥६॥ सीतानिमित्तं सौमित्रे मृते मयि गते त्वयि॥ कच्चित्सकामा कैकेयी सुखिता सा भविष्यति ॥७॥ सपुत्रराज्यां सिद्धार्थां
मृतपुत्रा तपस्विनी॥ उपस्थास्यति कौसल्या कच्चिन्न सौम्य कैकयीं ॥८॥ यदि जीवति वैदेही गमिष्याम्याश्रमं पुनः॥ सवृत्ता यदि वृत्ता सा प्राणांस्त्य-
क्ष्यामि लक्ष्मण ॥९॥ यदि मामाश्रमगतं वैदेही नाभिभाषते॥ पुनः प्रहसिता सीता विनशिष्यामि लक्ष्मण ॥१०॥ ब्रूहि लक्ष्मण वैदेही यदि जीवति वा न
वा॥ त्वयि प्रमत्ते रक्षोभिर्भक्षिता वा तपस्विनी ॥११॥ सुकुमारी च बाला च नित्यं चादुःखभागिनी॥ मद्वियोगेन वैदेही व्यक्तं शोचति दुर्मनाः ॥१२॥ सर्वथा रक्ष-
सा तेन जिह्मेन सुदुरात्मना॥ वदता लक्ष्मणेत्युच्चैस्तवापि जनितं भयं ॥१३॥ श्रुतश्च मन्ये वैदेह्या स स्वरः सदृशो मम॥ त्रस्तया प्रेषितस्त्वं च द्रष्टुं मां शी-
घ्रमागतः ॥१४॥ सर्वथा तु कृतं कष्टं सीतामुत्सृजता वने॥ प्रतिकर्तुं नृशंसानां रक्षसां दत्तमन्तरं ॥१५॥ दुःखिताः खरघातेन राक्षसाः पिशिताशनाः॥ तैः सी-
ता निहता घोरैर्भविष्यति न संशयः ॥१६॥ अहोऽस्मि व्यसने मग्नः सर्वथा रिपुनाशन॥ किं त्विदानीं करिष्यामि शंके प्राप्तव्यमीदृशं ॥१७॥ इति सीतां वरारोहां चिन्तयन्नेव राघवः॥ आजगाम जनस्थानं त्वरया सहलक्ष्मणः ॥१

ति ८

त्वा यदि वृत्ता मृते इत्यर्थः ॥९॥ प्रहसिता प्रहसितमुखी ॥१०॥ प्रमत्ते त्वचितकारिणि ॥११॥१२॥ नवापि त्वात्मवृद्धा सवीर्यादिमतोऽपि ॥१३॥ मम सदृशः मम स्वरेण सदृशः यस्मात्त्वमा-
गतस्तस्मात्स स्वरस्त्वया श्रुत इति शंके इति शंके ॥१४॥ प्रतिकर्तुं मत्कृतापकारस्य प्रत्यपकारं कर्तुं नरपेक्षणात् रक्षसामन्तरमवकाशो दत्तः ॥१५॥१६॥ किं त्विदानीं करिष्यामी-
ति शोकात् ईदृशं दुःखं प्राप्तव्यमवश्यमनुभवितव्यमिति शंके इति धैर्यावलंबनं उत्प्रेक्षा ॥१७॥ जनस्थानं नष्ठनिस्वाश्रमं ॥१८॥ ॥छ॥ ॥छ॥

विगर्हमाणइत्यादिवक्ष्यमाणसर्गार्थसंग्रहः· श्रमेणवकुद्रूधावनजेनश्रमाद्वैवेतिपायःपाठः·प्रतिश्रयमाश्रमसमीपदेशंशून्यंसीतया॥१९॥प्रतिश्रयंसंप्रेक्ष्याऽनंतरंस्वाश्रमं
प्रविगाह्यतमपिशून्यंवीक्ष्य·ततःसीतायाःकांश्चिद्विहारदेशाननुसृत्यपुनाविचिन्वानापिशून्यान्निरीक्ष्यएतत्तत्क्रीडाविशेषस्थानंतत्रतत्क्रीडाविशेषचयस्मृत्वाहृष्टरोमा
शोकेनव्यथितश्चबभूव॥२०॥ ॥इतिरामाभिरामेश्रीरा०आरण्यकांडेऽष्टपंचाशःसर्गः॥५८॥ ॥अथविस्तरेणमार्गमध्यकृताकथामाह·अथेति· उपावृत्तंसीतावन्वेना
त्स्वसमीपंप्राप्तंअंतरामध्येमार्गे॥१॥यदायस्मात्तवविश्वासात्सावनेमयात्वनविरहिताकृताऽनतास्तामपास्यकिमर्थंत्वमागतः॥२॥महत्पापंसीताहरणादिरूपंशंकमानंयन्मेम

विगर्हमाणोनुजमार्तरूपंक्षुधाश्रमेणैवपिपासयाच॥विनिश्वसञ्शुष्कमुखोविषण्णाः प्रतिश्रयंप्राप्यसमीक्ष्यशून्यं॥१९॥स्वमाश्रमंसंप्रवि-
गाह्यवीरोविहारदेशाननुसृत्यकांश्चित॥एतत्तदित्येवनिवासभूमौप्रहृष्टरोमाव्यथितोबभूव॥२०॥ ॥इत्यार्षेश्रीरामायणेआरण्यका-
डेअष्टपंचाशःसर्गः॥५८॥ ॥अथाश्रमादुपावृत्तमंतरारघुनंदनः॥परिपप्रछसौमित्रिंरामोदुःखार्दितःपुनः॥१॥तमुवाचकिमर्थंत्व
मागतोपास्यमैथिलीं॥यदासानवविश्वासाद्वनेविरहितामया॥२॥दृष्ट्वैवाभ्यागतंत्वांमेमैथिलींत्यज्यलक्ष्मण॥शंकमानंमहत्पापं
यत्सत्यंव्यथितंमनः॥३॥स्फुरतेनयनंसव्यंबाहुश्चहृदयंचमे॥दृष्ट्वालक्ष्मणदूरेत्वांसीताविरहितंपथि॥४॥एवमुक्तस्तुसौमित्रिर्लक्ष्म
णःशुभलक्षणः॥भूयोदुःखसमाविष्टोदुःखितंराममब्रवीत॥५॥नस्वयंकामकारेणतांत्यक्त्वाहमिहागतः॥प्रचोदितस्तयैवाहंत्वत्सका-
शमिहागतः॥६॥आर्येणेवपरिक्रुष्टंलक्ष्मणेतिसुविस्वरं॥परित्राहीतियद्वाक्यंमैथिल्यास्तच्छ्रुतिंगतं॥७॥सातमार्तस्वरंश्रुत्वातवस्नेहेन
मैथिली॥गच्छगच्छेतिमामाहरुदंतीभयविह्वला॥८॥प्रचोद्यमानेनमयागच्छेतिबहुशस्तया॥प्रत्युक्तामैथिलीवाक्यमिदंतत्प्रत्ययान्वि-
तं॥९॥नतत्पश्याम्यहंरक्षोयदस्यभयमावहेत॥निर्वृताभवनास्त्येतत्केनाप्येवमुदाहृतं॥१०॥विगर्हितंचनीचंचकथमार्योभिधास्यति·
त्राहीतिवचनंसीतेयस्त्रायेत्त्रिदशानपि ११

नोव्यथितमासीन्मारीचवधकालेमछब्दसदृशशब्दश्रवणेनकारणेन तन्मैथिलींत्यज्याभ्यागतंत्वांदृष्ट्वैवसत्यमितिजाने·एकलत्वेनसर्वस्यसंभावयितुंशक्यत्वादितिभावः॥३॥
यस्यसत्यत्वसंभावनायांशरीरनिमित्तानिनिमित्तान्यनुभूयमानान्याह·स्फुरतेइतिस्फुरतिसव्यंवामंबाहुरपिवामस्तद्वद्धृदयंचभागस्य॥४॥एवंसीतावचनाद्दुःखितः अक्रूत्यस्त
नमितिरामवचनाद्भूयोदुःखितः॥५॥कामकारेणस्वेच्छयाप्रचोदितः·उग्रैरुग्रवचोभिरितिशेषः॥६॥लक्ष्मणेतिसुस्वरंविस्वरंयथापरित्राहीतिचआर्येणेवत्वयेवयत्परिक्रुष्ट
तन्मैथिल्याःश्रुतिंगतं॥७॥८॥त्वत्प्रत्ययान्वितंत्वद्विश्वसनीयत्वेनान्वितंतन्त्वेनयोगमिदंवक्ष्यमाणंवाक्यंप्रत्युक्ताप्रतिवचनत्वेनोक्ता॥९॥किंतत्तत्राह ने
ति·एतत्कातरवचनंनास्यरामस्यकेनापिरक्षसाऽन्येनवोदाहृतं॥१०॥नद्यवचनत्वाभावहेतुःविगर्हितमिति क्षत्रियस्यानिंदितंभनएवनीचंकुत्सितं योदेवानामपित्रायेत
देवत्राणेपियःसमर्थःसकथमीदृक्वाक्यंब्रूयात॥११॥

॥राम॥
॥७६॥

57

किन्निमित्तंक्रन्दितंकिंचिन्निमित्तमाश्रित्यकेनापिरक्षसेरितं ॥१२॥१३॥ विक्लवतांगंतुमलंवैक्लव्यमालंब्यालंमास्त्वित्यर्थः प्रमानविद्यमानइतिशेषः पः पराजयेरित्य
पकर्षः ॥१४॥ जायमानमित्यनेनजनिष्यमाणइत्यर्थकेनभाविनोपिवारणंअनः संयुगेइत्यस्यनपौनरुक्त्यं ॥१५॥१६॥ भावोमयीत्याद्विद्याख्यानः आर्यविनष्टआनरिमाश्र
पुंभत्यर्थापापहृपएवभावस्तवहृदिमद्विषयेनिवेशितोरेवेनेतिशेषः नचमामवाप्स्यसेनन्वाशेममापिनाशान ॥१७॥ संकेतान्यापहृप संकेनहृत्वेत्यर्थः नाभिपद्यसे क्रोशं

किन्निमित्तंतुकेनापिभ्रातुरालंब्यमेस्वरं ॥ विस्वरंव्याहृतंवाक्यंलक्ष्मणत्राहिमामिति ॥१२॥ राक्षसेनेरितंवाक्यंत्रासात्त्राहीतिशोभने ॥ नभ
वत्याव्यथाकार्याकुनारीजनसेविता ॥१३॥ अलंविक्लवतांगंतुंस्वस्थाभवनिरुत्सुका ॥ नचास्तित्रिषुलोकेषुपुमान्योराघवंरणे ॥१४॥ जा
तोवाजायमानोवासंयुगेयःपराजयेत् ॥ अजेयोराघवोयुद्धेदेवैःशक्रपुरोगमैः ॥१५॥ एवमुक्तातुवैदेहीपरिमोहितचेतना ॥ उवाचाश्रूणिसंस्रवं
तीदारुणंमामिदंवचः ॥१६॥ भावोमयितवात्यर्थंपापएवनिवेशितः ॥ विनष्टेभ्रातरिप्राप्तुंनचत्वंमामवाप्स्यसे ॥१७॥ संकेताद्भरतेनत्वं
रामंसमनुगच्छसि ॥ क्रोशंतंहियथात्यर्थंनैनमभ्यवपद्यसे ॥१८॥ रिपुःप्रच्छन्नचारीत्वंमदर्थमनुगच्छसि ॥ राघवस्यांतरंप्रेप्सुस्तथैनंनाभि
पद्यसे ॥१९॥ एवमुक्तस्तुवैदेह्यासंरब्धोरक्तलोचनः ॥ क्रोधात्प्रस्फुरमाणोष्ठआश्रमादभिनिर्गतः ॥२०॥ एवंब्रुवाणंसौमित्रिंरामःसंता
पमोहितः ॥ अब्रवीदुःखेनसौम्यतांविनात्वमिहागतः ॥२१॥ जानन्नपिसमर्थंमांरक्षसामपवारणे ॥ अनेनक्रोधवाक्येनमैथिल्यानिर्गतोभवा
न ॥२२॥ नहितेपरितुष्यामित्यक्त्वायद्यसिमैथिली ॥ क्रुद्धायाःपरुषंश्रुत्वास्त्रियायत्त्वमिहागतः ॥२३॥ सर्वथात्वपनीतंतेसीतयायत्प्रचो
दितः ॥ क्रोधस्यवशमागम्यनाकरोःशासनंमम ॥२४॥ असौहिराक्षसःशेतेशरेणाभिहतोमया ॥ मृगरूपेणयेनाहमाश्रमादपवा
हितः ॥२५॥ विकृष्यचापंपरिधायसायकंसलीलबाणेनचताडितोमया ॥ मार्गींतनुंत्यज्यचविक्लवस्वरोबभूवकेयूरधरःसराक्षसः ॥२६॥
शराहतेनैववदार्त्तयागिरास्वरंममालंब्यसुदूरसुश्रवं ॥ उपाहृ
तंतद्वचनंसुदारुणंत्वमागतोयेनविहायमैथिली ॥२७॥

तंक्रोशन्तस्यत्राणायनगच्छसि ॥१८॥१९॥२०॥ दुःखेनसमन्वितंक्तनमितिशेषः ॥२१॥ त्वद्रक्षार्थमितिचेत्तत्राहजानन्नपीति अनेनमैथिल्याःक्रोधवाक्येनकिंभवानाश्रमान्नि
र्गतः ॥२२॥ यन्मैथिलीत्यक्त्वाइहागतोसितेननुतेनपरितुष्यामियच्चक्रुद्धायास्त्रियाःपरुषंश्रुत्वात्वमिहागतोपितेननतुष्यामिक्रुद्धस्त्रीणांवाक्येमर्यादालेशस्याप्यभावा
दितिभावः ॥२३॥ अपनीतमपनयोऽनीतिरितियावत्तवेतिशेषः यत्त्वसीतयाप्रचोदितःसन्क्रोधवशंप्राप्यममशासनंनाकरोः ॥२४॥ अधुनास्वहतंतानमाह असाविति
उज्झितेत्येवंनिर्देशःअपवाहितःदूरमाकृष्टः ॥२५॥ परिधायसंधायसलीलबाणेनतानितिविकृष्यसुकेनमार्गीमृगसंबंधिनी ॥२६॥ सदूरेपिसंश्रवणायस्यतंस्वरंममसमत्व
रसदृशआलंब्यनष्टवचनमुपाहृतेउक्त ॥२७॥

इति रामाभिरामे श्रीरा॰ आरं॰ एकोनषष्टितमः सर्गः॥ ५९॥ ॥आव्रजमानस्य आश्रमम् आगच्छतः अधः प्रास्फुरत् स्वयमस्खलत् न वेपथुः कंपस्य जायत॥१॥ अपि क्षेमं सितेति ह व्याज-
हारेत्यन्वयः॥२॥३॥ उद्भ्रमन् इतस्ततो व्रजन्। विक्षिपन् हस्तादीन् क्षिपन् तत्र तत्र सीताम् अविद्यमानीत्याशंसयाभिवीक्ष्य॥४॥५॥ रुदंतमित्यादिरेणश्रेमा विशेष्यः वर्णनीयमपि भावेन कव-
रिषिसंविहितदेवतं॥६॥७॥ नष्टा अदर्शनं गता स्वयोगशक्त्या पुनर्लभ्यदर्शना जातेति तात्पर्यं॥८॥९॥ नदीं गतेत्यादि संतर्कानंतरं तत्र यत्नान्मृगयमाणोपि नाससाद। उन्मत्त इवेत्य-
यमिव वृक्षान्मृगयमाणः प्रधावन् बभ्रामेत्यादिः सर्वत्र संबंधः एतत्सर्वं लोकव्यवहारानुरतं भगवतश्चिन्त्यस्वरूपस्य लोके सर्वतो भार्या प्रियतमेति बोधयितुं अत एव मातापि

इत्यार्षे श्रीमद्रामायणे आरण्यकांडे एकोनषष्टितमः सर्गः॥ ५९॥ ॥भृशमाव्रजमानस्य तस्याधो वामलोचनं॥ प्रास्फुरच्चास्खलद्रा-
मो वेपथुश्चास्य जायत॥ १॥ उपालक्ष्य निमित्तानि सोऽशुभानि मुहुर्मुहुः॥ अपि क्षेमं तु सीताया इति वै व्याजहार ह॥ २॥ त्वरमाणो जगामा-
थ सीतादर्शनलालसः॥ शून्यमावसथं दृष्ट्वा बभूवोद्विग्नमानसः॥ ३॥ उद्भ्रमन्निव वेगेन विक्षिपन् रघुनंदनः॥ तत्र तत्रोटजस्थानमभि-
वीक्ष्य समंततः॥ ४॥ ददर्श पर्णशालां च सीतया रहितां तदा॥ श्रिया विरहितां ध्वस्तां हेमंते पद्मिनीमिव॥ ५॥ रुदंतमिव वृक्षैश्च
म्लानपुष्पमृगद्विजं॥ श्रिया विहीनं विध्वस्तं संत्यक्तवनदैवतं॥ ६॥ विप्रकीर्णाजिनकुशं अपविद्धबृसीकटं॥ दृष्ट्वा शून्योटजस्थानं वि-
ललाप पुनः पुनः॥ ७॥ हृता मृता वा नष्टा वा भक्षिता वा भविष्यति॥ निलीनाप्यथ वा भीरुरथ वा वनमाश्रिता॥ ८॥ गता विचेतुं पुष्पा-
णि फलान्यपि च वा पुनः॥ अथवा पद्मिनीं याता जलार्थं वा नदीं गता॥ ९॥ यत्नान्मृगयमाणस्तु नाससाद वने प्रियां॥ शोकरक्तेक्षणः श्री-
मानुन्मत्त इव लक्ष्यते॥ १०॥ वृक्षाद्वृक्षं प्रधावन् स गिरींश्चापि नदीन्नदीं॥ बभ्राम विलपन् रामः शोकपंकार्णवप्लुतः॥ ११॥ ॥७॥

तृवियोगे नायं शोककारणं तदुक्तं भागवते स्मरंस्तु जोऽजभवार्चितां श्रियं लक्ष्मीवीर्य इत्यादिनां विशिष्ट एतत्सुपलक्ष्य रक्षोधमेन वृकवद्विपिने समक्षं वैदेहराजदुहितर्यपया-
पितायां भ्रात्रा वने कृपणवत्प्रियया वियुक्तः स्त्रीसंगिनां गतिमिति प्रथयंश्चचारेति नेदं यशो रघुपतेः सुरयाचयात्मलीलातनोरधिकसाम्यविमुक्तधाम्नः रक्षोवधो ज-
लधिबंधनमस्त्रपूगैर्यतस्य शत्रुहनने कपयः सहाया इति च यतु यथा सुग्रीवाश्रयणादिदमपि लीलैवेति न तत्संस्तुतिरिति तदर्थः लीलाप्रयोजनं च वनभुवर्णनं लो-
कोद्धारः एतत्त्वेकादशाध्यायस्य पद्ये तथा पंचमेपि मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः कुतोऽन्यथा स्याद्रमतः स्व आत्मनः सीताकृतानि
व्यसनानीश्वरस्येति॥१०॥ नदीन्नदीं नदीसंबंधिनदं ज्ञानाद्वेकवचनं नाप इति लोकः पश्चिमर्नराः पश्चिमपर्वाः हाः इति कनकः पश्चिमपर्वा हायाः अपि नर्मदायानदत्वव

वक्ष्यमाणाशिक्षितम्॥११॥

॥राम॥
॥७८॥

58

उन्मत्तइवेत्युक्ते विह्वयोगानि अस्तिकश्चिदितिप्रश्ने करंवप्रियतास्तवेथान्वयादध्येनर्थः यदीति वेदायरिप्रमाणमितिनिमन ॥१२॥ स्निग्धपल्लवसंकाशानतःकोमलांगी ॥१३॥ अर्जु
नःकरवीरःकालप्रियकाबीरीतथार्जुनइतिनिघण्टुः ॥१४॥ ककुभोमहद्वक्षः ककुभस्यवाहिस्तत्ववोपिभ्यश्चात्वाननन्तधनश्लेष्मोरुतस्याज्ञानत्वोपपादकत्वेनत्यादितन्मेवेधवि
नाकथमियनीसंपरस्येतिभावः ॥१५॥ उपसमीपेगीतः क्रियमाणझंकारइत्यर्थः यथाद्रुमवरोह्यसिइमिलोमितउन्नतमलच्छान्यपन्याहः एषइति तिलकप्रियात्वात ह्रेप(

अस्तिकश्चित्त्वयादृष्टा साकरंवप्रियाप्रिया ॥ करंवयदिजानीषे शंसमत्तौनांशुभाननां ॥१२॥ स्निग्धपल्लवसंकाशा पीनकौशेयवासि
नी ॥ शंससत्यदि सादृष्टा बिल्वबिल्वोपमस्तनी ॥१३॥ अथवार्जुनशंसत्वं प्रियांतामर्जुनप्रियां ॥ जनकस्यसुतांतन्वीं यदिजीवतिवानवा ॥१४॥
ककुभःककुभोरुंतां व्यक्तंजानातिमैथिलीं ॥ ललतापल्लवपुष्पाढ्या भातिह्येषवनस्पतिः ॥१५॥ भ्रमरैरुपगीतश्च यथाद्रुमवरोह्यसि:
एषव्यक्तंविजानाति तिलकस्तिलकप्रियाम ॥१६॥ अशोकशोकापनुदशो[illegible]कोपहतचेतन ॥ त्वन्नामानंकुरुक्षिप्रं प्रियासं
दर्शनेनमां ॥१७॥ यदितालत्वयादृष्टा पक्वतालोपमस्तनी ॥ कथयस्ववरारोहां कारुण्यंयदितेमयि ॥१८॥ यदिदृष्टात्वयाजंबो जांबूनदसम
मप्रभा ॥ प्रियांयदिविजानासि निःशंकंकथयस्वमे ॥१९॥ अहोत्वंकर्णिकाराद्य पुष्पितःशोभसेभृशं ॥ कर्णिकारप्रियांसाध्वीं शंसदृष्टायदि
प्रियां ॥२१॥ चूतनीपमहासालान् पनसान्कुरवांस्तथा ॥ दाडिमानपितान्गत्वा दृष्ट्वारामोमहायशाः ॥२१॥ बकुलानथपुन्नागान् चंदना
न्केतकांस्तथा ॥ पृच्छन्रामोवनेभ्रान्त उन्मत्तइवलक्ष्मणे ॥२२॥ अथवामृगशावाक्षीं मृगजानासिमैथिलीं ॥ मृगविप्रेक्षणीकांता मृगीभिःस
हिताभवेत ॥२३॥ गजसागजनासोरुर्यदिदृष्टात्वयाभवेत ॥ तांमन्येविदितांतुभ्य माख्याहिवरवारण ॥२४॥ शार्दूलयदिसादृष्टा प्रिया
चंद्रनिभानना ॥ मैथिलीममविस्रब्धः कथयस्वनतेभयं ॥२५॥ किंधावसिप्रियेनूनं दृष्टासिकमलेक्षणे ॥ वृक्षेणाच्छाद्यचात्मानं किंमानप्र

त्वसंभावना ॥१६॥ त्वन्नामानं अशोकंकुर्वित्यर्थः शोकापनुदत्वादेतत्करणयोग्यता ॥१७॥ १८॥ निःशंकंमरणादिकथनेपिशंकानकार्येतिभावः ॥१९॥ २०॥ एषः पप्रच्छ इतिशे
षः ॥२१॥ उन्मत्तइवमानुषवत्वयशानरनवशात्तवस्तुतोनोन्मत्तइत्यर्थः उन्मादस्यापिविरहेऔचित्याद्दशावस्थासुगणितत्वाद्द ॥२२॥ मृगीभिःसहिताभवेदित्यादोसंभावना
यांलिङ्गसंभावनाबीजंमृगविप्रेक्षणीत्वं ॥२३॥ गजस्येवेत्थत्वसंभावनाबीजंगजनासोरुत्वंयद्वोच्चत्वानद्दूरदर्शित्वं ॥२४॥ ननेभयंत्वयिभक्षिताचेदपितथाकथनेपि
नवमनोनभयमित्यर्थः ॥२५॥ अतिविरहवशात्स्ववेतसस्तुमावस्थानाटयेति किमिति ॥२६॥

किष्कि ॥२४॥

नान्यथं हास्यशीलासि नान्यनं परिहासशीलासि किमर्थमिति इतः पामरदर्शने स्तु निर्मेत्र सक्ते निमा वः॥२७॥ पीनवस्त्रेण सूचितासि धावंती दृष्टासि तत् तस्मात्तिष्ठ॥२८॥ पुनर्बोधाव
स्थानं नैनां सा नैव यावद्धानाहिंसा के तत्राह अथवा हिंसिता रक्षोभिः तत्र हेतुः यथा एवं प्रकारेणा कृच्छ्रं तं मां प्राप्तं सा यपेक्षितुमर्हतीति नापेक्षते तस्मात्तेन वमेत्यर्थः उपेक्षितुमिति पाठे का
जः॥२९॥ उक्तमेवस्पष्टयति व्यक्तमिति॥३०॥ निष्प्रभतां गतं रक्षोभिर्ग्रासादिति शेषः॥३१॥ सर्वत्र नात्र भक्षणे वयशीवाभूषण॥३२॥ विक्षिप्यमाणौ इतस्ततः क्षिप्यमाणौ॥३३॥ रक्ष

निवृत्तनिश्चयवतोहनेनालिकरूणामयि॥ नान्यपं हास्यशीलासि किमर्थमामुपेक्षसे॥२७॥ पीनकौशेयकेनासि सूचितावरवर्णिनि॥ धावन्त्यपि म
या दृष्टा तिष्ठ यद्यस्ति सौहृदं॥२८॥ नैव सा नूनमथवा हिंसिता चारुहासिनी॥ कृछ्रं प्राप्तं हि मां नूनं यथोपेक्षितुमर्हति॥२९॥ व्यक्तं सा भक्षिता बा
२३ ला राक्षसैः पिशिताशनैः॥ विभज्यांगानि सर्वाणि मया विरहिता प्रिया॥३०॥ नूनं तच्छुभदन्तोष्ठं सुनासं शुभकुंडलं॥ पूर्णचंद्रनिभं ग्रस्तं मुख
निष्प्रभतां गतम्॥३१॥ सा हि चंदनवर्णाभा ग्रीवा ग्रैवेयकोचिता॥ कोमला विलपन्त्यास्तु कान्ताया भक्षिता शुभा॥३२॥ नूनं विक्षिप्यमाणौ वा बाहू प
ल्लवकोमलौ॥ भक्षितौ वेपमानाग्रौ सहस्ताभरणांगदौ॥३३॥ मया विरहिता बाला रक्षसां भक्षणाय वै॥ सार्थेनेव परित्यक्ता भक्षिता बहुबा
धवा॥३४॥ हा लक्ष्मण महाबाहो पश्यसि त्वं प्रियां क्वचित्॥ हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः॥३५॥ इत्येवं विलपन् रामः परिधावन् व
नाद्वनं॥ क्वचिदुद्भ्रमते वेगात् क्वचिद्विभ्रमते बलात्॥३६॥ क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः॥ स वनानि नदीः शैलान् गिरिप्रस्रव
णानि च॥३७॥ काननानि च वेगेन भ्रमत्यपरिसंस्थितः॥३७॥ तदा स गत्वा विपुलं महद्वनं परीत्य सर्वं त्वथ मैथिलीं प्रति॥ अनिष्ठिता
शः स चकार मार्गणे पुनः प्रियायाः परमं परिश्रमं॥३८॥ ॥इत्यार्षे श्रीमद्रामायणे आरण्यकांडे षष्ठितमः सर्गः॥६०॥ ॥७॥

सां भक्षणाय सा बाला मया सु विरहिता तत् तनावकुवांधवा पियासार्थेन परित्यक्ता स्त्री नास्त्रीसेव भक्षिता रक्षोभिरिति शेषः॥३४॥ पश्यसि पश्यसि हा सीतेति इकारलोप आर्षः॥३५॥
परिधावन् उद्भ्रमतो उत्पतति विभ्रमते वा त्यावनं॥३६॥ अपरिसंस्थितः क्वचिदपि स्थितिमलभमानो भ्रमति॥३७॥ अनिष्ठिताशाः अनिवृत्ताशः मार्गणे अन्वेषणे पुनः परमं परि
श्रमं चकार अर्थो वाएष आत्मनइति श्रुतेः तस्याः प्रियात्व एतत् त्रैलोक्यमय हातुं नरं नमितयुक्तमेव तत्त्वेनावतनाभगवति नमो रजसाः सध्यावने निरिदंक॥३८॥ ॥इति श्रीरामा
भिरामे श्रीरा० आरण्यकांडे षष्ठितमः सर्गः॥६०॥

59

प्रविद्धानि इतस्ततः प्रक्षिप्तानि॥१॥ प्राक्रुश्य हा इति शब्दं कृत्वा बाहू प्रगृह्य उत्क्षिप्य॥२॥ नदेववचनं केनि॥३॥ वृक्षेणान्यादिभिः प्रलापः आवार्य आच्छाद्य॥४॥ विश्वस्तैश्चिरकालसहवा
सेन विश्वासं प्राप्तैः ध्यायन्ति त्वामिति शेषः॥५॥६॥ मरणेपि परलोके मम धिक्कार एव प्राप्तो नीत्याह कथमिति संश्रुत्य प्रतिज्ञाय अभियोजितः नियुक्तः॥७॥८॥ पुनः सीतामुद्दि
श्य प्रलपति विवश इति॥९॥ अनृजुं छलशीलं मामुत्सृज्य क्व गच्छसि इदं वदाह नो मा उत्सृज त्यज॥१०॥११॥ सीतामनासादयमानं अप्राप्नुवानं रामं लक्ष्मण उवाचेत्यन्वयः

दृष्ट्वाश्रमपदं शून्यं रामो दशरथात्मजः॥ रहितां पर्णशालां च प्रविद्धान्यासनानि च॥१॥ अदृष्ट्वा तत्र वैदेहीं सन्निरीक्ष्य च सर्वशः॥ उवाच रामः प्राकुश्य
प्रगृह्य रुचिरौ भुजौ॥२॥ क्व नु लक्ष्मण वैदेही कं वा देशमितो गता॥ केनाहृता वा सौमित्रे भक्षिता केन वा प्रिया॥३॥ वृक्षेणावार्य यदि मां सीते ह
सितुमिच्छसि॥ अलं ते हसितेनाद्य मां भजस्व सुदुःखितं॥४॥ यैः परिक्रीडसे सीते विश्वस्तैर्मृगयानकैः॥ एते हीनास्त्वया सौम्ये ध्यायन्त्यस्रावि
लेक्षणाः॥५॥ सीतया रहितोहं वै न हि जीवामि लक्ष्मण॥ वृतः शोकेन महता सीताहरणजेन मां॥६॥ परलोके महाराजो नूनं द्रक्ष्यति मे पि
ता॥ कथं प्रतिज्ञां संश्रुत्य मया त्वमभियोजितः॥७॥ अपूरयित्वा तं कालं मत्सकाशमिहागतः॥ कामवृत्तमनार्यं वा मृषावादिनमेव च॥८॥ धि
क्त्वामिति परे लोके व्यक्तं वक्ष्यति मे पिता॥ विवशं शोकसंतप्तं दीनं भग्नमनोरथं॥९॥ मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुं॥ क्व गच्छसि वरा
रोहे मां नोत्सृज सुमध्यमे॥१०॥ त्वया विरहितश्चाहं त्यक्ष्ये जीवितमात्मनः॥ इतीव विलपन् रामः सीतादर्शनलालसः॥११॥ न ददर्श सुदुःखार्तो
राघवो जनकात्मजां॥ अनासादयमानं तं सीतां शोकपरायणं॥१२॥ पंकमासाद्य विपुलं सीदन्तमिव कुञ्जरं॥ लक्ष्मणो राममत्यर्थमुवाच हि
तकाम्यया॥१३॥ मा विषादं महाबुद्धे कुरु यत्नं मया सह॥ इदं गिरिं बहुकन्दरशोभितं॥१४॥ प्रियकाननसंचारा वनोन्मत्ता च मैथिली॥ सा वनं
वा प्रविष्टा स्यान्नलिनीं वा सुपुष्पितां॥१५॥ सरितं वापि संप्राप्ता मीनवञ्जुलसेवितां॥ वित्रासयितुकामा वा लीना स्यात्कानने क्वचित्॥१६॥ जि
ज्ञासमाना वैदेही त्वां मां च पुरुषर्षभ॥ तस्या ह्यन्वेषणे श्रीमन्क्षिप्रमेव यतावहे॥१७॥ वनं सर्वं विचिनुवो यत्र सा जनकात्मजा॥ मन्यसे यदि का

॥१२॥१३॥ विषादं मा कुर्विति शेषः कुरु यत्नं अन्वेषणाय इति शेषः॥१४॥ प्रियः काननसंचारो यस्याः सा वनोन्मत्ता वनस्य पुष्पितत्वदर्शनादुन्मत्ता हर्षवती॥१५॥ वञ्जुलो
वेतसः संभावनायां लिङ् सर्वत्र वित्रासयितुकामा अस्मान्॥१६॥ जिज्ञासमाना आवयोरन्वेषणसामर्थ्यं यतावहे यत्नं कुर्वः॥१७॥ यत्र सा अस्तीति शेषः॥१८॥ ॥७॥

वरंवीर३

कस्यमासशोके मनः कथाः॥१८॥

विचेतुमन्वेष्टुं॥१९॥२०॥२१॥२२॥नेहपश्यामिवैदेहीमित्युक्तोपिपुनर्विलापपरितापयल्लक्ष्मणोवाहदित्याह ननुइति॥२३॥दंडकारण्यंविचरन्त्वंसीतांप्राप्स्यसीतिनत्रदृष्टांतो
यथाविष्णुरिति॥२४॥२५॥अस्तुलक्ष्मणेवंवक्तनकरणेनकिमित्याहएवमःवनमिति॥२६॥विह्वलःपरवशः॥२७॥गात्रत्वङ्क्षिप्तोनशून्यइवविचेतनचेष्टारहितइव अ

एवमुक्तःससौहार्दाल्लक्ष्मणेनसमाहितः॥सहसौमित्रिणारामोविचेतुमुपचक्रमे॥१९॥तौवनानिगिरींश्चैव[illegible]सरितश्चसरांसिच॥निखि
लेनविचिन्वन्तौसीतांदशरथात्मजौ॥२०॥तस्यशैलस्यसानूनिशिलाश्चशिखराणिच॥निखिलेनविचिन्वन्तौनैवतामभिजग्मतुः॥२१॥विचित्य
सर्वतःशैलंरामोलक्ष्मणमब्रवीत्॥नेहपश्यामिसौमित्रेवैदेहींपर्वतेशुभां॥२२॥ततोदुःखाभिसंतप्तोलक्ष्मणोवाक्यमब्रवीत्॥विचरन्दंडका
रण्यंभ्रातरंदीप्ततेजसं॥२३॥प्राप्स्यसित्वंमहाप्राज्ञमैथिलींजनकात्मजां॥यथाविष्णुर्महाबाहुर्बलिंबध्वामहीमिमां॥२४॥एवमुक्तस्तुवीरेण
लक्ष्मणेनसराघवः॥उवाचदीनयावाचादुःखाभिहतचेतनः॥२५॥वनंसुविचितंसर्वंपद्मिन्यःफुल्लपंकजाः॥गिरिश्चायंमहाप्राज्ञबहुकं
दरनिर्झरः॥२६॥नहिपश्यामिवैदेहींप्राणेभ्योपिगरीयसीं॥२६॥एवंसविलपन्रामःसीताहरणकर्षितः॥दीनःशोकसमाविष्टोमुहूर्तंविह्व
लोभवत्॥२७॥सविह्वलितसर्वांगोगतबुद्धिर्विचेतनः॥विषसादातुरोदीनोनिश्वस्याशीतमायतं॥२८॥बहुशःसतुनिश्वस्यरामोराजीवलो
चनः॥हासीतेतिविचुक्रोशबहुशोबाष्पगद्गदः॥२९॥तंसांत्वयामाससततोलक्ष्मणःप्रियबांधवं॥बहुप्रकारंशोकार्तःप्रश्रितःप्रश्रितांजलिः॥
३०॥अनादृत्यतुतद्वाक्यंलक्ष्मणोष्ठपुटच्युतं॥अपश्यंस्तांप्रियांसीतांप्राक्रोशत्सपुनःपुनः॥३१॥इत्यार्षेश्रीमद्रामायणेआरण्यकांडेएकषष्ठित
मःसर्गः॥६१॥ ॥सीतामपश्यन्धर्मात्माशोकोपहतचेतनः॥विललापमहाबाहूरामःकमललोचनः॥१॥पश्यन्निववनेसीतामपश्यन्म
न्मथार्दितः॥उवाचराघवोवाक्यंविलापाश्रयदुर्वचं॥२॥त्वमशोकस्यशाखाभिःपुष्पप्रियतराप्रिये॥आवृणोषिशरीरंतेममशोकविवर्द्धि॥नि॥

शीतमुष्णंआयतंदीर्घं॥२८॥हाप्रियेइतीतिइकारलोपआर्षः॥२९॥प्रश्रितोविनयोपेतःप्रश्रितांजलिःबद्धांजलिः॥३०॥३१॥ ॥इतिरामाभिरामेश्रीरा॰आर॰एकषष्ठित
मःसर्गः॥६१॥ ॥एवंप्रियावियोगदुःसहइतिबोधयन्पुनःशोचतिसीतामितिशोकोपहतचेतनःशोकेनसीतावियोगजेनोपहतज्ञानइव॥१॥अपश्यन्नपिभ्रमा
वस्थत्वात्पश्यन्निवविलापाश्रयत्वेनदुर्वचंगद्गदकंठत्वात्॥२॥नेत्ययस्यसीतायाः॥३॥

60

कदलीस्कंधेति पाठेपि स्कंधः काण्डं निगूहितुं शक्तासि आत्मानमिति शेषः ॥४॥ ततो वनान्तरं गच्छतीति भ्रमं मत्वाह कर्णिकारेति ॥५॥६॥ पुनर्भ्रमं निहत्याह सुव्यक्तमिति
॥७॥ उपसंप्रैति हासरसेनोपेक्षेत इत्यर्थः भक्षितां शंसतीव तत्र बीजं साश्रुनेत्राणीति ॥८॥ विना सीताम् उपागत इति सकामा भविष्यति त्वया भक्षितयेति शेषः ॥१०॥११॥

कदलीकाण्डसदृशौ कदल्या संवृतावुभौ ॥ ऊरू पश्यामि ते देवि नासि शक्ता निगूहितुं ॥४॥ कर्णिकारवनं भद्रे हसन्ती देवि सेवसे ॥ अलं ते परिहासे
न मम बाधावहेन वै ॥५॥ विशेषेणाश्रमस्थाने हासोयं न प्रशस्यते ॥ अवगच्छामि ते शीलं परिहासप्रियं प्रिये ॥६॥ आगच्छ त्वं विशालाक्षि शू
न्योयमुटजस्तव सुव्यक्तं राक्षसैः सीता भक्षिता वा हृतापि वा ॥७॥ न हि सा विलपन्तं माम् उपसंप्रैति लक्ष्मण ॥ एतानि मृगयूथानि साश्रुनेत्राणि ल
क्ष्मण ॥८॥ शंसन्तीव हि मे देवीं भक्षितां रजनीचरैः ॥ हा ममार्ये क्व यातासि हा साध्वि वरवर्णिनी ॥ हा सकामाद्य कैकेयी देवी मेद्य भविष्यति ॥ सीत
या सह निर्यातो विना सीताम् उपागतः ॥१०॥ कथं नाम प्रवेक्ष्यामि शून्यमन्तःपुरं मम ॥ निर्वीर्य इति लोको मां निर्दयश्चेति वक्ष्यति ॥११॥ कातरत्वं प्र
काशं हि सीतापनयनेन मे ॥ निवृत्तवनवासश्च जनकं मिथिलाधिपं ॥१२॥ कुशलं परिपृच्छन्तं कथं शक्ष्ये निरीक्षितुं ॥ विदेहराजो नूनं मां दृष्ट्वा वि
रहितं तया ॥१३॥ सुताविनाशसंतप्तो मोहस्य वशमेष्यति ॥ तात एव कृतार्थः स तत्रैव वसतादिति ॥१४॥ अथवा न गमिष्यामि पुरीं भरतपा
लितां ॥ स्वर्गोपि हि तया हीनः शून्य एव मतो मम ॥१५॥ तन्मामुत्सृज्य हि वने गच्छायोध्यापुरीं शुभां न त्वहं तां विना सीतां जीवेयं हि कथंचन ॥१६॥
गाढमाश्लिष्य भरतो वाच्यो मद्वचनात्त्वया ॥ अनुज्ञातोसि रामेण पालयेति वसुंधरां ॥१७॥ अंबा च मम कैकेयी सुमित्रा च त्वया विभो ॥ कौसल्यं
च यथान्यायमभिवाद्य ममाज्ञया ॥१८॥ रक्षणीया प्रयत्नेन भवता सूक्तचारिणा ॥ सीतायाश्च विनाशोयं मम चामित्रसूदन ॥ विस्तरेण ज
नन्या मे विनिवेद्यस्त्वया भवेत् ॥१९॥ इति विलपति राघवे तु दीने वनमुपगम्य तया विना सुकेश्या ॥ भयविकलमुखस्तु लक्ष्मणोपि व्यथित
मना भृशमातुरो बभूव ॥२०॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकाण्डे द्विषष्टितमः सर्गः ॥ ६२॥

कातरत्वम् अशूरत्वं सीतापनयनेन सीतानाशेन ॥१२॥ तया सीतया विरहितं हीनं ॥१३॥ तात एव कृतार्थः स तत्रैव वसतादिति अर्धमधिकं कतकपाठे तातो दशरथ एव
कृतार्थ वसतादिति लोट् व्यत्ययेन यतस्तत्रैव स्वर्ग एव वसति न तु जीवती कौसल्येत्यर्थः ॥१४॥ पक्षान्तरमाह अथवेति ॥१५॥१६॥१७॥१८॥१९॥ भयविकलमुखः भयेन
विवर्णमुखः ॥२०॥ इति रामाभिरामे आरण्य० द्विषष्टितमः सर्गः ॥६५॥

शोक इत्य वियोगजो हन्ति विशेषः न ज्ञानं चित्तवैकल्यं मोहः ॥१॥ शोकवशेनाभिपन्नं पीडितं विपुले निग्रह इति पाठे निशायितेन शोकेनेत्यर्थः असमानुरूपं लोकस्य दुःखप्रसंगे दुर्विनं ॥२॥ शोकमनुप्रवृत्तः शोकः शोकानुशोकः सः परंपरायाः स्तनीयार्थे षष्ठी परंपरया विवृद्धेन ह्रियतो माहृदयं रक्षितानमात्मानं मनश्च भिद्यन्ते निषीदन्ति ॥३॥ उक्तमेव विस्तरेण हृष्टपूर्वमिति अभीप्सितानि चिकीर्षा विषयत्वेनाप्तानि न त्वनेन यामध्ये केषांचित् विपाकः फलपरिपाको यस्य पापस्येति तेनः प्राप्तं दुःखेन दुःखं दुःखपरंपरामित्यर्थः ॥४॥ नामेवाह राज्येति स्तानि षड्विधिचिन्तितानि स्मृतानि शोकवेगमिदानीं मनसा पूरयन्ति ॥५॥ वनमेत्य पापशरीरे क्लेशमनुभूय पापिष्ठा नाः सन्निधानानस्मवंशानयस्मीमा वियोगानुनहरी यो न्हक्लिष्टाङ्ग

स राजपुत्रः प्रियया विहीनः शोकेन मोहेन च पीड्यमानः ॥ विषादयन्भ्रातरमार्तरूपो भूयो विषादं प्रविवेश तीव्रं ॥१॥ स लक्ष्मणं शोकवशाभिपन्नं शोके निमग्नो विपुले तु रामः ॥ उवाच वाक्यं व्यसनानुरूपमुष्णं विनिश्वस्य रुदन्सशोकं ॥२॥ न मद्विधो दुष्कृतकर्मकारी मन्ये द्वितीयोस्ति वसुन्धरायां ॥ शोकानुशोको हि परंपराया मामेति भिन्दन्हृदयं मनश्च ॥३॥ पूर्वं मया नूनमभीप्सितानि पापानि कर्माण्यसकृत्कृतानि ॥ न चायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि ॥४॥ राज्यप्रणाशः स्वजनैर्वियोगः पितुर्विनाशो जननीवियोगः ॥ सर्वाणि मे लक्ष्मण शोकवेगमापूरयन्ति प्रविचिन्तितानि ॥५॥ सर्वं तु दुःखं मम लक्ष्मणेदं शान्तं शरीरे वनमेत्य क्लेशं ॥ सीतावियोगात्पुनरप्युदीर्णं काष्ठैरिवाग्निः सहसोपदीप्तः ॥६॥ सा नूनमार्या मम राक्षसेन ह्यभ्याहृता खं समुपेत्य भीरुः ॥ अपस्वरं विप्रलापा भयेन विक्रन्दितेन त्वभीक्ष्णं ॥७॥ तौ लोहितस्य प्रियदर्शनस्य सदोचितावुत्तमचन्दनस्य ॥ वृत्तौ स्तनौ शोणितपङ्कदिग्धौ नूनं प्रियाया मम नाभिपानः ॥८॥ तं श्लक्ष्णसुव्यक्तमृदुप्रलापं तस्या मुखं कुञ्चितकेशभारं ॥ रक्षोवशं नूनमुपागताया न भ्राजते राहुमुखे यथेन्दुः ॥९॥ तां हारपाशस्य सदोचिताया ग्रीवां प्रियाया मम सुव्रतायाः ॥ रक्षांसि नूनं परिपीतवन्ति निर्भिद्य हि भिन्ना रुधिराशनानि ॥१०॥ ॥७॥ ॥७॥ ॥७॥

प्रियावियोगस्य दुःखसहृदिति भावः ॥६॥ सा राक्षसेन नूनमभ्याहृता नसा खमाकाशं समुपेत्य प्राप्य अपस्वरं विस्वरं विक्रन्दितवती अपि संभाव्यत एवमित्यन्वयः ॥७॥ लोहितस्य चंदनस्य हरिचन्दनस्य लोहितं हरिचन्दनमिति कोशात् शोणितपङ्कदिग्धौ भक्षणाय राक्षसे विशसनादिति भावः मम नाभिपानः एवमपि मम शरीरस्याभिपानो न जायत इत्यर्थः ॥८॥ ॥९॥ हारपाशो हाररूपा माला तस्या उचितां तां उचितो नः श्वानभागी यस्यास्तां तां कम्बुतुल्यां ग्रीवामित्यर्थः परिपीतवन्ती निपाठे रुधिरमिति शेषः भविष्यन्निज्ञानानी निवाप्नं न्यविजने ॥१०॥

61

पुस्तक ५

५ श्लो

||११|| उपोपविश्यसमीपावुस्थितानि· शङ्केस्मिन्नेई घनस्यशब्दोहासः ||१२|| ममप्रियायानित्यकालंप्रियेयत्यन्वयः अत्रगोदावर्याइयंविनाअसंगतेत्याह· नैकाकिनीति ||१३|| एवमग्रेऽपिगाढ
निपंकजानिआनेतुमितिशेषः ||१४|| अनिविभेतिअनुयुनभीताभवति ||१५|| लोकहनाकृ सेत्याहिनानाहृशस्त्वक्ष्मत्रानवनस्तेनत्रानेमवधालीतिभावः ||१६|| यन्तेनिर्यावि दिनं
नभवेत्तद्वस्तुसर्वेषुनैवास्ति· अतःसापितवविदितेवनिनाशस्त्वत्यन्वयः कलपालिनी त्यनेनेनस्यामहृ·ग्राने· ननत्रानममनेनानिवक्तुमशक्यमितिनिसूचितं ||१७|| इतीवानीवश
शैयपर्यायाशोकविधेयदेहूनमिवकालयुतंकालोचितं ||१८|| ||१९|| नचिंतयामासलक्ष्मणोक्तंयुक्तमितिनविचारयामास· किंतुधैर्यंत्यक्तवानेवानएवपुनर्दुःखंवशापन ||२०|| इति

मयाविहीनाविजनेवनेसाराक्षोभिराहृत्यविकृष्यमाणा ||नूनंविनादंकुररीवदीनासाप्रुक्तवत्यायतकांतनेत्रा ||११|| अस्मिन्मयासार्धमुदा
रशीलाशिलातलेपूर्वमुपोपविष्टा ||कांतस्मितालक्ष्मण जातहासात्वामाहसीताबहुवाक्यजातं ||१२|| गोदावरीयंसरितांवरिष्ठाप्रियाप्रिया
याममनित्यकालं ||अप्यत्रगच्छेदितिचिंतयामिनैकाकिनीयातिहिसाकदाचित ||१३|| पद्माननापद्मपलाशनेत्रापद्मानिवानेतुमभिप्रयाता
तदप्ययुक्तंनहिसाकदाचिन्मयाविनागच्छतिपंकजानि ||१४|| कामंत्विदंपुष्पितवृक्षखंडंनानाविधैःपक्षिगणैरुपेतं ||वनंप्रयातानुतदप्य
युक्तमेकाकिनीसातिबिभेतिभीरुः ||१५|| आदित्यभोलोककृताकृ तज्ञलोकस्यसत्यानृतकर्मसाक्षिन ||ममप्रियासाक्वगताहृतावाशंसस्वमेशोक
हतस्यसर्वेषुनवास्तिकिंचिद्यत्तेननित्यंविदितंभवेनत ||शंसस्ववायोकुलपालिनींतांमृताहृतावापथिवर्ततेवा ||१७|| इतीवतंशोकविधेयदेहं
रामंविसंज्ञंविलपंतमेव ||उवाचसौमित्रिरदीनसत्वोन्यायेस्थितःकालयुतंचवाक्यं ||१८|| शोकंविसृज्याद्यधृतिंभजस्वसोत्साहताचास्तुवि
मार्गणेस्याः ||उत्साहवंतोहिनरानलोकेसीदंतिकर्मस्वतिदुष्करेषु ||१९|| इतीवसौमित्रिमुदग्रपौरुषंब्रुवंतमार्तोरघुवंशसत्तमः नचिं
तयामासधृतिंविमुक्तवानपुनश्चदुःखंमहदभ्युपागमत ||२०|| ||इत्यार्षेश्रीमद्रामायणेआरण्यकांडेत्रिषष्टितमःसर्गः ||६३|| सदीनदी
नयावाचालक्ष्मणंवाक्यमब्रवीत ||शीघ्रंलक्ष्मणजानीहिगत्वागोदावरींनदीं ||१||

((रामाभिरामेआरण्यकांडेत्रिषष्टितमःसर्गः ||६३|| ||एवंशोककारणंवा
रक्षाराश्रवणेनरावणस्यमनुष्यत्वबुद्धिरार्थपूर्वकंस्ववध्यत्वसंपादनायेतिबोध्यंतदुक्तंब्रह्मांडपुराणे स्त्रीपुंमलानुषंगात्मादेहानास्यविजायते किंतुनिर्दोषचैतन्यसुख
नित्यास्वकांतनंप्रकाशयतिस्मवेयज्ञनिर्विह्नोनैवापरः तथाप्यसुरमोहार्थंपरेषांबहुचिन्त्कचितदुःखाज्ञानश्रमादीश्वरशयेषुहृत्सद्गुणः कदणादिचक्षुवात्रानस्वनत्रा
चिंत्यसकृणे मोक्षभावायतेषांतुदर्शयन्नानजोहरिः कृत्स्नोसत्यकदेहोपिन्यक्तदेहसदेहवत लोकानांदर्शयामासस्वरूपसदृशाकृतिमिति एतेनरावणस्येश्वरत्वबुद्धि
प्रतिबंधेनमोक्षाभावोपिशोकफलमित्युक्तं· एवंरावणाद्वारासीताहरणमपितत्स्वरूपनिशयनाशेनवध्यत्वसंपादनायतथाचकेदारखंडउक्तंस्वापकामहृतातपसालक्षे
वलोरावणस्तदधिकतपोवलंदिनाजेतुमशक्यादेवाश्चस्वयंनरधिकंनयःकर्तुमक्षमाअनन्तेषांकार्यमनंतानातुचितसीतानुरागमोहातुहत्रितिसंपादनेनरावणस्यत
पोवीर्यभ्रंशसंपादयकर्न[illegible]यमितिलक्ष्मणसहविचार्यनरर्थंविलुःसीनयाबलवि
घ्यामासहावतीर्णइति ||१||

नो

सर्वं||१६|| लोकेषु

॥२॥ लघुविक्रमः अविलंबितपादन्यासः तीर्थवतीं अवतारवतीं पुण्योदकवतीं च ॥३॥ न शृणोति मे वाक्यमिति शेषः क्लेशनाशिनी स्वदर्शनेन दुःखनिवारिका ॥४॥ न वेद्मि ॥५॥ तां
गोदावरीं ॥६॥ भूतानि उक्तरूपेण पृच्छमानानि राक्षसेंद्रेण हृतां ज्ञात्वापि रावणभयात् रामाय न शशंसुः तथा गोदावरी च न शशंसेत्यर्थः ॥७॥ तथा भूतैरस्मै सीतां शंसेति
प्रचोदितापि गोदावरी पृष्टापि नावदत् ॥८॥ तद्रूपं तु रावणस्येति ॥९॥ तया सीतासंशंसनाभावेन सीतादर्शने निराशः कृतः इयं गोदावरी दिव्यदेवतानद्यतेऽतः

अपि गोदावरीं सीता पद्मान्यानयितुं गता॥ एवमुक्तस्तु रामेण लक्ष्मणः पुनरेव हि॥२॥ नदीं गोदावरीं रम्यां जगाम लघुविक्रमः॥ तां लक्ष्म
णस्तीर्थवतीं विचित्वा राममब्रवीत्॥३॥ नैनां पश्यामि तीर्थेषु क्रोशतो न शृणोति मे॥ कं नु सा देशमापन्ना वैदेही क्लेशनाशिनी॥४॥
न हि तं वेद्मि वै राम यत्र सा तनुमध्यमा॥ लक्ष्मणस्य वचः श्रुत्वा दीनः संतापमोहितः॥५॥ रामः समभिचक्राम स्वयं गोदावरीं नदीं॥ स तामु
पस्थितो रामः क्व सीतेत्येवमब्रवीत्॥६॥ भूतानि राक्षसेंद्रेण वधार्हेण हृतामपि॥ न तां शशंसू रामाय तथा गोदावरी नदी॥७॥ ततः प्रचो
दिता भूतैः शंसास्मै प्रियामिति॥ न च साभ्यवदत्सीतां पृष्टा रामेण शोचता॥८॥ रावणस्य च तद्रूपं कर्माणि च दुरात्मनः॥ ध्यात्वा भया
त्तु वैदेहीं सा नदी न शशंस ह॥९॥ निराशस्तु तया नद्या सीताया दर्शने कृतः॥ उवाच रामः सौमित्रिं सीतादर्शनकर्षितः॥१०॥ एषा गोदावरी सौ
म्य किंचिन्न प्रतिभाषते॥ किं नु लक्ष्मण वक्ष्यामि समेत्य जनकं वचः॥११॥ मातरं चैव वैदेह्या विना तामहमप्रियम्॥ या मे राज्यविहीनस्य
वने वन्येन जीवतः॥१२॥ सर्वं व्यपानयच्छोकं वैदेही क्व नु सा गता॥ ज्ञातिवर्गविहीनस्य वैदेहीमप्यपश्यतः॥१३॥ मन्ये दीर्घा भविष्यंति
रात्रयो मम जाग्रतः॥ मंदाकिनीं जनस्थानमिमं प्रस्रवणं गिरिं॥१४॥ सर्वाण्यनुचरिष्यामि यदि सीता हि लभ्यते॥ एते महामृगा वीर
पुनः मामीक्षंते पुनः॥१५॥ वक्तुकामा इव हि मे इंगितान्युपलक्षये॥ तांस्तु दृष्ट्वा नरव्याघ्रो राघवः प्रत्युवाच ह॥१६॥ क्व सीतेति निरीक्षन्वै बा
ष्पसंरुद्धया गिरा॥ एवमुक्ता नरेंद्रेण ते मृगाः सहसोत्थिताः ॥१७॥ ॥८१॥ ॥७॥ ॥८१॥ ॥८१॥

स्तद्दर्शनं दुर्लभमिति निराशोऽभूत् ॥१०॥ तदेवाह एषेति ॥११॥ ॥१२॥ ॥१३॥ मंदाकिनी का चित्रकूटप्रस्रवणाख्यो गिरिः ॥१४॥ सर्वाण्यनुचरिष्यामि अनु
चरवत्संविचरिष्यामि ॥१५॥ एषामिंगितानि तथोपलक्षये यथा वक्तुकामा इत्यर्थः ॥१६॥ निरीक्षन् मृगचेष्टाज्ञानार्थं सूक्ष्मदृष्ट्या अवेक्षन् एवमुक्ताः एवं पृष्टाः ॥१७॥ ॥८१॥

नमस्थलं दर्शयन्तः उन्मुखत्वेनाकाशावलोकनेङ्गितेनेत्यर्थः ह्रियमाणा सीता यां दिशमभ्यपद्यत ॥१८॥ तेन मार्गेण गच्छतो धावतो नराधिपस्य निरीक्षणे सविंमिङ्गितं लक्ष्मणो
पश्यदित्यादि ययेति येन हेतुना मार्गमाकाशमार्गं पुनर्भूमिगमनाय भूमिं च निरीक्षन्ते ॥१९॥ पुनश्च मार्गं दर्शयितुमिच्छतो लक्ष्मणेनोपलक्षिताः तेषामिङ्गितं लक्ष्म
णो लक्षयामासेत्यर्थः आकाशमार्गेण गत्वा दक्षिणदिशि दूरस्थापि तासीता दक्षिणदिशि गच्छतेत्येवं तदिङ्गितं तेषां वचनसर्वस्वभूतं स्वयं लक्षयामास ततो ज्ञा

मार्त३

दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभस्थलं॥ मैथिली ह्रियमाणा सा दिशं यामभ्यपद्यत॥१८॥ तेन मार्गेण गच्छन्तो निरीक्षन्ते नराधिपं॥ येन मार्गं च
भूमिं च निरीक्षन्ते स्म ते मृगाः॥१९॥ पुनर्नदन्तो गच्छन्ति लक्ष्मणेनोपलक्षिताः॥ तेषां वचनसर्वस्वं लक्षयामास चेङ्गितं॥२०॥ उवाच लक्ष्मणो धीमा
न्ज्येष्ठं भ्रातरमर्थवत्॥ क्व सीतेति त्वया पृष्टा यदिमे सहसोत्थिताः॥२१॥ दर्शयन्ति क्षितिं चैव दक्षिणां च दिशं मृगाः॥ साधु गच्छावहे देव दिशमेतां
च नैर्ऋतिं॥२२॥ यदि तस्यागमः कश्चिदार्या वा साथ लक्ष्यते॥ बाढमित्येव काकुत्स्थः प्रस्थितो दक्षिणां दिशं॥२३॥ लक्ष्मणानुगतः श्रीमान्वीक्ष
माणो वसुन्धरां॥ एवं संभाषमाणौ तौ अन्योन्यं भ्रातरावुभौ॥२४॥ वसुन्धरायां पतितं पुष्पमार्गमपश्यतां॥ पुष्पवृष्टिं निपतितां दृष्ट्वा रामो
महीतले॥२५॥ उवाच लक्ष्मणं वीरो दुःखितो दुःखितं वचः॥ अभिजानामि पुष्पाणि तानीमानीह लक्ष्मण॥२६॥ अपिनद्धानि वैदेह्या
मया दत्तानि कानने मन्ये सूर्यश्च वायुश्च मेदिनी च यशस्विनी॥२७॥ अभिरक्षन्तु पुष्पाणि प्रकुर्वन्तो मम प्रियं॥ एवमुक्त्वा महाबाहुर्लक्ष्म
णं पुरुषर्षभं॥२८॥ उवाच रामो धर्मात्मा गिरिं प्रस्रवणाकुलं॥ कच्चित्क्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी॥२९॥ रामा रम्ये वनोद्देशे मया
विरहिता त्वया॥ क्रुद्धोऽब्रवीद्गिरिं तत्र सिंहः क्षुद्रमृगं यथा॥३०॥ तां हेमवर्णां हेमाङ्गीं सीतां दर्शय पर्वत॥ यावत्सानूनि सर्वाणि न ते
विध्वंसयाम्यहं॥३१॥

त्वाज्ञानरमणं वाचेत्यर्थः आर्तवत् आर्तो हि ॥२०॥२१॥२२॥ तस्यागमः तस्या आगम इत्यर्थः आर्या दीर्घः ज्ञापकवस्तु दर्शयते इत्यर्थः ॥२३॥२४॥ पतितं पुष्पयुतं मार्गं ॥२५॥ अभि
जानामि प्रत्यभिजानामि ॥२६॥ अपिनद्धानि केशपाशे बद्धानि अम्लानत्वेन रविः अपनयनेन वायुः धारणेन वसुन्धरा अम्लिम्लिायमानानां ज्ञापनरूपं प्रकुर्वन्तो रक्षन्तीति मन्ये ॥२७
॥२८॥ मया विरहिता कच्चिद्रम्ये वनोद्देशे सर्वाङ्गसुन्दरी दृष्टा ॥२९॥ क्रुद्धः लक्ष्मणदर्शनादेव तां देशं न क्रोधः ॥३०॥ हेमाङ्गी मित्यनेन लावण्यमुक्तं ॥३१॥ ॥७॥

५२

दर्शयन्निव वक्ष्यमाणलिंगद्वारेणादर्शयन् वाकराङ्कितेन साक्षादिति शेषः एषवेन विषये ॥३२॥३३॥३४॥ दिधक्षन्निव नतु वास्तवी दिधक्षेति भावः ॥३५॥ निष्क्रान्तं प्रवृत्ति विशेषं मन्दस्या
पनविस्तन ॥३६॥ अनुसस्रापा अनुगम्यमानायाः जटायुर्युद्धसमये सीतारावणेन भूमौ विसृज्य पुनर्ग्रहणादेवमुक्तिः परिक्रान्तं परिव्रतं एतत्सर्वं समीक्ष्य भ्रातरं शशंसेत्यन्वयः ॥३७॥
॥३८॥ कनकविरवः भूषणावयवीभूतस्वर्णशकलानि ॥३९॥ भूषणानामिति पूर्वान्वयि तप्तविंदुनिकाशैः नयनीयविंदुसदृशैः क्षतजविंदुभिः रुधिरविंदुभिः ॥४०॥ मन्ये इति सी

एवमुक्तस्तु रामेण पर्वतो मैथिलीं प्रति ॥ दर्शयन्निव तां सीतां नादर्शयत राघवे ॥३२॥ ततो दाशरथी राम उवाच च शिलोच्चयं ॥ मम बाणाग्निनि
र्दग्धो भस्मीभूतो भविष्यति ॥३३॥ असेव्यः सर्वतश्चैव निस्तृणद्रुमपल्लवः ॥ इमां वा सरितं चाद्य शोषयिष्यामि लक्ष्मण ॥३४॥ यदि नाख्याति मे
सीतामद्य चन्द्रनिभाननां ॥ एवं प्ररुषितो रामो दिधक्षन्निव चक्षुषा ॥३५॥ ददर्श भूमौ निष्क्रान्तं राक्षसस्य पदं महत् ॥ त्रस्ताया रामकांक्षिण्याः प्र
धावन्त्या इतस्ततः ॥३६॥ राक्षसेनानुसृप्ताया वैदेह्याश्च पदानि तु ॥ स समीक्ष्य परिक्रान्तं सीताया राक्षसस्य च ॥३७॥ भग्नं धनुश्च तूणी च विकी
र्णं बहुधा रथं ॥ संभ्रान्तहृदयो रामः शशंस भ्रातरं प्रियम् ॥३८॥ पश्य लक्ष्मण वैदेह्याः कीर्णाः कनकविरवः ॥ भूषणानां हि सौमित्रे माल्यानि
विविधानि च ॥३९॥ तप्तविंदुनिकाशैश्च चित्रैः क्षतजविंदुभिः ॥ आवृतं पश्य सौमित्रे सर्वतो धरणीतलं ॥४०॥ मन्ये लक्ष्मण वैदेही राक्ष
सैः कामरूपिभिः ॥ भित्वा भित्वा विभक्ता वा भक्षिता वा भविष्यति ॥४१॥ तस्या निमित्तं सीताया द्वयोर्विवदमानयोः ॥ बभूव युद्धं सौमित्रे
घोरं राक्षसयोरिह ॥४२॥ मुक्तामणिचितं चेदं रमणीयं विभूषितं ॥ धरण्यां पतितं सौम्य कस्य भग्नं महद्धनुः ॥४३॥ राक्षसानामिदं वत्स
सुराणामथवापि वा ॥ तरुणादित्यसंकाशं वैदूर्यगुलिकाचितं ॥४४॥ विशीर्णं पतितं भूमौ कवचं कस्य काञ्चनं ॥ छत्रं शतशलाकं च दि
व्यमाल्योपशोभितं ॥४५॥ भग्नदण्डमिदं सौम्य भूमौ कस्य निपातितं ॥ काञ्चनोरश्छदाश्चेमे पिशाचवदनाः खराः ॥४६॥ भीमरूपा महा
कायाः कस्य वा निहता रणे ॥ दीप्तपावकसंकाशो द्युतिमान् समरध्वजः ॥४७॥ अपविद्धश्च भग्नश्च कस्य सांग्रामिको रथः ॥ रथाक्षमा
त्रा विशिखास्तपनीयविभूषणाः ॥४८॥

॥७ ॥४८॥ ॥७॥

नायां वाऽऽइमे रुधिरविंदवः सीतानिमित्तं सुन्दोपसुन्दवत् युध्यमानयो राक्षसयोर्नितिविकल्पालंकारः श्लोकद्वयेनोक्तः ॥४१॥४२॥४३॥ वैदूर्यगुलिकाचितं वैदूर्यमणिपलंकृतं
॥४४॥४५॥ काञ्चनोरश्छदाः काञ्चनमयतनुत्राणाः ॥४६॥ समरस्याभिप्रकाशको ध्वजो यत्र स समरध्वज इति रथविशेषणानादशोऽरथः अपविद्धः परिवृत्यपातितो भग्न

श्चेभग्नत्वेरणान्वयः केचित्तु ध्वजोपविद्धः ध्वस्तः रथो भग्न इत्यन्वयमाहुः ॥४७॥ रथाक्ष
मात्राः चक्रः शलाकादीर्घाः विशिखाः फलभागा इत्यर्थ ॥४८॥

63

विहिताःपरेणयोधेनशरावरैर्नतूणीरैः॥४९॥प्रतोदःतोत्त्रंप्रग्रहाअभीषवः॥५०॥कस्यापिराक्षसस्यपुरुषस्यैषापदवीपदसंचारमार्गः अतोममसनैःराक्षसैःसहएतन्निमित्तंजं
वैरंप्रवृत्तंशतगुणंसततंनेधाजीवितान्तकंजीवितस्यान्तकंअन्तरूपंसंपन्नंयस्य॥५१॥एवंराक्षोभिःसीताविपत्तिनिमित्तस्यधर्मनिवृत्तिनेतियतःसीताधर्मोनत्रायते एवंच
भक्षितायांहृतायांवावैदेह्यांकेहिलोकेममप्रियंकर्त्तुंशक्ताःनकेपिधर्मासाध्येनयामकिंचित्करत्वादितिभावः॥५२॥५३॥अथयोमृदुःसेवावालवितुंनच्छघनयाकांचिद्ध्रे
कस्थितिमाह कर्त्तारमितिसर्वलोकस्यान्यत्रिस्थितिसंहारकर्त्तारमपिशुम्भादिप्रसिद्धशूरंत्रिपुरसंहारादिविषयकान्यनशौर्यवन्तंमहेश्वरमपिकरुणावेदिनं

कस्येमेनिहतावाणाःप्रकीर्णाघोरदर्शनाः॥शरावरैशरैःपूर्णौविध्वस्तौपश्यलक्ष्मण॥४९॥प्रतोदाभीषुहस्तोयंकस्यवासारथिर्हतः॥पद
वीपुरुषस्यैषाव्यक्तंकस्यापिरक्षसः॥५०॥वैरंशतगुणंपश्यममतेजीवितान्तकं॥सुघोरहृदयैःसौम्यराक्षसैःकामरूपिभिः॥५१॥हृतामृतावा
वैदेहीभक्षितावातपस्विनी॥नधर्मस्त्रायतेसीतांह्रियमाणांमहावने॥५२॥भक्षितायांहिवैदेह्यांहृतायामपिलक्ष्मण॥केहिलोकाःप्रियं
कर्त्तुंशक्ताःसौम्यममेश्वराः॥५३॥कर्त्तारमपिलोकानांशूरंकरुणवेदिनं॥अज्ञानादवमन्येरन्सर्वभूतानिलक्ष्मण॥५४॥मृदुंलोकहितेयु
क्तंदांतंकरुणवेदिनं॥निर्वीर्यइतिमन्यन्तेनूनंमांत्रिदशेश्वराः॥५५॥मांप्राप्यहिगुणोदोषःसंवृत्तःपश्यलक्ष्मण॥अद्यैवसर्वभूतानांर
क्षसामभवायच॥५६॥संहृत्यैवशशिज्योत्स्नांमहान्सूर्यइवोदितः॥संहृत्यैवगुणान्सर्वान्ममतेजःप्रकाशते॥५७॥नैवयक्षानगंधर्वानपि
शाचानराक्षसाः॥किन्नरावामनुष्यावासुखंप्राप्स्यन्तिलक्ष्मण॥५८॥ममास्त्रबाणसंपूर्णमाकाशंपश्यलक्ष्मण॥असंपातंकरिष्यामिह्य
द्यत्रैलोक्यचारिणां॥५९॥सन्निरुद्धग्रहगणमावारितनिशाकरं॥विप्रनष्टानलमरुद्भास्करद्युतिसंवृतं॥६०॥ ॥ ७ ॥

करुणंयथातथावेदितुंशीलमस्यतंदयार्द्रस्वान्तंलक्ष्मीस्थितिनमत्तानानेवभवाज्ञानादवमन्येरन्किमियंकपिनोपिकरिष्यतिइतिनगणयन्तीत्यर्थः॥५४॥मरेवमतोमृदु
मिति लोकहितेप्राणिमात्ररक्षणसंपादनेयुक्तं युक्तचित्तं अतएवमृदुस्वभावंदांतंनानाप्रकारेणदुर्विषयप्रवृत्तिरहितेन्द्रियवर्गमांत्रिदशेश्वराइंद्रादयोनिर्वीर्य
मंत्यंतेयतःसीतात्राणेनक्षमवंतइत्यर्थः॥५५॥तस्मान्मोरूपमेवावलंवनीयमित्याह गुणोपिमार्दवादिर्मांप्राप्यदोषोनिष्कसाधनंवृत्तइतिहेतोरेनत्यक्त्वापौरुषम
वावलंबेपश्य अद्यममतेजएवप्रकाशते सर्वभूतानामभवायनाशाय शशिज्योत्स्नांसंहृत्यैवप्रलयकालोदितोमहान्सूर्यइवशशिज्योत्स्नातुल्यान्मामकान्
गुणान्संहृत्येवरविवत्तेजोमदीयंप्रकाशतेपश्येत्यन्वयः॥५६॥५७॥नरेवयपंचयानिनैवेति॥५८॥पश्यअचिरादेवेतिशेषः त्रैलोक्यचारिणामसंपातंवाणावरणात्
क्रियारहितंयथाभवतितथाकरिष्यामि॥५९॥सन्निरुद्धप्रचारग्रहगणोयत्रतनंत्रैलोक्यंविप्रनष्टाअनलादिगुणायत्रतनंत्रततंसंवृतंतनममास्त्रैःसंवृतमित्यर्थः॥६०॥

॥६१॥कालकर्मणाकालसाध्यंकर्मनाशस्तेनकालधर्मेणेतिपाठेपिनद्धरूपेणकालधर्मयोगेनेत्यर्थः.तस्मिन्नरूपेऽतिजार्थः॥६३॥अमर्यादंत्यक्तस्वस्वप्रकृत्यवस्थानं जीवलोकेनतुरावणेइत्यु
निवारैःरावणशब्दःस्वलनःस्वलपन्यथानः॥६४॥ ६५॥ ६६॥देवादयोनभविष्यन्तिप्रत्येकंसर्वेनशिष्यन्तीत्यर्थः॥६७॥ ६८॥तथारूपांयथापूर्वंस्वभावांशक्तेनरास्यन्तीतियोन

विनिर्मथितशैलाग्रंशुष्यमाणजलाशयं॥ध्वस्तद्रुमलतागुल्मंविप्रणाशितसागरं॥६१॥त्रैलोक्यंतुकरिष्यामिसंयुक्तंकालकर्मणा॥ननेकुशलि
नींसीतांप्रदास्यंतिममेश्वराः॥६२॥अस्मिन्मुहूर्तेसौमित्रेममद्रक्ष्यन्तिविक्रमं॥नाकाशमुत्पतिष्यन्तिसर्वभूतानिलक्ष्मण॥६३॥समा
कुलममर्यादंजगत्पश्याद्यलक्ष्मण॥आकर्णपूर्णैरिषुभिर्जीवलोकंदुरावरैः॥६४॥करिष्येमैथिलीहेतोरपिशाचमराक्षसं॥ममरोषप्रयु
क्तानांविशिखानांबलंसुराः॥६५॥द्रक्ष्यन्त्यद्यविमुक्तानाममर्षाद्दूरगामिनां॥नैवदेवानदैतेयानपिशाचानराक्षसाः॥६६॥भविष्यन्तिम
मक्रोधात्त्रैलोक्येविप्रणाशिते॥देवदानवयक्षाणांलोकायेरक्षसामपि॥६७॥बहुधानिपतिष्यन्तिबाणौघैःशकलीकृताः॥निर्मर्यादा
निमाँल्लोकान्करिष्याम्यद्यसायकैः॥६८॥हृतांमृतांवासौमित्रेनदास्यन्तिममेश्वराः॥तथारूपांहिवैदेहींनदास्यन्तियदिप्रियां॥६९॥नाश
यामिजगत्सर्वंत्रैलोक्यंसचराचरं॥यावद्दर्शनमस्यावैतापयामिचसायकैः॥७०॥इत्युक्त्वाक्रोधताम्राक्षःस्फुरमाणोष्ठसंपुटः॥वल्कलाजि
नमाबध्यजटाभारमबंधयत्॥७१॥तस्यक्रुद्धस्यरामस्यतथाभूतस्यधीमतः॥त्रिपुरंजघ्नुषःपूर्वंरुद्रस्येवबभौतनुः॥७२॥लक्ष्मणादथचा
दायरामोनिष्पीड्यकार्मुकं॥शरमादायसंदीप्तंघोरमाशीविषोपमं॥७३॥संदधेधनुषिश्रीमान्रामःपरपुरंजयः॥युगान्ताग्निरिवक्रुद्धइ
दंवचनमब्रवीत्॥७४॥यथाजरायथामृत्युर्यथाकालोयथाविधिः॥नित्यंनप्रतिहन्यन्तेसर्वभूतेषुलक्ष्मण॥७५॥तथाहंक्रोधसंयुक्तो
ननिवार्योऽस्म्यसंशयम्॥७६॥

हृतांक्रोधान्निशयान्नदास्यः॥६९॥७०॥७१॥७२॥निष्पीड्यदृढमुष्टिबंधेनगृहीत्वा॥७३॥७४॥ यथाजरादयोनिवार्यास्तथाहमस्मात्कर्मणःकेनापिवारयितुमशक्यःविधिः
दैवंविधिर्विधानेदैवेपिइतिकोशः॥७५॥७६॥ ॥७५॥ ॥७६॥ ॥७॥ ॥७॥ ॥७॥

64

प्रोवेनिमत्त्रप्रोन्त्यावर्तनेप्रोवेपूर्वरूपसदृशरूपवतीं प्राणनदिशं निनदास्यं निहत्यर्थः परिवर्ज्य यामि नाशयामि नन्वेवंविधः क्रोधः कथमस्य किमर्थं चेति चेच्छृणु मनुष्य
रेरुधारणेननव्यवहारनरनमेवैनत. किंच ईदृशदुःखकाले अस्य क्रोधाभावे रावणो मनुष्यबुद्धिकर्णान् तथाचनष्टधीशकाः स्यादित्येतदर्थं चमसः स्मनुमरणधर्मणयो
नयामि इत्यादि वचोपि एवरणवचोवदेव आरोपितक्रोधमूलकत्वात् अतएव शरीरे विधमिष्यामीत्युक्तिः लक्ष्मणस्तु नत्वसोपि नष्टदेवानन्वज्ञाइव नमायया मोहिता वा
लयकालिकरौद्रशक्त्यावेशसंभाव्यातु नयनिस्म किंचास्य क्रोधस्यारोपितत्वाभावेः अयसीताया अलाभे सर्वजगत्परिवर्तनेपि नित्याय कथं लक्ष्मणप्रार्थनयापि नामय
थयेन् अन्यथा कैकेय्यग्रे कृतो वनवासप्रतिज्ञा कथं कौसल्यावचसा न त्यक्तवान् तस्मात्सा यथार्था इयंतु आरोपितेत्येव सा अनेन व्यवहारेण क्रोधादिकाले हनाया

प्रोवमेवाहरन्तीमनिंदितां दिशांति सीतां यदिनाद्यमैथिलीं॥ सदेवगंधर्वमनुष्यपन्नगं जगत्सशैलं परिवर्तयाम्यहं॥७८॥ ॥इत्या
र्षे श्रीमद्रामायणे आरण्यकांडे चतुःषष्ठितमः सर्गः॥६४॥ ॥तप्यमानं तदा रामं सीताहरणकर्शितं॥ लोकानामभवे युक्तं सं
वर्त्तकमिवानलं॥१॥ वीक्षमाणं धनुः सज्यं निश्वसंतं पुनः पुनः दग्धुकामं जगत्सर्वं युगान्ते च यथा हरं॥२॥ अदृष्टपूर्वं संक्रु
द्धं दृष्ट्वा रामं स लक्ष्मणः॥ अब्रवीत्प्राञ्जलिर्वाक्यं मुखेन परिशुष्यता॥३॥ पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः॥ न क्रोधवशमापन्नः
प्रकृतिं हातुमर्हसि॥४॥ चंद्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा॥ एतच्च नियतं नित्यं त्वयि चानुत्तमं यशः॥५॥ एकस्य नापरा
धेन लोकान्हंतुं त्वमर्हसि॥ न तु जानामि कस्यायं भग्नः सांग्रामिको रथः॥६॥ केन वा कस्य वा हेतोः सयुगः सपरिच्छदः॥ खुरनेमि
क्षतश्चायं सिक्तो रुधिरविंदुभिः॥७॥ देशो निर्वृत्तसंग्रामः सुघोरः पार्थिवात्मज॥ एकस्य तु विमर्दोयं न द्वयोर्वदतां वर॥८॥

अयुक्ताया अपि प्रतिज्ञाया अपालने अनयो न रोषाभाव इत्यपि सूचितं॥७७॥ ॥इति रामाभिरामे श्रीरा० आरण्यकांडे चतुःषष्ठितमः सर्गः॥६४॥ ॥अभवे नाशे युक्तमुद्यु
क्तं संवर्तकं प्रलयकालिकं॥१॥ हरं कालाग्निरुद्रं॥२॥ अदृष्टपूर्वमेवं क्रूरायद्दृष्ट संहारशक्त्यावेशं संक्रुद्धं राममब्रवीदिति रामपदद्वयसंबंधः मुखपरिशोषो लोकवि
नाशभयेन॥३॥ प्रकृतिं सर्वभूतहितत्वरूपां॥४॥ एतच्च उक्तं चतुष्टयं च अनुत्तमयशश्च त्वयि नियमितमित्यर्थः॥५॥ एकस्यापराध इति कथं ज्ञायते तत्राह नन्विति ननुजानामि
कस्य वा पराक्रान्ति ज्ञातत्राह कस्यचिदेव न केषांचिदित्यर्थः सायुधपरिकरो भग्न इत्यन्वयः॥६॥ स केन भग्नः केन हेतुनेत्यन्वयः ननु न जानामीति शेषः रथनेमिक्षतत्वादिविशि
ष्टोयं देशो निर्वृत्तसंग्रामो दृश्यते इति शेषः एवंभूतैर्हेतुभिरयं विमर्दः संग्राम एकस्य रथिकस्य केनचित्सह नतु द्वयो रथिकयोरिति शेषः॥७॥ ८॥ ॥७९॥

नदेवाहृत्वंतं सुविक्रान्त चिह्नं नहीनि· अनएव कस्य कृते लोकनाशो न युक्तः ॥ ९ ॥ युक्तदंडा यथापराध दंडाः मृदवोऽकठिनाः ॥ १० ॥ किं च यदि न दारप्रणाशो लोककर्तृको लोकाननुमतो वास्या युक्तं न
नाशनं नैवमसीत्याह कोन्विति ॥ ११ ॥ सरिदादयस्ते विप्रियं कर्तुं नालं न समर्थाः न सहावनोवादी दीक्षितस्य यजमानस्य साधवो ज्ञानसंपन्ना ऋत्विगादयो यथा विप्रियं शापादिदातुं न गवा
कर्म कर्तुं न समर्थास्तद्वत् ॥ १२ ॥ मद्द्वितीयः अहं द्वितीयः सहायो यस्य सः समुद्रादिस्थानेषु विचयनार्थं परमर्षिभिः सहायैरित्युक्तं ॥ १३ ॥ १४ ॥ यदि अस्माभिश्च यत्नेनान्विष्य शक्या नत्याप्नि
स्यात् ततः परं देवाः सर्वज्ञा यदि ते पत्नीं पत्नीं वा नो न दास्यंति ततः पश्चात्प्राप्तकालं चतुर्थोपायं दंडं तेषु करिष्यति ॥ १५ ॥ शीलं सुचरित्रं साम सान्त्ववादः विनयः प्रश्रयः नयो नीति ॥ १६ ॥

न हि वृत्तं हि पश्यामि बलस्य महतः परं ॥ नैकस्य तु कृते लोकान्विनाशयितुमर्हसि ॥ ९ ॥ युक्तदंडा हि मृदवः प्रशांता वसुधाधिपाः ॥ सदा त्वं स
र्वभूतानां शरण्यः परमा गतिः ॥ १० ॥ को नु दारप्रणाशं ते साधु मन्येत राघव ॥ सरितः सागराः शैला देवगंधर्वदानवाः ॥ ११ ॥ नालं ते विप्रियं क
२३
र्त्तुं दीक्षितस्येव साधवः ॥ येन राजन्हृता सीता तमन्वेषितुमर्हसि ॥ १२ ॥ मद्द्वितीयो धनुष्पाणिः सहायैः परमर्षिभिः ॥ समुद्रं च विचेष्यामः पर्व
तानि वनानि च ॥ १३ ॥ गुहाश्च विविधा घोराः पद्मिन्यो विविधास्तथा ॥ देवगंधर्वलोकांश्च विचेष्यामः समाहिताः ॥ १४ ॥ यावन्नाधिगमिष्यामस्तव भा
र्यापहारिणं ॥ न चेत्साम्ना प्रदास्यंति पत्नीं ते त्रिदशेश्वराः ॥ १५ ॥ कोसलेंद्र ततः पश्चात्प्राप्तकालं करिष्यसि ॥ १५ ॥ शीलेन साम्ना विनयेन सीतां नयेन
न प्राप्स्यसि चेन्नरेंद्र ॥ ततः समुत्सादय हेमपुंखैर्महेंद्रवज्रप्रतिमैः शरौघैः ॥ १६ ॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकांडे पंचषष्टितमः सर्गः ॥ ६५ ॥
॥ ॥ तं तथा शोकसंतप्तं विलपंतमनाथवत् ॥ मोहेन महता युक्तं परिद्यूनमचेतनं ॥ १ ॥ ततः सौमित्रिराश्वास्य मुहूर्तादिव लक्ष्मणः ॥ रामं संबोध
यामास चरणौ चाभिपीडयन् ॥ २ ॥ महता तपसा चापि महता चापि कर्मणा ॥ राज्ञा दशरथेनासील्लब्धोऽमृतमिवामरैः ॥ ३ ॥ तव चैव गुणैर्बद्धस्त्वद्वि
योगान्महीपतिः ॥ राजा देवत्वमापन्नो भरतस्य यथा श्रुतं ॥ ४ ॥ यदि दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे ॥ प्राकृतश्चाल्पसत्त्वश्च इतरः कः सहिष्यति ॥
॥ ५ ॥ आश्वसिहि नरश्रेष्ठ प्राणिनः कस्य नापदः ॥ संस्पृशंत्यग्निवद्राजन्क्षणेन व्यपयांति च ॥ ६ ॥ लोकस्वभाव एवैष ययातिर्नहुषात्मजः ॥ गतः श
क्रस्य सालोक्यमनयस्तं समस्पृशत् ॥ ७ ॥

इति रामाभिरामे श्रीरा० आर० पंचषष्टितमः सर्गः ॥ ६५ ॥ ॥ एवं क्रोधप्रशमपर्यंतं सहजज्ञानं प्राप्तं संबोधयति लक्ष्मणो रामं तमिति परिद्यूनं क्षीणं अचेतनं संज्ञारहितं विनम्रिव ॥ १ ॥ मुहूर्तादिव
मुहूर्तादेव ॥ २ ॥ बोधनप्रकारो महतेत्यादि. तपसा पुत्रकामनया कृतेन व्रतादिना कर्मणा अश्वमेधागानयनपूर्वकमहायागेन ॥ ३ ॥ भरतस्य सुखादिनिवेशः यथायथावत् श्रुतं ॥ ४ ॥ इ
तरः कः इति यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इत्युक्तेः मर्त्यावतारस्त्विह मर्त्यशिक्षणार्थमिति भागवतोक्तरीत्या लोकशिक्षणार्थमपि न रुदनादिनिभावः ॥ ५ ॥ आश्वसिहीति नहुषे
शारीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुतेः ॥ ६ ॥ न देवविग्रहेणाति लोकेति एष औपाधिकदुःखसंबंधो लोकस्य शरीरिणः स्वभाव एव न देवाद्य यथातिरिति अनयोऽनय
शक्लं तु दुःखं न च स्वर्गान्भ्रंशरूपं समस्तशब्दितयनेन अविरस्थितिकस्पर्शमात्रार्थकेन पुनरविलंबेनैव शोकेऽत्र प्रयुक्तसुखोत्तरकालिकदुःखनिवृत्तिरप्यस्य सूचिता ॥ ७ ॥

यो महर्षिः यः पुनर्नः पितुः पुरोहितः तस्य पुत्रशतं जज्ञेऽल्पायकाहाच पुनर्विश्वामित्रेणहतं पूर्वं सुखेनानुरकालिकदुःखानां न सुखं योगपतयोन्कान्मुखानां न दुःखमुक्तं एवं च महन्ना
मपवशपजायमाने रष्टशे सुखदुःखवचनरूपशोको भवो दृशस्या चिना विनिभावः।।८।। चलनमूर्ध्वं पञ्चदुःखमित्यर्थः।।९।। यो धर्मो यएव धर्मप्रवर्तको नेतो जगतः संसारत्वक
स्पकालपरिच्छेद्यश्चापवर्तको अनएव यन्नुक्तं सर्वं प्रतिष्ठितं नो चयरूपणगकुग्रासदुःखप्राप्तौ।।१०।। देवस्य कर्मणो वशं न प्रयुंक्ते नि इत्यर्थः किंपुनर्वक्तव्यं देहिनः सर्वभूतानि देहवन्तिस
वंभूतानि न मुचंतीनि प्रस्वभावं।।११।। नयानयोनन्मूलसुखदुःखे।।१२।।१३।। अनिर्विण्णदर्शना विषादरहितदर्शना विषादराहित्येन कृत्याकृत्यनत्वज्ञानवनः।।१४।। नत्वनःसम
नुचिंतय प्रयुक्तायुक्तं कृत्याकृत्यं चेति शेषः शुभाशुभे कर्मव्याकर्तव्ये प्रयुक्तायुक्ते बुद्धिप्रयुक्ताः ज्ञानेन निनस्मात्त्वं बुध्वा विचिंतयेति शेषः।।१५।। एवं दुःखमूलं प्राचीनं कर्म बुध्वा दुः
।।१६।।

महर्षिर्यो वसिष्ठस्तु यः पितुर्नः पुरोहितः।। अरुणपुत्रशतं जज्ञे नथैवास्य पुनर्हतं।।८।। या चेयं जगतो माता सर्वलोकनमस्कृता।। अस्याश्च चलनं भू-
मेरुद्यपनेको सलेश्वर।।९।। यो धर्मो जगतो नेता यत्र सर्वं प्रतिष्ठितं।। आदित्यचंद्रग्रहगणा समभुपेतो महाबलौ।।१०।। सुमहान्त्यपि भूतानि देवाश्च प-
रुषर्षभ।। न दैवस्य प्रमुंचंति सर्वभूतानि देहिनः।।११।। शक्रादिष्वपि देवेषु वर्तमानो नयानयो।। श्रुत्वेनं नरशार्दूल नत्वं व्यथितुमर्हसि।।१२।। म-
नायामपि वैदेह्यां नष्टायामपि राघव।। शोचितुं नार्हसे वीर यथान्यः प्राकृतस्तथा।।१३।। नत्वद्विधा न हि शोचंति सततं सर्वदर्शनाः।। सुमहत्स्व-
पि कृच्छ्रेषु रामा निर्विण्णदर्शनाः।।१४।। नत्वनो हि नरश्रेष्ठ बुध्वा समनुचिंतय।। बुध्वायुक्ता महाप्राज्ञा विजानंति शुभाशुभे।।१५।। अदृष्टगुणदोषा-
णामध्रुवाणां तु कर्मणां।। नानारंभक्रियां तेषां फलमिष्टं च वर्तते।।१६।। मामेवं हि पुरा वीर त्वमेव बहुशोक्तवान्।। अनुशिष्याधिको नु त्वामपि साक्षाद्बृ-
हस्पतिः।।१७।। बुद्धिश्च ते महाप्राज्ञ देवैरपि दुरत्यया।। शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहं।।१८।। दिव्यं च मानुषं चैव आत्मनश्च पराक्रमं।। इक्ष्वाकु
वृषभावेक्ष्य यतस्व द्विषतां वधे

खंसोढव्यमेवेत्याह अदृष्टेति शास्त्रैकसमधिगम्यतया प्रत्यक्षेणादृष्टगुणदोषाणां धर्मत्वाधर्मत्वगुणदोषौ आपातनो धर्मवन्मासमानानामधर्मत्वात् वैपरीत्याच्च अध्रुवाणां
फलं सुखं चारनिष्टं च फलं वर्तते प्रवर्तेन एवं न तु न प्रवर्तनं इति अतः सोढव्यमेवेति भावः।।१६।। इयं च बुद्धिस्त्वद्दत्तैव मेऽतस्त्वं बोधयेदेशे किं सामर्थ्यमितिनाशाच्यमित्याह मामिति
भकारणे क्रोधवशमायन्नमिति शेषः बहुशोक्तवानिति संधिरार्षः अनुशिष्यान् शिक्षितुं शक्तः स्यान्बृहस्पतिरपि अन्यस्य का गणनेत्यर्थः।।१७।। देवैरपि दुरत्यया अन्येनानुमनुगं
नुमः शक्यात्वज्ञानपरिच्छेदाद्देवानामप्यशक्य इति भावः अतएवेश्वरतामस्त्वितानथापि शोकेनाभिहितमिव ते ज्ञानं संबोधयामि बोधयामीदृशदिव्यं देवोचितं मानुषं मनुष्यो
चितं एवमुभयविधपराक्रमाश्रयत्वमात्मनोवेक्ष्वानन्ताय परशुरामविषयः अन्यो रक्षोविषयः एवं च देवोचितपराक्रमस्यायं नावसर इति भावः।।१९।।

क्तेनतनुनिष्ठेन॥२०॥ ॥इतिरामाभिरामेश्रीरा०आरण्यकांडेषट्षष्ठितमःसर्गः॥६६॥ ॥पूर्वजापिरामःलक्ष्मणेनसुभाषितंयथाभवतितथोक्तवाक्यस्तद्वाक्यस्यमहासा
रंसयुक्तिकत्वात्साराशं॥१॥२॥३॥४॥इदंजनस्थानेगिरिगतानिदुर्गाणिगंतुमशक्यदेशाःसंतीत्यर्थः निर्दराःविदीर्णपाषाणाः॥५॥६॥७॥८॥क्षुरंनद्धनिशितंशरमित्यर्थः

किंतेसर्वविनाशेनकृतेनपुरुषर्षभ॥तमेवतुरिपुंपापंविज्ञायोद्धर्तुमर्हसि॥२०॥ ॥इत्यार्षेश्रीमद्रामायणेआरण्यकांडेषट्षष्ठि
तमःसर्गः॥६६॥ ॥पूर्वजोप्युक्तमात्रस्तुलक्ष्मणेनसुभाषितं॥सारग्राहीमहासारंप्रतिजग्राहराघवः॥१॥सन्निगृह्यमहाबाहुःप्रवृद्धंकोपमात्म
नः॥अवष्टभ्यधनुश्चित्रंरामोलक्ष्मणमब्रवीत्॥२॥किंकरिष्यावहेवत्सक्ववागच्छावलक्ष्मण॥केनोपायेनपश्यावःसीतामिहविचिंतय
॥३॥तंतथापरितापार्त्तंलक्ष्मणोवाक्यमब्रवीत्॥इदमेवजनस्थानंत्वमन्वेषितुमर्हसि॥४॥राक्षसैर्बहुभिःकीर्णंनानाद्रुमलतायुतं॥संतीह
गिरिदुर्गाणिनिर्दराःकंदराणिच॥५॥गुहाश्चविविधाघोरानानामृगगणाकुलाः॥आवासाःकिन्नराणांचगंधर्वभवनानिच॥६॥तानियु
क्तोमयासार्धंसमन्वेषितुमर्हसि॥त्वद्विधाबुद्धिसंपन्नामहात्मानोनरर्षभाः॥७॥आपत्सुनप्रकंपंतेवायुवेगैरिवाचलाः॥इत्युक्तस्तद्वनंसर्वंवि
चचारसलक्ष्मणः॥८॥क्रुद्धोरामःशरंघोरंसंधायधनुषिक्षुरं॥ततःपर्वतकूटाभंमहाभागंद्विजोत्तमं॥९॥ददर्शपतितंभूमौक्षतजार्द्रंजटायुषं॥तं
दृष्ट्वागिरिशृंगाभंरामोलक्ष्मणमब्रवीत्॥१०॥अनेनसीतावैदेहीभक्षितानात्रसंशयः॥गृध्ररूपमिदंव्यक्तंरक्षोभ्रमतिकाननं॥११॥भक्ष
यित्वाविशालाक्षीमास्तेसीतांयथासुखं॥एनंवधिष्येदीप्ताग्रैःशरैर्घोरैरजिह्मगैः॥१२॥इत्युक्त्वाभ्यपतद्द्रष्टुंसंधायधनुषिक्षुरं॥क्रुद्धोरामः
समुद्रांतांचालयन्निवमेदिनीं॥१३॥तंदीनंदीनयावाचासफेनंरुधिरंवमन्॥अभ्यभाषतपक्षीतुरामंदशरथात्मजं॥१४॥यामोषधीमिवायुष्मन्न
न्वेषसिमहावने॥सादेवीममचप्राणारावणेनोभयंहृतं॥१५॥त्वयाविरहितादेवीलक्ष्मणेनचराघव॥ह्रियमाणामयादृष्टारावणेनबली
यसा॥१६॥सीतामभ्यवपन्नोहंरावणश्चरणेप्रभो॥विध्वंसितरथछत्रःपातितोधरणीतले॥१७॥एतदस्यधनुर्भग्नमेतेचास्यशरास्तथा॥अयम
स्यरणेरामभग्नःसांग्रामिकोरथः॥१८॥

नंसंधायविचचारेत्यन्वयः॥९॥१०॥११॥१२॥१३॥सफेनंफेनसहितंदीनंदीनयावाजनिशयिनदीनसदृशावाचा॥१४॥औषधीमिवसंजीवनौषधीमिव अन्वेषसि अन्वेषसे॥१५॥
॥१६॥अहंसीतामभ्यवपन्नःसीतापरित्राणमुद्दिश्याभिगतःमयाएवरावणश्चरणेविध्वंसितरथछत्रोधरणीतलेपातितश्चकृतः॥१७॥ ॥७॥ ॥७॥

66

॥राम॥

दीन३

॥१८॥१९॥२०॥ तस्य स्वरूपं विज्ञाय सीतासक्तां सीतासंसक्तां कथां च श्रुत्वा ॥२१॥ द्विगुणीकृततापार्त्तः सीतावियोगजः जटायुवधजः तापश्चेति तापस्य द्वैगुण्यं तेनार्त्तो
वभूवेति शेषः ॥२२॥ एकमसहायं एकस्मिन्नूर्ध्वे नालक्ष्मणो अयनेन्ध्वास्य मार्गे ऽतएव कृच्छ्रे मुहुर्मुहुर्निश्वसन्तमिति कतकसंमत पाठेऽर्थः एकमेकायने दुर्गे निश्वसंतं
कथंचनेति पाठे दुर्गे लताकंटकासंकीर्णे एकायने एकमार्गे पतित्वा कथंचन निश्वसंतं मृतप्रायमित्यर्थ इति तीर्थः ॥२४॥ एतत्दुःखपरितापशांतये संपूर्णमहोदधिम

एतदस्य धनुर्भग्नं मया ... स्तथा ॥ अयमस्य रणे राम भग्नः सांग्रामिको रथः ॥१८॥ अयं तु सारथिस्तस्य मत्पक्षनिहतो युधि ॥ परिश्रान्तस्य मे पक्षौ
छित्वा खड्गेन रावणः ॥१९॥ सीतामादाय वैदेहीमुत्पपात विहायसम् ॥ रक्षसा निहतं पूर्वं मां न हन्तुं त्वमर्हसि ॥२०॥ रामस्तस्य तु विज्ञाय सी
तासक्तां प्रियां कथां ॥ गृध्रराजं परिष्वज्य ज्य महद्भुतः ॥२१॥ निपपात वशी भूमौ रुरोद सहलक्ष्मणः ॥ द्विगुणीकृततापार्त्तो रामो धीरत
रोऽपि सन् ॥२२॥ एकमेकायने कृच्छ्रे निश्वसन्तं मुहुर्मुहुः ॥ समीक्ष्य दुःखितो रामः सौमित्रिमिदमब्रवीत् ॥२३॥ राज्यं भ्रष्टं वने वासः सीता
नष्टा मृतो द्विजः ॥ ईदृशीयं ममालक्ष्मीर्दहेदपि हि पावकं ॥२४॥ संपूर्णमपि चेदद्य प्रतरेयं महोदधिं ॥ सोऽपि नूनं ममालक्ष्म्या विशुष्ये
त्सरितां पतिः ॥२५॥ नास्त्यभाग्यतरो लोके मत्तोऽस्मिन् सचराचरे ॥ येनेयं महती प्राप्ता मया व्यसनवागुरा ॥२६॥ अयं पितुर्वयस्यो मे गृध्रराजो
महाबलः ॥ शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥२७॥ इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः ॥ जटायुषं च पस्पर्श पितृस्नेहं निद
र्शयन् ॥२८॥ निकृत्तपक्षं रुधिरावसिक्तं तं गृध्रराजं परिगृह्य राघवः ॥ क्व मैथिली प्राणसमा गतेति विमुच्य वाचं निपपात भूमौ ॥२९॥ ॥ इत्यै
र्षे श्रीमद्रामायणे वाल्मीकीये आरण्यकाण्डे सप्तषष्टितमः सर्गः ॥६७॥ ॥ रामः प्रेक्ष्य तु तं गृध्रं भुवि रौद्रेण पातितं ॥ सौमित्रिं मित्रसंपन्न
मिदं वचनमब्रवीत् ॥१॥ ममायं नूनमर्थेषु यतमानो विहंगमः ॥ राक्षसेन हतः संख्ये प्राणांस्त्यजति मत्कृते ॥२॥ अतिखिन्नः शरीरेऽस्मिन् प्रा
णो लक्ष्मण विद्यते ॥ तथा स्वरविहीनोऽयं विक्लवं समुदीक्षते ॥३॥ जटायो यदि शक्नोषि वाक्यं व्याहरितुं पुनः ॥ सीतामाख्याहि भद्रं

प्रतरेयं तर्हि सोऽपि सरितांपतिर्नूनं निश्चयेन ममालक्ष्म्या विशुष्येत ॥२५॥ येनाभाग्येन वागुरा मृगादिबंधनजालं ॥२६॥ पितुर्वयस्यः सखा ॥२७॥ पितृस्नेहं पितरीवस्नेहं ॥२८॥
॥२२॥ इति श्रीरामाभिरामे श्रीरा० आरण्यकांडे सप्तषष्टितमः ॥६७॥ ॥ रौद्रेण राक्षसा अनेन रक्षसां नमः प्राधान्यमेवेति सूचितं मित्रसंपन्नं मित्रत्वेन संपन्नं सर्वजनेषु मै
त्र्यायुक्तं ॥१॥२॥ तथाऽतिखिन्नप्राणाइव स्वरहीनो विह्वलेक्षणाश्च ॥३॥ व्याहरितुं व्याहर्तुं वधं वधप्रकारं ॥४॥

यमपराधं दृष्ट्वानुप्रियासीता हृतासोऽपराधस्तस्य मया किं कृतः अपि नु तज्जनः किंनिमित्तं इति किंनिमित्तं हृदि यस्य स एवंभूतः आर्यसज्जाप ॥५॥६॥७॥८॥ किंकर्मेत्यस्यो
त्तरमायामिति वातेन दुर्दिनेन च संकुलां ॥९॥१०॥ अन्यपक्षोत्तरार्धसामर्थ्यध्वनयन्प्राणा परीक्ष्माह उपैति उशीरेणनलदेन कृता मूर्धजाः केशा येषां तान्सौवर्णान्त्व
क्षानपश्यामि नाहं शमो वर्णो वृक्षस्पर्शनं मरणे चिह्नं ॥११॥ योनिषक्तानवलाशास्यन्ति ॥१२॥ कोसौ मुहूर्तस्तत्राह विरहनिलाभार्थो द्विदं निषन्नो विप्राकुः स च एव रोगः

किंनिमित्तो जहारार्यां रावणस्तस्य किं मया ॥ अपराधं तु यं दृष्ट्वा रावणेन हृता प्रिया ॥५॥ कथं चन्द्रसंकाशं मुखमासीन्मनोहरम् ॥ सीतया का
निचोक्तानि तस्मिन्काले द्विजोत्तम ॥६॥ कथंवीर्यः कथंरूपः किंकर्मा स च राक्षसः ॥ क्व चास्य भवनं तात ब्रूहि मे परिपृच्छतः ॥७॥ तमु
द्वीक्ष्याथ धर्मात्मा विलपन्तमनाथवत् ॥ वाचा विक्लवया राममिदं वचनमब्रवीत् ॥८॥ सा हृता राक्षसेन्द्रेण रावणेन दुरात्मना ॥ माया
मास्थाय विपुलां वातदुर्दिनसंकुलां ॥९॥ परिक्लान्तस्य मे तात पक्षौ छित्वा निशाचरः ॥ सीतामादाय वैदेहीं प्रयातो दक्षिणामुखः ॥१०॥
उपरुध्यन्ति मे प्राणा दृष्टिर्भ्रमति राघव ॥ पश्यामि वृक्षान्सौवर्णानुशीरकृतमूर्धजान् ॥ येन याति मुहूर्तेन सीतामादाय रावणः
४६ विप्रनष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥१२॥ विन्दो नाम मुहूर्तोसौ न च काकुत्स्थ सोऽबुधत् ॥ झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति ॥१३॥ न च त्व
याव्यथा कार्या जनकस्य सुतां प्रति ॥ वैदेह्या रंस्यसे क्षिप्रं हत्वा तं रणमूर्धनि ॥१४॥ असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः ॥ आस्यात्सुस्रा
व रुधिरं म्रियमाणस्य सामिषं ॥१५॥ पुत्रो विश्रवसः साक्षाद्भ्राता वैश्रवणस्य च ॥ इत्युक्त्वा दुर्लभान्प्राणान्मुमोच पतगेश्वरः ॥१६॥ ब्रूहि ब्रूही
ति रामस्य ब्रुवाणस्य कृताञ्जलेः ॥ त्यक्त्वा शरीरं गृध्रस्य प्राणा जग्मुर्विहायसं ॥१७॥ स निक्षिप्य शिरो भूमौ प्रसार्य चरणौ तदा ॥ विक्षिप्य च शरी
प्रे२ रं स्वं पपात धरणीतले ॥१८॥ तं गृध्रं प्रेक्ष्य ताम्राक्षं गतासुमचलोपमम् ॥ रामः सुबहुभिर्दुःखैर्दीनः सौमित्रिमब्रवीत् ॥१९॥ बहूनि रक्षसां वासे व
र्षाणि वसता सुखं ॥ अनेन दण्डकारण्ये विशीर्णमिह पक्षिणा ॥२०॥

निजकर्मानुकूलं नाबुबुधत् बुधिरवगमने इत्यस्माल्लुङि रूपं न केवलं मुहूर्तमहिम्ना इत्यपि प्राप्तिर्वा पितृशत्रुनाशोपीत्याह झषेति बडिशं गृहीत्वा झष इव क्षिप्रमेव विन
श्यति वर्तमानतिरेकेण नानिमित्तानि ध्वंसविनाशस्य दर्शयति ॥१३॥ अतोनन्वेति ॥१४॥ असंमूढस्य मतिकालेप्यभ्रान्तस्य रामं प्रत्यनुभाषतः उत्तरं भाषमाणस्य ॥१५॥ इत्युक्त्वाऽ
नावन्मात्र मुक्त्वान वीर्यतज्ञवनादिकथनात् पूर्वमिति शेषः ॥१६॥१७॥१८॥१९॥ अक्षिन्दंडकारण्ये बहूनि वर्षाणि सुखं वसतानेन पक्षिणा इह दंडकारण्ये विशी
र्णं देहविशरणं प्राप्तं ॥२०॥

अनेकवार्षिकइत्यस्यैवविवरणंचिरकालसमुत्थितइति॥२१॥मेउपकारीत्यन्वयःसीतामभ्यवपन्नःसीतांमोचयितुंप्रवृत्तः॥२२॥२३॥सर्वत्रसर्वजातिषु॥२४॥तथाआ
गतमितिच्छेदःप्राप्तमित्यर्थःमत्कृतमित्यत्रयोगृध्रविनाशस्तज्जंदुःखंयथामांप्राप्तंसीताहरणजंदुःखंनतथागृध्रनाशजंदुःखमधिकमितिभावःतस्याःपुनःप्राप्तिसंभावनासत्त्वादस्य
तद्भावाच्चेतितात्पर्यं॥२५॥२६॥दिधक्ष्यामिदग्धुमिच्छामिमत्कृतेनिमित्तभूतेइत्यर्थः॥२७॥२८॥अपरावर्तिनांसंग्रामेइतिशेषःगम्यतइतिगतिर्लोकःयज्ञशीलानांलोकानक्रमे
णाप्राप्यमदनुज्ञातःसन्ननुत्तमान् येभ्यःपरउत्तमानसंतितान्लोकान्ब्रह्मणोलोकानक्रममुक्तिस्थानंगच्छअनेनसंकल्पमात्रात्कर्मानधिकृतनिरश्चःसाधनहीनस्यापिन

के१

अनेकवार्षिकोयस्तुचिरकालसमुत्थितः॥सोयमद्यहतःशेतेकालोहिदुरतिक्रमः॥२१॥पश्यलक्ष्मणगृध्रोयमुपकारीहतश्चमे॥सीतामभ्य
वपन्नोहिरावणेनबलीयसा॥२२॥गृध्रराज्यंपरित्यज्यपितृपैतामहंमहत्॥ममहेतोरयंप्राणान्मुमोचपतगेश्वरः॥२३॥सर्वत्रखलुदृ
श्यन्तेसाधवोधर्मचारिणः॥शूराःशरण्याःसौमित्रेतिर्यग्योनिगतेष्वपि॥२४॥सीताहरणजंदुःखंनमेसौम्यतथागतं॥यथाविनाशोगृध्र
स्यमत्कृतेचपरन्तप॥२५॥राजादशरथःश्रीमान्यथाममममहायशाः॥पूजनीयश्चमान्यश्च~~मान्यश्च~~तथायंपतगेश्वरः॥२६॥सौमि
त्रेहरकाष्ठानिनिर्मथिष्यामिपावकं॥गृध्रराजंदिधक्ष्यामिमत्कृतेनिधनंगतम्॥२७॥नाथंपतगलोकस्यचितिमारोपयाम्यहं॥इमंधक्ष्या
मिसौमित्रेहतंरौद्रेणरक्षसा॥२८॥यागतिर्यज्ञशीलानामाहिताग्नेश्चयागतिः॥अपरावर्तिनांयाचभूमिप्रदायिनां॥२९॥मयात्वंस
मनुज्ञातोगच्छलोकाननुत्तमान्॥गृध्रराजमहासत्त्वसंस्कृतश्चमयाव्रज॥३०॥एवमुक्त्वाचितांदीप्तामारोप्यपतगेश्वरम्॥ददाहरा
मोधर्मात्मास्वबंधुमिवदुःखितः॥३१॥रामोथसहसौमित्रिर्वनंयात्वासवीर्यवान्॥स्थूलान्हत्वामहारोहीननुतस्तारतंद्विजं॥३२॥रोहि
मांसानिचोद्धृत्यपेशीकृत्वामहायशाः॥शकुनायददौरामोरम्येहरितशाद्वले॥३३॥

पाव३

पि२

ह्रोकरानेनभगवान्रामःस्वस्वरूपांशमाययाहन्तज्ञानइतिप्रलपनंसुरबंधुसंशोकादितुनरत्वमित्युक्तमेवासकृतनडुक्तंसंस्कारमकरोत्स्वरामोत्तमविधानतःस्वपदंचवर
देनस्मैसोपिरामप्रसादतःहरेःसामानरूपेणप्रययौपरमंपदमितिजटायुषंपुत्रकस्यपाप्येतेननिरश्वामपिस्वहरिनाराहरिसुक्तमितिध्वनितंसारूप्यमुक्तिलाभ
श्चोक्तः॥२९॥मयामद्रूपेणसामान्यहरिरूपेण॥३०॥३१॥सपुसितमहिमारामःमहारोहीन्महामृगान्रोहिशब्दकारांतोपिमृगवाचीतान्हत्वापिंडदानार्थंमांसमादाय
गत्वानुभनेनरतंद्विजंपक्षिणमुद्दिश्यपिंडदानार्थंशाद्वलेतत्स्थानस्तार॥३२॥नत्रतन्मांसान्युत्कृत्यपिंडंकृत्वाशकुनायददौ॥३३॥ ॥६७॥ ॥६७॥

यतन्मंत्रजातं येन स्यमर्त्यस्य स्वर्गादिगमनं सुदृढ्शवाल्सणाः कथयंति तत् स्वर्गगमनं क्रमनसाधनं तत्तस्य क्षिप्रं स्वर्गगमनाय रामो जजाप ॥३४॥ उत्क्रम्य सर्वे स्यास्य स्नानपूर्वकत्वं दर्शं
यितुं पुनराह शास्त्रेति तत्र पाठक्रमादर्थक्रमस्य बलवत्वात्पूर्वं स्नानं ततः उदकदानं ततः पिंडदानमिति क्रमो बोध्यः ॥३६॥ रणे पातितः पक्षिकल्पां गतिमस्य शुभां स्वर्गरूपां स्वकर्मणा वा ॥३७॥ पक्षि
सत्तमे तद्विषये पितरीवेत्यर्थः स्थिरां बुद्धिं स्थिरां स्थितिं तद्बुद्धिं निधाय सीताधिगमे सीताप्राप्तिहेतुके तन्निमित्ते मनः प्रवेश्य ताद्दृशं निश्चितं दृष्ट्वा वनं जग्मतुः ॥३८॥ ॥इतिरामा

यतन्त्येन स्यमर्त्यस्य कथयंति द्विजातयः ॥ तत्स्वर्गगमनं क्षिप्रं तस्य रामो जजाप ह ॥३४॥ ततो गोदावरीं गत्वा नदीं नरवरात्मजौ ॥ उदकं चक्रतु
स्तस्मै गृध्रराजाय तावुभौ ॥३५॥ शास्त्रदृष्टेन विधिना जलं गृध्राय राघवौ ॥ स्नात्वा तौ गृध्रराजाय उदकं चक्रतुस्तदा ॥३६॥ स गृध्रराजः कृत
वानशक्यं सुदुष्करं कर्म रणे निपातितः ॥ महर्षिकल्पेन च संस्कृतस्तदा जगाम पुण्यां गतिमात्मनः शुभां ॥३७॥ कृतोदकौ तावपि पक्षि
सत्तमे स्थिरां च बुद्धिं प्रणिधाय जग्मतुः ॥ प्रवेश्य सीताधिगमे ततो मनो वनं सुरेन्द्राविव विष्णुवासवौ ॥३८॥ ॥इत्यार्षे श्रीमद्रामायणे
वा॰ आरण्यकाण्डे अष्टषष्टितमः सर्गः ॥६८॥ कृत्वैवमुदकं तस्मै प्रस्थितौ राघवौ तदा ॥ अवेक्षन्तौ वने सीतां जग्मतुः पश्चिमां दिशं ॥१॥ तां
दिशं दक्षिणां गत्वा शरचापासिधारिणौ ॥ अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिपेदतुः ॥२॥ गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितं ॥ आवृतं स
र्वतो दुर्गं गहनं घोरदर्शनं ॥३॥ व्यतिक्रम्य तु वेगेन गृहीत्वा दक्षिणां दिशं ॥ सुभीमं तन्महारण्यं व्यतियातौ महाबलौ ॥४॥ ततः परं जनस्थाना
त् त्रिक्रोशं गम्य राघवौ ॥ क्रौञ्चारण्यं विविशतुर्गहनं तौ महौजसौ ॥५॥ नानामेघघनप्रख्यं प्रहृष्टमिव सर्वतः ॥ नानावर्णैः शुभैः पुष्पैर्मृगपक्षि
गणैर्युतं ॥६॥ दिदृक्षमाणौ वैदेहीं तद्वनं तौ विचिक्यतुः ॥ तत्र तत्रावतिष्ठन्तौ सीताहरणकर्शितौ ॥७॥ ॥७॥ ॥७॥

68

मिरामे श्रीरा॰ आर॰ अष्टषष्टितमः सर्गः ॥६८॥ ॥पश्चिमामित्यत्रोक्तहनारण्वोके दक्षिणाभिमुखैर्नैऋतीं जग्मतुरिति लभ्यते ॥१॥ अविप्रहतं जनाक्षुण्णं ॥२॥ गुल्मादि
भिः प्रवेष्टितं अत एव सर्वत आवृतं अत एव दुर्गं दुष्प्रवेशं गहनं वनरूपं पंथानं प्रतिपेदतुरित्यन्वयः ॥३॥ वेगेनातिक्रम्य बलिनावतत्महारण्यं व्यतीयातौ व्यतिक्रम्य गतौ ॥४॥ गम्य
गत्वा गहनं दुष्प्रवेशं क्रौंचारण्यं क्रौंचारण्याख्यं गहनं वनमिति वा ॥५॥ अनेकमेघाभ्यां घनः समूहः तत्सदृशं नवश्यामं सर्वतः प्रहृष्टमिव पुष्पविकासादिना तत्र तत्र तु ह
र्षावानस्य प्रहृष्टत्वव्यपदेशः ॥६॥ ७॥

क्रौंचारण्यमतिक्रम्य तद्वनात्पूर्वेण त्रिक्रोशं गत्वा अंतरे मध्येमार्गे मतंगाश्रमं ददृशतुः अथ घोरत्वादिविशेषयांतद्वनं मतंगाश्रमवनं दृष्ट्वा तत उच्यमानविशेषणां तत्र गि
रौ दरीं ददृशाते ॥ ८ ॥ ९ ॥ १० ॥ तस्याविदूरे इति संधिरार्षः तद्दरीसमीपे इत्यर्थः ॥ ११ ॥ बीभत्सां जुगुप्सितां परुषत्वचं कर्कशत्वकं करालीं तुंगशरीरां एकरां लोभीषणां तुंगे ॥ १२ ॥
विकटामतिस्थूलाकायेन तत्र तत्रास्थाने पि तिस्रो न्वितावा ॥ १३ ॥ भ्रातुरासमस्याग्रतो व्रजंतं एहि रंस्यावहे इत्युक्त्वा तत्र इकारलोप आर्षः समालंभनगृहीतवती ॥ १४ ॥ उपगूह्य

ततः पूर्वेण तौ गत्वा त्रिक्रोशं भ्रातरौ तदा ॥ क्रौंचारण्यमतिक्रम्य मतंगाश्रममंतरे ॥ ८ ॥ दृष्ट्वा तु तद्वनं घोरं बहुभीममृगद्विजं ॥ नानावृक्षसमा
कीर्णं सर्वं गहनपादपं ॥ ९ ॥ ददृशाते गिरौ तत्र दरीं दशरथात्मजौ ॥ पातालसमगंभीरां तमसा नित्यसंवृतां ॥ १० ॥ आसाद्य च नरव्याघ्रौ द
र्यास्तस्या विदूरतः ॥ ददर्शतुर्महारूपां राक्षसीं विकृताननां ॥ ११ ॥ भयदामल्पसत्वानां बीभत्सां रौद्रदर्शनां ॥ लंबोदरीं तीक्ष्णदंष्ट्रां करालीं
परुषत्वचं ॥ १२ ॥ भक्षयंतीं मृगान्भीमान्विकटां मुक्तमूर्धजां ॥ अवैक्षतां तु तौ तत्र भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥ सा समासाद्य तौ वीरौ व्रजं
तं भ्रातुरग्रतः ॥ एहि रंस्यावहेत्युक्त्वा समालंभत लक्ष्मणं ॥ १४ ॥ उवाच चैनं वचनं सौमित्रिमुपगृह्य च ॥ अहं त्वयोमुखी नाम लाभस्ते त्व
मसि प्रियः ॥ १५ ॥ नाथ पर्वतदुर्गेषु नदीनां पुलिनेषु च ॥ आयुश्चिरमिदं वीर त्वं मया सह रंस्यसे ॥ १६ ॥ एवमुक्तस्तु कुपितः खड्गमुद्धृत्य
लक्ष्मणः ॥ कर्णनासस्तनौ तस्या निचकर्तारिसूदनः ॥ १७ ॥ कर्णनासे निकृत्ते तु विस्वरं विननाद सा ॥ यथागतं प्रदुद्राव राक्षसी घोरदर्शि
ना ॥ १८ ॥ तस्यां गतायां गहनं व्रजंतौ वनमोजसा ॥ आसेदतुरमित्रघ्नौ भ्रातरौ रामलक्ष्मणौ ॥ १९ ॥ लक्ष्मणस्तु महातेजाः सत्ववांछीलवां
छुचिः ॥ अब्रवीत्प्रांजलिर्वाक्यं भ्रातरं दीप्ततेजसं ॥ २० ॥ स्पंदते मे दृढं बाहुरुद्विग्नमिव मे मनः ॥ प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्ष
ये ॥ २१ ॥ तस्मात्सज्जीभवार्य त्वं कुरुष्व वचनं मम ॥ ममैव हि निमित्तानि सद्यः शंसंति संभ्रमम् ॥ २२ ॥ ॥ ७ ॥

लिंगः अयोमुखीत्यन्वर्थनाम अहं तेन तव लाभः निध्यादिवल्लाभरूपास्मि त्वं च मे प्रियो भर्तासि ॥ १५ ॥ आयुश्चिरं चिरमायुः ॥ १६ ॥ कर्णनासस्तनमिति समाहारद्वंद्वः ॥ १७ ॥ क
र्णनासे इति सप्तमी ॥ १८ तस्यां गतायां पश्चाद्व्रजंतौ गहनं दुष्प्रवेशं वनं आसेदतुः प्रापतुः ॥ १९ ॥ २० ॥ बाहुर्वामः अनिष्टानि तत्सूचकानि ॥ २१ ॥ सज्जीभव यत्तो भव संभ्रमं भ

ततः किंवृत्तमत्राह एषइति· वंजुलकः कंठवालः वंजुलकाख्योपि अनेनयुद्धमवश्यंभाविजयश्चेत्युभयंसूचितं ॥२३॥ अन्वेषतोः सीतामिति शेषः ओजसा साम
र्थ्येन ॥२४॥ ततगहनंवनमत्यंतंमातरिश्वनासंवेष्टितंवायुग्रस्तमिवसानं· ततस्तस्यवनस्यमध्येशद्रोमवत् ॥२५॥ तंशद्रंकांक्षमाणा· तदुत्पत्तिनिमित्तंकांक्षमाणाः ॥२६॥
आसेदतुर्ददृशतुः विवृद्धं विवृद्धाकारं· अशिरोग्रीवं अदृश्यमानशिरोग्रीवं अतएवकबंधं अन्वर्थनामकं उदरेमुखं ऊर्ध्वमस्तकादिन्यलुकं ॥२७॥ निशितैरत्यस्थवि
वरणतीक्ष्णैरितिउपलक्षितमितिशेषः रोमभिर्निशितैस्तीक्ष्णैरितिक्वचित्पाठः ॥२८॥ उच्यमानविशेषणेनललाटस्थेनैकेननयनेनोरःप्रदेशागतेनशिरस्त्वात उन्नर

एषवंजुलकोनामपक्षीपरमदारुणः ॥ आवयोर्विजयंयुद्धेशंसन्निवविनर्दति ॥२३॥ तयोरन्वेषतोरेवंसर्वंतद्वनमोजसा ॥ संजज्ञे
विपुलःशद्रःप्रभंजन्निवतद्वनं ॥२४॥ संवेष्टितमिवात्यर्थंगहनंमातरिश्वना ॥ वनस्यतस्यशद्रोभूद्वनमापूरयन्निव ॥२५॥ तंश
द्रंकांक्षमाणस्तुरामःखड्गीसहानुजः ॥ ददर्शसुमहाकायंराक्षसंविपुलोरसं ॥२६॥ आसेदतुश्चतद्रक्षस्तावुभौप्रमुखेस्थितं ॥ विवृ
द्धमशिरोग्रीवंकबंधमुदरेमुखं ॥२७॥ रोमभिर्निशितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रितं ॥ नीलमेघनिभंरौद्रंमेघस्तनितनिस्वनं ॥२८॥ अग्नि
ज्वालानिकाशेनललाटस्थेनदीप्यता ॥ महापक्ष्मेणपिंगेनविपुलेनायतेनच ॥२९॥ एकेनोरसिघोरेणनयनेनसुदर्शिना ॥ महादं
ष्ट्रोपपन्नंतंलेलिहानंमहामुखं ॥३०॥ भक्षयंतंमहाघोरानृक्षसिंहमृगद्विपान् ॥ घोरौभुजौविकुर्वाणमुभौयोजनमायतौ ॥३१॥ कराभ्यां
विविधान्गृह्यऋक्षान्पक्षिगणान्मृगान् ॥ आकर्षंतंविकर्षंतमनेकान्मृगयूथपान् ॥३२॥ स्थितमावृत्यपंथानंतयोर्भ्रात्रोःप्रपन्नयोः ॥ अ
थतौसमतिक्रम्यक्रोशमात्रेददर्शतुः ॥३३॥ महांतंदारुणंभीमंकबंधंभुजसंवृतं ॥ कबंधमिवसंस्थानादतिघोरप्रदर्शनं ॥३४॥ स
महाबाहुरत्यर्थंप्रसार्यविपुलौभुजौ ॥ जग्राहसहितावेवराघवौपीडयन्बलात् ॥३५॥

॥६९॥

सितउरःप्रदेशेनसहुपलभ्यमानेननयनेनोपलक्षितंमुखंलेलिहानंमहापक्ष्मेणेत्यार्षं ॥२९॥३०॥ विकुर्वाणं विक्षिपंतं ॥३१॥ आकर्षंतं इच्छामृगानाभिमुख्येनकर्षंतं
भनिच्छान्मृगान्मुंचंतं ॥३२॥ प्रपन्नयोः पंथानमितिशेषः आवृत्यस्थितंतंदृष्ट्वातानभुजवेष्टनंसमतिक्रम्यदूरस्थितौतंक्रोशमात्रेददर्शतुः भुजाभ्यांजंतून्ग्रहणानीनि
भुजसंहननंसंस्थानात्देहस्थित्याअशिरस्कत्वलक्षणात्कबंधवत्स्थितं ॥३४॥ सहितौनैकमपिमुक्त्वेत्यर्थः ॥३५॥ ॥६९॥ ॥६९॥

॥राम॥

69

तिग्मतेजौ तीक्ष्णतेजसौ तादृशे वैषधरावित्यर्थः विवशं प्राप्तौ बलात्कर्षणं प्राप्तौ॥३६॥ तत्र तस्यामवस्थायामनाश्रयात् धैर्यस्येति शेषः धैर्येणावलम्बनादित्यर्थः तत्र हेतुर्बा-
ल्यं बालत्वं क्लिन्नत्वं भुजग्रस्तत्वात्प्रधानत्वं अनाश्रयत्वादिति पाठे अनाश्रयम् तस्य रामस्यापि कबन्धभुजाक्रान्तत्वादिति भावः॥३७॥३८॥ निर्युक्तः निर्योजितः रक्षोबलिः सन् त्वं किंचि-
त्स्ववशमात्मानं परित्यज्य स्वपलायनेनेति शेषः तस्यैव विवरणं तु त्वरार्थं मां हीति भूतबलिं महाभूतकारक्षसे बलिमित्यर्थः॥३९॥ अधिगन्ता प्राप्ता॥४०॥४१॥ एतस्मिन्नं-

खड्गिनौ दृढधन्वानौ तिग्मतेजौ महाभुजौ॥ तानौ ए विवसंप्राप्तौ कृष्यमाणौ महाबलौ॥३६॥ तत्र धैर्याच्च शूरस्तु राघवो नैव विव्यथे॥ बाल्या-
दनाश्रयाच्चैव लक्ष्मणस्त्वभिविव्यथे॥३७॥ उवाच च विषण्णः सन् राघवं राघवानुजः॥ पश्य मां वीर विवशं राक्षसस्य वशं गतम्॥३८॥
मयैकेन तु निर्युक्तः परिमुच्यस्व राघव॥ मां हि भूतबलिं दत्वा पलायस्व यथासुखम्॥३९॥ अधिगन्तासि वैदेहीमचिरेणेति मे मतिः॥ प्र-
तिलभ्य च काकुत्स्थ पितृपैतामहीं महीम्॥४०॥ तत्र मां राम राज्यस्थः स्मर्तुमर्हसि सर्वदा॥ लक्ष्मणेनैवमुक्तस्तु रामः सौमित्रिमब्रवीत्॥
॥४१॥ मा स्म त्रासं वृथा वीर न हि त्वादृग्विषीदति॥ एतस्मिन्नन्तरे क्रूरो भ्रातरौ रामलक्ष्मणौ॥४२॥ तावुवाच महाबाहुः कबन्धो दानवोत्त-
मः॥ कौ युवां वृषभस्कन्धौ महाखड्गधनुर्धरौ॥४३॥ घोरं देशमिमं प्राप्तौ दैवेन मम चाक्षुषौ॥ वदतं कार्यमिह वां किमर्थं चागतौ युवां ४४
इमं देशमनुप्राप्तौ क्षुधार्तस्येह तिष्ठतः॥ सबाणचापखड्गौ च तीक्ष्णशृङ्गाविवर्षभौ॥४५॥ मां तूर्णमनुसंप्राप्तौ दुर्लभं जीवितं हि वां॥
तस्य तद्वचनं श्रुत्वा कबन्धस्य दुरात्मनः॥४६॥ उवाच लक्ष्मणं रामो मुखेन परिशुष्यता॥ कष्टात्कष्टतरं प्राप्य दारुणं सत्यविक्रम
॥४७॥ व्यसनं जीवितान्ताय प्राप्तमप्राप्य तां प्रियां॥ कालस्य सुमहद्वीर्यं सर्वभूतेषु लक्ष्मण॥४८॥ ॥७॥

५२

तरे इति लक्ष्मणविषादनिवृत्तिफलकरामाश्वासनसमये इति शेषः॥४२॥४३॥ दैवेन दैवगत्या मम चाक्षुषौ चक्षुर्गोचरौ॥४४॥ एवं कार्यादिकं पृष्ट्वा तदुपेक्ष्य स्वप्रयोजनं संप-
मित्याह इमं देशमिति इह तिष्ठतः क्षुधार्तस्य मम भाग्यादिमं देशमनुप्राप्तौ॥४५॥ ततः किं तत्राह दुर्लभमिति॥४६॥ मुखेन परिशुष्यतोपलक्षितं लक्ष्मणमुवाच हे सत्यविक्र-
म कष्टात्कष्टतरं राज्यभ्रंशवनवासप्रियापहारादिरूपापत्स्थितयोरावयोस्तां प्रियामप्राप्यैव जीवितान्तायेदं व्यसनं प्राप्तं यदेवमतः सर्वेष्वपि भूतेषु कालस्य वीर्यं सुमहत्
अनर्गलप्रचारमस्तीति शेषः॥४७॥४८॥

कृतोयतस्त्वां चेति महाबलपराक्रमावपि व्यसनैर्दुःखैर्मोहितौ कालः करोतीति पश्यपश्यकार्यं स एव प्रपंचनर्ष्टतिनाशी निपातनं॥४९॥ ५०॥ उदग्रविक्रमः उत्कटपराक्रमोरामः सौमित्रिमवेक्ष्य सदीनमितिशेषः स्वां मतिमात्मना स्वेनैव स्थिरामकरोत् ईषदपि विषादं न प्राप्तवानित्यर्थः॥५१॥ अत्र लक्ष्मणस्यापि लोकव्यवहारानायमेवं न्याय्ये इति रामाभिरामे श्रीरा॰ आर॰ एकोनसप्ततितमः सर्गः॥६९॥ ॥बाहुपाशपरिक्षिप्तौ बाहुभ्यां पाशाकारेण परितो व्याप्तौ॥१॥ क्षुधार्तं मां दृष्ट्वा भीतौ नु किं तिष्ठतस्तथा मे आहारार्थं संदिष्टौ अतो न जीवनसंभावनेत्यर्थः॥२॥३॥ पुरा आदत्ते आदास्यतीत्यर्थः॥४॥ भुजमात्रेण विक्रमो यस्य स तत्वायुधेनेत्यर्थः अतिजितं सर्वथा पराजि

त्वां च मां च नरव्याघ्रौ व्यसनैः पश्य मोहितौ॥ नातिभारोस्ति दैवस्य सर्वभूतेषु लक्ष्मण॥४९॥ शूराश्च बलवंतश्च कृतास्त्राश्च रणाजिरे कालाभिपन्नाः सीदंति यथा वालुकसेतवः॥५०॥ इति ब्रुवाणो दृढसत्यविक्रमो महायशा दाशरथिः प्रतापवान्॥ अवेक्ष्य सौमित्रिमुदग्रविक्रमः स्थिरां तदा स्वां मतिमात्मनाकरोत्॥५१॥ ॥इत्यार्षे श्रीरामायणे वा॰ आरण्यकांडे एकोनसप्ततितमः सर्गः॥६९॥

॥तौ तु तत्र स्थितौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ॥ बाहुपाशपरिक्षिप्तौ कबंधो वाक्यमब्रवीत्॥१॥ तिष्ठतः किं नु मां दृष्ट्वा क्षुधार्तं क्षत्रियर्षभौ॥ आहारार्थं तु संदिष्टौ दैवेन हतचेतनौ॥२॥ तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं तदा॥ उवाचार्तिं समापन्नो विक्रमे कृतनिश्चयः॥३॥ त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः॥ तस्मादसिभ्यामस्याशु बाहू छिंदावहे गुरू॥४॥ भीषणोयं महाकायो राक्षसो भुजविक्रमः॥ लोकं ह्यतिजितं कृत्वा ह्यावां हंतुमिहेच्छति॥५॥ निश्चेष्टानां वधो राजन् कुत्सितो जगतीपतेः॥ क्रतुमध्योपनीतानां पशूनामिव राघव॥६॥ एतत्संजल्पितं श्रुत्वा तयोः क्रुद्धस्तु राक्षसः॥ विदार्यास्यं तदा रौद्रस्तौ भक्षयितुमारभत्॥७॥ ततस्तौ देशकालज्ञौ खड्गाभ्यामेव राघवौ॥ अच्छिंदतां सुसंहृष्टौ बाहू तस्यांसदेशयोः॥८॥ दक्षिणो दक्षिणं बाहुमसक्तमसिना ततः॥ चिच्छेद रामो वेगेन सव्यं वीरस्तु लक्ष्मणः॥९॥

तं॥५॥ अस्य बाहुच्छेदस्य युक्तोन्नतत्वप्राणवियोजनमित्याह निश्चेष्टानामिति शास्त्रादिभिर्विक्रमहीनानां जगतीपतेः क्षत्रियस्य क्रतुमध्ये प्राप्तानां पशूनां वध इव सत्यप्य स्वर्गफलदोपि शास्त्रविहितोपि कुत्सितः सांख्यपातंजलाद्युक्तरीत्या धर्मजनकत्वात् लोकदृष्ट्या वक्रान्वितः एतेन तद्वधस्यापीषत्पापफलदत्वात् विना कश्चित्तु क्रतुमध्योपनीतानामिति पाठं प्रकृत्य ज्ञात्वा जानेन कल्पयित्वा क्रतुमध्यादन्यत्रनीतानां वधो यथा कुत्सितस्तथेत्याह तन्न॥६॥ तयोरेतत्संजल्पितं श्रुत्वेति संबंधः भक्षयितुमारभत इत्याभ्यामार्षत्वानित्यर्थः सुसंहृष्टौ कदलीकांडच्छेदेनेव तच्छेदेन हस्तस्य तत्वलाभात्॥८॥ दक्षिणाः समर्थः दक्षिणपार्श्वस्थो वा॥९॥ [illegible]

70

गांभूमिं ॥१०॥ कोयुवामिति पप्रछ पूर्वं मया प्रोक्तत्वात्र पुनः प्रश्नः ॥११॥१२॥ इक्ष्वाकुदायादः दशरथपुत्रः ॥१३॥१४॥ यामिच्छंतौ यामन्वेषयंतौ ॥१५॥ विचेष्टसे चेष्टमानालिङ्ग
मीत्यर्थः ॥१६॥ प्रीतः शापमोक्षकालप्रत्यभिज्ञानात् तदिंद्रवचनं वक्ष्यमाणं ॥१७ वाहुबंधनौ यथा रसदेशयोस्तौ वाहुबंधनावसरेशौ ॥१८॥ यथाः विनयात् यादृशा
विनयात्प्राप्तं स्वछ एवितत्वमः ॥१९॥ ॥इति श्रीरामाभिरामे श्रीरामीयरामायणतिलके आरण्यकांडे सप्ततितमः सर्गः ॥७०॥ ॥अचिंत्यं अचिंत्यवैभवे ॥१॥ नरे

स पपात महाबाहुश्छिन्नबाहुर्महास्वनः ॥ खं च गां च दिशश्चैव नादयन् जलदो यथा ॥१०॥ स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः ॥ दीनः प
प्रच्छ तौ वीरौ कौ युवामिति दानवः ॥११॥ इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः ॥ शशंस तस्य काकुत्स्थः कबंधस्य महाबलः ॥१२॥ अयमि
क्ष्वाकुदायादो रामो नाम जनैः श्रुतः ॥ तस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणं ॥१३॥ मात्रा प्रतिहृते राज्ये रामः प्रव्राजितो वनं ॥ मया सह चर
त्येषः भार्यया च महद्वनं ॥१४॥ अस्य देवप्रभावस्य वसतो विजने वने ॥ रक्षसापहृता भार्या यामिच्छंतौ विहागतौ ॥१५॥ त्वं तु को वा किमर्थं वा क
बंधसदृशो वने ॥ आस्येनोरसि दीप्तेन भग्नजंघो विचेष्टसे ॥१६॥ एवमुक्तः कबंधस्तु लक्ष्मणेनोत्तरं वचः ॥ उवाच वचनं [redacted]
प्रीतस्तदिंद्रवचनं स्मरन् ॥१७॥ स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि वामहं ॥ दिष्ट्या चेमौ निकृत्तौ मे युवाभ्यां वाहुबंधनौ ॥१८॥ विरूपं यच्च मे रू
पं प्राप्तं ह्यविनयाद्यथा ॥ तन्मे शृणु नरव्याघ्र तत्त्वतः शंसतस्तव ॥१९॥ ॥इत्यार्षे श्रीमद्रामायणे आरण्यकांडे सप्ततितमः सर्गः ॥७०॥ ॥
पुरा राम महाबाहो महाबलपराक्रम ॥ रूपमासीन्ममाचिंत्यं त्रिषु लोकेषु विश्रुतं ॥१॥ यथा सूर्यस्य सोमस्य शक्रस्य च यथा वपुः ॥ सोऽहं रूप
मिदं कृत्वा लोकवित्रासनं महत् ॥२॥ ऋषीन् वनगतान् राम त्रासयामि ततस्ततः ॥ ततः स्थूलशिरा नाम महर्षिः कोपितो मया ॥३॥ स चि
न्वन् विविधं वन्यं रूपेणानेन धर्षितः ॥ तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ॥४॥ एतदेव नृशंसं ते रूपमस्तु विगर्हितं ॥ स मया याचितः क्रुद्धः शापस्या
न्तो भवेदिति ॥५॥ अभिशापकृतस्येति तेनेदं भाषितं वचः
यदा छित्वा भुजौ रामस्त्वां दहेद्विजने वने ॥६॥

वाहु यथेति इदं रूपं राक्षोरूपं वैभवेन कृत्वा ॥२॥ ऋषीन् त्रासयामीत्यन्वयः ॥३॥ एवमुक्तः ॥४॥ एवं शब्दार्थं एतदेवेति· एतदेव रूपं नृशंसं क्रूरं विगर्हितं चास्त्वित्यवदत् ॥५
अभिशापकृतस्य मत्कर्तृकत्वन्त्र धर्षणेन त्वया कृतस्यास्य शापस्यान्तो भवत्विति याचितः तेनैवं याचितेन नरु च आह यदेति· तदा स्वं विपुलं शुभ्रं मं श्रिया विराजितं रूपं प्रा
प्स्यस इतिनेन भाषितमिति संबंधः एवं हन्तेमां दनोः पुत्रं विद्धीत्यन्वयः श्रिया विराजितं पुत्रं दनुं त्वं विद्धि लक्ष्मणेति पाठान्तरं तदा श्रियः श्री नाम्नो दानवस्य पुत्रं दनुनामान
मित्यर्थः ॥६॥

॥रा.वा.आ॥
॥९०॥

ननुकस्मिन्नहल्यन्वेशापेपिकथंकवंधरूपनाशाप्तिस्तत्राह इंद्रेति नष्टापवीजमाह अहमिति ऋषिशापानः घोररूपप्राप्त्यनंतरमुग्रेणतपसापितामहमतोषयं
स्वजलारानेज्ञाश्मिभयेनेनिशेषः॥८॥ विभ्रमोगर्वः नमेवाहृदीर्घमिति॥९॥ शतपर्वणाशतधारेण॥१०॥ सक्थिनीनाभ्यधोभागोपलक्षणं शरीरेशरीरमध्यस्थेउदर
भागेएवंभूतेनोर्ध्वाधरव्यवस्थारहितेनमयामरणंयाचमानोपिनत्वाकरोत्॥११॥ किमितिनाकरोत्तत्राह पितामहेतिनद्वोरीर्घायुर्दानरूपं॥१२॥ ज्रेणान्वया

नरात्वंप्राप्स्यसेरूपंस्वमेवविपुलंशुभं॥ श्रियाविराजितंपुत्रंदनोस्त्वंविद्धिलक्ष्मण॥७॥ इंद्रशापादिदंरूपंप्राप्तमेवंरणाजिरे॥ अहंहि
तपसोग्रेणपितामहमतोषयं॥८॥ दीर्घमायुःसमेप्रादात्ततोमांविभ्रमोस्पृशत्॥ दीर्घमायुर्मयाप्राप्तंकिंमांशक्रःकरिष्यति॥९॥ इत्ये
वंबुद्धिमास्थायरणेशक्रमधर्षयं॥ तस्यबाहुप्रमुक्तेनवज्रेणशतपर्वणा॥१०॥ सक्थीनिचशिरश्चैवशरीरेसंप्रवेशितं॥ समयायाच्य
मानःसन्नानयद्यमसादनं॥११॥ पितामहवचःसत्यंतदस्त्विनिममाब्रवीत्॥ अनाहारःकथंशक्तोभग्नसक्थिशिरोमुखः॥१२॥ व
ज्रेणाभिहतःकालंसुदीर्घमपिजीवितुं॥ सएवमुक्तःशक्रोमेबाहूयोजनमायतौ॥१३॥ तदाचास्यंचमेकुक्षौतीक्ष्णदंष्ट्रमकल्पयत्॥ सो
हंभुजाभ्यांदीर्घाभ्यांसंक्षिप्यास्मिन्वनेचरान्॥१४॥ सिंहद्वीपिमृगव्याघ्रान्भक्षयामिसमंततः॥ सतुमामब्रवीदिंद्रोयदारामःसल
क्ष्मणः॥१५॥ छेत्स्यतेसमरेबाहूतदास्वर्गंगमिष्यसि॥ अनेनवपुषातातवनेस्मिन्राजसत्तम॥१६॥ यद्यत्पश्यामिसर्वस्यग्रहणंसाधु
रोचये॥ अवश्यंग्रहणंरामोमन्येहंसमुपैष्यति॥१७॥ इमांबुद्धिंपुरस्कृत्यदेहन्यासकृतश्रमः॥ सत्वंरामोसिभद्रंतेनाहमन्येनराघव॥१८॥
शक्योहंतुंयथातत्वमेवमुक्तंमहर्षिणा॥ अहंहिमतिसाचिव्यंकरिष्यामिनरर्षभ॥१९॥ मित्रंचैवोपदेक्ष्यामियुवाभ्यांसंस्कृतोग्निना॥ ए

वमुक्तस्तुधर्मात्मादनुनातेनराघवः॥२०॥

मिहतःजीवितुंकथंशक्तइत्यन्वयः एवमुक्तः अनाहारस्याशिरस्कस्यकथंजीवनमित्युक्तः॥१३॥ वनेचरान् वनेसंचारवतः॥१४॥१५॥१६॥ सर्वस्यग्रहणंसाध्वरोचयेयेनकिंचि
रपमश्यद्युधान्यजामीत्यर्थः ऋषेरिंद्रस्यचवाक्यविश्वासादवश्यरामोममग्रहणमेष्यतीतिमन्येसन्यमानस्तिष्ठामि॥१७॥ ममदेहन्यासेदेहत्यागेकृतश्रमःकृतप्रय
त्नोरामोममहस्तेग्रहणमेष्यतीतिमांबुद्धिंपुरस्कृत्यसर्वस्यग्रहणंसाधुरोचये अयमेवरामोभवदितिबुध्याकिमपितत्राजामीत्याशयः॥१८॥ सर्वथाराहतेनवबुद्धि
मित्रंचोपदेक्ष्यामि॥१९॥ दनुनादनुनाम्नावह्निसंस्कारंकरिष्यामि ममसाहाय्यंकुविन्याशयेनाह इत्थमिति॥२०॥

व१

71

॥राम॥

यथासुखंहन्तेत्यन्वयः॥२१॥ नाममात्रंआप्तस्यजटायोर्वाक्यादितिभावः॥२२॥ उपकारेणपरोपकारेणवर्तनात्अस्माकंसदृशःशुचिंनकारणंसीताहर्तृदेशादिकथनरूपमुपकारंकर्तुमर्हसि॥२३॥ दाहविषयेत्वयाचिंतानकार्याइत्याहकाष्ठानीति॥२४॥ कल्पितेदैवहतेनयेनकर्त्रायत्रदेशे॥२५॥ कल्याणंतत्त्वाख्यानरूपंराहुरेवमेदिव्यज्ञानसाधनंनकुहतः परंसर्वंभक्ष्यामीत्याह एवमिति कुशलोवक्ता वक्तुंनाचानुयंवान्वक्तांसुशास्त्रवक्तारं॥२६॥ यत्त्वांसर्वनिशाचर॥२७॥ नन्यरंदाहान्तरे॥२८॥ विज्ञानमतीन्द्रियविषयं॥२९॥

त्तरंजगादवचनंलक्ष्मणस्यचपश्यतः॥ रावणेनहृताभार्यासीताममयशस्विनी॥२१॥ निष्क्रान्तस्यजनस्थानात्सहभ्रात्रायथासुखं॥ नाममात्रंतुजानामिनरूपंतस्यरक्षसः॥२२॥ निवासंवाप्रभावंवावयंतस्यनविद्महे॥ शोकार्तानामनाथानामेवंविपरिधावतां॥२३॥ कारुण्यंसदृशंकर्तुमुपकारेणवर्तता॥ काष्ठान्यानीयभग्नानिकालेशुष्काणिकुंजरैः॥२४॥ धक्ष्यामस्त्वांवयंवीरश्वभ्रेमहतिकल्पिते॥ सत्वंसीतांसमाचक्ष्वयेनवायत्रवाहृता॥२५॥ कुरुकल्याणमत्यर्थंयदिजानासितत्त्वतः॥ एवमुक्तस्तुरामेणवाक्यंदनुरनुत्तमं॥२६॥ प्रोवाचकुशलोवक्तावक्तारमपिराघवं॥ दिव्यमस्तिनमेज्ञानंनाभिजानामिमैथिलीं॥२७॥ यस्तांवक्ष्यतितंवक्ष्येदग्धःस्वरूपमास्थितः॥ योभिजानातितद्रक्षस्तद्वक्ष्येराममनन्तरं॥२८॥ अदग्धस्यहिविज्ञातुंशक्तिरस्तिनमेप्रभो॥ राक्षसंतुमहावीर्यंसीतायेनहृतातव॥ विज्ञानंहिमहद्भ्रष्टंशापदोषेणराघव॥ स्वकृतेनमयाप्राप्तंरूपंलोकविगर्हितं॥३०॥ किंतुयावन्नयात्यस्तंसविताश्रान्तवाहनः॥ तावन्मामवटेक्षिप्त्वादहरामयथाविधि॥३१॥ दग्धस्त्वयाहमवटेन्यायेनरघुनन्दन॥ वक्ष्यामितंमहावीरयस्तंवेत्स्यतिराक्षसं॥३२॥ तेनसख्यंचकर्तव्यंन्याय्यवृत्तेनराघव॥ कल्पयिष्यतितेवीरसाहाय्यंलघुविक्रम॥३३॥ नहितस्यास्त्यविज्ञातंत्रिषुलोकेषुराघव॥ सर्वान्परिसृतोलोकान्पुरावैकारणान्तरे॥३४॥ ॥इत्यार्षेश्रीमद्रामायणेआरण्यकांडेएकसप्ततितमःसर्गः॥७१॥

॥एवमुक्तौतुतौवीरौकबंधेननरेश्वरौ॥ गिरिप्रदरमासाद्यपावकंविससर्जतुः॥१॥ लक्ष्मणस्तुमहोल्काभिर्ज्वलिताभिःसमंततः॥ चितामादीपयामाससाप्रजज्वालसर्वतः॥२॥ तच्छरीरंकबंधस्यघृतपिंडोपमंमहत्॥ मेदसापच्यमानस्यमंदंदहतपावकः॥३॥ सविधूयचितामाशुविधूमोग्निरिवोत्थितः॥ अरजेवाससीबिभ्रन्माल्यंदिव्यंमहाबलः॥४॥ ॥७॥

स्वकृतेनानुचितकर्मणा॥३०॥३१॥३२॥ तेनयोराक्षसंज्ञास्यतितेनन्याय्यवृत्तेननीतिमच्चरित्रेण॥३३॥ कारणान्तरेकस्मिंश्चिन्निमित्तेजातेसतीत्यर्थः॥३४॥ ॥इतिश्रीरामाभिरामश्रीरा०आरण्यकांडेएकसप्ततितमःसर्गः॥७१॥ ॥प्रदरंगर्तंआसाद्यकबंधंप्राप्यसर्वतःकाष्ठानिदत्वातत्राग्निंददतुः॥१॥२॥ मेदसापूर्णस्येतिशेषः मेदःपूर्णत्वान्मंददाहःदहतअदहत॥३॥ अरजेनिर्मले॥४॥

पु४

चिताया उत्पपात भास्वरः कांतिमान् सर्वेषु प्रत्यंगेषु करचरणादिषु भूषणानि यस्य ॥५॥ हेमपुष्पके रामकृतसंस्कारप्रभावेन पूर्वतपःप्रभावेन चेदं भूतं विमानं शाक्षः ॥६॥ तत्त्वेन ए-
रसार्थं न उच्यमानमिति शेषः ॥७॥ अथ प्रतिज्ञातमुपायमाह राम षडिति षड्युक्तयः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्या लोके संति याभिर्युक्तिभिः सर्वं वस्तुजातं ए-
विमृश्यते [redacted] विमृश्य साध्यते तत्र दशान्तेन दुर्दशापरिपाककालेन यः परिमृष्टः स दशाभागेन [redacted] दशाभागदुर्दशापरिपाकावस्थां प्राप्तेन सेव्यते इति नी-
तिः तस्मात्त्वयाप्युपायः समाश्रयः कार्य इत्यर्थः परिमृष्ट इति पाठे दशान्तेन दुर्दशापरिपाककालेनार्थात् क्लेशित इत्यर्थः ॥८॥ नन्वहं दशाभागं प्राप्त इति कथं त्वया निर्णीतं तत्रा-

ततश्चिताया वेगेन भास्वरो विरजांबरः ॥ उत्पपाताशु संहृष्टः सर्वप्रत्यंगभूषणः ॥५॥ विमाने भास्वरे तिष्ठन् हंसयुक्ते यशस्करे ॥ प्रभया च मह-
ता तेजसा दिशो दश विराजयन् ॥६॥ सोन्तरिक्षगतो वाक्यं कबंधो राममब्रवीत् ॥ शृणु राघव तत्त्वेन यथा सीतामवाप्स्यसि ॥७॥ राम षड्युक्तयो
लोके याभिः सर्वं विमृश्यते ॥ परिमृष्टो दशान्तेन दशाभागेन सेव्यते ॥८॥ दशाभागगतो हीनस्त्वं हि राम सलक्ष्मणः ॥ यत्कृते व्यसनं प्राप्तं
त्वया दारप्रधर्षणं ॥९॥ तदवश्यं त्वया कार्यः स सुहृत्सुहृदां वर ॥ अकृत्वा नहि ते सिद्धिमहं पश्यामि चिंतयन् ॥१०॥ श्रूयतां राम वक्ष्यामि सुग्री-
वो नाम वानरः ॥ भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना ॥११॥ ऋष्यमूके गिरिवरे पंपापर्यंतशोभिते ॥ निवसत्यात्मवान्वीरश्चतुर्भिः
सह वानरैः ॥१२॥ वानरेंद्रो महावीर्यस्तेजस्वी चामितप्रभः ॥ सत्यसंधो विनीतश्च धृतिमान्मतिमान्महान् ॥१३॥ दक्षः प्रगल्भो द्युति-
मान्महाबलपराक्रमः ॥ भ्रात्रा विवासितो वीर राज्यहेतोर्महात्मना ॥१४॥ स ते सहायो मित्रं च सीतायाः परिमार्गणे ॥ भविष्यति हि ते रा-
म मा च शोके मनः कृथाः ॥१५॥

॥७२॥ ॥७२॥ ॥७२॥ ॥७२॥

ह दशाभागगत इति यतस्त्वं सलक्ष्मण एव हीनो राज्यादिनेत्यर्थः यत्कृते यद्दशाभागनिमित्तं त्वया दारप्रधर्षणं प्राप्तं तेन तत्प्राप्तेनैव दुर्दशाभोगकालं प्राप्त इति ॥९॥ यदेवमतस्त्वया
स सुहृत् दशाभागप्राप्तः सुहृत्कार्यः तत्करणावश्यकत्वे हेतुमाह अकृत्वेति ॥१०॥ नाहं दशः सुहृत्कः इत्यत आह श्रूयतामिति ॥११॥ पंपापर्यंतेन पंपाप्रदेशेन पंपया शोभिते चतु-
र्भिः मंत्रिभिरिति शेषः ॥१२॥ तेजोवान् स्वतापी अमितप्रभः अपरिच्छिन्नकांतिः ॥१३॥ द्युतिमानित्युक्तानां वास्तवत्वेवोधनाय कस्यापि कस्य चित्पुनः कथनं ॥१४॥ हे राम ते भ-
विष्यति हि ते न्वये ॥१५॥

72

॥राम॥

पद्मविनवाराज्यभ्रंशदारापहारादिदुःखंवनस्तथाकर्तुंकेनापिनशक्यमिति·अतःशोकेमनोमाकृथाइतिशेषः·तेइत्यादीनांप्रनष्टक्त्विमस्तुएतद्दुःखेवननस्यापिदुःखितत्वान्तस्य
मापय ॥१६॥ तंगच्छतंवयस्यंकुर्वित्यन्वयः ॥१७॥ परस्परद्रोहपरिहारायाग्निसाक्षिकंसख्यंकार्यमित्याह·अद्रोहायेति ॥१८॥ नस्यातिर्यक्त्वानरवमतिःकृतेनानकार्यंत्यत्रहेतुमा
ह कृतज्ञइति·ननुसकिमर्थंमयासहमैत्रींकुर्यादतआह सहायार्थीति नन्वास्यामशक्तास्यांकस्तस्यसहायार्थइत्यतआह शक्तौहीति नस्यचिकीर्षितंकार्यंकर्तुंयुवांशक्तौ
वित्यन्वयः ॥१९॥ ननुतस्यनिरर्थ्योःस्मत्सहायेकाशक्तिस्तत्राह·सकृतार्थःत्वयाकृतप्रयोजनःकरिष्यमाणप्रयोजनोपि·तवकार्यंसीतान्वेषणादिरूपंसकरिष्यत्येव·तथासाम

राघ २

भवितव्यंहियच्चापिनतच्छक्यमिहान्यथा ॥ कर्तुमिक्ष्वाकुशार्दूलकालोहिदुरतिक्रमः ॥१६॥ गच्छशीघ्रमितोवीरसुग्रीवंतंमहाबलं ॥ वय
स्यंतंकुरुक्षिप्रमितोगत्वाद्यराघव ॥१७॥ अद्रोहायसमागम्यदीप्यमानेविभावसौ ॥ नचतेसोवमन्तव्यःसुग्रीवोवानराधिपः ॥१८॥ कृतज्ञःकाम
रूपीचसहायार्थीचवीर्यवान ॥ शक्तौह्यद्ययुवांकर्तुंकार्यंतस्यचिकीर्षितम ॥१९॥ कृतार्थोवाकृतार्थोवातवकृत्यंकरिष्यति ॥ सऋक्षरजसः
पुत्रःपम्पामटतिशङ्कितः ॥२०॥ भास्करस्यौरसःपुत्रोवालिनाकृतकिल्बिषः ॥ सन्निधायायुधंक्षिप्रमृश्यमूकालयंकपिं ॥२१॥ कुरुराघवसत्ये
नवयस्यंवनचारिणं ॥ सहिस्थानानिकार्त्स्न्येनसर्वाणिकपिकुञ्जरः ॥२२॥ नरमांसाशिनांलोकेनैपुण्यादधिगच्छति ॥ नतस्याविदितंलोकेकिं
चिदस्तिहिराघव ॥२३॥ यावत्सूर्यःप्रतपतिसहस्रांशुःपरंतप ॥ सनदीर्विपुलान्शैलान्गिरिदुर्गाणिकन्दरान ॥२४॥ अन्विष्यवानरैःसार्धं
पत्नींतेधिगमिष्यति ॥ वानरांश्चमहाकायान्प्रेषयिष्यतिराघव ॥२५॥ दिशोविचेतुंतांसीतांत्वद्वियोगेनशोचतीं ॥ अन्वेष्यतिवरारोहांमैथि
लींरावणालये ॥२६॥ समेरुशृङ्गाग्रगतामनिन्दितांप्रविश्यपातालतलेपिवाश्रितां ॥ प्लवंगमानामृषभस्तवप्रियांनिहत्यरक्षांसिपुनःप्रदास्य
ति ॥२७॥ ॥ इत्यार्षेश्रीमद्रामायणेआरण्यकाण्डेद्विसप्ततितमःसर्गः ॥७२॥ ॥ दर्शयित्वातुरामायसीतायाःपरिमार्गणं ॥ वाक्यमन्वर्थज्ञः
मर्थ
कबंधःपुनरब्रवीत ॥१॥

र्थ्यप्रयोजकंतस्यकुलीनत्वमाह·सऋक्षरजसइतिपुत्रः·क्षेत्रजइत्यर्थः ॥२०॥ तदेवाह·भास्करस्यौरसइति कृतकिल्बिषः [illegible] कृतवैरः·तएववालिनःशंकितोऽटति तमग्निस
न्निधायायुधंसन्निधायसंस्थाप्यतेनसत्येनचतंकपिंवयस्यंकुरु ह्रियन्तःसरक्षसांस्थानानिसर्वाणिजानाति ॥२१॥२२॥२३॥२४॥ अधिगमिष्यतिज्ञास्यति ॥२५॥ रावणाल
येशोचतीमितिसंबंधः·अनेनत्वायनेसर्वदिक्षुरावणालयाःसन्ति ननुकिंदिक्ष्वपिरावणालयइतिज्ञातुंसर्वदिग्विचयनं ॥२६॥ अनिन्दितांनिर्मलां अनेनसीतायाःशुद्धत्वंज्ञापितं
॥२७॥ ॥इतिरामाभिरामेआरण्यकाण्डेद्विसप्ततितमःसर्गः ॥७२॥ परिमार्गणोपायंदर्शयित्वाथनवाक्यमब्रवीत ॥१॥ ॥७॥ ॥७॥

यत्रप्रकाशंनेनतत्रगंतुमेषशिवःअदुष्टःपंथाः॥२॥ एनेकेनन्नाहजंबूइत्यादि॥३॥ धन्वनाधवाःनागवृक्षोनागकेसरः॥४॥ अग्निमुखोऽरुष्करःसुरक्तोरक्तचंदनःपारिभद्रकोमंदारःच
लानानट्वृक्षान्भूमौपातयित्वाशाखाधन्वाभूमिपर्यंतंसमास्थे॥५॥६॥ अन्यतरगामिषध्येमिशोषःउन्नरजरस्वच्छ॥७॥ विटपाःशाखाः॥८॥९॥ चंक्रमंतौचंक्रम्यमाणौ॥१०॥

एषराम:शिवःपंथायत्रैतेपुष्पिताद्रुमाः॥प्रतीचींदिशमाश्रित्यप्रकाशंतेमनोरमाः॥१॥जंबूप्रियालपनसान्यग्रोधप्लक्षतिंदुकाः॥अश्व
त्थाःकर्णिकाराश्चचूताश्चान्येचपादपाः॥२॥धन्वनानागवृक्षाश्चतिलकानक्तमालकाः॥नीलाशोकाःकदंबाश्चकरवीराश्चपुष्पिताः॥४॥
अग्निमुख्या अशोकाश्चसुरक्ताःपारिभद्रकाः॥नानारुह्याथवाभूमौपातयित्वाचतान्वलान्॥५॥फलान्यमृतकल्पानिभक्षयित्वागमि
ष्यथ॥तरतिक्रम्यकाकुत्स्थवनंपुष्पितपादपं॥६॥नंदनप्रतिमंत्वन्यत्कुरवस्तूत्तराइव॥सर्वकालफलायत्रपादपामधुरस्रवाः॥७॥सर्वेच
ऋतवस्तत्रवनेचैत्ररथेयथा॥फलभारनतास्तत्रमहाविटपधारिणः॥८॥शोभंतेसर्वतस्तत्रमेघपर्वतसन्निभाः॥नानारुह्याथवाभूमौपा
तयित्वाथवासुखं॥९॥फलान्यमृतकल्पानिलक्ष्मणस्तेप्रदास्यति॥चंक्रमंतौवरान्शैलान्शैलाच्छैलंवनाद्वनं॥१०॥ततःपुष्करिणींवीरौपं
पांनामगमिष्यथ॥अशर्करामविभ्रंशांसमतीर्थामशैवलां॥११॥रामसंजातवालूकांकमलोत्पलशोभितां॥तत्रहंसाःप्लवाःक्रौंचाःकुरराश्चैवरा
घव॥१२॥वल्गुस्वरानिकूजंतिपंपासलिलगोचराः॥नोद्विजंतेनरान्दृष्ट्वावधस्याकोविदाःशुभाः॥१३॥घृतपिंडोपमान्स्थूलानतान्द्विजान्भक्ष
यिष्यथ॥रोहितान्वक्रतुंडांश्चनलमीनांश्चराघव॥१४॥पंपायामिषुभिर्मत्स्यानतत्रामवरान्हतान्॥निस्त्वक्पक्षानयस्तप्तानकृशानेककंटका
न्॥१५॥तवभक्त्यासमायुक्तोलक्ष्मणःसंप्रदास्यति॥भृशंतान्खादतोमत्स्यान्पंपायाःपुष्पसंचये॥१६॥पद्मगंधिशिवंवारिसुखशीतमना
मयं॥उद्धृत्यसततंक्लिष्टंरूप्यस्फटिकसन्निभं॥१७॥

तीर्थमवतारमार्गः अविभ्रंशांशैवलसंबंधेनपातभ्रंशोरहितं॥११॥ संजातवालुकाम्निनिरीर्य आर्षः प्लवाःसंकुकाः॥१२॥ वधस्याकोविदाःवधमजानानाः॥१३॥ द्विजानपक्षि
णःरोहितामत्स्यविशेषाः चक्रतुंडानलमीनाश्चनएव॥१४॥ अयस्तप्तानग्नेलोहेपक्वान् अकृशान्अनेकेचकंटकायेषांविद्यतेतान्॥१५॥ पुष्पसंचयेयस्मादिपुष्पसमृद्धे
वर्तमानां॥१६॥ अनएवपद्मगंधिअक्लिष्टंमलादिकश्मलहीनं॥१७॥ ॥७॥

73

॥राम॥

पुष्करिण्यां पम्पापर्णेन उद्धृत्य मत्स्यान् वराहमतंगजलं पाययिष्यतीति संबंधः गिरिगुहास्तु शय्यास्तनं येषां तान् ॥१८॥१९॥ पीनान् जलपानेन तृप्तान् विटपी विटपिनः
भार्येमेकत्वं माल्यधारिणः पुष्पवतः नानदृष्टाशीतोदकं च दृष्ट्वा शोकं हास्यसि ॥२०॥ अन्यान्यपि शोकहन्दृणि दर्शनीयान्याह सुमनोभिरिति ॥२१॥ आरोपयितारं हीनत्वाधारस्थि
नाम हावनत्वात् मनुष्यसंचाराभावेनेत्यर्थः ॥२२॥ अम्लाना शीर्णत्वे हेतुर्मतंगेन्याह स्थि ॥२३॥ भारेणान म्लानां गुर्वर्थे आक्रियमाणवन्यसारेणश्चान्तानां नाम निर्माल्यानीति विधेयाये
धं श्रीवत्वं ॥२४॥२५॥ शवरी नाम शवरीत्याख्या श्रमणी तापसी ॥२६॥ त्वां दृष्ट्वा स्वर्गलोकं गमिष्यति पूर्वार्जितेन तपसा त्वद्दर्शनस्य च माहात्म्यात् स्वर्गलोकोन्तर्ब्रह्मलोकः इ

अथ पुष्करपत्रेण लक्ष्मणः पाययिष्यति ॥ स्थूलान् गिरिगुहाशय्यान् वानरान् वनचारिणः ॥१८॥ सायाह्ने विचरन् राम दर्शयिष्यति लक्ष्म
णः ॥ अपां लोभादुपावृत्तान् वृषभानिव नर्दतः ॥१९॥ स्थूलान् पीतांश्च पंपायां द्रक्ष्यसि त्वं नरोत्तम ॥ सायाह्ने विचरन् राम विटपी माल्यधारिणः ॥
॥२०॥ शिवोदकं च पंपायां दृष्ट्वा शोकं विहास्यसि ॥ सुमनोभिश्चितांस्तत्र तिलकान्नक्तमालकान् ॥२१॥ उत्पलानि च फुल्लानि पंकजानि च राघ
व ॥ न तानि कश्चिन्माल्यानि तत्रारोपयिता नरः ॥२२॥ न च वै म्लानतां यान्ति न च शीर्यन्ति राघव ॥ मतंगशिष्यास्तत्रासन्नृषयः सुसमाहिताः ॥
॥२३॥ तेषां भारभितप्तानां वन्यमाहरतां गुरोः ॥ ये प्रपेतुर्महीं तूर्णं शरीरात्स्वेदविंदवः ॥२४॥ तानि माल्यानि जातानि मुनीनां तपसा तदा ॥ स्वे
दविंदुसमुत्थानि न विनश्यन्ति राघव ॥२५॥ तेषामद्यापि तत्रैव दृश्यते परिचारिणी ॥ श्रमणी शवरी नाम काकुत्स्थ चिरजीविनी ॥२६॥
त्वां तु धर्मस्थिता नित्यं सर्वभूतनमस्कृते ॥ दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति ॥२७॥ ततस्तद्राम पंपायास्तीरमाश्रित्य पश्चिमं
आश्रमस्थानमतुलं गुह्यं काकुत्स्थ पश्यसि ॥२८॥ न तत्राक्रमितुं नागाः शक्नुवंति तदाश्रमे ॥ ऋषेस्तस्य मतंगस्य विधानात्तच्च कानन
म् ॥२९॥ मतंगवनमित्येव विश्रुतं रघुनंदन ॥ तस्मिन्नंदनसंकाशे देवारण्योपमे वने ॥३०॥ नानाविहगसंकीर्णे रंस्यसे राम निर्वृ
तः ॥ ऋष्यमूकस्तु पंपायाः पुरस्तात्पुष्पितद्रुमः ॥३१॥ सुदुःखारोहणश्चैव शिशुनागाभिरक्षितः ॥ उदारो ब्रह्मणा चैव पूर्वकाले विनि
मितः ॥३२॥

निवर्तन्ते इति देवलोकमिति पाठेपि स एवार्थः ॥२७॥ ततः आश्रमस्थानं शवरीवासभूतं मतंगाश्रमस्थानं गुह्यं आश्रमेषु गुह्यं ॥२८॥ नागा गजाः न तत्र तदाश्रमे तस्मिन्मतंगाश्रमे इ
त्यर्थः यद्यपि तत्र विविधा नागाः संति तथापि मतंगस्य विधानात् प्रभावात् तदेकदेशे मतंगाश्रमे न संचार इत्यर्थः ॥२९॥ अतस्तद्वनं मतंगवनमित्येव विश्रुतं देवारण्योपमं नं
दननसदृशं ॥३०॥ पंपायाः पंपातीरवर्तिमतंगाश्रमादित्यर्थः ॥३१॥ सुदुःखारोहणः स्वच्छत्वात् हस्त्वनारमण्याह शिशुभिर्नागैः सर्पैरभिरक्षितः उदारो दाता ब्रह्मणा
पूर्वकाले सृष्टिकाले निर्मितः विशेषार्थं तपः प्राधान्येन निर्मित ॥३२॥

औदार्यमेव दर्शयति शयान इति ॥३३॥ अन्यमप्यतिशयमाह य इति तेनैव पर्वतेन सहैव ॥३४॥ शिशुनागानां बालगजानां ॥३५॥ रुधिरधाराभिः ईषद्रक्तमदधाराभिः सक्ताः संबद्धाः सं
हत्य संभूय संचरंति पृथक्कीर्णाश्चरंति ॥३६॥३७॥ नीलमणिवृत्कोमलकांतीन् ॥३८॥ अपेतान् मनुष्यदृष्ट्वा पलायितान् अजयान् प्राणिजयहीनान् अनेनाक्रूरता अथा
साधारणविक्रमाहरामेति ॥३९॥ शिलापिधाने निगुह्य नामेति नीर्थः विशेषणमित्यन्ये ॥४०॥ तस्यागुहायां ॥४१॥ कदाचित्पर्वतस्य शिखरेपि तिष्ठति अपिधानस्थ

शयानः पुरुषो राम तस्य शैलस्य मूर्द्धनि ॥ यः स्वप्ने लभते वित्तं तत्प्रबुद्धोऽधिगच्छति ॥३३॥ यस्त्वेनं विषमाचारः पापकर्माधिरोहति ॥ तत्रै
व प्रहरंत्येनं सुप्तमादाय राक्षसाः ॥३४॥ ततोऽपि शिशुनागानामाक्रंदः श्रूयते महान् ॥ क्रीडतां राम पंपायां मतंगाश्रमवासिनां ॥३५॥ स
क्ता रुधिरधाराभिः संहत्य परमद्विपाः ॥ प्रचरंति पृथक्कीर्णा मेघवर्णास्तरस्विनः ॥३६॥ ते तत्र पीत्वा पानीयं विमलं चारु शोभनं ॥ अत्यंत
सुखसंस्पर्शं सर्वगंधसमन्वितं ॥३७॥ निवृत्ताः संविगाहंते वनानि वनगोचराः ॥ ऋक्षांश्च द्वीपिनश्चैव नीलकोमलकप्रभान् ॥३८॥ रु
रूनपेतानजयान् दृष्ट्वा शोकं जहास्यसि ॥ राम तस्य तु शैलस्य महती शोभते गुहा ॥३९॥ शिलापिधाना काकुत्स्थ दुःखं चास्याः प्रवेशनं ॥
तस्या गुहायाः प्राग्द्वारे महान् शीतोदको ह्रदः ॥४०॥ बहुमूलफलो रम्यो नानानगसमाकुलः ॥ तस्यां वसति धर्मात्मा सुग्रीवः सह वानरैः ॥४१॥
कदाचिच्छिखरे तस्य पर्वतस्यापि तिष्ठति ॥ कबंधस्त्वनुशास्यैवं तावुभौ रामलक्ष्मणौ ॥४२॥ स्रग्वी भास्करवर्णाभः खे व्यरोचत वीर्यवान् ॥
तं तु खस्थं महाभागं तावुभौ रामलक्ष्मणौ ॥४३॥ प्रस्थितौ त्वं व्रजस्वेति वाक्यमूचतुरंतिके ॥ गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत्स च ॥४४॥
सुप्रीतौ तावनुज्ञाप्य कबंधः प्रस्थितस्तदा ॥४४॥ स तत्कबंधः प्रतिपद्य रूपं वृतः श्रिया भास्करसर्वदेहः ॥ निदर्शयन् राममवेक्ष्य खस्थः स
ख्यं कुरुष्वेति तदाभ्युवाच ॥४५॥ ॥ इत्यार्षे श्रीमद्रामायणे आरण्यकांडे त्रिसप्ततितमः सर्गः ॥७३॥ ॥ तौ कबंधेन तं मार्गं पंपाया दर्शि
तं वने ॥ आतस्थतुर्दिशं गृह्य प्रतीचीं नृवरात्मजौ ॥१॥ तौ शैलेष्वाचितानेकान् क्षौद्रपुष्पफलद्रुमान् ॥ वीक्षंतौ जग्मतुर्द्रष्टुं सुग्रीवं रामलक्ष्मणौ
॥२॥ कृत्वा च शैलपृष्ठे तु तौ वासं रघुनंदनौ ॥
पंपायाः पश्चिमं तीरं राघवावुपतस्थतुः ॥३॥

॥४२॥४३॥ प्रस्थितौ आवां सुग्रीवसमीपं प्रस्थितौ त्वं व्रज स्वपुण्यलोकमिति शेषः अंतिके समीपे वर्त्तमानं खस्थं तं तावूचतुः ॥४४॥ सताभ्यां कृतानुमतिकः कबंधः ॥४४॥ उक्ता
र्थोपसंहारः स तदिति निदर्शयन् मार्गादिकमिति शेषः किंचिद्दूरं गत्वा पुनः राममवेक्ष्य सख्यं कुरुष्वेत्युवाच ॥४५॥ ॥ इति रामाभिरामे श्रीरा॰ आरण्यकांडे त्रिसप्ततितमः
सर्गः ॥७३॥ ॥ यः कबंधेन कथितस्तं मार्गं गृहीत्वा पंपायाः उद्दिश्य प्रतीचीं दिशमातस्थतुः ॥१॥ आचितान् अनेकान् विद्यमानान् अनेकान् माधुर्येण क्षौद्रसदृशान् तत्सदृशफलान् २
उपतस्थतुः प्रापतुः ३

74

राम

॥४॥ नं शर्याश्रमं॥५॥ सिद्धासिद्धयोनिगा॥६॥७॥ विघ्नास्तपसो विघ्नाः कामादयः कोपो नियतः निगृहीतः आहारश्च नियत इत्यनुकर्षः॥८॥९॥ प्रत्यवस्थिता अभिमुखं स्थिता॥१०॥
अद्य प्राप्ता तपःसिद्धिरित्यादिः शबर्या उपचारवचनं परमार्थदृशा वादः॥११॥ स्वर्गो ब्रह्मलोकः देववरे सर्वान्तरात्मनि॥१२॥ अक्षयान् लोकान् अपुनरावृत्तिकान् ब्रह्मलोकान्॥१३॥ चित्रकूट
मिति त्वदासक्तिवैभव [illegible] मा त्रादित्यर्थः इतः अस्मादाश्रमात्॥१४॥ आगमिष्यन्ति अनुग्रहायेति शेषः॥१५॥ तेत्वया नदृष्टा अस्मिन्नेवाफलभूतं तद्दर्शनं प्राप्य अक्षयान् लो

तौ पुष्करिण्याः पंपायास्तीरमासाद्य पश्चिमं॥ अपश्यतां ततस्तत्र शबर्या रम्यमाश्रमं॥४॥ तौ तमाश्रममासाद्य द्रुमैर्बहुभिरावृतं॥ सु
रम्यमभिवीक्षंतौ शबरीमभ्युपेयतुः॥५॥ तौ दृष्ट्वा तु तदा सिद्धा समुत्थाय कृतांजलिः॥ पादौ जग्राह रामस्य लक्ष्मणस्य च धीमतः॥६॥ पा
द्यमाचमनीयं च सर्वं प्रादाद्यथाविधि॥ तामुवाच ततो रामः श्रमणीं धर्मसंस्थितां॥७॥ कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः॥
कच्चित्ते नियतः कोप आहारश्च तपोधने॥८॥ कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखं॥ कच्चित्ते गुरुशुश्रूषा सफला चारु
भाषिणि॥९॥ रामेण तापसी पृष्टा सा सिद्धा सिद्धसम्मता॥ शशंस शबरी वृद्धा रामाय प्रत्यवस्थिता॥१०॥ अद्य प्राप्ता तपःसिद्धिस्तव संदर्शना
न्मया॥ अद्य मे सफलं जन्म गुरवश्च सुपूजिताः॥११॥ अद्य मे सफलं तप्तं स्वर्गश्चैव भविष्यति॥ त्वयि देववरे राम पूजिते पुरुषर्षभ॥१२॥ तवा
हं चक्षुषा सौम्य पूता सौम्येन मानद॥ गमिष्याम्यक्षयाँल्लोकांस्त्वत्प्रसादादरिंदम॥१३॥ चित्रकूटं त्वयि प्राप्ते विमानैरतुलप्रभैः॥ इतस्ते दि
वमारूढा यानहं पर्यचारिषं॥१४॥ तैश्चाहमुक्ता धर्मज्ञैर्महाभागैर्महर्षिभिः॥ आगमिष्यति ते रामः सुपुण्यमिममाश्रमं॥१५॥ स ते प्रति
गृहीतव्यः सौमित्रिसहितोतिथिः॥ तं च दृष्ट्वा वराँल्लोकानक्षयांस्त्वं गमिष्यसि॥१६॥ एवमुक्ता महाभागैस्तदाहं पुरुषर्षभ॥ मया तु
संचितं वन्यं विविधं पुरुषर्षभ॥१७॥ तवार्थे पुरुषव्याघ्र पंपायास्तीरसंभवं॥ एवमुक्तः स धर्मात्मा शबर्या शबरीमिदं॥१८॥

कान् ब्रह्मलोकं भगवदभिप्रायेण गुणाभिप्रायेण वक्तृवचनं॥१६॥ एवमुक्ताहं यतो नो मया त्वदर्थं वनं सम्यक् परीक्ष्य माधुर्ययुतं संचितमित्यर्थः तदुक्तं पाद्मे शबरी प्रत्यु
प्रत्युद्गम्य प्रणम्याथ निवेश्य कुशविष्टरे पादप्रक्षालनं कृत्वा तत्तोयं पापनाशनं शिरसा धारयित्वा च वन्यैः पुष्पैस्तथार्चयत् फलानि च सुपक्वानि मूलानि मधुराणि च स्वय
मास्वाद्य माधुर्यं परीक्ष्य परिभक्ष्य च पश्चान्निवेदयामास राघवाभ्यां दृढव्रता फलान्यास्वाद्य काकुत्स्थस्तस्यै मुक्तिं परां ददाविति॥१७॥१८॥ विज्ञाने आगतानागतज्ञाने अवहिष्कृ
तां तादृशज्ञानवतीमित्यर्थ इति तीर्थः विज्ञाने ब्रह्मविद्यायां मैत्र्यादिवद्बहिष्कृतां तत्राप्यधिकारिणीमित्यर्थः इति कतकः विशिष्टं ज्ञानं येषां तेषां संबन्धो यस्याः तत्संबोधनं स

॥रा·वा·आ॥
॥९४॥

विज्ञाने इति संयतानां नित्यमबहिष्कृतां भोजनादिष्वबहिष्कारादिति शेषः त्वद्गुरव आश्रमादिवंशी कृतेति च शेषः इत्यन्ये किमाह तत्राह दनोरिति महात्मनां त्वदाचार्याणां दनोः स-
काशात् श्रुतं प्रत्यक्षं कर्तुमिच्छामीति शेषः संद्रष्टुं यदि मन्यसे संदर्शयितुं योग्यं यदि मन्यसे इत्यर्थः ॥१९॥ २०॥ मेघा वर्षकाः प्रायघनस्तद्वन्नीलमिह ते च वने वाकुलकान्त्यन्वे·
२१ मतङ्गवनं तत्र ये मदीया विश्रुतं प्रसिद्धं ते प्रसिद्धाः मन्त्रपूजितं मन्त्रस्य गायत्र्या जपेन पूजितं मतिपुण्यतीर्थे इह यजनतीर्थमिति पाठेऽपि स एवार्थः मन्त्रवत् तत्रोममन्त्रवत्
जुहवाञ्चक्रिरे कृतवन्तः यद्वा तीर्थमध्वरं जुहवाञ्चक्रिरे कृतवन्त इत्यर्थः ॥२२॥ प्रत्यक्स्थली नाम्नी वेदी यत्र यस्यां सुसत्कृता अभ्यन्तरपू-

राघवः प्राह विज्ञाने तां नित्यमबहिष्कृतां ॥ दनोः सकाशात्तत्त्वेन प्रभावं ते महात्मनां ॥१९॥ श्रुतं प्रत्यक्षमिच्छामि संद्रष्टुं यदि मन्यसे ॥ ए-
तत्तु वचनं श्रुत्वा रामवक्त्राद्विनिःसृतं ॥ शबरी दर्शयामास तावुभौ तद्वनं महत् ॥ पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलं ॥२१॥ म-
तङ्गवनमित्येव विश्रुतं रघुनन्दन ॥ इह ते भावितात्मानो गुरवो मे महाद्युते ॥ जुहवाञ्चक्रिरे तीर्थं मन्त्रवन्मन्त्रपूजितं ॥२२॥ इयं प्र-
त्यक्स्थली वेदी यत्र ते मे सुसत्कृताः ॥ पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः ॥२३॥ तेषां तपःप्रभावेन पश्याद्यापि रघूत्तम ॥ द्यो-
तयन्ती दिशः सर्वाः श्रिया वेद्यतुलप्रभा ॥२४॥ अशक्नुवद्भिस्तैर्गन्तुमुपवासश्रमालसैः ॥ चिन्तितेनागतान् पश्य समेतान्सप्त साग-
रान् ॥२५॥ कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह ॥ अद्यापि न विशुष्यन्ति प्रदेशे रघुनन्दन ॥२६॥ देवकार्याणि कुर्वद्भिर्यानीमा-
नि कृतानि वै ॥ पुष्पैः कुवलयैः सार्धं म्लानत्वं न तु यान्ति वै ॥२७॥ कृत्स्नं वनमिदं दृष्टं श्रोतव्यं च श्रुतं त्वया ॥ तदिच्छाम्यभ्यनुज्ञाता त्य-
क्ष्याम्येतत्कलेवरं ॥२८॥

ज्याः मे मत्संबंधिनस्ते गुरवः श्रमादुद्वेपिभिः कंपवद्भिर्हस्तैरत्यन्तं करैः पुष्पोपहारं देवतानां पूजां कुर्वन्ति ॥२३॥ तेषां मदाचार्याणां प्रभावेणेयं वेदिः तत्पूजाकाल इवाद्यापि सर्वा
दिशो द्योतयन्ती अतुलप्रभा दृश्यते पश्य ॥२४॥ आश्चर्यान्तरं दर्शयति अशक्नुवद्भिरिति सागरादितीर्थं गन्तुमशक्नुवद्भिरित्यर्थः तत्र हेतुरुपवासश्रमालसैः कृच्छ्रादिना
त्र्यौपवासैर्जनितेन श्रमेणालसैर्दुर्बलैः इह शैस्तैश्चिन्तितेन तेषां ध्यानेन तदभिषेकार्थं आगतान्सप्तसागरान् समेतान् पश्य ॥२५॥ आश्चर्यान्तरमाह कृताभिषे-
कैरिति न विशुष्यन्ति तीर्थदेवभावान्तत्तपोवैभवाच्चेति भावः ॥२६॥ आश्चर्यान्तरमाह देवेति कृतानि दत्तानि अर्पितानि मत्कुवलयैः सहितानि पुष्पाणि नाद्यापि म्लानत्वं यान्ति
तत्तपःप्रभावादिति शेषः ॥२७॥ उपसंहरति कृत्स्नमिति दृष्टं त्वयाऽस्मदाचार्याद्दर्शितं श्रुतं त्वयाऽस्मदाचार्यप्रभावितं अभ्यनुज्ञाता त्वयेति शेषः तत्तस्मात् एतत्कलेवरं त्यक्ष्या

॥२९॥ [illegible]

॥राम॥

75

एषामुनीनामयमाश्रमः येषांचाहंपरिचारिणी तेषांभाविनात्मनांसद्यस्त्वसंहितपरमात्मनांमुनीनांसमीपंगंतुमर्हसिच्छामिइतिचाब्रवीत्॥२९॥ श्रुतार्थसुश्रीरूपनिशेषः
॥३०॥ शंसितव्रतांतीक्ष्णव्रतां॥३१॥ आत्मानंहुताशनेहुत्वास्वाचार्योपदिष्टमार्गेणेत्यर्थः॥३२॥ स्वर्गंब्रह्मलोकमेव॥३३॥३४॥ यत्रब्रह्मलोकेतत्पुण्यस्थानंशबरीआत्मसमा(

तेषामिच्छाम्यहंगंतुसमीपंभाविनात्मनां॥ मुनीनामाश्रमोयेषामहंचपरिचारिणी॥२९॥ धर्मिष्ठंतुवचःश्रुत्वाराघवःसहलक्ष्मणः॥
प्रहर्षमतुलंलेभेआश्चर्यमितिचाब्रवीत्॥३०॥ तामुवाचततोरामःशबरींशंसितव्रतां॥ अर्चितोहंत्वयाभद्रेगच्छकामंयथासुखं॥३१॥
इत्येवमुक्ताजटिलाचीरकृष्णाजिनांबरा॥ अनुज्ञातातुरामेणहुत्वात्मानंहुताशने॥३२॥ ज्वलत्पावकसंकाशास्वर्गमेवजगामह॥
दिव्याभरणसंयुक्तादिव्यमाल्यानुलेपना॥३३॥ दिव्यांबरधरातत्रबभूवप्रियदर्शना॥ विराजयंतीतंदेशंविद्युत्सौदामिनीयथा॥३४॥
यत्रतेसुकृतात्मानोविहरंतिमहर्षयः॥ तत्पुण्यंशबरीस्थानंजगामात्मसमाधिना॥३५॥ ॥इत्यार्षेश्रीमद्रामायणेवा०आर
ण्यकांडेचतुःसप्ततितमःसर्गः॥७४॥ ॥दिवंतुतस्यांयातायांशबर्यांस्वेनतेजसा॥ लक्ष्मणेनसहभ्रात्राचिंतयामासराघवः॥१॥
चिंतयित्वातुधर्मात्माप्रभावंतंमहात्मनां॥ हितकारिणमेकाग्रंलक्ष्मणंराघवोब्रवीत्॥२॥ दृष्टोमयाश्रमःसौम्यबह्वाश्चर्यःकृता(
त्मनां॥ विश्वस्तमृगशार्दूलोनानाविहगसेवितः॥३॥ सप्तानांचसमुद्राणांतेषांतीर्थेषुलक्ष्मण॥ उपस्पृष्टंचविधिवत्पितरश्चापित
र्पिताः॥४॥ प्रनष्टमशुभंयत्नःकल्याणंसमुपस्थितं॥ तेनतत्वेनहृष्टंमेमनोलक्ष्मणसंप्रति॥५॥ हृदयेमेनरव्याघ्रशुभमावि
र्भविष्यति॥ तदागच्छगमिष्यावःपंपांतांप्रियदर्शनां॥६॥

धिनाजगामब्रह्मसमाधिनेत्यर्थः॥३५॥ इतिश्रीरामाभिरामेश्रीरा०आरण्यकांडेचतुःसप्ततितमःसर्गः॥७४॥ दिवंत्विति॥१॥ महात्मनांप्रभावंशबर्युक्तं॥२॥
॥३॥ तेषांमुनीनांसप्तानांसमुद्राणांतीर्थेषुलोकोपकारकार्यैतैःस्थापितेषुउपस्पृष्टंस्नानं॥४॥ तेनकल्याणोपस्थानेन॥५॥ शुभंमित्रलाभादि॥६॥ ॥७॥

॥रा.वा.आ॥
॥९५॥

अंशुमतःसूर्यस्य॥७॥त्वरेत्वराम्भि॥८॥९॥ममापित्वरतेपंपादर्शने॥१०॥११॥१२॥१३॥पानीयवाहिनीपानार्हानिमधुरसुशीतनिर्मलवाहिनी अनेनपंपानदीनिल

ऋष्यमूकोगिरिर्यत्रनातिदूरेप्रकाशते॥यस्मिन्वसतिधर्मात्मासुग्रीवोंशुमतःसुतः॥७॥नित्यंवालिभयात्त्रस्तश्चतुर्भिःसहवान
रैः॥अहंत्वरेचतंद्रष्टुंसुग्रीवंवानरर्षभं॥८॥तदधीनंहिमेकार्यंसीतायाःपरिमार्गणं॥इतिब्रुवाणंतंवीरंसौमित्रिरिदमब्रवीत॥९॥ग
च्छावस्त्वरितंतत्रममापित्वरतेमनः॥आश्रमात्तुततस्तस्मान्निष्क्रम्यसविशांपतिः॥१०॥आजगामततःपंपांलक्ष्मणेनसहप्रभुः॥स
मीक्षमाणःपुष्पाढ्यंसर्वतोविपुलद्रुमं॥११॥कोयष्टिभिश्चार्जुनकैःशतपत्रैश्चकीचकैः॥एतैश्चान्यैश्चविहगैर्नादितंतद्वनंमहत॥१२॥
सरामोविविधान्वृक्षान्सरांसिविविधानिच॥पश्यन्कामाभिसंतप्तोजगामपरमंह्रदं॥१३॥सतामासाद्यवैरामोदूरात्पानीयवाहि
नीं॥मतंगसरसंनामह्रदंसमवगाहत॥१४॥तत्रजग्मतुरव्यग्रौराघवौहिसमाहितौ॥[redacted]॥सतुशोकसमाविष्टो
रामोदशरथात्मजः॥१५॥विवेशनलिनींरम्यांपंकजैश्चसमावृतां॥तिलकाशोकपुन्नागवकुलोद्दालकाशिनीं॥१६॥रम्योपवन
संबाधांरम्यसंपीडितोदकां॥स्फटिकोपमतोयाढ्यांश्लक्ष्णवालुकसंततां॥१७॥मत्स्यकच्छपसंबाधांतीरस्थद्रुमशोभितां॥सखीभि
रिवसंयुक्तालताभिरनुवेष्टितां॥१८॥किन्नरोरगगंधर्वयक्षराक्षससेवितां॥नानाद्रुमलताकीर्णांशीतवारिनिधिंशुभां॥१९॥

२१

लभ्यते वाहिनीमित्यस्याधारिणीमित्यर्थोवा मतंगसरसमित्यकारांतः तच्चपंपायामेवप्रदेशभेदोगंगायांमणिकर्णिकेव॥१४॥१५॥१६॥श्लक्ष्णाःमृदुस्पर्शाः॥१७॥१८॥१९॥

76

॥राम॥

॥रा.बा.भा॥
॥२६॥

कुवलयोद्घाटैः कुवलयसमूहैः कुथा गजास्तरणा चित्रकंबलः ॥२०॥ अरविंदपद्मयोरक्तत्वेन विषयत्वेन भेदः ॥२१॥ विललाप सीतावियोगादिति शेषः ॥२२॥ शुक्लद्रुमो धवः ॥२३॥ भंडीरो
वटः निचुलो वंजुलः अतिमुक्तका माधवीलता ॥२४॥ पूर्वोक्तः कबंधोक्तः ॥२५॥ तस्य प्रसिद्धस्य ऋक्षरजोनामकस्य पुत्रो हरिर्वानरः ॥२६॥ ॥२७॥ इत्युवाच अनंतरं नरः सीताशोके
२८ उपसंहरनिइतीति अनन्यचेतनः नास्त्यन्यत्र सीतायाः चेतनं चित्तं यस्य सः नलिनीभिर्मनोरमां पंपां सनंगमसरसप्रदेशवर्तिनीं विवेश ॥२९॥ शुभदर्शं शुभदर्शनं

पद्मसौगंधिकैस्ताम्रां शुक्लां कुमुदमंडलैः ॥ नीलां कुवलयोद्घाटैर्बहुवर्णां कुथामिव ॥२०॥ अरविंदोत्पलवतीं पद्मसौगंधिकायुतां ॥ पुष्पिताम्रव
णोपेतां बर्हिणोद्घुष्टनादितां ॥२१॥ स तां दृष्ट्वा ततः पंपां रामः सौमित्रिणा सह ॥ विललाप च तेजस्वी रामो दशरथात्मजः ॥२२॥ तिलकैर्बीज
पूरैश्च वटैः शुक्लद्रुमैस्तथा ॥ पुष्पितैः करवीरैश्च पुंनागैश्च सुपुष्पितैः ॥२३॥ मालतीकुंदगुल्मैश्च भंडीरैर्निचुलैस्तथा ॥ अशोकैः सप्तपर्णै
श्च केतकैरतिमुक्तकैः ॥२४॥ अन्यैश्च विविधैर्वृक्षैः प्रमदेवोपशोभितां ॥ अस्यास्तीरे तु पूर्वोक्तः पर्वतो धातुमंडितः ॥२५॥ ऋष्यमूक इति ख्यात
श्चित्रपुष्पितपादपः ॥ हरेर्ऋक्षरजो नाम्नः पुत्रस्तस्य महात्मनः ॥२६॥ अध्यास्ते तु महावीर्यः सुग्रीव इति विश्रुतः ॥ सुग्रीवमभिगच्छ त्वं वान
रेंद्रं नरर्षभ ॥२७॥ इत्युवाच पुनर्वाक्यं लक्ष्मणं सत्यविक्रमः ॥ कथं मया विना सीतां शक्यं लक्ष्मण जीवितुं ॥२८॥ इत्येवमुक्त्वा मदनाभिपीडि
तः स लक्ष्मणं वाक्यमनन्यचेतनः ॥ विवेश पंपां नलिनीं मनोरमां तमुत्तमं शोकमुदीरयानः ॥२९॥ क्रमेण गत्वा प्रविलोकयन्वनं दद
र्श पंपां शुभदर्शकाननां ॥ अनेकनानाविधपक्षिसंकुलां विवेश रामः सह लक्ष्मणेन ॥३०॥ ॥इत्यार्षे श्रीमद्रामायणे वाल्मीकी
ये आरण्यकांडे पंचसप्ततितमः सर्गः ॥७५॥ ॥अतः परं किष्किंधाकांडं भविष्यति तस्यायमाद्यश्लोकः ॥ स तां पुष्करिणीं गत्वा पद्मोत्पल
झषाकुलां ॥ रामः सौमित्रिसहितो विललापाकुलेंद्रियः ॥१॥ ॥शुभमस्॥ ॥श्रीसम्वत॥ मूलं २६५० टी ३७००

त

77

काननं यस्यास्तां पंपां ददर्श सर्वनदइति शेषः विवेश च सनंगमसरसा वषेरेरेनेति बोध्यं ॥३०॥ विराधादिकबंधांतान्हत्वा स्वपदमादिशत् विचरन्दंडकारण्ये भवारण्ये समे गतिः ॥१॥
इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके आरण्यकांडे पंचसप्ततितमः सर्गः ॥७५॥ ॥आरण्यकांडं संपूर्णं॥ ॥शुभमस्॥

राम
९८

९६ Ⓜ
१९
४२

श्री ३।५

वाल्मीकीयरामायण।

किष्किं ४

वाल्मीकिरामायण
किष्किन्धाकाण्ड

[illegible]

१श्रीगणेशाय नमः॥ सुग्रीवस्यावनं तुर्ये इंद्रसूनोश्च मर्दनं॥ मारुतेर्मुद्रिकादानं कृतं येन स मे गतिः॥१॥ स विराधादिवधेन प्रसिद्धपराक्रमः॥ पंपादर्शी
नोद्दीपितकामो वा॥ तां सुग्रीवाधिष्ठितऋष्यमूकसमीपगां पुष्करिणीं पंपानद्यंतरगतं पंपाख्यं मतंगाख्यं वा सरोविशेषं विललाप पर्यदेवयत्
॥१॥ तां पंपां दृष्ट्वा तज्जन्यहर्षात्तस्येंद्रियाणि चकंपिरे॥ उद्रिक्तविकाराणि बभूवन् कामवशमापन्न इव॥२॥ वैडूर्यवत्स्वभावनिर्मलोद
का पंपानदाख्यसरोवरावच्छिन्ना पंपानदी॥ तज्जलस्यौपाधिकश्यामत्वप्रतिभासाद्वैडूर्यप्रभासादृश्यं उपाधिमाह॥ फुल्लेति॥ द्रुमादिच्छायया

१श्रीरामचंद्राय नमः॥ स तां पुष्करिणीं गत्वा पद्मोत्पलझषाकुलां॥ रामः सौमित्रिसहितो विललापाकुलेंद्रियः॥१॥ तत्र दृ
ष्ट्वैव तां हर्षादिंद्रियाणि चकंपिरे॥ स कामवशमापन्नः सौमित्रिमिदमब्रवीत्॥२॥ सौमित्रे शोभते पंपा वैडूर्यविमलोदका
फुल्लपद्मोत्पलवती शोभिता विविधैर्द्रुमैः॥३॥ सौमित्रे पश्य पंपायाः काननं शुभदर्शनं॥ यत्र राजंति शैला वा द्रुमाः सशि
खरा इव॥४॥ मां तु शोकाभिसंतप्तमाधयः पीडयंति वै॥ भरतस्य च दुःखेन वैदेह्या हरणेन च॥५॥ शोकार्तस्यापि मे पं
पा शोभते चित्रकानना॥ व्यवकीर्णा बहुविधैः पुष्पैः शीतोदका शिवा॥६॥

(तथाभानं॥३॥ पंपायाः काननं तत्॥ परिसरवर्त्ति
काननं॥ यत्र कानने सशिखरा इव उन्नताग्रशाखाभिः सशृंगा इव द्रुमाः शैला वा शैला इव राजंति॥४॥ शोकाभिसंतप्तं राज्यभ्रंशसीतावियोगादिना
शोकतप्तं॥ आधयः पीडयंतीत्युक्तं तानाधीनाह॥ भरतस्येति दुःखेन जटावल्कलादिदुःखस्मरणेन॥५॥ एवं शोकार्तस्यापि शोभते सुखावहा वर्त्तते इत्य

78

॥श्रीराम॥
॥१॥

व्यालाः श्वापदाः ॥ ७ ॥ नीलाञ्जवद्भूं पीतं नीलपीतं शाद्वलं हरितप्रदेशः परिस्तोमैः कुथैरर्पितं युक्तं परिस्तोमः कुथो द्वयोः द्रुमाणामुच्छ्रितैरिति पाठे उच्छ्रितैः उ
च्छ्रितगंधैः यद्वा परिस्तोमैः परिस्तोमभूतैः राशीभूतैरिवस्थितैः पुष्पैरर्पितं युक्तं ॥ ८ ॥ शिखराणि द्रुमाग्राणि उपरुद्धानि व्याप्तानि सर्वतः सर्वावच्छेदे
न ॥ ९ ॥ अयं कालो वसंतः प्रचुरमन्मथः कामोद्दीपकः अतएव गंधवान् कामोद्दीपेन गर्ववान् ॥ गंधो गंधक आमोदे लेशे संबंधगर्वयोरिति सुर

नलिनैरपि संछन्ना ह्यत्यर्थशुभदर्शना । सर्पव्यालानुचरिता मृगद्विजसमाकुला ॥ ७ ॥ अधिकं प्रतिभात्येतन्नीलपी
तं तु शाद्वलं । द्रुमाणां विविधैः पुष्पैः परिस्तोमैरिवार्पितं ॥ ८ ॥ पुष्पभारसमृद्धानि शिखराणि समंततः । लताभि
र्पुष्पिताग्राभिरुपरुद्धानि सर्वतः ॥ ९ ॥ सुखानिलोयं सौमित्रे कालः प्रचुरमन्मथः । गंधवान्सुरभिर्मासो जातपुष्प
फलद्रुमः ॥ १० ॥ पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनां । सृजतां पुष्पवर्षाणि वर्षं तोयमुचामिव ॥ ११ ॥ प्रस्तरेषु
च रम्येषु विविधाः काननद्रुमाः । वायुवेगप्रचलिताः पुष्पैरवकिरंति गां ॥ १२ ॥ पतितैः पतमानैश्च पादपस्थैश्च मा
रुतः । कुसुमैः पश्य सौमित्रे क्रीडन्निव समंततः ॥ १३ ॥ विक्षिपन्विविधाः शाखा नगानां कुसुमोत्कटाः । मारुतश्चलि
तस्थानैः षट्पदैरनुगीयते ॥ १४ ॥

भिर्मासो मधुमासः जातानि पुष्पफलानि यत्र तादृशद्रुमः ॥ १० ॥ ११ ॥ प्रस्तरेषु समशिलातलेषु ॥
१२ ॥ १३ ॥ कुसुमोत्कटाः बहुकुसुमाः । कुसुमोत्कचा इति पाठे कुसुमैरुद्गतकचाः संजातकेशा इवेत्यर्थ इति कतकः तादृशीः शाखा विक्षिपन् चाल
यन्मारुतः चलितस्थानैः नतानुकुसुमस्थानतश्चलितैराहिताग्न्यादिरयं षट्पदैरनुगीयते पुष्पं हरन्मारुतोऽनुसृत्यगीयते इत्यर्थः ॥ १४ ॥ छि

मत्तेति। अत्रवायोर्गानकर्तृकर्तृत्वेनाचार्यसाधर्म्यमुच्यते मत्तकोकिलहृतैःसन्नादैर्मृदंगादिध्वनिभिः नर्तयन्निव नृत्यंशिक्षयन्निव। शैलकंदरनिष्क्रांतः तन्निष्क्रमकालेध्वनिमुत्तन्वान्प्रगीतवानिव॥१५॥ तेनमंदत्वादिगुणावताविक्षिपतावृक्षान्चालयताग्रथिताः कृतग्रथनाइव॥१६॥ गंधमभ्यवहन्वातीतिसंबंधः॥१७॥ अनुकूजद्भिःषट्पदैर्विनदंतीव॥१८॥ संसक्तशिखराःसंपन्नशेखराइवेत्यर्थइतिकतकः। गिरिप्रस्थेषूत्पन्नैरिमेशैलाः

मत्तकोकिलसन्नादैर्नर्तयन्निवपादपान्॥ शैलकंदरनिष्क्रांतः प्रगीतइवचानिलः॥१५॥ तेनविक्षिपतात्यर्थंपवनेनस
मंततः॥ अमीसंसक्तशाखाग्राग्रथिताइवपादपाः॥१६॥ सएवसुखसंस्पर्शोवातिचंदनशीतलः॥ गंधमभ्यवह
न्पुण्यंश्रमापनयनोनिलः॥१७॥ अमीपवनविक्षिप्ताविनदंतीवपादपाः॥ षट्पदैरनुकूजद्भिर्वनेषुमधुगंधिषु
॥१८॥ गिरिप्रस्थेषुरम्येषुपुष्पवद्भिर्मनोरमैः॥ संसक्तशिखराःशैलाविराजंतिमहाद्रुमैः॥१९॥ पुष्पसंछन्नशिखरामा
रुतोत्क्षेपचंचलाः॥ अमीमधुकरोत्तंसाःप्रगीताइवपादपाः॥२०॥ सुपुष्पितांस्तुपश्यैतान्कर्णिकारान्समंततः॥ हाटक
प्रतिसंछन्नान्नरान्पीतांबरानिव॥२१॥ अयंवसंतःसौमित्रेनानाविहगनादितः॥ सीतयाविप्रहीणस्यशोकसं
दीपनोमम॥२२॥ मांहिशोकसमाक्रांतंसंतापयतिमन्मथः॥ हृष्टंप्रवदमानश्चसमाह्वयतिकोकिलः॥२३॥

संबद्धाग्रभागाइत्यर्थइतितीर्थः॥१९॥ पुष्पैःसंछन्नाःशिखराःशाखाग्रभागाएषां। मारुतकृतोत्क्षेपेणोच्चालनेनचंचलाःमधुकररूपउत्तंसश्चूडायेषांते प्रगीताइवप्रारब्धनृत्तगीताइवेत्यर्थः॥२०॥ कर्णिकाराःपीतपुष्पाइत्यनेनज्ञायते॥२१॥२२॥ हृष्टंयथातथाप्रवदमानःकोकिलोमांसमाह्वयति स्पर्धयेवेत्यर्थः॥२३॥

दात्यूहकोजलकुक्कुटः हृष्टः कामावेशेनवननिर्झरेवनमध्यगेप्रस्रवणे॥२४॥ मामाहूयप्रदर्शनार्थमितिशेषः॥परममतिशयेन॥२५॥ पतगाः कर्त्तारः वृक्षादीन्कर्मणासंपतंतिपश्य॥२६॥ पुंभिर्विहगैर्विमिश्राः संवद्धाः आत्मव्यूहेषुस्वस्वजातिसमूहेषुअभिनंदिताः आप्तानंदाः भृंगराजप्रमुदिताः प्रमुदितभृंगराजाइवमधुरस्वनाः अस्याः कूलेसंतीतिशेषः यद्वाभृंगराजेसंबंधेनप्रमुदितामधुरस्वराभृंग्यश्चात्रसंतीतिशेषः

एषदात्यूहकोहृष्टोरम्येमांवननिर्झरे॥प्रणदन्मन्मथाविष्टःशोचयिष्यतिलक्ष्मण॥२४॥ श्रुत्वैतस्यपराशब्दमा
श्रमस्थाममप्रिया॥मामाहूयप्रमुदितापरमंप्रमनंदत॥२५॥ एवंविचित्राःपतगानानारावविराविणः॥
वृक्षगुल्मलताःपश्यसंपतंतिसमंततः॥२६॥ विमिश्राविहगाःपुंभिरात्मव्यूहाभिनंदिताः॥भृंगराजप्रमुदिताः
सौमित्रेमधुरस्वराः॥२७॥ अस्याःकूलेप्रमुदिताःसंघशःशकुनास्त्विह॥दात्यूहरतिविक्रंदैःपुंस्कोकिलरुतैर
पि॥२८॥ स्वनंतिपादपाश्चेममानंगप्रदीपकाः॥अशोकस्तवकांगारःषट्पदस्वननिस्वनः॥२९॥ मांहिपल्लव
ताम्रार्चिर्वसंतानग्निःप्रधक्ष्यति॥नहितांसूक्ष्मपक्ष्माक्षींसुकेशींमृदुभाषिणीं॥३०॥ अपश्यतोमेसौमित्रेजीविते
स्तिप्रयोजनं॥अयंहिरुचिरस्तस्याःकालोरुचिरकाननः॥३१॥

७॥ तथाअस्याइहकूलेशकुनाश्चप्रमुदिताःसंति॥दात्यूहानां रतिसंबंधिनोविक्रंदादात्यूहरतिविक्रंदास्तैः॥२८॥ अशोकस्तवकरूपाअंगारायस्य॥अग्नेःसशब्दत्वादाहषट्पदस्वनएवनिस्वनोयस्य पल्लवरूपाअर्चिषोयस्य॥२९॥ ३०॥ अयंहीति॥अयंकालोवसंतकालस्तस्याममदयितायारुचिरइष्टः कोकिलैराकुलः सीमांवनसीमांतोमध्यप्रदेशोयेनसः॥३१॥

मन्मथायासेन कामपीडासंभूतो जनितो वसंतगुणो मंदानिलपुष्पितकाननत्वादिरूपैर्वर्धितः प्रज्वलितः ॥ ३२ ॥ नचिरादिव ॥ इदानीमेव अचिरादिवेतिपाठांतरं ॥ ३३ ॥ आत्मप्रभवः कामः भूयस्त्वं वैपुल्यं ॥ ३४ ॥ स्वेदसंसर्गः कामविकारजः तेन दूषयति मलिनीकरोतीति तादृशः यद्वा तं दूषयति नाशयतीति मलयानिलसंबंधात्तादृशः चिंताशोकाभ्यां बलात्कृतं बलात्कृत पीडं चैत्रसंबंधी वनानिलः ॥ ३५ ॥ शिखिनीभिर्मयूरीभिः मदमूर्छिताः मत्ताः ॥ ३७ ॥ अभिप

कोकिलाकुलसीमांतो दयिताया ममानघ ॥ मन्मथायाससंभूतो वसंतगुणवर्द्धितः ॥ ३२ ॥ अयं मां धक्ष्यति क्षिप्रं शोकाग्निर्नचिरादिव ॥ अपश्यतस्तां वनितां पश्यतो रुचिरद्रुमान् ॥ ३३ ॥ ममायमात्मप्रभवो भूयस्त्वमुपयास्यति ॥ अदृश्यमाना वैदेही शोकं वर्धयतीह मे ॥ ३४ ॥ दृश्यमानो वसंतश्च स्वेदसंसर्गदूषकः ॥ मां हि सा मृगशावाक्षी चिंताशोकबलात्कृतं ॥ ३५ ॥ संतापयति सौमित्रे क्रूरश्चैत्रवनानिलः ॥ अमी मयूराः शोभंते प्रनृत्यंतस्ततस्ततः ॥ ३६ ॥ स्वैः पक्षैः पवनोद्धूतैर्गवाक्षैः स्फाटिकैरिव ॥ शिखिनीभिः परिहृतास्त एते मदमूर्छिताः ॥ ३७ ॥ मन्मथाभिपरीतस्य मम मन्मथवर्धनाः ॥ पश्य लक्ष्मण नृत्यंतं मयूरमुपनृत्यति ॥ ३८ ॥ शिखिनी मन्मथार्तैषा भर्तारं गिरिसानुनि ॥ तामेव मनसा रामां मयूरोप्यनुधावति ॥ ३९ ॥ वितत्य रुचिरौ पक्षौ रुतैरुपहसन्निव ॥ मयूरस्य वने नूनं रक्षसा न हृता प्रिया ॥ ४० ॥ ६ ॥

रीतस्य व्याप्तस्य ॥ ३८ ॥ अनुधावति नृत्यप्रसंगेनाग्रे गतां ॥ वितत्य विस्तार्य ॥ ३९ ॥ रुतै रुपहसन्निव मामिति शेषः ॥ ४० ॥ श्रीकृष्णार्पणमस्तुः
श्रीरामाय रामचन्द्राय श्रीकृष्णाय वासुदेवाय श्रीगोविन्दाय श्रीराधामाधवजी सरन श्रीरामनाम रामनाम रामनाम राम राम राम राम राम

80

[illegible]नस्तानस्मात्त्वमीत्यर्थः। विनासीतांविनायंममपुष्पमासेचैत्रेवासःसुदुःसहः अतिपीडाजनकत्वात्॥४१॥ नन्वेतावानुरागस्तवानुचितस्तत्राह। पद्मे
ने संसक्तोऽनिशायितो रागः॥४२॥४३॥ वन्यानिपुष्पाणिमेसीतावियोगात्भोगसाधनत्वाभावान्निष्फलानिभवंति॥४४॥ उक्तस्यैवविवरणंपुष्पाणी
[illegible]दि अतिश्रियात्रुचिराणीत्यन्वयः मधुकरोत्करैर्मधुकरसमूहैः॥४५॥ आह्वयंतइवनयंतीत्यन्वयः॥४६॥ यदिसीतावासदेशेपिवसंतोस्तितदा

तस्मात्त्वयातिरम्येषुवनेषुसहकांतया॥ ममत्वयंविनावासःपुष्पमासेसुदुःसहः॥४१॥ पश्यलक्ष्मणसंरागःतिर्य
ग्योनिगतेष्वपि॥ अधुनाशिखिनीकामाद्भर्त्तारमभिवर्त्तते॥४२॥ ममाप्येवंविशालाक्षीजानकीजातसंभ्रमा। म
दनेनाभिवर्त्तेतयदिनापहृताभवेत्॥४३॥ पश्यलक्ष्मणपुष्पाणिनिष्फलानिभवंतिमे॥ पुष्पभारसमृद्धानांव
नानांशिशिरात्यये॥४४॥ रुचिराण्यपिपुष्पाणिपादपानामतिश्रिया॥ निष्फलानिमहींयांतिसमंमधुकरो
त्करैः॥४५॥ नदंतिकामंशकुनामुदिताःसंघशःकलं॥ आह्वयंतइवान्योन्यंकामोन्मादकराणिमम॥४६॥ वसंतो
यदितत्रापियत्रमेवसतिप्रिया॥ नूनंपरवशासीतासापिशोचत्यहंयथा॥४७॥ नूनंनतुवसंतस्तंदेशं
स्पृशतियत्रसा॥ कथंह्यसितपद्माक्षीवर्त्तयेत्सामयाविना॥४८॥ श्रीरामायरामचंद्रायनमः॥ ❀ ॥

मद्देवसापिशोचति॥ सामस्याःसमत्वात्॥४७॥ यद्यपितत्रवसंतोनभवेत्॥ कदाचित्तथापिमयाविनासाकथंवर्त्तयेत्जीवेत्॥ मद्विर
हग्वनत्राशेपर्यायश्चइतिभावः॥४८॥ श्रीरामायरामचन्द्रायश्रीकृष्णायवासुदेवायनमः॥ ❀ ॥राधामाधवजीसहाय॥ ❀ ॥

अथवावर्त्तनेनत्रवसंतस्तथापिपरैः शत्रुभिः पीडिता यतः साऽतस्तस्या वसंतः किंकरिष्यति ॥ परकृतपीडासत्त्वेकामपीडानवकाशादितिभावः इति प्रांचः परेत्वत्रवसंतो नास्त्येव तत्सत्त्वे मया विना सा कथं तत्र तिष्ठेत् ॥ आगतैवस्यादित्यर्थः ॥ तदेवस्त्वयन्नाहाथवेति ॥ परनिर्भर्त्सनवशान्नायातीत्याशय इत्याहुः ॥ ४९ ॥ सर्वथा तस्याः कामपीडया नाश एव प्राप्त इत्याह ॥ श्यामेति ॥ ५० ॥ तदेवविवृणोति ॥ दृढमिति ॥ साध्वी सीता मद्विरहं

अथवा वर्त्तते तत्र वसंतो यत्र मे प्रिया ॥ किंकरिष्यति सुश्रोणी सा तु निर्भर्त्सिता परैः ॥ ४९ ॥ श्यामा पद्मपलाशाक्षी मृदुभाषा च मे प्रिया ॥ नूनं वसंतमासाद्य परित्यक्ष्यति जीवितं ॥ ५० ॥ दृढं हि हृदये बुद्धिर्मम संपरिवर्त्तते ॥ नालं वर्त्तयितुं सीता साध्वी मद्विरहं गता ॥ ५१ ॥ मयि भावो हि वैदेह्यास्तत्त्वतो विनिवेशितः ॥ ममापि भावः सीतायां सर्वथा विनिवेशितः ॥ ५२ ॥ एष पुष्पवहो वायुः सुखस्पर्शो हिमावहः ॥ तां विचिंतयतः कांतां पावकप्रतिमो मम ॥ ५३ ॥ सदा सुखमहं मन्ये यं पुरा सह सीतया ॥ मारुतः स विना सीतां शोकसंजननो मम ॥ ५४ ॥

गतातंप्राप्ता वसंतसत्वेऽसत्वे वा सर्वथा वर्त्तयितुं जीवितुं नालं न समर्था ॥ ५१ ॥ एवं निश्चयकारणं परस्परानुरागसाम्यं दर्शयति मयि भाव इति ॥ ५२ ॥ हिमवहोपि· पावकप्रतिमोऽसह्य इति विरोधाभासः ॥ ५३ ॥ यं वायुं सीतया सहास्थितिकाले सदा सुखं मन्ये इत्यन्वयः ॥ ५४ ॥ ६ ॥

तदासीनसंयोगकाले सो वायसः पक्षी विहंगः आकाशगः सन् प्रणादितस्तेन त्वन्नद्वियोगं सूचितं वानित्याशय॥ अथ मां विना तद्वियोगावस्थायां पादपगतः प्रहृष्टमभिकूजतितेन तत्संयोगं सूचयतीत्याशयः। तदेव विहरणोति विहगः सन् प्रतिहारकोपहारक इत्यर्थः तु इदानीं तु स पक्षी तस्याः समीपं मां नेष्यतीत्यर्थः॥ कतकस्तु पक्षी प्रणादितस्तथेति विहगः प्रीतिकारक इति च प्राचीनः पाठः असौ पक्षी तथा ति सुखं यथा भवति तथा विहगः सन् आकाशगः प्रणादितः नादं कृतवान्॥ अस्य पूर्वमिति शेषः॥ तत्संयोगकाले इत्यर्थः॥ अथेदानीं तां विना तद्वियोगकाले त्यथेति शेषः दुःखनाद इत्यर्थः अथ कंचि

तां विनाथ विहंगोसौ पक्षी प्रणादितस्तदा॥ वायसः पादपगतः प्रहृष्टमभिकूजति॥ ५५॥ एष वै तत्र वैदेह्या विहगः प्रीतिकारकः पक्षी मां तु विशालाक्ष्याः समीपमुपनेष्यति॥ ५६॥ पश्य लक्ष्मण सन्नादं वने मदविवर्द्धनं॥ पुष्पिताग्रेषु वृक्षेषु द्विजानामवकूजताम्॥ ५७॥ विक्षिप्तां पवनेनैतामसौ तिलकमंजरीं॥ षट्पदः सहसाभ्येति मदाधूतामिव प्रियां॥ ५८॥ कामिनामयमत्यन्तमशोकः शोकवर्धनः॥ स्तवकैः पवनोत्क्षिप्तैस्तर्ज्जयन्निव मां स्थितः॥ ५९॥ अमी लक्ष्मण दृश्यन्ते चूताः कुसुमशालिनः॥ विभ्रमोत्सिक्तमनसः सांगरागा नरा इव॥ ६०॥

तिलकं वृक्षमेदः३

(कूजनमाह॥ पादपगतो वायसः प्रहृष्टं यथाभिकूजति एष विहगस्तं नादविशिष्टो विहगो वायसो यत्र सीतास्ति तत्र तस्याः प्रीतिकारकः अतिपीडाभावसूचकः मां तु मां च तस्याः समीपं तत्समीपगमनद्वारमुपनेष्यति॥ उपस्थापयिष्यतीत्यर्थ इत्याह॥ ५५॥ ५६॥ पुनः कामपीडानाटयति॥ पश्येति शृणुवित्यर्थः॥ अवकूजतां शब्दं कुर्वतां॥ ५७॥ मदाधूतां मदेन सवलंतीं॥ ५८॥ विभ्रमोत्सिक्तमनसः शृंगारोद्रिक्तचित्ताः॥ ६०॥ श्रीरामाय रामचन्द्राय नमः॥ ६॥ ६॥

पद्मैर्नीलोत्पलैश्चआसमंताद्युता २

विचरंतिकिन्नरीभिः सहेतिशेषः सन्तापिकासहितनायकांतरदर्शनमुद्दीपनं ॥ ६१ ॥ नलिनान्यत्ररक्तकमलानि ॥ ६२ ॥ नीलोत्पलैरासमंताद्युता ॥
६३ ॥ जलेषट्पदाहतकेसरैः जलेभ्रमरपातितपुष्पधूलिभिरभिसंवृता व्याप्ता शोभते ॥ ६४ ॥ चित्रप्रस्थानि चित्रप्रदेशानि वनांतराणि यः
स्याः सा ॥ ६५ ॥ पवनाहतवेगाभिः पवनाघातजनितवेगाभिः अंभसि पंकजानि विराजंते इत्यन्वयः ॥ ६६ ॥ अपश्यतो मे आत्मनि शोषः यद्याक

सौमित्रे पश्य पंपायाश्चित्रासु वनराजिषु ॥ किन्नरा नरशार्दूल विचरंति यतस्ततः ॥ ६१ ॥ इमानि शुभगंधीनि पश्य लक्ष्मण
सर्वशः नलिनानि प्रकाशंते जले तरुणसूर्यवत् ॥ ६२ ॥ एषा प्रसन्नसलिला पद्मनीलोत्पलायुता ॥ हंसकारंडवाकी
र्णा पंपा सौगंधिकायुता ॥ ६३ ॥ जले तरुणसूर्याभैः षट्पदाहतकेसरैः ॥ पंकजैः शोभते पंपा समंतादभिसंवृता ॥
६४ ॥ चक्रवाकयुता नित्यं चित्रप्रस्थवनांतरा ॥ मातंगमृगयूथैश्च शोभते सलिलार्थिभिः ॥ ६५ ॥ पवनाहतवेगाभिरू
र्मिभिर्विमलेंभसि ॥ पंकजानि विराजंते ताड्यमानानि लक्ष्मण ॥ ६६ ॥ पद्मपत्रविशालाक्षीं सततं प्रियपंकजां ॥ अप
श्यतो मे वैदेहीं जीवितं नाभिरोचते ॥ ६७ ॥ अहो कामस्य वामत्वं यो गतामपि दुर्लभां ॥ स्मारयिष्यति कल्याणीं कल्याण
तरवादिनीं ॥ ६८ ॥ शक्यो धारयितुं कामो भवेदभ्यागतो मया ॥ यदि भूयो वसंतो मां न हन्यात्पुष्पितद्रुमः ॥ ६९ ॥

सौगंधिकन्तु कल्हार
सितकरः २

र्तुः शेषत्वविवक्षायां मे इति षष्ठी ॥ ६७ ॥ वामत्वं कौटिल्यं गतां वियुक्तां दुर्लभां अप्राप्यां स्मारयिष्यति ॥ स्मारयतीत्यर्थः चित्तवैकल्य
वोक्ष [illegible]गस्तथाप्रयोगो विरहपरिपोषाय ॥ ६८ ॥ कामः कामकृततापः भूयोधिकं ॥ ६९ ॥ श्रीरामाय रामचन्द्राय नमः ॥ छ ॥

रमणीयानि भवंति स्म ॥ ७० ॥ पद्मकोशस्य पलाशानि दलानि कामोद्दीपकान्यपि तन्नेत्रपुटाभ्यां सदृशानीति द्रष्टुं दृष्टिर्मन्यते इत्यर्थः ॥ ७१ ॥ पद्मकेसरेष्वा
हिनाशैन्यसौरम्ये वृक्षांतरेष्वादिनामांघं ॥ ७२ ॥ ७३ ॥ ७४ ॥ किंशुकैः प्रदीप्ता इवेत्यन्वयः ॥ ७५ ॥ पंपातीररुहास्तत्तीरवृक्षाः संसिक्तास्तज्जलसेकेनव

यानि स्म रमणीयानि तया सह भवंति मे ॥ नान्यथा रमणीयानि जायंते मे तया विना ॥ ७० ॥ पद्मकोशपलाशानि
द्रष्टुं दृष्टिर्हि मन्यते ॥ सीताया नेत्रकोशाभ्यां सदृशानीति लक्ष्मण ॥ ७१ ॥ पद्मकेसरसंसृष्टो वृक्षांतरविनिःसृत
नः ॥ निश्वास इव सीताया वाति वायुर्मनोहरः ॥ ७२ ॥ सौमित्रे पश्य पंपाया दक्षिणे गिरिसानुनि ॥ पुष्पितां क
र्णिकारस्य यष्टिं परमशोभितां ॥ ७३ ॥ आधिकं शैलराजोयं धातुभिस्तु विभूषितः ॥ विचित्रं सृजते रेणुं वायुवेग
विघट्टितं ॥ ७४ ॥ गिरिप्रस्थास्तु सौमित्रे सर्वतः संप्रपुष्पितैः ॥ निष्पत्रैः सर्वतो रम्यैः प्रदीप्ता इव किंशुकैः ॥ ७५ ॥
पंपातीररुहाश्चेमे संसिक्ता मधुगंधिनः ॥ मालती मल्लिका पद्मकरवीराश्च पुष्पिताः ॥ ७६ ॥ केतक्यः सिंदुवारा
श्च वासंत्यश्च सुपुष्पिताः ॥ मातुलुंगाश्च पूर्णाश्च कुंदगुल्माश्च सर्वशः ॥ ७७ ॥ चिरिविल्वा मधूकाश्च वंजुला व
कुलास्तथा ॥ चंपकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ ७८ ॥ पद्मकाश्चैव शोभंते नीलाशोकाश्च पुष्पिताः ॥
लोध्राश्च गिरिपृष्ठेषु सिंहकेसरपिंजराः ॥ ७९ ॥ अंकोलाश्च कुरंटाश्च चूर्णकाः पारिभद्रकाः ॥ चूताः पाटलयश्चा
पि कोविदाराश्च पुष्पिताः ॥ ८० ॥

र्धिनाः मालतीजातिः ॥ ७६ ॥ वासंती हेमपुष्पिका ॥ ७७ ॥ चिरिविल्वो नक्तमालः ॥ ७८ ॥ पद्मकाः गंधवृक्षविशेषाः सिंहकेसराः पिंजरा येस्ते ॥ ७९ ॥ चूर्णकाः शाल्मली
विशेषाः पारिभद्रको मंदारः ॥ ८० ॥

पिंजरो पितेरतिमो दीतिः

मुचुकुंदस्तुचाविंदा इति पाठांतरं ॥ ७१ ॥ ७२ ॥ पुष्पिताः संतीति शेषः ॥ ७३ ॥ तान्यशेषमाह ॥ पुष्पितानिति समासोक्त्यलंकारः ॥ ७४ ॥ तामेवोपमासुखेनोपपादयति ॥ वातेति ॥ ७५ ॥ नैकरसास्वादेन जातहर्ष इव ॥ ७६ ॥ मधुलिप्सया पुष्पात्पुष्पांतरं गच्छन् उत्प्रेक्ष्यते ॥ इदं मृष्ट इति मृष्टं मधुरं ॥ ७७ ॥

मुचुकुंदार्जुनाश्चैव दृश्यंते गिरिसानुषु ॥ केतकोद्दालकाश्चैव शिरीषाः शिंशपा धवाः ॥ ७१ ॥ शाल्मल्यः किंशुकाश्चैव रक्ताः कुरवकास्तथा ॥ तिनिशा नक्तमालाश्च चंदनाः स्यंदनास्तथा ॥ ७२ ॥ हिंतालास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः ॥ पुष्पितान्पुष्पिताग्राभिर्लताभिः परिवेष्टितान् ॥ ७३ ॥ द्रुमान्पश्येह सौमित्रे पंपाया रुचिरान्बहून् ॥ वातविक्षिप्तविटपान्यथासन्नान्द्रुमानिमान् ॥ ७४ ॥ लताः समनुवर्त्तंते मत्ता इव वरस्त्रियः ॥ पादपात्पादपं गच्छंशैलाच्छैलं वनाद्वनं ॥ ७५ ॥ वाति नैकरसास्वादसम्मोदित इवानिलः ॥ केचित्पर्याप्तकुसुमाः पादपा मधुगंधिनः ॥ ७६ ॥ केचिन्मुकुलसंवीताः श्यामवर्णा इवाबभुः ॥ इदं मृष्टमिदं स्वादु प्रफुल्लमिदमित्यपि ॥ ७७ ॥ रागरक्तो मधुकरः कुसुमेष्वेव लीयते ॥ निलीय पुनरुत्पत्य सहसान्यत्र गच्छति ॥ ७८ ॥ मधुलुब्धो मधुकरः पंपातीरद्रुमेष्वसौ ॥ ७८ ॥ इयं कुसुमसंघातैरुपस्तीर्णा सुखाकृता ॥ स्वयं निपतितैर्भूमिः शयनप्रस्तरैरिव ॥ ७९ ॥

॥ ७८ ॥ स्वयं निपतितैः कुसुमसमूहैरुपस्तीर्णेयं भूमिः ॥ शयनप्रस्तरैः ॥ शयनार्थतल्पप्रस्तरणैरिव सुखाकृता सुखकरी सुखप्रियादानुलोम्य इति डाच् ॥ ७९ ॥ श्रीरामाय रामचंद्राय नमः ॥ श्रीकृष्णाय वासुदेवाय नमः ॥ छ ॥

विविधैस्तैः पुष्पैर्नगसानुषु विस्तीर्णाः पीनरक्ताभाः अनेकविविधाः प्रस्तराः शय्या कृता इत्युत्प्रेक्षा ॥९०॥ हिमान्ते शिशिरान्ते पुष्पमासे चैत्रे संघर्षस्पर्धी
॥९१॥ नगा वृक्षाः विटपाः शाखाः कुसुमयुक्तशाखावन्त इत्यर्थः ॥९२॥ उद्दीपयन्निव मम मे निशेषः ॥९३॥ मंदाकिन्यास्तत्सदृशाः पंपायाः अ

विविधाविविधैः पुष्पैस्तैरेव नगसानुषु ॥ विस्तीर्णाः पीनरक्ताभाः सौमित्रे प्रस्तराः कृताः ॥९०॥ हिमान्ते पश्य सौमित्रे वृ
क्षाणां पुष्पसंभवं ॥ पुष्पमासे हि तरवः संघर्षादिव पुष्पिताः ॥९१ ॥ आह्वयंत इवान्योन्यं नगाः षट्पदनादिताः ॥
कुसुमोत्तंसविटपाः शोभंते बहुलक्ष्मण ॥ ९२ ॥ एष कारंडवः पक्षी विगाह्य सलिलं शुभं ॥ रमते कांतया सार्धं का
ममुद्दीपयन्निव ॥ ९३ ॥ मंदाकिन्यास्तु यदिदं रूपमेतन्मनोहरं ॥ स्थाने जगति विख्याता गुणास्तस्या मनोरमाः ॥
९४ ॥ यदि दृश्येत सा साध्वी यदि चेह वसेमहि ॥ स्पृहयेयं न शक्राय नायोध्यायै रघूत्तम ॥ ९५ ॥ न ह्येवं रमणीये
षु शाद्वलेषु तया सह ॥ रमतो मे भवेच्चिंता न स्पृहान्येषु वा भवेत् ॥ ९६ ॥ अमी हि विविधैः पुष्पैस्तरवो विविध
च्छदाः ॥ कानने ऽस्मिन्विना कांतां चिंतामुत्पादयंति मे ॥ ९७ ॥ पश्य शीतजलां चेमां सौमित्रे पुष्करायुतां ॥ चक्रवा
कानुचरितां कारंडवनिषेवितां ॥ ९८ ॥ दीपयंतीव मे कामं विविधा मुदिता द्विजाः । श्यामां चंद्रमुखीं स्मृत्वा प्रियां पद्म
निभेक्षणां ॥ पश्य सानुषु चित्रेषु मृगीभिः सहितान्मृगान् ॥ १०० ॥ ((निशयोक्तिरव्ययन इदं मनोरमं चातिगनितस्या गुणा विख्याता एतत्स्था
नेषूक्तमित्यर्थः ॥ ९४ ॥ वसेमहि तया सहेति शेषः शक्राय शक्रपदप्राप्तये ॥ ९५ ॥ उक्तमेवानुरागातिशयेन पुनराह न हीति अन्येषु सुखवांतरेषु ॥ ९६ ॥ ९७

अन्येषु ब्रह्मलोकादिषु ८

इमां पंपां पुष्करैरासमंतायुक्तां ॥ ९८ ॥ ॥ ९९ ॥ स्मृत्वा स्मारयि
त्वा दीपयंतीवेत्यन्वयः ॥ १०० ॥

॥रा॰वा॰कि॰॥
॥७॥

विरहीकृतं विरहितं कृतं पश्येत्यनुकर्षः संचरंतः मृगीभिः सहिता मृगा इति शेषः ॥१०१॥ १०२॥ स्वस्ति भवेदित्यस्यैव विवरणं जीवेयमिति ॥ यदि सा मया
सहैवं भूतं पद्मानां सौगंधिकानां च गंधवहं पवनं सेवेत तदा जीवेयमित्यन्वयः ॥३॥ पंपावनवायुं ये भायिकया सह सेवंते ते धन्या इत्यर्थः ॥४॥
विवशा शत्रुवशा वा ॥५॥ दृष्टा सीता क्वेति येन तं किन्तु कुशलं वक्ष्यामि ॥६॥ मंदं मंदभाग्यं ॥७॥ धारये प्राणानिति शेषः ॥८॥ अंचिते पू

मां पुनर्मृगशावाक्ष्या वैदेह्या विरहीकृतं ॥ व्यथयंतीव मे चित्तं संचरंतस्ततस्ततः ॥१०१॥ अस्मिन्सानुनि रम्ये हि म
त्तद्विजगणाकुले ॥ पश्येयं यदि तां कांतां ततः स्वस्ति भवेन्मम ॥१०२॥ जीवेयं खलु सौमित्रे मया सह सुमध्यमा से
वेत यदि वैदेही पंपायाः पवनं शुभं ॥१०३॥ पद्मसौगंधिकवहं शिवं शोकविनाशनं ॥ धन्या लक्ष्मण सेवंते पंपा
यावनमारुतं ॥१०४॥ श्यामा पद्मपलाशाक्षी प्रिया विरहिता मया ॥ कथं धारयति प्राणान्विवशा जनकात्मजा ॥
॥१०५॥ किन्नु वक्ष्यामि धर्मज्ञं राजानं सत्यवादिनं ॥ जनकं पृष्टसीतं तं कुशलं जनसंसदि ॥१०६॥ मां यामनुगतामं
दं पित्रा प्रस्थापितं वनं ॥ सीता धर्मं समास्थाय क्व नु सा वर्त्तते प्रिया ॥१०७॥ तया विहीनः कृपणः कथं लक्ष्मण
धारये ॥ या मामनुगता राज्याद्भ्रष्टं विहतचेतसं ॥१०८॥ तच्चार्वंचितपक्ष्माक्षं सुगंधि शुभमव्रणं ॥ अपश्यतो मुखं
तस्याः सीदतीव मतिर्मम ॥१०९॥ स्मितहास्यांतरयुतं गुणवन्मधुरं हितं ॥ वैदेह्या वाक्यमतुलं कदा श्रोष्यामि लक्ष्मण ॥११०॥

जिते पक्ष्मनुल्ये ऽक्षिणी यच्च माहृशं ॥९॥ स्मितेन ईषद्धासेन हास्येन विनोदवचनेनांतरे मध्ये स्वयुतं तत्तो पृष्टदेशाद्गृहरिति पतिव्रतालक्षणास्व

चनं इदं पूर्ववर्णितस्वरूपत्वान्वयि कश्चिन्नु प्रसन्नहास्यविशेषेण युत
मिति वाक्यविशेषणमाह गुणवत्प्रसादवत् मधुरं अपरुषाक्षरं ॥११०॥

॥राम॰॥
॥७॥

84

सीतयापृष्टः ४

सीतयासहितस्यतवकुशलमितिपृष्टः १

वने दुःखं प्राप्यापि नष्टदुःखेव ॥ ११ ॥ क्व सा स्नुषा कथं किंप्रकारेति पृच्छन्तीं किं नु वक्ष्यामि यथाज्ञातं वक्ष्यामि वा । अन्यथा वोभयमपि वक्तुं न शक्नुम इत्यर्थः ॥
१२ ॥ १३ ॥ अव्ययमनपायार्थं ॥ १४ ॥ संस्तंभ शोकं निरुंधीत्यर्थः ॥ अकलुषात्मनामपीदृशानां शोकमनसां मतिर्मन्दा नेति न अपि तु मन्दैव ॥ १५ ॥ अ

प्राप्य दुःखं वने श्यामा मां मन्मथविकर्षिणं । नष्टदुःखेव हृष्टेव साध्वी साध्वभ्यभाषत ॥ १११ ॥ किन्नु वक्ष्याम्ययोध्यायां कौ-
सल्यां हि नृपात्मज ॥ क्व सा स्नुषेति पृच्छन्तीं कथं वाति मनस्विनीं ॥ ११२ ॥ गच्छ लक्ष्मण पश्य त्वं भरतं भ्रातृवत्सलं ॥ न ह्य-
हं जीवितुं शक्तस्तामृते जनकात्मजां ॥ ११३ ॥ इति रामं महात्मानं विलपन्तमनाथवत् ॥ उवाच लक्ष्मणो भ्राता वचनं यु-
क्तमव्ययं ॥ ११४ ॥ संस्तंभ राम भद्रं ते मा शुचः पुरुषोत्तम ॥ नेदृशानां मतिर्मन्दा भवत्यकलुषात्मनां ॥ ११५ ॥ स्मृत्वा वि-
योगजं दुःखं त्यज स्नेहं प्रिये जने ॥ अतिस्नेहपरिष्वंगाद्वर्त्तिरार्द्रापि दह्यते ॥ ११६ ॥ यदि गच्छति पातालं ततोऽभ्यधिक-
मेव वा ॥ सर्वथा रावणस्तात न भविष्यति राघव ॥ ११७ ॥ प्रवृत्तिर्लभ्यतां तावत्तस्य पापस्य रक्षसः ॥ ततो हास्यति वा
सीतां निधनं वा गमिष्यति ॥ ११८ ॥ यदि याति दितेर्गर्भं रावणः सह सीतया ॥ तत्राप्येनं हनिष्यामि न चेद्दास्यति मैथि-
लीं ॥ ११९ ॥

((तः स्मृत्वेत्यादि संयोगा विप्रयोगान्ता इति न्यायेन प्रियविषयेऽवश्यंभावि वियोगदुःखं स्मृत्वा स्नेहं त्यज ॥ विपक्षे बाधकमाह ॥
अतिस्नेहेति आर्द्रा जलसिक्तापि एवं शान्तमपि चित्तं अतिस्नेहसंबंधेन वियोगजशोकदीपेन दीप्यते एवेति भावः ॥ १६ ॥ ततोऽभ्यधिकं पाताला-
दभ्यधिकं तु प्रदेशं न भविष्यति न जीविष्यतीत्यर्थः ॥ १७ ॥ तावत्तत्र अथ संप्रवृत्तिः वासस्थानं ॥ १८ ॥ दितेरसुरमातुः ॥ १९ ॥ ६ ॥:

स्वास्थ्यंधैर्यंस्वस्वभावरूपंनष्टः कार्यावश्यंसेव्योर्थोएषांतैः पुंभिः सोर्थोऽयत्ने यत्नाभावे सति नाधिगम्यते न प्राप्यते ॥२०॥ अतउत्साह इति बलवान्
कार्यसाधनसमर्थः ॥२१॥ उत्साहमात्रं शत्रुसंहारे पौरुषं ॥२२॥ कामवृत्तत्वं कामपरतंत्रत्वं शोकं पृष्ठतः संन्यस्य कामजशोकसेवने काम
स्यहृद्येतस्यसेवनं पृष्ठतः कृत्वेत्यर्थः महात्मानं रजस्तमोमलास्पृष्टचित्तं निरतिशयशौर्यधैर्यादिस्वभावचित्रं च कृतात्मानं श्रुतिस्मृत्यादिषु

स्वास्थ्यं भद्र भज स्वार्य त्यज्यतां कृपणा मतिः ॥ अर्थो हि नष्टकार्यार्थैरयत्नेनाधिगम्यते ॥ १२० ॥ उत्साहो बलवानार्य ना
स्त्युत्साहात्परं बलं ॥ सोत्साहस्य हि लोकेषु न किंचिदपि दुर्लभं ॥ १२१ ॥ उत्साहवंतः पुरुषा नावसीदंति कर्मसु ॥ उत्साह
मात्रमाश्रित्य प्रतिलप्स्याम जानकीं ॥ १२२ ॥ त्यज्यतां कामवृत्तत्वं शोकं संन्यस्य पृष्ठतः ॥ महात्मानं कृतात्मानमात्मा
नं नावबुध्यसे ॥ १२३ ॥ एवं संबोधितस्तेन शोकोपहतचेतनः ॥ त्यज्य शोकं च मोहं च रामो धैर्यमुपागमत् ॥ १२४ ॥
सोभ्यतिक्रामदव्यग्रस्तामचिंत्यपराक्रमः ॥ रामः पंपां सुरुचिरां रम्यां पारिप्लवद्रुमां ॥ २५ ॥ निरीक्षमाणः सहसाम
हात्मा सर्वं वनं निर्झरकंदरं च ॥ उद्विग्नचेताः सहलक्ष्मणेन विचार्य दुःखोपहतः प्रतस्थे ॥ १२६ ॥ ६ ॥ ॥

पुरुभिः शिक्षितस्वरूपं किं नावबुध्यसे यद्यपीश्वरस्य लोकवद्धर्माधर्मोभयं चित्तं नास्ति तथापि मायिकं तदनाश्रयं तदस्ति तत्स्वीकारे बाध
काभावात् ॥ २३ ॥ एवंस्निग्धवचनमात्रेणशुद्धसत्वप्रकाशितत्वात् आरोपितशोकादिसंत्यज्य धैर्यमुपागमत् ॥ मोहकामजो मोहजश्च
शोकः ॥ २४ ॥ अतिक्रामत् अत्यक्रामत् पारिप्लवावायुचंचलास्तीरद्रुमा यस्यां तां ॥ २५ ॥ विचार्य लक्ष्मणेन कर्त्तव्यमिति शेषः ॥ १२६ ॥

धर्मेणसत्त्वंरामेत्यादीनीनिरूपधर्मबोधनेनवलेनगच्छतिपातालमित्यादिस्ववलकथनेनच॥ २७॥ एवंवृत्तमनूद्यवर्ण्णिष्यमाणंदर्शयतितावि
ति। वितत्रसेवितत्रास। वाल्यानीतत्वशंकयात्रासः इष्टमिष्टभोजनादिविषयचेष्टामपिनैवविचेष्टचनचकारचविश्रांतिमत्रस्यवभूव:
चित्तमित्याधुनिकपाठेतस्यसुग्रीवस्यचित्तंतद्दर्शनेनविभ्रांतिमज्ञयवभूवेत्यर्थः॥ २८॥ उक्तमेवविवृणोतिसतावितिभयभारभग्न:

तंमत्तमातंगविलासगामीगच्छंतमव्यग्रमनामहात्मा॥ सलक्ष्मणोराघवमिष्टचेष्टोररक्षधर्मेणवलेनचैव॥ १२७॥
तावृष्यमूकस्यसमीपचारीचरन्ददर्शाद्भुतदर्शनीयौ॥ शाखामृगाणामधिपस्तरस्वीवितत्रसेनैवविचेष्ट
चेष्टं॥ १२८॥ सतौमहात्मागजमंदगामीशाखामृगस्तत्रचरन्चरंतौ॥ दृष्ट्वाविषादंपरमंजगामचिंतापरीतो
भयभारभग्नः॥ १२९॥ तमाश्रमंपुण्यसुखंशरण्यंसदैवशाखामृगसेवितांतं॥ त्रस्ताश्चदृष्ट्वाहरयोविजग्मु
र्महौजसौराघवलक्ष्मणौतौ॥ १३०॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेप्रथमःसर्गः॥ १॥ तौतुदृष्ट्वाम
हात्मानौभ्रातरौरामलक्ष्मणौ॥ वरायुधधरौवीरौसुग्रीवःशंकितोभवत्॥ १॥ उद्विग्नहृदयःसर्वादिशःसमव
लोकयन्॥ नव्यतिष्ठतकस्मिंश्चिद्देशेवानरपुंगवः॥ २॥

भयभारेणभग्नोत्साहः॥ २९॥ तमाश्रममतंगशापात्वालिनादुष्प्रवे
शं। अतएवशरण्यंसेवितांतंसेवितमध्यंसेवितप्रांतंवा। तौदृष्ट्वात्रस्ताहरयःवालिप्रेरितत्वबुध्याभीताःविजग्मुःगताः॥ १३०॥ इतिरामा
भिरामेश्रीरामायणतिलकेवा० किष्किंधाकांडेप्रथमःसर्गः॥ १॥ तदेवविस्तारयतितौत्विति॥ १॥ नव्यतिष्ठतनव्यवस्थितोभूत्॥ २

॥रा·वा·कि·॥
॥९॥

व्यवसादविषण्णमभूत॥ ३॥ अवस्थितिप्रस्थानयोर्गुरुलाघवं विमृश्य सचिवैः सह विचार्य॥ ४॥ ततः विचारानंतरं प्रस्थाने कृत्या सचिवेभ्यः शशंस भयहेतुमिति शेषः॥ ५॥ तमेवाह॥ एताविति॥ छद्मना विश्वासार्थं अपि वेपरोण्यर्थः ध्रुवमित्युत्प्रेक्षायां॥ अतो ज्ञात्वा प्रस्थातव्यमित्याशयः॥ ६॥ ततः सुग्रीवो ऽनंतरं सुग्रीवसचिवालोपरमधन्विनौ॥ अतएव शंकास्पदौ दृष्ट्वा तस्मात् पूर्वमधिष्ठितान्गिरि

नैव चक्रे मनः स्थातुं वीक्ष्यमाणो महाबलौ॥ कपेः परमभीतस्य चित्तं व्यवससाद ह॥ ३॥ चिंतयित्वा स धर्मात्मा विमृश्य गुरुलाघवं॥ सुग्रीवः परमोद्विग्नः सर्वैस्तैर्वानरैः सह॥ ४॥ ततः स सचिवेभ्यस्तु सुग्रीवः प्लवगाधिपः॥ शशंस परमोद्विग्नः पश्यंस्तौ रामलक्ष्मणौ॥ ५॥ एतौ वनमिदं दुर्गं वालिप्रणिहितौ ध्रुवं॥ छद्मना चीरवसनौ प्रचरंताविहागतौ॥ ६॥ ततः सुग्रीवसचिवा दृष्ट्वा परमधन्विनौ॥ जग्मुर्गिरितटात्तस्मादन्यच्छिखरमुत्तमं॥ ७॥ ते क्षिप्रमभिगम्याथ यूथपा यूथपर्षभं॥ हरयो वानरश्रेष्ठं परिवार्योपतस्थिरे॥ ८॥ एवमेकायनगताः प्लवमाना गिरेर्गिरिं॥ प्रकंपयंतो वेगेन गिरीणां शिखराणि च॥ ९॥ ॥६॥ ॥

86

॥एम·॥
॥९॥

तटादन्यत्तस्यैव गिरेः शिखरं जग्मुः सुग्रीवेण सहेति शेषः अन्यं शिखरमिति पाठे पुंस्त्वमार्षं ते क्षिप्रं शिखरांतरमभिक्रम्य प्राप्य यूथपर्षभं वानरश्रेष्ठं सुग्रीवं परिवार्योपतस्थिरे उपविष्टाः॥ ८॥ उक्तमेवाविष्करोति॥ एवमिति॥ उक्तरीत्या स्थितिगतिभयाभयासुखदुःखादावेकायनमेकमार्गसमानत्वं गता गिरेः आदावधिष्ठितगिरिशृंगात्॥ गिरिं तस्यैव शिखरांतरं प्रगत्वा सादिकुर्वंतो ययुर्गतवंतः ॥ ९॥

१०॥११॥सुग्रीवसचिवाहनुमदादयः॥१२॥वालिकिल्बिषेणवालिप्रवर्त्तनयाकिल्बिषाद्भयाच्छंकितंसम्भ्रमश्चित्तक्षोभः वालिक्रमेवालिनिमित्तं॥
सर्वैर्वानरैःमलयोमलयपर्यायोत्रर्ष्यमूकः॥१४॥यस्मान्वालिनः॥१५॥नदेवाहादरान्यस्मात्तवेतिपूर्वजातवालिनः इहपर्वतेनतस्मात्तेभयं

ततःशाखामृगाःसर्वेप्लवमानामहाबलाः॥बभंजुश्चनगांस्तत्रपुष्पितान्दुर्गमाश्रितान्॥१०॥आप्लवंतोहरिवराः
सर्वतस्तंमहागिरिं॥मृगमार्जारशार्दूलांस्त्रासयंतोययुस्तदा॥११॥ततःसुग्रीवसचिवाःपर्वतेंद्रेसमाहिताः॥सं
गम्यकपिमुख्येनसर्वेप्रांजलयस्थिताः॥१२॥ततस्तुभयसंत्रस्तंवालिकिल्बिषशंकितं॥उवाचहनुमान्वाक्यंसु
ग्रीवंवाक्यकोविदः॥१३॥संभ्रमस्त्यज्यतामेषसर्वैर्वालिकृतेमहान्॥मलयोयंगिरिवरोभयंनेहास्तिवालिनः॥१४॥
यस्मादुद्विग्नचेतास्त्वंविद्रुतोहरिपुंगव॥तंक्रूरदर्शनंक्रूरंनेहपश्यामिवालिनं॥१५॥यस्मात्तवभयंसौम्यपूर्व
जात्पापकर्मणः॥सनेहवालीदुष्टात्मानतेपश्याम्यहंभयं॥१६॥अहोशाखामृगत्वंतेव्यक्तमेवप्लवंगम॥लघुचि
त्ततयात्मानंनस्थापयसियोमतौ॥१७॥बुद्धिविज्ञानसंपन्नइंगितैःसर्वमाचर॥नह्यबुद्धिंगतोराजासर्वभूतानि
शास्तिहि॥१८॥सुग्रीवस्तुशुभंवाक्यंश्रुत्वासर्वंहनूमतः॥ततःशुभतरंवाक्यंहनूमंतमुवाचह॥१९॥

((नपश्यामीत्यन्वयः॥१६॥
शाखामृगत्वंवक्रचेष्टचपलचित्तमर्कटत्वंतदेवाह॥लघुचित्ततयेतिलघुचपलं॥१७॥ननुनतोभयाभावेपितन्मेरिताऽश्रयंतत्राह॥बुद्धीति॥इंगितै
रंतराशयगमकैश्चेष्टाविशेषैर्बुध्यानिश्चयात्मकेनविज्ञानेनपारक्याशयज्ञानेनसंपन्नःसन्नुचितंसर्वमाचरसर्वभूतानिनिजशास्यप्रजाजातं

॥१८॥नेदंभयंचापलमूलमिमाहसुग्रीवइति॥१९॥

पर्वतेन्द्रं अट ख
सू का २

सू४

नदेवाहदीर्घेति ॥२०॥ ननु वनचारिणा वानरेण वालिना कुतो नयोः प्रवर्त्तनात्तत्राह ॥ राजान इति ॥ बहुमित्राः जात्यंतरेष्वपि मित्रवंतः ॥ यथाद
शरथोऽक्षराजेन मित्रवान् एवं वालिनोपि नरमैत्र्यं संभावितमिति भावः ॥२१॥ नन्वथापि तापसाभ्यां कुतो भयं तत्राह अरयश्चेति ॥ यतस्ते छ
द्मचारिणो नो विज्ञेयाः यतश्च विश्वस्तानां वंचनया प्राप्तविश्वासानामरीणां स्वयमविश्वस्ताश्छिद्रे प्रहारावकाशेषु प्रहरंति अतो विज्ञे
या इत्यर्थः ॥२२॥ उक्तमुपनयति कृत्येष्विति ॥ राजानो बहुदर्शिनः नानाविधवंचनोपायज्ञाः परहंतारो भवंति ते एतैः प्राकृतैः प्राकृत

दीर्घबाहू विशालाक्षौ शरचापासिधारिणौ ॥ कस्य न स्याद्भयं दृष्ट्वा ह्येतौ सुरसुतोपमौ ॥२०॥ वालिप्रणिहितावेव
शंकेऽहं पुरुषोत्तमौ ॥ राजानो बहुमित्राश्च विश्वासो नात्र हि क्षमः ॥२१॥ अरयश्च मनुष्येण विज्ञेयाश्छद्मचारि
णः ॥ विश्वस्तानामविश्वस्ताश्छिद्रेषु प्रहरंत्यपि ॥२२॥ कृत्येषु वाली मेधावी राजानो बहुदर्शिनः ॥ भवंति परहं
तारस्ते ज्ञेयाः प्राकृतैर्नरैः ॥२३॥ तौ त्वया प्राकृतेनेव गत्वा ज्ञेयौ प्लवंगम ॥ इंगितानां प्रकारैश्च रूपव्याभाषणेन च ॥२४॥
लक्षयस्व तयोर्भावं प्रहृष्टमनसौ यदि ॥ विश्वासयन् प्रशंसाभिरिंगितैश्च पुनःपुनः ॥२५॥

वेषैश्चारैर्ज्ञेयाः ज्ञातव्यांतराशयाः ॥२३॥
यत एवमतस्त्वमिति प्राकृतेनेव उदासीनेनेव इंगितानां प्रकारैः विशेषैः रूपेण सौम्यासौम्याकारेण व्याभाषणेन तत्तत्प्रसंगोदीयमानोत्तरेण च ॥२४॥
तयोर्मनुष्ययोः यदि त्वयि समीपस्थिते प्रहृष्टमनसौ उत्तरप्रमुखतरौ संतुष्टमनसौ तदा तयोरभिमुखत्वं स्थित्वा ममैव प्रशंसाभिस्तद्बोधकवाक्यै
रिंगितैर्ममकाभिप्रायबोधनैर्मयि तौ विश्वासयन् अस्य वनस्य प्रवेशस्य प्रयोजनं पृच्छ । यद्वा ममैवाभिमुखत्वं यथा तथा स्थित्वा प्रशंसाभिस्तयो
स्तुतिभिरिंगितैस्त्वयि तौ वा आत्मनि मयि वा विश्वासयन् पृच्छेः त्वं वयःस्वा
भिमुखत्वस्थितिकथनमन्याहृशवचनकथनसंभावनेयानित्रिणायाये
निबोधं ॥२५॥

87

२६ ॥ प्रश्नावसरंदर्शयन्निभृच्छेतियद्येतौशुद्धात्मानावस्मासुद्वेषरहितौजानीहिज्ञास्यामिनत्वेवंतदभिमतंप्रयोजनंपृछ ॥ उपसंहरतिव्याभाषितैरि
ति ॥ दुष्टतादुष्टताचेतितंत्रेणापदच्छेदः ॥ २७ ॥ २८ ॥ २९ ॥ अथवरमानः ॥ ॥ इतिरामाभिरामेश्रीरा०ति० किष्किंधाकांडेद्वितीयःसर्गः ॥ २ ॥

ममैवाभिमुखंस्थित्वा पृछत्वंहरिपुंगव ॥ प्रयोजनंप्रवेशस्यवनस्यास्यधनुर्द्धरौ ॥ २६ ॥ शुद्धात्मानौयदित्वेतौजानी
हित्वंप्लवंगम ॥ व्याभाषितैर्वारूपैर्वाविज्ञेयादुष्टताऽनयोः ॥ २७ ॥ इत्येवंकपिराजेनसंदिष्टोमारुतात्मजः ॥ चकार
गमनेबुद्धिंयत्रतौरामलक्ष्मणौ ॥ २८ ॥ तथेतिसंपूज्यवचस्तुतस्यकपेःसुभीतस्यदुरासदस्य ॥ महानुभावो
हनुमान्ययौतदासयत्ररामोतिवलीसलक्ष्मणः ॥ २९ ॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेद्वितीयःसर्गः
२ ॥ वचोविज्ञायहनुमान्सुग्रीवस्यमहात्मनः ॥ पर्वतादृष्यमूकात्तुपुप्लुवेयत्रराघवौ ॥ १ ॥ कपिरूपंपरित्य
ज्यहनुमान्मारुतात्मजः ॥ भिक्षुरूपंततोभेजेशठबुद्धितयाकपिः ॥ २ ॥ ततःसहनुमान्वाचाश्लक्ष्णयासुम
नोज्ञया ॥ विनीतवदुपागम्यराघवौप्रणिपत्यच ॥ ३ ॥ आबभाषेचतौवीरौयथावत्प्रशशंसच संपूज्य
विधिवद्वीरौहनुमान्वानरोत्तमः ॥ ४ ॥ उवाचकामतोवाक्यंमृदुसत्यपराक्रमौ ॥ राजर्षिदेवप्रतिमौतापसौसंशं सितव्रतौ ॥ ५ ॥

विज्ञायतात्पर्योज्ञात्वा ॥ १ ॥ भिक्षुरूपंप्राकृततापसरूपंशठबुद्धितयाअविश्वस्तबुद्धितया ॥ २ ॥ विनीतवत् विनीतयोग्यं ॥ ३ ॥ यथावत्प्र
शशंसनतुमिथ्यास्तुतिरित्यर्थः । आबभाषेवक्तुमभिमुखीचकार संपूज्यवाचाप्रशस्य ॥ ४ ॥ कामतःसुग्रीवोपदेशाविरुद्धस्वेच्छातः राजर्षि चदेवौचतत्प्रतिमौ ॥ ५ ॥

वरवर्णिनौ वल्कलचारिणौ श्वो अन्यांश्च रक्षोसुरादीन्॥६॥ समंततो वीक्षमाणौ किंचिदन्वेषणमाणाविवेत्यर्थः इमां नदीमिति सरस्य
पि विस्तृतत्वेन नदीत्वोपचारः इति केचिन्नद्येवेत्यन्ये॥७॥ शोभनो वर्णश्चाभा कांतिश्च ययोस्तौ॥ निश्वसंतौ किंचिद्दुःखवशेनेति शेषः

देशंकथमिमंप्राप्तौभवंतौवरवर्णिनौ॥ त्रासयंतौमृगगणानन्यांश्चवनचारिणः॥६॥ पंपातीररुहान्वृक्षान्वी
क्षमाणौसमंततः॥ इमांनदींशुभजलांशोभयंतौतरस्विनौ॥७॥ धैर्यवंतौसुवर्णाभौकौयुवांचीरवाससौ॥ नि
श्वसंतौवरभुजौपीडयंताविमाःप्रजाः॥८॥ सिंहविप्रेक्षितौवीरौमहाबलपराक्रमौ॥ शक्रचापनिभेचापेप्रगृ
हीत्वाशत्रुनाशनौ॥९॥ श्रीमंतौरूपसंपन्नौवृषभश्रेष्ठविक्रमौ॥ हस्तिहस्तोपमभुजौद्युतिमंतौनरर्षभौ॥१०॥
प्रभयापर्वतेंद्रोसौयुवयोरवभासितः॥ राज्यार्हावमरप्रख्यौकथंदेशमिहागतौ॥११॥ पद्मपत्रेक्षणौवीरौजटा
मंडलधारिणौ॥ अन्योन्यसदृशौवीरौदेवलोकादिहागतौ॥१२॥ यदृच्छयेवसंप्राप्तौचंद्रसूर्यौवसुंधरां॥ विशा
लवक्षसौवीरौमानुषौदेवरूपिणौ॥१३॥ सिंहस्कंधौमहोत्साहौसमदाविवगोवृषौ॥ आयताश्चसुवृत्ताश्च
बाहवःपरिघोपमाः॥१४॥ सर्वभूषणभूषार्हाःकिमर्थंनविभूषिताः॥ उभौयोग्यावहंमन्येरक्षितुंपृथिवीमिमां ॥१५॥

इमावन्याः प्रजाः पीडयंतौ स्वरूपमात्रेणेति शेषः॥८॥ ॥९॥ हस्तः शुंडादंडः॥१०॥ राज्यार्हौ दिव्यतुल्यौ देशं हित्वा कथमिहागतावि
त्यर्थः॥ आकारतो महाराजत्वनिश्चयादेवमुक्तिः॥११॥ देवलोकादिह भूतले आगताविव॥१२॥१३॥ समदौ हृष्टौ गोवृषौ नरूणाह
पमादिव॥१४॥१५॥

88

१६॥ चित्रमनुलेपनंस्वर्णजलरूषणांययोस्तौहेसम्भूषितेवस्त्रेयथा॥ ७॥ १८॥ निर्मुक्तौमुक्तकंचुकौकस्माद्वैकस्माद्धेतोर्नाभिभाषथःप्रत्युत्तरामितिशेषः॥ १९॥ ननुकस्त्वंकस्यवायस्यास्माभिःप्रत्युत्तरंदेयंतत्राहसुग्रीवइतिसुग्रीवस्याक्षुद्रत्वबोधनायतत्स्तुतिपूर्वकमुक्तिः विनिकृतो

ससागरवनांकृत्स्नांविंध्यमेरुविभूषितां॥ इमेचधनुषीचित्रेश्लक्ष्णेचित्रानुलेपने॥ १६॥ प्रकाशेतेयथेंद्रस्यवज्रेहेमविभूषिते॥ संपूर्णाश्चशितैर्बाणैस्तूणाश्चशुभदर्शनाः॥ ७॥ जीवितांतकरैर्घोरैर्ज्वलद्भिरिवपन्नगैः॥ सुमहाप्रमाणौविपुलौतप्तहाटकभूषणौ॥ १८॥ खड्गावेतौविराजेतेनिर्मुक्तभुजगाविव॥ एवंमांपरिभाषंतंकस्माद्वैनाभिभाषथः॥ १९॥ सुग्रीवोनामधर्मात्माकश्चिद्वानरपुंगवः॥ वीरोविनिकृतोभ्रात्राजगद्भ्रमतिदुःखितः॥ २०॥ प्राप्तोहंप्रेषितस्तेनसुग्रीवेणमहात्मना॥ राज्ञावानरमुख्यानांहनूमान्नामवानरः॥ २१॥ युवाभ्यांसहिधर्मात्मासुग्रीवःसख्यमिच्छति॥ तस्यमांसचिवंविद्धिवानरंपवनात्मजं॥ २२॥ भिक्षुरूपप्रतिच्छन्नंसुग्रीवप्रियकारणात्॥ ऋश्यमूकादिहप्राप्तंकामगंकामचारिणं॥ २३॥ एवमुक्त्वातुहनुमांस्तौवीरौरामलक्ष्मणौ॥ वाक्यज्ञोवाक्यकुशलःपुनर्नोवाचकिंचन॥ २४॥ एतच्छ्रुत्वावचस्तस्यरामोलक्ष्मणमब्रवीत्॥ प्रहृष्टवदनःश्रीमान्भ्रातरंपार्श्वतःस्थितं॥ २५॥

निरस्तः॥ २०॥ २१॥ ननुत्वदाज्ञाऽस्मत्समीपेप्रेषणंकिमर्थंतत्राहयुवाभ्यामिति॥ २२॥ वानरराजसचिवस्यमानुषरूपंकुतस्तत्राहभिक्षुरूपेतिअनेनाक्षुद्रवानरत्वमेवनेत्यपिबोधितंईदृशंवित्तेतिप्राक्तनेनान्वयः॥ २३॥ २४॥ २५॥ ६॥

॥ रा॰ वा॰ कि॰ ॥
॥ १२ ॥

तमेव सुग्रीवमेव कांक्षमाणस्येच्छत इत्यर्थः ॥ २६ ॥ तमभ्यभाष । अभिभाषस्वेति यावत् ॥ वाक्येति वाक्यज्ञं वाक्यज्ञं वाक्यरचनाभिज्ञं मधुरैर्वाक्यैः स्नेहयुक्तम
भ्यभाषेत्यन्वयः ॥ २७ ॥ विनयः प्रातिशाख्यादिज्ञानपूर्वकाभ्यासः ऋग्वेदविषये तद्धीनो यो न भवति तेन एकैकानुवाके ऽनुवाकान्तरसांकर्येणानध्या
रणास्मृदुकरत्वाद्यजुर्वेदधारणाहीनभिन्नेन गायननविषयो हार्दे ऽर्थे यत्वात्सामवेदज्ञानहीनभिन्नेनैवं प्रभाषितुं शक्यं न तद्धीनेनेत्यर्थः यस्मा
द्विशेषेवायद्धानद्धीनैरेवं प्रभाषितुं न शक्यं न शक्यं न शक्यमित्यर्थः ॥ तेनायं सर्वथा न तत्त इति नोपेक्षार्ह इति व्यंग्यं ॥ २८ ॥ नत्रुवेदमात्राध्यायिना

सचिवोयं कपींद्रस्य सुग्रीवस्य महात्मनः ॥ तमेव कांक्षमाणस्य ममांतिकमिहागतः ॥ २६ ॥ तमभ्यभाष सौमित्रे सुग्रीव
सचिवं कपिं ॥ वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्तमरिंदमं ॥ २७ ॥ नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ॥ नासामवेदवि
दुषः शक्यमेवं विभाषितुं ॥ २८ ॥ नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतं ॥ बहु व्याहरतानेन न किंचिदपशब्दितं ॥ २९ ॥
न मुखे नेत्रयोश्चापि ललाटे च भ्रुवोस्तथा ॥ अन्येष्वपि च सर्वेषु दोषः संविदितः क्वचित् ॥ ३० ॥ अविस्तरमसंदिग्धम
विलंबितमव्यथं ॥ उरस्थं कंठगं वाक्यं वर्त्तते मध्यमस्वरं ॥ ३१ ॥

न किंचिद्राजमंत्रादि ज्ञातुं शक्यं मन्त्राह ॥ नूनमिति कृत्स्नं पदं तदर्थस्वरूपनि
र्णयोपयोगिन्यायसहितं व्याकरणबोध्यसाधुत्वस्यार्थघटितत्वात् अनेन सर्वज्ञत्वं सूचितं तथा श्रवणे हेतुमाह बह्विति ॥ २९ ॥ इंगितैरप्ययं सौविश्वासयोग्य
इत्याह । न मुखे इति दोषः । संविदितो व्यवहारकाले इति शेषः ॥ ३० ॥ अथ वाग्वचनरचनासौष्ठवमाह अविस्तरं । नातिविस्तारमित्यर्थः । असंदिग्धं असंदिग्धा
र्थमसंदिग्धाक्षरं च । अविलंबितं अनेनास्खलनीकृत्य अव्यथं न विद्यते श्रोतृश्रुतेर्व्यथा यस्मात्तादृशं तेनाश्रुतिकटुवर्णमित्यर्थः उरस्थं मध्यमारूपेण कंठगं वै
खरीरूपेण कंठविवरात् श्रोतृश्रोत्रं गतं अतएव मध्यमस्वरं ना
त्युच्चैर्नातिनीचैः ॥ ३१ ॥

॥ राम ॥
॥ १२ ॥

89

संस्कारक्रमसंपन्नांसंस्काराणांक्रमेक्रमेणाजननेसंपन्नांसमर्थांविशिष्टानुपूर्वींविशेषरूपेणपदादीनांग्रहणायक्रमवत्तन्नवर्णाकारसंस्कारानंतःकर
णोत्पादनतत्क्रमेणाक्रमवद्वर्णावभासपदवाक्यज्ञानमितिवाक्यपदीयादौस्पष्टंतेनमध्यमद्रुतयोच्चारणंस्वचितंनदीर्घाद्रुतामविलंबितामिति॥अत
एवहृदयहर्षिणीं॥३२॥त्रिस्थानव्यंजनस्थयात्रिषुस्थानेषुउरःकंठशिरःसुयद्व्यंजनमभिव्यक्तिस्तयातिष्ठतीतितथोक्तयास्वस्वरूपंलभतेनादृशपात्रे

संस्कारक्रमसंपन्नामद्रुतामविलंबितां॥उच्चारयतिकल्याणींवाचंहृदयहर्षिणीं॥३२॥अनयाचित्रयावाचात्रिस्थानव्यंज
नस्थया॥कस्यनाराध्यतेचित्तमुद्यतासेररेरपि॥३३॥एवंविधोयस्यदूतोनभवेत्पार्थिवस्यतु॥सिध्यंतिहकथंतस्यका
र्याणांगतयोनघ॥३४॥एवंगुणगणैर्युक्तायस्यस्युःकार्यसाधकाः॥तस्यसिध्यंतिसर्वेर्थादूतवाक्यप्रचोदिताः॥३५॥ए
वमुक्तस्तुसौमित्रिःसुग्रीवसचिवंकपिं॥अभ्यभाषतवाक्यज्ञोवाक्यज्ञंपवनात्मजं॥३६॥विदितानौगुणाविद्वन्सुग्रीव
स्यमहात्मनः॥तमेवचावांमार्गावःसुग्रीवंप्लवगेश्वरं॥३७॥यथाब्रवीषिहनुमन्सुग्रीववचनादिह॥तत्तथाहिकरिष्या
वोवचनात्तवसत्तम॥३८॥तत्तस्यवाक्यंनिपुणंनिशम्यप्रहृष्टरूपःपवनात्मजःकपिः॥मनःसमाधायजयोपपत्तौसख्यंतदा
कर्तुमियेषताभ्यां॥३९॥इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेतृतीयःसर्गः॥३॥

नचित्रत्वमेवस्फोटरूपःशब्दइतिसूचितं॥नाराध्यतेनानु
कूल्यते॥३३॥कार्याणांगतयःपरिपाकाः॥३४॥दूतवाक्यप्रचोदिताःतद्वाक्यबोधिताः॥३५॥एवमुक्तःरामेणेतिशेषः॥३६॥नौआवयोःतमेवसुग्रीवमे
वमार्गावोमार्गयावः॥३७॥यथाब्रवीषिसख्यमिच्छतीतियदवादीस्तत्तथैवकरिष्यावइत्यर्थः॥३८॥जयोपपत्तौसुग्रीवस्येतिशेषःताभ्यांरामसुग्रीवाभ्यां॥३९॥

॥ इतिश्रीमद्रामायणेकि०तृतीयःसर्गः॥३॥

तद्वचः सचिवोयं कपींद्रस्य सुग्रीवस्य महात्मनस्तमेव कांक्षमाणा ममांतिकमुपागत इति॥ रामवचो महात्मन इति सोपचारप्रयोगतः सुग्रीवविषये मधुरभावं
सौम्यभावं श्रुत्वा तमेव कांक्षमाणा इत्यनेन सुग्रीवे रामः किंचित्कृत्यवानिति विज्ञाय प्रहृष्टः सुग्रीवं सुग्रीवाभिमनसागतो दृष्टवान्॥१॥ तदेव विवृणोति भा
व्य इति अवश्यंभावीत्यर्थः यदयं महापुरुषः कृत्यवान्प्रयोजनसापेक्षः प्राप्तस्तत्कृत्यं च उपागतं सुग्रीवं प्राप्तमित्यर्थः॥२॥ एवं सुहृदयत्वमवगम्य

ततः प्रहृष्टो हनुमान्कृत्यवानिति तद्वचः॥ श्रुत्वा मधुरभावं च सुग्रीवं मनसागतः॥१॥ भाव्यो राज्यागमस्तस्य सुग्रीवस्य म
हात्मनः॥ यदयं कृत्यवान्प्राप्तः कृत्यं चैतदुपागतं॥२॥ ततः परमसंहृष्टो हनूमान्प्लवगोत्तमः॥ प्रत्युवाच ततो वाक्यं रा
मं वाक्यविशारदः॥३॥ किमर्थं च वनं घोरं पंपाकाननमंडितं॥ आगतः सानुजो दुर्गं नानाव्यालमृगायुतं॥४॥ त
स्य तद्वचनं श्रुत्वा लक्ष्मणो रामचोदितः॥ आचचक्षे महात्मानं रामं दशरथात्मजं॥५॥ राजा दशरथो नाम द्युतिमा
न्धर्मवत्सलः॥ चातुर्वर्ण्यं स्वधर्मेण नित्यमेवाभिपालयन्॥६॥ न द्वेष्टा विद्यते तस्य स तु द्वेष्टि न कंचन॥ स तु सर्वेषु
भूतेषु पितामह इवापरः॥७॥ अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः॥ तस्यायं पूर्वजः पुत्रो रामो नाम जनैः
श्रुतः॥८॥ शरण्यः सर्वभूतानां पितुर्निर्देशपारगः॥ ज्येष्ठो दशरथस्यायं पुत्राणां गुणवत्तरः॥९॥ छी॥

स्वस्वाम्युक्तं दृष्टवानितमत इति॥३॥ पंपाकानने मंडितमलंकृतं घोरमन्यत इति शेषः॥४॥ रामचोदितः इंगितेनेति शेषः॥ आचचक्षे बोधितः
वान्॥५॥ पितामह इव पालकत्वेनेत्यर्थः॥७॥८॥ निर्देशो नियोगः तत्पारगः तस्य समाप्तकत्वादेवमुक्तं॥९॥ श्रीरामाय रामचंद्राय नमः

90

संयुक्तः संयुज्यमानः भ्रष्टः किंचिन्निमित्तवशात् ॥१०॥११॥ अवरः कनीयान् दास्यमुपागतोस्येतिशेषः ॥१२॥ १३॥ रहिते आवाभ्यां रहिते काले न ज्ञायते वि

राजलक्षणासंयुक्तो संयुक्तो राज्यसंपदा ॥ राज्याद्भ्रष्टो मया वस्तुं वने सार्धमिहागतः ॥१०॥ भार्यया च महाभाग सीतयानुगतो
वशी ॥ दिनक्षये महातेजाः प्रभयेव दिवाकरः ॥११॥ अहमस्यावरो भ्राता गुणैर्दास्यमुपागतः ॥ कृतज्ञस्य बहुज्ञस्य लक्ष्म
णो नाम नामतः ॥१२॥ सुखार्हस्य महार्हस्य सर्वभूतहितात्मनः ॥ ऐश्वर्येण विहीनस्य वनवासे रतस्य च ॥१३॥ रक्षसा
पहृता भार्या रहिते कामरूपिणा ॥ तच्च न ज्ञायते रक्षः पत्नी येनास्य वा हृता ॥१४॥ दनुर्नाम दितेः पुत्रः शापाद्राक्षस
तां गतः ॥ आख्यातस्तेन सुग्रीवः समर्थो वानराधिपः ॥१५॥ स ज्ञास्यति महावीर्यस्तव भार्यापहारिणं ॥ एवमुक्त्वा
दनुः स्वर्गं भ्राजमानो दिवं गतः ॥१६॥ एतत्ते सर्वमाख्यातं याथातथ्येन पृच्छतः ॥ अहं चैव च रामश्च सुग्रीवं शरणं
गतौ ॥१७॥ एष दत्वा च वित्तानि प्राप्य चानुत्तमं यशः ॥ लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति ॥१८॥ सीताय
स्य स्नुषा चासीच्छरण्यो धर्मवत्सलः ॥ तस्य पुत्रः शरण्यस्य सुग्रीवं शरणं गतः ॥१९॥ सर्वलोकस्य धर्मात्मा शर
ण्यः शरणं पुरा ॥ गुरुर्मे राघवः सोयं सुग्रीवं शरणं गतः ॥२०॥

शिष्येतिशेषः ॥१४॥ दनुः कबंधः स ज्ञास्यतीत्याख्यातः ॥१५
स्वर्गं गंतुं दिवमाकाशं गतः उत्पतितः ॥१६॥१७॥ नाथं रक्षकं इच्छतीति देवगमेतिशेषः ॥१८ ॥ यः शरण्यो धर्मवत्सलश्चासीदित्यर्थः ॥१९ २०॥

२१ ।। सर्वगुणोपेताः मूर्धाभिषिक्ता इति यावत् ।। सदाप्रतिदिनं सततमनुक्षणं ।। २२ ।। शोकाभिभूते शोकाविष्टे शोकार्ते शोकपीडिते ।। २४ ।। साश्रुपातनं आस्माकमप्यन्यशरणापेक्षेनश्रुपातनसहितं ।। २५ ।। द्रष्टव्या द्रष्टुं योग्याः सन्तीति ।। अनेन तस्यापि सहायापेक्षत्वं दर्शितं ।। २७ ।। यदेवयतः परिमार्गणे सहायं करिष्यतीत्यन्वयः ।। २८ ।। २९ ।। ३० ।। सोपि त्वया कृत्यवानिति यथा कथयते तथा जाने एनं देशं संप्राप्तस्त्वं कृतकृत्योसीत्यर्थः ।। ३१ ।। उक्तं समर्थयते प्रसन्नेति मुखवर्णो मुखशोभा ।। ३२ ।।

यस्य प्रसादे सततं प्रसीदेयुरिमाः प्रजाः ।। स रामो वानरेंद्रस्य प्रसादमभिकांक्षते ।। २१ ।। येन सर्वगुणोपेताः पृथिव्यां सर्वपार्थिवाः ।। मानिताः सततं राज्ञा सदा दशरथेन वै ।। २२ ।। तस्यायं पूर्वजः पुत्रस्त्रिषु लोकेषु विश्रुतः ।। सुग्रीवं वानरेंद्रं तु रामः शरणमागतः ।। २३ ।। शोकाभिभूते रामे तु शोकार्ते शरणं गते ।। कर्तुमर्हति सुग्रीवः प्रसादं सह यूथपैः ।। २४ ।। एवं ब्रुवाणं सौमित्रिं करुणं साश्रुपातनं ।। हनूमान्प्रत्युवाचेदं वाक्यं वाक्यविशारदः ।। २५ ।। ईदृशा बुद्धिसंपन्ना जितक्रोधा जितेंद्रियाः ।। द्रष्टव्या वानरेंद्रेण दिष्ट्या दर्शनमागताः ।। २६ ।। स हि राज्याच्च विभ्रष्टः कृतवैरश्च वालिना ।। हृतदारो वने त्रस्तो भ्रात्रा विनिकृतो भृशं ।। २७ ।। करिष्यति स साहाय्यं युवयोर्भास्करात्मजः ।। सुग्रीवः सह चास्माभिः सीतायाः परिमार्गणे ।। २८ ।। इत्येवमुक्त्वा हनुमान्श्लक्ष्णं मधुरया गिरा ।। बभाषे सोभिगच्छामः सुग्रीवमिति राघवं ।। २९ ।। एवं ब्रुवंतं धर्मात्मा हनूमंतं स लक्ष्मणः ।। प्रतिपूज्य यथान्यायमिदं प्रोवाच राघवं ।। ३० ।। कपिः कथयते हृष्टो यथायं मारुतात्मजः ।। कृत्यवान्सोपि संप्राप्तः कृतकृत्योसि राघव ।। ३१ ।। प्रसन्नमुखवर्णश्च व्यक्तं हृष्टश्च भाषते ।। नानृतं वक्ष्यते वीरो हनूमान्मारुतात्मजः ।। ३२ ।।

91

३३ ॥ वानरं वानरस्येदं आर्षोण् ॥ ३४ ॥ उक्तं संदृष्टानि सन्निविनिकृतकृत्यवन्नदहं गिरिवरं ऋष्यमूकं ॥ ३५ ॥ मगमानः । इति रामाभिरामे श्रीरा० ति० किष्किं
धाकांडे चतुर्थः सर्गः ॥ ४ ॥ ऋष्यमूकादिति ऋष्यमूके सुग्रीववासस्थाने राघवौ स्थापयित्वा ततः सुग्रीवानयनार्थं ऋष्यमूकैकदेशं मलयाख्यं गिरिं ग
त्वेत्यन्वयः ॥ १ ॥ अयं रामः मलयस्थसुग्रीवदृष्टिपथवर्त्तिना देवं निर्देशः पुनराह· दराद्रामो यमिति सत्यविक्रमत्व दृढत्वाभ्यां त्वक्छत्रुनिरसनक्षम

ततः स तु महाप्राज्ञो हनूमान्मारुतात्मजः ॥ जगामादाय तौ वीरौ हरिराजाय राघवौ ॥ ३३ ॥ भिक्षुरूपं परित्यज्य वानरं
रूपमास्थितः । पृष्ठमारोप्य तौ वीरौ जगाम कपिकुंजरः ॥ ३४ ॥ स तु विपुलयशाः कपिप्रवीरः पवनसुतः कृतकृत्य
वत्प्रहृष्टः ॥ गिरिवरमुरुविक्रमः प्रयातः सशुभमतिः सह रामलक्ष्मणाभ्यां ॥ ३५ ॥ इत्यार्षे श्रीमद्रामायणे किष्किं
धाकांडे चतुर्थः सर्गः ॥ ४ ॥ ऋष्यमूकात्तु हनुमान् गत्वा तं मलयं गिरिं ॥ आचचक्षे तदा वीरौ कपिराजाय राघवौ ॥ १ ॥
अयं रामो महाप्राज्ञः संप्राप्तो दृढविक्रमः । लक्ष्मणेन सह भ्रात्रा रामोयं सत्यविक्रमः ॥ २ ॥ इक्ष्वाकूणां कुले जातो
रामो दशरथात्मजः ॥ धर्मे निगदितश्चैव पितुर्निर्देशकारकः ॥ ३ ॥ राजसूयाश्वमेधैश्च वह्निर्येनाभितर्पितः द
क्षिणाश्च तथोत्सृष्टा गावः शतसहस्रशः ॥ ४ ॥ तपसा सत्यवाक्येन वसुधा तेन पालिता स्त्रीहेतोस्तस्य पुत्रोयं रामो
रण्यं समागतः ॥ ५ ॥ तस्यास्य वसतोरण्ये नियतस्य महात्मनः ॥ रावणेन हृता भार्या स त्वां शरणमागतः ॥ ६ ॥

नावज्ञाते ॥ २ ॥ इक्ष्वाकूणामित्यनेन स्वरूपकथनं धर्मे स्वसत्यपरिपालनरूपधर्मनिमित्तं निगदितः प्रेरितः पित्रेति शेषः अनरण्यवनस्य पितुर्निर्देशकारकः ३

॥ ४ स्त्रीहेतोः पित्रा स्त्रियै दत्तस्य वरस्य पालनहेतोः ॥ ५ ॥ ६ ॥

प्रश्रयदर्शनाकांक्षिणोर्दर्शनंदत्वा ॥७॥ दर्शनीयतमोभूत्वा इच्छावशादितिशेषः ॥८॥ धर्मविनीतः धर्मेशिक्षितः ॥९॥ एषः मत्तोमैत्रीच्छारूपः तदेवाह यत्व
मितिवानरेणतिर्यग्योनिनापिनापि ॥१०॥ रोचतेयदीतिकार्यवशादितिशेषः ॥ ध्रुवामर्यादाचक्रतुल्यंघनीयोन्योन्यकार्यसंपादनविषयोनिश्चयः। व
ध्यतांबुध्याविचार्यप्रतिज्ञायतां ॥११॥ हस्तंपीडयामासदक्षिणहस्तेनदक्षिणहस्तंगृहीतवान् ॥१२॥ पीडितंपर्यष्वजतगाढमालिंगितवान्कृतमो

भवतासख्यकामौतौभ्रातरौरामलक्ष्मणौ। प्रश्रयंचार्चयस्वैतौपूजनीयतमावुभौ ॥७॥ श्रुत्वाहनूमतोवाक्यंसुग्रीवोवा
नराधिपः। दर्शनीयतमोभूत्वाप्रीतोवाचचराघवम् ॥८॥ भवान्धर्मविनीतश्चसुतपाःसर्ववत्सलः। आख्यातावा
युपुत्रेणतत्वतोमेभवद्गुणाः ॥९॥ तन्ममैवैषसत्कारोलाभश्चैवोत्तमःप्रभो। यत्त्वमिच्छसिसौहार्दंवानरेणमयास
ह ॥१०॥ रोचतेयदिमेसख्यंबाहुरेषप्रसारितः। गृह्यतांपाणिनापाणिर्मर्यादाबध्यतांध्रुवा ॥११॥ एतत्तुवचनं
श्रुत्वासुग्रीवस्यसुभाषितं। संप्रहृष्टमनाहस्तंपीडयामासपाणिना ॥१२॥ हृष्टःसौहृदमालंब्यपर्यष्वजतपी
डितं। ततोहनूमान्संत्यज्यभिक्षुरूपमरिंदमः ॥१३॥ काष्ठयोःस्वेनरूपेणजनयामासपावकं। दीप्यमानंततो ॥८॥
वह्निंपुष्पैरभ्यर्च्यसत्कृतं ॥१४॥ तयोर्मध्येतुसुप्रीतोनिदधौसुसमाहितः। ततोग्निंदीप्यमानंतौचक्रतुश्चप्रदक्षिणं

हार्दस्थैर्यायदनूपदिष्टाग्निसाक्षिकत्वमितिज्ञेयंचरामप्रेरितहनूमतःप्रज्वलितइतिभिक्षुरूपंपरित्यज्यतौत्वयाप्राकृतेनेवगत्वातयोःप्लवंगमेसुग्रीवा
ज्ञाकरणप्रतीतयेरामागमननिवेदनसमयेपुनःकृतंभिक्षुरूपंपरित्यज्य ॥१३॥ स्वेनरूपेणवानररूपेणकाष्ठयोररण्योरग्निंजनयामास। ततोदीप्यमानम
ग्निंतयोर्मध्येनिदधौनिहितंचतंपुष्पैरभ्यर्च्यसत्कृतंचाकरोत् ॥१४॥
प्रदक्षिणंचक्रतुःमैत्रीदार्ढ्यायेतिशेषः ॥१५॥

१६॥ हृद्यः हृदयप्रियः एकंसमानमित्यर्थः॥१७॥ प्रहृष्टवत्प्रहृष्टः सन् एतावत्पर्यंतंसम्यग्विश्वासाभावात्सुग्रीवः पृथगासनस्थएवासीदितिज्ञायतेनेनद
ह। ततःसुपर्णानि॥ आस्तीर्यराघवौयेनिशेषः॥१८॥ सराघवोनिषसादस्वयंतत्रास्थितइत्यर्थः॥१९॥ लक्ष्मणायविषादपरिहारार्थंचंदनशाखास

सुग्रीवोराघवश्चैववयस्यत्वमुपागतौ॥ ततःसुप्रीतमनसौतावुभौहरिराघवौ॥१६॥ अन्योन्यमभिवीक्षंतौनतृप्तिम
भिजग्मतुः॥ त्वंवयस्योसिहृद्योमेएकंदुःखंसुखंचनौ॥१७॥ सुग्रीवोराघवंवाक्यमित्युवाचप्रहृष्टवत्॥ ततःसुपर्ण
वहुलांभंक्त्वाशाखांसुपुष्पितां॥१८॥ सालस्यास्तीर्यसुग्रीवोनिषसादसराघवः॥ लक्ष्मणायाथसंहृष्टोहनुमा
न्मारुतात्मजः॥१९॥ शाखांचंदनवृक्षस्यददौपरमपुष्पितां॥ ततःप्रहृष्टःसुग्रीवःश्लक्ष्णंमधुरयागिरा॥२०॥
प्रत्युवाचतदारामंहर्षव्याकुललोचनः॥ अहंविनिकृतोरामचरामीहभयार्दितः॥२१॥ हृतभार्योवनेत्रस्तो
दुर्गमेतदुपाश्रितः॥ सोहंत्रस्तोवनेभीतोवसाम्युद्भ्रांतचेतनः॥२२॥ वालिनानिकृतोभ्रात्राकृतवैरश्चराघ [illegible]
व॥ वालिनोमेमहाभागभयार्त्तस्याभयंकुरु॥२३॥ कर्तुमर्हसिकाकुत्स्थभयंमेनभवेद्यथा॥ एवमुक्तस्तुते [illegible]
जस्वीधर्मज्ञोधर्मवत्सलः॥२४॥ प्रत्यभाषतकाकुत्स्थःसुग्रीवंप्रहसन्निव॥ उपकारफलंमित्रंविदितंमेमहा [illegible]

रणादानं॥ अथकार्यमर्यादाबंधनायप्रवृत्तिःततइति॥ २०॥ इहवनेइत्यन्वयः॥२१॥२२॥ अभयंकुरु अभयप्रतिज्ञांकुरु॥२३॥ नदेवदा
र्यायपुनराहकर्तुमिति॥२४॥ लीलाविसृष्टैकेषुमात्रसाध्यत्वात्प्रहसन्निवेति॥ उपकारःफलंयस्यतत्॥ २५ ॥ श्रीरामचन्द्रायनमः॥ ६ ॥

२६॥ वेगिताःसंजातवेगाः॥ २७॥ २८॥ २९॥ ममवैरिणमग्रजंतथाकुरु॥ यथापुनःसममनहिंस्यात्॥ ३०॥ सीतादीनांराज्ञीवादिभिःक्रमेणान्वयः॥ कपींद्रोत्र
वालीएषांवामनेत्रस्पंदःशुभशंसीस्त्रीणांशुभशंसी॥ ३१॥ कद्भुमानः॥ इतिरामाभिरामेश्रीरा॰ किष्किंधाकांडे पंचमःसर्गः॥ ५॥ आख्यातिआ
ख्यानवान्तत्रिमित्रमितिशेषः॥ १॥ तत्किंतत्राहयत्रिमित्रमिति॥ २॥ त्वयालक्ष्मणेनचवियुक्तानवभार्यासीतात्वंनरंप्रेप्सुनाछिद्रं॥ दिदृक्षु

वालिनंतंवधिष्यामितवभार्यापहारिणं॥ अमोघाःसूर्यसंकाशाममेमेनिशिताःशराः॥ २६॥ तस्मिन्वालिनिदुर्वृत्तेनि
पतिष्यंतिवेगिताः॥ कंकपत्रप्रतिछन्नामहेंद्राशनिसन्निभाः॥ २७॥ तीक्ष्णाग्राऋजुपर्वाणःसरोषाभुजगाइव॥ तमद्य
वालिनंपश्यतीक्ष्णैराशीविषोपमैः॥ २८॥ शरैर्विनिहतंभूमौप्रकीर्णमिवपर्वतं॥ सतुतद्वचनंश्रुत्वाराघवस्यात्म
नोहितं॥ सुग्रीवःपरमःप्रीतःपरमंवाक्यमब्रवीत्॥ २९॥ तवप्रसादेननृसिंहवीरप्रियांचराज्यंचसमाप्नुयाम
हं॥ तथाकुरुत्वंनरदेववैरिणंयथानहिंस्यात्सपुनर्ममाग्रजं॥ ३०॥ सीताकपींद्रक्षणदाचराणांराजीवहेमज्वल
नोपमानि॥ सुग्रीवरामप्रणयप्रसंगेवामानिनेत्राणिसमंस्फुरंति॥ ३१॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेपं
चमःसर्गः॥ ५॥ पुनरेवाब्रवीत्प्रीतोराघवंरघुनंदनं॥ अयमाख्यातितेरामसेवकोमंत्रिसत्तमः॥ १॥ हनूमान्यन्निमित्तं
त्वंनिर्जनंवनमागतः॥ लक्ष्मणेनसहभ्रात्रावसतश्चवनेतव॥ २॥ रक्षसापहृताभार्यामैथिलीजनकात्मजा॥ त्वयावि
युक्तारुदतीलक्ष्मणेनचधीमता॥ ३॥

णाहृतातेनलोकरावणेनरक्षसात्वंभार्यावियोगजंदुःखंप्रापितइतिचाख्यानवान्॥ ३॥ श्रीरामायरामचंद्रायश्रीकृष्णायवासुदेवायनम

मे २

93

म

४ ॥ रामेणस्वकार्यसाधनेप्रतिज्ञातेसतिस्वयपितत्कार्यसाधनंप्रतिजानीतेभार्येत्यादिनचिरात् नष्टांमधुकैटभहृतांदेवस्यधर्मस्यब्राह्मणश्चज्ञानस
धनभूतांश्रुतिस्त्रयीतामिवदीर्घश्चार्षः ॥ ५ ॥ वर्त्तनीवर्त्तमानां ॥ ६ ॥ तथ्यंतथ्यमेवावेहीतिअन्वयः विषकृतंविषमिश्रितं ॥ ८ ॥ याहृतासामैथिली

अंतरंप्रेप्सुनातेनहत्वागृध्रंजटायुषं ॥ भार्यावियोगजंदुःखंप्रापितस्तेनरक्षसा ॥ ४ ॥ भार्यावियोगजंदुःखंनचिरात्त्वं
विमोक्ष्यसे ॥ अहंतामानयिष्यामिनष्टांवेदश्रुतीमिव ॥ ५ ॥ रसातलेवावर्त्तंतींवर्त्तंतींवानभस्थले ॥ अहमानीय
दास्यामितवभार्यामरिंदम ॥ ६ ॥ इदंतथ्यंममवचस्त्वमवेहिचराघव ॥ नशक्यासाजरयितुमपिसेंद्रैःसुरासु
रैः ॥ ७ ॥ तवभार्यामहाबाहोभक्ष्यंविषकृतंयथा ॥ त्यजशोकंमहाबाहोतांकांतामानयामिते ॥ ८ ॥ अनुमानात्तु
जानामिमैथिलीसानसंशयः ॥ ह्रियमाणामयादृष्टारक्षसारौद्रकर्मणा ॥ ९ ॥ क्रोशंतीरामरामेतिलक्ष्मणे
तिचविस्वरं ॥ स्फुरंतीरावणस्यांकेपन्नगेंद्रवधूर्यथा ॥ १० ॥ आत्मनापंचमंमांहिदृष्ट्वाशैलतलेस्थितं ॥ उत्त
रीयंतयात्यक्तंशुभान्याभरणानिच ॥ ११ ॥ तान्यस्माभिर्गृहीतानिनिहितानिचराघव । आनयिष्याम्यहंतानिप्र
त्यभिज्ञातुमर्हसि ॥ १२ ॥ तमब्रवीत्ततोरामःसुग्रीवंप्रियवादिनं ॥ आनयस्वसखेशीघ्रंकिमर्थंप्रविलंबसे ॥ १३ ॥
एवमुक्तस्तुसुग्रीवःशैलस्यगहनांगुहां ॥ प्रविवेशततःशीघ्रंराघवप्रियकाम्यया ॥ १४ ॥ तिअनुमानात्त्वद्भार्यात्वानुमानका
मेत्याक्रोशाल्लिंगाज्जानामीत्यन्वयः ॥ ९ ॥ १० ॥ आत्मनापंचमंमंत्रिचतुष्टयसहितंमामित्यर्थः ॥ ११ ॥ आनयिष्यामिआनेष्यामिदृष्टेत्यत्रप्रमाणदर्शी
नमिदं ॥ १२ ॥ १३ ॥ गहनांदुष्प्रवेशां ॥ १४ ॥

१५॥१६॥ हाप्रियेइतीयत्रसंधिरार्षः॥१७॥ हृदीति॥ प्रियासंबंधेनप्रीत्यतिशयात्॥१८॥१९॥२०॥ शाड्वलम्भूम्युत्सर्गेलिंगमाहतथारूपमिति॥ अभग्न
नयायथापूर्वरूपमित्यर्थः॥२१॥ नाहमिति॥ ऊर्ध्वदृस्यापरस्त्रीत्वेनकदाप्यदर्शनादितिभावः॥२२॥२३॥ कंदेशंसुहृद्वेषेणेतिशेषः प्राणप्रियाप्राणेभ्यो

उत्तरीयंग्रहीत्वातुसनान्याभरणानिच॥ इदंपश्येतिरामायदर्शयामासवानरः॥१५॥ ततोग्रहीत्वावासस्तुशुभान्याभ
रणानिच॥ अभवद्बाष्पसंरुद्धोनीहारेणवचंद्रमाः॥१६॥ सीतास्नेहप्रवृत्तेनसतुबाष्पेणदूषितः॥ हाप्रियेतिरुद
न्धैर्यमुत्सृज्यन्यपतत्क्षितौ॥१७॥ हृदिकृत्वासबहुशस्तमलंकारमुत्तमं॥ निशश्वासभृशंसर्पोबिलस्थइवरो
षितः॥१८॥ अविछिन्नाश्रुवेगस्तुसौमित्रिंप्रेक्ष्यपार्श्वतः॥ परिदेवयितुंदीनंरामःसमुपचक्रमे॥१९॥ पश्यल
क्ष्मणवैदेह्यासंत्यक्तंह्रियमाणया॥ उत्तरीयमिदंभूमौशरीराद्भूषणानिच॥२०॥ शाड्वलिन्यांध्रुवंभूम्यांसीत
याह्रियमाणया॥ उत्सृष्टंभूषणमिदंतथारूपंहिदृश्यते॥२१॥ एवमुक्तस्तुरामेणलक्ष्मणोवाक्यमब्रवीत्॥
नाहंजानामिकेयूरेनाहंजानामिकुंडले॥२२॥ नूपुरेत्वभिजानामिनित्यंपादाभिवंदनात्॥ ततस्तुराघवोवा
क्यंसुग्रीवमिदमब्रवीत्॥२३॥ ब्रूहिसुग्रीवकंदेशंह्रियंतीलक्षितात्वया॥ रक्षसारौद्ररूपेणममप्राणप्रिया
हृता॥२४॥ क्ववावसतितद्रक्षोमहद्व्यसनदंमम॥ यन्निमित्तमहंसर्वान्नाशयिष्यामिराक्षसान्॥२५॥ ६॥

पीत्यप्राणसंबंधस्यतदधीनत्वादितिभावः॥२४॥ यन्निमित्तंप्रियापहारनिमित्तं॥२५॥ श्रीरामायरामचन्द्रायश्रीकृष्णायनमः

२९ ॥ विमथ्य वंचयित्वा ॥ ३० ॥ सरवमानः ॥ इतिरामाभिरामेरामायणतिलकेकिष्किंधाकांडेषष्ठःसर्गः ॥ ६ ॥ एवमिति । तस्यपापरक्षसःपापकृतव
तोरक्षसोनिलयंनिलयस्थानं । गुप्तवासस्थानंसर्वथानजानेनहीदृशंपापंकर्मकृत्वाराजधान्यांवस्तुमर्हतीतिभावः सामर्थ्यंशौर्यादिविक्रमंः
विशेषेणाक्रामतिपादविक्षेपंकरोति । यच्चनदासनगरंदेशेकुलेयस्येमनेनरक्षःकुलजत्वंध्वनितंतज्ज्ञानेएवेतिशेषः । वाशब्दोन्वर्थेअम

हरतामैथिलींयेनमांचरोपयताध्रुवं ॥ आत्मनोजीवितांतायमृत्युद्वारमपाहृतं ॥ २९ ॥ ममदयितनमाहृताव
नाङ्जनिचरेणविमथ्ययेनसा ॥ कथयममरिपुंत्वमद्यवैप्लवगपतेयमसन्निधिंनयामि ॥ ३० ॥ इत्यार्षेश्रीम
द्रामायणेकिष्किंधाकांडेषष्ठःसर्गः ॥ ६ ॥ एवमुक्तस्तुसुग्रीवोरामेणार्त्तेनवानरः अब्रवीत्प्रांजलिर्वाक्यंसबा
ष्पंबाष्पगद्गदः ॥ १ ॥ नजानेनिलयंतस्यसर्वथापापरक्षसः ॥ सामर्थ्यंविक्रमंवापिदौष्कुलेयस्यवाकुलं ॥ २ ॥
सत्यंतुप्रतिजानामित्यजशोकमरिंदम करिष्यामितथायत्नंयथाप्राप्स्यसिमैथिलीं ॥ ३ ॥ रावणंसगणं
हत्वापरितोष्यात्मपौरुषं ॥ तथास्मिकर्त्तानचिराद्यथाप्रीतोभविष्यसि ॥ ४ ॥ अलंवैक्लव्यमालंब्यधैर्यमा
त्मगतंस्मर ॥ त्वद्विधानोनसदृशमीदृशंबुद्धिलाघवं ॥ ५ ॥

॥ एवलंकाद्वीपंनिर्दिश्य·सहिदेशंतुवध्यस्यरावणस्यदुरात्मनः
राक्षसाधिपतेर्वासःसहस्राक्षसमद्युतेरिति । हनूमदादिप्रेषणकालिकसुग्रीववचसानविरोधः ॥ १ ॥ २ ॥ यत्नमप्यनावज्ञानामितथापितदुपवर्ण
नंनिष्फलंतावन्मात्रज्ञानेपितद्यथासंभवात्क्वचिन्नगुप्तोस्थितिसंभवात् । एतावतानुध्रुवगम्यतामित्याहसत्यमित्यादि ॥ ३ ॥ परितोष्यंभवतःपरितोषार्हं
आत्मनःसपरिवारस्यममपौरुषमवलंब्येतिशेषः । ४ । नसदृशमयुक्तं । ५ ॥

६॥नांघ्रियां॥७॥सत्वयुक्तानांसत्वगुणवतां॥८॥व्यसनेइष्टवियोगजेअर्थकृच्छ्रेधननाशेभयेचौरव्याघ्रादिजेजीवितांतगेजीवितनाशप्राप
केविमृशन्प्रारब्धवेगमितिशेषः योबालिशःयश्चनित्यंवैक्लव्यमनुवर्त्तते समज्जतितुष्यार्थेभाराक्रांतानात्यतिभारवती॥१०॥अंतरंअवसरं॥११॥

मयापिव्यसनंप्राप्तंभार्याविरहजंमहत्॥ नाहमेवंहिशोचामिधैर्यंनचपरित्यजे॥६॥नाहंतामनुशोचामिप्राकृतोवान
रोपिसन् महात्माचविनीतश्चकिंपुनर्धृतिमान्महान्॥७॥बाष्पमापतितंधैर्यान्निग्रहीतुंत्वमर्हसि॥मर्यादांसत्वयु
क्तानांधृतिंनोत्स्रष्टुमर्हसि॥८॥व्यसनेवार्थकृच्छ्रेवाभयेवाजीवितांतगे॥विमृशंश्चस्वयाबुध्याधृतिमान्नावसी
दति॥९॥बालिशस्तुनरोनित्यंवैक्लव्यंयोनुवर्त्तते॥समज्जत्यवशःशोकेभाराक्रांतेवनौर्जले॥१०॥एषोंजलिर्म
याबद्धःप्रणयात्वांप्रसादये॥पौरुषंश्रयशोकस्यनांतरंदातुमर्हसि॥११॥येशोकमनुवर्त्तंतेनतेषांविद्यतेसु
खं॥तेजश्चक्षयतेतेषांनत्वंशोचितुमर्हसि॥१२॥शोकेनाभिप्रपन्नस्यजीवितेचापिसंशयः॥सशोकंत्यजराजें
द्रधैर्यमाश्रयकेवलम्॥१३॥हितंवयस्यभावेनब्रूमिनोपदिशामिते॥वयस्यतांपूजयन्मेनत्वंशोचितुमर्ह
सि॥१४॥मधुरंसांत्वितस्तेनसुग्रीवेणसराघवः॥मुखमश्रुपरिक्लिन्नंवस्त्रांतेनप्रमार्जयत्॥१५॥प्रकृति
स्थस्तुकाकुत्स्थःसुग्रीववचनात्प्रभुः॥संपरिष्वज्यसुग्रीवमिदंवचनमब्रवीत्॥१६॥ ॥ ॥ ॥

१२॥ १२॥ १३॥ब्रूमिब्रवीमि॥१४॥प्रमार्जयत्प्रामार्जयत्॥१५॥ १६॥श्रीरामायरामचन्द्रायश्रीकृष्णायवासुदेवायनमः॥

वयस्यतांमित्रत्वं ३

स्वि २

कर्त्तव्यंयत्नशोकनाशार्थमितिशेषः ॥ १७ ॥ प्रकृतिस्थःस्वभावस्थोदुःखहीनइत्यर्थः अस्मिन्कालेव्यसनकाले रावणस्यसंहारेचेतिशेषः मयाच
यदनुष्ठेयंतवेतिशेषः वर्षास्विवसुक्षेत्रेउप्तवीजमितिशेषः ॥ संपद्यतेसफलंभविष्यतीत्यर्थः शैघ्र्यप्रत्यायनायवर्त्तमानप्रयोगः ॥ २० ॥

रावणस्यसंहारेचे°
तिशेषः

कर्त्तव्यंयद्वयस्येनस्निग्धेनचहितेनच ॥ अनुरूपंचयुक्तंचकृतंसुग्रीवतत्त्वया ॥ १७ ॥ एषचप्रकृतिस्थोहमनुनीतस्त्व
यासखे ॥ दुर्लभोहीदृशोबंधुरस्मिन्कालेविशेषतः ॥ १८ ॥ किंतुयत्नस्त्वयाकार्योमैथिल्याःपरिमार्गणे ॥ राक्षसस्य
चरौद्रस्यरावणस्यदुरात्मनः ॥ १९ ॥ मयाचयदनुष्ठेयंविस्रब्धेनतदुच्यतां ॥ वर्षास्विवचसुक्षेत्रेसर्वंसंपद्यतेत
व ॥ २० ॥ मयाचयदिदंवाक्यमभिमानात्समीरितं ॥ तत्त्वयाहरिशार्दूलतत्त्वमित्युपधार्यतां ॥ २१ ॥ अनृतंनोक्त
पूर्वंमेनचवक्ष्येकदाचन ॥ एतत्तेप्रतिजानामिसत्येनैवशपाम्यहं ॥ २२ ॥ ततःप्रहृष्टःसुग्रीवोवानरैःसचि
वैःसह ॥ राघवस्यवचःश्रुत्वाप्रतिज्ञातंविशेषतः ॥ २३ ॥ एवमेकांतसंपृक्तौततस्तौनरवानरौ ॥ उभावन्योन्य
सदृशंसुखंदुःखमभाषतां ॥ २४ ॥ महानुभावस्यवचोनिशम्यहरिर्नृपाणामधिपस्यतस्य ॥ कृतंसमेनेहरिवी
रमुख्यस्तदाचकार्यंहृदयेनविद्वान् ॥ २५ ॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेसप्तमःसर्गः ॥ ७ ॥

इदंवाक्यंवालिनंवधिष्यामीतिवाक्यं अभिमानात्तवइव ॥ २१ ॥ एतदनृतवचनाभावं ॥ सत्येनतत्साक्षिनयेत्यर्थः ॥ २२ ॥ २३ ॥ सं
पृक्तौकृतसख्यसंपन्नौ अभाषतां अभाषेतां ॥ २४ ॥ २५ ॥ शारवमानतः ॥ इतिरामाभिरामेश्रीरा॰ति॰किष्किंधाकांडेसप्तमःसर्गः ॥ ७

नेन वाक्येन अनन्तरं नोक्तं पूर्वं मे इत्यादिवाक्येन ॥ १ ॥ उपपन्नः संपन्नः ॥ २ ॥ ३ ॥ सभाज्यः पूज्यः यस्य तेन राघववंशजं मित्रं लब्धं ॥ ४ ॥ अनुरू
पः योग्यः ज्ञास्यसे अनुरूप्यमिति शेषः ॥ ननु वक्तुं समर्थः आत्मप्रशंसामरणामिति न्यायात् ॥ ५ ॥ भूयिष्ठमधिकं प्रीतिर्निश्चला भ
वति वयस्यानामिति शेषः ननु वक्तुं समआत्मवतां स्वाधीनानां ॥ ६ ॥ साधूनां वयस्यानां साधवो वयस्याः रजतमित्याद्युपलक्षणं ॥ ७ ॥ वय

परितुष्टस्तु सुग्रीवस्तेन वाक्येन हर्षितः ॥ लक्ष्मणस्याग्रजं शूरमिदं वचनमब्रवीत् ॥ १ ॥ सर्वथाहमनुग्राह्यो देवतानां न
संशयः ॥ उपपन्नो गुणोपेतः सखा यस्य भवान्मम ॥ २ ॥ शक्यं खलु भवेद्राम सहायेन त्वयानघ ॥ सुरराज्यमपि
प्राप्तुं स्वराज्यं किं पुनः प्रभो ॥ ३ ॥ सोहं सभाज्यो बन्धूनां सुहृदां चैव राघव ॥ यस्याग्निसाक्षिकं मित्रं लब्धं राघववंशजं
॥ ४ ॥ अहमप्यनुरूपस्ते वयस्यो ज्ञास्यसे शनैः ॥ न तु वक्तुं समर्थोहं त्वयि आत्मगतान्गुणान् ॥ ५ ॥ महात्मनां तु भूयि
ष्ठं त्वद्विधानां कृतात्मनां ॥ निश्चला भवति प्रीतिर्धैर्यमात्मवतां वर ॥ ६ ॥ रजतं वा सुवर्णं वा शुभान्याभरणानि वा
अविभक्तानि साधूनामवगच्छन्ति साधवः ॥ ७ ॥ आढ्यो वापि दरिद्रो वा दुःखितः सुखितोपि वा ॥ निर्दोषश्च सदो
षश्च वयस्यः परमा गतिः ॥ ८ ॥ धनत्यागः सुखत्यागो देशत्यागोपि वानघ ॥ वयस्यार्थे प्रवर्त्तन्ते स्नेहं दृष्ट्वा तथा
विधं ॥ ९ ॥ तत्तथेत्यब्रवीद्रामः सुग्रीवं प्रियदर्शनं ॥ लक्ष्मणस्याग्रतो लक्ष्म्या वासवस्येव धीमतः ॥ १० ॥ ६ ॥

स्यः परमा गतिः वयस्यस्येति शेषः ॥ तथाविधं स्वरसतोषणादित्यागप्रवर्त्तकमित्यर्थः ॥ ९ ॥ तत्तथेति यदुक्तं वयस्ययोर्धनाविभागादिकं तत्सममपि
संमतमित्यब्रवीदित्यर्थः ॥ लक्ष्म्या कांत्याग्रतो रामः वासवस्येव वासवसदृशस्य लक्ष्मणस्येत्यन्वयः लक्ष्मणस्याग्रत इत्येतेन यथा सम लक्ष्मणस्य
मैत्रीं तथैव नवायीत्यपि सत्वेनं ॥ १० ॥

96

ततः तद्दिनापगमोत्तरं द्वितीयदिने इत्यर्थः। स्थितं दृष्ट्वा भूमाविति शेषः ॥११॥ ईषत्पुष्पं पत्राढ्यं पत्रबहुलं सराघवः सुग्रीवो निषसाद ।१३।१४।
सुखोपविष्टं रामं तु दृष्ट्वेति शेषः ॥१५॥१६॥ अहं विनिकृत इति पूर्वं दिवसोक्तार्थस्मारणं तदर्थस्यावश्यानुष्ठेयत्वाभिप्रायेण ।१७।१८।१९

ततो रामं स्थितं दृष्ट्वा लक्ष्मणं च महाबलं ॥ सुग्रीवः सर्वतश्चक्षुर्वने लोलमपातयत् ।११। स ददर्श ततः शालमविदू
रे हरीश्वरः सुपुष्पमीषत्पत्राढ्यं भ्रमरैरुपशोभितं ॥१२॥ तस्यैकां पर्णबहुलां शाखां भंक्त्वा सुशोभितां ॥ रामस्यास्तीर्य
सुग्रीवो निषसाद सराघवः ॥१३॥ तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणं ॥ सालशाखां समुत्पाट्य विनीतमुप
वेशयत् ॥१४॥ सुखोपविष्टं रामं तु प्रसन्नमुदधिं यथा ॥ सालपुष्पावसंकीर्णे तस्मिन् गिरिवरोत्तमे ॥१५॥ ततः प्र
हृष्टः सुग्रीवः श्लक्ष्णया शुभया गिरा। उवाच प्रणयाद्रामं हर्षव्याकुलिताक्षरं ॥१६॥ अहं विनिकृतो भ्रात्रा चरा
म्येष भयार्दितः ॥ ऋष्यमूकं गिरिवरं हृतभार्यः सुदुःखितः ॥१७॥ सोहं त्रस्तो भये मग्नो वने संभ्रांतचेतनः वालि
नानिकृतो भ्रात्रा कृतवैरश्च राघव ॥१८॥ वालिनो मे भयार्त्तस्य सर्वलोकाभयंकर। ममापि त्वमनाथस्य प्रसा
दं कर्त्तुमर्हसि ।१९। एवमुक्तस्तु तेजस्वी धर्मज्ञो धर्मवत्सलः। प्रत्युवाच स काकुत्स्थः सुग्रीवं प्रहसन्निव ॥२०॥
उपकारफलं मित्रमपकारोरिलक्षणं। अद्यैव तं वधिष्यामि तव भार्यापहारिणं ॥२१॥ छ ॥ ॥

२० ॥ नतुभ्रातृत्वमरित्वेन विरुद्धमिति निजनाशंकायां स्वयमेवोत्तरयति। उपकारेत्यादि उपकाररूपफलमेव मित्रत्वप्रयोजकं न त्वेक

डा:१

कार्त्तिकेयस्यस्कंदस्योत्पत्तिक्षेत्रभूतंवनंशरवणांतत्रोत्पन्नकाः ॥२२॥ शोभनानिपर्वाणियेषांते ॥२३॥ भ्रातरंअमित्रमितिएकोदरजन्ममात्रेणत
थाव्यवहृतंपश्यदित्रैर्दिवसैरितिशेषः ॥२४॥२५॥ दुःखाशयात्तुनराहेरामेत्यादिशोकार्त्तगतिर्वाहृदयस्यत्वाच्चत्वयिदेवनं ॥२६॥ वयस्यत्वमुपपाद

इमेहिमेमहाभागपत्रिणस्तिग्मतेजसः ॥ कार्त्तिकेयवनोद्भूताःशराहेमविभूषिताः ॥ २२ ॥ कंकपत्रपरिछन्नामहेंद्राशनि
संनिभाः ॥ सुपर्वाणःसुतीक्ष्णाग्राःसरोषाभुजगाइव ॥ २३ ॥ वालिसंज्ञममित्रंते ॥ भ्रातरंकृतकिल्विषं ॥ शरैर्विनिहतं
पश्यविकीर्णमिवपर्वतं ॥ २४ ॥ राघवस्यवचःश्रुत्वासुग्रीवोवाहिनीपतिः ॥ प्रहर्षमतुलंलेभेसाधुसाध्वितिचाब्रवी
त् ॥ २५ ॥ रामशोकाभिभूतोहंशोकार्त्तानांभवान्गतिः ॥ वयस्यइतिकृत्वाहित्वय्यहंपरिदेवये ॥ २६ ॥ त्वंहिपाणि
प्रदानेनवयस्योमेग्निसाक्षिकं ॥ कृतःप्राणैर्बहुमतःसत्येनचशपाम्यहं ॥ २७ ॥ वयस्यइतिकृत्वाचविस्रब्धःप्रवदाम्य
हं ॥ दुःखमंतर्गतंयन्मेमनोहरतिनित्यशः ॥ २८ ॥ एतावदुक्त्वावचनंबाष्पदूषितलोचनः ॥ बाष्पदूषितयावाचा
नोच्चैःशक्नोतिभाषितुं ॥ २९ ॥ बाष्पवेगंतुसहसानदीवेगमिवागतं ॥ धारयामासधैर्येणसुग्रीवोरामसन्निधौ ॥
॥ ३० ॥ संनिगृह्यतुतंबाष्पंप्रमृज्यनयनेशुभे ॥ विनिश्वस्यचतेजस्वीराघवंपुनरब्रवीत् ॥ ३१ ॥ छ ॥ ॥

यन्कतृणात्तुत्पादयति ॥ त्वंहीति ॥ अग्निसाक्षिकंपाणिप्रदानेनवयस्यइत्यन्वयः ॥२७॥ अवकृत्यमपिवयस्यइतिकृत्वाविस्रब्धो
विश्वस्तोवदामिहरतिक्षीणंकरोति ॥२८॥ नशक्नोतिनाशक्नोत् ॥२९॥३०॥३१॥ श्रीरामायरामचन्द्रायनमः ॥ छ ॥

97

वालिविनिकारं संक्षेपेणाह ॥ पुराहमिति स्वाद्राज्यात् ॥ विद्यमानज्येष्ठाचिनाशनरराज्यात् ॥ अवरोपितो पहृताधिकारः निर्धूतो भर्त्सितः ॥ ३२ ॥
वधनेषु वंधनागारेषु संयताः वद्धाः ॥ ३३ ॥ नत्वमुक्तामद्धायनत्वेरिताः ॥ ३४ ॥ एतयाशंकया मद्वधाय वालिप्रेरितत्वशंकया ॥ नोपसर्पा

पुराहं वालिना राम राज्यात्स्वादवरोपितः ॥ परुषाणि च संश्राव्य निर्धूतोस्मि वलीयसा ॥ ३२ ॥ हृता भार्या च मे तेन प्राणेभ्यो
पि गरीयसी ॥ सुहृदश्च मदीया ये संयता वंधनेषु ते ॥ ३३ ॥ यत्नवांश्च सुदुष्टात्मा मद्विनाशाय राघव ॥ वहुशस्तत्प्रयुक्ता
श्च वानरा निहता मया ॥ ३४ ॥ शंकया त्वेतया हं च दृष्ट्वा त्वामपि राघव ॥ नोपसर्पाम्यहं भीतो भये सर्वे हि विभ्यति ॥ ३५ ॥
केवलं हि सहाया मे हनुमत्प्रमुखास्त्विमे ॥ अतो हं धारयाम्यद्य प्राणान्कृच्छ्रगतोपि सन् ॥ ३६ ॥ एते पि कपयः स्निग्धा
मां रक्षंति समंततः ॥ सह गच्छंति गंतव्ये नित्यं तिष्ठंति चास्थिते ॥ ३७ ॥ संक्षेपस्त्वेष मे राम किमुक्त्वा विस्तरं हि ते ॥ स मे
ज्येष्ठो रिपुर्भ्राता वाली विश्रुतपौरुषः ॥ ३८ ॥ तद्विनाशे पि मे दुःखं प्रमृष्टं स्यादनंतरं ॥ सुखं मे जीवितं चैव तद्विनाश
निवंधनम् ॥ ३९ ॥ एष मे राम शोकांतः शोकार्त्तेन निवेदितः ॥ दुःखितः सुखितो वापि सख्युर्नित्यं सखा गतिः ॥ ४० ॥
श्रुत्वैतच्च वचो रामः सुग्रीवमिदमब्रवीत् ॥ किन्निमित्तमभूद्वैरं श्रोतुमिच्छामि तत्वतः ॥ ४१ ॥

भितो सर्पभये ॥ यत्किंचिद्भयत्रा
तो विभ्यति ॥ सर्वत एवेति शेषः ॥ ३५ ॥ ३६ ॥ ३७ ॥ संक्षेपस्त्वेष इत्येकं श्लोकार्थः स मे ज्येष्ठ इति तद्विनाशेपीति ॥ यद्यपि भ्रातृनाशो दुःखाय त
थापि ॥ अनंतरं संप्रति विद्यमानं मे दुःखं तद्विनाशे एव प्रमृष्टं स्यात् ॥ अपि रेवार्थे न देवाहं सुखमिति ॥ ३९ ॥ ४० ॥ तन्निमित्तं तत्वतः श्रोतुमि

॥ ४१ ॥

तदनेनवैरस्यकारणंश्रुत्वायुवयोर्बलाबलंचश्रुत्वानंतर्यात्तदनंतरोपन्त्वविमर्शान्तंप्रधार्यत्रिश्चित्यहिनिश्चयेनतवसुखंत्वत्सुखसाधनंवा॰
लिवधंविधास्यामि॥४२॥अंभःसंबंधीप्राहृट्कालिकोवेगइवमेअमर्षोवर्धते॥४३॥यावदारोप्यते॥आरोपयिष्यामिस्पष्टोविस्पष्टःरिपु

सुखंहिकारणंश्रुत्वावैरस्यतववानर॥आनंतर्याद्विधास्यामिसंप्रधार्यबलाबलम्॥४२॥बलवान्हिममामर्षःश्रु
त्वात्वामवमानितं॥वर्धतेहृदयोत्कंपीप्राहृट्वेगइवांभसः॥४३॥हृष्टःकथयविस्रब्धोयावदारोप्यतेधनुःसृष्ट
श्चहिमयाबाणोनिरस्तश्चरिपुस्तव॥४४॥एवमुक्तस्तुसुग्रीवःकाकुत्स्थेनमहात्मना॥प्रहर्षमतुलंलेभेचतुर्भिः
सहवानरैः॥४५॥ततःप्रहृष्टवदनःसुग्रीवोलक्ष्मणाग्रजे वैरस्यकारणंतत्त्वमाख्यातुमुपचक्रमे॥४६॥इत्या
र्षेश्रीमद्रामायणेकिष्किंधाकांडेअष्टमःसर्गः॥८॥वालीनाममममभ्राताज्येष्ठःशत्रुनिषूदनः॥पितुर्बहुम
तोनित्यंममचापितथापुरा॥१॥पितर्युपरतेऽस्मिन्ज्येष्ठोयमितिमंत्रिभिः॥कपीनामीश्वरोराज्येकृतःपरमसं
मतः॥२॥राज्यंप्रशासतस्तस्यपितृपैतामहंमहत्॥अहंसर्वेषुकालेषुप्रणतःप्रेष्यवत्स्थितः॥३॥मायावी
नामतेजस्वीपूर्वजोदुंदुभेःसुतः॥तेनतस्यमहद्वैरंवालिनःस्त्रीकृतंपुरा॥४॥

(निरस्तश्चसमुच्चयालंकारःव्यंग्यातिशयोक्ति
श्च॥४४॥४५॥तत्त्वंतात्त्विकंवैरस्यकारणमित्यन्वयः॥४६॥इतिरामाभिरामेश्रीरा०रा०ति०किष्किं०अष्टमःसर्गः॥८॥उपक्रांतमेवाह।वालीतिपितुःक्षे
त्रिणात्मात्रैक्याच्चभ्रातृत्वंभीमार्जुनादिवत्॥१॥कपीनांराज्येइत्यन्वयः॥२॥पितृपैतामहंचार्षत्वादुत्तरपदवृद्धिः॥३॥मायावीत्यन्वर्थंनाम॥पूर्व
जोज्येष्ठःस्त्रीकृतंस्त्रीनिमित्तंअयमितिहासःकश्चित्पुराणेशोध
नीयोवृद्धदर्शिभिः॥४॥

सुप्तेजनेरात्रौस्तुप्रजनेभागेऽर्धरात्रेरणनिमित्तं॥५॥६॥७॥८॥९॥१०॥तरणौराघुनंदनत्वंविवरंविलंआसाद्यप्राप्यविष्ठितोस्थितो॥११॥विलंप्रवि
ष्टंदृष्ट्वा॥१२॥एतद्वचोरिपुवधायविलप्रवेशाववचनंयाचितःसहप्रवेष्टामितिशेषःस्वपादाभ्यांशापयित्वास्वपादशपथपूर्वंसहप्रवेशाः

सतुसुप्तेजनेरात्रौकिष्किंधाद्वारमागतः।नर्दतिस्मसुसंरब्धोवालिनंचाह्वयद्रणे॥५॥प्रसुप्तस्तुममभ्रातानर्दतोभै
रवस्वनं॥श्रुत्वानममृषेवालीनिष्पपातजवात्तदा॥६॥सतुवैनिःसृतःक्रोधात्तंहंतुमसुरोत्तमं।वार्यमाणस्ततःस्त्री
भिर्मयाचप्रणतात्मना॥७॥सतुनिर्धूयतान्सर्वान्निर्जगाममहाबलः॥ततोहमपिसौहार्दान्निःसृतोवालिनासह॥
८॥सतुमेभ्रातरंदृष्ट्वामांचदूरादवस्थितं॥असुरोजातसंत्रासःप्रदुद्रावतदाभृशं॥९॥तस्मिन्द्रवतिसंत्रस्तेह्यावां
द्रुततरंगतौ॥प्रकाशोपिकृतोमार्गश्चंद्रेणोद्गच्छतातदा॥१०॥सतृणैरावृतंदुर्गंधरण्याविवरंमहत्॥प्रविवे
शासुरोवेगादावामासाद्यविष्ठितौ॥११॥तंप्रविष्टंरिपुंदृष्ट्वाविलंरोषवशंगतः॥मामुवाचततोवालीवचनंक्षु
भितेंद्रियः॥१२॥इहतिष्ठाद्यसुग्रीवविलद्वारिसमाहितः॥यावदत्रप्रविश्याहंनिहन्मिसमरेरिपुं॥१३॥मया
त्वेतद्वचःश्रुत्वायाचितःसपरंतपः॥शापयित्वासमांपद्भ्यांप्रविवेशविलंततः॥१४॥तस्यप्रविष्टस्यविलंसाग्रः
संवत्सरोगतः॥स्थितस्यचविलद्वारिसकालोव्यत्यवर्ततः॥ १५॥

॥त्वेवार्यपावन्मदागमनंतावद्विलद्वारितिष्ठेतिचोक्त्वेत्यर्थः
१४॥साग्रःसंवत्सरःकिंचिदधिकःसंवत्सरःद्वारिस्थितस्यचममस्तकलःसाग्रःसंवत्सरोव्यत्यवर्ततअतिक्रांतःतावत्पर्यंतंमयाततैवास्थितमि

ततोपश्याहमंभ्रातरंनपश्यामि यदाऽहंभ्रातरंनष्टंदर्शनाविषयंजानंस्नेहादागतसंभ्रमः आगतक्षोभोजातः पापशंकिमरणशंकिमेमनोजातंच ॥१६॥ ॥१७॥ संग्रामेरतस्यनिरतस्यक्रोशतोपिगुरोः स्वनोनश्रोत्रमागतमित्यनुकर्ष ॥१८॥ चिह्नैर्विलद्वारिरुधिरनिःसरणसुरीयसंग्रामक्रोशन

अहंतुनष्टंतंज्ञात्वास्नेहादागतसंभ्रमः ॥ भ्रातरंनप्रपश्यामि पापशंकिचमेमनः ॥१६॥ अथदीर्घस्यकालस्यविलात्तस्माद्विनिःसृतंसफेनंरुधिरंदृष्ट्वाततोहंभृशदुःखितः ॥१७॥ नर्दतामसुराणांचध्वनिर्मेश्रोत्रमागतः निरस्तस्यचसंग्रामेक्रोशतोपिस्वनोगुरोः ॥१८॥ अहंत्ववगतोबुद्ध्याचिह्नैस्तैर्भ्रातरंहतं ॥ पिधायचविलद्वारंशिलयागिरिमात्रया ॥१९॥ शोकार्तश्चोदकंकृत्वाकिष्किंधामागतःसखे ॥ गूहमानस्यमेतत्त्वंयत्नतोमंत्रिभिःश्रुतं ॥२०॥ ततोहंतैःसमागम्यसमेतैरभिषेचितः ॥ राज्यंप्रशासतस्तस्यन्यायतोममराघव ॥२१॥ आजगामरिपुंहत्वादानवंसतुवानरः ॥ अभिषिक्तंतुमांदृष्ट्वाक्रोधात्संरक्तलोचनः ॥२२॥ मदीयान्मंत्रिणोबध्वापरुषंवाक्यमब्रवीत् ॥ निग्रहेचसमर्थस्यतंपापंप्रतिराघव ॥२३॥ नप्रावर्ततमेबुद्धिर्भ्रातृगौरवयंत्रिता ॥ हत्वाशत्रुंसमेभ्राताप्रविवेशपुरंतदा ॥२४॥

॥चिह्नैर्भ्रातरंहतमवगतःज्ञातवान्पिधायराक्षसनिर्गमशंकया ॥१९॥ यत्नतोगूहमानस्यापिमेतत्त्वंवालिहननंमत्तविषयंमंत्रिभिर्वालिमंत्रिभिःश्रुतं ॥२०॥ समेतैर्मिलितैःतस्यराज्यमितिनिबुध्यैवन्यायतःप्रशासतोममसमीपमाजगामसवानरइत्यन्वयः ॥२१॥ ॥२२॥ मदीयान्मदभिषेककर्तॄन् निग्रहेसमर्थस्यापिमेबुद्धिर्भ्रातृगौरवेणयंत्रितासंकुचितासतीतंपापंप्रतिनिग्रहायनप्रावर्तत २३ उक्तानुवादपूर्वमवशिष्टव्यापारकथनंहत्वेत्यादि ॥२४॥

99

२५॥अपितथापीत्यर्थः॥२६॥इतिरामाभिरामेश्रीरा॰रा॰वा॰किष्किंधाकांडेनवमसर्गः॥९॥संरब्धंक्रोधावेशादेवक्षुभितचित्तंहितकाम्यया आत्महितेच्छया।
१॥२॥३॥४॥५॥विषादात्प्राविशमित्यन्वयः॥६॥अभिषिक्तोबलात्॥नकामेन नमदीयराज्येच्छया॥नत्वस्मान्मेदैवागतापराधंक्षंतुमर्हसि।यथापुरातवसे

मानयंस्तंमहात्मानंयथावच्चाभिवादयं॥उक्ताश्चनाशिषस्तेनप्रहृष्टेनांतरात्मना॥२५॥नत्वापादावहंतस्यमुकुटेनास्पृ
शंप्रभो॥अपिवालीममक्रोधान्नप्रसादंचकारसः॥२६॥इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेनवमःसर्गः॥९॥
ततःक्रोधसमाविष्टंसंरब्धंतमुपागतं॥अहंप्रसादयांचक्रेभ्रातरंहितकाम्यया॥१॥दिष्ट्यासिकुशलीप्राप्तोनिहतश्च
त्वयारिपुः॥अनाथस्यहिमेनाथस्त्वमेकोनाथनंदन॥२॥इदंबहुशलाकंतेपूर्णचंद्रमिवोदितं॥छत्रंसवालव्यजनं
प्रतीच्छस्वमयाधृतं॥३॥आर्तस्तत्रबिलद्वारिस्थितःसंवत्सरंनृप।दृष्ट्वाचशोणितंद्वारिबिलाच्चापिसमुत्थितं॥४॥
शोकसंविग्नहृदयोभृशंव्याकुलितेंद्रियः।अपिधायबिलद्वारंशैलशृंगेणतत्तदा॥५॥तस्माद्देशादपक्रम्यकिष्किं
धांप्राविशंपुनः॥विषादात्त्विहमांदृष्ट्वापौरैर्मंत्रिभिरेवच॥६॥अभिषिक्तोनकामेनतन्मेक्षंतुंत्वमर्हसि॥त्वमेव
राजामानार्हःसदाचाहंयथापुरा॥७॥राजभावेनियोगोयंममत्वद्विरहात्कृतः॥सामात्यपौरनगरंस्थितंनिहतकंटकं॥८॥

वकस्तथैवसदाइदानीमपीत्यर्थः॥७॥राजभावे॥राज्येऽयंममनियोगोमंत्रिभिस्त्वद्विरहात्कृतोऽमात्यपौरसहितंनगरंनिहतकंटकंअराजत्वप्रयुक्त
दोषरहितंकर्तुमितिशेषः॥नत्वेदंत्वदीयंराज्यंमयिन्यासभूतंस्थितं।अहंतवनिर्यातयामिमारोषंकृथाइत्यन्वयः॥८॥श्रीरामचन्द्रायनमः॥

॥रा·वा·कि॥
॥२३॥

९॥ १०॥ शून्यदेशस्यराजहीनदेशस्ययापरेषांजिगीषातयातन्निवृत्तिहेतुना॥ मशकार्थोधूमइतिवदयंप्रयोगः॥ ११॥ तत्रउवाचेत्यत्रवाच्यवचनजातमित्यर्थः॥ प्रकृतीःस्वीयप्रजाः॥ १२॥ मांप्रतिपरमंगर्हितंवाक्यंसुहृदांमध्येत्राह॥ ममविगर्हणाहेतुंवस्सभासदामाहेत्याह॥ विदितंवइति॥ युष्माकंविदितंप्रत्यक्षसिद्धं॥ १३॥

न्यासभूतमिदंराज्यंतवनिर्यातयाम्यहं॥ माचरोषंकृथाःसौम्यममशत्रुनिषूदन॥ ९॥ याचेत्वांशिरसाराजन्मयाबद्धोयमंजलिः॥ वलादस्मिन्समागम्यमंत्रिभिःपुरवासिभि॥ १०॥ राज्यभावेनियुक्तोहंशून्यदेशजिगीषया॥ स्निग्धमेवंब्रुवाणंमांसविनिर्भर्त्स्यवानरः॥ ११॥ धिक्त्वामितिचमामुक्त्वावहुतत्तदुवाचह॥ प्रकृतीश्चसमानीयमंत्रिणश्चैवसंमतान्॥ १२॥ मामाहसुहृदांमध्येवाक्यंपरमगर्हितं॥ विदितंवोयथारात्रौमायावीसमहासुरः॥ १३॥ मांसमाह्वयतक्रूरोयुद्धाकांक्षीसदापुरा॥ तस्यनर्दापितंश्रुत्वानिःसृतोहंनृपालयात्॥ १४॥ अनुयातश्चमांतूर्णमयंभ्रातासुदारुणः॥ सतुदृष्ट्वैवमांरात्रौसद्वितीयंमहावलः॥ १५॥ प्राद्रवद्भयसंत्रस्तोवीक्ष्यावांसमुपागतौ॥ अभिद्रुतस्तुवेगेनविवेशसमहाविलं॥ १६॥ तंप्रविष्टंविदित्वातुसुघोरंसुमहद्विलं॥ अयमुक्तोथमेभ्रातामयातुक्रूरदर्शनः॥ १७॥ अहत्वानास्तिमेशक्तिःप्रतिगंतुमितःपुरीं॥ विलद्वारिप्रतीक्षत्वंयावदेनंनिहन्म्यहं॥ १८॥ स्थितोयमितिमत्वाहंप्रविष्टस्तुदुरासदं॥ तंमेमार्गयतस्तत्रगतःसंवत्सरस्तदा॥ १९॥ छ॥ श्रीकृष्णार्पणमस्तु॥ छ॥

१४॥ सद्वितीयंभ्रात्रासमसहायं॥ १५॥ १६॥ १७॥ शक्तिरिच्छाशक्तिः प्रतीक्षप्रतीक्षस्व॥ १८॥ स्थितोयंविलद्वारीतिशेषः॥ १९॥ रामरामराम

॥राम·॥
॥२३॥

100

अनिर्वेदात्संवत्सरान्वेषणोपिदर्शनाभावाद्भयावहः सतुकथंचित् । हस्तोनिहतश्च ॥ समुच्चयाऽलंकारः ॥ २० ॥ भुवस्तलेऽधस्तलेयानालेत्तननतः शद्वंकुर्वतस्तस्यास्यास्रवत्तेनरुधिरौघेणपूर्णंतद्विलंदुराक्रमम्आसीत् ॥ २१ ॥ विक्रान्तंभूरंतंतंप्रसिद्धंमायाविनंसुखंसूदयित्वातुइहागन्तुंनिष्क्रामंनिर्गममार्गन्नपश्यामियतो

सतुहृष्टोमयाशत्रुरनिर्वेदाद्भयावहः ॥ निहतश्चमयासद्यःससर्वैःसहबन्धुभिः ॥ २० ॥ तस्यैवचप्रवृत्तेनरुधिरौघेणतद्बिलं ॥ पूर्णमासीद्दुराक्रामंस्तनतस्तस्यभूतले ॥ २१ ॥ सूदयित्वातुतंशत्रुंविक्रान्तंतमहंसुखं ॥ निष्क्रामंनेहपश्यामि बिलस्यपिहितंसुखं ॥ २२ ॥ विक्रोशमानस्यतुमेसुग्रीवेतिपुनःपुनः ॥ यतःप्रतिवचोनास्तिततोहम्भृशदुःखितः ॥ २३ ॥ पादप्रहारैस्तुमयाबहुभिःपरिपातितं ॥ ततोहंतेननिष्क्रम्ययथापुरमुपागतः ॥ २४ ॥ तत्रानेनास्मिसंरुद्धोराज्यंमृगयतात्मनः ॥ सुग्रीवेणनृशंसेनविस्मृत्यभ्रातृसौहृदं ॥ २५ ॥ एवमुक्त्वातुमांतत्रवस्त्रेणैकेनवानरः ॥ तदानिर्वासयामास वालीविगतसाध्वसः ॥ २६ ॥ तेनाहमपविद्धश्चहृतदारश्चराघव ॥ तद्भयाच्चमहींसर्वांक्रान्तवान्सवनार्णवां ॥ २७ ॥ ऋष्यमूकंगिरिवरंभार्याहरणदुःखितः ॥ प्रविष्टोस्मिदुराधर्षंवालिनःकारणान्तरे ॥ २८ ॥ एतत्तेसर्वमाख्यातंवैरानुकथनंमहत् ॥ अनागसामयाप्राप्तंव्यसनंपश्यराघव ॥ २९ ॥

बिलस्यसुखंपिहितं ॥ २२ ॥ २३ ॥ तेनयथाबिलद्वारमार्गेण ॥ २४ आत्मनोराज्यंमृगयतामार्गयताऽनेनतत्रबिलद्वारेसंरुद्धः निरुद्धगतिकःकृतः ॥ २५ ॥ एकेनवस्त्रेणेति अन्यत्सर्वंममहृतमित्यर्थः ॥ २६ ॥ अपविद्धोनिरस्तः ॥ २७ ॥ ऋष्यमूकंप्रविष्टोस्मि अन्यत्रनिर्भयस्थितिः कथंतत्राह । दुराधर्षमिति । मतंगशापलक्षणेकारणविशेषेसतिवालिनादुराधर्षंदुष्प्रवेशं ॥ २८ ॥

वालिन इति पंचमी॥३०॥३१॥रुषान्विताः रुष्टेन मया पातिताः॥३२॥चारित्रदूषकः निषिद्धानिषिद्धज्ञानवत्त्वे सति जीवतो भ्रातुर्भार्यापहारात्॥३३॥आत्मा
नुमानात्॥अयं शोकाब्धिमग्नोऽस्मि त्वं तारयेत्यात्मसदृशमनुमानं॥ बाढं प्राप्स्यसि॥भार्यां पुष्कलं राज्यं च॥३४॥३५॥मंडमानः॥इति रामाभिरामे श्री रा०रा०

वालिनश्च भयात्तस्य सर्वलोकभयापह॥कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात्॥३०॥एवमुक्तः स तेजस्वी धर्मज्ञो धर्म
संहितं॥वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव॥३१॥अमोघाः सूर्यसंकाशा निशिता मे शरा इमे॥तस्मिन्वालिनि दुर्वृ
त्ते पतिष्यंति रुषान्विताः॥३२॥यावत्तं नहि पश्येयं तव भार्यापहारिणं॥तावत्स जीवेत्पापात्मा वाली चारित्रदूषकः
॥३३॥आत्मानुमानात्पश्यामि मग्नस्त्वं शोकसागरे॥त्वामहं तारयिष्यामि बाढं प्राप्स्यसि पुष्कलं॥३४॥तस्य तद्वच
नं श्रुत्वा हर्षपौरुषवर्द्धनं॥सुग्रीवः परमप्रीतः सुमहद्वाक्यमब्रवीत्॥३५॥इत्यार्षे श्रीमद्रामायणे वा०किष्किं
धाकांडे दशमः सर्गः॥१०॥रामस्य वचनं श्रुत्वा हर्षपौरुषवर्धनं॥सुग्रीवः पूजयांचक्रे राघवं प्रशशंस च॥१
असंशयं प्रज्वलितैस्तीक्ष्णैर्मर्मातिगैः शरैः॥त्वं दहेः कुपितो लोकान्युगांत इव भास्करः॥ ॥२॥ ॥वालिनः पौरुषं
यत्तद्यच्च वीर्यं धृतिश्च या॥तन्ममैकमनाः श्रुत्वा विधत्स्व यदनंतरं॥३॥समुद्रात्पश्चिमात्पूर्वं दक्षिणादपि चोत्तरं॥
क्रामत्यनुदिते सूर्ये वाली व्यपगतक्लमः॥४॥

(नि०किष्किंधाकांडे दशमः सर्गः॥१०॥इदानीं वालिनो बलमाह॥रामस्येति॥वचनं वालिवधवि
षयं॥१॥राघवं प्रशशंसेत्युक्तं तां प्रशंसामाह॥असंशयमिति॥२॥यो हृष्यं बलवैभवं वीर्यं परसंहारशक्तिः धृतिः रणधैर्यं॥३॥अनुदिते सूर्ये क्रामति ब्रा
ह्मे मुहूर्ते उत्थायेति शेषः॥४॥

उर्ध्वमुन्याम्यकंदुकवदितिभाव॥५॥६॥महिषस्तद्रूपधरः॥७॥८॥ऊर्मिमंतंऊर्मिमत्वाद्याकारवंतंसमुद्रमतिक्रम्यविगणय्यतंमदधिष्ठातृदेवतामुवाच॥९

॥अथारण्यस्थशैलानांशिखराणिमहांत्यपि॥उर्ध्वमुन्याम्यतरसाप्रतिगृह्णातिवीर्यवान्॥५॥बहवःसारवंतश्चवने
षुविविधाद्रुमाः॥वालिनातरसाभग्नाबलंप्रथयतात्मनः॥६॥महिषोदुंदुभिर्नामकैलासशिखरप्रभः॥बलंना
गसहस्रस्यधारयामासवीर्यवान्॥७॥सवीर्योत्सेकदुष्टात्मावरदानेनमोहितः॥जगामसमहाकायःसमुद्रंसरितां
पतिं॥८॥ऊर्मिमंतमतिक्रम्यसागरंरत्नसंचयं॥ममयुद्धंप्रयच्छेतितमुवाचमहार्णवं॥९॥ततःसमुद्रोधर्मात्मास
मुत्थायमहाबलः॥अब्रवीद्वचनंराजन्नसुरंकालचोदितं॥१०॥समर्थोनास्मितेदातुंयुद्धंयुद्धविशारद॥श्रूयतां
त्वभिधास्यामियस्तेयुद्धंप्रदास्यति॥११॥शैलराजोमहारण्येतपस्विशरणांपरं॥शंकरश्वशुरोनाम्नाहिमवानिति
विश्रुतः॥१२॥महाप्रस्रवणोपेतोबहुकंदरनिर्झरः॥ससमर्थस्तवप्रीतिमतुलांकर्तुमर्हति॥१३॥तंभीतमितिवि
ज्ञायसमुद्रमसुरोत्तमः।हिमवद्वनमागम्यशरश्चापादिवच्युतः॥१४॥ततस्तस्यगिरेःश्वेतागजेंद्रप्रतिमाःशि
लाः॥चिक्षेपबहुधाभूमौदुंदुभिर्विननादच॥१५॥ततःश्वेतांबुदाकारःसौम्यःप्रीतिकराकृतिः॥हिमवानब्रवी
द्वाक्यंस्वएवशिखरेस्थितः॥१६॥क्लेष्टुमर्हसिमांनत्वंदुंदुभेधर्मवत्सल॥रणकर्मस्वकुशलस्तपस्विशरणोह्यहं॥१७॥

१०॥११॥१२॥१३॥१४॥गजेंद्रस्यैरावतः॥१५॥१६॥१७॥श्रीरामायरामचंद्रायश्रीकृष्णायवासुदेवायनमः॥ ६२ ॥रामरामरामराम

१८॥युद्धेऽसमर्थइतिछेदः॥१९॥अनुक्तपूर्वंइतःपूर्वंनउक्तोयुद्धदानाऽस्यतमसुरं॥२०॥२१॥एकःसशक्तःप्रसिद्धपराक्रमार्थकः॥२२॥२३॥२४॥२५॥२६॥२७॥

तस्यतद्वचनंश्रुत्वागिरिराजस्यधीमतः॥उवाचदुंदुभिर्वाक्यंक्रोधात्संरक्तलोचनः॥१८॥ यदियुद्धेऽसमर्थस्त्वंमद्भयाद्वानि
रुद्यमः॥तमाचक्ष्वप्रदद्यान्मेयोहियुद्धंयुयुत्सतः॥ १९॥ हिमवानब्रवीद्वाक्यंश्रुत्वावाक्यविशारदः॥ अनुक्तपूर्वंधर्मा
त्माक्रोधात्तमसुरोत्तमं॥२०॥ वालीनाममहाप्राज्ञःशक्रपुत्रःप्रतापवान्॥ अध्यास्तेवानरःश्रीमान्किष्किंधामतुलप्र
भां॥२१॥ससमर्थोमहाप्राज्ञस्तवयुद्धविशारदः॥ द्वंद्वयुद्धंसदातुंतेनमुचेरिववासवः॥ २२॥तंशीघ्रमभिगछत्वं
यदियुद्धमिहेछसि॥सहिदुर्धर्षणोनित्यंशूरःसमरकर्मणि॥२३॥श्रुत्वाहिमवतोवाक्यंकोपाविष्टःसदुंदुभिः
जगामतांपुरींतस्यकिष्किंधांवालिनस्तदा॥२४॥ धारयन्माहिषंरूपंतीक्ष्णशृंगोभयावहः॥ प्रावृषीवमहामे
घस्तोयपूर्णोनभस्तले॥२५॥ ततस्तुद्वारमागम्यकिष्किंधायामहाबलः॥ ननर्दकंपयन्भूमिंदुंदुभिर्दुंदुभि
र्यथा॥२६॥समीपजान्द्रुमान्भंजन्वसुधांदारयन्खुरैः॥ विषाणेनोल्लिखन्दर्पात्तद्द्वारंद्विरदोयथा
२७॥ अंतःपुरगतोवालीश्रुत्वाशब्दममर्षणः॥ निष्पपातसहस्त्रीभिस्ताराभिरिवचंद्रमा॥२८॥मितंव्यक्ताक्ष
रपदंतंसवाचसदुंदुभिं॥ हरीणामीश्वरोवालीसर्वेषांवनचारिणां॥२९॥किमर्थंनगरद्वारमिदंरुद्ध्वाविनर्दसे
दुंदुभेविदितोमेसिरक्षप्राणान्महाबल॥३०॥

२८॥हरीणामीश्वरोहमस्मीतिशेषः॥२९॥नगरद्वारंमामकमितिशेषः॥मेविदितोसिमयाज्ञातबलोसित्वतःप्राणान्रक्ष॥३०॥रामकृष्णवासुदेवाय

102

३१॥३२॥ स्त्रीसमूहगतेयुद्धायनाह्वानमय इति स्मृत्वा पक्षांतरमाह। अथवेति। स्वैरं कामभोगेषु उदयस्तावत्पर्यंतं कालो मम्प्रोक्तो अवधिर्दृष्टस्तां उदयपर्यंतं त्वां प्रती
क्ष इत्यर्थः॥३३॥ वानरान् परिष्वज्य तेभ्यः संप्रदानं प्रीतिदानं दीयतां। संसाधय। आमंत्रयस्व पाठांतरेपि उक्तार्थ एव॥३४॥ सुहृदां पुनर्दर्शनासंभवान् आत्मसमं
पुत्रादिकं राज्यरक्षायै राजानं कुरुष्व क्रीडस्व आ उदयात्। ३५। मत्तं पानादिना प्रमत्तमनवहितं रहितमायुधादिभिः त्वद्विधं त्वामिव स्त्रीमध्यगं मदमोहितं स्त्री

तस्य तद्वचनं श्रुत्वा वानरेंद्रस्य धीमतः। उवाच दुंदुभिर्वाक्यं क्रोधात्संरक्तलोचनः॥३१॥ न त्वं स्त्रीसन्निधौ वीर वचनं वक्तुमर्ह
सि। मम युद्धं प्रयच्छाद्य ततो ज्ञास्यामि ते बलं॥३२॥ अथवा धारयिष्यामि क्रोधमद्य निशामिमां। गृह्यतामुदयं स्वैरं काम
भोगेषु वानर॥३३॥ दीयतां संप्रदानं च परिष्वज्य च वानरान्। सर्वशाखामृगेंद्रस्त्वं संभावय सुहृज्जनम्॥३४॥ सुदृष्टां
कुरु किष्किंधां कुरुष्वात्मसमं पुरे॥ क्रीडस्व च समं स्त्रीभिरहं ते दर्पशासनः॥३५॥ यो हि मत्तं प्रमत्तं वा भग्नं वा रहितं
कृशं। हन्यात्स भ्रूणहा लोके त्वद्विधं मदमोहितं॥३६॥ स प्रहस्याब्रवीन्मंदं क्रोधात्तमसुरेश्वरं। विसृज्य ताः स्त्रियः सर्वा
स्तारा प्रभृतिकास्तदा॥३७॥ मत्तोयमिति मा मंस्था यद्यभीतोसि संयुगे॥ मदोयं संप्रहारेस्मिन्वीरपानं समर्थ्यतां॥
३८॥ तमेवमुक्त्वा संक्रुद्धो मालामुत्क्षिप्य कांचनीं। पित्रा दत्तां महेंद्रेण युद्धाय व्यवतिष्ठत॥३९॥ विषाणयोर्गृहीत्वा तं
दुंदुभिं गिरिसन्निभं। आविध्यत तदा वाली विनदन्कपिकुंजरः॥४०॥

॥भोगार्थं कृतं मधुपानादि इति कर्त्तव्यता स्पष्टं॥३६॥ मदोयं स्त्रीगोष्ठीजनितो
पि वीरपानं वीरैः रणोन्मत्त उत्साहार्थं क्रियमाणः पानविशेषः समर्थ्यतां ज्ञायतां॥३८॥ उत्क्षिप्य कंठे प्रतिमुच्य एषा हि माला संग्रामजयदा॥३९॥ आविध्य तं

प्रवान्॥४०॥

व्यापादयां चक्रे पातितवान्॥ पात्यतः पात्यमानस्य॥४१॥ अस्यैव प्रपंचस्तयोरित्यादि॥४२॥४३॥ हीनः हीनबलः उद्यम्य हस्ताभ्याम् श्रीक्रम्य उत्साद्येति पाठे उत्सादितविषाणां कृत्वेत्यर्थः॥४५॥ स्रोतोभ्यो नासादिद्वारेभ्यः॥४६॥ तोलयित्वा हस्तग्रहणेन भारं ज्ञात्वा योजनं तावत् दूरं॥४७॥४८॥ तस्य विप्रुषः कर्त्तारं को

वाली व्यापादयां चक्रे ननर्द च महास्वनं॥ श्रोत्राभ्यामथ रक्तं तु तस्य सुस्राव पात्यतः॥४१॥ तयोस्तु क्रोधसंरंभात्परस्परजयैषिणोः॥ युद्धं समभवद्घोरं दुंदुभेर्वालिनस्तथा॥४२॥ अयुध्यत तदा वाली शक्रतुल्यपराक्रमः॥ मुष्टिभिर्जानुभिः पद्भिः शिलाभिः पादपैस्तथा॥४३॥ परस्परं घ्नतोस्तत्र वानरासुरयोस्तदा॥ आसीद्धीनोसुरो युद्धे शक्रसूनुर्व्यवर्धत॥४४॥ तं तु दुंदुभिमुद्यम्य धरण्यामभ्यपातयत्॥ युद्धे प्राणहरे तस्मिन्निष्पिष्टो दुंदुभिस्तदा॥४५॥ स्रोतोभ्यो बहुरक्तं तु तस्य सुस्राव पात्यतः॥ पपात च महाबाहुः क्षितौ पंचत्वमागतः॥४६॥ तं तोलयित्वा बाहुभ्यां गतसत्त्वमचेतनं॥ चिक्षेप वेगवान्वाली वेगेनैकेन योजनं॥४७॥ तस्य वेगप्रविद्धस्य वक्त्रात्क्षतजविंदवः॥ प्रपेतुर्मारुतोत्क्षिप्ता मतंगस्याश्रमं प्रति॥४८॥ तान्दृष्ट्वा पतितांस्तत्र मुनिः शोणितविप्रुषः॥ क्रुद्धस्तस्य महाभाग चिंतयामास कोन्वयं॥४९॥ येनाहं सहसा स्पृष्टः शोणितेन दुरात्मना॥ कोयं दुरात्मा दुर्बुद्धिरकृतात्मा च वालिशः॥५०॥ इत्युक्त्वा स विनिष्क्रम्य ददर्श मुनिसत्तमः॥ महिषं पर्वताकारं गतासुं पतितं भुवि॥५१॥ ॥छ॥ ॥छ॥ ॥

न्वयमिति चिंतयामास॥ चिंतायाः स्वाभिनयो येनेत्यादि॥४९॥५०॥५१॥ श्रीकृष्णाय वासुदेवाय रामाय रामचन्द्राय नमः॥छ॥ रामरामरामरामरामः

103

॥राम॥
॥२६॥

५२॥ अप्रवेश्यं न प्रवेश्यामीत्यर्थः। ५३॥ आसुरीं तनुं क्षिपता येन मे पादपाः संभग्ना इत्यन्वयः स यदि मामकं आश्रममदागमनमुद्दिश्य समंतात्परिसरवर्ति पूर्णं
योजनं तत्पर्यंतं। ५४॥ आक्रमिष्यति पद्भ्यां स्प्रक्ष्यति तर्हि न भविष्यति न जीविष्यतीत्यर्थः ॥५५॥ तैर्वालिसचिवैः श्रुत्वा मदुक्तं शापं ॥५६॥ शापमेव हेतुत्वेनाह यन्मास

सतु विज्ञाय तपसा वानरेणाकृतं हि तत् ॥ उत्ससर्ज महाशापं क्षेप्तारं वानरं प्रति ॥५२॥ इह तेनाप्रवेष्टव्यं प्रविष्टस्य वधो भवे
त् ॥ वनं मत्संश्रयं येन दूषितं रुधिरस्रवैः ॥५३॥ क्षिपता पादपाश्चेमे संभग्नाश्चासुरीं तनुं ॥ समंतादाश्रमं पूर्णं योजनं मा
मकं यदि ॥५४॥ आक्रमिष्यति दुर्बुद्धिर्व्यक्तं स न भविष्यति ॥ ये चास्य सचिवाः केचित्संश्रिता मामकं वनं ॥५५॥ न चैतै
रिह वस्तव्यं श्रुत्वा यांतु यथासुखं ॥ तेपि वा यदि तिष्ठंति शपिष्ये तानपि ध्रुवं ॥५६॥ वनेस्मिन्मामके नित्यं पुत्रवत्परि
रक्षिते ॥ पत्रांकुरविनाशाय फलमूलाभवाय च ॥५७॥ दिवसश्चाद्य मर्यादा यं द्रष्टा श्वोस्मि वानरं ॥ बहुवर्षसहस्रा
णि स वै शैलो भविष्यति ॥५८॥ ततस्ते वानराः श्रुत्वा गिरं मुनिसमीरितां ॥ निश्चक्रमुर्वनात्तस्मात्तान्दृष्ट्वा वालिरब्र
वीत् ॥५९॥ किं भवंतः समस्ताश्च मतंगवनवासिनः ॥ मत्समीपमनुप्राप्ता अपि स्वस्ति वनौकसां ॥६०॥ ततस्ते कार
णं सर्वं तथा शापं च वालिनः ॥ शशंसुर्वानराः सर्वे वालिने हेममालिने ॥६१॥ एतच्छ्रुत्वा तदा वाली वचनं वानरैरितं
स महर्षिं तमासाद्य याचते स्म कृतांजलिः ॥६२॥

पूर्वमाह। वनेऽस्मिन्निति। फलाद्यभवाय तन्नाशाय जायंते यतोऽतः शपिष्यामि ॥५७॥ अद्य दिव
सः अयं दिवसः मर्यादा दास्यमानशापस्य। तदेवाह। यमिति। अस्मि अहं यं वानरं वालिसंबंधिनं श्वो द्रष्टा स स शैलो भविष्यति ॥५८॥५९॥६०॥६१॥ याचते स

अयाचत ॥ शापमोक्षमिति शेषः ॥६२॥

५

शापधारणोनशापविषयदोषज्ञानेन॥६३॥६४॥६५॥अस्थिनिचयःशुष्ककायः॥६६॥इमेविपुलाःविशालमूलस्कंधाःशाखावलंबिनः॥प्रशस्तबहुशाखावं
तःयत्रयेषुएकंएककालमेववालीओजसाओजोयुक्तकंपनेनसर्वानिष्पत्रयितुंपत्रहीनान्कर्तुंघटनेचस्तेतेइमेसप्ततालाइत्यर्थः॥अनेनवायोरप्यधि
कंबलंसूचितंनहिवायोःयुगपत्कंपनेनसकलाईपत्रपातनं॥क्वचिद्दृष्टचरंकश्चित्तुनिष्पत्रयितुंनिष्पत्रीकर्तुमित्यर्थःएकंसालंशरेणभित्वाशरोनिष्प

महर्षिस्तमनाहत्यप्रविवेशाश्रमंप्रति॥शापधारणाभीतस्तुवालीविह्वलतांगतः॥६३॥ततःशापभयाद्भीतोऋष्यमूकं
महागिरिं॥प्रवेष्टुंनेच्छतिहरिर्द्रष्टुंवापिनरेश्वर॥६४॥तस्याप्रवेशंज्ञात्वाहमिदंराममहावनं॥विचरामिसहामा
त्यैर्विषादेनविवर्जितः॥६५॥एषोस्थिनिचयस्तस्यदुंदुभेःसंप्रकाशते॥वीर्योत्सेकान्निरस्तस्यगिरिकूटनिभो
महान्॥६६॥इमेचविपुलाःशालाःसप्तशाखावलंबिनः॥यत्रैकंघटनेवालीनिष्पत्रयितुमोजसा॥६७॥ए
तदस्यासमंवीर्यंमयारामप्रकाशितं॥कथंतंवालिनंहंतुंसमरेशक्ष्यसेनृप॥६८ ।तथाब्रुवाणंसुग्रीवंप्रह
सन्लक्ष्मणोब्रवीत्॥कस्मिन्कर्मणिनिर्वृत्तेश्रद्दध्यात्वालिनोवधम्॥६९॥तमुवाचाथसुग्रीवःसप्तसालो
निमान्पुरा॥एवमेकैकशोवालीविव्याधाथसचासकृत्॥७०॥

॥तंयथागच्छतितथाकर्तुमतिव्यथयितुमितियावत्सपत्रनिष्पत्रादति
व्यथनइतिशास्त्रात्अप्राक्षनकपित्वाच्चवारणापारस्यापिसंभवइतिव्याचख्यौ॥६७॥उक्तंवालीवीर्यमुपसंहरन्निगमयति॥६८॥प्रहसन्भगवद्वीर्य
ज्ञानादेवंवादइतिहासः॥६९॥एवमुक्तप्रकारेणएकैकशःएकैकस्मिन्कालेसप्तापिवालीअसकृत्विव्याधयीडितवान्आर्यंपरस्मैपदंसकृत्कृतेःका
कनालीयत्वमुदासायासकृदितिविव्याधेतिपाठांतरंतुल्यार्थः॥७०॥

104

एकेनबाणेनैषामेकंद्रुममपिचेन्निर्दारयेत्॥तदापिवालिनंहतंमन्येतवधयोग्यतासंभावनयेतिभावः पादेनास्थ्नोहस्तेनस्पर्शायोग्यत्वात्॥तरसाबलेनप्रक्षिपेद
पिचेत्तदापिरामस्यविक्रमंदृष्ट्वावालिनंहतंमन्यइतिसंबंधः॥७१॥७२॥७३॥ध्यात्वारामवीर्यस्याप्रत्यक्षत्वाद्भ्रमेणवालिवधःशक्योनवेतिसंचिंत्यपुनर्मि

रामोनिर्द्दारयेदेषांबाणेनैकेनचद्रुमं॥वालिनंनिहतंमन्येदृष्ट्वारामस्यविक्रमं॥७१॥हतस्यमहिषस्यास्थिपादेनैकेन
लक्ष्मणउद्यम्यप्रक्षिपेच्चापितरसाद्वेधनुःशते॥७२॥एवमुक्त्वातुसुग्रीवोरामंरक्तांतलोचनः॥ध्यात्वामुहूर्त्तंकाकु
त्स्थंपुनरेववचोब्रवीत्॥७३॥शूरश्चशूरमानीचप्रख्यातबलपौरुषः॥बलवान्वानरोवालीसंयुगेष्वपराजितः॥
७४॥दृश्यंतेचास्यकर्माणिदुष्कराणिसुरैरपि॥यानिसंचिंत्यभीतोहंऋश्यमूकमुपाश्रितः॥७५॥तमजय्यमधृष्यं
चवानरेंद्रममर्षणं॥विचिंतयन्नमुंचामिऋश्यमूकममुंत्वहं॥७६॥उद्विग्नःशंकितश्चाहंविचरामिमहावने॥अ
नुरक्तैःसहामात्यैर्हनुमत्प्रमुखैर्वरैः॥७७॥उपलब्धंचमेश्लाघ्यंसन्मित्रंमित्रवत्सल॥त्वामहंपुरुषव्याघ्रहि
मवंतमिवाश्रितः॥७८॥किंतुतस्यबलज्ञोहंदुर्भ्रातुर्बलशालिनः॥अप्रत्यक्षंतुमेवीर्यंसमरेतवराघव॥७९॥
नखल्वहंत्वांतुलयेनावमन्येनभीषये॥कर्मभिस्तस्यभीमैश्चकातर्यंजनितंमम॥८०॥

॥त्रभावेनाहंशूरश्चेति॥७४॥यानिवालिकर्माणि
संचिंत्यभीतस्तेनसहरणायभीतः॥७५॥उक्तमेवभीत्यापुनराहतमजय्यमिति॥७६॥७७॥त्वांमित्रभूतंयदिमामाश्रितस्तर्हित्यजवानिभयंतत्राह॥
७८॥किंत्विति।तद्बलं।ज्ञातंत्वद्बलंत्वज्ञातमतोभयमित्यर्थः॥७९॥तुलयेत्वद्बलपरीक्षांनकुर्येइतिभावः नावमन्येनभीषयेत्॥किंतुस्वकातर्यादेवपुन

किष्किंधा॥८०॥

वाणीवालिवधविषयाप्रमाणांविश्वसनीया।यतोधैर्यमकातर्यंराजन्यणीक्रम्यवाद।आकृतिरनुभवसिद्धोदिव्यविग्रह।एतेद्वेपरंतेजःसकलजगत्संहारकंतेजः
काममतिशयेनसूचयंतिसूचयतःभस्मछन्नानलोपमयासुप्तावस्थितिमहाशक्तिमत्वंसूचितं॥८१॥८२॥असमासुविक्रमेअसमानिष्टविक्रमेप्रत्ययोविश्वा

कामंराघवतेवाणीप्रमाणांधैर्यमाकृतिः॥सूचयंतिपरंतेजोभस्मछन्नमिवानलं॥८१॥तस्यतद्वचनंश्रुत्वासुग्रीवस्य
महात्मनः॥स्मितपूर्वमथोरामःप्रत्युवाचहरींप्रति॥८२॥यदिनप्रत्ययोस्मासुविक्रमेतववानर॥प्रत्ययंसमरेश्ला
घ्यमहमुत्पादयामिते॥८३॥एवमुक्त्वातुसुग्रीवंसांत्वयन्लक्ष्मणाग्रज॥राघवोदुंदुभेःकायंपादांगुष्ठेनलील
या॥८४॥तोलयित्वामहाबाहुश्चिक्षेपदशयोजनं॥असुरस्यतनुंशुष्कांपादांगुष्ठेनवीर्यवान्॥८५॥क्षिप्तंदृष्ट्वा
ततःकायंसुग्रीवःपुनरब्रवीत्॥लक्ष्मणस्याग्रतोरामंतपंतमिवभास्करं॥हरीणामग्रतोवीरमिदंवचनमर्थवत्
॥८६॥आर्द्रःसमांसःप्रत्यग्रःक्षिप्तःकायःपुरासखे॥परिश्रांतेनमत्तेनभ्रात्रामेवालिनातदा॥८७॥लघुःसंप्रति
निर्मांसस्तृणभूतश्चराघव।क्षिप्तएवंप्रहर्षेणभवतारघुनंदन॥८८॥नात्रशक्यंबलंज्ञातुंतववातस्यवाधि
कं॥आर्द्रशुष्कमितिह्येतत्सुमहद्राघवांतरं॥८९॥ छ ॥श्रीरामायरामचन्द्रायनमः॥ छ ॥रामरामरामरामः

सः॥८३॥८४॥८५॥अर्थवदुपपत्तियुक्तमिदंवचनमब्रवीत्।अनुपपन्नत्वाययइतिशेषः॥८६॥तदेवाह॥आर्द्रइति॥प्रत्ययोनूतनःमत्तेनभोगार्थंपी
तमदेन॥८७॥८८॥बलाधिक्यानिर्णयेहेतुमाह॥आर्द्रमिति॥८९॥श्रीरामायरामचन्द्रायनमश्श्रीकृष्णायवासुदेवायनमः॥ छ ॥

105

यच्छलं तत्रेति शेषः। यच्छले इति पाठे यदीति। अव्ययं यः संशयोस्ति पक्षे पात्राक्वलविषये आसीत्सोऽप्यस्त्येवेत्यर्थः। तर्हि किं ने प्रत्ययकारकं तत्राह सालमेकमिति एकं सालं उक्तेषु विनिर्भिद्य वलावलविषये व्यक्तिः प्रकटता भवेत्॥ ९० ॥ ९१ ॥ त्वया प्रहितः क्षिप्तः शरः इमं सालं विदारयिष्यति अत्र न संदेहस्तस्मात्त्वया विमर्षो विचारो न कर्त्तव्यः मया सर्व्वासं प्रतिशापितः शपथपूर्वं नियुक्तोऽतो मम प्रियं ध्रुवं कुरुष्वेत्यर्थः॥ ९२ ॥ तेजःसु

स एव संशयस्तात तव तस्य च यच्छलं॥ सालमेकं विनिर्भिद्य भवेद्व्यक्तिर्वलावले॥ ९० ॥ कृत्वैतत्कार्मुकं सज्यं हस्ति
हस्तमिवापरं॥ आकर्णपूर्णमायम्य विसृजस्व महाशरं॥ ९१ ॥ इमं हि सालं प्रहितस्त्वया शरो न संशयोत्रा
स्ति विदारयिष्यसि। अलं विमर्षेण मम प्रियं ध्रुवं कुरुष्व राजन् प्रतिशापितो मया॥ ९२ ॥ यथा हि तेजःसु
वरः सदा रविर्यथा हि शैलो हिमवान्महाद्रिषु। यथा चतुष्पात्सु च केसरी वरस्तथा नराणामसि विक्रमेव
रः॥ ९३ ॥ इत्यार्षे श्रीरामायणे वा॰ किष्किंधाकांडे एकादशः सर्गः॥ ११ ॥ एतच्च वचनं श्रुत्वा सुग्रीवस्य सुभा
षितं॥ प्रत्ययार्थं महातेजा रामो जग्राह कार्मुकं॥ १ ॥ स गृहीत्वा धनुर्घोरं शरमेकं च मानदः। सालमुद्दिश्य
विक्षेप पूरयन्सरवैर्दिशः॥ २ ॥ स विसृष्टो वलवता वाणः स्वर्णपरिष्कृतः। भित्वा सालान् गिरिप्रस्थं सप्त भूमिं

॥ ८ ॥ किष्किं

तेजस्विषु विक्रमे वरः श्रेष्ठस्त्वेनाभिमतोऽसि भवसीत्यर्थः। सालभेदने सन्नीति शेषः॥ ९३ ॥ मध्यमानाः। इति रामाभिरामे श्रीरा॰ किष्किं॰ एकादशः सर्गः॥ ११ ॥ १ ॥ २ ॥ स एकसालोद्देशेन विक्षिप्तोपि वाणः सप्त सालान् भित्वा नदाश्ममगिरिप्रस्थमपि भित्वा सप्त भूमिः रसातलं विवेशेत्यर्थः॥ ३

निष्पत्यरसातलपर्यंतंगत्वातत्रत्यानसुरान्हत्वातमेवतूणं। पूर्ववारंतूणंअनेनरामबाणानांचेतनपरशक्तिमद्देवताधिष्ठितत्वंसूचयति। तदुक्तंयुगपत्सप्त
सप्ततालांश्चरघुनाथोविभेदह॥ पातालदानवान्हत्वापुनस्तूणंविवेशचेति॥ ४ ॥ ५ ॥ प्रलंबीकृतभूषणाःसाष्टांगप्रणामवशात्लंबमानावस्था

सायकस्तुमुहूर्तेनसालान्भित्वामहाजवः॥ निष्पत्यचपुनस्तूणंतमेवप्रविवेशह॥ ४ ॥ तान्दृष्ट्वासप्तनिर्भिन्नान्साला
न्वानरपुंगवः॥ रामस्यशरवेगेनविस्मयंपरमंगतः॥ ५ ॥ समूर्ध्नान्यपतद्भूमौप्रलंबीकृतभूषणः॥ सुग्रीवःपरम
प्रीतोराघवायकृतांजलिः॥ ६ ॥ इदंचोवाचधर्मज्ञंकर्मणातेनहर्षितः॥ रामंसर्वास्त्रविदुषांश्रेष्ठंशूरमवस्थि
तं॥ ७ ॥ सेंद्रानपिसुरान्सर्वांस्त्वंबाणैःपुरुषर्षभः॥ समर्थःसमरेहंतुंकिंपुनर्वालिनंप्रभो॥ ८ ॥ येनसप्तमहासालागि
रिर्भूमिश्चदारिताः॥ बाणेनैकेनकाकुत्स्थस्थातातेकोरणाग्रतः॥ ९ ॥ अद्यमेविगतःशोकःप्रीतिरद्यपरा
मम॥ सुहृदंत्वांसमासाद्यमहेंद्रवरुणोपमं॥ १० ॥ तमद्यैवप्रियार्थंमेवैरिणंभ्रातृरूपिणं॥ वालिनंजहिका
कुत्स्थमयाबद्धोयमंजलिः॥ ११ ॥ ततोरामःपरिष्वज्यसुग्रीवंप्रियदर्शनं॥ प्रत्युवाचमहाप्राज्ञोलक्ष्मणानुग
तंवचः॥ १२ ॥ अस्माद्गच्छामकिष्किंधांक्षिप्रंगच्छत्वमग्रतः॥ गत्वाचाह्वयसुग्रीववालिनंभ्रातृगंधिनं॥ १३ ॥

पन्नोरःकंठादिवर्तिसकलभूषणाःकृतांजलिरूपत्वान्नानंतरमितिशेषः॥ ६ ॥ ७ ॥ ८ ॥ भूमिश्चवामसप्तपातालास्तद्वर्तिनोऽसुराश्च॥ ९ ॥ १० ॥ ११
लक्ष्मणानुगतं॥ तस्मसमितिमर्थःयद्वालक्ष्मणावग्नियत्वेनानुगमंस्वीकृतंसुग्रीवमित्यर्थः॥ १२ ॥ अस्मात्ऋष्यमूकात्भ्रातृगंधिनंअनर्थकभ्रातृ
व्यपदेश॥ १३ ॥

॥राम॰॥
॥२९॥

106

आत्मानंस्वदेहान्।१४।ज्ञानकारणात्आज्ञाननिमित्तंगाढंपरिहितंवस्त्रंयेनेत्यर्थःवाससादृढंकटिंवध्वेत्यर्थः॥वेगात्तनादकारणप्राणवेगाद्युत्पन्नैरितिघो
षः।१५।भास्करोस्तनटादतिदूरमप्युदयपर्वतंअत्यल्पेनकालेनयाति।एवमदृश्यस्थानतया।तत्तुल्यगुहातःक्षणेनवहिरागतइत्यर्थः।यत्वस्तपदेनो
दयगिरिलक्षणांयदपिमेरुस्तत्रस्वामिनोधिकृत्येयमुक्तिरितिव्याख्यातंतत्क्लिष्टमसंगतंचेतिस्पष्टंसुधियां।१६।वुधांगारकयोरिववज्रगोकर्णयोर्य

सर्वैस्तैस्त्वरितंगत्वाकिष्किंधांवालिनःपुरीं।वृक्षैरात्मानमावृत्यह्यतिष्ठन्गहनेवने॥१४॥सुग्रीवोव्यनदत्घोरंवालिनो
ज्ञानकारणात्।गाढंपरिहितोवेगान्नादैर्भिंदन्निवांवरं॥१५॥तंश्रुत्वानिनदंभ्रातुःक्रुद्धोवालीमहावलः।निष्पपात
सुसंरब्धोभास्करोस्ततटादिव॥१६॥ततःसुतुमुलंयुद्धंवालिसुग्रीवयोरभूत्॥गगनेग्रहयोर्घोरंवुधांगारकयोरि
व॥१७॥तलैरशनिकल्पैश्चवज्रकल्पैश्चमुष्टिभिः॥जघ्नतुःसमरेन्योन्यंभ्रातरौक्रोधमूर्छितौ॥१८॥ततोरामोधनु
ष्पाणिस्तावुभौसमुदैक्षत॥अन्योन्यसदृशौवीरावुभौदेवाविवाश्विनौ॥१९॥यन्नावगच्छत्सुग्रीवंवालिनंवापि
राघवः।ततोनकृतवान्बुद्धिंमोक्तुमंतकरंशरं॥२०॥एतस्मिन्नंतरेभग्नःसुग्रीवस्तेनवालिना।अपश्यन्राघ
वंनाथंऋष्यमूकंप्रदुद्रुवे॥२१॥क्लांतोरुधिरसिक्तांगःप्रहारैर्जर्जरीकृतः।वालिनाभिद्रुतःक्रोधात्प्रविवेश
महावनं॥२२॥

थेतिपाठांतरंवज्रगोकर्णौतदाख्यपर्वतौयथातथेतिशेषः॥१७॥अशनिर्दंभोलिःवज्रंवज्रायुधं॥१८॥१९
नावगच्छत्विविच्येतिशेषः॥२०॥राघवंनाथंरक्षकमित्यपश्यन्॥अजानानः॥२१॥२२॥श्रीकृष्णायवासुदेवायनमोनमः।छ

वनंप्रविष्टंऋष्यमूकस्येतिशेषः सन्निवृत्तः ॥ २३ ॥ २४ ॥ ह्रीमान्पराभूतत्वात् ॥ २५ ॥ विक्रमंसालभेदनेन ॥ घातयित्वाशुक्षेपेरणद्वारा ॥ किंकृतमनुचितमेवकृ
तमित्यर्थः ॥ २६ ॥ तामेववेलांसन्नम्यर्थेद्वितीया ॥ वालिनायुद्धप्रेरणवेलायां ॥ ततस्तदेत्यर्थः ॥ इतः ऋष्यमूकवनादित्यर्थः ॥ २७ ॥ २८ ॥ सवाणोवालिसंह

तंप्रविष्टंवनंदृष्ट्वावालीशापभयात्ततः ॥ मुक्तोसित्वमित्युक्त्वासन्निवृत्तोमहाबलः ॥ २३ ॥ राघवोपिसहभ्रात्रास
हचैवहनूमता ॥ तदेववनमागच्छत्सुग्रीवोयत्रवानरः ॥ २४ ॥ तंसमीक्ष्यागतंरामंसुग्रीवःसहलक्ष्मणं ॥ ह्रीमा
न्दीनमुवाचेदंवसुधामवलोकयन् ॥ २५ ॥ आह्वयस्वेतिमामुक्त्वादर्शयित्वाचविक्रमं ॥ वैरिणाघातयित्वाद्य
चकिमिदानींत्वयाकृतम् ॥ २६ ॥ तामेववेलांवक्तव्यंत्वयाराघवतत्त्वतः ॥ वालिनंननिहन्मीतिततोनाहमि
तोव्रजे ॥ २७ ॥ तस्यचैवंब्रुवाणस्यसुग्रीवस्यमहात्मनः ॥ करुणंदीनयावाचाराघवःपुनरब्रवीत् ॥ २८ ॥
सुग्रीवश्रूयतांतातक्रोधश्चव्यपनीयतां ॥ कारणंयेनवाणोयंसमयानविसर्जितः ॥ २९ ॥ अलंकारेणवेषे
णप्रमाणेनगतेनच ॥ त्वंचसुग्रीववालीचसदृशौस्थःपरस्परं ॥ ३० ॥ स्वरेणवचसाचैवप्रेक्षितेनचवानर
विक्रमेणचवाक्यैश्चव्यक्तिंवांनोपलक्षये ॥ ३१ ॥ श्रीरामायरामचन्द्रायश्रीकृष्णायवासुदेवायनमः ॥ ६ ॥

रकोवाणः ॥ २९ ॥ तदेवकारणमाह ॥ अलंकारेणेति ॥ ३० ॥ वर्चःशरीरकांतिः वांयुवयोः ॥ ३१ ॥ श्रीरामायरामचन्द्रायश्रीकृष्णायनमः ॥

107

मोहितइति। नचिदमनुचितंयद्भगवतोमोहः। अमोहेमोहितइत्यनृतकथनंच। किंचपलायनसमयेत्राप्यन्तकाभिमुखधावनेनव्यक्तिरस्येवेतिचेन्नवा
लिनआयुर्दायासमाप्तातथाकरणेपिसुग्रीवसंतोषायतस्मिन्मानुष्यवुध्यनुत्पादायचात्मनिमोहोत्प्रेक्षयासमाधानादक्षतेः। मोहितइत्यस्येवेति
शेषः। ईदृशेविषयेएवंविधाऽनृतवचनंनदोषायेत्यप्यनेनध्वनितं। नोत्सृजामिनोदसृजं॥३२॥ विशंकितः शंकावान्हिनिश्चयेनतौआवयोर्द्वयो

ततोहंरूपसादृश्यान्मोहितोवानरोत्तम॥नोत्सृजामिमहावेगंशरंशत्रुनिवर्हणं॥३२॥जीवितांतकरंघोरंसादृश्यात्तु
विशंकितः।मूलघातोननौस्याद्धिद्वयोरितिकृतोमया॥३३॥त्वयिवीरविपन्नेहिअज्ञानाल्लाघवान्मया।मौढ्यंच
ममबाल्यंचख्यापितंस्यात्कपीश्वर॥४४॥दत्ताभयवधोनाममपातकंमहदद्भुतं।अहंचलक्ष्मणश्चैवसीताचव
रवर्णिनी॥३५॥त्वदधीनावयंसर्वेवनेस्मिन्शरणंभवान्॥तस्माद्युध्यस्वभूयस्त्वंमामाशंकीश्चवानर॥
३६॥एतन्मुहूर्त्तेतुमयापश्यवालिनमाहवे॥निरस्तमिषुणैकेनचेष्टमानंमहीतले॥३७॥अभिज्ञानंकुरुष्व
त्वमात्मनोवानरेश्वर॥येनत्वामभिजानीयांद्वंद्वयुद्धमुपागतं॥३८॥गजपुष्पीमिमांफुल्लामुत्पाट्यशुभलक्षणां
कुरुलक्ष्मणकंठेस्यसुग्रीवस्यमहात्मनः॥३९॥

रपित्वन्नाशेनमूलघातोनस्यात्साभूदितिएतदर्थंमयाकृतःशराप्रसर्गइतिशेषः।३३
मूलघातमेवदर्शयतित्वयीतिमयाविपन्नेमद्व्यापारतोनाशितेअज्ञानमनिश्चयप्रवृत्तिःलाघवान्चापल्यात्।३४।वाधकांतरमाहदत्तमभयमस्मैस
दत्ताभयस्तस्यवधोमहत्पातकमितिनामप्रसिद्धंस्वमूलघातमप्याहअहमिति।३५।मामाशंकीरित्यावाधायांद्विर्वं।३६॥३७॥३८॥गजपुष्पीनागपु
ष्पीलतागपुष्पंसम्यक्लक्षयतीतिशुभलक्षणांतां॥३९॥

व्यसर्जयत् निसृष्टवान् समर्पितवानित्यर्थः ॥४०॥ लतया शुक्लपुष्प्यनागपुष्पीलतया संध्यारागसहितस्तोयद इव स्वयं बलाकानां मालयेव लतया लतया शुशु
भे ॥४१॥ रामवाक्येन करणेन समाहित उद्युक्तः ॥४२॥ रक्षमानः ॥ इति रामाभिरामे श्रीरा॰ति॰ किष्किंधाकांडे द्वादशः सर्गः ॥१२॥ ऋष्यमूकादिति ॥१॥२॥

ततोगिरितटेजातामुत्पाट्यकुसुमायुतां ॥ लक्ष्मणोगजपुष्पींतांतस्यकंठेव्यसर्जयत् ॥४०॥ सतयाशुशुभेश्रीमान्ल
तयाकंठसक्तया ॥ मालयेवबलाकानांससंध्यइवतोयदः ॥४१॥ विभ्राजमानोवपुषारामवाक्यसमाहितः ॥ जगा
मसहरामेणकिष्किंधांपुनरापसः ॥४२॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेद्वादशः सर्गः ॥१२॥ ऋष्यमू
कात्सधर्मात्माकिष्किंधांलक्ष्मणाग्रजः ॥ जगामसहसुग्रीवोवालिविक्रमपालितां ॥१॥ समुद्यम्यमहच्चापंरा
मः कांचनभूषितं ॥ शरांश्चादित्यसंकाशान्गृहीत्वारणसाधकान् ॥२॥ अग्रतस्तुययौतस्यराघवस्यमहा
त्मनः ॥ सुग्रीवः संहतग्रीवोलक्ष्मणस्यमहाबलः ॥३॥ पृष्ठतोहनुमान्वीरोनलोनीलश्चवीर्यवान् ॥ तार
श्चैवमहातेजाहरियूथपयूथपः ॥४॥ तेवीक्षमाणावृक्षांश्चपुष्पभारावलंबिनः ॥ प्रसन्नांबुवहाश्चैवसरि
तः सागरंगमाः ॥५॥ कंदराणिचशैलांश्चनिर्झराणिगुहास्तथा ॥ शिखराणिचमुख्यानिदरीश्चप्रियदर्शिनीः

संहतग्रीवः दृढबंधकंठग्रीवः ॥३॥ हरियूथपानामपियूथपानिता दृशः ॥४॥ ॥५॥ कंदराणिमंदिराकारपर्वतविवराणिनिर्दराणिशिलाविवरा
णि ॥ गुहाः देवखातगिरिविलानिदर्योगह्वराणि ॥६॥ श्रीरामायरामचंद्रायश्रीलक्ष्मायवासुदेवायनमः ॥ छ ॥ रामरामरामरामरामरामराम

108

आकोशमग्रभागपर्यंतं कुड्मलैर्मुकुलरूपैः तेनेषद्विकसितैः पद्मैः शोभितान् ॥ ७ ॥ अवलोकयन् अवालोकयन् कारंडैः कारंडवैः ॥ ८ ॥ शष्पांकुराणां ॥ ९ ॥ कूल
घातित्वादेव तटाकवैरित्वं एकचरान् असहायचरान् ॥ १० ॥ द्विरदप्रख्यान् गजतुल्यान् ॥ ११ ॥ १२ ॥ द्रुमाणां खंडः समूहो यस्मिन् तादृशं वनं ॥ १३ ॥

वैडूर्यविमलैस्तोयैः पद्मैश्चाकोशकुड्मलैः ॥ शोभितांस्तज्जलान्मार्गे तटाकांश्चावलोकयन् ॥ ७ ॥ कारंडैः सारसैर्हंसैर्वै
ञ्जुलैर्जलकुक्कुटैः चक्रवाकैस्तथाचान्यैः शकुनैः प्रतिनादितान् ॥ ८ ॥ मृदुशष्पांकुराहारान्निर्भयान्वनचारिणः च
रतः सर्वतः पश्यंस्थलीषु हरिणान्स्थितान् ॥ ९ ॥ तटाकवैरिणश्चापि शुक्लदंतविभूषितान् ॥ घोरानेकचरान्व
न्यान्द्विरदान्कूलघातिनः ॥ १० ॥ मत्तान्गिरितटोद्घुष्टान्पर्वतानिवजंगमान् ॥ वानरान्द्विरदप्रख्यान्महीरेणु
समुक्षितान् ॥ ११ ॥ वने वनचरांश्चान्यान्खेचरांश्च विहंगमान् ॥ पश्यंतस्त्वरिता जग्मुः सुग्रीववशवर्तिनः ॥ १२ ॥
तेषां तु गच्छतां तत्र त्वरितं रघुनंदनः ॥ द्रुमखंडवनं दृष्ट्वा रामः सुग्रीवमब्रवीत् ॥ १३ ॥ एष मेघ इवाकाशे वृक्ष
खंडः प्रकाशते ॥ मेघसंघातविपुलंपर्यंतकदलीवृतं ॥ १४ ॥ किमेतज्ज्ञातुमिच्छामि सखे कौतूहलं मम ॥ कौ
तूहलापनयनं कर्तुमिच्छाम्यहं त्वया ॥ १५ ॥ तस्य तद्वचनं श्रुत्वा राघवस्य महात्मनः ॥ गच्छन्नेवाचचक्षेऽथ सुग्रीवस्तन्म

वृक्षखंडो वृक्षसमूहः । मेघत्वाद्युन्नतान्वयि ॥ १४ ॥ त्वया कर्त्री कौतूहलस्यौत्सुक्यस्यापनयनं निवर्त्तनं कर्त्तुं कारयितुमिच्छामि ॥ १५ ॥ १६ ॥ रामरामरामराम

उद्यानैरुपवनैश्च संपन्नं युक्तम् ॥१७॥ सप्तजना नाम सप्तजना इति प्रसिद्धाः अधःशीर्षाः भूप्रतिष्ठापितशिरसः ॥१८॥ केवलवायुनैव सप्तरात्रे गते कृताहाराः स
प्तभिर्वर्षशतैः सकलेवरा दिवं याताः ॥१९॥ एतदाश्रमं अर्धर्चादिराश्रमशब्दः ॥२०॥ वर्जयंति न प्रविशंति पुनर्न निवर्त्तंति ॥ अत्रैव म्रियंत इत्यर्थः ॥२१॥

एतद्राघव विस्तीर्णमाश्रमं श्रमनाशनं ॥ उद्यानवनसंपन्नं स्वादुमूलफलोदकं ॥१७॥ अत्र सप्तजना नाम मुनयः शंसि
तव्रताः सप्तैवासन्नधःशीर्षा नियतं जलशायिनः ॥१८॥ सप्तरात्रे कृताहारा वायुनाऽचलवासिनः ॥ दिवं वर्षशतैर्या
ताः सप्तभिः सकलेवराः ॥१९॥ तेषामेतत्प्रभावेण द्रुमप्राकारसंवृतं ॥ आश्रमं सुदुराधर्षमपि सेंद्रैः सुरासुरैः ॥
२०॥ पक्षिणो वर्जयंत्येतत्तथान्ये वनचारिणः ॥ विशंति मोहाद्येप्यत्र न निवर्त्तंति ते पुनः ॥२१॥ विभूषणरवाश्चा
त्र श्रूयंते सकलाक्षराः ॥ तूर्यगीतस्वनाश्चापि गंधो दिव्यश्च राघव ॥२२॥ त्रेताग्नयोपि दीप्यंते धूमो ह्येष प्रदृश्यते
वेष्टयन्निव वृक्षाग्रान्कपोतांगारुणो घनः ॥२३॥ एते वृक्षाः प्रकाशंते धूमसंसक्तमस्तकाः ॥ मेघजालप्रतिच्छ
न्ना वैडूर्यगिरयो यथा ॥२४॥ कुरु प्रणामं धर्मात्मंस्तान्समुद्दिश्य राघव ॥ लक्ष्मणेन सह भ्रात्रा प्रयतः संहतांजलिः
२५॥ प्रणमंति हि ये तेषामृषीणां भावितात्मनां ॥ न तेषामशुभं किंचिच्छरीरे राम विद्यते ॥२६॥

१ सकलाक्षराः कलाक्षरा मंजुलाक्ष
राभिर्वाग्भिः सहिता भूषणरवा अप्सरसामिति शेषः दिव्यो गंधश्च तासामेवानुभूयत इति शेषः न केवलं भोगभूमिः कर्मभूरपीत्याह ॥२२॥ त्रेतेत्यादि क
पोतांगवदरुणो धूसरो घन इव धूमो वृक्षाग्रान्वेष्टयन्निवोर्ध्वं दृश्यते ॥२३॥२४॥ तेषामुद्दिश्य तानुद्दिश्येत्यर्थः ॥ तेषां प्रणमंति तान्प्रणमंति ॥२६॥

॥राम॥
॥३२॥

109

महात्मानःमहात्मनस्तान्ऋषीनुद्दिश्याभ्यवादयत् नमस्कृतवान् ॥ २७ ॥ वानराहनुमदादयः स्वतत्कथाप्रश्नादिकं ॥ वाल्पायुःसमाप्तिकाललाभाय ॥ २८ ॥ २९ ॥
शस्त्राणिवानराणांशस्त्रंशिलादि ॥ ३० ॥ नगमानः । इतिरामाभिरामेश्रीरा०रा०ति०किष्किंधाकांडेत्रयोदशःसर्गः ॥ १३ ॥ गहनेनिविडेदुष्प्रवेशे ॥ १

ततोरामःसहभ्रात्रालक्ष्मणेनकृतांजलिः ॥ समुद्दिश्यमहात्मानस्तानृषीनभ्यवादयत् ॥ २७ ॥ अभिवाद्यचधर्मात्मारामोभ्रा
ताचलक्ष्मणः ॥ सुग्रीवोवानराश्चैवजग्मुःसंहृष्टमानसाः ॥ २८ ॥ तेगत्वादूरमध्वानंतस्मात्तस्यजनाश्रमात् ॥ ददृशु
स्तांदुराधर्षांकिष्किंधांवालिपालितां ॥ २९ ॥ ततस्तुरामानुजरामवानराःप्रगृह्यशस्त्राण्युदितोग्रतेजसः ॥ पुरींसुरे
शात्मजवीर्यपालितांवधायशत्रोःपुनरागतास्त्विह ॥ ३० ॥ इत्यार्षेश्रीमद्रामायणेवा०किष्किंधाकांडेत्रयोदशःसर्ग
॥ १३ ॥ सर्वेतेत्वरितंगत्वाकिष्किंधांवालिनःपुरीं ॥ वृक्षैरात्मानमावृत्यव्यतिष्ठन्गहनेवने ॥ १ ॥ विचार्यसर्वतोदृष्टिंका
ननेकाननप्रियः ॥ सुग्रीवोविपुलग्रीवःक्रोधमाहारयद्भृशं ॥ २ ॥ ततस्तुनिनदंघोरंकृत्वायुद्धायचाह्वयत् ॥ परि
वारैःपरिवृतोनादैर्भिन्दन्निवांबरं ॥ ३ ॥ गर्जन्निवमहामेघोवायुवेगपुरःसरः ॥ अथबालार्कसदृशोदृप्तसिंहगति
स्ततः ॥ ४ ॥ दृष्ट्वारामंक्रियादक्षंसुग्रीवोवाक्यमब्रवीत् ॥ हरिवागुरयाव्याप्तांनदाकांचनभूषणां ॥ ५ ॥ प्राप्ताःस्मध्व
जयंत्राढ्यांकिष्किंधांवालिनःपुरीं ॥ प्रतिज्ञायाकृतावीरत्वयावालिवधेपुरा ॥ ६ ॥

॥ २ ॥ ३ ॥ वायोर्वेगःपुरःसरोयस्य । समहामेघइव
बालार्कसदृशोवर्णेनप्रतापेनच ॥ ४ ॥ हरिरूपवागुरयाव्याप्तांवागुराकारतयास्थितहरिकां ॥ ५ ॥ ध्वजैर्यंत्रैःप्राकाररक्षायोपेक्षितैराढ्यां ॥ ६ ॥ ७ ॥

गजसाह्वयागजेनसमानमाह्वानामयस्यास्तया ॥ ८ ॥ ९ ॥ नक्षत्रमालयात्राकाशेविपरीतोविशेषेणापरितोवेष्टितःसूर्यइव कविविकल्पितोपमाली
कोयमातेनताद्दशःसूर्योयदिभवेत्तदातरुणार्कवर्णस्यकंठसक्तशुक्लपुष्पमालस्योपमास्यादित्यतिशयोक्तिरत्रव्यंग्याकेचित्तुविपरीतेइतिस
प्तम्यंतंपरीतंतुदिवाप्रोक्तंविपरीतंतुशर्वरीपौर्णमासीगतश्चंद्रःसूर्यइत्यभिधीयतइतिव्याचक्षते ॥ १० ॥ प्रमोक्ष्यामिप्रमोचयिष्यामि ॥ ११ ॥

तमेवोवाचवचनंसुग्रीवंशत्रुसूदनः ॥ कृताभिज्ञानचिह्नस्त्वमनयागजसाह्वया ॥ ८ ॥ लक्ष्मणेनसमुत्पाट्यएषा
कंठेकृतातव ॥ शोभसेप्यधिकंवीरलतयाकंठसक्तया ॥ ९ ॥ विपरीतइवाकाशेसूर्योनक्षत्रमालया ॥ अद्यवालि
समुत्थंतेभयंवैरंचवानर ॥ १० ॥ एकेनाहंप्रमोक्ष्यामिवाणमोक्षेणसंयुगे ॥ ममदर्शयसुग्रीववैरिणंभ्रातृरूपि
णं ॥ ११ ॥ वालीविनिहतोयावद्वनेपांसुषुचेष्टते ॥ यदिदृष्टिपथंप्राप्तोजीवन्सविनिवर्तते ॥ १२ ॥ ततोदोषेणमा
गच्छेत्सद्योगर्हेच्चमांभवान् ॥ प्रत्यक्षंसप्ततेसालामयावाणेनदारिताः ॥ १३ ॥ ततोवेत्सिबलेनाद्यवालिनंनिहतं
रणे ॥ अनृतंनोक्तपूर्वंमेचिरंकृच्छ्रेपितिष्ठता ॥ १४ ॥ धर्मलोभपरीतेननचवक्ष्येकथंचन ॥ सफलांचकरिष्या
मिप्रतिज्ञांजहिसंभ्रमं ॥ १५ ॥ (चेष्टतेलुठिष्यतिमद्दर्शनानंतरमेवेतिशेषः ॥ १२ ॥ यदिमद्दृष्टिपथंगतोजीवन्सविनिवर्ततेतत
स्तदामामांदोषेणोपलक्षितंगच्छेदवगच्छेत् ॥ मांगर्हेच्चकिंचमद्बलस्यदृष्ट्वावालिनंनिहतमेवावेहीत्याह ॥ प्रत्यक्षमिति ॥ १३ ॥ वेत्ति
विद्धिकृच्छ्रेपिप्राणसंकटेपिमेमया ॥ १४ ॥ धर्मलोभेनधर्मलिप्सयापरीतेनव्याप्तचित्तेनेतिपूर्वान्वयि ॥ १५ ॥ श्रीकृष्णायनमः ॥ छ ॥

सफलांकरिष्यामीत्यत्रदृष्टांतः प्रसूतमिति॥अंकुरितमित्यर्थः॥कलमक्षेत्रमिति व्रीहिक्षेत्रमित्यर्थः॥१६॥जितकाशी जितभ्रमो जितभयो वा त्वयात्राधर्षितः सन्॥पुराघेनानिष्पन्नेन शहंकुर्वित्यर्थः॥१७॥ननुह्वानेपि आह्वाने स्त्र्यादिसक्तो न निष्पतिष्यतीत्यत्राह॥निष्पतिष्यतीति॥असंगेन स्त्र्यादिसंगपरित्यागेनेत्यर्थः॥यतः प्रियसंयुगः नमर्षयंतीत्यस्य शूरा इतिशेषः॥१८॥विशेषतो नमर्षयंतीत्यनुषंगः॥१९॥गावो

प्रसूतं कलमक्षेत्रं वर्षेणेव शतक्रतुः।तदाह्वाननिमित्तं च वालिनो हेममालिनः॥१६॥सुग्रीव कुरु तं शब्दं निष्पतेद्येन वानरः॥जितकाशी जयश्लाघी त्वया चाधर्षितः पुरा॥१७॥निष्पतिष्यत्यसंगेन वाली स प्रियसंयुगः॥रिपूणां धर्षितं श्रुत्वा मर्षयंति न संयुगे॥१८॥जानंतस्तु स्वकं वीर्यं स्त्रीसमक्षं विशेषतः॥स तु रामवचः श्रुत्वा सुग्रीवो हेमपिंगलः॥१९॥ननर्द क्रूरनादेन विनिर्भिंदन्निवांबरं॥तस्य शब्देन वित्रस्ता गावो यांति हतप्रभाः॥२०॥राजदोषपरामृष्टाः कुलस्त्रिय इवाकुलाः॥द्रवंति च मृगाः शीघ्रं भग्ना इव रणे हयाः॥२१॥पतंति च खगा भूमौ क्षीणपुण्या इव ग्रहाः॥२२॥ततः स जीमूतकृतप्रणादो नादं ह्यमुंचत्त्वरया प्रतीतः॥सूर्यात्मजः शौर्यविवृद्धतेजाः सरित्पतिर्वानिलचंचलोर्मिः॥२३॥इत्यार्षे श्रीमद्रामायणे वा० किष्किंधाकांडे चतुर्दशः सर्गः॥१४॥

।महांतो वृषभाः हतप्रभाः हतशक्तयः॥२०॥राजदोषेण प्रजारक्षणाभावरूपेण राजदोषेण परैः रन्यैः रामृष्टाः आत्मरक्षावाकुला व्याकुला कुलस्त्रिय इव गावो यांति॥२१॥ग्रहाः देवाः॥२२॥जीमूतवत् कृतप्रणादः प्रतीतः रामे इति शेषः शौर्यं पराक्रमः करणो विवृद्धं तेजो यस्य स सरित्पतिर्वा समुद्र इव॥२३॥गरमानः।इति रामाभिरामे श्रीरा० कि० चतुर्दशः सर्गः॥१४॥

अर्थेति ॥ १ ॥ एकपदेनक्षणेनआपादितः संपादितः ॥ २ ॥ कनकप्रभस्यक्रोधादतिरिक्तत्वेसहजप्रभानाशेः तेनोपरक्तादित्योपमेयता ॥ ३ ॥ रक्तादित्या सत्त्वसूक्ष्मलक्षणानि उत्पतितपद्मेत्येकदेशेनतंउत्पतितैरुद्धतैः पद्मैरुत्पतितानांपद्मानांशोभायस्यतादृशोमृणालसहितोह्रद इवदंष्ट्रामृणालस्थानीया ॥ ४ ॥ दुर्मर्षणंदुःसहं वेगेनउच्चैःपदन्यासैः ॥ ५ ॥ त्रस्तसंभ्रांताकर्मधारयेपुंवत्वं त्रस्ताभीतासंभ्रांताकुभिन

अथतस्यनिनादंतंसुग्रीवस्यमहात्मनः ॥ शुश्रावांतःपुरगतोवालीभ्रातुरमर्षणः ॥ १ ॥ श्रुत्वातुतस्यनिनदंसर्वभूतप्रकंपनं ॥ मदश्चैकपदेनष्टः क्रोधश्चापादितोमहान् ॥ २ ॥ ततोरोषपरीतांगोवालीसकनकप्रभः ॥ उपरक्तइवादित्यः सद्योनिष्प्रभतांगतः ॥ ३ ॥ वालीदंष्ट्राकरालस्तुक्रोधाद्दीप्ताग्निलोचनः ॥ भात्युत्पतितपद्माभः समृणालइवह्रदः ॥ ४ ॥ शब्दंदुर्मर्षणंश्रुत्वानिष्पपाततमोहरिः वेगेनचपदन्यासैर्दारयन्निवमेदिनीम् ॥ ५ ॥ तंतुतारापरिष्वज्यस्नेहाद्दर्शितसौहृदा उवाचत्रस्तसंभ्रांताहितोदर्कमिदंवचः ॥ ६ ॥ साधुक्रोधमिमंवीरनदीवेगमिवागतं ॥ शयनादुत्थितःकाल्यंत्यज भुक्तामिवस्रजं ॥ ७ ॥ काल्यमेतेनसंग्रामंकरिष्यसिचवानर वीरतेशत्रुबाहुल्यंफल्गुतावानविद्यते ॥ ८ ॥ सहसातवनिष्क्रामोममतावन्नरोचते ॥ श्रूयतामभिधास्यामियन्निमित्तंनिवार्यसे ॥ ९ ॥

॥ त्रस्ताहितोदर्कंहितरूपोत्तरकालफलं ॥ ६ ॥ काल्यंप्रातः कालेशयनादुत्थितःभुक्तांस्रजमिवस्रजक्रोधं ॥ ७ ॥ काल्यंप्रातःकालेसंग्रामंकुरु हेवीरयद्यपिसंग्रामेशत्रोर्बाहुल्यंत्वत्तआधिक्यंनविद्यते ॥ नापितवफल्गुतालघुतानविद्यतेऽथापिसहसाहठात्तवाद्यनिष्क्रामोनिष्क्रमणंममनरोचतेऽतस्त्वाह ॥ श्रूयतामिति ॥ ८ ॥ ९ ॥ श्रीकृष्णार्पणमस्तु ॥ छ ॥

111

॥ राम· ॥
॥ ३४ ॥

पूर्वंक्रोधादपतितःसुग्रीवोयुद्धायत्वामाह्वयते आह्वयन्नतदानेत्वयानिष्पत्यनिरस्तोहन्यमानश्चदिशोगतः॥१०॥तस्यतथानिरस्तस्यपुनरेत्याह्वानंशंकांजनयत्येव॥११॥कुतस्तत्राह।दर्पश्चेति दर्पोगर्वःव्यवसायोयुद्धविषयःयादृशश्चनर्दतोनिनादस्यसंरंभोवृद्धिरेतदेतस्यकारणंनाल्पं।अयंदर्पादिःकारणविशेषपूर्वकःकार्यविशेषत्वात्॥इत्यनुमितं॥१२॥कारणविशेषंदर्शयतिनेति।अवष्टब्धसहायःपरिगृहीतसहायः

पूर्वमपतितःक्रोधात्सत्वामाह्वयतेयुधि॥निष्पत्यचनिरस्तस्तेहन्यमानोदिशोगतः॥१०॥त्वयातस्यनिरस्तस्यपीडितस्यविशेषतः॥इहैत्यपुनराह्वानंशंकांजनयतीवमे॥११॥दर्पश्चव्यवसायश्चयादृशस्तस्यनर्दतः॥निनादस्यचसंरंभोनैतदल्पंहिकारणम्॥१२॥नासहायमहंमन्येसुग्रीवंतमिहागतं॥अवष्टब्धसहायश्चयमाश्रित्यैषगर्जति॥१३॥प्रकृत्यानिपुणश्चैवबुद्धिमांश्चैववानरः॥नापरीक्षितवीर्य्येणसुग्रीवःसख्यमेष्यति॥१४॥पूर्वमेवमयावीरश्रुतंकथयतोवचः॥अंगदस्यकुमारस्यवक्षाम्यद्यहितंवचः॥१५॥अंगदस्तुकुमारोयंवनान्तमुपनिर्गतः॥प्रवृत्तिस्तेनकथिताचारैरासीन्निवेदिता॥१६॥

((परिगृहीतसहायःसर्वथासहायसंबंधमूलोयंसंरंभइतिभावः॥१३॥तन्वियमीतस्यबुद्धिःकुतस्तत्राहप्रकृत्येति।निपुणःउचितकार्यनिष्पादनेसमर्थःतत्समबुद्धिमांश्च।ततुससहायंतंवधिष्यामीतिचेत्तत्राहअपरीक्षितशत्रुनाशकवीर्येणपुंसासुग्रीवःसख्यंनैष्यति।अतस्तत्सहायभूतःशंकनीयएव॥१४॥नकेवलंमदनुमितमेवायमर्थःकिंतुशब्दप्रमाणादप्यवगतइत्याह।पूर्वमेवेतियन्मयापूर्वमंगदस्यकुमारस्यवचःश्रुतंतत्त्वहितंअद्यत्वांवक्ष्यामि॥१५॥तदेवाह॥अंगदस्त्वितिवनान्तंवनमध्यंयातस्तेचारैर्निवेदिताप्रवृत्तिरासीत्प्रवृत्तिःसुग्रीववृत्तान्तःसातेनममकथिता॥१६॥

७॥ तत्र तयोर्मध्ये यस्त्वभ्रातुः सहायो विख्यातः हि यतः स परबलामर्दी साधूनां निवासवृक्षः आश्रयः आपन्नानां शरणागतानां गतिः शरणं ॥ १८ ॥ १९ ॥ आ
र्त्तानां शत्रुपीडितानां तन्नाशाय संश्रयः संश्रयार्हः ज्ञानं ब्रह्मज्ञानं धर्मविषयं विज्ञानं शिल्पनैपुण्यं वा ॥ निदेशे निरत इत्यनेन स्वराज्यमरक्षित्वतः कृतः
पररक्षणसामर्थ्यमित्यपास्तं ॥ २० ॥ तत्रास्मात्तेनोच्चमानत्व स्वरामे सामान्यविरोधे न क्षमः नत्युक्तः ॥ २१ ॥ दुर्जयेनेत्याद्यर्धं पूर्वान्वयि किंचिद्वक्ष्यमाणं

अयोध्याधिपतेः पुत्रौ शूरौ समरदुर्जयौ ॥ इक्ष्वाकूणां कुले जातौ प्रथितौ रामलक्ष्मणौ ॥ ७ ॥ सुग्रीवप्रियकामार्थं प्राप्तौ त
त्र दुरासदौ ॥ स ते भ्रातुर्हि विख्यातः सहायो रणकर्मणि ॥ १८ ॥ रामः परबलामर्दी युगान्ताग्निरिवोत्थितः ॥ निवासवृक्षः
साधूनामापन्नानां परा गतिः ॥ १९ ॥ आर्त्तानां संश्रयश्चैव यशसश्चैकभाजनं ॥ ज्ञानविज्ञानसंपन्नो निदेशे निरतः
पितुः ॥ २० ॥ धातूनामिव शैलेंद्रो गुणानामाकरो महान् ॥ तत्क्षमो न विरोधस्ते सह तेन महात्मना ॥ २१ ॥ दुर्जयेनाप्रमेयेण
रामेण रणकर्मसु ॥ शूर वक्ष्यामि ते किंचिन्न चेच्छाम्यभ्यसूयितुम् ॥ २२ ॥ श्रूयतां क्रियतां चैव तव वक्ष्यामि यद्धितं ॥ यौ
वराज्येन सुग्रीवं तूर्णं साध्वभिषेचय ॥ २३ ॥ विग्रहं मा कृथा वीर भ्रात्रा राजन्यवीयसा ॥ अहं हि ते क्षमं मन्ये तेन रामेण
सौहृदं ॥ २४ ॥ सुग्रीवेण च संप्रीतिं वैरमुत्सृज्य दूरतः ॥ लालनीयो हि ते भ्राता यवीयानेष वानरः ॥ २५ ॥ ॥ छ ॥ ॥

त्वयाभ्यसूयितुं नेच्छामि ॥ कथमियं मां प्रतिवदतीति मदसूयान कर्तव्येत्यर्थः ॥ आर्षत्वादसमानकर्तृकत्वेपि तुमुन् ॥ २२ ॥ २३ ॥ तेन वली
यसा रामेण ॥ २४ ॥ २५ ॥ ॥ श्रीरामाय रामचन्द्राय श्रीकृष्णाय वासुदेवाय नम ॥ छ ॥ श्रीरामरामरामरामरामरामरामरामः ॥

112

तत्र तस्मिन् दूरदेशे वा सन् विद्यमानः इहस्थस्त्वत्समीपस्थो वा ॥ भुवि न पश्यामि न वेत्ति शेषः ॥ २६ ॥ प्रत्यनंतरं स्वाधीनं ॥ २७ ॥ भ्रातृसौहृदमालंब्यैव तन्
वगतिर्नान्या गतिरस्तीत्यर्थः ॥ २८ ॥ यदि ते यदि त्वयेत्यर्थः ॥ २९ ॥ ३० ॥ नदाहीत्यादिक विवाकः ॥ ३१ ॥ इति श्रीरामाभिरामे श्री रा० रा० किष्किंधा

तत्र वा सन्निहस्थो वा सर्वथा बंधुरे वने ॥ नहि मे न समं बंधुं भुवि पश्यामि कंचन ॥ २६ ॥ दानमानादिसत्कारैः कुरुष्व प्र
त्यनंतरं ॥ वैरमेतत्समुत्सृज्य तव पार्श्वे सनिष्ठतु ॥ २७ ॥ सुग्रीवो विपुलग्रीवो महाबंधुर्मतस्तव ॥ भ्रातृसौहृदमालं
ब्य नान्या गतिरिहास्ति मे ॥ २८ ॥ यदि ते मत्प्रियं कार्यं यदि चावैषि मां हितं ॥ याच्यमानः प्रियत्वेन साधु वाक्यं कुरुष्व
मे ॥ २९ ॥ प्रसीद पथ्यं भ्रुणु जल्पितं नहि मे न रोषमेवानुविधातुमर्हसि ॥ क्षमो हि ते कोसलराजसूनुना न विग्रह
ः शक्रसमानतेजसा ॥ ३० ॥ नदा हि तारा हितमेव वाक्यं तं वालिनं पथ्यमिदं बभाषे न रोचते न द्वचनं हि तस्य कालाभि
पन्नस्य विनाशकाले ॥ ३१ ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे पंचदशः सर्गः ॥ १५ ॥ नामेवं ब्रुवतीं तारां ता
राधिपनिभाननां ॥ वाली निर्भर्त्सयामास वचनं चेदमब्रवीत् ॥ १ ॥ गर्जतोऽस्य सुसंरब्धं भ्रातुः शत्रोर्विशेषतः मर्षयि
ष्यामि केनापि कारणेन वरानने ॥ २ ॥ अधर्षितानां शूराणां समरेष्वनिवर्तिनां ॥ धर्षणामर्षणं भीरु मरणादतिरि
च्यते ॥ ३ ॥ सोढुं न च समर्थोऽहं युद्धकामस्य संयुगे ॥ सुग्रीवस्य च संरंभं हीनग्रीवस्य गर्जितं ॥ ४ ॥

((कांडे पंचदशः सर्गः ॥ १५ ॥ ना
मिति ॥ १ ॥ सुसंरब्धं भावे निष्ठा सुसंरंभमित्यर्थः केनापि न केनापि त्वदुक्तकारणेनेत्यर्थः ॥ २ ॥ धर्षणामर्षणमसहनं ॥ ३ ॥ संयुगे संरंभं संयुगनिमित्तं

रामायणकिष्कि ॥ ८ ॥

॥ रा.वा.कि ॥
॥ ३९ ॥

नाहंगर्वितमायस्तं सहिष्यामि दुरात्मन इतिपाठांतरं ४

राघवंप्रतिराघवनिमित्तम मालक्ष्मणमत्कृतेत्वयाविषादोनकार्यः यतोधर्मज्ञत्वादिगुणाः सः पापंमद्वधरूपं ॥ ५ ॥ कथंभूयोनुगच्छसिनिवर्तस्वेत्युच्यमाना
प्रीतिभावः भक्तिरनुरागः ॥ ६ ॥ दर्पंचदर्पमेव ॥ वियोक्ष्यतेवियोजयिष्यतेसोदरत्वात् ॥ ७ ॥ उक्तमेवविहरणेति ईप्सितंत्वदीप्सितंदर्पमोचनमेवे

नचकार्योविषादस्तेराघवंप्रतिमत्कृते ॥ धर्मज्ञश्चकृतज्ञश्चकथंपापंकरिष्यति ॥ ५ ॥ निवर्तस्वसहस्त्रीभिःकथंभूयोनुग
च्छसि ॥ सौहृदंदर्शितंतावन्मयिभक्तिस्त्वयाकृता ॥ ६ ॥ प्रतियोत्स्याम्यहंगत्वासुग्रीवंजहिसंभ्रमंदर्पंचास्यविनेष्यामिन
चप्राणैर्वियोक्ष्यते ॥ ७ ॥ अहंह्याजिस्थितस्यास्यकरिष्यामियदीप्सितं ॥ वृक्षैर्मुष्टिप्रहारैश्चपीडितःप्रतियास्यति
॥ ८ ॥ नमेगर्वितमायस्तंसहिष्यतिदुरात्मवान् ॥ कृतंतारेसहायत्वंदर्शितंसौहृदंमयि ॥ ९ ॥ शापितासिममप्रा
णैर्निवर्तस्वजनेनच ॥ अलंजित्वानिवर्तिष्येतमहंभ्रातरंरणे ॥ १० ॥ तंतुतारापरिष्वज्यवालिनंप्रियवादिनी ॥ चका
ररुदतीमंदंदक्षिणासाप्रदक्षिणं ॥ ११ ॥ ततःस्वस्त्ययनंकृत्वामंत्रविद्विजयैषिणी ॥ अंतःपुरंसहस्त्रीभिःप्रवि
ष्टाशोकमोहिता ॥ १२ ॥ प्रविष्टायांतुतारायांसहस्त्रीभिःस्वमालयं ॥ नगर्यानिर्ययौक्रुद्धोमहासर्पइवश्वसन् ॥
१३ ॥ सनिश्वस्यमहारोषोवालीपरमवेगवान् ॥ सर्वतश्चारयन्दृष्टिंशत्रुदर्शनकांक्षया ॥ १४ ॥

त्यर्थः वृक्षैः वृक्षप्रहारैः ॥ ८ ॥ ग
र्वितंदर्पंआयस्तंगमनप्रवृत्तंदृढयत्नंभावेनिष्ठासहायत्वंत्वाभिसाधितं ॥ ९ ॥ जनेनस्वपरिवारजनेन ॥ अलंजित्वाजयमात्रंकृत्वानिवर्तिष्येनतुवध
मित्यर्थः ॥ अहंजित्वेतिपाठस्त्वसांप्रदायिकः ॥ १० ॥ ११ ॥ मंत्रवित्स्वस्त्ययनमंत्रवेत्री ॥ देवांशत्वात्तद्वेदनं ॥ १२ ॥ १३ ॥ सर्वतोदृष्टिंचारयन्स्थितइति

113

॥ राम· ॥
॥ ३९ ॥

सुसंवीतंबद्धकक्षंअवष्टभ्यउत्पत्ययादृढंभूमिमाक्रम्यस्थितं॥१५॥१६॥गाढंसंवीतःदृढंबद्धकक्षः॥१७॥सुग्रीवोपिवालिनंसमुद्दिश्यपश्चिमंदृढंबद्धंसु
स्थिसुद्धायकिंचिन्मुखमागतः॥१८॥वेगविमुक्तस्त्वदुपरीतिशेषः॥२०॥ एवमुक्तोवालिना॥नवप्राणान्हरन्एषमुष्टिर्मामकसवमूर्ध्निपततु

सददर्शततःश्रीमान्सुग्रीवंहेमपिंगलं॥सुसंवीतमवष्टब्धंदीप्यमानमिवानलं॥१५॥तंसदृष्ट्वामहावाहुःसुग्रीवंप
र्यवस्थितं॥गाढंपरिदधेवासोवालीपरमकोपनः॥१६॥सवालीगाढसंवीतोमुष्टिमुद्यम्यवीर्यवान्॥सुग्रीवमे
वाभिमुखोययौयोद्धुंकृतक्षणः॥१७॥श्लिष्टंमुष्टिंसमुद्यम्यसंरब्धतरमागतः॥सुग्रीवोपिसमुद्दिश्यवालिनंहे
ममालिनं॥१८॥तंवालीक्रोधताम्राक्षःसुग्रीवंरणकोविदं॥आपतंतंमहावेगमिदंवचनमब्रवीत्॥१९॥ए
षमुष्टिर्मयाबद्धोगाढःसुनियतांगुलिः॥मयावेगविमुक्तस्तेप्राणानादाययास्यति॥२०॥एवमुक्तस्तुसुग्रीवःक्रु
द्धोवालिनमब्रवीत्॥तवचैषहरन्प्राणान्मुष्टिःपततुमूर्धनि॥२१॥ताडितस्तेनसंक्रुद्धःसमभिक्रम्यवेगतः॥अ
भवच्छोणितोद्गारीसापीडइवपर्वतः॥२२॥सुग्रीवेणतुनिःशंकंसालमुत्पाट्यतेजसा॥गात्रेष्वभिहतोवाली
वज्रेणेवमहागिरिः॥२३॥सतुवृक्षेणनिर्भग्नःसालताडनविह्वलः॥गुरुभारभराक्रांतानौःससार्थेवसागरे॥२४॥

इत्यब्रवीत्॥२१॥सुग्रीवमभिक्रम्याक्रम्यस्थितेनवालिनावेगतस्ताडितःसुग्रीवःसापीडःसनिर्झरःपर्वतइवाभवत्॥२२॥निःशंकंयोगि
नोद्गारजडुःखसंबंधरहितंयथातथाऽभिहतोवालीसागरेनौरिवविह्वलोऽभवत्॥२३॥२४॥ रामायरामचन्द्रायश्रीकृष्णायनमः

सुपर्णेन समं वेगितं वेगो ययोस्तौ चंद्रसूर्याविवेति यद्यर्थातिशयोक्तिरेषा ॥२५॥ २६॥ परिहीयत आडभाव आर्षः ॥२७॥ राघवं दर्शयामास स्व

तौ भीमबलविक्रांतौ सुपर्णसमवेगिनौ ॥ प्रवृद्धौ घोरवपुषौ चंद्रसूर्याविवांबरे ॥२५॥ परस्परममित्रघ्नौ छिद्रा
न्वेषणतत्परौ ॥ ततोवर्धत वाली तु बलवीर्यसमन्वितः ॥२६॥ सूर्यपुत्रो महावीर्यः सुग्रीवः परिहीयत ॥ वालि
ना भग्नदर्पस्तु सुग्रीवो मंदविक्रमः ॥२७॥ वालिनं प्रति सामर्षो दर्शयामास राघवं ॥ वृक्षैः सशाखैः शिख
रैर्वज्रकोटिनिभैर्नखैः ॥२८॥ मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनःपुनः ॥ तयोर्युद्धमभूद्घोरं वृत्रवा
सवयोरिव ॥२९॥ तौ शोणिताक्तौ युध्येतां वानरौ वनचारिणौ ॥ मेघाविव महाशब्दैस्तर्जमानौ परस्परौ ॥
३०॥ हीयमानमथापश्यत्सुग्रीवं वानरेश्वरं ॥ प्रेक्षमाणं दिशश्चैव राघवः समुहुर्मुहुः ॥३१॥ ततो रामो महातेजा
आर्तं दृष्ट्वा हरीश्वरं ॥ सशरं वीक्षते वीरो वालिनो वधकांक्षया ॥३२॥ ततो धनुषि संधाय शरमाशीविषोपमं ॥ पू
रयामास तच्चापं कालचक्रमिवांतकः ॥३३॥ तस्य ज्यातलघोषेण त्रस्ताः पत्ररथेश्वराः ॥ प्रदुद्रुवुर्मृगाश्चै
व युगांत इव मोहिताः ॥३४॥ मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसन्निभः ॥ राघवेण महाबाणो वालिवक्षसि
पातितः ॥३५॥ ततस्तेन महातेजा वीर्ययुक्तः कपीश्वरः ॥ वेगेनाभिहतो वाली निपपात महीतले ॥३६॥ छ ॥

हानिमिति शेषः ॥२८॥ २९॥ युध्येतामयुध्येतां ॥३०॥ ३१॥ सशरमः शरं वीक्षते स्म ॥३२॥ ३३॥ पत्ररथाः पक्षिणः ॥३४॥ मुक्तो बाणः पातित इत्यर्थः ॥३५॥ ३६

11 34

आश्वयुक्समयेआश्वयुक्आश्वयुजीपौर्णमासीयत्रमासे।तस्मिन्नाश्विनेमासिपौर्णमास्यामिंद्रध्वजोत्सवांतेउद्धृतउत्क्षिप्तइंद्रध्वजोयथाभूमौपपात।म
हद्धालीशीर्षांतेपतितइत्यर्थः।अतएवसुग्रीवाभिषेकसमयेश्रावणोमासोऽत्रनावर्ततइतिवचनेननविरोधः॥३७॥३८॥उक्तमुपसंहरति।नरो

इंद्रध्वजइवोद्धूतःपौर्णमास्यांमहीतले॥आश्वयुक्समयेमासिगतसत्वोविचेतनः॥३७॥वाष्पसंरुद्धकंठस्तुवा
लीचार्तस्वरःशनैः॥३८॥नरोत्तमःकालइवांतकोपमंशरोत्तमंकांचनरूपभासितं॥ससर्जदीप्तंतममित्रमर्दनंसधूम
मग्निंमुखतोयथाहरः॥३९॥अथोक्षितःशोणिततोयविस्रवैःप्रपुष्पिताशोकइवाचलोद्धतः॥विचेतनोवासवसूनु
राहवेप्रभ्रंशितेंद्रध्वजवत्क्षितिंगतः॥४०॥इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेषोडशःसर्गः॥१६॥ततःशरेणा
भिहतोरामेणरणकर्कशः॥पपातसहसावालीनिकृत्तइवपादपः॥१॥सभूमौन्यस्तसर्वांगस्तप्तकांचनभूष
णः॥अपतद्देवराजस्यमुक्तरश्मिरिवध्वजः॥२॥अस्मिन्निपतितेभूमौहर्यृक्षाणांगणेश्वरे।नष्टचंद्रमिवव्यो
मनव्यराजतमेदिनी॥३॥भूमौनिपतितस्यापितस्यदेहंमहात्मनः॥नश्रीर्जहातिनप्राणानतेजोनपराक्रमः॥
४॥शक्रदत्तावरामालाकांचनीरत्नभूषिता॥दधारहरिमुख्यस्यप्राणांस्तेजःश्रियंचसा॥५॥ छ ॥

त्तमइति।मुखतःमुखस्थललाटनेत्रेणेत्यर्थः॥३९॥शोणिततोयस्यविस्रवैःस्रुतिभिःप्रभ्रंशितउत्सवांतेपातितः॥४०॥इतिरामाभिरामेश्रीरा०
किष्किंधाकांडेषोडशःसर्गः॥१६॥ततइति॥१॥मुक्तरश्मिःमुक्तरथरज्जुबंधनः॥२॥मेदिनीतद्राज्यभूमिः॥३॥४॥प्राणाद्यहानेकारणमाह

नै२.

हैमया हैम्या संध्यया संध्यारागेणानुगतः पर्यन्तो यस्य पयोधरस्यास्यं तु वालिदेहस्य ॥ ६ ॥ त्रिधा रचिते त्रिधा विभक्ते व माला देहशररूपा लक्ष्मीरिति यावत् ॥ ७ ॥ स्वर्गमार्गप्रभावनं तत्प्रकाशकं सत् ॥ परमां गतिं ब्रह्मलोकमावहत् ॥ प्रापयति स्म ॥ वारणा अस्यंते नेनेति वारणासनम् धनुः ॥ ९ ॥ महेंद्रं उपेंद्रं स्येव ह

स तया मालया वीरो हैमया हरियूथपः ॥ संध्यानुगतपर्यंतः पयोधर इवाभवत् ॥ ६ ॥ तस्य माला च देहश्च मर्मघाती च यः
शरः ॥ त्रिधेव रचिता लक्ष्मीः पतितस्यापि शोभते ॥ ७ ॥ तदस्त्रं तस्य वीरस्य स्वर्गमार्गप्रभावनं ॥ रामवाणासनक्षिप्तमावह
त्परमां गतिं ॥ ८ ॥ तं तथा पतितं संख्ये गतार्चिषमिवानलं ॥ ययातिमिव पुण्यांते देवलोकादिहच्युतम् ॥ ९ ॥ आदित्य
मिव कालेन युगांते भुवि पातितं ॥ महेंद्रमिव दुर्धर्षमुपेंद्र इव दुःसहं ॥ १० ॥ महेंद्रपुत्रं पतितं वालिनं हेममालिनं
व्यूढोरस्कं महाबाहुं दीप्तास्यं हरिलोचनं ॥ ११ ॥ लक्ष्मणानुचरो रामो ददर्शोपससर्प च ॥ तं तथा पतितं वीरं गता
र्चिषमिवानलं ॥ १२ ॥ बहुमान्य च तं वीरं वीक्षमाणौ शनैरिह ॥ उपयातौ महावीर्यौ भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥
तं दृष्ट्वा राघवं वाली लक्ष्मणं च महाबलं ॥ अब्रवीत्परुषं वाक्यं प्रश्रितं धर्मसंहितं ॥ १४ ॥ स भूमावल्पतेजोसुर्निह
तो नष्टचेतनः ॥ अर्थसंहितया वाचा गर्वितं रणगर्वितं ॥ १५ ॥

॥ अवधोत्तरमिदं नाम्नि येके महेंद्र आजानदेवः ॥ उपेंद्रः कर्मदेव इत्यन्ये ॥ १० ॥
हरिलोचनं पीतनेत्रं हरितश्च पीतपर्यायः हरिद्राभः पालाशो हरितो हरिरिति कोशः आर्षस्सलोपः ॥ ११ ॥ १२ ॥ बहुमान्य सन्मान्य शनैरेत्य उपयातौ समी
पगतौ ॥ १३ ॥ १४ ॥ अल्पं तेजोसवश्च यस्य सः नष्टचेतनः नष्टचेष्टः गर्वितं गर्वोपेतं यथा भवति तथा रणगर्वितं राममर्थयुक्तया वाचा परुषमब्रवीदित्य

115

धृ

पराङ्मुखवधं पृष्ठतयात्वदनभिमुखं तं देवाह ॥ युद्धसंरब्धः युद्धार्थमप्यसहनक्रोधः ॥ १६ ॥ १७ ॥ समयज्ञ उचितानुचितकालज्ञः ॥ १८ ॥ दमशमावंतर्वाह्येंद्रि
यनिग्रहः क्षमा शक्तप्रतिक्रियाऽपकारसहिष्णुता ॥ १९ ॥ तान्राजयोग्यान् ॥ अभिजनं महाकुलप्रसूतत्वं ॥ २० ॥ अन्येन संयुक्तमत एव ते त्वयि प्र

पराङ्मुखवधं कृत्वा कोऽत्र प्राप्तस्त्वया गुणः ॥ यदहं युद्धसंरब्धस्त्वत्कृते निधनं गतः ॥ १६ ॥ कुलीनः सत्वसंपन्न
स्तेजस्वी चरितव्रतः ॥ रामः करुणावेदी च प्रजानां च हिते रतः ॥ १७ ॥ सानुक्रोशो महोत्साहः समयज्ञो दृढव्रतः ॥ इ
मेन्सर्वभूतानि कथयंति यशो भुवि ॥ १८ ॥ दमः शमः क्षमा धर्मो धृतिः सत्वं पराक्रमः ॥ पार्थिवानां गुणा राज
न् दंडश्चाप्यपकारिषु ॥ १९ ॥ तान् गुणान् संप्रधार्याहमग्र्यं चाभिजनं तव ॥ तारया प्रतिषिद्धः सन् सुग्रीवेण
समागतः ॥ २० ॥ न मामन्येन संरब्धं प्रमत्तं वेद्धुमर्हसि ॥ इति मे बुद्धिरुत्पन्ना बभूवादर्शने तव ॥ २१ ॥ स त्वां
विनिहितात्मानं धर्मध्वजमधार्मिकं ॥ जाने पापसमाचारं तृणैः कूपमिवावृतं ॥ २२ ॥ सतां वेषधरं पापं प्रच्छ
न्नमिव पावकं ॥ नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतं ॥ २३ ॥ विषये वा पुरे वा ते यदा पापं करोम्यहं ॥ न च
त्वामवजानेऽहं कस्मात्त्वं हंस्यकिल्विषं ॥ २४ ॥ फलमूलाशनं नित्यं वानरं वनगोचरं ॥ मामिहाप्रतियुध्यंतमन्ये
न च समागतं ॥ २५ ॥

प्रमत्तमसावधानं मां न वेद्धुमर्हसीति बुद्धिः तवादर्शनेन त्वदर्शनात्प्रागुत्पन्ना ॥ २१ ॥ विनिहितात्मानं अधर्माचरणात्
नष्टात्मानं ॥ २२ ॥ प्रच्छन्नं भस्मनेति शेषः छद्मव्याजः ॥ २३ ॥ विषये देशे यदा यस्मात्पापं न करोमि नेत्यस्यानुकर्षः त्वां नावजाने तवावज्ञां च न करोमि

॥ ए·वा·कि· ॥
॥ ३९ ॥

लिंगं जटावल्कलधरत्वं अस्ति मदहिंसासाधनमितिशेषः॥ नत्वप्रत्यक्षं दृश्यमेवेत्याह दृश्यत इति ॥ २६ ॥ २७ ॥ अभव्योऽविनीतः॥ २८ ॥ २९ ॥ एषा वनचरत्वादि
रूपा प्रकृतिः स्वभावः पुरुषस्त्वं तेन ग्रामवासिना वाशिन्वंध्ययं ॥ ३० ॥ रूपं रूप्यं कारणानि चेत्याकुरितिशेषः॥ वने विद्यमानेषु मदीयेषु मूलेषु फलेषु वा क

त्वं नराधिपतेः पुत्रः प्रतीतः प्रियदर्शनः॥ लिंगमप्यस्ति ते राजन् दृश्यते धर्मसंहितं ॥ २६ ॥ कः क्षत्रियकुले जातः श्रुतवान्नष्टसंशयः॥ धर्मलिंगप्रतिच्छन्नः क्रूरं कर्म समाचरेत् ॥ २७ ॥ त्वं राघवकुले जातो धर्मवानिति विश्रुतः॥ अभव्यो भव्यरूपेण किमर्थं परिधावसे ॥ २८ ॥ साम दानं क्षमा धर्मः सत्यं धृतिपराक्रमौ॥ पार्थिवानां गुणा राजन् दंडश्चाप्यपकारिषु ॥ २९ ॥ वयं वनचरा राम मृगा मूलफलाशिनः॥ एषा प्रकृतिरस्माकं पुरुषस्त्वं नरेश्वरः॥ ३० ॥ भूमिर्हिरण्यं रूप्यं च निग्रहे कारणानि च॥ तत्र कस्ते वने लोभो मदीयेषु फलेषु वा ॥ ३१ ॥ नयश्च विनयश्चोभौ निग्रहानुग्रहावपि॥ राजवृत्तिरसंकीर्णा न नृपाः कामवृत्तयः॥ ३२ ॥ त्वं तु कामप्रधानश्च कोपनश्चानवस्थितः॥ राजवृत्ते च संकीर्णः शरासनपरायणः॥ ३३ ॥ न तेऽस्त्यपचितिर्धर्मे नार्थे बुद्धिरवस्थिता॥ इंद्रियैः कामवृत्तः सन् कृष्यसे मनुजेश्वर ॥ ३४ ॥ हत्वा बाणेन काकुत्स्थ मामिहानपराधिनं॥ किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितं ॥ ३५

॥ स्ते लोभः अपेक्षा न कापीत्य
र्थः एवं वनचरत्वपुरचरत्वमृगत्वमनुष्यत्वमूलाशनत्वान्नाशनत्वनरेश्वरत्वरूपवैधर्म्याच्चावयोर्विरोधप्रसक्तिरिति भावः॥ ३१ ॥ नयो नीतिर्विनयः
प्रश्रयः असंकीर्णा निग्रहानुग्रहादिविषये विपरीता ॥ ३२ ॥ शरासनपरायणः यत्र क्वापि शराणामसनं न्यायानत्वपरायणः॥ ३३ ॥ अपचितिः पूजा काम
वृत्तः सन्निंद्रियैः कृष्यत इति संबंधः॥ ३४ ॥ ३५ ॥

॥ राम· ॥
॥ ३९ ॥

116

स्लक्ष२

परिवेत्राज्येष्ठे ऽकृतदारे ऽकृताग्निहोत्रे कृतदारः कृताग्निहोत्रोऽनुजः ॥ ३६ ॥ गच्छन्नेगच्छन्निति । तेषु प्रकृते राजहन्त्वं दोषो बोध्यं ॥ २७ ॥ यद्यपि क्षत्रियस्य मृगह
ननमप्यस्ति । तथापि मद्विषयमिदमप्रयोजनमित्याह ॥ अधार्यमिति । वर्जितं अस्य स्पृष्टत्वेन स्पृष्टिपूक्रमित्यर्थः ॥ ३८ ॥ अभक्ष्याणीत्यत्र प्रमाणमाह
पंच पंचेत्यादि । ब्रह्मक्षत्रेति समाहारद्वंद्वः शल्यकः खड्गी भुक्तिकाकारशल्याहननसवर्णगोजन्तुविशेषः इत्यन्ये श्वाविधो कंटकाकारदीर्घरोमभिः भु

राजहा ब्रह्महा गोघ्नश्चोरः प्राणिवधे रतः नास्तिकः परिवेत्ता च सर्वे निरयगामिनः ॥ ३६ ॥ सूचकश्च कदर्यश्च मित्रघ्नो
गुरुतल्पगः ॥ लोकं पापात्मनामेते गच्छन्ते नात्र संशयः ॥ ३७ ॥ अधार्यं चर्म मे सद्भिः रोमाण्यस्थि च वर्जितं ॥ अभक्ष्याणि
च मांसानि त्वद्विधैर्धर्मचारिभिः ॥ ३८ ॥ पंच पंचनखा भक्ष्या ब्रह्मक्षत्रेण राघव ॥ शल्यकः श्वाविधो गोधा शशः कू
र्मश्च पंचमः ॥ ३९ ॥ चर्म चास्थि च मे राम न स्पृशंति मनीषिणः ॥ अभक्ष्याणि च मांसानि सोहं पंचनखो हतः ॥
४० ॥ तारया वाक्यमुक्तोहं सत्यं सर्वज्ञया हितं ॥ तदतिक्रम्य मोहेन कालस्य वशमागतः ॥ ४१ ॥ त्वया नाथेन काकु
त्स्थ न सनाथा वसुंधरा ॥ प्रमदा शीलसंपूर्णा पत्येव च विधर्मणा ॥ ४२ ॥ शठो नैकृतिकः क्षुद्रो मिथ्याप्रश्रितमान
सः ॥ कथं दशरथेन त्वं जातः पापो महात्मना ॥ ४३ ॥ छिन्नचारित्र्यकक्ष्येण सतां धर्मातिवर्तिना ॥ त्यक्तधर्मांकुशेना
हं निहतो रामहस्तिना ॥ ४४ ॥

नां वेधको जंतुः ॥ ३९ ॥ सोहं पंचनखो हतः अभक्ष्यपंचनखो हत इत्यर्थः ॥ ४० ॥ ४१ ॥ त्वं तु न राज्यार्ह इत्याह त्वयेति ॥ ४२ ॥ शठो गूढविप्रियकृत्
निकृतिं परापकारं चरतीति नैकृतिकः मिथ्यैव प्रश्रितं प्रशांतं मानसं यस्य सः अजितांतःकरण इति यावत् ॥ ४३ ॥ छिन्ना चारित्रस्य कक्ष्या मर्यादा
येन स तथा ॥ सतां धर्ममतिक्रांतेन ॥ ४४ ॥

वक्ष्यसे किं वक्ष्यस इत्यर्थः किमित्यध्याहारः ॥४५॥ अपकारिषु दाराणपहारिषु ॥४६॥ ४७॥ अदृश्येन अप्राप्तदर्शनेन त्वया पन्नगवन्निहतः ॥ अनस्त्वं पापवशं गत इत्यर्थः ॥४८॥ एतदर्थं सीतायाश्चाहरणाद्विरूपमामेवं पूर्वं प्राप्य यद्यचोदयः ॥ न दानवमैथिली महमेकाह्नानीतवान्भवेः भवेयमितियावत् ॥४९॥

अशुभं चाप्ययुक्तं च सतां चैव विगर्हितं ॥ वक्ष्यसे चेदृशं कृत्वा सद्भिः सह समागतः ॥४५॥ उदासीनेषु योऽस्मासु विक्रमोऽयं प्रकाशितः ॥ अपकारिषु ते राम नैवं पश्यामि विक्रमम् ॥४६॥ दृश्यमानस्तु युध्येथा मया युधि नृपात्मज ॥ अद्य वैवस्वतं देवं पश्येस्त्वं निहतो मया ॥४७॥ त्वयाऽदृश्येन तु रणे निहतोऽहं दुरासदः ॥ प्रसुप्तः पन्नगेनेव नरः पापवशं गतः ॥४८॥ सुग्रीवप्रियकामेन यदहं निहतस्त्वया ॥ मामेव यदि पूर्वं त्वमेतदर्थमचोदयः ॥४९॥ मैथिलीमहमेकाह्नाम व चानीतवान्भवेः ॥४९॥ राक्षसं च दुरात्मानं तव भार्यापहारिणं ॥ कंठे बध्वा प्रदद्यां तेऽनिहतं रावणं रणे ॥५०॥ न्यस्तां सागरतोये वा पाताले वापि मैथिलीं ॥ आनयेयं तवादेशाच्छ्वेतामश्वतरीमिव ॥५१॥ युक्तं यत्प्राप्नुयाद्राज्यं सुग्रीवः स्वर्गते मयि ॥ अयुक्तं यदधर्मेण त्वयाऽहं निहतो रणे ॥५२॥ काममेवंविधो लोकः कालेनाविनियुज्यते ॥ क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिंत्यतां ॥५३॥

(अनिहतं अनिहतमेवेत्यर्थः ॥५०॥ सागरतोये तन्मध्यवर्त्तिद्वीपे श्वेतामश्वतरीमिव ॥ श्वेताश्वतरीरूपिणीं श्रुतिं ॥ श्रुतिं मधुकैटभाभ्यां पाताले निगृहीतां यथा हयग्रीवो भगवानानयति स्म तद्वत् ॥५१॥ ५२॥ लोकः सर्वोपि कालेन कालधर्मेण मृत्युना विनियुज्यते ॥ एवंविधस्वभावः कामं मत्कृतमस्मान्मरणक्षोभो न विषादः ॥ अपि तु भवता राज्यं प्राप्तं चेत्तदा मद्वधकारणस्य त्वद्राज्यस्य लोके प्रश्ने क्षमं युक्तमुत्तरं साधु सम्यग्विचिंत्यतां ॥५३॥

117

उपसंहरति । इत्येवमिति । अस्य सर्गस्य तीर्थेन रामस्तुतिपरतया योजनं । तत्र कविनिबद्धस्य वक्तुर्वालिनस्तात्पर्यविषयभूतं यदयुक्तं मया पूर्वं प्रमादात्तत्क्षमणी
यं । तत्रापि खलु मे दोषं कर्तुं नार्हसि राघवेत्यग्रे वाल्युक्तेः । नापि वाल्मीकेः तस्य तदुक्तानुवादकत्वात् अतात्पर्यविषयमपि तदुक्तिवैभवादक्षरार्थत्वेन वर्णयत
इति चेत् काव्यांतरमेव भगवतस्तावकं क्रियतां किमनेन तत्प्रयासेनेति दिक् ॥ ५४ ॥ इति श्रीरामाभिरामे श्रीरा० रा० ति० किष्किंधाकांडे सप्तदशः सर्गः ॥ १७

इत्येवमुक्त्वा परिशुष्कवक्त्रः शराभिघाताद्व्यथितो महात्मा । समीक्ष्य रामं रविसन्निकाशं तूष्णीं बभौ वानरराजसूनुः ॥ ५४ ॥
इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे सप्तदशः सर्गः ॥ १७ ॥ इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितं । परुषं वालिना रा
मो निहतेन विचेतसा ॥ १ ॥ तं निष्प्रभमिवादित्यं मुक्ततोयमिवांबुदं । उक्तवाक्यं हरिश्रेष्ठमुपशांतमिवानलं ॥ २ ॥ ध
र्मार्थगुणसंपन्नं हरीश्वरमनुत्तमं । अधिक्षिप्तस्तदा रामः पश्चाद्वालिनमब्रवीत् ॥ ३ ॥ धर्ममर्थं च कामं च समयं चा
पि लौकिकं । अविज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे ॥ ४ ॥ अपृष्ट्वा बुद्धिसंपन्नान्वृद्धानाचार्यसंमतान् । सौम्यं वा
नरचापल्यात्त्वं मां वक्तुमिहेच्छसि ॥ ५ ॥ इक्ष्वाकूणामियं भूमिः सशैलवनकानना । मृगपक्षिमनुष्याणां निग्रहानुग्रहेष्वपि

प्रश्रितं प्रश्रयाभासोपेतं एवं धर्मार्थसहितत्वं चाभासरूपमेव तत्र मामेव यदि पूर्वमित्यादि हि माभासः अर्थाभासश्च धर्माभासो राजहेत्यादि परुषत्वं तु मुख्यमे
व निहतेन विक्रेन ॥ १ ॥ धर्मार्थगुणसंपन्नमित्यब्रवीदिति क्रियाविशेषणं अधिक्षिप्तः परुषमुक्तः ॥ ३ ॥ लौकिकं समयं लोकाचारं ॥ ४ ॥ अविज्ञाने हेतुमाह
अपृष्ट्वेति आचार्यसम्मतान् स्वस्वकुलाचारशिक्षकान् वानरत्वादेवैतद्भावः वानरत्वप्रयुक्तचापल्यादेवं वादस्तवेत्यर्थः इच्छसि रे वी ॥ ५ ॥ इयं भू
मिरिक्ष्वाकूणां मनुना स्वकुलरूपस्य दत्तेत्यर्थः तथा मृगादि
पर्यंतनिग्रहानुग्रहेष्वधिकारोपि दत्त इति शेषः ॥ ६ ॥

तां पितृपितामहादिक्रमागतां ध्रुवं निग्रहानुग्रहे ॥ दुष्टशिष्टयोरिति शेषः ॥ ७ ॥ यथादृष्टश्च परोक्षानुभवसिद्धः स राजा अस्मिन्काले सर्वभूमेरक्षतीति शे
षः ॥ ८ ॥ ननु किं तत्राह तस्येति । धर्मायकृतन्यादेशो नियोगो येषां ते धर्मसंतानं धर्मवृद्धिं धर्मपदमधर्मनिवृत्तेरुपलक्षणं ॥ ९ ॥ धर्मविप्रियं
धर्मनाशं कश्चरेत् आचरितुं शक्नुयात् ॥ १० ॥ नेवयमिदानीं ननमूलप्रभुभरताज्ञया मार्गविभ्रष्टं चिंतयामः विचारयामः निगृह्णीम इति पाठां

तां पालयति धर्मात्मा भरतः सत्यवानृजुः ॥ धर्मकामार्थतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ ७ ॥ नयश्च विनयश्चोभौ यस्मिन्स
त्यं च सुस्थितं विक्रमश्च यथादृष्टः स राजा देशकालवित् ॥ ८ ॥ तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः ॥ चरामो
वसुधां कृत्स्नां धर्मसंतानमिच्छवः ॥ ९ ॥ यस्मिन्नृपतिशार्दूले भरते धर्मवत्सले ॥ पालयत्यखिलां पृथ्वीं कश्चरेद्धर्म
विप्रियं ॥ १० ॥ ते वयं मार्गविभ्रष्टं स्वधर्मे परमे स्थिताः ॥ भरताज्ञां पुरस्कृत्य चिंतयामो यथाविधि ॥ ११ ॥ त्वं तु संक्लि
ष्टधर्मश्च कर्मणा च विगर्हितः ॥ कामतंत्रप्रधानश्च न स्थितो राजवर्त्मनि ॥ १२ ॥ ज्येष्ठो भ्राता पिता वापि यश्च विद्यां
प्रयच्छति ॥ त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः ॥ १३ ॥ यवीयानात्मनः पुत्रः शिष्यश्चापि गुणोदितः ॥ पुत्रवत्ते त्रय
श्चिंत्या धर्मश्चैवात्र कारणं ॥ १४ ॥

तरं ॥ ११ ॥ ननु किं तत्राह त्वं तु कर्मणा चारित्रेण गर्हितः लोके निंदितः अतएव संक्लिष्टः पीडितो धर्मो
येन तादृशः कामतंत्रं कामरूपः पुरुषार्थः स एव प्रधानो मुख्यो यस्य ॥ १२ ॥ तदुपपादयति ज्येष्ठ इति विद्यां त्रैय्यादिविद्यां धर्मे च पथि वर्तिनः
धर्ममार्गे वर्ती वर्तनं यस्य तस्य ॥ १३ ॥ अत्र चिंतने तथा धर्मो धर्मज्ञानमेव कारणं ॥ १४ ॥ श्रीकृष्णाय वासुदेवाय नमः ॥ छ ॥ छ ॥

118

नत्वन सर्वेषां सुलभमित्याह। सूक्ष्म इति सतां सूक्ष्मो योधर्मः स परासद्गुरूपदेशादिना माशोभारूपांनैरेव विज्ञेयोन्यैः परमत्यर्थमविज्ञेय
एवकिंचेभ्यरस्वतनज्ञ इत्याह। हृदिस्थ इति। सर्वभूतानामात्मातत्त्वभूतोव्यापकश्चात एव सर्वप्राणिहृदिस्थः॥ स सर्वभूतानां सर्वज्ञा
णिनां शुभाशुभं वेद॥ एवं वानरयोनित्वात्त्वपापमहं जाने इति प्लवंगमत्व॥१५॥ त्वं तु धर्मज्ञानप्रसक्तिहीन एवेत्याह। चपल इति। जात्यंधो
जात्यंधैरिव चपलैरकृतात्मभिराचार्याशिक्षितैर्वानरैः सह मंत्रयन्निश्चिन्वना किन्तु कथं तु पेक्षसे ज्ञास्यसि धर्ममिति शेषः रक्षसे तु
किमिति पाठे रक्षणीयप्रजाजातं॥ किंतु रक्षसि न किमपि॥ अतो धर्मभ्रष्टो राजदंडप्रसक्त्वमितिभावः॥१६॥ अथ धर्मभ्रष्टत्वं व्यक्तमेव

सूक्ष्मः परमविज्ञेयः सतां धर्मः प्लवंगम॥ हृदिस्थः सर्वभूतानामात्मा वेद शुभाशुभं॥१५॥ चपलश्चपलैः सा =
र्द्धं वानरैरकृतात्मभिः जात्यंध इव जात्यंधैर्मंत्रयन् प्रेक्षसे तु किं॥१६॥ अहं तु व्यक्ततामस्य वचनस्य ब्रवीमि ४
ते॥ नहि मां केवलं रोषात्त्वं विगर्हितुमर्हसि॥१७॥ तदेतत्कारणं पश्य यदर्थं त्वं मया हतः। भ्रातुर्वर्त्तसि भार्या =
यां त्यक्त्वा धर्मं सनातनं॥१८॥ अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः। रूमायां वर्त्तसे कामात्स्नुषायां पापकर्म कि

वक्तुमाह। अहं त्विति। अस्य वचनस्य व्यक्ततां व्यक्तार्थीयस्येति। आर्ष आद्यजंतं व्यक्तपदं नज्ञावोव्यक्तमदर्थस्त्वं ब्रवीमि॥१७॥ पश्ययत्क्रमडुहं
वेति चिंतयेयवर्त्तयसि वर्त्तयसे॥१८॥ ननु भ्रातुर्ज्येष्ठस्य योभार्यां जीवतो महिषीं प्रियां॥ धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सित इति। अग्रेद्यायोपवे
शसमये अंगदोक्तेः सुग्रीवस्यापि ज्येष्ठभ्रातुः पितृसमस्य भार्यावमर्षणं तुल्यमित्यत आह अस्य त्वमिति धरमाणस्य प्राणान्धारयत एव
जीवनस्त्वयानिश्चीयमानजीवनस्यैव पत्न्यां तव स्नुषाभूतायां रूमायां यतो वर्त्तसे अतस्त्वं स्पष्टं पापकर्मकृत्। सुग्रीवस्तु न वजीवनो निश्चयाभा

वान्त्वमस्त्यांनारायांप्रागवर्णिष्ट अतः परं वक्ष्यति च॥ किंच त्रैवर्णिकेष्वपि देवरस्य मनुष्यभ्रातृस्त्रिया मनुष्यायां वृत्तिदर्शनात्तिर्यग्योनिषु तस्यां वृत्तिर्न दोषः॥ तथा वृत्तौ च मरणाज्ञानमेव प्रयोजकं तिर्यक्ष्विति भगवदाशयः॥ अनेन त्रैवर्णिकेतरस्त्रीणां मृतभर्तृकाणां तरुणीनां स्वजातीयपुरुषांगीकारो नाधर्म इति सूचितं॥ दृश्यते च तथा व्यवहारः शूद्रादिजातौ न च मनुष्याधिकारस्य निषेधादिशास्त्रस्य कथं तिर्यक्षु प्रवृत्तिरिति वाच्यं तिर्यग्योनेरपि मनुष्यवदाज्ञादिव्यवहारदर्शनेन मनुष्यतुल्यज्ञानवत्त्वादस्यवायं दोष इत्याशयात्॥ किंच धर्मेऽनधिकारिणामपींद्रादीनां वृत्रवधादौ ब्रह्महत्यादिदोषस्मरणेन निषेधेषु तदतिक्रमप्रायश्चित्तादौ च देवानामधिकारवदेषामप्यधिकारे बाधकाभावः किंच देवादीनां स्वयजनीयेंद्रान्तराभावादनधिकार इति पूर्वमीमांसायां निर्णीतं॥ एवं च तदनपेक्षदानादिधर्मेषु ब्रह्मविद्यायां चाधिकारोस्त्येवेत्युत्तरमीमांसायां स्पष्टं॥ तद्वदीदृशानां ज्ञानवतां तिरश्चामप्यधिकारे बाधकाभावः किंच सर्वदेवतावाचकपदानामंतर्यामीश्वरवाचकत्वेन॥ सर्वत्र देवानामधिकारोस्त्येव न च ब्राह्मणत्वाद्यभावात्तेषामनधिकारः तेषामपि क्षत्रियत्वात्॥ वैवस्वतमन्वादेरिवात एव चंद्रवरुणादीनां यज्ञाः स्मर्यंते पुराणेषु तत्र तत्र कर्मस्वर्थवादतः फलकल्पनवत्॥ पुराणस्यार्थवादेस्तदधिकारस्यापि कल्पयितुं शक्यत्वात्॥ किंच त्रैवर्णिकस्याधिकार इत्यत्र त्रैवर्णिकपदं वेदतदर्थज्ञानवत्परमतो देवादीनां तदधिकारः सिद्ध इति भगवतो व्यासवाल्मीकिप्रभृतीनां चाशयः॥ जैमिनेस्त्वेतदंशेऽज्ञानमेव॥ अत एव तद्दूरीकरणार्थं मार्कंडेयेनात्मानं प्रतिधर्मान् पृष्टवतो जैमिनेर्विंध्यारण्यवासितत्त्वज्ञपक्षिमुखेन धर्मबोधनं कृतं तेन हि पक्षिणां ज्ञानानधिकार इति स्वोक्तेस्तस्याविश्वासे जाते तत्रापि व्यासादिविरुद्धे स्वोक्तेर्थे तस्याप्रामाण्यग्रहो भविष्यतीति तदाशयः॥ इत्यन्यत्र विस्तरः॥ अत एव गृध्रराजस्य भगवता दाहादि कृतं॥ अथैवं संपातिना नतभ्रात्राकरिष्यमाणमुदकदानादिना संगतमिति दिक्॥ १९॥

उपसंहरति । नदिति । न तस्मात् । धर्माच्युतीतस्य च धर्मभ्रष्टस्य । एवं वै दृशो व्यवहारे प्राणांतो दंड इति सूचितं ॥ २० ॥ लोकज्ञत्वात् ॥ लोकव्यवहारमर्यादा
तः अपेयुषोऽपगतवतः अनेन तिर्यग्योनिव्यवहारमर्यादाप्येषैवेति ध्वनितं दृश्यते च गृहे पाल्यमानेषु पारावतादिषु । अन्यं स्वभार्यासहितं दृष्ट्वा
वस्तु परस्परं युद्धं भार्यायाश्चञ्चुप्रकारताडनादिदंड इत्याहुः ॥ २१ ॥ क्षत्रियोहं दंडाधिकारीत्यर्थः ॥ दंडादन्यत्र निग्रहं न पश्यामीत्युक्तेर्थे स्मृतिं प्रमा
णयति औरसीमिति ॥ २२ ॥ २३ ॥ गुरुर्महात्मा धर्मज्ञः त्वया तिक्रांतं तत्र चक्षुतां नतिप्रवृत्तिनिःशेषः प्राज्ञो विद्वान् धर्मेण पालयन् । धर्मयुक्तमिति शे

न च्युतीतस्य ने धर्मात्कामवृत्तस्य वानर ॥ भ्रातृभार्याभिमर्षेस्मिन् दंडोयं प्रतिपादितः ॥ २० ॥ नहि लोकविरुद्धस्य लो
कवृत्तादपेयुषः ॥ दंडादन्यत्र पश्यामि निग्रहं हरियूथप ॥ २१ ॥ न च ते मर्षये पापं क्षत्रियोहं कुलोद्गतः । औरसीं
भगिनीं वापि भार्यां वाप्यनुजस्य यः ॥ २२ ॥ प्रचरेत नरः कामात्तस्य दंडो वधः स्मृतः ॥ भरतस्तु महीपालो वयं त्वा
देशवर्त्तिनः ॥ २३ ॥ त्वं च धर्मादतिक्रांतः कथं शक्यमुपेक्षितुं । गुरुधर्मव्यतिक्रांतं प्राज्ञो धर्मेण पालयन् ॥ २४ ॥
भरतः कामयुक्तानां निग्रहे पर्यवस्थितः ॥ वयं तु भरतादेशावधिं कृत्वा हरीश्वर । त्वद्विधान् भिन्नमर्यादान्निग्रहीतुं व्य

॥ टी ॥ किष्कि

वः ॥ २४ ॥ भरतादेशावधिं कृत्वा । भरतादेशं न राज्ञामवधिं प्रमाणं कृत्वा । ननु भरतेन रामं प्रत्याज्ञया अकृतत्वात्स्वेच्छयो क्रियते इति चेन्न अस्मादेव भगव
द्वाक्यात्तथा भरतोक्तेः रक्षमाणेनात्मनः यद्वा राज्यमूलप्रभौ पर्यवस्थिते । सर्वेषां नदीयानां दंड्यदंडनादावनुज्ञापि तदाज्ञासिद्धैवेति न दोषः । अपि
च स्वराज्ये भगवता भरतस्य पालनाज्ञायां दत्तायामर्थात्स्वस्मिन् प्रधानराजत्वसिद्धौ तदाज्ञाऽर्थसिद्धैवेति न दोषः ॥ २५ ॥ ६ ॥

अथकारणांतरमपिवालिवधेदर्शयतिसुग्रीवेणेति लक्ष्मणेनयथातथासुग्रीवेणापिममसख्यमस्ति यस्मात्ततः ससुग्रीवःदारराज्यनिमित्तंस्वदारप्राप्त्य
र्थंराज्यप्राप्त्यर्थंचमेममनिश्रेयस्करः मित्रश्रेयसविषयेकृतप्रतिज्ञः ॥२६॥ तत्प्रतिज्ञोत्तरंमयापितद्विषयाप्रतिज्ञादत्ताकृताकृताचसाप्रतिज्ञाम
द्विधेनकथमवेक्षितुमसमापयितुंशक्या ॥२७॥ एभिः उक्तैः कारणैरेकैकमेवतद्वधेपर्याप्तं ॥ किंपुनर्मिलितानि ॥ तस्मादेतत्त्वमयाशासनमिदंकृ
तंतद्युक्तं ॥ शास्त्रसंमतमितिभवानप्यनुमन्यतांविनयतुतवभ्रातृभार्यापहारकत्वेनदंड्यत्वात्तरिकार्यस्यस्वकार्यत्वात् ॥ क्षत्रियस्यप्रतिज्ञाहानौचम

सुग्रीवेणचमेसख्यंलक्ष्मणेनयथातथा ॥ दारराज्यनिमित्तंचनिःश्रेयसकरःसमे ॥२६॥ प्रतिज्ञाचमया
दत्तातदावानरसन्निधौ ॥ प्रतिज्ञाचकथंशक्यामद्विधेनानवेक्षितुं ॥२७॥ तदेभिःकारणैःसर्वैर्महद्भिर्धर्म
संश्रितैः ॥ शासनंतवयद्युक्तंतद्भवाननुमन्यताम् ॥२८॥ सर्वथाधर्मइत्येवद्रष्टव्यस्तवनिग्रहः ॥ वयस्यस्यो
पकर्तव्यंधर्ममेवानुपश्यता ॥२९॥

॥ हतोऽधर्मस्यश्रवणात्तद्वधोमेत्ववश्यकोधर्मश्चेत्याशयः ॥२८॥ सर्वथामयायःकृतः
तवनिग्रहःसधर्मएवेतित्वयाद्रष्टव्यः ॥ दुष्टनिग्रहफलकत्वाद्वनारयहरणास्येत्याशयोदृढः ॥ किंचधर्ममेवानुपश्यताजानतामित्रस्योपकर्तव्यं ॥
मित्रोपकारकरणमपिधर्मएवेतिसुग्रीवोपकाररूपत्वात्त्वद्वधस्यधर्मत्वमितिभावः ॥ २९ ॥ किंचानुतापादिनाधर्ममनुवर्तता ॥ एतदुक्तंकर्म
प्रायश्चित्तरूपधर्मानुवृत्तिंकुर्वतात्वयापितत्कार्यंमत्कृतनिग्रहरूपंकार्यंशक्यंराजप्रार्थनापूर्वंकारयितुंशक्यंसत्त्वमनुतापेनत्वयाप्रार्थनापूर्व
मयंदंडःस्वस्यकारणीयएवेतित्वत्करणीयस्यैवमयाकृतत्वान्नात्रक्षोभःकार्यइतिभावः पापिनामेवंस्वदंडप्रार्थनास्मृतिसिद्धेत्याहश्रूयंतेइति

रित्रवत्सलौ।चरित्रप्रतिपादनतत्परौधर्मकुशलेष्टहीनौचभवतः तत्तदर्थतत्वमेव।तथाशास्त्रोक्तप्रकारेणैवमयारचितंकृतं।३०।तौभ्रष्टौकावाह राज
भिरिति।अनेनस्वकृतदंडस्यशास्त्रसंमतत्वंदंडोहितत्वंचोक्तं।३१।तथापिप्रार्थनापूर्वमयमर्थःकारणीयःस्यादित्यर्थप्रतिपादकंश्लोकमाह।शास
नाद्वेति।पापोहंमेदंडंकुर्विति प्रार्थनयास्वसमीपमागतस्यपापिनःशासनाद्दंडकरणाद्वामोक्षाद्दययाविसर्ज्जनाद्वास्तेनइतिपापोपलक्ष
ण।तत्रद्वितीयःपक्षोराज्ञोदोषायेत्याह।राजात्तुपापस्याशासन्।पापनिग्रहमकुर्वन्।अनेनतद्दंडकरणमस्मादृशामावश्यकमितिध्वनि

शाक्यंत्वयापितत्कार्यंधर्ममेवानुवर्त्तता॥श्रूयतेमनुनागीतौभ्रष्टौकौचारित्रवत्सलौ।इष्टहीनौधर्मकुशलैस्तथातच्च
रितंमया॥३०॥राजभिर्धृतदंडाश्चकृत्वापापानिमानवाः॥निर्मलाःस्वर्गमायांतिसंतःसुकृतिनोयथा॥३१॥शास
नाद्वापिमोक्षाद्वास्तेनःपापात्प्रमुच्यते।राजात्वशासन्पापस्यतदवाप्नोतिकिल्विषं॥३२॥आर्य्येणममसांधात्रा
व्यसनंघोरमीप्सितं।अमरणान्तकृतेपापेयथापापंकृतंत्वया॥३३॥अन्यैरपिकृतंपापंप्रमत्तैर्वसुधाधिपैः।प्रायश्चि
त्तंचकुर्वंतितेनतच्छाम्यतेरजः॥३४॥

(तं॥३२॥अथाचार्थैशिष्टाचारमपिप्रमाणयतिआर्य्येणेति।ममकूटस्थेनमांधात्रात्वयायत्प्र
कारंपापंकृतंतत्प्रकारेपापेकेनचित्कृमरणानार्हेतेनकृतेसतिकर्त्तुमीप्सितंघोरंव्यसनंदंडरूपंमांधात्राकृतं॥३३॥अन्यैरपिवसुधाधिपैः
प्रमत्तपुरुषैःकृतंपापंप्रतिषुद्धयेदंडंनकृतमित्यध्याहारः नकेवलंराजदंडएवपापप्रायश्चित्तंअन्यदपिमन्वाद्युक्तमित्याह प्रायश्चित्तंच
कुर्वंति।कृतपापाइतिशेषः।तेनकर्त्रनुष्ठितप्रायश्चित्तेन॥३४॥श्रीरामायरामचन्द्रायश्रीकृष्णायवासुदेवायनमः॥ ❀ ॥

धर्मतः धर्मशास्त्रतः ॥ न वयं स्ववशेस्थिताः ॥ किंतु शास्त्राधीना इति शेषः ॥ एतेनादर्शनपूर्वकं वधोऽधर्म इति यदुक्तं तदपि समाहितं । दंडार्थवधे दर्शनानपेक्षणात् ॥ एवं वालिनः संध्योपासनाद्यनुष्ठानेन शास्त्रज्ञत्वमवलंब्य समाहितं ॥३५॥ अथ केवल शाखामृगत्वमवलंब्यापि समाधत्ते शृणु चापीति द्वेनानभिमुखस्य निःशंकवधे कारणांतराण्येव यथार्थः ॥ तन्महत्कारणं श्रुत्वा मन्युं न कर्तुमर्हसि ॥३६॥ तत्र प्रच्छन्नवधे मनस्ताप

तदलं परितापेन धर्मतः परिकल्पितः ॥ वधो वानरशार्दूल न वयं स्ववशेस्थिताः ॥३५॥ शृणु चाप्यपरं भूयः कारणं हरिपुंगव ॥ तच्छ्रुत्वा हि महद्वीर न मन्युं कर्तुमर्हसि ॥३६॥ न मे तत्र मनस्तापो न मन्युर्हरिपुंगव ॥ वागुराभिश्च पाशैश्च कूटैश्च विविधैर्नराः ॥३७॥ प्रतिच्छन्नाश्च दृश्याश्च गृह्णंति सुबहून्मृगान् ॥ प्रधावितान्वा वित्रस्तान्विस्रब्धानतिविष्ठितान् ॥३८॥ प्रमत्तानप्रमत्तान्वा नरा मांसार्थिनो भृशं । विध्यंति विमुखांश्चापि न च दोषोऽत्र विद्यते ॥३९॥ यांति राजर्षयश्चात्र मृगयां धर्मकोविदाः ॥ तस्मात्त्वं निहतो युद्धे मया बाणेन वानर ॥४०॥ अयुध्यन्प्रतियुध्यन्वा यस्माच्छाखामृगो ह्यसि ॥४१॥

(॥ कथमेवं कृतमिति पश्चात्तापेन नापि वधस्य कारणं मन्युर्मम क्रोधः यद्वा मन्युः शोकः मृगाणां तादृशवधस्य राज्ञां स्वभावत्वान्न दोष इत्याह वागुराभिः विविधैः कूटैः तृणछन्नश्वभ्रादिसंपादनरूपैः ॥३७॥ मरणंघाच्छादितत्वादिरूपैः प्रतिच्छन्ना इत्यत्र पः विस्रब्धान्विश्वस्तान् अतिविष्ठितान् स्वपालितमृगैः क्रीडितान्वा विरोधेनास्थितानबुध्यमानानिति यावत् ॥३८॥ ॥३९॥ न दोष इत्यत्र शिष्टाचारं प्रमाणयति यांतीति मृगयां नानाप्रकारमृगवधयुक्तां कर्तुं राजर्षयो धर्मकोविदा यांति ॥४०॥ प्रतियुध्यन् अन्येन युद्धं कुर्वन् मांसादिलोभाभावेऽपि क्षत्रियस्वभावात्तव वधो मया कृत इतरथा प्रादिति येक जंतुवत् । तत्र मे न कश्चिन्महान् दोषः अल्पस्तु प्राणायाममात्रापनेय इति भाव ॥४१॥

121

शुभस्यैहिकाभ्युदयस्यराजानःक्षत्रियाः॥४२॥नहिंस्यान्रणव्यतिरेकेणेत्यर्थःआक्रोशोनिंदाआक्षेपोवमाननं।अप्रियवादःप्रतिकूलव
चनं॥त्वंतुनतादृशराजेतिभावःएतेनराज्ञोवधादेस्तुस्त्रवधादिदोषइतिसूचितं॥४३॥४४॥प्रव्यथितोभगवतिमिथ्यादोषोक्त्याप्रव्यथितः
नदोषंराघवेदध्यौ॥तथाध्यानस्यापिपापावहत्वादितिभावःयद्वाध्यानेनापिनाविंदत्शुद्धबुद्धमुक्तस्वभावत्वादितिभावःधर्मेधिगत

दुर्लभस्यचधर्मस्यजीवितस्यशुभस्यच॥राजानोवानरश्रेष्ठप्रदातारोनसंशयः॥४२॥तान्नहिंस्यान्नचाक्रोशेन्नाक्षि
पेन्नाप्रियंवदेत्॥देवामानुषरूपेणचरंत्येतेमहीतले॥४३॥त्वंतुधर्ममविज्ञायकेवलंरोषमास्थितः।विदूषय
सिमांधर्मेपितृपैतामहेस्थितं॥४४॥एवमुक्तस्तुरामेणवालीप्रव्यथितोभृशं॥नदोषंराघवेदध्यौधर्मेधिगत
निश्चयः॥४५॥प्रत्युवाचततोरामंप्रांजलिर्वानरेश्वरः॥यत्त्वमात्थनरश्रेष्ठतत्तथैवनसंशयः॥४६॥प्रतिवक्तुंप्र
कृष्टेहिनापकृष्टस्तुशक्नुयात्॥यदयुक्तंमयापूर्वंप्रमादाद्वाक्यमप्रियं॥४७॥तत्रापिखलुमेदोषंकर्तुंनार्हसि
राघव॥त्वंहिदृष्टार्थतत्वज्ञःप्रजानांचहितेरतः॥४८॥कार्यकारणसिद्धौचप्रसन्नाबुद्धिरव्यया॥ ४९ ॥

निश्चयःभगवद्वचनादेवधर्मविषयेजातनिश्चयः।४४॥४५॥४६॥प्रकृष्टेप्रकृष्टस्थानैश्वर्येअपकृष्टोमादृशइतिशेषःयन्मयाप्रमाद्वाक्यमु
क्तमयुक्तमेव॥४७॥तत्रापित्वज्ञानजाप्रियोक्तावपिदोषंकर्तुंदोषंभावयितुं।तत्रहेतुस्त्वंहीतिदृष्टेनापरोक्षानुभवेनार्थतत्वस्यज्ञाता
४८॥कार्यंदंडःकारणंतद्धेतुभूतंपापंतयोःसिद्धौनिश्चयेतवबुद्धिरंतःकरणंप्रसन्नानिर्मलावैषम्यरहितेत्यर्थः॥ ४९ ॥

॥रा॰वा॰कि॰॥
॥४५॥

धर्माद्व्यतिक्रान्तानां पुरस्कृतमग्रेसरं अवगतं तदग्रेसरत्वेन प्रसिद्धं मामपि पापिष्ठमपरं धर्मसंहितया वाचा परिपालय उत्तमलोकान्प्राप्नुहीति वाच
नुरहारोत्सर्गः॥५०॥ उवाच प्रत्यादि मायाह दुःसत्त्व वाचे समर्थ॥५१॥ नत्वात्मानं भरावगान्दयाह नत्वात्तृक्तभोगवान् न तारां सुग्रीवस्यापि त्वसामन्त
रागात् न बांधवान् सुग्रीवलोपि सेवया जीवनलाभात् पुत्रं रोचामि बाल्यत्वात्॥५२॥ मयालालितः सममादर्शनात् क्लेशं गमिष्यति॥ पीतांबुः सस्याद्भु

मामप्यवगतं धर्माद्व्यतिक्रांतपुरस्कृतं॥ धर्मसंहितया वाचा धर्मज्ञ परिपालय॥५०॥ वाष्पसंरुद्धकंठस्तु वाली सार्त्तरवः शनैः
उवाच रामं संप्रेक्ष्य पंकलग्न इव द्विपः॥५१॥ न चात्मानमहं शोचे न तारां नापि बांधवान्॥ यथा पुत्रं गुणज्येष्ठमंगदं कन
कांगदं॥५२॥ स ममादर्शनाद्दीनो बाल्यात्प्रभृति लालितः॥ तटाक इव पीतांबुरुपशोषं गमिष्यति॥५३॥ बालश्चाकृत
बुद्धिश्च एकपुत्रश्च मे प्रियः॥ तारेयो राम भवता रक्षणीयो महाबलः॥५४॥ सुग्रीवे चांगदे चैव विधत्स्व मतिमुत्तमां
त्वं हि गोप्ता च शास्ता च कार्याकार्यविधौ स्थितः॥५५॥ या ते नरपते वृत्तिर्भरते लक्ष्मणे च या॥ सुग्रीवे चांगदे राजंस्तां
चिंतयितुमर्हसि॥५६॥ मद्दोषकृतदोषां तां यथा तारां तपस्विनीं॥ सुग्रीवो नावमन्येत तथावस्थातुमर्हसि॥५७॥

पयोजितांबुः॥५३॥ तारेयस्तारापत्यं॥ एकपुत्रत्वेनातिलालितत्वं॥५४॥ मतिमुत्तमां मरणांतानि वैराणीति न्यायेनेति भावः॥ सुग्रीवे च तत्रैवेत्यर्थः॥ आत्म
स्नेहो बाधेन वा॥ तत्राप्यनुग्रहप्रार्थनं॥ कार्यविधौ गोप्ता॥ अकार्यविधौ शास्ता॥ ५५॥ ५६॥ मद्दोषकृतदोषां॥ मत्कृतसुग्रीवापकारदोषात्तु सर
रामात्रेण कृतदोषां न तु स्वतः कृततदपकारां॥ तपस्विनी दीनां त्वां त्वमवस्थातुमवस्थापयितुं॥ ५७॥ श्रीरामाय रामचन्द्राय नमः॥६॥६॥

122

॥राम॥
॥४५॥

राज्यं वानरराज्यं ॥५८॥ शक्यमिति स्वाराज्यमपि त्वत्प्रसादलभ्यमिति भावः अहं त्वदुपदेशात्तत्त्वदर्शनतश्चेदानीं क्षीणपापः। त्वत्तो वधमुत्तमलोकराज्यफलकमा
कांक्षन्नपेक्ष्यमाण इदानीमस्मि ॥ अतस्तारया वार्यमाणोपि यत्तस्मात्त्वा युद्धमुपागतः प्राप्तस्तत्पूर्वकृतपुण्यपरिपाकेनेति शेषः ॥५९॥ ६०॥ व्यक्तदर्शी
नमुद्बुद्धबोधं ॥६१॥ न वयं त्वद्वधरूपाकृत्यकारित्वेन चिंत्याः नाप्यात्मा भ्रातृभार्यापहरणरूपाकृत्यकारित्वेन। तत्र हेतुर्वयमित्यादि। भवद्विशेषणानां

त्वया ह्यनुगृहीतेन शक्यं राज्यमुपासितुं ॥ त्वद्वशे वर्तमानेन तव चित्तानुवर्त्तिना ॥ ५८ ॥ शक्यं दिवं चार्जयितुं वसुधां चापि शा
सितुं ॥ त्वत्तोहं वधमाकांक्षन्वार्यमाणोपि तारया ॥ ५९ ॥ सुग्रीवेण सह भ्रात्राहं ह्युद्धमुपागतः ॥ इत्युक्त्वा वानरो रामं वि
रराम हरीश्वरः ॥ ६० ॥ स तमाश्वासयद्रामो वालिनं व्यक्तदर्शनं ॥ साधुसंमतया वाचा धर्मतत्त्वार्थयुक्तया ॥ ६१ ॥ न वयं
भवता चिंत्या नाप्यात्मा हरिसत्तम ॥ वयं भवद्विशेषेण धर्मतः कृतनिश्चयाः ॥ ६२ ॥ दंड्ये यः पातयेद्दंडं दंड्यो यश्चापि दं
ड्यते कार्यकारणसिद्धार्थावुभौ तौ नावसीदतः ॥ ६३ ॥ तद्भवान् दंडसंयोगादस्माद्विगतकल्मषः ॥ गतः स्वां प्रकृतिं
धर्म्यां दंडदिष्टेन वर्त्मना ॥ ६४ ॥

॥ दपेक्ष्याविशेषेणाविशेषज्ञत्वेन धर्मतो धर्मशास्त्रमार्गेण ॥ कृते त्वत्कृतपापे स्वकृतवधयोनकर्त्वरूपे
न्याये त्वनिश्चयाः अत्र पापेऽयमेव दंड इति निश्चिता यथा तादृशाः ॥६२॥ अत्रार्थे स्मृतिमुपन्यस्यति ॥ दंड्ये य इति कार्यकारणेति भावप्रधानो निर्देशः
कार्यत्वं दंड्यत्वं कारणत्वं दंडयितृत्वं ताभ्यां सिद्धार्थौ निष्पन्नपरलोकप्रयोजनौ ॥ अतस्त्वं नावसीदसि। त्वं नाप्यदंडकर्तृत्वान्नाहमकृत्यकारी जात
इत्याह त्वमपि न तथेति भावः ॥ ६३ ॥ तदेवाह। स्वां प्रकृतिं स्वकीयं शुद्धस्वभावं। दंडदिष्टेन दंडबोधकशास्त्रोक्तेन मार्गेण ॥ ६४ ॥ ❀ ॥

भयंभ्रातृभार्याहरणकर्मजनितनरकभयं॥ महद्घृणानिमित्तपरलोकभयंच दंडेनकर्मणोनाशान्। महद्घृणस्यमयाक्षांतत्वाच्च॥ शोकमोहौतारातारेयविषयौ॥
विधानंप्राक्भावीयंकर्म। अत्रांतेदंडस्यैवसंहारान्निरयभयामपिज्ञानवतांशास्त्रार्थेधिकारोदृढः कृतइतिबोध्यं॥ ६५॥ तथावर्त्तितपितृवद्देवतंपालयिष्या
वइतिभावः॥ अस्मत्तस्तथावृत्तिंप्राप्नुयादित्यक्षरार्थः॥ ६६॥ तस्यवाक्यं॥ आत्मनःसुगतेपुत्रपालनस्यचप्रतिपादकं॥ ६७॥ इदंप्रभाषणं॥ ६८॥ हंचमानः

त्यजशोकंचमोहंचभयंचहृदयेस्थितं॥ त्वयाविधानंहर्यग्र्यनशक्यमतिवर्त्तितुं॥ ६५॥ यथात्वय्यंगदेनित्यंवर्त्ततेवानरेश्व
र। तथावर्त्ततसुग्रीवेमयिचापिनसंशयः॥ ६६॥ सतस्यवाक्यंमधुरंमहात्मनःसमाहितंधर्मपथानुवर्त्तिनं॥ निशम्यरा
मस्यरणावमर्द्दितोवचःसुयुक्तंनिजगादवानरः॥ ६७॥ शराभितप्तेनविचेतसामयाप्रभाषितस्त्वंयदजानताविभो॥ इ
दंमहेंद्रोपमभीमविक्रमप्रसादितस्त्वंक्षममेमहीश्वर॥ ६८॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेअष्टादशःसर्गः
॥१८॥ सवानरमहाराजःशयानःशरपीडितः॥ प्रत्युक्तोहेतुमद्वाक्यैर्नोत्तरंप्रतिपद्यते॥ १॥ अश्मभिःपरिभिन्नांगःपा
दपैराहतोभृशं॥ रामबाणेनचाक्रांतोजीवितांतेमुमोहसः॥ २॥ तंभार्याबाणमोक्षेणरामदत्तेनसंयुगे॥ हतंप्लवगशा
र्दूलंताराशुश्राववालिनं॥ ३॥ सासपुत्राऽप्रियंश्रुत्वावधंभर्त्तुःसुदारुणं॥ निष्पपातभृशंत्रस्ताउद्विग्नागिरिकंदरात्

इतिरामाभिरामेश्रीरामीयरामायणतिलकेकिष्किंधाकांडेअष्टादशःसर्गः॥ १८॥ हेतुमद्वाक्यैः हेतूपन्याससहितैर्वाक्यैःप्रत्युक्तःउक्तप्रत्युत्त
रः॥ १॥ जीवितांतेतत्समयेसुमोहविसंज्ञोऽभूत्॥ २॥ अप्रियमितिछेदःसपुत्रापुत्रेणांगदःगिरिगह्वरंकिष्किंधाख्यं॥ ४॥ ६॥ ६॥

123

५ ॥ सताराश्चापन्नः पलायमानान् ॥ ६ ॥ दुन्दुभिरन्तवद्धानिवानुस्तनानिव रामवित्रासितान् रामाद्वित्रस्तान् ॥ ७ ॥ वचनमाह वानराइमियस्यवालिनःउ
र्गतावक्तादिकमपश्यंतः ॥ ८ ॥ भ्राता प्रयोजककर्त्ता रामः प्रयोज्यकर्त्ता वाणाऽकराणां हराणां दूरान्दूरेस्थित्वानैः पातितभ्योन्किंयुष्माभिः पलायत इति शे
षः ॥ नन्वेवयैवमवज्जीवनसंभवादितिभावः ॥ ९ ॥ प्राप्तकालकालोचितं ॥ अविश्लिष्टं सर्वसंमतिपूर्वमेकरूपं ॥ अविक्लिष्टमिति पाठेव्यक्त

येत्वंगदपरीवारावानराहिमहावलाः ॥ तेसकार्मुकमालोक्यरामंत्रस्ताः प्रदुद्रुवुः ॥ ५ ॥ सादददर्शततस्त्रस्तान्हरीनाप
ततोद्रुतं ॥ यूथादिवपरिभ्रष्टान्मृगान्निहतयूथपान् ॥ ६ ॥ तानुवाचसमासाद्यदुःखितान्दुःखितासती ॥ रामवित्रासि
तान्सर्वाननुबद्धानिवेषुभिः ॥ ७ ॥ वानराराजसिंहस्ययस्ययूयंपुरःसराः ॥ तंविहायसुवित्रस्ताः कस्माद्द्रवतदुर्गताः
८ ॥ राज्यहेतोः सचेद्भ्राताभ्रात्राक्रूरेणपातितः ॥ रामेणप्रसृतैर्दूरान्मार्गणैर्दूरपातिभिः ॥ ९ ॥ कपिपत्न्यावचःश्रुत्वा
कपयः कामरूपिणः ॥ प्राप्तकालमविक्लिष्टमूचुर्वचनमंगनां ॥ १० ॥ जीवपुत्रेनिवर्त्तस्वपुत्रंरक्षस्वचांगदं ॥ अंतकोरा
मरूपेणाहत्वानयतिवालिनं ॥ ११ ॥ क्षिप्तान्वृक्षान्समाविध्यविपुलाश्चतथाशिलाः ॥ वालीवज्रसमैर्वाणैर्वज्रेणेवनि
पातितः ॥ १२ ॥ अभिभूतमिदंसर्वविद्रुतंवानरंवलं ॥ अस्मिन्प्लवगशार्दूलेहतेशक्रसमप्रभे ॥ १३ ॥ छ ॥

मित्यर्थः अंगनांवालिनइतिशेषः ॥ १० ॥ पुत्रंरक्षस्वरामादितिशेषः कुतः पुत्रस्यभयंतत्राह अंतकइत्यादिनयतियमपुरमितिशेषः ॥ ११ ॥ वृक्षान्वानि
प्रहितान्अयंसर्वोपिसंभाव्यवादः स्वंवकुवाणान्यागवादोपि ॥ १२ ॥ अभिभूतमिवेविद्रुतं ॥ वानरंवानराणामिदं ॥ १३ ॥ श्रीरामायनमः ॥

पदस्थं वानरराज्यपदस्थं ॥ पुत्त्रमंगदं भजिष्यंति ॥ अन्यथा राजकेऽत्रास्माभिरवस्थातुमशक्यमिति भावः ॥ १४ ॥ अथवेति ॥ सरामे सुग्रीवे किष्किंधामागच्छ
ति ॥ अभिषिक्तेनाप्यंगदेनास्मत्पालनमशक्यमेवेति ॥ नेह स्थातुं योग्यमिति शेषः ॥ हे रुचिरानने यद्यपीदं स्थानं नेतुभ्यं रुचितमभीष्टं तथापीह ॥ कि
ष्किंधायां विद्यमानानि दुर्गाणि चैव वानराः ॥ सुग्रीवहनुमदादयः ॥ आविशंति वर्त्तमानसामीप्ये लट् ॥ तेषु प्रविष्टेषु ये भार्याः सभार्याश्च वानराः

रक्षितां नगरीं शूरैरंगदश्चाभिषिच्यतां पदस्थं वालिनः पुत्त्रं भजिष्यंति प्लवंगमाः ॥ १४ ॥ अथवा रुचितं स्थानमिह ते रु
चिरानने ॥ आविशंति च दुर्गाणि क्षिप्रमद्यैव वानराः ॥ १५ ॥ अभार्याः सह भार्याश्च संत्यत्र वनचारिणः ॥ लुब्धेभ्यो
विप्रलब्धेभ्यस्तेभ्यो नः सुमहद्भयं ॥ १६ ॥ अल्पांतरगतानां तु श्रुत्वा वचनमंगना ॥ आत्मनः प्रतिरूपं सा बभाषे चा
रुहासिनी ॥ १७ ॥ पुत्त्रेण मम किं कार्यं राज्येनापि किमात्मना ॥ कपिसिंहे महाभागे तस्मिन्भर्त्तरि नश्यति ॥ १८ ॥
पादमूलं गमिष्यामि तस्यैवाहं महात्मनः ॥ योऽसौ रामप्रयुक्तेन शरेण विनिपातितः ॥ १९ ॥ एवमुक्त्वा प्रदुद्राव
रुदंती शोकमूर्छिता शिरश्चोरश्च बाहुभ्यां दुःखेन समभिघ्नती ॥ २० ॥ सा व्रजंती ददर्शाथ पतिं निपतितं भुवि ॥ हं
तारं वानरेंद्राणां समरेष्वनिवर्त्तिनं ॥ २१ ॥

सुग्रीवावलंबिनः ॥ प्रागस्माभिः कृतवैरास्ते च प्रवेक्ष्यंति ॥ तेभ्यश्च लुब्धेभ्यो राज्यादिविषये विप्रल
ब्धेभ्यः पूर्वमस्माभिर्वंचितेभ्योऽस्माकं सुमहद्भयमस्ति यतन्निदोषः ॥ केचित्तु इह ते स्थानमस्माकमरुचितं अनभिमतं इतरत्पूर्ववदित्याहुः ॥ १५ ॥
१६ ॥ अल्पांतरगतानां तानि हरवर्त्तिनां ॥ अत्र वानरगतानामिति पाठे मध्ये मार्गमागतानामित्यर्थः तेषां वानराणां वचनं श्रुत्वा आत्मनः प्रतिरूपं कालोचि
तं भाषे ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ २१ ॥

पर्वतेंद्राणां क्षेप्तारं रणोष्ठितिशेषः। रणभेदमपेक्ष्य वज्राणामिति वहुवचनप्रयोगः महता वातेन समं तुल्यं। आविष्टमावेशो यस्य रणोत्सुतं॥२२॥ परिक्रांतं
पराक्रमो यस्य तं॥ वृष्ट्वेव जलमुक्त्वा विरतं॥ नर्दतां मध्ये भीमं नर्दतं॥२३॥ मृगराजं प्रभूतमांसादित्वेन मृगश्रेष्ठं शार्दूलो व्याघ्र॥२४॥ सर्वलोकस्य
सर्वलोकेनार्चितं॥ चैत्यं चतुष्पथवर्ति वल्मीकं नागहेतोरंतर्विद्यमानं॥ नागभक्षणार्थं सुपर्णेन गरुडेन यथोन्मथितं॥ तथा सुग्रीवस्य राज्यभोगहेतो

क्षेप्तारं पर्वतेंद्राणां वज्राणामिव वासवं॥ महावातसमाविष्टं महामेघौघनिस्वनं॥ २२॥ शक्रतुल्यपराक्रांतं वृष्ट्वेवो
परतं घनं॥ नर्दतं नर्दतां भीमं शूरं शूरेण पातितं॥ २३॥ शार्दूलेनामिषस्यार्थे मृगराजमिवाहतं॥ २४॥ अर्चितं स
र्वलोकस्य सपताकं सवेदिकं॥ नागहेतोः सुपर्णेन चैत्यमुन्मथितं यथा॥ २५॥ अवष्टभ्यावतिष्ठंतं ददर्श धनुरूर्जितं
रामं रामानुजं चैव भर्तुश्चैव तथानुजं॥ २६॥ तानतीत्य समासाद्य भर्तारं निहतं रणे॥ समीक्ष्य व्यथिता भूमौ संभ्रांता निप
पात ह॥ २७॥ सुप्तेव पुनरुत्थाय आर्यपुत्रेति वादिनी॥ रुरोद सा पतिं दृष्ट्वा संवीतं मृतुदामभिः॥ २८॥ तामवेक्ष्य तु सु
ग्रीवः क्रोशंतीं कुररीमिव॥ विषादमगमत्कष्टं दृष्ट्वा चांगदमागतं॥ २९॥ इत्यार्षे श्रीमद्रामायणे वा० किष्किंधाकां
डे एकोनविंशः सर्गः॥ १९॥ रामचापविसृष्टेन शरेणांतकरेण तं॥ दृष्ट्वा विनिहतं भूमौ तारा ताराधिपानना॥ १॥

रणे रणोन्मथितमित्यर्थः॥ २५॥ तानतीत्य मार्गस्थान्॥ रामादीनतीत्य॥ २७॥ संवीतं वद्धं॥ २८॥ २९॥ धरमानः॥ इति रामाभिरामे रामीये श्रीरा
मायणे वाल्मीकीये किष्किंधाकांडे एकोनविंशः सर्गः॥ १९॥ अंतकरेण मृत्युकारिणा॥ १॥ श्रीरामाय रामचन्द्राय नमः॥ ६॥

२॥ उन्मूलमुत्पातितमितिशेषः॥३॥ त्ववनौकसांवानराणांश्रेष्ठ इदानींपुरोभागांस्मिन्कालेक्षमापराधांमन्वाऽद्यनाभिभाषसेकिमित्यन्वयः॥४॥५॥६॥
हेवीरधर्मतःसंप्रवर्त्तिनाधर्मेणएवक्रमाचरतात्वयाद्यस्वर्गमार्गेस्वर्गसाधनरणक्षमोकिष्किंधेवान्यारम्यापुरीनिर्मितानोचेत्कथंकिष्किंधांविहायावशे
षेइत्यर्थः॥ कनकसुधर्मतः॥ प्रवर्त्तितारक्षिताकिष्किंधेवान्यापिस्वर्गमार्गेस्वर्गरूपदेशेनिर्मितेत्यर्थमाह॥७॥ यानित्वयासार्द्धंविहृतानितेषा

सासमासाद्यभर्त्तारंपर्यष्वजतभामिनी॥ इषुणाभिहतंदृष्ट्वावालिनंकुंजरोपमं॥२॥ वानरंपर्वतेंद्राभंशोकसंत
प्तमानसा॥ तारातरुमिवोन्मूलंपर्यदेवयदातुरा॥३॥ रणेदारुणविक्रांतप्रवीरप्लवगांवर॥४॥ किमिदानींपु
रोभागामद्यत्वंनाभिभाषसे॥ उत्तिष्ठहरिशार्दूलभजस्वशयनोत्तमं॥ नैवंविधाःशेरतेहिभूमौनृपतिसत्तमाः
॥५॥ अतीवखलुतेकांतावसुधावसुधाधिप॥ गतासुरपियांगात्रैर्मांविहायनिषेवसे॥६॥ व्यक्तमद्यत्वयावीर
धर्मतःसंप्रवर्त्तिना॥ किष्किंधेवपुरीरम्यास्वर्गमार्गेविनिर्मिता॥७॥ यान्यस्माभिस्त्वयासार्द्धंवनेषुमधुगंधिषु
विहृतानित्वयाकालेतेषामुपरमःकृतः॥८॥ निरानंदानिराशाहंनिमग्नाशोकसागरे॥ त्वयिपंचत्वमापन्ने
महायूथपयूथपे॥९॥ हृदयंसुस्थिरंमह्यंदृष्ट्वानिपतितंभुवि॥ यन्नशोकाभिसंतप्तंस्फुटतेद्यसहस्रधा॥१०॥
सुग्रीवस्यत्वयाभार्याहृतासचविवासितः॥ यत्तत्तस्यत्वयाव्युष्टिःप्राप्तेयंप्लवगाधिप॥११॥ (मन्त्रकालेत्वयोपरमःसमाप्तिःकृ

ता॥८॥९॥ मह्यंममहृदयंसुस्थिरमतिदृढंयत्त्वांपतितंदृष्ट्वानस्फुटेत्॥१०॥ सविवासितइतियत्तत्प्रसिद्धंकर्मतस्यकर्मणाऽइयंव्युष्टिःपरिपाकःप्राप्त

125

येषाहं हितं वाक्यमब्रुवं सा त्वया मोहाद्विगर्हिता। अस्वीकृतवचना कृता इति यावत्॥१२॥ दक्षिणानां विदग्धानां समर्थानां वा चित्तानि प्रमथिष्यसि प्राप्तदिव्यदे
हानामप्सरसां काममोहजननेनेति शेषः॥१३॥ कालः प्राप्त इति शेषः। अवपन्न प्राप्तोसि। कालविशेषणं निःसंशय इति नत्त्वदायुर्विषयसंदेहर
हित इत्यर्थः॥१४॥ न संतप्यतीति दस्थाने ऽप्युक्तं॥१५॥ कृपणा कृपणा अतिशयेन कृपणा। आबाधायां वा द्वित्वं पूर्वमदुःखोपचिता ऽदुःखदुः

निश्रेयसपरा मोहात्त्वया चाहं विगर्हिता। यैषाब्रुवं हितं वाक्यं वानरेन्द्र हितैषिणी॥१२॥ रूपयौवनदृप्तानां दक्षिणा
नां च मानद। नूनमप्सरसामार्य चित्तानि प्रमथिष्यसि॥१३॥ कालो निःसंशयो नूनं जीवितान्तकरस्तव। बलाद्येनाव
पन्नोसि सुग्रीवस्यावशो वशी॥१४॥ अस्थाने वालिनं हत्वा युध्यमानं परेण च। न संतप्यति काकुत्स्थः कृत्वा कर्म
सुगर्हितं॥१५॥ वैधव्यं शोकसंतापं कृपणा कृपणा सती। अदुःखोपचिता पूर्वं वर्तयिष्याम्यनाथवत्॥१६॥ लालि
तश्चाङ्गदो वीरः सुकुमारः सुखोचितः। वत्स्यते कामवस्थां मे पितृव्ये क्रोधमूर्छिते॥१७॥ कुरुष्व पितरं पुत्र सुदृष्टं ध
र्मवत्सलं। दुर्लभं दर्शनं तस्य तव वत्स भविष्यति॥१८॥ समाश्वासय पुत्रं त्वं संदेशं संदिशस्व मे। मूर्ध्नि चैनं समाघ्राय
प्रवासं प्रस्थितो ह्यसि॥१९॥ रामेण हि महत्कर्म कृतं त्वामभिनिघ्नता। आनृण्यं तु गतं तस्य सुग्रीवस्य प्रतिश्रवे॥२०॥

खरहितं यथा भवति तथोपचिता वर्धिता॥१६॥ मे मया लालितः कामवस्थां प्राप्य वत्स्यत इत्यर्थः॥१७॥ पितरं सुदृष्टं कुरुष्व॥१८॥ मूर्ध्नैनमुपाघ्राय सं
देशं कर्तव्योपदेशं संदिशस्वेत्यन्वयः प्रस्थितः प्रस्थातुकामः॥१९॥ प्रतिश्रवे प्रतिज्ञाविषये अनेन रामस्य वालिवधविषयदोषाभावो ध्वनितः॥२०॥

शत्रोर्हिंसितः॥२१॥२२॥तस्याविलपितं ताराया विलापं॥२३॥किमंगदं सांगदवीरबाहो सांगदेवीरबाहो हंता वाकुर्यस्यता हेशगुणासन्निकृष्टं गुणैस्तव प्र
त्यासन्नं प्रियश्चारुवेषो यस्य तत्पुत्रं विहाय चिरं प्रवासं गंतुं न युक्तमित्यन्वयः॥२४॥ असंप्रधार्य अविचार्य॥हरिवंशानां वानरसमूहानां नाथः
व्रजामि स्पृशामीत्यर्थः॥२५॥ यत्र वाली तत्रोपसृत्य निकृष्टसमीपे उपविश्य उपवेष्टुं प्रायोपवेशं कर्तुं व्यवस्यत निश्चितवती॥२६॥इति रामाभि

सकामो भव सुग्रीव रुमां त्वं प्रतिपत्स्यसे॥ भुंक्ष्व राज्यमनुद्विग्नः शस्तो भ्राता रिपुस्तव॥२१॥ किं मामेवं प्रलपंतीं प्रियां
त्वं नाभिभाषसे॥ इमाः पश्य वरा बह्वीर्भार्यास्ते वानरेश्वर॥२२॥तस्या विलपितं श्रुत्वा वानर्यः सर्वतश्च ताः॥ परिगृह्यां
गदं दीनां दुःखार्ताः प्रतिचुक्रुशुः॥२३॥ किमंगदं सांगदवीरबाहो विहाय यातोसि चिरं प्रवासं॥ न युक्तमेवं गुणसन्नि
कृष्टं विहाय पुत्रं प्रियचारुवेषं॥ २४॥ यद्यप्रियं किंचिदसंप्रधार्य कृतं मया स्यात्तव दीर्घबाहो॥ क्षमस्व मे तद्धरिवं
शनाथ व्रजामि मूर्ध्ना तव वीर पादौ॥ २५॥ तथा तु तारा करुणं रुदंती भर्तुः समीपे सह वानरीभिः॥ व्यवस्यत प्रायमनिं
द्यवर्णा उपोपवेष्टुं भुवि यत्र वाली॥२६॥ इत्यार्षे श्रीमद्रामायणे वा॰ किष्किंधाकांडे विंशः सर्गः॥२०॥ ततो नि
पतितां तारां च्युतां तारामिवांबरात्॥ शनैराश्वासयामास हनूमान्हरियूथपः॥१॥ गुणदोषकृतं जंतुः स्वकर्मफलहेतुकं
अव्यग्रस्तदवाप्नोति सर्वं प्रेत्य शुभाशुभं॥२॥

रामे श्रीरा॰ किष्किंधाकांडे विंशः सर्गः॥२०॥तत इति जंतुः फलहेतुकं स्वर्गनरकादिफलसाधनं स्वा
र्थकः गुणदोषैः शमादिभिः द्वेषरागादिना वा कृतं यत् स्वकर्मास्ति तत्स्वशुभाशुभरूपं फलं प्रेत्याव्यग्रोऽनाकुलोऽवाप्नोति गुणदोषकृतं ज्ञानाज्ञानकृतमि
त्यर्थ इति कश्चित्॥२॥

126

शोचापापपुराणकर्मपाशवशगत्वेन शोचनीया । त्वं कमन्यं शोच्यं शोचसि कर्मवशगं भर्त्रादिकं कर्मफलवशगतो दीना त्वं कमन्यं पुत्रादिकमनुकंपसे बु
द्बुदोपमे देहेऽनित्ये कः कस्यानुशोच्योऽसि । उपलक्षणं कस्य कोऽनुशोचकोऽस्तीत्यपि बोध्यं । विदुषा नोचितः शोक इति भावः ॥ ३ ॥ दृष्ट्वा वालि शोकनिह
मर्थः अस्य वालिनो मरिष्यमाणस्यायत्यां मरणोत्तरकाले यानि विधेयानि कार्याणि समर्थानि श्रेष्ठानि तानि त्वं चिंतय विचारय ॥ ४ ॥ अनियता म
व्यवस्थितानां तस्माच्छुभं परलोकसुखावहं यत्कर्त्तव्यं हे पंडिते । इह पतिपित्रादिवियोगकाले न लौकिकं वक्षोरोदनादि कर्त्तव्यं । शौतिमात्रबोधक

शोच्या शोच्यसि कं शोच्यं दीनं दीनानुकंपसे ॥ कश्च कस्यानुशोच्योस्ति देहेस्मिन्बुद्बुदोपमे ॥ ३ ॥ अंगदस्तु कुमारोयं द्रष्ट
व्यो जीवपुत्रया ॥ आयत्यां च विधेयानि समर्थान्यस्य चिंतय ॥ ४ ॥ जानास्यनियतामेवं भूतानामागतिं गतिं ॥ तस्माच्छुभं
हि कर्त्तव्यं पंडिते नैहलौकिकं ॥ ५ ॥ यस्मिन्हरिसहस्राणि शतानि नियुतानि च । वर्त्तयंति कृताशानि सोयं दिष्टांतमागतः ।
६ ॥ यदयं न्यायदृष्टार्थः सामदानक्षमापरः । गतो धर्मजितां भूमिं नैनं शोचितुमर्हसि ॥ ७ ॥ सर्वे च हरिशार्दूलाः पुत्र
श्चायं तवांगदः । हर्यृक्षपतिराज्यं च त्वत्सनाथमनिंदिते ॥ ८ ॥ ताविमौ शोकसंतप्तौ शनैः प्रेरय भामिनि ॥ त्वया परिगृ
हीतोयमंगदः शास्तु मेदिनीं ॥ ९ ॥

तपाम्लेशसाधनत्वेन च तस्य लौकिकत्वं । ५ । यस्मिन्जीवतीति शेषः कृताशानि कृतभोग्याशानि वर्त्तयंति जीवं
ति दिष्टांतं आयुर्दायरूपकल्पितकालांतं । ६ । न्यायेन नीतिशास्त्रेण दृष्टोर्थो राजकार्यं येन सामादिपरो वानरेषु । धर्मजितां धर्मेणभूमिं जितवतां राज्ञां भू
मिं स्थानं गतः गंतव्यमित्यर्थः । अनेनैनं शोक उचितः ॥ ७ ॥ त्वमपि न शोककरणार्हेत्याह सर्वे चेति । त्वत्सनाथं त्वयैवैकया सनाथं ॥ ८ ॥ ताविमौ सुग्रीवांगदौ शनैः प्रेर

पु॰ किष्किंधाकांडे ॥ २४ ॥

संततिःअंगदःयथाहस्यप्रयोजनकतयाशास्त्रेहस्यायश्चराज्ञःसांप्रतंपरलोकहितंकृत्यंसत्क्रियतां॥ एषकालस्यइदानींतनकालस्योचितोनिश्चयःअ
नुष्ठाननिश्चयः॥१०॥ तदेवाह॥संस्कार्यइति॥रामबाणस्यामोघत्वान्मरणनिश्चयेनैवमुक्तिः॥११॥१२॥यदुक्तंपुत्रेणसुखिनीभवेतितन्नेत्यारव्या
तितारात्र्अंगदेति॥ अंगदतुल्यानांपुत्राणांशतमेकतःसुखसाधनैककोटौहतस्यापिपत्युर्गात्रसंश्लेषापरकोटौतयोर्मध्येद्वितीयोवरमतिशयि

संततिश्चयथाहृष्टाकृत्यंयच्चापिसांप्रतं॥राज्ञस्तत्क्रियतांसर्वमेषकालस्यनिश्चयः॥१०॥ संस्कार्योहरिराजस्तुअंगदश्चा
भिषिच्यतां॥सिंहासनगतंपुत्रंपश्यंतीशांतिमेष्यसि॥११॥ सातस्यवचनंश्रुत्वाभर्तृव्यसनपीडिता॥अब्रवीदुत्तरंता
राहनूमंतमवस्थितं॥१२॥अंगदप्रतिरूपाणांपुत्राणामेकतःशतं॥हतस्याप्यस्यवीरस्यगात्रसंश्लेषणंवरं १३
नचाहंहरिराज्यस्यप्रभवाम्यंगदस्यवा॥पितृव्यस्तस्यसुग्रीवःसर्वकार्येष्वनंतरः॥१४॥नह्येषाबुद्धिरास्थेयाहनू
मन्नंगदंप्रति॥पिताहिबंधुःपुत्रस्यनमाताहरिसत्तम॥१५॥ नहिममहरिराजसंश्रयात्क्षेमतरमस्तिपरत्रचेह
वा॥अभिमुखहतवीरसेवितंशयनमिदंममसेवितुंक्षमं ॥१६॥इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेएकविंशः ॥

तसुखसाधनंपरलोकेपरमानंदहेतुत्वात्॥तस्मात्सहगमनंकरिष्यइतिभावः॥१३॥ राज्यंत्वदधीनमितियदुक्तंतन्निराचष्टेनराज्यस्यप्रभवामियोग्य
स्त्रीत्वात्॥अंगदस्यवाराज्यदानेनप्रभवामि॥अनंतरःसमर्थःसतःकृत्यासत्वश्च॥१४॥एषाबुद्धिःमत्कर्तृकाभिषेकबुद्धिःपितातत्तुल्यःसुग्रीवःबंधुःसु
खदानाधिकारीनमातेत्यर्थः॥१५॥१६॥ शंकमानः॥इतिरामाभिरामेरामीयश्रीरामायणतिलकेकिष्किंधाकांडेएकविंशःसर्गः॥ २१ ॥

127

सर्वतोवीक्ष्यमाणःसः आत्मजस्याग्रतस्थितंसुग्रीवमेवादौददर्श॥१॥आभाष्यसुग्रीवेतिसंबोध्य॥२॥हेसुग्रीवमांकिल्विषात् प्राग्भवीयदुष्क्रमव
शात्॥भविष्येणभवितव्यतावश्यंभाविनाबुद्धिमोहेनत्वयिबुद्धिरूपेणबलात्॥कृष्यमाणंमांज्ञात्वात्वद्दोषेणत्वापकारदोषवत्वेनमांगंतुमवगं
तुंनार्हसि॥३॥कार्यज्ञमितंकर्मप्राबल्यंदर्शयति॥युगपदिति॥भ्रातृयुक्तंभ्रात्रोर्युक्तमुचितंसौहार्दंसुखंच राज्यसुखंचावयोःकर्मणायुग
पद्विहितमितिमन्येयतस्तादिदंउचितमपिसौहार्दंसुखंचान्यथाजातंविघटितमित्यर्थः॥४॥अथरामशरक्षीणायायत्वात्प्राप्तदिव्यप्र

वीक्ष्यमाणस्तुमंदासुःसर्वतोमंदमुच्छ्वसन्॥आदावेवतुसुग्रीवंददर्शात्मजमग्रतः॥१॥तंप्राप्तविजयंवालीसुग्री
वंप्लवगेश्वरं॥आभाष्यव्यक्तयावाचासस्नेहमिदमब्रवीत्॥२॥सुग्रीवदोषेणनमांगंतुमर्हसिकिल्बिषात्॥कृष्यमा
णंभविष्येणबुद्धिमोहेनमांबलात्॥३॥युगपद्विहितंतातनमन्येसुखमावयोः॥सौहार्दंभ्रातृयुक्तंहितदिदंजातम
न्यथा॥४॥प्रतिपद्यत्वमद्यैवराज्यमेषांवनौकसां॥मामप्यद्यैवगच्छंतंविद्धिवैवस्वतक्षयं॥५॥जीवितंचहिराज्यं
चश्रियंचविपुलांतथा॥प्रजहाम्येषवैतूर्णंमहच्चागर्हितंयशः॥६॥

कृतिःस्वयमेवसुग्रीवायस्वानंतरंप्राप्तंराज्यंददाति॥प्रतिप
द्येतिप्रतिपद्यस्वेत्यर्थः॥वैवस्वतक्षयंयमगृहं॥ननुराजनिमृतेतत्पुत्रएवराज्याधिकारीनतुतत्कनीयान्भ्रातेतिइतिचेन्न पुत्रस्यबालत्वेनराज्यरक्ष
णासामर्थ्यात्बलवद्दाश्रितत्वाच्चपुत्रनाशोमाभूदितितथोक्तेः भगवतारामेणापिराज्यरक्षणासामर्थ्येनांगदस्यसुग्रीवोभिषिक्तोराज्येयौवराज्ये
चांगदःसुग्रीवानंतरंत्वंगदस्यैवराज्याधिकारोनतुसुग्रीवपुत्राणांज्येष्ठपुत्रत्वादितिभावः॥५॥अगर्हितंयशःप्रशस्तंयशःवालीकेनाप्यवध्यइत्येवंरूपंच

प्रजहामिएकेनैवशरेणरामहतवान्इतिप्रांचः अस्तुवरत्वर्थेयशइत्युत्तरंबोध्यः
अगर्हितंयशसमप्राप्नोमीतिशेषः वालीभगवतारामेणछन्नेनहतइत्येवंरूपंचय
शइत्याहुः॥६॥

अस्यामवस्थायांचरमदशायांयद्यप्यसुकरं।मयात्वंतमपकृतत्वात्॥तथापिकर्तुमर्हस्येवेतियोजना॥सात्विकत्वात्सात्विकसमाश्रयणात्त्वन्मयाशयःस्वयंराज्य
स्यदत्तत्वाद्राजन्नितिसंबोधनं॥७॥नदेवाह।सुखार्हमिति।अवालिशंसमर्थं॥८॥प्राणैःप्राणेभ्यः॥ममपुत्रंस्वमौरसंपुत्रमिवहीनार्थमक्षीणोहिकस्म
कलप्रयोजनंयथातथासर्वतःसर्वत्रदेशेकालेचपालयत्वानंतरमस्यैवराज्यंदेहीतिव्यंग्यं॥९॥पालनप्रकारमेवदर्शयति।त्वमपीति।सर्वत्रभवेतिशेषः

अस्यांत्वहमवस्थायांवीरवक्ष्यामियद्वचः॥यद्यप्यसुकरंराजन्कर्तुमेवत्वमर्हसि॥७॥सुखार्हंसुखसंवृद्धंवालमेनमवालिशं
वाष्पपूर्णमुखंपश्यभूमौपतितमंगदं॥८॥ममप्राणैःप्रियतरंपुत्रंपुत्रमिवौरसं॥मयाहीनमहीनार्थंसर्वतःपरिपाल
य॥९॥त्वमप्यस्यपितादातापरित्राताचसर्वशः॥भयेष्वभयदश्चैवयथाहंप्लवगेश्वर॥१०॥एषतारात्मजःश्रीमांस्त्वया
तुल्यपराक्रमः॥रक्षसांचवधेतेषामग्रतस्तेभविष्यति॥११॥अनुरूपाणिकर्माणिविक्रम्यवलवान्रणे॥करिष्यत्येषता
रेयःतेजस्वीतरुणोंगदः॥१२॥सुषेणदुहिताचेयमर्थसूक्ष्मविनिश्चये॥औत्पातिकेचविविधेसर्वतःपरिनिष्ठिता॥१३॥
यदेषासाध्वितिब्रूयात्कार्यंतन्मुक्तसंशयं॥नहितारामतंकिंचिदन्यथापरिवर्तते॥१४॥

॥१०॥उक्तंस्वपुत्रस्यावालिशत्वंदर्शयति।एषइति।रक्ष
सांवधे।रामप्रत्युपकारप्रसंगप्राप्ते॥११॥अनुरूपाणिमदनुरूपाणि॥१२॥तारारूपंतांतदुपकारमादर्शयन्सूचयति।सुषेणेति।तद्दुहितातारा।अर्थानांमध्येसूक्ष्म
:परमदुर्ज्ञेयोयोर्थस्तस्यनिश्चये।औत्पातिकेविविधेनानाप्रकारोत्पातसूचितापत्कालिकानुबंधनिश्चयेसर्वतःऐहिकामुष्मिकनिश्चयेचपरिनिष्ठितास्तिसमर्था॥
१३॥ततःकिंतत्राह।यदिति।तत्कार्यंमुक्तसंशयंकार्यंमदुक्षेयंतदेवदृढयतिनहीति।मदनुभवसिद्धमेतदितिभावः।अनेनचैवर्णिकेतरत्वेनतद्रूपत्वेनावश्यंकर्तव्यमुक्तं

घांतरस्वीकारस्यतारायाःदेवरात्सुग्रीवस्यस्वीकारोप्यनुमतइतिगम्यते॥१४॥

128

अथभ्रातृवन्ममसुपदेशमाह राघवस्येति । अकरणे धर्मः स्यात् मिथ्या प्रतिज्ञत्वापत्तेरितिभावः ॥ एवंपरलौकिकमनिष्टंप्रदर्श्यैहिकमपिमदाह त्वांचेतिमा
मिवधर्मभ्रष्टत्वादितिभावः ॥ १५ ॥ अथराज्यातुमतिंक्रिययापिदर्शयति । इमांचेति उदाराप्रशस्ता । श्रीर्जयलक्ष्मीरस्यांस्थितामहेंद्रानुग्रहात् । हियतोमृ
तेमयिशवस्पर्शात् एनांसाश्रीर्जह्यात् अतइदानीमेवेमांगृहाणेतिभावः ॥ १६ ॥ एवंवालिवचःश्रुत्वा पूर्वंवालीदुष्टइतितुध्यानंतद्वेजानंहर्षमिदा
नीमेवसौमनस्यदर्शनेनत्यक्त्वादीनोविवर्णोभूदित्यर्थः ग्रहग्रस्तः राहुग्रस्तः ॥ १७ ॥ नवालिवचनात्तादृशवालिवचनेनशांतः शांतवैरः युक्तंभ्रातृ

राघवस्यवचनेकार्यंकर्तव्यमविशंकया । स्यादधर्मोह्यकरणेत्वांचहिंस्यादमानितः ॥ १५ ॥ इमांचमालामाधत्स्वदिव्यां
सुग्रीवकांचनीं ॥ उदाराश्रीस्थिताह्यस्यांसंप्रजह्यान्मृतेमयि ॥ १६ ॥ इत्येवमुक्तःसुग्रीवोवालिनाभ्रातृसौहृदात् ॥ हृ
र्षंत्यक्त्वापुनर्दीनोग्रहग्रस्तइवोडुराट् ॥ १७ ॥ नवालिवचनाछांतःकुर्वंयुक्तमतंद्रितः ॥ जग्राहसोभ्यनुज्ञातोमालां
तांचैवकांचनीं ॥ १८ ॥ तांमालांकांचनींदत्वादृष्ट्वाचैवात्मजंस्थितं ॥ संसिद्धःप्रेत्यभावायस्नेहादंगदमब्रवीत् ॥
१९ ॥ देशकालौभजस्वाद्यक्षममाणःप्रियाप्रिये । सुखदुःखसहःकालेसुग्रीववशगोभव ॥ २० ॥ यथाहित्वंमहाबा
होलालितःसततंमया । नतथावर्त्तमानंत्वांसुग्रीवोवहुमन्यते ॥ २१ ॥

स्नेहोचितदर्शनादिव्यवहारमतंद्रितः कुर्वन्मालाग्रहणेवालि
नाभ्यनुज्ञातोमालांजग्राह । १८ । प्रेत्यभावायसंसिद्धोनिश्चितमरणः ॥ १९ ॥ देशकालौतत्तत्कर्मोचितौभजस्वजानीहिप्रियाप्रियेइष्टानिष्टयोगजेका
लेसेवकालेसुग्रीववशगत्वसेवापरोभव ॥ २० ॥ विपक्षेबाधकमाह यथाहीति वालनयाकेवलंलालितः यथासेवोचितकालेपिसेवारहितोवर्तितःतथा
सेवारहितेनवर्तमानंत्वांसुग्रीवोनवहुमन्येतातःसेवांकुर्वित्युपदेशः । २१ ॥

किंचास्यसुग्रीवस्यामित्रैरनुपकारकैस्तथाशत्रुभिरपकारकैश्चगतंसंगतंनत्वंमागच्छेः मागच्छभर्तुःसुग्रीवस्यार्थपरःप्रयोजनसाधनपरः ॥२२॥ नातिप्रणयः
प्रत्वात्अप्रणयश्चनकार्यः असन्धाद्दिनाअंतरहृक्अन्यासन्निर्विनाशायत्वामिहरत्वंनिष्फलसेवासमधमभावेनराजवद्गुरुस्त्रियामितिन्यायेनम
ध्यममार्गमवलंबस्वेत्याशयः ॥२३॥ हतोयूथपोयेषांतेतादृशाःपरिदेवयमानाविचुक्रुशुरित्यन्वयः ॥२५॥ अस्यैवप्रपंचःकिष्किंधेत्यादि ॥२६॥ ॥२७॥ गोल

नास्यामित्रैर्गतंगच्छेर्माशत्रुभिररिंदम ॥ भर्तुरर्थपरोदांतःसुग्रीववशगोभव ॥२२॥ नचातिप्रणयःकार्यःकर्तव्योप्रणयश्च
ते ॥ उभयंहिमहादोषंतस्मादंतरदृग्भव ॥२३॥ इत्युक्त्वाथविवृत्ताक्षःशरसंपीडितोभृशं ॥ विवृतैर्दशनैर्भीमैर्बभूवोत्क्रां
तजीवितः ॥२४॥ ततोविचुक्रुशुस्तत्रवानराहतयूथपाः ॥ परिदेवयमानास्तेसर्वेप्लवगसत्तमाः ॥२५॥ किष्किंधाह्यद्यशून्या
चस्वर्गतेवानरेश्वरे ॥ उद्यानानिचशून्यानिपर्वताःकाननानिच ॥२६॥ हतेप्लवगशार्दूलेनिष्प्रभावानराःकृताः ॥ येनद
त्तंमहद्युद्धंगांधर्वस्यमहात्मनः ॥२७॥ गोलभस्यमहाबाहोदशवर्षाणिपंचच ॥ नैवरात्रौनदिवसेतद्युद्धमुपशाम्यति ॥२८॥
ततःषोडशमेवर्षेगोलभोविनिपातितः ॥ तंहत्वादुर्विनीतंतुवालीदंष्ट्राकरालवान् ॥२९॥ सर्वाभयंकरोस्माकंकथमेष
निपातितः ॥३०॥ हतेतुवीरेप्लवगाधिपेतदावनेचरास्तत्रनशर्मलेभिरे ॥ वनेचराःसिंहयुतेमहावनेयथाहिगावोनिहतेगं वांपतौ ॥३१॥

भस्यमहात्म्यस्यमहद्युद्धंपंचदशवर्षावधिअहोरात्रमविश्रमंयुद्धंतद्देवाहनैवेति ॥२८॥ दंष्ट्राकरालवान्आर्षःस्वार्थेमतुप् दंष्ट्राकरालइत्यर्थः ॥२९॥ अस्माकंस
र्वाभयंकरःसर्वेभ्योभयंकरःसस्यवीरः कथंनिपातितः ॥३०॥ वनेचराःप्लवंगमानशर्मलेभिरेइत्यन्वयः अपरंवनेचराइतिगवांविशेषणं ॥३१॥ छ ॥

129

समीस्येति पाठः ॥ ३२ ॥ खगमानः ॥ इति रामाभिरामे रामीयश्रीरामायणतिलके किष्किंधाकांडे द्वाविंशः सर्गः ॥ २२ ॥ अथ तारा रामं तं दृष्ट्वा पुनः प्र
ल पतितं तं इति ॥ लोकश्रुति लोकप्रसिद्धा ॥ १ ॥ उपलैः पाषाणैरुपचिते सुदुःखे सुतरां दुःखकरे ॥ २ ॥ ३ ॥ एष विधिः रामकृत्य सुग्रीवस्य वशं प्राप्तो
ऽधीनो भवति ॥ अहो इत्याश्चर्ये न तु त्वद्वशं प्राप्तो येनाद्यैव भार्यया योजितः स्यादिति भावः अतः सुग्रीवस्वविक्रांतोत्र राज्ये भवितेति शेषः सा ह

ततस्तु तारा व्यसनार्णवप्लुता मृतस्य भर्तुर्वदनं समीक्ष्य सा ॥ जगाम भूमिं परिरभ्य वालिनं महाद्रुमं छिन्नमिवाश्रिता लता ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे द्वाविंशः सर्गः ॥ २२ ॥ ततः समुपजिघ्रंती कपिराजस्य तन्मुखं । पतिं लोकश्रुता तारा मृतं
वचनमब्रवीत् ॥ १ ॥ शेषे त्वं विषमे दुःखमकृत्वा वचनं मम ॥ उपलोपचिते वीर सुदुःखे वसुधातले ॥ २ ॥ मत्तः प्रियतरा नू
नं वानरेंद्र मही तव ॥ शेषे हि तां परिष्वज्य मां च न प्रतिभाषसे ॥ ३ ॥ सुग्रीवस्य वशं प्राप्तो विधिरेष भवत्यहो ॥ सुग्रीव एव विक्रां
तो वीर साहसिकप्रिय ॥ ४ ॥ ऋक्षवानरमुख्यास्त्वां वालिनं पर्युपासते ॥ तेषां विलपितं कृच्छ्रमंगदस्य च शोचतः ॥ ५ ॥ मम चे
मा गिरः श्रुत्वा किं त्वं न प्रतिबुध्यसे ॥ इदं तद्वीरशयनं तत्र शेषे हतो युधि ॥ ६ ॥ शायिता निहता यत्र त्वयैव रिपवः पुरा ॥
विशुद्धसत्त्वाभिजन प्रिययुद्ध मम प्रिय ॥ ७ ॥ मामनाथां विहायैकां गतस्त्वमसि मानद ॥ शूराय न प्रदातव्या कन्या खलु वि

॥ ८ ॥

सिकं साहसकर्म । ४ । पर्युपासते पर्युपासिषत ॥ ५ ॥ यत्र त्वया निहता रिपवः शायितास्तदिदं वीरशयनं तत्र त्वमपि शेषे ॥ ६ ॥ विशुद्धसत्त्वाभि
जन विशुद्धसत्त्ववंश भव प्रिययुद्ध प्रिययुद्धं वा युद्धेनैव मरणं जातमिति भावः ॥ ७ ॥ ८ ॥ श्रीकृष्णार्प्यनमस्तुः ॥ छ ॥ छ ॥

भूरण्याकन्ययाप्रदानेहेतुः भूरस्यनवभार्यांमांविधवांकृतांपश्यमानः राजपत्नीत्वाभिमानः शाश्वतीस्थिरागतिः सुखप्राप्तिः ॥ ९ ॥ १० ॥ कृतंशोकेनेतिशेषः प्रकृत्या
ऽनुपाधितः ॥ ११ ॥ प्रहारेरणेपराक्रांतः परेणाक्रांतः अभिभूतः पंचत्वमागतः स्तनद्वापियद्धृदयंनभिन्नमतोदृढमितिपूर्वेणान्वयः ॥ ननुसपुत्रायाः कस्तेशो
कोऽतआह पतिहीनेत्यादि ॥ १२ ॥ कृमेरिंद्रगोपादेरागइवरागोयस्यतादृशः पर्यस्तामत्रास्तरणंयस्मिन्क्रिमिरागोलाक्षारागः क्रिमिरागंवदंसार्यानाक्षिकंप्रियद

भूरभार्यांहमांपश्यसद्योमांविधवांकृतां ॥ अवभग्नश्चमेमानोभग्नामेशाश्वतीगतिः ॥ ९ ॥ अगाधेचनिमग्नास्मिविपुलेशो
कसागरे ॥ अश्मसारमयंनूनमिदंमेहृदयंमम ॥ १० ॥ भर्तारंनिहतंदृष्ट्वायन्नाद्यशतधाकृतं ॥ सुहृच्चैवचभर्ताचप्रकृत्याच
ममप्रियः ॥ ११ ॥ प्रहारेचपराक्रांतःशूरःपंचत्वमागतः ॥ पतिहीनातुयानारीकामंभवतुपुत्रिणी ॥ १२ ॥ धनधान्यसमृद्धा
पिविधवेत्युच्यतेबुधैः ॥ स्वगात्रप्रभवेवीरशेषेरुधिरमंडले ॥ १३ ॥ क्रिमिरागपरिस्तोमेस्वकीयेशयनेयथा ॥ रेणुशोणि
तसंवीतंगात्रंतवसमंततः ॥ १४ ॥ परिरब्धुंनशक्नोमिभुजाभ्यांप्लवगर्षभ ॥ कृतकृत्योद्यसुग्रीवोवैरेस्मिन्नतिदारुणे ॥
॥ १५ ॥ यस्यरामविमुक्तेनहृतमेकेषुणाभयं ॥ शरेणहृदिलग्नेनगात्रसंस्पर्शनेनव ॥ १६ ॥ वार्यामित्वांनिरीक्षंतीत्वयि
पंचत्वमागते ॥ उद्ववर्हशरंनीलस्तस्यगात्रगतंतदा ॥ १७ ॥

शतमित्युत्पलमालाकोशादित्यन्ये ॥ १३ ॥ परिरब्धुमालिंगितुंनशक्नोमि ॥ रेणुशोणित
संवीतत्वात् ॥ शोकेनभुजयोर्बलाभावाच्चगात्रसंलग्नशरत्वाच्च ॥ १४ ॥ अस्मिन्वैरेवालिविषयेवैरेकृतकृत्यःकृतानुष्ठेयानुष्ठानः ॥ १५ ॥ शरेणतवगात्रसं
स्पर्शनेवार्यामिनिवारितांभवामीत्यन्वयः ॥ १६ ॥ स्कंदवचःश्रुत्वानीलःशरंउद्ववर्हउद्धृतवान् ॥ अस्यबाणस्यातितेजस्विशत्रुवधेनेजः सयात्वापुनरस्तगमन

130

॥ रा·म· ॥
॥ ५३ ॥

१८॥ दिनकरादितियं चमीव सार्थे रुधिररक्तवाहिनिभावः व्रणेभ्यः शरशिलापादयजनितेभ्यः॥ १९॥ रणरेणुनावकीर्णं व्याप्तं॥ २०॥ २१॥ पश्चिमःवस्थामरणं॥
२२॥ पापकर्मणा प्राचीनपापवशात् संप्रसक्तस्य प्राप्तस्य वैरस्यांतोवसानं गतः प्राप्तवान्॥ २३॥ २४॥ त्वामभिवादयमानं इदं मारणवाक्यं॥ २५॥ उपासे समी
पेतिष्ठामि॥ २६॥ रामस्य प्रहरणं वाणस्तद्रूपेणांभसा मयाविना कथं अवभृथस्नानः॥ २७॥ मालामिह न पश्यामि किंतु श्रीवायमालादानस्यादर्शनं

गिरिगह्वरसंलीनं दीप्तमाशीविषं यथा। नत्यनिष्क्रम्यमाणस्य वाणस्यापि वभौ द्युतिः॥ १८॥ अस्तमस्तकसन्नद्धरश्मेर्दि
नकरादिव। पेतुः क्षतजधाराश्च व्रणेभ्यस्तस्य सर्वशः॥ १९॥ ताम्रगैरिकसंयुक्ता धारा इव धराधरात्॥ अवकीर्णो विमा
र्जन्नी भर्तारं रणरेणुना॥ २०॥ अस्त्रैर्नयनजैः भूरिं सिषेचास्त्रसमाहतं॥ रुधिरोक्षितसर्वांगं दृष्ट्वा विनिहतं पतिं॥ २१॥
उवाच तारा पिंगाक्षं पुत्रमंगदमंगना। अवस्थां पश्चिमां पश्य पितुः पुत्र सुदारुणां॥ २२॥ संप्रसक्तस्य वैरस्य गतोंतः
पापकर्मणा। वालसूर्योज्ज्वलतनुं प्रयातं यमसादनं॥ २३॥ अभिवादय राजानं पितरं पुत्र मानद। एवमुक्तः समुत्था
य जग्राह चरणौ पितुः॥ २४॥ भुजाभ्यां पीनवृत्ताभ्यामंगदोहमिति ब्रुवन्॥ अभिवादयमानं त्वामंगदं त्वं यथा पुरा॥ २५॥
दीर्घायुर्भव पुत्रेति किमर्थं नाभिभाषसे॥ अहं पुत्रसहाया त्वामुपासे गतचेतनं॥ सिंहेन पातितं सद्यो गौः सवत्सेव गोवृषं॥ २६॥
इष्ट्वा संग्रामयज्ञेन रामप्रहरणांभसा। तस्मिन्नवभृथे स्नातः कथं पत्न्या मयाविना॥ २७॥ या दत्ता देवराजेन तव तुष्टेन सं
युगे। शातकौंभीं प्रियां मालां तां ते पश्यामि नेह किं॥ २८॥ राज्यश्रीर्न जहाति त्वां गतासुमपि मानद। सूर्यस्यावर्त्तमानस्य शैलराज
शोकवशाद्दृष्टस्यापि विस्मरणं वेत्येव सूक्तिः॥ २८॥ आवर्त्तमानस्य। अस्तं गच्छतः शैलराजं नमेवास्ताचलं॥ २९॥ श्रीरामाय रामचन्द्राय नमः॥ छ॥ छ॥

किष्कधा॥ २९॥

पथ्यमिदं वच इतिस्मृते सन्निहितस्य प्रागुपदिष्टस्य परामर्षः ॥ ३० ॥ नगमानः । इति रामाभिरामे श्रीरा॰ किष्किंधाकांडे त्रयोविंशः सर्गः ॥ २३ ॥ तां तारां अश्रुवेगेन
शोकमहार्णवेनाभिप्लुतां खिन्नां ॥ अप्रतिमेन असदृशेन आत्मन इति शेषः ॥ १ ॥ वाष्पपूर्णेन मुखेनोपलक्षितां तारां पश्यन् । निर्विण्णमनाः खिन्नः संपरिहृ
यमानः सम्यगनुनीयमानः ॥ २ ॥ उदात्तं धीरोदात्तस्वभावं ॥ लक्षणैः सामुद्रिकशास्त्रोक्तराजलक्षणैर्लक्षितमंगं यस्य तं ॥ ३ ॥ इष्टफलं राज्यभोगफलं कर्म

न मे वचः पथ्यमिदं त्वया कृतं न चास्मि शक्ता हि निवारणे तव ॥ हता सपुत्रास्मि हतेन संयुगे सह त्वया श्रीर्विजहाति मा
मपि ॥ ३० ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे त्रयोविंशः सर्गः ॥ २३ ॥ तामाशुवेगेन दुरासदेन त्वभिप्लुतां शोकमहा
र्णवेन ॥ पश्यंस्तदा वाल्यनुजस्तरस्वी भ्रातुर्वधेनाप्रतिमेन तेपे ॥ १ ॥ स वाष्पपूर्णेन मुखेन पश्यन् क्षणेन निर्विण्णम
ना मनस्वी ॥ जगाम रामस्य शनैः समीपं भृत्यैर्वृतः संपरिहूयमानः ॥ २ ॥ स तं समासाद्य गृहीतचापमुदात्तमाशीविष
तुल्यबाणं ॥ यशस्विनं लक्षणलक्षितांगमवस्थितं राघवमित्युवाच ॥ ३ ॥ यथाप्रतिज्ञातमिदं नरेंद्र कृतं त्वया दृष्ट
फलं च कर्म ॥ ममाद्य भोगेषु नरेंद्रसूनो मनो निवृत्तं हतजीवितेन ॥ ४ ॥ अस्यां महिष्यां तु भृशं रुदंत्यां पुरेनिविक्रोशति
दुःखतप्ते ॥ हते नृपे संशयितेंऽगदे च न राम राज्ये रमते मनो मे ॥ ५ ॥ क्रोधादमर्षादतिविप्रधर्षाद्भ्रातुर्वधो मेऽनुमतः पुर
स्तात् ॥ हते त्विदानीं हरियूथपेऽस्मिन् सुतीक्ष्णमिक्ष्वाकुवर प्रतप्स्ये ॥ ६ ॥

वालिवधरूपं हतजीवितेन कुत्सितजीवितेन साध्येषु भोगेषु निवृत्तं
यः ॥ ४ ॥ अस्यां तारायां पुरे तत्स्थे जने च अतिविक्रोशति अत्यंतं रुदति अंगदे संशयिते पितृवियोगात् संशयितजीविते ॥ ५ ॥ अतिविप्रधर्षात् अत्यंतकृताधिक्षेप
राभवात् हेमोर्मेमोस्मात् क्रोधात् अमर्षात् असहिष्णुतया च सुतीक्ष्ण
मतिशयेन प्रतप्स्यते यामि ॥ ६ ॥

॥ राम ॥
॥ ५४ ॥

131

यथातथायेनकेनापिप्रकारेणस्वहन्त्यास्वजात्यनुचितंत्वया। वर्णयतः जीविनः ऋष्यमूकवासएवश्रेयोमन्ये॥ नतुत्रिदिवस्यलाभइत्यन्वयः॥७॥ नतद्वचनस्यैवा
नुरूपंईषत्करणेनापिमयिनदृष्टस्त्वांनरम्यान्तस्तेहवक्रतयात्वांनजिघांसामिकदापिचरगच्छेतियत्तद्वचइत्यर्थः इदंकर्मभ्रातृवधरूपंतद्वचनसदर्थमाका
रणरूपं॥८॥ कामःपुरस्कृतोयेनतादृशोपिभ्राताराज्यस्यतनुखस्यदुःखस्यभ्रातृवधेभाविदुःखस्यसारंतारतम्यंविचिंतयन्विचारयन्कथंभ्रातुर्वधं

श्रेयोयमन्येममशैलमुख्येतस्मिन्निवासश्चिरमृष्यमूके॥ यथातथावर्णयतःस्वहन्त्यानेमंनिहत्यत्रिदिवस्यला
भः॥७॥ नत्वांजिघांसामिचरेतियन्मामयंमहात्मामतिमानुवाच॥ तस्यैवतद्ग्राम्यवचोऽनुरूपमिदंवचःकर्मच
मेऽनुरूपं॥८॥ भ्राताकथंनाममहागुणस्यभ्रातुर्वधंराममविरोचयेन॥ राज्यस्यदुःखस्यचवीरसारंविचिंतय
न्कामपुरस्कृतोपि॥९॥ वधोहिमेमतोनासीत्स्वमाहात्म्यव्यतिक्रमात्॥ ममासीद्बुद्धिदौरात्म्यात्प्राणहारीव्य
तिक्रमः॥१०॥ द्रुमशाखावभग्नोहंमुहूर्त्तंपरिनिष्टनन्॥ सांत्वयित्वात्वनेनोक्तोनपुनःकर्तुमर्हसि॥११॥ भ्रा
तृत्वमार्यभावश्चधर्मश्चानेनरक्षितः॥ मयाक्रोधश्चकामश्चकपित्वंचप्रदर्शितं॥१२॥ रामचन्द्रायनमः

रोचयेन्नएवंचाहंतत्रारतंस्यानभिज्ञइतिभावः॥९॥ उक्तमेवविवृणोति॥ वधोहीतिमांहंतुंतस्यमतिर्नासीदित्यर्थः॥ तत्रहेतुःस्वमाहात्म्यव्यतिक्रमात् अनु
चितकर्मकारित्वालीत्ययशःप्रसंगभयात्॥ प्राणहारीप्राणहारितिशेषः व्यतिक्रमोऽन्यायः॥१०॥ द्रुमशाखयावभग्नःपलायितः अतएवमुहूर्त्तंपरिनिष्ट
नन्त्वामाक्रोशन्। यदाऽभवंतदातेनभ्राताऽसांत्वयित्वापुनरेवंदुश्चेष्टांकर्तुंनार्हसिइत्युक्तः नपुनर्मांहतवानित्यर्थः॥११॥ अतएवभ्रातृत्वमित्यादि १२

अचिंतनीयं चिंतयितुमप्ययोग्यं। अतएवार्यैर्नित्यं परिहरणीयं यत्किंचिदुपाधिनाप्यनीप्सनीयं आत्मकर्तृकमपि सर्वथा नवेक्षणीयं दर्शनानर्हं इदं प्राप्तोस्मि
इदंपदार्थमाह पाप्मानमिति। हे वयस्य भ्रातुः ज्येष्ठभ्रातुर्वधात् पाप्मानं तद्रूपं वास्मित्यर्थः त्वाष्ट्रो विश्वरूपः ॥१३॥ प्रतिपत्तुं प्राप्तुं क इह को वा सहेत न सहि
तुं शक्नुयादित्यर्थः ॥१४॥ प्रजानां संमानं नाभिः क्रियमाणं स्वसंमाननमपि नार्हामि पापग्रस्तत्वात्। न यौवराज्यं ज्येष्ठस्य पुत्रमंगदं राज्ये कृत्वा यथा
प्राप्तयौवराजमित्यर्थः एवंविधं कर्म कृत्वा राज्यं सर्वथा नार्हामीत्यन्वयः ॥१५॥ क्षुद्रस्य क्षुद्रयोग्यस्य लोके इह लोके विगर्हितस्य निंदितस्य लोकापकृ

अचिंतनीयं परिवर्जनीयमनीप्सनीयं स्वनवेक्षणीयं। प्राप्तोस्मि पाप्मानमिदं वयस्य भ्रातुर्वधात्त्वाष्ट्रवधादि
वेंद्रः ॥१३॥ पाप्मानमिंद्रस्य मही जलं च वृक्षाश्च कामं जगृहुः स्त्रियश्च। को नाम पाप्मानमिमं सहेत शाखामृग
स्य प्रतिपत्तुमिच्छन् ॥१४॥ नार्हामि संमानमिमं प्रजानां न यौवराज्यं कुत एव राज्यं ॥ अधर्मयुक्तं कुलनाशयुक्तमे
वंविधं राघव कर्म कृत्वा ॥१५॥ पापस्य कर्तास्मि विगर्हितस्य क्षुद्रस्य लोकापकृतस्य लोके॥ शोको महान्मामभि
वर्तते यं वृष्टेर्यथा निम्नमिवांबुवेगः ॥१६॥ सोदर्यघाता परगात्रवालः संतापहस्ताक्षिशिरोविषाणः ॥ एनोम
यो मामभिहंति हस्ती दृप्तो नदीकूलमिव प्रवृद्धः ॥१७॥

तस्य परलोके परमानर्थसाधनस्य पापस्य कर्तास्मि। अतो महान् शोको मां इव न
थाभिवर्तते यथा वृष्टेरंबुवेगो निम्नं इव॥ इवशब्दस्तथाशब्दार्थे। १६॥ सोदर्यघात एवापरगात्रभागो। वालश्च यस्य तज्जन्यसंताप एव हस्ताक्षिशिरो
विषाणं यस्य सः दृप्तो मत्तः प्रवृद्धो महान् ॥१७॥ ॥श्रीरामाय रामचंद्राय श्रीकृष्णाय वासुदेवाय नमः ॥ छ ॥ रामराम रामराम राम ॥ छ ॥

॥राम॥
॥५५॥
132

हेत्वर इदमंहः पापं वनखेदे अविषह्यं सोढुमशक्यं प्राप्य मे हृदि स्थितं साधुवृत्तं जन्मांतरार्जितपुण्यं निवर्त्ततेविवर्णमनसएवाग्नौ परितप्यमानं जातरूपं
अविषह्यमशक्यमहावस्थानं प्राप्य किट्टं मलं यथा निवर्त्तते तथेत्यर्थः। यथा बलवतोत्तमेनाधमः स्थातुं न शक्नोति। तथा बलवताधमेन सहोत्तमोपीत्याश
यः एवं चानेन पापेन सर्व्वपुण्यक्षयो जात इति तात्पर्यं केचित्तु अग्नौ परितप्यमानं जातरूपं स्वर्णं यथा विवर्णं विवर्णताकारकं किट्टं सहकक्षारद्रव्यं

अंहो वतेदं न्रवराविषह्यं निवर्त्तते मे हृदि साधुवृत्तं ॥ अग्नौ विवर्णं परितप्यमानं किट्टं यथा राघव जातरूपं ॥१८॥ महा
बलानां हरियूथपानां इदं कुलं राघव मन्त्रिमित्तं ॥ अस्यांगदस्यापि च शोकतापादर्ध्वस्थितप्राणमितीव मन्ये ॥१९॥
सुतः सुलभ्यः सुजनः सुवश्यः कुतस्तु पुत्रः सदृशोंगदेन ॥ न चापि विद्येत स वीरदेशो यस्मिन्भवेत्सोदरसन्निकर्षः
२०॥ अद्यांगदो वीरवरो न जीवेज्जीवेत माता परिपालनार्थं ॥ विनातु पुत्रं परितापदीना सा नैव जीवेदिति निश्चितं
मे ॥२१॥ सोहं प्रवेक्ष्याम्यतिदीप्तमग्निं भ्रात्रा च पुत्रेण च सख्यमिच्छन् ॥ इमे विचेष्यंति हरिप्रवीराः सीतां निदेशे परि
वर्त्तमानाः ॥२२॥ कृत्वंतु ते सत्यनिकार्यमेतन्मय्यप्रतीते मनुजेंद्रपुत्र ॥ कुलस्य हंतारमजीवनार्हं रामानुजानीहि
कृतागसं मां ॥२३॥ प्राप्य निवर्त्तते भस्म भवति ॥ तथेत्यर्थ इत्याहुः ॥१८॥ मन्त्रिमित्रं मयैतत्स्वामिवधादिनिभावः। अपि चास्यांगदस्य शोकता
पाच्च ॥ इतीव मन्ये इत्युत्प्रेक्षाबोधकं ॥१९॥ सुलभ्यः सुलभ इत्यर्थः ॥२०॥ अंगदो न जीवेत् यदि जीवेत्तदा माता तारा पुत्रपालनाय जीवेत् ॥ तदाभावे तु
सा सर्वथा न जीवेद् इत्यर्थः ॥ सख्यं समानत्वं निदेशे वदाज्ञाया ॥२१॥२२॥ अनुजानीहि अग्निप्रवेशायेति शेषः ॥२३॥ श्रीरामाय रामचन्द्राय नमः

संज्ञातवाष्पः दुःखिप्राणिदर्शनेन महतामयं स्वभावः ॥२४॥ तस्मिन्क्षणे तस्मिन्नवसरे ॥ तारां रुदंतीमभीक्ष्णं वारं वारमवेक्षमाणः जीवंतीमिच्छन् ॥ क्षितेरिव क्षम
णाः जीवंतीमिच्छन् ॥ क्षितेरिव क्षमावान् ॥ समुत्सुकः शोकापनयनायेति शेषः ॥२५॥ कपिसिंहनाथां कपिसिंहानां स्वामिनीं ॥२६॥ ॥२७॥ पुरुषप्रधानं पुरुष
श्रेष्ठं ॥ सत्त्वं गदोक्तः काकुत्स्थो यमिति प्रजज्ञे इति संबंधः परिविह्वलंती कष्टेन स्खलन्ती प्लवंगच्छंती ॥२८॥ संभ्रांतो विस्मृतः शरीरभावो राजस्त्रीत्वादिर्य

इत्येवमार्त्तस्य रघुप्रवीरः श्रुत्वा वचो वालिजघन्यजस्य ॥ संजातवाष्पः परवीरहंता रामो मुहूर्त्तं विमना बभूव ॥२४॥ तस्मिन्क्ष
णेऽभीक्ष्णमवेक्षमाणः क्षितिक्षमावान्भुवनस्य गोप्ता ॥ रामो रुदंतीं व्यसने निमग्नां समुत्सुकः सोऽथ ददर्श तारां ॥२५॥ तां चा
रुनेत्रां कपिसिंहनाथां पतिं समाश्लिष्य तदा शयानां ॥ उत्थापयामासुरदीनसत्वां मंत्रिप्रधानाः कपिराजपत्नीं ॥२६॥ सा
विस्फुरंती परिरभ्यमाणा भर्तुः समीपादपनीयमाना ॥ ददर्श रामं शरचापपाणिं स्वतेजसा सूर्यमिव ज्वलंतं ॥२७॥
सुसंवृतं पार्थिवलक्षणैश्च तं चारुनेत्रं मृगशावनेत्रा ॥ अदृष्टपूर्वं पुरुषप्रधानमयं स काकुत्स्थ इति प्रजज्ञे ॥२८॥ त
स्येंद्रकल्पस्य दुरासदस्य महानुभावस्य समीपमार्या ॥ आर्त्तातितूर्णं व्यसनं प्रपन्ना जगाम तारा परिविह्वलंती ॥२९॥ तं सा
समासाद्य विशुद्धसत्वं शोकेन संभ्रांतशरीरभावा ॥ मनस्विनी वाक्यमुवाच तारा रामं रणोत्कर्षणलब्धलक्ष्यं ॥३०॥ त्वमप्रमे
यश्च दुरासदश्च जितेंद्रियश्चोत्तमधर्मकश्च ॥ अक्षीणकीर्त्तिश्च विचक्षणश्च क्षितिक्षमावान्क्षतजोपमाक्षः ॥३१॥ यासा रणोत्कर्षे

णेन सर्वाधिकोत्कर्षेण लब्धलक्ष्यं वेध्यं येन सर्वतोधिकवेध्यवेधक इत्यर्थः ॥३०॥ अप्रमेयः देशतः कालतश्चापरिछेद्यः अशोध्यत्वया दुर्जयश्च ॥ दुरासदः योगिभिरपिप्राप्तुम

शक्यः उत्तमसवर्मकः पुरुषोत्तमधर्मा अक्षीणकीर्त्तिः यावद्वहाभासमाने
नापि कर्मणो निशेषः अतएव पुरुषोत्तमधर्मा क्षतजोपमाक्षः रक्ताक्षः ॥३१॥

आत्तवाणासनश्चासौवाणपाणिश्चेतिकर्मधारयः संहननं दृढगात्रता । ताहशेनत्वयाहतोवालीमनुष्यदेहाभ्युदयंमनुष्यलोकवर्त्तिदेहप्राप्यमभ्युदयमुखंवि
हायदिव्यदेहेनप्राप्योयोभ्युदयस्तेनयुक्तःसमासआर्षः ॥३२॥ अनतःयेनैवतिरमेनरस्यंमे ॥३३॥ पम्पस्यामलंयम्पसंनहन्त्रेत्रसमेत्याप्सरोभिस्ताःसंप्रे
क्ष्यचमामपश्यन्तरमेतेस्मन्वयः । उच्चावचैर्नानाप्रकारैस्ताम्रैरक्तपुष्पैःकृतःशेखरोयाभिस्ताअप्सरोनाभजिष्यन्नभजिष्यति । रक्तपुष्पधारणंवालिव
शीकरणाय ॥३४॥ नटावकाशेनटदेशे ॥३५॥ यद्यनिमाहीनोदुःखंप्राप्तानिमन्त्संवेत्थ ॥ अतन्मज्ञानन् । त्वंमांजहि ॥ कुमारःसुंदरःपुरुषः ॥३६॥ म

त्वमात्तवाणासनवाणपाणिर्महावलःसंहननोपपन्नः ॥ मनुष्यदेहाभ्युदयंविहायदिव्येनदेहाभ्युदयेनयुक्तः ॥३२॥
येनैववाणेनहतःप्रियोमेतेनैववाणेनहिमांजहीहि ॥ हतागमिष्यामिसमीपमस्यनमांविनावीररमेतवाली ॥३३॥ स्व
र्गेपिपद्मामलपत्रनेत्रःसमेत्यसंप्रेक्ष्यचमामपश्यन् ॥ नह्येषउच्चावचताम्रचूडाविचित्रवेषाप्सरसोभजिष्यत् ।३४।
स्वर्गेपिशोकंचविवर्णतांचमयाविनाप्राप्स्यतिवीरवाली । रम्येनगेन्द्रस्यतटावकाशेविदेहकन्यारहितोयथात्वं ॥ २
३५॥ त्वंवेत्थयावद्वनिताविहीनः ॥ प्राप्नोतिदुःखंपुरुषःकुमारः । तत्त्वंप्रजानन्जहिमांनवालीदुःखंममादर्शनजंभजे
त ॥३६॥ यच्चापिमन्येतभवान्महात्मास्त्रीघातदोषस्तुभवेन्नमह्यं ॥ आत्मेयमस्येतिहिमांजहित्वंनस्त्रीवधःस्यान्मनुजेन्द्रपु त्र

स्त्रीघातदोषोभवेदितिभवान्महात्मामन्येततदपिनइयंतारास्यवालिनः आत्मेतिज्ञात्वाजहि । एवंचमदभिन्नत्वान्ममननेस्त्रीवधदोषइतिभावः महात्म
न्येनेनताडकावधादिकृतवतःस्त्रीवधोनकिंचित्करइत्यपिसूचितं ॥३७॥ श्रीरामायरामचन्द्रायश्रीकृष्णायवासुदेवायनमः ॥ ॐ ॥ रामरामरामराम

स्त्रीणांपुरुषात्मत्वमेवसाधयति। शास्त्रेति॥ शास्त्रेशास्त्रीययागाद्यनुष्ठानेप्रकर्षेणसहैवयोगात् अधिकारात्विविधाच्चवेदात् अर्धोवाएषआत्मनोयत्पत्नी
तिश्रुतेः। अनन्यरूपाः अभिन्नरूपाः॥ नकेवलंदोषाभावमात्रमपितुस्त्रीदानफलमपीत्याह। दारेति अन्यदधिकंदानंनेतिभावः॥ ३८॥ त्वंचापीति॥ एवंचधर्मे
णपापमपनुदतीतिन्यायेनापि॥ हेवीर तेनमद्वधदोषइतिभावः यद्वाममवीरस्यपत्युः छलेनघातात्प्राप्तमधर्मसंबंधंनलप्स्यसेकिंचनतएवमह्यापनः प्रा

शास्त्रप्रयोगाद्विविधाच्चवेदादनन्यरूपाःपुरुषस्यदाराः॥ दारप्रदानाद्धिनदानमन्यत्प्रदृश्यतेज्ञानवतांहिलोके॥ ३८॥ त्वं
चापिमांतस्यममप्रियस्यप्रदास्यसेधर्ममवेक्ष्यवीर। अनेनदानेननलप्स्यसेत्वमधर्मयोगंममवीरघातात्॥ ३९॥
आर्तामनाथामपनीयमानामेवंगतांनार्हसिमामहंतुं। अहंहिमातंगविलासगामिनाप्लवंगमानामृषभेणधीमता
॥४०॥ विनावरार्होत्तमहेममालिनाचिरंनशक्ष्यामिनरेंद्रजीवितुं॥ इत्येवमुक्तस्तुविभुर्महात्मातारांसमाश्वास्यहितं
वभाषे॥ ४१॥ मावीरभार्येविमतिंकुरुष्वलोकोहिसर्वोविहितोविधात्रा। तंचैवसर्वंसुखदुःखयोगंलोकोऽब्रवीत्तेनकृतंवि

त्वमधर्मयोगमधर्मफलयोगंस्त्रीवियोगरूपंनलप्स्यसेममावधेतुलप्स्यसेएवानस्यवक्तव्यमने अचिरेणैवकालेनत्वयावीर्यवलाद्धृतासीताममशापेन
नचिरात्त्वयिवत्स्यतीति॥ ३९॥ अपनीयमानांप्रियसकाशादन्यतइतिशेषः अहंतुंनार्हसि। अपितुहंतुमेवेत्यर्थः॥ नत्वहेतुरहंहीति॥ ४०॥ वरार्होत्तमहेम
मालिनाश्रेष्ठयोग्योत्तमस्वर्णमालायता॥ ४१॥ विमतिंमरणविषयांविरुद्धमतिं। सर्वलोकोविधात्राविहितः॥ अहरादोस्त्वःतंलोकंसुखदुःखाभ्या
मवर्जनीयाभ्यांयोगोऽस्यतंतेनैवविधात्राकृतंलोकस्तेनेतिलोकोवेदोऽब्रवीत्। नहवैसशरीरस्यसतःप्रियाप्रिययोरपहतिरस्तीतिश्रुतेः॥ ४२॥

१३४

त्रयोपिलोकाःलोकत्रयवासिनोपिजनाःविधात्राविहितंविधानंनातिक्रामंतेहियतस्तस्यवशगाःब्रह्मादिस्थावरांताःवालीपरांप्रीतिंत्वत्तंवंधजांप्राप्स्यती
मन्तंकल्यान् ॥ किंचभवत्यपिवालिसंवंधजाप्रीतिंतुश्रीवसंवंधात्प्राप्स्यसि ॥ तेपुत्रोयौवराज्यंप्राप्स्यतिच ॥ चेनाहमपिशापंप्राप्स्याम्येवेति ॥ ४३ ॥ धात्रे
दंविधानंतथैवविहितं । यथामयोक्तंरुक्तंच ॥ अनेनसर्वज्ञत्वशक्तिराविष्कृता ॥ एवमीश्वरकृतंसर्वज्ञात्वाशूरपत्न्योनशोचंति ॥ ध्वनतासुखेनोपलक्षित
विरराम त्यक्तपरिदेवनाभूत् ॥ ४४ ॥ टघमानः ॥ इतिरामाभिरामेश्रीरा॰किष्किंधाकांडेचतुर्विंशःसर्गः ॥ २४ ॥ समानशोकःसुग्रीवादिभिरिति

त्रयोपिलोकाविहितंविधानंनातिक्रमंतेवशगाहितस्य ॥ प्रीतिंपरांप्राप्स्यतितांतथैवपुत्रश्चतेप्राप्स्यतियौवराज्यं ॥ ४३ ॥
धात्राविधानंविहितंतथैवनशूरपत्न्यःपरिदेवयंति ॥ आश्वासितातेनमहात्मनातुप्रभावयुक्तेनपरंतपेन ॥ ४४ ॥ सा
वीरपत्नीध्वनतामुखेनसुवेषरूपाविररामतारा ॥ ४५ ॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेकिष्किंधाकांडेचतुर्वि
शःसर्गः ॥ २४ ॥ ससुग्रीवंचतारांचसांगदांसहलक्ष्मणः ॥ समानशोकःकाकुत्स्थःसांत्वयन्निदमब्रवीत् ॥ १ ॥ नशो
कपरितापेनश्रेयसायुज्यतेमृतः ॥ यदत्रानंतरंकार्यंतत्समाधातुमर्हथ ॥ २ ॥ लोकवृत्तमनुष्ठेयंकृतंवोबाष्पमोक्ष
णं ॥ नकालादुत्तरंकिंचित्परंकर्मउपासितुं ॥ ३ ॥

((शेषः ॥ १ ॥ शोकयुक्तःपरितापस्तेनशोकश्चित्तधर्मः तज्जन्यःपरितापइंद्रियधर्मःतावन्मात्रे
णोवनमृतस्यश्रेयःसमाधातुमनुष्ठातुं ॥ २ ॥ लोकवृत्तंलोकाचारोप्यनुष्ठेयएव तच्चवाष्पमोक्षणरूपंकृतंयुष्माभिरिति यद्वाकृतंपर्याप्तंवाष्पमोक्षणमि
तिद्वितीयात्तृतीयार्थेयतःकालानंतरकर्माणिविहितात्कालादुत्तरंपरंतस्मिन्नातिक्रांतइतियावत् किंचिदपिपरंकर्मविहितंकर्मउपासितुंकर्तुमशक्यंका
लस्यापरस्ययकारणत्वात् । अकालेकृतस्याकृतप्रायत्वादितिभावः ॥ ३ ॥

कालस्यमुख्यत्वंदर्शयतिनियतिरिति नियतिः नियम्यतेनयेतिनियतिः कालः कालकृतावस्थानिमेषादिपरार्धान्ताकालस्त्वीश्वरएवलोकेलोकस्थापि
व्यवहारे कर्मणोलौकिकालौकिककर्मप्रवृत्तेर्दिनादिरूपेणकारणंकालएवसर्वभूतानांनियोगाधिकृतप्राणिमात्रस्यनियोगेषुज्योतिष्टोमादिषुनिय
निर्वसंतादिकारणं ।।४।। कालातिरिक्तंनसाक्षात्प्रवर्तकमित्याह नकर्तेत्यादि कस्यचित्स्तकथ्यादेः कश्चित्कर्त्तानानियतिनिरपेक्षः कर्त्तानतथानियो
गेनियोगानुष्ठानेपिनियतिनिरपेक्षः कश्चिदीश्वरोननियतिनिरपेक्षः कश्चिदीश्वरोननियतिनैरपेक्ष्येणसमर्थोन। यतोलोकोलोकव्यवहारःस्वभा

नियतिःकारणंलोकेनियतिःकर्म्मसाधनं।।नियतिःसर्वभूतानांनियोगेष्विहकारणम्।।४।। नकर्त्ताकस्यचित्कश्चिन्नियोगे
नापिचेश्वरः।। स्वभावेवर्ततेलोकस्तस्यकालःपरायणं।।५।।नकालःकालमत्येतिनकालःपरिहीयते।।स्वभावंचस
मासाद्यनकिंचिदतिवर्त्तते।।६।।नकालस्यास्तिवंधुत्वंनहेतुर्नपराक्रमः।।नमित्रज्ञातिसंवंधःकारणंनात्मनोवशः
।।७।।किंतुकालपरीणामोद्रष्टव्यःसाधुपश्यता।।धर्मश्चार्थश्चकामश्चकालक्रमसमाहिताः।।८।।इतःस्वांप्रकृतिंवा
लीगतःप्राप्तःक्रियाफलं।।सामदानार्थसंयोगैःपवित्रंप्लवगेश्वरः।।९।।स्वधर्मस्यचसंयोगाज्जितस्तेनमहात्मना।।स्व
र्गःपरिगृहीतश्चप्राणानपरिरक्षता।।१०।।एषावैनियतिःश्रेष्ठायांगतोहरियूथपः।।तदलंपरितापेनप्राप्तकालमु
पास्यतां।।११।।वचनांतेतुरामस्यलक्ष्मणःपरवीरहा।।अवदत्प्रश्रितंवाक्यंसुग्रीवंगतचेतसं।।१२।। ६ ।। ।।

वेश्वरसहितेप्राक्कृतस्वकर्मणिवर्त्ततेनस्वाधीनोवर्त्तते।तस्यचस्वभावस्यकालःपरायणं।सहकारीत्यर्थः।नउक्तंसत्संहितायांशिववाक्येनस्वभावादेवसं
भूतंसमस्तमितिकेचनतत्त्वामित्यनिविप्रेंद्रादेशकालाद्यपेक्षणात्।मत्तःकर्मानुरूपेणजगज्जन्मादिजायते।एवंस्वभावोविप्रेंद्राइतिवेदार्थनिर्णयः

नमयाकेवलेनापिचकेवलकर्मणा ॥ प्राणिनांकर्मपाकेनमयाचमुनिसत्तमाः ॥ जगतःसंभवोनाशःस्थितिश्चभवतिद्विजा इति ॥ ५ ॥ कालात्माभगवानेव
सर्वकृत्यप्रवर्त्तकइत्याह नकालइति ॥ कालोभगवानीश्वरः कालंस्वकृतंकालव्यवस्थांजन्ममरणादिरूपांनात्येतिनातिक्रामतिसभगवान्कालोनप
रिहीयते ॥ अनुक्षणंजगद्धानिकरस्यहानिकारणाभावात् ॥ स्वभावस्तत्कालस्सरांसमासाद्यकिंचिदप्युत्कृष्टमपिजीवजातंनातिवर्त्तते ॥ उ
त्पत्तियोगपंडत्वघातेनश्वरंनतदपत्येवेत्यर्थः ॥ ६ ॥ सचभगवान्नपक्षपातस्वभावइत्याह ॥ नकालस्येति ॥ नकालस्यबंधुत्वमस्ति ॥ प्राप्त
कालंवस्तुसर्वथासंहरत्येव ॥ ननुपक्षपातेनाकिमपित्यजतीत्यर्थः ॥ नहेतुःस्वसत्त्वेपस्वनाशेपवास्वकृतव्यवस्थातिरिक्तकारणनिरपेक्षइ
त्यर्थः ॥ यद्वाप्राप्तकालस्यसंहारनिवर्त्तनेनकश्चिदपिहेतुर्मंत्रतंत्रौषधादिः प्रभवतीत्यर्थः तस्यैवप्रपंचः नपराक्रमवतामपिकालेप्राप्तेसंहारो
भवत्येव ॥ नमित्रज्ञातिसंबंधः नबंधुमित्रता नबंधुज्ञातिता ॥ प्राप्तकालसंहारनिवर्त्तनेहेतुः सोपिभगवानात्मनः प्रत्यग्वर्गस्यजीवजातस्यन
वशात्मादिच्छाधीनोनकिंतुपरमस्वतंत्रएवतेनचभगवताकालेनाक्रियमाणोनियत्यधीनः स्वस्वकर्मपरिणामएवसर्वसुखदुःखादिलाभ
इत्येवसाधुपश्यता ॥ सुमतिनाविवेकवताद्रष्टव्योज्ञातव्यः ॥ नतुविषादहर्षौकर्त्तव्यौनापिस्वसामर्थ्यंनिंदेतेतिभावः एवंधर्मादयोपिचादय
र्मादयोपिकालक्रमेणैवसमाहिताः संपादिताभवंति ॥ ७ ॥ ८ ॥ प्रकृतमाह सामदानाभ्यामर्जितेऽर्थसंयोगेऐश्वर्येः पवित्रंश्रेष्ठंक्रियाफलं
भोगमिहलोकेप्राप्तवान्वाली इतोलोकाद्देहाद्वगतोऽपगतः स्वांप्रकृतिंगतः प्राप्तः कार्याणांकारणेलयात् ॥ एवंचेंद्रलोकंगतोवालीति
सूचितं ॥ ९ ॥ स्वधर्मस्यसंयोगात्तेनमहात्मनावालिनापूर्वस्वर्गोजितोर्जितः प्रक्रेप्राणेनपरिरक्षतेदानींपरिगृहीतश्चप्राप्तस्य ॥ १० ॥
एवानियतिः कालकृतव्यवस्थाप्राप्तिःप्राप्तकालंकर्मेतिशेषः ॥ ११ ॥ १२ ॥ श्रीरामायरामचन्द्रायनमः ॥ ॥ ॐ ॥ ॥ रामरामरामरामराम

अस्य प्रेतकार्यं कुर्वित्यन्वयः दहनं प्रति दहननिमित्तं यत्र स्वेति शेषः ॥१३॥ वालिसंस्कारनिमित्तं काष्ठानि आनेतुं समाज्ञापयेति संबंधः ॥१४॥ त्वं
सुग्रीव अंगदं समाश्वासय ॥१५॥ कः कुत्राज्ञापनीयस्तत्राह अंगदस्त्विति समनंतरमपेक्षितं ॥१६॥ तारः सचिवः संभ्रमाद्वेगात् हि

कुरु त्वमस्य सुग्रीव प्रेतकार्यमनंतरं ॥ तारांगदाभ्यां सहितो वालिनो दहनं प्रति ॥१३॥ समाज्ञापय काष्ठानि शुष्काणि च
बहूनि च ॥ चंदनानि च दिव्यानि वालिसंस्कारकारणात् ॥१४॥ समाश्वासय दीनं त्वमंगदं दीनचेतसं ॥ माभूर्वालि
शबुद्धिस्त्वं त्वद्धीनमिदं पुरं ॥१५॥ अंगदस्त्वानयेन्माल्यं वस्त्राणि विविधानि च ॥ घृतं तैलमथो गंधान्यच्चात्र
समनंतरं ॥१६॥ त्वं तार शिविकां शीघ्रमादायागच्छ संभ्रमात् ॥ त्वरा गुणवती युक्ता ह्यस्मिन्काले विशेषतः ॥१७॥
सज्जीभवंतु प्लवगाः शिविकावाहनोचिताः ॥ समर्था बलिनश्चैव निर्हरिष्यंति वालिनं ॥१८॥ एवमुक्त्वा तु सुग्रीवं
सुमित्रानंदवर्द्धनः ॥ तस्थौ भ्रातृसमीपस्थो लक्ष्मणः परवीरहा ॥१९॥ लक्ष्मणस्य वचः श्रुत्वा तारः संभ्रांतमानसः
प्रविवेश गुहां शीघ्रं शिविकासक्तमानसः ॥२०॥ आदाय शिविकां तारः स तु पर्यापयत्पुनः ॥ वानरैरुह्यमानां तां शू
रैरुद्वहनोचितैः ॥२१॥ दिव्यां भद्रासनयुतां शिविकां स्यंदनोपमां ॥ पक्षिकर्मभिराचित्रां द्रुमकर्मविभूषितां ॥२२॥

यतोऽस्मिन्काले विशेषतस्त्वरा युक्ता सैव च हे शेव सद्गुणवतीति संबंधः ॥१७॥ समर्था वालिनः शिविकावाहनोचिताः ये निर्हरिष्यंति ते सज्जीभवंत्वित्यन्वयः
निर्हारो दहनदेशनयनं ॥१८॥१९॥२०॥२१॥ भद्रासनयुतां मध्ये राजोचितमहार्हासनवतीं ॥ पक्षिप्रकृतिभिः आसमंताच्चित्रां चित्रवतीं द्रुमकर्मभिर्द्रुमप्रकृ
तिभिः आसमंताच्चित्रां चित्रवतीं द्रुमकर्मभिर्द्रुमप्रकृतिभिर्भूषितां ॥२२॥

कि

चित्रपत्रीभिश्चित्रपत्रलतिभिः दीर्घश्चार्धः सुनिविष्टां सुसन्निवेशां जालवातायनायुतां ॥ जालवन्निर्मितवातमार्गयुतां ॥ २३ ॥ सुनियुक्तां सुश्लिष्टां शि
ल्पिभिर्विशालां कृतां स्वमुक्तरीत्या सुकृतां ॥ दारुनिर्मितक्रीडापर्वतयुक्तां चारुकर्मभिः परिष्क्रियाकर्मभिः परिष्कृतां ॥ २४ ॥ नदेवाह्व वराभ
रणाहारैरितियुक्तामिति शेषः । गुहागहनशब्देन शिविकोपरि प्रसार्यमाणायंजरमुच्यते ॥ २५ ॥ २६ ॥ विनीयमानां दहनदेशमिति शेषः ।

आचितां चित्रपत्नीभिः सुनिविष्टां समन्ततः ॥ विमानमिव सिद्धानां जालवातायनायुतां ॥ २३ ॥ सुनियुक्तां विशालां च सु
कृतां शिल्पिभिः कृतां ॥ दारुपर्वतकोपेतां चारुकर्मपरिष्कृतां ॥ २४ ॥ वराभरणहारैश्च चित्रमाल्योपशोभितां ॥ गु
हागहनसंछन्नां रक्तचंदनभूषितां ॥ २५ ॥ पुष्पौघैः समभिछन्नां पद्ममालाभिरेव च ॥ तरुणादित्यवर्णाभिर्भ्राजमा
नाभिरावृतां ॥ २६ ॥ ईदृशीं शिविकां दृष्ट्वा रामो लक्ष्मणमब्रवीत् । क्षिप्रं विनीयतां वाली प्रेतकार्यं विधीयतां ॥ २७ ॥
ततो वालिनमुद्यम्य सुग्रीवः शिविकां तदा ॥ आरोपयत विक्रोशन्नंगदेन सहैव तु ॥ २८ ॥ आरोप्य शिविकां चैव वालि
नं गतजीवितं ॥ अलंकारैश्च विविधैर्माल्यैर्वस्त्रैश्च भूषितं ॥ २९ ॥ आज्ञापयत्तदा राजा सुग्रीवः प्लवगेश्वरः ॥ और्ध्वदे
हिकमार्यस्य क्रियतामनुकूलतः ॥ ३० ॥

॥ २७ ॥ उद्यम्य हस्ताभ्यां भूमेरूर्ध्वं कृत्वा ॥ २८ ॥ शिविकामारोप्य शिविकायां स्थापयित्वा ॥ २९ ॥
आज्ञापनप्रकारस्त्वौर्ध्वदेहिकमित्यादि और्ध्वदेहिकं तत्क्रियायोग्यं स्थानं ॥ अनुकूलतः नदीतीरसमीपतः क्रियतामित्युत्तरमिति द्रष्टव्यः । ३

विश्राणयंतः क्षिपंतः इत्याज्ञापयदित्यन्वयः ॥ ३१ ॥ तादृशैस्तादृग्विशेषैः सत्क्रियां कुर्वंतु ॥ ३२ ॥ ३३ ॥ प्रणिहिताः समेताः ॥ ३४ ॥ ३५ ॥ ३६ ॥
विक्रोशंतीव प्रतिध्वनिनेति शेषः ॥ जलसंवृते समंताज्जलावृतभूदेशे ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ महार्ह उत्तमभोगार्ह ॥ ४१ ॥ ४२ ॥

विश्राणयंतो रत्नानि विविधानि बहूनि च ॥ अग्रतः प्लवगा यांतु शिबिकानंतरं ॥ ३१ ॥ राज्ञामृद्धिविशेषा हि दृश्यंते भु
वि यादृशाः ॥ तादृशैरिह कुर्वंतु वानरा भर्तृसत्क्रियां ॥ ३२ ॥ तादृशं वालिनः क्षिप्रं प्राकुर्वन्नौर्ध्वदेहिकं ॥ अंगदं परिरभ्याशु
तारप्रभृतयस्तथा ॥ ३३ ॥ क्रोशंतः प्रययुः सर्वे वानरा हतबांधवाः ॥ ततः प्रणिहिताः सर्वा वानर्योऽस्य वशानुगाः ॥ ३४ ॥ चु
क्रुशुर्वीर वीरेति भूयः क्रोशंति ताः प्रियं ॥ ताराप्रभृतयः सर्वा वानर्यो हतबांधवाः ॥ ३५ ॥ अनुजग्मुश्च भर्तारं क्रोशंत्यः करुण
स्वनाः ॥ तासां रुदितशब्देन वानरीणां वनांतरे ॥ ३६ ॥ वनानि गिरयश्चैव विक्रोशंतीव सर्वतः ॥ पुलिने गिरिनद्यास्तु विवि
क्ते जलसंवृते ॥ ३७ ॥ चितां चक्रुः सुबहवो वानरा वनचारिणः ॥ अवरोप्य ततः स्कंधाच्छिबिकां वानरोत्तमाः ॥ ३८ ॥ तस्थुरेकां
तमाश्रित्य सर्वे शोकपरायणाः ॥ ततस्तारा पतिं दृष्ट्वा शिबिकातलशायिनं ॥ ३९ ॥ आरोप्यांके शिरस्तस्य विललाप सुदुःखि
ता ॥ हा वानर महाराज हा नाथ मम वत्सल ॥ ४० ॥ हा महार्ह महाबाहो हा मम प्रिय पश्य मां ॥ जनं न पश्यसीमं त्वं कस्माच्छोकाभि
पीडितं ॥ ४१ ॥ प्रहृष्टमिह ते वक्त्रं गतासोरपि मानद ॥ अस्तार्कसमवर्णं च लक्ष्यते जीवतो यथा ॥ ४२ ॥ एष त्वां रामरूपेण कालः
कर्षति वानर ॥ येन स्म विधवाः सर्वाः कृता एकेषुणा रणे ॥ ४३ ॥ इमास्तास्तव राजेंद्र वानर्योऽप्लवगास्तव ॥ पादैर्विकृष्टमध्वा
नमागताः किं न बुध्यसे ॥ ४४ ॥

रणे सुग्रीवेण सह युक्ते ॥ ४३ ॥ अप्लवगाः प्लुतगतिमजानंत्यः विकृष्टं दूरं ॥ ४४ ॥ रामाय रामचंद्राय नमः श्रीकृष्णाय वासुदेवाय नमः ॥ ६१ ॥ ६१ ॥ ४४

137

४५।४६॥ यथापुरंयथापूर्वंक्रीडामहेस्वपासहेतिविलतापेतिशेषः।४७।४८॥४९॥ अपसव्यंअपसव्यप्रदक्षिणं॥५०॥ विधिवत्।देवांशत्वेनतस्यसंमतवेदत्वात्ज्ञा
नवन्निर्यद्देहाचितविधिवदित्यर्थः विधिवत्अग्निहोत्रविधिनेत्यर्थ इत्यन्ये॥५१॥५२॥ प्रेतकार्याणिजलस्नानादिरूपाणिअकारयत्।नादितिकर्तव्यताज्ञ

नवेक्ष्यन्तुत्थैवेमाभार्याश्चंद्रनिभाननाः॥ इदानींनेक्षसेकस्मात्सुग्रीवंप्लवगेश्वर॥४५॥ एतेहिसचिवाराजंस्तारप्रभृतयस्तव।पुर
वासिजनश्चायंपरिवार्यविषीदति॥४६॥ विसर्जयैनान्सचिवान्यथापुरमरिंदम॥ ततःक्रीडामहेसर्वावनेषुमदनोत्कटाः
४७॥ एवंविलपतींतारांपतिशोकपरिप्लुतां॥ उत्थापयंतिस्मतदावानर्यःशोककर्षिताः॥४८॥ सुग्रीवेणततःसार्द्धंसोंगदः
पितरंरुदन्॥ चितामारोपयामासशोकेनाभिप्लुतेंद्रियः॥४९॥ ततोग्निंविधिवद्दत्वासोपसव्यंचकारह॥ पितरंदीर्घमध्वा
नंप्रस्थितंव्याकुलेंद्रियः॥५०॥ संस्कृत्यवालिनंतंतुविधिवत्प्लवगर्षभाः॥ आजग्मुरुदकंकर्तुंनदींशुभजलांशिवां॥५१॥
ततस्तेसहितास्तत्रअंगदंस्थाप्यचाग्रतः॥ सुग्रीवतारासहिताःसिषिचुर्वानराजलं॥५२॥ सुग्रीवेणैवदीनेनदीनोभू
त्वामहाबलः॥ समानशोकःकाकुत्स्थःप्रेतकार्याण्यकारयत्॥५३॥ ततोथतंवालिनमग्र्यपौरुषंप्रकाशमिक्ष्वाकुवरे
षुणाहतं॥ प्रदीप्यदीप्ताग्निसमौजसंतदासलक्ष्मणंराममुपेयिवान्हरिः॥५४॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडे
पंचविंशःसर्गः॥२५॥

पदिष्टवानित्यर्थः॥५३॥५४॥ धर्मसाराः॥ इतिरामाभिरामेश्रीरामीयरामायणतिलकेकिष्किंधाकांडेपंचविंशःसर्गः॥२५॥ ६॥

॥ वा·रा·किं·॥
॥ ६१ ॥

क्लिन्नवाससमार्द्रवाससं ॥ शाखामृगमहामात्राः वानरबलप्रधानाः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ५ ॥ कार्याणि राजकार्याणि ॥ यथाविधिस्नानः राज्याभिषेकाभिषि

ततः शोकाभिसंतप्तं सुग्रीवं क्लिन्नवाससं ॥ शाखामृगमहामात्राः परिवार्योपतस्थिरे ॥ १ ॥ अभिगम्य महाबाहुं राममक्लिष्ट
कारिणं ॥ स्थिताः प्रांजलयः सर्वे पितामहमिवर्षयः ॥ २ ॥ ततः कांचनशैलाभस्तरुणार्कनिभाननः ॥ अब्रवीत्प्रांजलिर्वाक्यं
हनूमान्मारुतात्मजः ॥ ३ ॥ भवत्प्रसादात्काकुत्स्थ पितृपैतामहं महत् ॥ वानराणां सुदुष्प्रापं संपन्नबलशालिनां ॥ ४ ॥ म
हात्मनां सुदुष्प्रापं प्राप्तं राज्यमिदं प्रभो ॥ भवता समनुज्ञातः प्रविश्य नगरं शुभं ॥ ५ ॥ संविधास्यति कार्याणि सर्वाणि स
सुहृद्गणः ॥ स्नातोयं विविधैर्गंधैरौषधैश्च यथाविधि ॥ ६ ॥ अर्चयिष्यति माल्यैश्च रत्नैश्च त्वां विशेषतः ॥ इमां गि
रिगुहां रम्यामभिगंतुं त्वमर्हसि ॥ ७ ॥ कुरुष्व स्वामिसंबंधं वानरान्संप्रहर्षय ॥ एवमुक्तो हनुमता राघवः परवीर
हा ॥ ८ ॥ प्रत्युवाच हनूमंतं बुद्धिमान्वाक्यकोविदः ॥ चतुर्दश समाः सौम्य ग्रामं वा यदि वा पुरं ॥ ९ ॥ न प्रवेक्ष्यामि हनुमन्
पितुर्निर्देशपारगः ॥ सुसमृद्धां गुहां दिव्यां सुग्रीवो वानरर्षभः ॥ १० ॥ प्रविष्टो विधिवद्वीरः क्षिप्रं राज्येभिषिच्यतां ॥ एवमु
क्त्वा हनूमंतं रामः सुग्रीवमब्रवीत् ॥ ११ ॥ वृत्तज्ञो वृत्तसंपन्नमुदारबलविक्रमं ॥ इममप्यंगदं वीरं यौवराज्येभिषेचय ॥ १२ ॥

क्तः ॥ ६ ॥ ७ ॥ स्वामिसंबंधः वानरस्वामिसंबंधं सुग्रीवस्य राज्याभिषेके सोनिशेषः ॥ ८ ॥ ९ ॥ १० ॥ अभिषिच्यतां महाराजत्वायेतिशेषः ॥ ११ ॥ १२ ॥

यतो ज्येष्ठस्य ज्येष्ठः सुतो विक्रमेण ज्येष्ठस्य सदृशश्च तस्माद्यौवराज्ये योग्यः ॥ १३ ॥

॥ राम· ॥
॥ ६१ ॥

138

१२ ॥ सीतान्वेषणोद्योगं सुग्रीवस्यालक्ष्याह ॥ पूर्वोयमिति ये चत्वारो वार्षिकसंज्ञकाः प्रवृत्तास्तेषामयं पूर्व इति योजना ॥ १४ ॥ १५ ॥ युक्तमारुता मारुतेन युक्तेत्यर्थः
अस्यास्थास्यामीति शेषः ॥ १६ ॥ यत यतस्व एष नः समय इति ॥ आश्विनेऽतीते यत्नारंभरूपः संकेत इत्यर्थः ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ मूर्ध्ना प्रणाम्य नम्रीभू

ज्येष्ठस्य हि सुतो ज्येष्ठः सदृशो विक्रमेण च ॥ अंगदोयमदीनात्मा यौवराज्यस्य भाजनं ॥ १३ ॥ पूर्वोयं वार्षिको मासः श्रावणः
सलिलागमः ॥ प्रवृत्ताः सौम्य चत्वारो मासा वार्षिकसंज्ञिताः ॥ १४ ॥ नायमुद्योगसमयः प्रविश त्वं पुरीं शुभां ॥ अस्मिन्वत्स्याम्य
हं सौम्य पर्वते सहलक्ष्मणः ॥ १५ ॥ इयं गिरिगुहा रम्या विशाला युक्तमारुता ॥ प्रभूतसलिला सौम्य प्रभूतकमलोत्पला
॥ १६ ॥ कार्त्तिके समनुप्राप्ते त्वं रावणवधे यत ॥ एष नः समयः सौम्य प्रविश त्वं स्वमालयं ॥ १७ ॥ अभिषिंचस्व राज्ये च सु
हृदः संप्रहर्षय ॥ इति रामाभ्यनुज्ञातः सुग्रीवो वानरर्षभः ॥ १८ ॥ प्रविवेश पुरीं रम्यां किष्किंधां वालिपालितां ॥ तं वान
रसहस्राणि प्रविष्टं वानरेश्वरं ॥ १९ ॥ अभिवार्य प्रविष्टानि सर्वतः प्लवगेश्वरं ॥ ततः प्रकृतयः सर्वा दृष्ट्वा हरिगणे
श्वरं ॥ २० ॥ प्रणाम्य मूर्ध्ना पतिता वसुधायां समाहिताः ॥ सुग्रीवः प्रकृतीः सर्वाः संभाष्योत्थाप्य वीर्यवान् ॥ २१ ॥ भ्रातुर
न्तःपुरं सौम्यं प्रविवेश महाबलः ॥ प्रविष्टं भीमविक्रांतं सुग्रीवं वानरर्षभं ॥ २२ ॥

य वसुधायां दंडवत् पतिताः उत्थाप्य वसुधायां पतिता
निति शेषः ॥ २१ ॥ प्रविष्टं भीमविक्रांतमिति प्रविशंतं वाभिनिष्क्रांतमिति पाठे प्रविशन्तः पुरजनकोशादिकं दृष्ट्वाऽभिषेकायनुपुनः प्रतिनिवृत्तं सभाम
गतमित्यर्थः ॥ २२ ॥

२३ ॥ २४ ॥ क्षीरवृक्षप्ररोहा न्यग्रोधादयः ॥ २५ ॥ गंधान् गंधद्रव्याणि ॥ २६ ॥ २७ ॥ समालंभनं अनुलेपनद्रव्यं तदेवाह गोरोचनमित्यादि ॥ २८ ॥ २९ ॥ ततः कुशानि ॥ अनेनाग्निसाध्यकर्माधिकारं तेषां दर्शयति मनुष्यसदृशसर्वव्यवहारान्वेदज्ञत्वाच्च ॥ ३० ॥ ३१ ॥ मंत्रैः स्थापयित्वा ॥ वसवस्त्वा गायत्रेण

अभ्यषिंचंस्तु सुहृदः सहस्राक्षमिवामराः ॥ तस्य पांडुरमाजह्रुः छत्रं हेमपरिष्कृतं ॥ २३ ॥ शुक्ले च वालव्यजने हेमदंडे यशस्करे· तथा रत्नानि सर्वाणि सर्ववीजौषधानि च ॥ २४ ॥ सक्षीराणां च वृक्षाणां प्ररोहान् कुसुमानि च ॥ शुक्लानि चैव वस्त्राणि श्वेतं चैवानुलेपनं ॥ २५ ॥ सुगंधीनि च माल्यानि स्थलजान्यंबुजानि च ॥ चंदनानि च दिव्यानि गंधांश्च विविधान्बहून् ॥ २६ ॥ अक्षतं जातरूपं च प्रियंगुमधुसर्पिषी ॥ दधि चर्म च वैयाघ्रं परार्ध्यं वाप्युपानहौ ॥ २७ ॥ समालंभनमादाय गोरोचनमनःशिलां आजग्मुस्तत्र मुदिता वराः कन्याश्च षोडश ॥ २८ ॥ ततस्ते वानरश्रेष्ठमभिषिच्य यथाविधि ॥ रत्नैर्वस्त्रैश्च भक्ष्यैश्च तोषयित्वा द्विजर्षभान् ॥ २९ ॥ ततः कुशपरिस्तीर्णं समिद्धं जातवेदसं ॥ मंत्रपूतेन हविषा हुत्वा मंत्रविदो जनाः ॥ ३० ॥ ततो हेमप्रतिष्ठाने वरास्तरणसंवृते ॥ प्रासादशिखरे रम्ये चित्रमाल्योपशोभिते ॥ ३१ ॥ शास्त्रदृष्टविधिवन्मंत्रैः स्थापयित्वा वरासने· नदीनदेभ्यः संहृत्य तीर्थेभ्यश्च समंततः ॥ ३२ ॥ आहृत्य च समुद्रेभ्यः सर्वेभ्यो वानरर्षभाः ॥ अपः कनककुंभेषु निधाय विमलं जलं ॥ ३३ ॥ शुभैर्वृषभशृंगैश्च कलशैश्चैव कांचनैः ॥ शास्त्रदृष्टेन विधिना महर्षिविहितेन च ॥ ३४ ॥ ॥ ६ ॥ ॥

छंदसेत्यादिमंत्रैरासनेस्थापयित्वेत्यर्थः ॥ ३२ ॥ आपश्चाहृत्य मिलिताः कृत्वा विमलं जलं कुंभेषु निधायेति संबंधः ॥ ३३ ॥ महर्षिविहितेन बोधायनादि

139

॥ ३४ ॥ [illegible]

३५॥३६॥हृष्टाःप्रचुक्रुशुःकिलकिलाशब्दंकृतवंतः॥३७॥३८॥३९॥नादृशेनत्रवार्त्तानि॥अभिषिक्तेसुग्रीवेअंगदेच॥नत्रकिष्किंधायांवार्तेनिवर्त्ती
मानेसतीत्यर्थः॥४०॥४१॥४२॥रवमानः॥इतिरामाभिरामेश्रीरा०रा०ति०किष्किंधाकांडेषड्विंशःसर्गः॥२६॥गुहांकिष्किंधाख्यांप्र

गजोगवाक्षोगवयःशरभोगंधमादनः॥मैंदश्चद्विविदश्चैवहनूमान्जांबवांस्तथा॥३५॥अभ्यषिंचंतसुग्रीवंप्रसन्ने
नसुगंधिना॥सलिलेनसहस्राक्षंवसवोवासवंयथा॥३६॥अभिषिक्तेतुसुग्रीवेसर्वेवानरपुंगवाः॥प्रचुक्रुशुर्महा
त्मानोहृष्टाःशतसहस्रशः॥३७॥रामस्यतुवचःकुर्वन्सुग्रीवोवानरेश्वरः॥अंगदंसंपरिष्वज्ययौवराज्येभ्यषेचय
त्॥३८॥अंगदेचाभिषिक्तेतुसानुक्रोशाःप्लवंगमाः॥साधुसाध्वितिसुग्रीवंमहात्मानोह्यपूजयन्॥३९॥रामंचैवम
हात्मानंलक्ष्मणंचपुनःपुनः॥प्रीताश्चतुष्टुवुःसर्वेनादृशेतत्रवर्त्तिनि॥४०॥हृष्टपुष्टजनाकीर्णापताकाध्वजशो
भिता॥बभूवनगरीरम्याकिष्किंधागिरिगह्वरे॥४१॥निवेद्यरामायतदामहात्मनेमहाभिषेकंकपिवाहिनीपतिः
रुमांचभार्यांसुपलभ्यवीर्यवानवापराज्यंत्रिदशाधिपोयथा॥४२॥इत्यार्षेश्रीमद्रामायणेवा०किष्किंधाकांडेष
ड्विंशःसर्गः॥२६॥अभिषिक्तेतुसुग्रीवेप्रविष्टेवानरेगुहां॥आजगामसहभ्रात्रारामःप्रस्रवणंगिरिं॥१॥शार्दूल
मृगसंघुष्टंसिंहैर्भीमरवैर्वृतं॥नानागुल्मलतागूढंबहुपादपसंकुलं॥२॥ श्रीकृष्णार्पणमस्तु॥ छ ॥

प्रस्रवणंतदाख्यं॥१॥गिरिवर्णनंशार्दूलेति॥२॥श्रीरामायरामभद्रायनमः श्रीकृष्णायवासुदेवायनमः॥ छ ॥रामरामरामरामः॥

३॥ प्रस्रवणप्रस्रवणहीन्॥४॥ समयं पूर्वोक्तं॥ कालयुक्तं तत्कालोचितं॥५॥ युक्तमारुताउचितवाता॥६॥ वर्षरात्रं जातानां वेकवचनं वार्षिकामासाइत्यर्थ
:॥७॥ नदीसंवंधिदर्दुरैः संयुतं वृक्षखंडैश्चात्यसुंदरं॥८॥९॥१०॥ गुहायानानि हरेभविष्यति॥ भाविवारिपूरप्रव्यास्तु हासमीपवर्तिनीभविष्य

ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितं॥ मेघराशिनिभं शैलं नित्यं शुचिकरं शिवं॥३॥ तस्य शैलस्य शिखरे महतीमायतां गु
हां॥ प्रत्यगृह्णत वासार्थं रामः सौमित्रिणा सह॥४॥ कृत्वा च समयं रामः सुग्रीवेण सहानघः॥ कालयुक्तं महद्वाक्यमुवा
च रघुनंदनः॥५॥ विनीतं भ्रातरं भ्राता लक्ष्मणं लक्ष्मिवर्द्धनं॥ इयं गिरिगुहा रम्या विशाला युक्तमारुता॥६॥
अस्यां वस्याम सौमित्रे वर्षरात्रमरिंदम॥ गिरिशृंगमिदं रम्यमुत्तमं पार्थिवात्मज॥७॥ श्वेताभिः कृष्णताम्राभिः शि
लाभिरुपशोभितं॥ नानाधातुसमाकीर्णं नदीदर्दुरसंयुतं॥८॥ विविधैर्वृक्षखंडैश्च चारुचित्रलतायुतं॥ नानावि
हगसंघुष्टं मयूरवरनादितं॥९॥ मालतीकुंदगुल्मैश्च सिंदुवारैः शिरीषकैः॥ कदंबार्जुनसर्जैश्च पुष्पितैरुपशो
भितं॥१०॥ इयं च नलिनी रम्या फुल्लपंकजमंडिता॥ नातिदूरे गुहाया नौ भविष्यति नृपात्मज॥११॥ प्रागुदक्प्रवणे
देशे गुहा साधु भविष्यति॥ पश्चाच्चैवोन्नता सौम्य निवातेयं भविष्यति॥१२॥

॥नीत्यर्थः॥११॥ प्रागुदक्प्रवणो ईशानादिक्नम्रवति देशे वर्त
मानागुहा साधुसम्यग्भविष्यति सुखसाधनमिति शेषः॥ पौरस्त्यवर्षवातप्रवेशाभावाच्च साधुत्वं वायव्यं नेनानिर्लानिवारत्वं कल्पितं पश्चाद्भागे चैवोन्न
ताः अतस्तत्रोत्तरोवातनिरोधकत्वान्निवाताच॥१२॥

गुहाद्वारे इति॥ तेन वहिरूपवेशनसौकर्यं॥१३॥ उत्तरत उत्तरभागे॥१४॥ श्वेतमिवांवरं श्वेतवस्त्रमिवस्थितं॥ श्वेतामिवापरमिति पाठेऽपरश्रृंगं श्वेत
मिवरूप्यमिवस्थितमित्यर्थः॥१५॥ त्रिकूटे॥ पूर्वोषितत्रिकूटाचलेजाह्नवीसदृशी मंदाकिन्याख्यानदी॥१६॥ अतिमुक्तः पुंड्रकः पद्मकस्त्वद

गुहाद्वारे वसौमित्रे शिलासमतला शिवा॥ कृत्स्ना चैवायता चैव भिन्नांजनचयोपमा॥१३॥ गिरेः श्रृंगमिदं तात पश्य चो
त्तरतः शुभं॥ भिन्नांजनचयाकारमंभोधरमिवोदितं॥१४॥ दक्षिणास्यामपि दिशि स्थितं श्वेतमिवांवरं॥ कैलासशिख
रप्रख्यं नानाधातुविराजितं॥१५॥ प्राचीनवाहिनीं चैव नदीं भृशमकर्दमां॥ गुहायाः पुरतः पश्य त्रिकूटे जाह्नवीमिव
॥१६॥ चंदनैस्तिलकैः सालैस्तमालैरतिमुक्तकैः॥ पद्मकैः सरलैश्चैव अशोकैश्चैव शोभितां॥१७॥ वानीरैस्तिमिदैश्चै
व वकुलैः केतकैरपि॥ हिंतालैस्तिनिशैर्नीपैर्वेतसैः कृतमालकैः॥१८॥ तीरजैः शोभिता भाति नानारूपैस्ततस्ततः
वसनाभरणोपेता प्रमदेवाभ्यलंकृता॥१९॥ शतशः पक्षिसंघैश्च नानानादविनादिता॥ एकैकमनुरक्तैश्च चक्र
वाकैरलंकृता॥२०॥ पुलिनैरतिरम्यैश्च हंससारससेविता॥ प्रहसंत्येव भात्येषा नानारत्नसमन्विता॥२१॥ क्व
चिद्भाति शुक्लैश्च दिव्यैः कुमुदकुड्मलैः॥२२॥ पारिप्लवशतैर्जुष्टा वर्हिक्रौंचविनादिता॥ रमणीया नदी सौम्या मुनिसंघ
निषेविता॥२३॥ पश्य चंदनवृक्षाणां पंक्तीः सुरुचिरा इव॥ ककुभानां चदृश्यंते मनसैवोदिताः समं॥२४॥

॥नमेदः सरलः पीतद्रुमः॥१७॥
॥१८॥१९॥ एकैकमनुरक्तैः परस्परानुरागयुक्तैः॥२०॥२१॥२२॥ पारिप्लवाः जलपक्षिणः॥२३॥ सुरुचिरा इव इवोऽप्यर्थे॥ शोभमानाश्चंदनवृक्षपंक्तीरपि पश्य मनसा
संकल्पेन सममेवोदिताः ककुभानां वृक्षविशेषाणां पंक्तय इति शेषः॥२४॥

कचिन्नीलोत्पलैश्छन्ना भातिरक्तोत्पलैः कचित्॥

२५॥२६॥नातिदूरत्वगमकंगीतेत्यादिमृदंगाडंबरैःमृदंगशब्दैः॥२७॥२८॥बहूनिदृश्यानिउत्तमवस्तूनियत्रतादृशःकुंजाश्रयास्मिन्निगिरिविशेषरां
२९॥वञ्जद्वेसुखसाधनवञ्जद्वयवानिरतिःसुखं॥३०॥उदयेउदयपर्वतेऽभ्युदितंउदयंप्राप्तं॥३१॥३२॥अनुनयंअनुनयवत्॥३३॥व्यथांगत्वा

अहोसुरमणीयोयंदेशःशत्रुनिषूदन॥दृढंरंस्यावसौमित्रेसाध्वत्रनिवसामहे॥२५॥इतश्चनातिदूरेसाकिष्किंधाचि
त्रकानना॥सुग्रीवस्यपुरीरम्याभविष्यतिनृपात्मज॥२६॥गीतवादित्रनिर्घोषःश्रूयतेजयतांवर नदतांवानरा
णांचमृदंगाडंबरैःसह॥२७॥लब्ध्वाभार्यांकपिवरःप्राप्यराज्यंसुहृद्वृतः॥ध्रुवंनंदतिसुग्रीवःसंप्राप्यमहतींश्रियं॥२८॥
इत्युक्त्वान्यवसत्तत्रराघवः॥सहलक्ष्मणः॥बहुदृश्यदरीकुंजेतस्मिन्प्रस्रवणेगिरौ॥२९॥सुसुखेहिबहुद्रव्येतस्मि
न्हिधरणीधरे॥वसतस्तस्यरामस्यरतिरल्पापिनाभवत्॥३०॥हृतांहिभार्यांस्मरतःप्राणेभ्योपिगरीयसीं॥उद
याभ्युदितंदृष्ट्वाशशांकंसविशेषतः॥३१॥आविवेशनतंनिद्रानिशासुशयनंगतं॥तत्समुत्थेनशोकेनबाष्पो
पहतचेतसं॥३२॥तंशोचमानंकाकुत्स्थंनित्यंशोकपरायणं॥तुल्यदुःखोब्रवीद्भ्रातालक्ष्मणोनुनयंवचः॥३३॥
अलंवीरव्यथांगत्वानत्वंशोचितुमर्हसि॥शोचतोह्यवसीदंतिसर्वार्थाविदितंहिते॥३४॥भवान्क्रियापरोलोकेभवान्दे
वपरायणः॥आस्तिकोधर्मशीलश्चव्यवसायीचराघव॥३५॥नह्यव्यवसितःशत्रुंराक्षसंतंविशेषतः॥समर्थस्त्वंरणे·

॥२६॥
हंतुंविक्रमेजिह्मकारिणं

लंव्यथामास्त्वित्यर्थः॥३४॥क्रियापरोनित्यकर्मानुष्ठाताःदेवपूजकःव्यवसायीउद्यमी॥३५॥अव्यवसितःशोकेनोद्यमहीनस्त्वंहंतुंनसमर्थःविक्रमेवि
क्रमस्थानेरणे॥जिह्मकारिणांकुटिलं॥३६॥

अतः शोकं समुन्मूलय व्यवसायस्तूद्योगं ॥ ३७ ॥ परिवर्तनमधरोत्तरीकरणं ॥ ३८ ॥ ३९ ॥ दीप्तैर्दीपकैर्वा कौरिति शेषः काले होमकाले ॥ ४० ॥ ४१ ॥ अनुर-
क्तेनानुरागयुतेन स्निग्धेन मत्कालोचितप्रियपरेण हितेनोदर्के हितैषिणा ॥ सत्यविक्रमयुक्तेनामोघविक्रमयुक्तेन ॥ ४२ ॥ विक्रमकालेषु तेज-
ः सहजमिति शेषः प्रोत्साहयामि वर्धयामि ॥ अधुनाच्छन्नमिव मन्दिति भावः ॥ ४३ ॥ शरत्कालं तत्रान्तं सुग्रीवस्य प्रसादं ॥ चित्तसौमन-

समुन्मूलय शोकं त्वं व्यवसायं स्थिरीकुरु ॥ ततः सपरिवारं तं राक्षसं हन्तुमर्हसि ॥ ३७ ॥ पृथिवीमपि काकुत्स्थ ससागर-
वनाचलां ॥ परिवर्तयितुं शक्तः किं पुनस्तं हि रावणं ॥ ३८ ॥ शरत्कालं प्रतीक्षस्व प्रावृट्कालोयमागतः ॥ ततः सराष्ट्रं
सगणं रावणं तं वधिष्यसि ॥ ३९ ॥ अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये ॥ दीप्तैराहुतिभिः काले भस्मच्छन्नमिवानलं
॥ ४० ॥ लक्ष्मणस्य हि तद्वाक्यं प्रतिपूज्य हितं शुभं ॥ राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत् ॥ ४१ ॥ वाच्यं यदनुरक्तेन स्नि-
ग्धेन च हितेन च ॥ सत्यविक्रमयुक्तेन तदुक्तं लक्ष्मण त्वया ॥ ४२ ॥ एष शोकः परित्यक्तः सर्वकार्यावसादकः ॥ विक्र-
मेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहं ॥ ४३ ॥ शरत्कालं प्रतीक्षिष्ये स्थितोस्मि वचने तव ॥ सुग्रीवस्य नदीनां च प्रसाद-
मनुपालयन् ॥ ४४ ॥ उपकारेण वीरस्तु प्रतिकारेण युज्यते ॥ अकृतज्ञोऽप्रतिकृतो हन्ति सत्त्ववतां मनः ॥ ४५ ॥

स्य नदीनां चामलोदकत्वरूपं ॥ ४४ ॥ उपकारेणोपकृतो वीरोऽवश्यं प्रतिकारेण प्रत्युपकारेण युज्यते ॥ केनचित्कृतोपकारो वीर एव हृष्टोऽवश्यं प्रत्युप-
कारोचितमेवेति भावः कृतमेवं निश्चयस्तत्राह ॥ अकृतज्ञोऽभूत्वा यद्यप्रतिकृतोऽकृतप्रत्युपक्रियोऽभवति तदा सत्त्ववतामस्मादृशां मनो हरति ॥ मै-

त्रीं नाशयन्त्येवातो मित्रत्वादवश्यं स प्रत्युपकर्तेति भावः ॥ ४५ ॥

नदेवस्तमवाक्यमेवप्रुक्तं॥प्रणिधायनिश्चित्यआत्मनःशुभंदर्शनंशुभांबुद्धिंप्रदर्शयन्नुवाच॥४६॥जलप्रपातंवर्षाकालंप्तनःस्थिरनिश्चयः॥४७॥किं
सुग्रीवेणैवरावणंहनिष्यामीत्येवंक्रुद्धंराममालक्ष्याह॥नियम्येति॥शारत्प्रतनदंतःसंवर्तयन्नुक्तकालंलक्षयन्॥४८॥हद्यमानः॥इतिरामा
भिरामेश्रीरा०किष्किंधाकांडेसप्तविंशःसर्गः॥२७॥ततदेति॥१॥सविराहिप्रमाथकःसकलत्राह॥अयजलागमःसमयःसप्रहन्नलंसंप

नदेवयुक्तंप्रणिधायलक्ष्मणःकृतांजलिस्तत्प्रतिपूज्यभाषितं॥उवाचरामंस्वभिरामदर्शनंप्रदर्शयंदर्शनमात्मनः
शुभं॥४६॥यथोक्तमेतत्तवसर्वमीप्सितंनरेंद्रकर्त्तानविराद्धिवानरः॥शरत्प्रतीक्षःक्षमतामिमंभवान्जलप्रपातंरि
पुनिग्रहेधृतः॥४७॥नियम्यकोपंपरिपाल्यतांशरत्क्षमस्वमासांश्चतुरोमयासह॥वसाचलेस्मिन्मृगराजसेवि
तेसंवर्तयन्शत्रुवधेसमर्थः॥४८॥इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेसप्तविंशःसर्गः॥२७॥सतदावालिनं
हत्वासुग्रीवमभिषिच्यच॥वसन्माल्यवतःपृष्ठेरामोलक्ष्मणमब्रवीत्॥१॥अयंसकालःसंप्राप्तःसमयोद्यजलाग
मः॥संपश्यत्वंनभोमेघैःसंवृतंगिरिसन्निभैः॥२॥नवमासधृतंगर्भंभास्करस्यगभस्तिभिः॥पीत्वारसंसमुद्राणां
द्यौःप्रसूतेरसायनं॥३॥शक्यमंबरमारुह्यमेघसोपानपंक्तिभिः॥कुटजार्जुनमालाभिरलंकर्तुंदिवाकरः॥४॥

श्य॥नभआकाशं॥२॥समुद्राणांरसंजलंभास्करस्यगभस्तिभिर्द्यौःपीत्वाकार्त्तिकादिनवमासधृतंगर्भंजलरूपंरसायनंलोकजीवातुभूतंप्रसूते
त्यजतिगर्भमहात्म्यात्समुद्रस्यक्षारस्यापिस्वादुता॥३॥दिवाकरोलंकर्तुंशक्यंसुकरइत्यर्थः॥४॥श्रीरामायरामचंद्रायनमः॥६॥

संध्यारागोन्विते उद्भिन्नसंध्यारागैरक्तएव ताम्रैरक्तैरुपर्यंतभागेषु श्वेतैः स्निग्धैः किंचिज्जलसंबंधात् । अभ्रपटच्छेदैः अभ्ररूपैः छिन्नपटैः वद्धव्रणामिवेत्युत्प्रे-
क्षा ॥ ५ ॥ मंदमारुतएव निश्वासो यस्य तत् ॥ संध्यारूपेण चंदनेन हरिचंदनेन रंजितं । आपाण्डु ईषत्पाण्डु जलप्रदं ॥ जलदस्थाने कामातुरस्य कपो-
लादि ॥ ६ ॥ घर्मेण रविलेजसा परिक्लिष्टा संतप्ता वाष्पमूष्माणं वाष्पं नेत्रजलं च ॥ ७ ॥ मेघैः स्वोदराद्विनिर्मुक्ता इति मंदता कर्पूरलिप्त

संध्यारागोत्थितैस्ताम्रैरंतेष्वपि च पांडुभिः । स्निग्धैरभ्रपटच्छेदैर्वद्धव्रणमिवांवरं ॥ ५ ॥ मंदमारुतनिश्वासं संध्याचं-
दनरंजितं ॥ आपांडुजलदं भाति कामातुरमिवांवरं ॥ ६ ॥ एषा घर्मपरिक्लिष्टा नववारिपरिप्लुता ॥ सीतेव शोकसं-
तप्ता मही वाष्पं विमुंचति ॥ ७ ॥ मेघोदरविनिर्मुक्ताः कर्पूरदलशीतलाः । शक्यमंजलिभिः पातुं वाताः केतकगंधि-
नः ॥ ८ ॥ एष फुल्लार्जुनः शैलः केतकैरभिवासितः । सुग्रीव इव शांतारिर्धाराभिरभिषिच्यते ॥ ९ ॥ मेघकृष्णाजि-
नधरा धारायज्ञोपवीतिनः । मारुतापूरितगुहाः प्राधीता इव पर्वताः ॥ १० ॥ कशाभिरिव हैमीभिर्विद्युद्भिरभिताडि-
तं ॥ अंतस्तनितनिर्घोषं सवेदनमिवांवरं ॥ ११ ॥ नीलमेघाश्रिता विद्युत्स्फुरंती प्रतिभाति मे । स्फुरंती रावणस्यांके वैदेहीव तपस्विनी ॥ १२ ॥

दलवच्छीतलाः केतकगंधिनो वाताः अंजलिभिः पातुमित्यादरातिशयोक्तिः । जलवत्कांतिहरत्वाच्च ॥ ८ ॥ फुल्लाः पुष्पिता अर्जुना यस्मिन् धाराः
जलधराः अत्र शैलस्यारिर्वनदाहकत्वाद्दावाग्निः ॥ ९ ॥ धाराः वर्षधारास्तद्रूपयज्ञोपवीतधराः । मारुतापूरितत्वनशब्दवंतः प्राधीताः उपक्रां-
ताध्ययना वटइवेत्यर्थः ॥ १० ॥ अंतर्गतस्तनितरूपा निर्घोषः कशाप्रहारैः क्रियमाणः शब्दो यस्य तत् सवेदनमिव सोत्तमाश्वमिति शेषः ॥
॥ ११ ॥ १२ ॥

घनैरनुलिप्ता इवातएवनष्टग्रहरूपाग्रहादयोयासुताः प्रतिहताः प्रतिहतप्राचीत्वादिज्ञानाः ॥ इमादिशोमन्मथवतां मन्मथोत्सवसाधनप्रियासहितानां हि
ताः सुखजनिकाः ॥१३॥ बाष्पाभिसंरुद्धान् ॥ नववारिसेकजनिकाः ॥१३॥ बाष्पाभिसंरुद्धान् ॥ नववारिसेकजमहीसमुद्भूतोष्मणावृतान् ॥ वर्षोपा
आगमेनसमुत्सुकान् सहर्षान् ॥ तानुद्भास्थितानित्यन्वयः ॥१४॥ सहिमः सशीतः निदाघस्यग्रीष्मस्यदोषप्रसरास्तापादयः स्थितास्तेषां निह

इमास्तामन्मथवतांहिताः प्रतिहतादिशः ॥ अनुलिप्ताइवघनैर्नष्टग्रहनिशाकराः ॥१३॥ क्वचिद्बाष्पाभिसंरुद्धान्वर्षागमसमु
त्सुकान् ॥ कुटजान्पश्यसौमित्रेपुष्पितान्गिरिसानुषु ॥ ममशोकाभिभूतस्यकामसंदीपनान्स्थितान् ॥१४॥ रजः प्रशान्तंस
हिमोद्यवायुर्निदाघदोषप्रसराः प्रशान्ताः ॥ स्थिताहियात्रावसुधाधिपानांप्रवासिनोयान्तिनराः स्वदेशान् ॥१५॥ संप्रस्थिता
मानसवासलुब्धाः प्रियान्विताः संप्रतिचक्रवाकाः ॥ अभीक्ष्णवर्षोदकविक्षतेषुयानानिमार्गेषुनसंपतन्ति ॥१६॥ क्वचि
त्प्रकाशंक्वचिदप्रकाशंनभः प्रकीर्णाम्बुधरंविभाति ॥ क्वचित्क्वचित्पर्वतसंनिरुद्धंरूपंयथाशान्तमहार्णवस्य ॥१७॥ व्यामि
श्रितंसर्जकदंबपुष्पैः नवंजलंपर्वतधातुताम्रं ॥ मयूरकेकाभिरनुप्रयातंशैलापगाः शीघ्रतरंवहन्ति ॥१८॥ ॥

त्रेतियावत् ॥ स्वदेशान्यान्तिप्रियाविप्रयुक्तैः स्थातुमशक्यत्वात् ॥ १५ ॥ मानसंसरः ॥ अभीक्ष्णमतिशयितं ॥ यद्वर्षोदकंतेनाविक्षतेषुक्लिष्टगमने
षुमार्गेष्वितिशेषः ॥ यानानिरथादीनिनसंपतन्तिनगच्छन्ति ॥ १६ ॥ शान्तमहार्णवस्यनिस्तरंगसमुद्रस्य ॥१७॥ सर्जादिपुष्पैः मिश्रंपर्वतसं
बंधिधातुभिस्ताम्रंताम्रवर्णंमयूरशब्दैरनुप्रयातंअनुसृतंजलंनद्यः शीघ्रंवहन्तिसमुद्वहन्ते ॥ १८ ॥ श्रीरामायरामचन्द्रायनमः ॥

रसाकुलं रसवत् षट्पदसन्निकाशं भ्रमरसदृशवर्णं प्रकामं यथेष्टं यथा भवति तथा प्रभुज्यन्ते जाम्बूनि इति शेषः। आम्रफलस्यातिपक्वत्वात्स्वतएव भूमौ पतनः ॥१९॥ व
लाकमालया तत्पंक्त्या सहिता। कूटः शिखरं तदाकारसदृशाकाराः ॥२०॥ प्रहृष्टेत्यादि। नृत्योत्सवप्रहृष्टमयूराणि॥ नितरां हृष्टा वलाहका येषु तानि ॥२१॥
सलिलातिभारं॥ भारवत्वाच्च विश्रम्य विश्रम्य गमनं॥ २२॥ गर्भार्थं मेघे घभिकामो यस्याः सा॥ परिसंपतन्ती नभसि गच्छन्ती अतएव संमोदिता हर्षवती व

रसाकुलं षट्पदसन्निकाशं प्रभुज्यते जंबुफलं प्रकामं॥ अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वं ॥१९॥ विद्युत्
पताकाः सवलाकमालाः शैलेंद्रकूटाकृतिसन्निकाशाः॥ गर्जन्ति मेघाः समुदीर्णनादा मत्ता गजेंद्रा इव संयुगस्थाः ॥२०॥ वर्षो
दकाप्यायितशाद्वलानि प्रवृत्तनृत्तोत्सववर्हिणानि॥ वनानि निर्वृष्टवलाहकानि पश्यापराह्णेष्वधिकं विभांति ॥२१॥
समुद्वहंतः सलिलातिभारं वलाकिनो वारिधरा नदंतः॥ महत्सु शृंगेषु महीधराणां विश्रम्य विश्रम्य पुनः प्रयांति ॥२२॥ मे
घाभिकामा परिसंपतंती सम्मोदिता भाति वलाकपंक्तिः॥ वातावधूता वरपौंडरीकी लंवेव माला रुचिरांवरस्य ॥२३॥
वालेंद्रगोपांतरचित्रितेन विभाति भूमिर्नवशाद्वलेन॥ गात्रानुपृक्तेन शुकप्रभेण नारीव लाक्षोक्षितकंवलेन ॥२४॥
निद्रा शनैः केशवमभ्युपैति द्रुतं नदी सागरमभ्युपैति॥ हृष्टा वलाका घनमभ्युपैति कांता सकामा प्रियमभ्युपैति ॥२५॥

लाकपंक्तीरित्यार्षो ह्रस्वः। तदुत्प्रेक्षा वातेत्यादि वराश्रेष्ठा पौंडरीकी श्वेतपद्मसंवंधिनी लंवा रुचिरांवरस्य मालेव ॥२३॥ वालैरिंद्रगोपैरंतरे मध्ये मध्ये चित्रितेन
शाद्वलेन युता भूमिः॥ स्वतः शुकवर्णेन मध्ये मध्ये लाक्षाविंदुयुतेन कंवलेन गात्रानुपृक्तेन गात्रसंपृक्तेन युक्ता नारीव ॥२४॥ निद्रेति आषाढ्यां स्वापोत्सवात् हृष्टा

शिखिनां सुष्ठु प्रनृत्तं येषु ते सकदंबाः सकदंबवृक्षाः शाखा येषां समानकामा उभये पि कामवंत इत्यर्थः सस्यैर्वनैश्चाभिरामा ॥२६॥ वहनादिक्रियाणां नद्यादी
नां च क्रमेणान्वयाद्यथासंख्यमत्रालंकारः प्लवंगमाः समाश्वसंति सुग्रीवराज्यलाभात् ॥२७॥ वननिर्झरे क्रीडया केतकगंधमाघ्राय प्रहर्षिताः प्रपातशब्दैः
प्रपतंनिर्झरशब्दैः ॥२८॥ पुष्परसैर्मदास्वादैरवगाढं व्याप्तं मदं क्षणेनोत्सवेनार्जितं ॥२९॥ अंगारः शांताग्निः तच्चूर्णस्य य उत्करस्तत्समैः अनेन फलानां

जाता वनांताः शिखिसुप्रनृत्ता जाताः कदंबाः सकदंबशाखाः ॥ जाता वृषा गोषु समानकामा जाता मही सस्यवनाभिरामा
॥२६॥ वहंति वर्षंति नदंति भांति ध्यायंति नृत्यंति समाश्वसंति ॥ नद्यो घना मत्तगजा वनांताः प्रियाविहीनाः शिखिनः
प्लवंगमाः ॥२७॥ प्रहर्षिताः केतकिपुष्पगंधमाघ्राय मत्ता वननिर्झरेषु ॥ प्रपातशब्दाकुलिता गजेंद्राः सार्धं मयूरैः
समदा नदंति ॥२८॥ धारानिपातैरभिहन्यमानाः कदंबशाखासु विलंबमानाः ॥ क्षणार्जितं पुष्परसावगाढं श
नैर्मदं षट्चरणास्त्यजंति ॥२९॥ अंगारचूर्णोत्करसंनिकाशैः फलैः सुपर्याप्तरसैः समृद्धैः ॥ जंबुद्रुमाणां प्र
विभांति शाखा निलीयमाना इव षट्पदौघैः ॥३०॥ तडित्पताकाभिरलंकृतानामुदीर्णगंभीरमहारवाणां ॥ विभां
ति रूपाणि बलाहकानां रणोत्सुकानामिव वारणानां ॥३१॥ मार्गानुगः शैलवनानुसारी संप्रस्थितो मेघरवं नि
शम्य ॥ युद्धाभिकामः प्रतिनागशंकी मत्तो गजेंद्रः प्रतिसन्निवृत्तः ॥३२॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥

मतिमहत्त्वं सूचितं अत्युक्तिरत्रालंकारः ॥३०॥३१॥ प्रस्थितो मेघरवं निशम्य श्रुत्वा ॥ प्रतिनागशंकी ॥ शत्रुभूतगजानां रवनादशंकी प्रतिनिवृत्तः ॥३२॥

अनेकाश्रयिणः अनेकभावाश्रयिणः ॥ ३३ ॥ कंदलं स्थलोत्पलं मधुवारि मधुसदृशवारि ॥ आपानभूमिर्मद्यपानभूमिस्तत्सामपि कदंबादिपुष्पाणि मद्यपूर्णता मत्तजनश
द्दलन्त्वंच ॥ ३४ ॥ विवर्णच्छदनाः जलसेकेनेव विवर्णपक्षाः ॥ ३५ ॥ षट्पदो भ्रमरस्तत्र ध्वनिरूपं तंत्रीणां मधुराभिधानं गीतं यस्मिन् ॥ प्लवंगमानां भेकानामुदी
रितमेव कंठनालं यत्र सूत्रधारमुरवशब्दतालो यस्मिन् मेघशब्दास्त्वमृदंगनादाः । तैराविष्कृतं प्रकटितं संगीतं वनेषु प्रवृत्तमिव ॥ ३६ ॥ प्रनृत्तैः आरब्धनृ

क्वचित्प्रगीता इव षट्पदौघैः क्वचित्प्रनृत्ता इव नीलकंठैः ॥ क्वचित्प्रमत्ता इव वारणेंद्रैर्विभांत्यनेकाश्रयिणो वनांताः ॥ ३३ ॥
कदंबसर्ज्जार्ज्जुनकंदलाढ्या वनांतभूमिर्मधुवारिपूर्णा । मयूरमत्ताभिरुतप्रनृत्तैरापानभूमिप्रतिमा विभाति ॥ ३४ ॥ मुक्ता
समाभं सलिलं पतद्वै सुनिर्मलं पत्रपुटेषु लग्नं ॥ हृष्टा विवर्णच्छदना विहंगाः सुरेंद्रदत्तं तृषिताः पिबंति ॥ ३५ ॥ षट्पाद
तंत्रीमधुराभिधानं प्लवंगमोदीरितकंठतालं ॥ आविष्कृतं मेघमृदंगनादैर्वनेषु संगीतमिव प्रवृत्तं ॥ ३६ ॥ क्वचित्प्र
नृत्तैः क्वचिदुन्नदद्भिः क्वचिच्च वृक्षाग्रनिषण्णकायैः ॥ व्यालंबबर्हाभरणैर्मयूरैर्वनेषु संगीतमिव प्रवृत्तं ॥ ३७ ॥ स्वनै
र्घनानां प्लवगाः प्रबुद्धा विहाय निद्रां चिरसंनिरुद्धाम् ॥ अनेकरूपाकृतिवर्णनादा नवांबुधाराभिहता नदंति ॥ ३८ ॥
नद्यः समुद्वाहितचक्रवाकास्तटानि शीर्णान्यपवाहयित्वा ॥ दृप्ता नवप्रावृतपूर्णभोगा द्रुतं स्वभर्त्तारमुपोपयांति ॥ ३९ ॥

त्तैः उन्नदद्भिः गायकास्तैः । वृक्षाग्रनिषण्णकायास्तैः संगीतोपलक्षितन्तत्प्रद्रष्टारः ॥ ३७ ॥ चिरसंनिरुद्धां चिरसंपादितां । शुष्कध्वनिकास्विति शेषः प्लवगा भेकाः
अनेकरूपा आकृतिसंस्थानं वर्णो नीलपीतादिर्नादश्च येषां ॥ ३८ ॥ कामातुरवद्भवंति हृष्टांतं नदीषु आरोपयंति नद्य इति वारिपूरेण समुद्वाहिता उन्नमिता
चक्रवाकरूपस्तना याभिः शीर्णानि तटानि निरोधकजरतीस्थानीयान्यपवाहयित्वा निरस्य । नवप्रावृतपूर्णभोगा हृष्टा । नवं प्रावृतं उष्णाद्युपहारान्पूर्वे पूर्णभोगा या

हृष्टा तं तीक्ष्णं उपोपयंति । प्रसमुपोदः पादपूरणे इति विश्वः ॥ ३९ ॥

नीलेषु मेघेषु सक्ता नीला मेघाः प्रतिभांति दवाग्निदग्धेषु शैलेषु तादृशाः शैला यदि सक्ता भवंति । नदानेइव वज्रमला इत्युभयान्वयि ॥४१॥ प्रसन्नशरद्वन्मसर
वंति । शक्रगोपइंद्रगोप ॥४१॥४२॥ गवेंद्राः वृषभाः । निभृताः त्यक्ता घोषाः सर्वत्र जाता इति शेषः सुरेंद्रो देवेंद्रः प्रक्रीडितः कर्तरि निष्ठा ॥४३॥ सजुकूलसिर

नीलेषु नीला नववारिपूर्णा मेघेषु मेघाः प्रतिभांति सक्ताः । दवाग्निदग्धेषु दवाग्निदग्धाः शैलेषु शैला इव वद्धमूलाः ॥४०॥ प्रम
त्तसन्नादितवर्हिणानि सशक्रगोपाकुलशाद्वलानि । चरंति नीपार्जुनवासितानि गजाः सुरम्याणि वनांतराणि ॥४१॥ नवां
बुधाराहतकेसराणि ध्रुवं परित्यज्य सरोरुहाणि । कदंबपुष्पाणि सकेसराणि नवानि हृष्टा भ्रमराः पिबंति ॥४२॥ मत्ता
गजेंद्रा मुदिता गवेंद्रा वनेषु विक्रांततरा मृगेंद्राः । रम्या नगेंद्रा निभृता नरेंद्राः प्रक्रीडितो वारिधरैः सुरेंद्रः ॥४३॥ मेघाः
समुद्भूतसमुद्रनादाः महाजलौघैर्गगनावलंबाः । नदीस्तटाकानि सरांसि वापीर्महीं च कृत्स्नामपवाहयंति ॥४४॥
वर्षप्रवेगा विपुलाः पतंति प्रवांति वाताः समुदीर्णवेगाः । प्रनष्टकूलाः प्रवहंति शीघ्रं नद्यो जलं विप्रतिपन्नमार्गाः ॥४५॥
नरैर्नरेंद्रा इव पर्वतेंद्राः सुरेंद्रदत्तैः पवनोपनीतैः । घनांबुकुंभैरभिषिच्यमाना रूपं श्रियं स्वामिव दर्शयंति ॥४६॥
घनोपगूढं गगनं न तारा न भास्करो दर्शनमभ्युपैति । नवैर्जलौघैर्धरणी वितृप्ता तमोविलिप्ता न दिशः प्रकाशाः ॥४७॥

स्तः समुद्रनादो यैस्ते । अपवाहयंति प्रवहज्जलानि कुर्वंति ॥४४॥ वर्षप्रवेगा वृष्टयः विप्रतिपन्नः प्रतिवद्धो मार्गो नद्यां यासां ताः ॥४५॥ रूपं निर्मलमा
कारं श्रियं विविधधातुकांतरूपं दर्शयंतीव ॥४६॥ घनोपगूढत्वात् गगनस्य ताराद्विदर्शनाभावः वितृप्ता जातमिलं प्राप्ता ॥४७॥ रामरामरामरामः

॥ राम. ॥
॥९६॥

145

प्रपातैर्निर्झरैः॥४८॥ प्रपतंतीति। प्रपाता निर्झराः विकीर्यंते स्तूयंते॥४९॥ निर्धौतं क्षालितं शृंगाणामुपतलं यैस्ते॥५०॥५१॥ ज्ञायते उन्नीयते। अनुमानालंकारः
॥५२॥ हृतानि हृत्वा इति क्त्वापाठे प्ययमेवार्थः। प्रस्थितापि सेना पंथ्येव वर्त्तते समीक्षता: निरुद्धत्वं साधारणधर्मः॥५३॥ प्रोष्ठपदो भाद्रपदः ब्रह्म वेदं विवक्षता

महांति कूटानि महीधराणां धाराविधौतान्यधिकं विभांति। महाप्रमाणैर्विपुलैः प्रपातैर्मुक्ताकलापैरिव लंबमानैः॥४८॥
शैलोपलप्रस्खलमानवेगाः शैलोत्तमानां विपुलाः प्रपाताः। गुहासु संनादितबर्हिणासु हारा विकीर्यंत इवावभांति
॥४९॥ शीघ्रप्रवेगा विपुलाः प्रपाता निर्धौतशृंगोपतला गिरीणां॥ मुक्ताकलापप्रतिमाः पतंतो महागुहोत्संगतले
ध्रियंते॥५०॥ सुरतामर्दविछिन्नाः स्वर्गस्त्रीहारमौक्तिकाः। पतंति वातुला दिक्षु तोयधाराः समंततः॥५१॥ विली
यमानैर्विहगैर्निमीलद्भिश्च पंकजैः॥ विकसंत्या च मालत्या गतोस्तं ज्ञायते रविः॥५२॥ हृता यात्रा नरेंद्राणां सेनाप
थ्येव वर्त्तते॥ वैराणि चैव मार्गाश्च सलिलेन समीकृता॥५३॥ मासि प्रोष्ठपदे ब्रह्म ब्राह्मणानां विवक्षतां॥ अयमध्या
यसमयः सामगानामुपस्थितः॥५४॥ निवृत्तकर्मायतनो नूनं संचितसंचयः॥ आषाढीमभ्युपगतो भरतः कोस
लाधिपः॥५५॥ नूनमापूर्यमाणायाः सरय्वा वर्धते रयः। मां समीक्ष्य समायांतमयोध्याया इव स्वनः॥५६॥

मध्येतुमिच्छतां अध्यायसमयः उपाकरणकालः॥५४॥ निवृत्तं कर्म छादनादिकर्म यस्य तादृशमायतनं यस्य संचिताः संचयाः जीवनसाधनानि येन स
भरतः॥ आषाढीं प्राप्याभ्युपगतः कृतयत्किंचिद्व्रतसंकल्पः॥५५॥ मामायांतं समीक्ष्य वनतः प्रतिनिवृत्तमिति शेषः॥५६॥ रामरामरामरामः॥

॥ रा० वा० कि ॥
॥ ६९ ॥

वर्षाप्राप्येतिशेषः ॥५७॥ नदीकूलंकर्तुं ॥५८॥ वर्षाश्चविस्तीर्णाइत्यनुकर्षः ॥ अपारः दुष्प्रापवैरनिर्यातनपारः ॥५९॥ अयात्रांवर्षयात्राभावंकार्येन्तुस्वन
यसुग्रीवेप्रणतेपिमयासीतान्वेषणमुद्दिश्यकिंचिदपिनोक्तं ॥६०॥ अपिचेदानींगरीयसेआत्मकार्यायवक्तुमनुचितमित्याह ॥ अपिचेति ॥ अपिपरि

इमाः स्फीतगुणा वर्षाः सुग्रीवः सुखमश्नुते ॥ विजितारिः सदारश्च राज्ये महति च स्थितः ॥५७॥ अहं तु हृतदारश्च राज्याच्च
महतश्च्युतः ॥ नदीकूलमिव क्लिन्नमवसीदामि लक्ष्मण ॥५८॥ शोकश्च मम विस्तीर्णो वर्षाश्च भृशदुर्गमाः ॥ रावण
श्च महाञ्छत्रुरपारः प्रतिभाति मे ॥५९॥ अयात्रां चैव दृष्ट्वेमां मार्गांश्च भृशदुर्गमान् ॥ प्रणते चैव सुग्रीवे न मया किंचि
दीरितम् ॥६०॥ अपि चापि परिक्लिष्टं चिराद्दारैः समागतम् ॥ आत्मकार्यगरीयस्त्वाद्वक्तुं नेच्छामि वानरम् ॥६१॥ स्वयमेव
हि विश्रम्य ज्ञात्वा कालमुपागतम् ॥ उपकारं च सुग्रीवो वेत्स्यते नात्र संशयः ॥६२॥ तस्मात्कालप्रतीक्षोहं स्थितोस्मि
शुभलक्षण ॥ सुग्रीवस्य नदीनां च प्रसादमभिकांक्षयन् ॥६३॥ उपकारेण वीरो हि प्रतीकारेण युज्यते ॥ अकृत
ज्ञोप्रतिकृतो हंति सत्ववतां मनः ॥६४॥ अथैवमुक्तः प्रणिधाय लक्ष्मणः कृतांजलिस्तत्प्रतिपूज्य भाषितं उवा
च रामं स्वभिरामदर्शनं प्रदर्शयन् दर्शनमात्मनः शुभं ॥६५॥ यदुक्तमेतत्तव सर्वमीप्सितं नरेंद्र कर्त्ता न चिराद्धरीश्व
रः ॥ शरत्प्रतीक्षः क्षमतामिमं भवान् जलप्रपातं रिपुनिग्रहे धृतः ॥६६॥ इत्यार्षे श्रीरामायणे वा० किष्किंधाकांडे एकोनविं शतितमः

॥ ४ ॥

क्लिष्टं अतिपरिक्लिष्टं ॥ गरीयस्त्वादल्पकालाऽल्पयत्नाऽसाध्यत्वात् नेच्छामि नैमिषं ॥६२॥ ६३॥ शेषं व्याख्यातं ॥६४॥ ६५॥ ६६॥ वशमानः ॥ इति श्रीरामायणटीकायां

॥ ४ ॥ किष्किंधाकांडेकोनविंशः सर्गः

॥ एम० ॥
॥ ६९ ॥

146

ईदृशंव्योमसमीक्ष्यहरीश्वरमुपागम्यहनूमानः ब्रवीदित्युत्तरेणनवमश्लोकस्थेनान्वयः॥१॥ मंदोधर्मार्थयोःसंग्रहोयस्यतं। असतांमार्गंकामप्रवृत्तिलक्षणमत्य
र्थमाश्रयंतं इतिशेषः। एकांतगतमानसं। कामभोगार्हैकांतदेशगतचित्तं॥२॥ निवृत्तकार्यंनिष्पन्नवालिवधरूपस्वकार्यंसिद्धार्थंप्राप्तराज्यं अभिप्रेतान्
इप्सितानर्थान्प्राप्तवंतं॥३॥ स्वांपत्नींरुमां॥४॥ उच्छिन्नराज्यसंदेहंमंत्रिसौष्टवेननष्टराज्यपालनसंदेहंनिश्चितार्थः। निश्चितसर्वशास्त्रार्थः अतए

समीक्ष्यविमलंव्योमगतविद्युद्बलाहकं। सारसाकुलसंघुष्टंरम्यज्योत्स्नानुलेपनं॥१॥ समृद्धार्थंचसुग्रीवंमंदधर्मार्थसं
ग्रहं। अत्यर्थंचासतांमार्गमेकांतगतमानसं॥२॥ निवृत्तकार्यंसिद्धार्थंप्रमदाभिरतंसदा। प्राप्तवंतमभिप्रेतान्सर्वा
नेवमनोरथान्॥३॥ स्वांचपत्नीमभिप्रेतांतारांचापिसमीप्सितां। विहरंतमहोरात्रंकृतार्थंविगतज्वरं॥४॥ क्रीडंत
मिवदेवेशंगंधर्वाप्सरसांगणैः। मंत्रिषुन्यस्तकार्यंचमंत्रिणामनवेक्षकं॥५॥ उच्छिन्नराज्यसंदेहंकामवृत्तमवस्थि
तं। निश्चितार्थोऽर्थतत्वज्ञःकालधर्मविशेषवित्॥६॥ प्रसाद्यवाक्यैर्विविधैर्हेतुमद्भिर्मनोरमैः। वाक्यविद्वाक्यत
त्वज्ञंहरीशंमारुतात्मजः॥७॥ हितंपथ्यंचतथ्यंचसामधर्मार्थनीतिमत्। प्रणयप्रीतिसंयुक्तंविश्वासकृतनिश्च
यं॥८॥ हरीश्वरमुपागम्यहनूमान्वाक्यमब्रवीत्। राज्यंप्राप्तंयशश्चैवकौलीश्रीरभिवर्द्धिता॥९॥

((वार्थतत्वज्ञः कर्तव्याकर्तव्यस
कलार्थतत्वज्ञः कालेतिकालोचितंधर्मविशेषमनुष्ठेयंवेत्तितादृशः॥६॥ वाक्यैःप्रसादप्रयोजनैः॥७॥ हितंतत्कालहितंपथ्यंकालांतररहितं। तथ्यंसत्यंसा
मादिचतुष्कवत्। एतच्चतुष्टयंवाक्यविशेषणं। प्रणयत्वंप्राप्तयाप्रीत्यासंयुक्तंविश्वासेनस्ववचनप्रामाण्यपक्षेकृतनिश्चयमीदृशंहरीश्वरमित्यन्वयः॥८॥

तत्रप्रसादप्रयोजनवाक्यान्याह राज्यंप्राप्तमित्यादिकौलीःकुलक्रमागता॥९॥

शेषः कर्तव्यशेषः कालज्ञः प्रत्युपकारकालज्ञः सत्सु वर्तते साधुत्वेनानुवर्तते ॥१०॥ दंअतेनेन दंडः सैन्यं । आत्मा सकरणग्रामः समानि स्ववशत्वेन समस्तं । समवेतानीति पाठे मिलितानीत्यर्थः ॥ तत्त्वैकमपि पृथग्भूतमिति भावः ॥११॥ निरत्यये निरपाये अभिनीतार्थं प्रतिज्ञातार्थं ॥१२॥ संभ्रमात्त्वरया विशेषेणाक्रांतो मत्ताहोऽन्यत्र कर्मणीति शेषः ॥१३॥ कालव्यतीतेषु करणोचितकालमतिक्रांतेषु पश्चात्तेषु वर्तनेनास्ति इत्यर्थं यतते समित्रस्य महतोऽर्थान् कृत्वापि मित्रार्थे न मित्रत्वप्रयोजकार्थे न तत्प्रयुज्यते उचितका

८२

मित्राणां संग्रहः शेषस्तद्भवान् कर्तुमर्हति । यो हि मित्रेषु कालज्ञः सततं साधु वर्तते ॥१०॥ तस्य राज्यं च कीर्तिश्च प्रतापश्चापि वर्द्धते ॥ यस्य कोशश्च दंडश्च मित्राण्यात्मा च भूमिप । समवेतानि सर्वाणि स राज्यं महदश्नुते ॥११॥ तद्भवान् वृत्तसंपन्नः स्थितः पथि निरत्यये ॥ मित्रार्थमभिनीतार्थं यथावत्कर्तुमर्हति ॥१२॥ संत्यज्य सर्वकर्माणि मित्रार्थे यो न वर्तते ॥ संभ्रमाद्धि कृतोत्साहः सोऽनर्थेनावरुध्यते ॥१३॥ यो हि कालव्यतीतेषु मित्रकार्येषु वर्तते ॥ स कृत्वा महतोऽप्यर्थान्न मित्रार्थे हि युज्यते ॥१४॥ यदिदं मित्रकार्यं नो कालातीतमरिंदम ॥ क्रियतां राघवस्यैतद्वैदेह्याः परिमार्गणं ॥१५॥ न च कालमतीतं ते निवेदयति कालवित् ॥ त्वरमाणोऽपि सन्प्राज्ञस्तव राजन्वशानुगः ॥१६॥ कुलस्य हेतुः स्फीतस्य दीर्घबंधुश्च राघवः ॥ अप्रमेयप्रभावश्च स्वयं चाप्रतिमो गुणैः ॥१७॥ तस्य त्वं कुरु वै कार्यं पूर्वं तेन कृतं तव ॥ हरीश्वर कपिश्रेष्ठानाज्ञापयितुमर्हसि ॥ १८ ॥

लाकृतं कृतमप्यकृतप्रायमिति भावः ॥१४॥ तत्कालातीतं भविष्यतीति शेषः तस्मात्क्रियतामित्यादि ॥१५॥ ननु मत्कार्यकालात्ययश्चेत्तत्तं ज्ञापयिष्यत्येवेत्याह न चेति । कालवित्कालविज्ञोपि सन् प्राज्ञत्वात्त्वदभिप्रायमेव केवलमनुगच्छन् त्वत्सन्निधौ तिष्ठतीति भावः ॥१६॥ त्वदीयस्य स्फीतस्य महतः कुलस्य हेतुर्वृद्धिहेतुः दीर्घबंधुः इदानीं कालांतरे च बंधुः स्वयं च वाल्लक्ष्मणः ॥१७॥ कृतं तव कार्यमिति शेषः आज्ञापयितुमर्हसि रामनियोगात्पूर्वमिति शेषः ॥१८॥ श्रीकृष्णाय वासुदेवाय नमः ॥ ६ ॥ ६ ॥

नन्वेवमपिकालव्यतिक्रमस्तुल्योनत्वाह। नहीति। चोदनादृतेरामप्रेरणांविनाजातोपिकालातिक्रमोनदोषायेतिभावः। नत्वेरणायायदिकार्यकरणंतदाकालव्यतिक्र
माभवेदेवेत्यर्थः। अकर्तुरपिअनुपकर्तुरपिकार्यस्यकर्त्ताअर्हेन्त्वप्रतिकर्त्तुरुपकर्तुः॥२०॥ आज्ञायांकिन्तुसज्जसे॥ किमर्थंतदाज्ञाप्रतीक्षयाविलंबसे॥२१॥ यद्य
पिरामस्यनसहायापेक्षातथापिसपरिवारोहंसीतामन्वेषयिष्यामीतितत्प्रतिज्ञामवेक्षतेसत्याऽसत्यावेतिपरीक्षतेइत्यर्थः॥२२॥ प्राणत्यागाविशंकेन। अनपकारि

नहितावद्भवेत्कालोव्यतीतश्चोदनादृते॥ चोदितस्यहिकार्यस्यभवेत्कालव्यतिक्रमः॥१९॥ अकर्तुरपिकार्यस्यभवान्कर्ताह
रीश्वर॥ किंपुनःप्रतिकर्तुस्तेराज्येनवधनेनच॥२०॥ शक्तिमानतिविक्रान्तोवानरर्क्षगणेश्वर॥ कर्तुंदाशरथेःप्रीति
माज्ञायांकिन्नुसज्जसे॥२१॥ कामंखलुशरैःसक्तःसुरासुरमहोरगान्॥ वशेदाशरथिःकर्तुंत्वत्प्रतिज्ञामवेक्षते॥२२॥
प्राणत्यागाविशंकेनकृतंतेनमहत्प्रियं॥ तस्यमार्गामवैदेहींपृथिव्यामपिचांबरे॥२३॥ देवदानवगंधर्वाअसुराःस
मरुद्गणाः॥ नचयक्षाभयंतस्यकुर्युःकिमिवराक्षसाः॥२४॥ तदेवंशक्तियुक्तस्यपूर्वंप्रतिकृतस्तथा॥ रामस्यार्हसि
पिंगेशकर्तुंसर्वात्मनाप्रियम्॥२५॥ नाधस्तादवनौनाप्सुगतिर्नोपरिचांबरे॥ कस्यचित्सज्जतेस्माकंकपीश्वरतवा
ज्ञया॥२६॥

॥वालिप्राणत्याजनेनदनौचित्यशंकारहितेनमित्रकृत्यंस्वकृत्यमेवेतितथातवप्रियंकृतंमार्गाम[illegible]न्वेषयाम॥२३॥ भयमितिरणे
इतिशेषः॥२४॥ प्रतिकृतःकृतोपकारस्यापिपिंगेशकपिराज॥२५॥ इदानींसुग्रीवस्याज्ञावैभवंदर्शयति। तवाज्ञयाकृतेसति॥ अस्माकंहरीणांमध्येयः
कश्चिदपिसज्जतेविलंबतेतस्यकस्यचित्कस्यापिवलिनोऽदुर्वलस्यवाऽधस्तात्पातालेऽन्यत्रवागतिर्जीवनंनास्ति॥२६॥ श्रीरामायरामचन्द्रायनमः।छ॥

यदेवं तदाज्ञापय आज्ञाप्रकारं प्रछति॥ कः कपिः ते किंकं नियोगं कृतो वापि सार्वविभक्तिकस्तसिः कुत्रापि स्थितः व्यवस्यतु अनुतिष्ठतु॥ आज्ञापनीया सेना किय
त्यस्ति तत्राह॥ हरय इति॥ कोटयः कोटिघटितसंख्या यान्यर्बुदस्याग्रे उपरि या संख्या समुद्राख्या तया संख्यया इत्यर्थः॥ २७॥ मतिं तदनुष्ठानविषयां
२८॥ २९॥ असंगेन अविलंबेन सेनाग्र्येण सेनानाथेन सहेति शेषः॥ ३०॥ अंतपालादिगंतवर्त्तिसेनापतयः समानयंतु समागच्छंतु॥ ३१॥

तदाज्ञापय कः किं ते कृतो वापि व्यवस्यतु॥ हरयो ह्यप्रधृष्यास्ते संति कोट्यग्रशोनघ॥ २७॥ तस्य तद्वचनं श्रुत्वा काले साधुनिरू
पितं सुग्रीवः सत्वसंपन्नश्चकार मतिमुत्तमां॥ २८॥ संदिदेशातिमतिमान् नीलं नित्यकृतोद्यमं॥ दिक्षु सर्वासु सर्वेषां सैन्या
नामुपसंग्रहे॥ २९॥ यथा सेना समग्रा मे यूथपालाश्च सर्वशः॥ समागच्छंत्यसंगेन सेनाग्र्येण तथा कुरु॥ ३०॥ ये त्वंतपा
लाः प्लवगाः शीघ्रगा व्यवसायिनः॥ समानयंतु ते शीघ्रं त्वरिताः शासनान्मम॥ ३१॥ स्वयं चानंतरं कार्यं भवानेवानुपश्य
तु॥ ३२॥ त्रिपंचरात्रादूर्ध्वं यः प्राप्नुयादिह वानरः॥ तस्य प्राणांतिको दंडो नात्र कार्या विचारणा॥ ३३॥ हरींश्च वृद्धानुप
यातु सांगदो भवान्ममाज्ञामधिकृत्य निश्चितां॥ इति व्यवस्थां हरिपुंगवेश्वरो विधाय वेश्म प्रविवेश वीर्यवान्॥ ३४॥ इत्या
र्षे श्रीमद्रामायणे वा॰ किष्किंधाकांडे एकोनत्रिंशः सर्गः॥ २९॥

॥ अनंतरं आनयनानंतरं कार्यं सेनादर्शनगणनादि अनुपश्यतु संपादयत्वि
त्यावत्॥ ३२॥ त्रिपंचरात्रात् पंचदशदिनादूर्ध्वं य आगच्छेत् तस्य दंडः तेन पक्षमध्ये सर्वैरागंतव्यमिति भावः कार्त्तिकशुक्लादावियमाज्ञेति बोध्यं॥ ३३॥ वृद्धान् ह
रीन् सांगदो भवानुपयातु॥ संमाननार्थमिति शेषः॥ ३४॥ टगमानः॥ इति रामाभिरामे श्रीरामीये रामायणतिलके किष्किंधाकांडे एकोनत्रिंशः सर्गः॥ २९॥

१॥ २॥ कालंसेनोद्योगकालं॥ सुमोहव्याकुलचित्तोबभूव॥ ३॥ संज्ञांचित्तस्वास्थ्यंमनस्थांमनःसन्निहितामपिचिंतयामास॥ जीवतिनवाकथमेनांप्राप्स्यामीतिचिं
ता॥ ४॥ रसशब्दैःसंयुक्तंशब्दवद्व्योमदृष्ट्वेतिसंबंधः॥ ५॥ हेमवर्णाधातवोहेमधातवः॥ ६॥ सारसनादंसहंसनादंवनीयासारसानामारावापरस्परस्त
माकानायकत्वैर्नदैर्यारमतेआश्रमे॥ ७॥ कांचनानिवकांचनपुष्पाणिवनिर्मलानासनवृक्षान्दृष्ट्वासौंदर्यातिशयात्पुनःपुनस्तान्पश्यंतीनदीच

गृहंप्रविष्टेसुग्रीवेविमुक्तेगगनेघनैः॥ वर्षरात्रोस्थितोरामःकामशोकाभिपीडितः॥ १॥ पांडुरंगगनंदृष्ट्वाविमलंचंद्रमं
डलं॥ शारदींरजनींचैवदृष्ट्वाज्योत्स्नानुलेपनां॥ २॥ कामवृत्तंचसुग्रीवंनष्टांचजनकात्मजां॥ दृष्ट्वाकालमतीतंच
सुमोहपरमातुरः॥ ३॥ सतुसंज्ञामुपागम्यमुहूर्तान्मतिमान्नृपः॥ मनस्थामपिवैदेहींचिंतयामासराघवः॥ ४॥
दृष्ट्वाचविमलंव्योमगतविद्युद्बलाहकं॥ सारसारवसंघुष्टंविललापार्त्तयागिरा॥ ५॥ आसीनःपर्वतस्याग्रेहेम
धातुविभूषिते॥ शारदंगगनंदृष्ट्वाजगाममनसाप्रियां॥ ६॥ सारसारावसन्नादैःसारसारावनादिनी॥ याश्रमेर
मतेबालासाद्यमेरमतेकथं॥ ७॥ पुष्पितांश्चासनान्दृष्ट्वाकांचनानिवनिर्मलान्॥ कथंसारमतेबालापश्यंतीसाम
पश्यती॥ ८॥ यापुराकलहंसानांकलेनकलभाषिणी॥ बुध्यतेचारुसर्वांगीसाद्यमेरमतेकथं॥ ९॥ निस्वनंचक्रवाका
नांनिशम्यसहचारिणां॥ पुंडरीकविशालाक्षीकथमेषाभविष्यति॥ १०॥ सरांसिसरितोवापीःकाननानिवनानिच॥ तांवि

[illegible] ॥११॥

सामपश्यंतीकथंवर्त्तते॥ ८॥ कलेनशब्देनबुध्यतेइत्यन्वयःकलभाषिणीकोमलशब्दवती॥ ९॥ निशम्यश्रुत्वा॥ १०॥ काननवनयोःकांतारोपवनात्मनाभेदः॥ ११॥

अपि नामित्यादि शरद्गुणान्निरंतरः शरदृतोर्निरंतरप्रवृत्तः कामः॥ मद्वियोगसौकुमार्यातिशयाभ्यां हेतुभ्यां सुदृढं अतिशयेन पीडयेदेव॥१२॥ सारंगाख्यचातक
विहंगस्तृषितो यथा त्रिदशेश्वरात् जलं कांक्षमाणो विललाप॥१२॥ ततस्तत्र काले रम्येषु गिरिसानुषु चंचूर्य॥ भ्रातृदुःखेन गर्हितं चरित्वा यद्लघु गंतादार्थो ऽस
मासेल्पप्॥ पर्युपावृत्तो लक्ष्मणोऽग्रजं रामं ददर्श॥१४॥ विषादान् विषादं ददर्श नाम॥१५॥ अथ लक्ष्मणः कर्मयोगज्ञानयोगावेव योरूपष्टुद्रयेदुःखशांतये

अपि तां मद्वियोगाच्च सौकुमार्याच्च भामिनीं॥ सुदृढं पीडयेत्कामः शरद्गुणनिरंतरः॥१२॥ एवमादि नरश्रेष्ठो विललाप नृ
पात्मजः॥ विहग इव सारंगः सलिलं त्रिदशेश्वरात्॥१३॥ ततश्चचूर्य रम्येषु फलार्थी गिरिसानुषु॥ ददर्श पर्युपावृत्तो ल
क्ष्मीवान् लक्ष्मणोऽग्रजं॥१४॥ स चिंतया दुःसहया परीतं विसंज्ञमेकं विजने मनस्वी॥ भ्रातुर्विषादात्त्वरितोऽतिदीनः समी
क्ष्य सौमित्रिरुवाच दीनं॥१५॥ किमार्य कामस्य वशंगतेन किमात्मपौरुष्यपराभवेन॥ अयं ह्रिया संह्रियते समाधिः
किमत्र योगेन निवर्तितेन॥१६॥ क्रियाभियोगं मनसः प्रसादं समाधियोगानुगतं च कालं॥ सहायसामर्थ्यमदीन
सत्वः स्वकर्महेतुं च कुरुष्व तात॥१७॥

चानुतिष्ठति स्मारयति॥ किमार्येत्यादि हे आर्य कामस्य वशंगतेन त्वया किं कर्म कृतं स्यात्। अपि चैवं कामवशात्वे
नात्मपौरुष्यस्य स्वपौरुषस्याभिभवेन किं प्रयोजनं साधितं स्यात् तस्मात्कामवशत्वं त्यक्त्वा कर्मयोगं कुरु॥ किंच स्नानादिकर्मयोगात्तरकालमवसरप्राप्तो यः समाधिर्ब्रह्मानु
संधानं ह्रिया हरतीति ह्रीः शोकस्तेनाकिमर्थं संह्रियते॥ अत्रास्यामवस्थायां योगेन समाधिना सर्वदुःखनिवृत्तिर्विशेषः किं न निवर्तते अपि तु निवर्तनस्यैवेत्यर्थः एवमेव पाठः
पाठ इति कतकः कृत्॥ पाठांतरं त्वस्य योजनाशक्या कल्पितमिति च सः॥१६॥ उक्तमेव विवृणोति क्रियाभियोगमिति क्रियारंभो वस्त्रानादीनामभितः कार्त्स्न्येन योगमनु
ष्ठानं मनसः प्रसादं चास्थायकालं सर्वकालं समाधियोगानुगतं तेन संवत्सरमेव कुरुष्व तथा ऽदीनसत्वोऽक्षीणसत्वः सन् स्वकर्महेतुं पौरुषहृद्दुःकारणं सहायसा
मर्थ्यं ततघटनरूपं स्वकर्म देवार्चनादिरूपकर्मयोगं च कुरुष्व अनेन यावत्फलं निदिध्यासनजानकर्मसमुच्चय उक्तः॥१७॥ ॥८॥ ॥६॥ ॥

त्वयासनाथानाथवतीजानकीपरेणनसुलभानसुग्रहाज्वलितामग्निचूडामग्निशिखामुपेत्यस्प्रष्टुंकश्चिदपिनदह्यतेइतिनापितुवह्निव्यतिरिक्तःसर्वोपिदह्यतएवत्र
नोयानीमासानम्नानिकमिरेवसातुमतुपामितामनाविनिवर्तयंगपं ॥१८॥ रामः अप्रहृष्यत्वायायोपेतत्वादविचाल्यस्वभावजेनत्वार्थकंवाक्यमुक्तवंतंलक्ष्मणंसाहितंल
क्ष्मणमुवाचकिमुवाच यत्त्वयाप्रयुक्तंवाक्यंनद्भितंतत्कालसुखंपथ्यंकालांतरेपिसुखं ॥ नप्रसक्तंराजनीत्युपेतं सामसहितंधर्मार्थाभ्यांसमाहितंसंगतं

नजानकीमानववंशनाथत्वयासनाथासुलभापरेण ॥ नवाग्निचूडांज्वलितामुपेत्यनदह्यतेवीरवरार्हकश्चित् ॥१८॥ सलक्ष
णंलक्ष्मणमप्रहृष्यंस्वभावजंवाक्यमुवाचरामः ॥ हितंचपथ्यंचनयप्रसक्तंससामधर्मार्थसमाहितंच ॥१९॥ निःसंशयंका
र्यमवेक्षितव्यंक्रियाविशेषोप्यनुवर्तितव्यः ॥ ननुप्रवृद्धस्यदुरासदस्यकुमारवीर्यस्यफलंचचिंत्यं ॥२०॥ अथपद्मपला
शाक्षींमैथिलीमनुचिंतयन् ॥ उवाचलक्ष्मणंरामोमुखेनपरिशुष्यता ॥२१॥ तर्पयित्वासहस्राक्षःसलिलेनवसुंधरां ॥ निर्व
र्तयित्वासस्यानिकृतकर्माव्यवस्थितः ॥२२॥ दीर्घगंभीरनिर्घोषाःशैलद्रुमपुरोगमाः ॥ विसृज्यसलिलंमेघाःपरिशांता
नृपात्मज ॥२३॥ नीलोत्पलदलश्यामाःश्यामीकृत्वादिशोदश ॥ विमदाइवमातंगाःशांतवेगाःपयोधराः ॥२४॥

१९ ॥ तस्मात्त्वदुक्तंनिःसंशयंकार्यंत्वद्वाक्यार्थोनुष्ठेयएव ॥ अनुष्ठेयमाह ॥ अवेक्षितव्यं ॥ समाधियोगेनभगवत्तत्वंद्रष्टव्यंक्रियाविशेषःकर्मयोगःसोपिअनुवर्तितव्योनु
ष्ठेयः ॥ हेकुमारननुकर्मज्ञानयोगौहित्वाप्रकर्षेणवृद्धिंप्राप्तस्यातएवदुरासदस्यवीर्यस्यवीर्यवतःकर्मणःफलंचफलमेवचिंत्यमपेक्षणीयंअनेनयावत्फ
लंनिदिध्यासनकर्मसमुच्चयउक्तः ॥२०॥ लक्ष्मणवचसानंत्कालंस्वस्थस्यापिपुनर्मैथिलींस्मृत्वाविद्यमानस्यशरदनुभववर्णनं ॥ अथेत्यादि ॥२१॥ निवर्तयि
त्वासंपाद्यअहंत्वकृतकर्मेतिव्यंग्यं ॥२२॥ गर्जंतीतिनिर्घोषाःप्रचाद्यव ॥ शैलद्रुमपुरइतिशिलीयावकुवचनांतंनानाछंदेतथाभूत्वासलिलंविसृज्यपरिशांता ॥२३॥

नीलोत्पलदलश्यामाइतिपयोधराविशेषणं ॥ अहंत्वशांतकामवेग
इतिव्यंग्यमेवमयेत्यूह्यं ॥२४॥

वृष्टिसहितावाताः समुद्यता अपि विरताः ॥ २५ ॥ २६ ॥ महामेघैरभिवृष्टा अतएव निर्मला ॥ २७ ॥ श्रियं विभज्येति शारदाप्रभा लीला मुत्रिधा विभागं कृत्वेत्यर्थः ॥ २८ ॥
अनेकपदार्थाश्रयाः चित्राः शोभा यस्याः सा अग्रहस्ताः प्रथमविस्तृतकिरणाः ॥ २९ ॥ पवनमनुसरतीति तच्छीलः विनेष्यं जलं शोषयन् शरत्काल इति शेषः मत्त

भी॰

जलगर्भमहावेगाः कुटजार्जुनगंधिनः ॥ चरित्वा विरताः सौम्य वृष्टिवाताः समुद्यताः ॥ २५ ॥ घनानां वारणानां च मयूराणां च
लक्ष्मण ॥ नादः प्रस्रवणानां च प्रशांतः सहसानघ ॥ २६ ॥ अभिवृष्टा महामेघैर्निर्मलाश्चित्रसानवः ॥ अनुलिप्ता इवाभा
न्ति गिरयश्चंद्ररश्मिभिः ॥ २७ ॥ शाखासु सप्तच्छदपादपानां प्रभासु तारार्कनिशाकराणां ॥ लीलासु चैवोत्तमवारणानां श्रि
यं विभज्याद्य शरत्प्रवृत्ता ॥ २८ ॥ संप्रत्यनेकाश्रयचित्रशोभा लक्ष्मीः शरत्कालगुणोपपन्ना ॥ सूर्याग्रहस्तप्रतिबोधिते
षु पद्माकरेष्वभ्यधिकं विभाति ॥ २९ ॥ सप्तच्छदानां कुसुमोपगंधी षट्पादवृंदैरनुगीयमानः ॥ मत्तद्विपानां पवनानु
सारी दर्पं विनेष्यन्नधिकं विभाति ॥ ३० ॥ अभ्यागतैश्चारुविशालपक्षैः स्मरप्रियैः पद्मरजोवकीर्णैः ॥ महानदीनां पुलि
नोपयातैः क्रीडंति हंसाः सह चक्रवाकैः ॥ ३१ ॥ मदप्रगल्भेषु च वारणेषु गवां समूहेषु च दर्पितेषु ॥ प्रसन्नतोयासु च
निम्नगासु विभाति लक्ष्मीर्बहुधा विभक्ता ॥ ३२ ॥ नभः समीक्ष्याम्बुधरैर्विमुक्तं विमुक्तबर्हाभरणा वनेषु ॥ प्रियास्वरक्ता
विनिवृत्तशोभा गतोत्सवा ध्यानपरा मयूराः ॥ ३३ ॥

((द्विपानां दर्पमधिकं कुर्वन्नु विभाति ॥ ३० ॥ मानससरस्तः स्वेच्छमहाभ्यागतैश्चक्रवाकैः
सह क्रीडंति ॥ ३१ ॥ ३२ ॥ विमुक्तं त्यक्तं बर्हरूपमाभरणं यैः अरक्ताः रागरहिता ॥ ३३ ॥ प्रियकेरसनहवे ॥ ३४ ॥ रामरामरामरामरामराम

॥राम॰॥
॥७३॥

130

प्रियकैरसनन्हक्षैः ॥ ३४ ॥ कुसुमोद्गतानां सम्प्रहृष्टकुसुमाघ्राणप्रवृत्तानां । उद्गतानामित्येव पाठः उद्भ्रतानामिति कल्पितं इति कनककृतः मदोत्कटात्य
धिकमदा अत एव मदलालसाः मदशब्देनात्र स्मरः कामभोगलस्ते छावनः ॥ ३५ ॥ शस्त्रवडुमेजितास्तिवद्विधौतो विमलो वर्णो नैर्मल्यं यस्य तत् । काल्ह
रश्मीनाः कल्हाराश्च शीताश्चेत्यर्थः ॥ ३६ ॥ सूर्यातपस्य क्रामणं संबंधः । चिरेण द्राटितः प्रकाशितः सांद्रो रेणुर्यया अन्येन शरदुत्तरार्धकालोयमिति ज्ञा

मनोज्ञगंधैः प्रियकैरनल्पैः पुष्पाग्रभारावनताग्रशाखैः । सुवर्णगौरैर्नयनाभिरामैरुद्योतितानीव वनांतराणि ॥ ३४ ॥ प्रिया
न्वितानां नलिनीप्रियाणां वनप्रियाणां कुसुमोद्गतानां । मदोत्कटानां मदलालसानां गजोत्तमानां गतयो घमंदाः ॥ ३५ ॥
व्यक्तं नभः शस्त्रविधौतवर्णं कृशप्रवाहानि नदीजलानि ॥ कल्हारशीताः पवनाः प्रवांति तमोविमुक्ताश्च दिशः प्रका
शाः । सूर्यातपक्रामणनष्टपंका भूमिश्चिरोद्घाटितसांद्ररेणुः । अन्योन्यवैरेण समाकुलानां उद्योगकालो घनराधिपा
नां ॥ ३७ ॥ शरद्गुणाप्यायितरूपशोभाः प्रहर्षिताः पांसुसमुत्थितांगाः । मदोत्कटाः संप्रति पुंड्वलध्वा हृषा गवां मध्य
गता नदंति ॥ ३८ ॥ समन्मथानीवृतरागरागाकुलान्विता मंदगतिः करेणूः । मदान्वितं संपरिवार्य यातं वने पुभर्ता
रमनुप्रयाति ॥ ३९ ॥ त्यक्त्वा वराणां सविभूषितानि वर्हाणि नीरोपगतानदीनां । निर्भर्त्स्यमाना इव सारसौघैः प्रयांति दी
नाविमनामयूराः ॥ ४० ॥

(यते ॥ ३७ ॥ आप्यायिते वर्धिते रूपशोभे येषां पांसुसमुत्थितांगाः पांसुयुक्तांगाः ॥ ३८ ॥ समन्मथत्वादिविशेषणाचतुष्टयं करेः
णवाः करेणूरिति दीर्घत्वमार्षं ॥ ३९ ॥ विभूषितं विभूषणं विमानाः मयूराः मनः पर्यायो मनः शब्दोऽकारांतोपि द्विरूपकोशात् ॥ ४० ॥ रामरामरामरामः

वद्धांवुजानि विकसितकमलानि ॥४१॥ ससारसाश्चत्सारावविनादिताश्च तासु ॥४२॥ अतिप्रवृद्धानिलो महावायुः वर्हिणामसुराः प्लवंगमा भेकाः ॥४३॥ अनेके
वर्णा येषां ते नवोदितैरंवुधरैरप्युविनष्टकायाः सुमेरां नष्टदेहया याः अत एव नष्टाम्रप्रायाः ॥४४॥ चंचतां शोभमानानां चंद्रकिरणानां स्पर्शेन यो हर्षस्तेन
नोन्मीलिता ईषत्प्रकाशिता तारकानक्षत्राणि नेत्रकनीनिका च यया सा रागवती रक्तवर्णा अनुरक्ता च ॥ अंवरमाकाशं वस्त्रं च समासोक्तिरलंकारः कौ

विचित्राःसकारंडवचक्रवाका महारवैर्भिन्नकरा गजेंद्राः ॥ सरस्सु वद्धांवुजभूषणेषु विक्षोभ्य विक्षोभ्य जलं पिवंति ॥४१॥ व्यपेतपंका
सु सवालुकासु प्रसन्नतोयासु सगोकुलासु ॥ ससारसारावविनादितासु नदीषु हंसा निपतंति हृष्टाः ॥४२॥ नदीघनप्रस्रवणो
दकानामतिप्रवृद्धानिलवर्हिणानां ॥ प्लवंगमानां च गतोत्सवानां ध्रुवं रवाः संप्रति संप्रनष्टाः ॥४३॥ अनेकवर्णाः सुविनष्टका
या नवोदितेष्वंवुधरेषु नष्टाः ॥ क्षुधार्दिता घोरविषा विलेभ्यश्चिरोषितापि प्रसरंति सर्पाः ॥४४॥ चंचच्चंद्रकरस्पर्शहर्षोन्मी
लिततारका ॥ अहो रागवती संध्या जहाति स्वयमंवरं ॥४५॥ रात्रिः शशांकोदितसौम्यवक्त्रा तारागणोन्मीलितचारु
नेत्रा ॥ ज्योत्स्नांशुकप्रावरणा विभाति नारीव शुक्लांशुकसंवृतांगी ॥४६॥ विपक्वशालिप्रसवानि भुक्त्वा प्रहर्षिता सार
सचारुपंक्तिः ॥ नभः समाक्रामति शीघ्रवेगा वातावधूता ग्रथितेव माला ॥४७॥ श्रीरामाय रामचन्द्राय नमः ॥ ❀ ॥

तकरस्पर्शसुखाद्धर्षोन्मीलितनयनायास्तदनुरागवशात् स्वतो विगलितवसनायाः कामुकाहतांतस्य संध्यायामारोपादिति बोध्यं ॥४५॥ शशांको
दितेति ॥ उदितशशांकेत्यर्थ ॥ तारागणास्वोन्मीलितानि चारूणि नेत्राणि यस्याः सा ॥४६॥ शालिप्रसवा व्रीहयः मालेव नभः समाक्रामति ॥ ४७ ॥

सुप्तैकहंसमिति ॥ चंद्रप्रतिबिंबवत् ॥४८॥ प्रकीर्णा हंसा इवाकुला मेखला यासां वाप्युन्नमानांउन्नमवापीनां ॥४९॥ वेणुस्वनरूपेण व्यंजितेन व्यक्तेन तूर्येण वाद्यघो
षेणा मिश्रः प्रत्यूषकाले प्रातःकाले ॥ अनिलेन संप्रहतैः तत्संबंधेन जातैः संमूर्छितो व्याप्तः गह्वराणां गिरिगह्वराणां वृषाणां च वनवर्त्तिनां शब्दोन्योन्यं समापूरयती
ववर्धयतीव गह्वरगोवृषशब्दास्तज्जात्यात् परस्पर वर्धका इत्यर्थः ॥ गह्वरगोवृषाणामिति पाठः ॥५०॥ नदीनां कूलानि मृदुमारुतेन व्याधूयमानैः कंपितैः कुसु

सुप्तैकहंसं कुमुदैरुपेतं महाह्रदस्थं सलिलं विभाति ॥ घनैर्विमुक्तं निशि पूर्णचंद्रं तारागणाकीर्णमिवांतरिक्षं ॥४८॥ प्रकीर्ण
हंसाकुलमेखलानां प्रवृद्धपद्मोत्पलमालिनीनां ॥ वाप्युन्नमानामधिकाद्यलक्ष्मीर्वरांगनानामिवभूषितानां ॥४९॥ वेणु
स्वनव्यंजितनूर्यमिश्रः प्रत्यूषकालेनिलसंप्रहतैः ॥ संमूर्छितो गह्वरगोवृषाणामन्योन्यमापूरयतीव शब्दः ॥५०॥ नवैर्न
दीनां कुसुमप्रहासैर्व्याधूयमानैर्मृदुमारुतेन ॥ धौतामलक्षौमपटप्रकाशैः कूलानि काशैरुपशोभितानि ॥५१॥ व
नप्रचंडा मधुपानशौंडाः प्रियान्विताः षट्चरणाः प्रहृष्टाः ॥ वनेषु मत्ताः पवनानुयाताः कुर्वंति पद्मासनरेणुगौराः
॥५२॥ जलं प्रसन्नं कुसुमप्रहासं क्रौंचस्वनं शालिवनं विपक्वं ॥ मृदुश्च वायुर्विमलश्च चंद्रः शंसंति वर्षव्यपनीतका
लं ॥५३॥ मीनोपसंदर्शितमेखलानां नदीवधूनां गतयोद्य मंदाः ॥ कांतोपभुक्तालसगामिनीनां प्रभातकालेष्विव कामिनी

मप्रहासैः कुसुमविकासैर्धुतैः काशैरुपशोभितानि ॥५१॥ प्रचंडाः प्रगल्भाः शौंडाः मत्ताः पद्मानामसनपुष्पाणां च रेणुभिर्गौराः पीनाः पवनानुयाताः कुर्वंति गंधवतो
भादिति भावः ॥५२॥ कुसुमरूपः प्रहासो यस्य तं शालिवनं शालिसमूहः वर्षस्य व्यपनीतं व्यपनयो यस्मिन् तं कालं ॥५३॥ मीनास्त्वोपसंदर्शिता मेखला यासां ॥५४

चक्रवाकशैवलकाशाः रोचनापत्त्रैरेखाउत्कूलस्थानीयाः ॥५५॥ सप्तम्यंतेनवनविशेषणेनवनेषुनिर्देशः ॥ दृढीतेनचापेनोघनेत्यारब्धोविरहिविषयकेदंडेचंडप्रचं
डः प्रचंडश्चापोयस्यसइदंहेतुगर्भं ॥५६॥ ॥५७॥ दर्शयंतीतिपद्येसमासोक्तिः स्पष्टैवव्यंग्या ॥५८॥ ५९॥ ६०॥ यात्रायात्राकालइत्यर्थः ॥ तथाविधंयात्राप्रयोगि

सचक्रवाकानिसशैवलानिकाशैर्दुकूलैरिवसंवृतानि ॥ सपत्त्ररेखाणिसरोचनानिवधूमुखानीवनदीमुखानि ॥५५॥ प्रफु
ल्लवाणासनचित्रितेषुप्रहृष्टषट्पादनिकूजितेषु ॥ दृढीनचापोघनदंडचंडः प्रचंडचापोद्यवनेषुकामः ॥५६॥ लोकं
सुवृष्ट्यापरितोषयित्वानदीस्तटाकानिचपूरयित्वा ॥ निष्पन्नसस्यांवसुधांचकृत्वात्यक्त्वानभस्तोयधराः प्रनष्टाः ॥५७॥
दर्शयंतिशरन्नद्यः पुलिनानिशनैः शनैः ॥ नवसंगमसंव्रीडाजघनानीवयोषितः ॥५८॥ प्रसन्नसलिलाः सौम्यकुररा
भिविनादिताः ॥ चक्रवाकगणाकीर्णाविभांतिसलिलाशयाः ॥५९॥ अन्योन्यबद्धवैराणांजिगीषूणांनृपात्मज ॥ उ
द्योगसमयः सौम्यपार्थिवानामुपस्थितः ॥६०॥ इयंसाप्रथमायात्रापार्थिवानांनृपात्मज ॥ नचपश्यामिसुग्रीवमुद्यो
गंचतथाविधं ॥६१॥ असनाः सप्तपर्णाश्चकोविदाराश्चपुष्पिताः ॥ दृश्यंतेबंधुजीवाश्चश्यामाश्चगिरिसानुषु ॥६२॥
हंससारसचक्राह्वैः कुररैश्चसमंततः ॥ पुलिनान्यवकीर्णानिनदीनांपश्यलक्ष्मण ॥६३॥ चत्वारोवार्षिकामासा
गतावर्षशतोपमाः ॥ ममशोकाभितप्तस्यतथासीतामपश्यतः ॥६४॥ ॥

नत्तुद्योगंचतस्यनपश्यामीत्यनुकर्षः ॥६१॥ श्यामास्तमालाः ॥६२॥ ६३॥ चत्वारइति ॥ यद्यपि ॥ चतुर्थोमासोविद्यतएवतथापितत्रोद्योगाभावेनतस्यापिगतप्रायत्वात्कृत्वाइत्युक्तिः ॥६४॥

352

कामासीनानन्त्राह ॥ या विषमं दंडकारण्यारण्यं वनमुद्यानमिव ज्ञात्वा ॥ चक्रवाकी भर्त्तारमिव मां पृष्ठतोनुगता ॥ ६५ ॥ ६६ ॥ कृपायाश्च करणो हेतुमन्वयति ॥ अनाथ इति ॥ दूरग्रह इति पा
ठः दूरवर्तिस्त्रीविषयो ग्रहो रावणाभिनिवेशो वा यस्येत्यर्थः ॥ ६७ ॥ वानरराजस्य वानरराजेन शेषे षष्ठी ॥ ६८ ॥ परिसंख्याय गणयित्वानूद्यमाने समयमिति शेषः ॥ ६९ ॥ ७० ॥

चक्रवाकीव भर्त्तारं पृष्ठतोनुगता वनं ॥ विषमं दंडकारण्यमुद्यानमिव चांगना ॥ ६५ ॥ प्रियाविहीने दुःखार्त्ते हृतराज्ये
विवासिते कृपां न कुरुते राजा सुग्रीवो मयि लक्ष्मण ॥ ६६ ॥ अनाथो हृतराज्योयं रावणेन च धर्षितः ॥ दीनो दूरगृहः
कामी मां चैव शरणं गतः ॥ ६७ ॥ इत्येतैः कारणैः सौम्य सुग्रीवस्य दुरात्मनः ॥ अहं वानरराजस्य परिभूतः परंतप ॥ ६८ ॥
स कालं परिसंख्याय शीतायाः परिमार्गणे ॥ कृतार्थः समयं कृत्वा दुर्मतिर्नावबुध्यते ॥ ६९ ॥ स किष्किंधां प्रविश्य
त्वं ब्रूहि वानरपुंगवं ॥ मूर्खं ग्राम्यसुखे सक्तं सुग्रीवं वचनान्मम ॥ ७० ॥ अर्थिनामुपपन्नानां पूर्वं चाप्युपकारि
णां ॥ आशां संश्रुत्य यो हंति स लोके पुरुषाधमः ॥ ७१ ॥ शुभं वा यदि वा पापं यो हि वाक्यमुदीरितं ॥ सत्येन परि
गृह्णाति स वीरः पुरुषोत्तमः ॥ ७२ ॥ कृतार्था ह्यकृतार्थानां मित्राणां न भवंति ये ॥ तान्मृतानपि क्रव्यादाः कृतघ्नान्नो
पभुंजते ॥ ७३ ॥ नूनं कांचनपृष्ठस्य विकृष्टस्य मया रणे ॥ द्रष्टुमिच्छसि चापस्य रूपं विद्युद्गणोपमं ॥ ७४ ॥ घोरं ज्यात
लनिर्घोषं क्रुद्धस्य मम संयुगे ॥ निर्घोषमिव वज्रस्य पुनः संश्रोतुमिच्छसि ॥ ७५ ॥

((उपपन्नानां बलवीर्यादियुक्तानां आशां अभिमता
र्थविषयां ॥ संश्रुत्य प्रतिज्ञाय ॥ ७१ ॥ सत्येनामोघतया ॥ ७२ ॥ न भवंति कार्यायेति शेषः क्रव्यारभ्यासयः ॥ ७३ ॥ ७४ ॥ संश्रोतुमिच्छसीत्युत्तरं इति सुग्रीवं ब्रूहीति संबंधः ७५

एवंगतेइत्यस्यविवरणंपराक्रमेपरिज्ञानेइतित्वत्सहायस्यमेपराक्रमेज्ञानेपित्वस्यसुग्रीवस्यविनावालिवन्मामपिमारिष्यतीतिचिन्ताकामंनस्यादित्याशयमितिभावः ॥७६॥ यदर्थं
सीतान्वेषणार्थंत्वयमारंभः एतत्तत्त्वरूपःकृतःतद्विषयंसमयंकृतार्थोनिष्पन्नस्वप्रयोजनोनाभिजानातिनस्मरतीति ॥७७॥ वर्षाः वर्षान्तरकालंसमयकालसंकेतनविषयकालं
प्रतिज्ञायव्यतीतान् ॥ वानीतप्रायान् ॥७८॥ पानंमद्यपानं ॥७९॥ उच्यतामित्युक्तंकिंवक्तव्यमित्यत्राह यद्रूपमितिममरोषस्य यद्रूपमुचितमितिशेषः ॥ नब्रूयाइदंवचश्च

काममेवंगतेप्यस्यपरिज्ञानेपराक्रमे ॥ त्वत्सहायस्यमेवीरनचिंतास्यान्नृपात्मज ॥७६॥ यदर्थमयमारंभःकृतःपरपुरंजय
समयंनाभिजानातिकृतार्थःप्लवगेश्वरः ॥७७॥ वर्षासमयकालंतुप्रतिज्ञायहरीश्वरः ॥ व्यतीतांश्चतुरोमासान्विहरन्नावबु
ध्यते ॥७८॥ सामात्यपरिषत्क्रीडन्पानमेवोपसेवते ॥ शोकदीनेषुनास्मासुसुग्रीवःकुरुतेदयां ॥७९॥ उच्यतांगच्छ
सुग्रीवस्त्वयावीरमहाबलः ॥ ममरोषस्ययद्रूपंब्रूयाश्चैनमिदंवचः ॥८०॥ नससंकुचितःपंथायेनवालीहतोगतः
समयेतिष्ठसुग्रीवमावालिपथमन्वगाः ॥८१॥ एकएवरणेवालीशरेणनिहतोमया ॥ त्वांतुसत्यादतिक्रांतंहनि
ष्यामिसबांधवं ॥८२॥ यदेवंविहितेकार्येयद्धितंपुरुषर्षभ ॥ तत्तद्ब्रूहिनरश्रेष्ठत्वरकालव्यतिक्रमः ॥८३॥ कुरुष्व
सत्यंममवानरेश्वरप्रतिश्रुतंधर्ममवेक्ष्यशाश्वतं ॥ मावालिनंप्रेतगतोयमक्षयेत्वमद्यपश्येर्ममचोदितःशरैः ॥८४॥
सपूर्वजंतीव्रविवृद्धकोपंलालप्यमानंप्रसमीक्ष्यदीनं ॥ चकारतीव्रांमतिमुग्रतेजाहरीश्वरेमानववंशवर्धनः ॥८५

ब्रूयाः ॥८०॥ तद्वचनमाहनेति समयेतिष्ठसमयमहासीरित्यर्थः ॥८१॥८२॥ एवंगतेविहितेकार्येयद्धितंममस्माकंतस्यवचनंब्रूहित्वराहेतुःकालव्यतिक्रमःजायतेइतिशेषः ॥८३॥
उपदेशसंक्षेपःकुरुष्वेतिप्रेतगतःप्रेतत्वंप्राप्तःयमक्षयेयमगृहेमावालिनंयथेषःममशरैःचोदितःप्रेरितःप्रेतत्वायेतिशेषःइतिब्रूहीत्यन्वयः ॥८४॥ मानववंशवर्धनोलक्ष्मण

153

॥राम॰॥
॥७६॥

॥८५॥ मंगलार्थं

इतिरामाभिरामेश्रीरा० किष्किंधाकांडे त्रिंशः सर्गः ॥ ३० ॥ सलक्ष्मण ॥ साधुवृत्ते साधूनां वृत्ते ॥ स्थिरस्नेहग्रालक्षणे ॥ कर्मणाजनितान्फलानुषंगानवकंटकराज्यभोगसंबंधान्न
मन्यतेसरवम्लानितिशेषः ॥ अतस्ववानरराज्यलक्ष्मींनभोक्ष्यतेहियस्मात्तस्मात्तथानस्वकारस्यवुद्धिः ॥ प्रेमपरिपालनेअतिक्रांतंमनक्रमतेतथाहिनातिक्रमतइतिपाठः
पांक्र. ॥ २ ॥ तत्रहेतुमाह ॥ मतिक्षयादितिमतिक्षयेहेतुस्तवप्रसादः अतस्तस्यप्रतिकारवुद्धिः प्रत्युपकारवुद्धिर्नवर्त्ततइतिशेषः नहेयंहृतंनानुपालनीयमित्यर्थ ॥ ३ ॥

इत्यार्षेश्रीमद्रामायणेवा० किष्किंधाकांडेत्रिंशःसर्गः ॥ ३० ॥ सकामिनंदीनमदीनसत्वंशोकाभिपन्नंसमुदीर्णकामं ॥ न
रेंद्रसूनुर्नरदेवपुत्रंरामानुजःपूर्वजमित्युवाच ॥ १ ॥ नवानरःस्थास्यतिसाधुवृत्तेनमन्यतेकर्मफलानुषंगान् ॥ नभोक्ष्य
तेवानरराज्यलक्ष्मींतथाहिनातिक्रमतेस्यवुद्धिः ॥ २ ॥ मतिक्षयाद्ग्राम्यसुखेषुसक्तस्तवप्रसादात्प्रतिकारवुद्धिः ॥ हतोग्र
जंपश्यतुवीरवालिनंनराज्यमेवंविगुणस्यदेयं ॥ ३ ॥ नधारयेकोपमुदीर्णवेगंनिहन्मिसुग्रीवमसत्यमद्य ॥ हरिप्र
वीरैःसहवालिपुत्रोनरेंद्रपुत्र्याविचयंकरोतु ॥ ४ ॥ तमात्तवाणासनमुत्पतंतंनिवेदितार्थंरणचंडकोपं ॥ उवाचरामः
परवीरहंतास्ववीक्षितंसानुनयंचवाक्यं ॥ ५ ॥ नहिवैत्वद्विधोलोकेपापमेवंसमाचरेत् ॥ कोपमार्येणयोहंतिसवीरः
पुरुषोत्तमः ॥ ६ ॥ नेदमत्रत्वयाग्राह्यंसाधुवृत्तेनलक्ष्मण ॥ तांप्रीतिमनुवर्त्तस्वपूर्ववृत्तंचसंगतं ॥ ७ ॥

॥ नधारयेधारयितुंनशक्नोमि ॥ वा
लिपुत्रोंगदः विचयमन्वेषणं ॥ सुग्रीवंहत्वातस्मैराज्यसमर्पणादितिभावः ॥ ४ ॥ निवेदितार्थंविज्ञापितसुग्रीववधप्रवृत्तिं ॥ स्ववीक्षितंसुष्ठुअवीक्षितंसमयोचितं ॥ ५ ॥ त्वद्विधः
धर्मज्ञःपापंमित्रवधाध्यवसायरूपंआर्येणसम्यग्विवेकेन ॥ ६ ॥ इदंमित्रघातरूपंवस्तुनग्राह्यंननिश्चेयं ॥ साधुवृत्तंसाधुत्वंतेनतांपूर्वकृतांप्रीतिंअनुवर्त्तस्वसुग्रीवेइतिशेषः
पूर्ववृत्तंसंगतंचसख्यंचस्मरेतिशेषः ॥ ७ ॥

कालपर्यायविकालातिक्रमेव्यतीतंअतिक्रममेवकालोतिक्रांतइत्येववक्तुमर्हसि। नापरंकिंचिदित्यर्थः॥८॥ अग्रजेनरामेण॥९॥ भवनंप्रतिजगामसंरब्धः नातिकालातिक्रमजको
प॥१०॥ कालांतकोयमःकालादिवभयंकरं सानुमान्मंदरइवजगामेत्यन्वयः॥११॥ यथोक्तकारीरामस्येतिशेषः॥ वचनंसुग्रीवंप्रतिस्वेनवक्तव्यंउत्तरंतदुपरिसुग्रीवेणवक्त
व्यंसोत्तरंतदुपरिस्ववक्तव्योत्तरसहितंमत्वाआलोच्य॥१२॥ भ्रातुरामस्यकामोमनोरथः तज्जन्योयःक्रोधस्तद्विघातजन्यःक्रोधस्तत्समुत्थेनतज्जन्येनक्रोधाग्निनाहृ

सामोपहितयावाचारूक्षाणिपरिवर्जयन्॥ वक्तुमर्हसिसुग्रीवंव्यतीतंकालपर्यये॥८॥ सोग्रजेनानुशिष्टार्थोयथाव
त्पुरुषर्षभः॥ प्रविवेशपुरींवीरोलक्ष्मणःपरवीरहा॥९॥ ततःशुभमतिःप्राज्ञोभ्रातुःप्रियहितेरतः॥ लक्ष्मणःप्रति
संरब्धोजगामभवनंकपेः॥१०॥ शक्रबाणासनप्रख्यंधनुःकालांतकोयमः॥ प्रगृह्यगिरिशृंगाभंमंदरःसानुमानिव॥११॥
यथोक्तकारीवचनमुत्तरंचैवसोत्तरं॥ बृहस्पतिसमोबुध्वामत्वारामानुजस्तदा॥१२॥ कामक्रोधसमुत्थेनभ्रातुःक्रोधा
ग्निनावृतः॥ प्रभंजनइवाप्रीतःप्रययौलक्ष्मणस्ततः॥१३॥ सालतालाश्वकर्णांश्चतरसापातयन्बलात्॥ पर्यस्यन्गि
रिकूटानिद्रुमानन्यांश्चवेगितः॥१४॥ शिलाश्चशकलीकुर्वन्पद्भ्यांगजइवाशुगः॥ दूरमेकपदंत्यक्त्वाययौकार्यव
रु॰ शाद्द्रुतं॥१५॥ तामपश्यद्बलाकीर्णांहरिराजमहापुरीं॥ दुर्गामिक्ष्वाकुशार्दूलःकिष्किंधांगिरिसंकटे॥१६॥ छ ॥

तः॥ अप्रीतस्त्वाप्रीतःप्रभंजनोवायुरिववेगेनप्रययौ॥१३॥ तरसातुरूढवेगेनपर्यस्यन्क्षिपन्वेगितःसंजातवेगः॥१४॥ एकपदंएकैकपदंदूरंयथाभवतितथात्यक्त्वा
कार्यवशाद्द्रुतंययौ॥१५॥ बलाकीर्णांवानरसेनाव्याप्तांगिरिसंकटेभूधरवर्त्मानां॥१६॥ श्रीरामायरामचन्द्रायश्रीकृष्णायवासुदेवायनमः छ

154

॥ राम॰ ॥
॥ ७७ ॥

१७।क्रुद्धलक्ष्मणदर्शनेन भीत्या शैलभंगादिग्रहो वानराणां।१८।द्विगुणां क्रुद्धः सा दृष्ट्वेमे प्रणामं संत्यक्त्वा प्रहरणं गृह्णन्तीति कोपद्वैगुण्यं।१९।२०।२१।२२।ततः सचिवसं
दिष्टाः सुग्रीवं बोधयित्वा मदनुमत्या लक्ष्मणोस्माभिर्यावत्प्रवेश्यते तावत्क्रुद्धलक्ष्मणप्रवेशं निरुन्धानास्तिष्ठत इत्येवं सचिवैर्हनूमदादिभिः संदिष्टा हरयो नग
रान्निर्ययुः।२३।विक्रान्तदर्शना भीमदर्शनाः विहृतदर्शनाः प्रकटदर्शनाः।२४।दशगुणोत्तराः शतनागबला इत्यर्थः नागसहस्रस्य च वर्चसः नागसहस्रतेजस्तुल्य

रोषात्प्रस्फुरमाणोष्ठः सुग्रीवं प्रति लक्ष्मणः। ददर्श वानरान्भीमान्किष्किंधायां वहिश्चरान्॥ १७॥ तं दृष्ट्वा वानराः सर्वे लक्ष्मणं
पुरुषर्षभं॥ शैलशृंगाणि शतशः प्रवृद्धांश्च महीरुहान्॥ जगृहुः कुंजरप्रख्या वानराः पर्वतान्तरे॥ १८॥ तान्गृहीतप्रहर
णान्सर्वान्दृष्ट्वा तु लक्ष्मणः। वभूव द्विगुणं क्रुद्धो वह्विंधन इवानलः॥ १९॥ तं ते भयपरीतांगाः क्षुब्धं दृष्ट्वा प्लवंगमाः। का
लमृत्युयुगान्ताभं शतशो विद्रुता दिशः॥ २०॥ ततः सुग्रीवभवनं प्रविश्य हरिपुंगवाः॥ क्रोधमागमनं चैव लक्ष्मणस्य न्य
वेदयन्॥ २१॥ तारया सहितः कामी सक्तः कपिवृषस्तदा। न तेषां कपिसिंहानां शुश्राव वचनं तदा॥ २२॥ ततः सचिव
संदिष्टा हरयो रोमहर्षणाः। गिरिकुंजरमेघाभा नगरान्निर्ययुस्तदा॥ २३॥ नखदंष्ट्रायुधाः सर्वे वीराः विकृतदर्शनाः
सर्वे शार्दूलदंष्ट्राश्च सर्वे विकृतदर्शनाः॥ २४॥ दशनागबलाः केचित्केचिद्दशगुणोत्तराः। केचिन्नागसहस्रस्य वभूव
स्तुल्यवर्चसः॥ २५॥ ततस्तैः कपिभिर्व्याप्तां द्रुमहस्तैर्महावलैः। अपश्यल्लक्ष्मणः क्रुद्धः किष्किंधां तां दुरासदां॥ २६॥

तेजसः॥ २५॥ उरगसप्तम्यपश्यदित्यन्वयः॥ २६॥ श्रीरामाय रामचन्द्राय श्रीकृष्णाय वासुदेवाय नमो नमस्तु॥ छ॥ रामरामरामरामरामरामराम

शकाराद्बहिर्वर्त्तिनीपरिखा तदंतरात्तद्द्वयोरपि वहिर्निष्क्रम्य ॥ आविर्नंप्रकटितं यथा तथा मस्तुः ॥ २७ ॥ प्रमादंस्त्वचाहानं रुप्रतिरोधं च पूर्वजस्य रामस्यार्थं च हृष्ट्वा विचार्य ॥
२८ ॥ दीर्घउष्णो महानुच्छ्वासो यस्य ॥ २९ ॥ बाणस्य शल्यमेव स्फुरंती जिह्वा यस्य सः सायकासनं धनुरेव भोगो यस्य स्वतेजोरूपविशेषेण संभृतो व्याप्तः ॥ ३० ॥ विषाद
मगमत् ॥ एतावत्पर्यंतं रामकार्यं न चिंतितमिति विषादः ॥ इत्युतरूपं वं प्रकारेणेत्यर्थः ॥ ३२ ॥ तं प्रकारं दर्शयति एष इति ॥ ३३ ॥ इदमुक्तं मम वाक्यं तस्मै इति

ततस्ते हरयः सर्वे प्राकारपरिखांतरात् ॥ निष्क्रम्योदग्रसत्वास्तु तस्थुराविष्कृतं तदा ॥ २७ ॥ सुग्रीवस्य प्रमादं च पूर्वजस्यार्थमा
त्मवान् ॥ दृष्ट्वा क्रोधवशं वीरः पुनरेव जगाम सः ॥ २८ ॥ सदीर्घोष्णमहोच्छ्वासः कोपसंरक्तलोचनः ॥ बभूव नरशार्दूलः सधू
मइव पावकः ॥ २९ ॥ बाणशल्यस्फुरज्जिह्वः सायकासनभोगवान् ॥ स्वतेजोविषसंभूतः पंचास्य इव पन्नगः ॥ ३० ॥ तं दी
प्तमिव कालाग्निं नागेंद्रमिव कोपितं ॥ समासाद्यांगदस्त्रासाद्विषादमगमत्परं ॥ ३१ ॥ सोंगदं रोषताम्राक्षः संदिदेश म
हायशाः ॥ सुग्रीवः कथ्यतां वत्स ममागमनमित्युत ॥ ३२ ॥ एष रामानुजः प्राप्तस्त्वत्सकाशमरिंदम ॥ भ्रातुर्व्यसनसंत
प्तो द्वारि तिष्ठति लक्ष्मणः ॥ ३३ ॥ तस्य वाक्यं यदि रुचिः क्रियतां साधु वानर ॥ इत्युक्त्वा शीघ्रमागच्छ वत्स वाक्यमिदं मम ॥ ३४ ॥
लक्ष्मणस्य वचः श्रुत्वा शोकाविष्टोंगदोब्रवीत् ॥ पितुः समीपमागम्य सौमित्रिरयमागतः ॥ ३५ ॥ छ ॥ छ ॥

उक्तप्रकारेण उक्त्वा स वानरः सुग्रीवः साधु साधुकारी यथा भवति तथा क्रियतां चानंतरं तस्य साधु यदि रुचिर्भवति तदा तस्य वाक्यं श्रुत्वा शीघ्रमागच्छ ॥ ३४ ॥ ३५ ॥
श्रीरामाय रामचन्द्राय नमः श्रीकृष्णाय वासुदेवाय नमो नमः ॥ छ ॥ श्रीराधामाधवजीसहाय नमो नमः ॥ छ ॥ रामरामरामरामरामरामरामराम

लक्ष्मणस्येतिश्लोकेनसंक्षिप्योक्तस्यार्थस्यविस्तरोप्येति। संभ्रांतभावःसंभ्रांतचित्तः। परहीनवक्त्रःपरमतिशयेनहीनंवक्त्रंयस्यसः परिहीनेतिपाठांतरं निर्गम्यलक्ष्मणसन्नि
हितदेशात्परावृत्तेत्यर्थः। पूर्वंनृपतेस्ततोरुमायाइदमुपलक्षणंतारायाश्चचरणावित्यन्वयः।। तदेवविस्तारयति। संस्पृश्येति मातुस्तारायाः।। ३७।। निद्रयाक्लांतासंवी
तोव्याप्तश्चेत्यर्थः। नविबुद्धवान्। तत्ततिनद्वचनंचेत्यर्थः यतोमदनेनमोहितोमदमत्तश्चबभूवासीत्।। ३८।। ततः अंगदस्यसुग्रीवसमीपगमनानंतरं। वा

अथांगदस्तस्यसुतीव्रवाचासंभ्रांतभावःपरदीनवक्त्रः। निर्गम्यपूर्वंनृपतेस्तरस्वीततोरुमायाश्चरणौववंदे। ३६। संस्पृश्य
पादौपितुरुग्रतेजाजग्राहमातुःपुनरेवपादौ।। पादौरुमायाश्चनिपीडयित्वानिवेदयामासततस्तदर्थं।। ३७।। सनिद्राक्लां
तसंवीतोवानरोनविबुद्धवान्।। बभूवमदमत्तश्चमदनेनचमोहितः।। ३८।। ततःकिलकिलांचक्रुर्लक्ष्मणंप्रेक्ष्यवानराः।
प्रसादयंतस्तंक्रुद्धंभयमोहितचेतसः।। ३९।। तेमहौघनिभंदृष्ट्वावज्राशनिसमस्वनं।। सिंहनादंसमंचक्रुर्लक्ष्मणस्य
समीपतः।। ४०।। तेनशब्देनमहताप्रत्यबुध्यतवानरः।। मदविह्वलताम्राक्षोव्याकुलःस्रग्विभूषणः।। ४१।। अथांगदव
चःश्रुत्वातेनैवचसमागतौ।। मंत्रिणौवानरेंद्रस्यसम्मतोदारदर्शनौ।। ४२।। यक्षश्चैवप्रभावश्चमंत्रिणावर्थधर्मयोः
वक्तुमुच्चावचंप्राप्तंलक्ष्मणंतौशशंसतुः।। ४३।।

(नराणांभयक्रोधादिजःवक्त्रसमूहःकिलकिलातांलक्ष्मणं।। ३९।। तेलक्ष्मणंदृष्ट्वामहौघनिभंवज्रसदृ
शशब्दंचसमंसहसासिंहनादंचक्रुःसुग्रीवबोधनायेतिशेषः। ४०। ४१।। अथेति वानरशब्देनप्रबुद्धस्यवानरेंद्रस्यसुग्रीवस्यसमीपमंगदवचःश्रुत्वातेनांगदेनैवसहमं
त्रिणौवानरेंद्रस्यसमीपमागतौसम्मतौचताउद्दारदर्शनौचसम्मतोदारदर्शनौ।। ४२।। कौतौतत्राह। यक्षइत्यादिअर्थधर्मयोर्विषयेउच्चावचंस्वराज्ञेवक्तुंप्रा

सार्थनिश्चितैः अर्थनिश्चयसहितैः वचनैः प्रसादयित्वा शशंसतुरित्यन्वयः ॥४४॥ राज्यार्हौ त्रिलोकीराज्यार्हौ राज्यदायिनौ न वेति शेषः मनुष्यभावं प्राप्तावित्यनेन वक्तृतो
न मनुष्याविति स्पृहवितं ॥४५॥ यस्य भीता यस्माद्भीताः ॥४६॥ वाक्यं रामवाक्यं सारथिर्यस्य व्यवसायः कर्तव्यार्थनिश्चयः स रथो यस्य ॥४७ ४८॥ धर्मात्मा वद

प्रसादयित्वा सुग्रीवं वचनैः सार्थनिश्चितैः ॥ आसीनं पर्युपासीनौ यथाशक्रं मरुत्पतिं ॥४४॥ सत्यसंधौ महाभागौ भ्रात
रौ रामलक्ष्मणौ ॥ मनुष्यभावं संप्राप्तौ राज्यार्हौ राज्यदायिनौ ॥४५॥ तयोरेको धनुष्पाणिर्द्वारि तिष्ठति लक्ष्मणः ॥ य
स्य भीताः प्रवेपंते नादान्मुंचंति वानराः ॥४६॥ स एष राघववचनाल्लक्ष्मणो वाक्यसारथिः ॥ व्यवसायरथः प्राप्तस्त
स्य रामस्य शासनात् ॥४७॥ अयं च तनयो राजन् तारायाः दयितोंगदः ॥ लक्ष्मणेन सकाशं ते प्रेषितस्त्वरयानघः
॥४८॥ सोयं रोषपरीताक्षो द्वारि तिष्ठति वीर्यवान् ॥ वानरान्वानरपते चक्षुषा निर्दहन्निव ॥४९॥ तस्य मूर्ध्ना प्रणामं
त्वं सपुत्रः सहबांधवः ॥ गच्छ शीघ्रं महाराज रोषो ह्यस्योपशाम्यतां ॥५०॥ यथा हि रामो धर्मात्मा तत्कुरुष्व समाहितः
राजंस्तिष्ठस्व समये भव सत्यप्रतिश्रवः ॥५१॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे एकत्रिंशः सर्गः ॥३१॥ अं
गदस्य वचः श्रुत्वा सुग्रीवः सचिवैः सह ॥ लक्ष्मणं कुपितं श्रुत्वा मुमोचासनमात्मवान् ॥१॥ स च तानब्रवीद्वाक्यं निश्चित्य
गुरुलाघवं ॥ मंत्रज्ञान्मंत्रकुशलो मंत्रेषु परिनिष्ठितः ॥२॥

(तीति शेषः ॥ सत्यप्रतिश्रवः सत्यप्रतिज्ञः ॥५१॥ करणमात्मनः ॥ इति रामाभिरा
मे श्रीरामीयरामायणतिलके किष्किंधाकांडे एकत्रिंशः सर्गः ॥३१॥ अंगदस्येति ॥ गुरुलाघवं गुरुत्वलघुत्वे इत्यर्थः ॥१॥ २॥ रामरामरामराम

दुर्व्याहृतंअनुचितवचनमुक्तंदुरनुष्ठितं।अनुचितंकृतंपक्तमितिशेषः॥३॥कोपकारणमुन्नयति।असुहृद्भिरिति।असुहृदःशत्रवःअमित्राःअपकारिणःअं
नरंछिद्रंअसंभूतान् अनुसन्धानुश्राविनोनूनमितिशेषः॥४॥अत्रलक्ष्मणकोपविषयेतावदथमेनःयथासन्वात्मिकाबुद्धिर्ज्ञानंयस्मिन्निश्चयेममभा
वस्यकोपस्यनिश्चयःतात्त्विककोपनिमित्तस्यनिश्चयोविज्ञेयःकर्त्तव्यः॥५॥त्रासोमदपराधमूलइतिशेषःकृतमार्हित्रासोगतआहमित्रमिति अस्थ

नमेदुर्व्याहृतंकिंचिन्नापिमेदुरनुष्ठितं॥लक्ष्मणोराघवभ्राताक्रुद्धःकिमितिचिंतये॥३॥असुहृद्भिर्ममामित्रैर्नि
त्यमंतरदर्शिभिः॥ममदोषानसंभूतान्श्राविनोराघवानुजः॥४॥अत्रतावद्यथाबुद्धिःसर्वैरेवयथाविधि।भा
वस्यनिश्चयस्तावद्विज्ञेयोनिपुणंशनैः॥५॥नखल्वस्तिममत्रासोलक्ष्मणान्नापिराघवात्॥मित्रंत्वस्थानकुपि
तंजनयत्येवसंभ्रमं॥६॥सर्वथासुकरंमित्रंदुष्करंप्रतिपालनं॥अनित्यत्वात्तुचित्तानांप्रीतिरल्पेपिभिद्यते॥७॥
अतोनिमित्तंत्रस्तोहंरामेणतुमहात्मना॥यन्ममोपकृतंशक्यंप्रतिकर्तुंनतन्मया॥८॥सुग्रीवेणैवमुक्तेतुहनू
मान्हरिपुंगवः॥उवाचस्वेनतर्केणमध्येवानरमंत्रिणां॥९॥सर्वथानैतदाश्चर्यंयत्त्वंहरिगणेश्वर॥नवि
स्मरस्यविस्रब्धमुपकारंकृतंशुभं॥१०॥

(ने॰कांडेवासत्वापराधाभावेपिपरिदुष्कृतमिथ्योपजापेनकुपितंसंजातकोपंमित्रंसंभ्रमंभयंजनय
त्येव॥६॥रिपुजोपजापपरिहारेणसख्यपालनंदुष्करमित्याह।सर्वथेति।अल्पेपिउपजापइतिशेषः॥७॥अतोनिमित्तं।अस्मान्निमित्तात् अथस्वदोपशं
कानिहत्त्वयेकृतज्ञतांमंत्रिभ्योदर्शयतिरामेणात्विति॥८॥अथसुख्यमंत्रीहनूमान्कोपनिमित्तंनिश्चिनोतिआहसुग्रीवेणेतितर्कोयुक्तिःअथनिश्चयंविवक्षुः

स्वस्यगुणग्राहित्वरूपंमंत्रिलक्षणंप्रकटयतिसर्वथेति॥१०॥

उपकारमेवाहराघवेणेति। भयंवालिपराक्रमजंवालिनश्छलेनवधकृतंलोकापवादजंवा॥११॥ प्रणयात्क्रुद्धः नतुत्वद्विपूपजायनइत्यर्थः॥१२॥ प्रणयकोपस्या
पिनिमित्ताभासंदर्शयति त्वमिति। कालंप्रतिज्ञातंसीतान्वेषणकालंप्रवृत्ताप्रकर्षेणातिक्रान्तागतशायेतियावत्॥१३॥१४॥ व्यक्तंत्वान्वेतिशेषः॥१५॥ परुषान्तरात्

राघवेणतुवीरेणभयमुत्सृज्यदूरतः॥ त्वत्प्रियार्थंहतोवालीशक्रतुल्यपराक्रमः॥११॥ सर्वथाप्रणयात्क्रुद्धोराघवोनात्र
संशयः॥ भ्रातरंसंप्रहितवान्लक्ष्मणंलक्ष्मीवर्धनं॥१२॥ त्वंप्रमत्तोनजानीषेकालंकालविदांवर॥ फुल्लसप्तच्छदश्यामाप्र
वृत्तातुशरच्छुभा॥१३॥ निर्मलग्रहनक्षत्राद्यौःप्रनष्टबलाहका॥ प्रसन्नाश्चदिशःसर्वाःसरितश्चसरांसिच॥१४॥ प्रा
प्तमुद्योगकालंतुनावैषिहरिपुंगव॥ त्वंप्रमत्तइतिव्यक्तंलक्ष्मणोयमिहागतः॥१५॥ आर्त्तस्यहृतदारस्यपरुषंपुरु
षान्तरात्॥ वचनंमर्षणीयंतेराघवस्यमहात्मनः॥ कृतापराधस्यहितेनान्यत्पश्याम्यहंक्षमं॥ अन्तरेणाञ्जलिंबद्ध्वाल
क्ष्मणस्यप्रसादनात्॥१७॥ नियुक्तैर्मन्त्रिभिर्वाच्योह्यवश्यंपार्थिवोहितं॥ इतएवभयंत्यक्त्वाब्रवीम्यवधृतंवचः॥१८॥
अभिक्रुद्धःसमर्थोहिचापमुद्यम्यराघवः॥ सदेवासुरगन्धर्वंवशेस्थापयितुंजगत्॥१९॥ नसक्षमःकोपयितुंयः॥
प्रसाद्यःपुनर्भवेत्॥ पूर्वोपकारंस्मरताकृतज्ञेनविशेषतः॥२०॥ तस्यमूर्ध्नाप्रणम्यत्वंसपुत्रःससुहृज्जनः॥ राजंस्तिष्ठस्वसमयेभर्तुर्भार्येवतद्वशे॥२१॥

लक्ष्मणात्॥ श्रुतंपरुषंवचनंतेत्वयामर्षणीयंतत्संभावनसालक्ष्मणायत्पदेशः॥१६॥१७॥ नियुक्तैःहितोपदेशेइतिशेषः। भयंत्यक्त्वाब्रवीमिराजानमपि
कार्यवशात्मरस्येअंजलिंकृत्वैतिवचोत्रवक्ष्यमाणंनिश्चितंवदामि॥१८॥१९॥ यःपुनःप्रसाद्योभवेत्॥ सकोपयितुंनक्षमोनकृतज्ञः॥२०॥२१॥६१॥

॥राम॥
॥८०॥

157

अपोहितुं उपेक्षितुं ॥ स राघवस्य लक्ष्मणस्यास्य रामस्य मानुषं मनुष्यमतिक्रांतं बलं मे मनो ज्ञास्यति ज्ञानाम्येव वालिवधादिनेति भावः ॥ २२ ॥ स्वरमानः ॥ इति रामाभिरामे
श्रीरामीये रामायणतिलके किष्किंधाकांडे द्वात्रिंशः सर्गः ॥ ३२ ॥ अथ एवं हनुमद्वचनानंतरं प्रतिसमादिष्टः अंगदात्प्राप्तसंदेशः प्राप्तः ॥ १ ॥ स्थिता हरयः प्रांजल

नरामरामानुजशासनं त्वया कपींद्र युक्तं मनसाप्यपोहितुं ॥ मनो हि मे ज्ञास्यति मानुषं बलं स राघवस्यास्य सुरेंद्रवर्चसः ॥ २२ ॥ इत्या
र्षे श्रीमद्रामायणे किष्किंधाकांडे द्वात्रिंशः सर्गः ॥ ३२ ॥ अथ प्रतिसमादिष्टो लक्ष्मणः परवीरहा ॥ प्रविवेश गुहां रम्यां किष्किं
धां रामशासनात् ॥ १ ॥ द्वारस्था हरयस्तत्र महाकाया महाबलाः ॥ बभूवुर्लक्ष्मणं दृष्ट्वा सर्वे प्रांजलयः स्थिताः ॥ २ ॥ निश्वसंतं तु
तं दृष्ट्वा क्रुद्धं दशरथात्मजं ॥ बभूवुर्हरयस्त्रस्ता न चैनं पर्यवारयन् ॥ ३ ॥ स तां रत्नमयीं दिव्यां श्रीमान्पुष्पितकाननां ॥ रम्यां रत्न
समाकीर्णां ददर्श महतीं गुहां ॥ ४ ॥ हर्म्यप्रासादसंबाधां नानारत्नोपशोभितां ॥ सर्वकामफलैर्वृक्षैः पुष्पितैरुपशोभितां ॥ ५ ॥
देवगंधर्वपुत्रैश्च वानरैः कामरूपिभिः ॥ दिव्यमाल्यांबरधरैः शोभितां प्रियदर्शनैः ॥ ६ ॥ चंदनागरुपद्मानां गंधैः सुरभि
गंधितां ॥ मैरेयाणां मधूनां च संमोदितमहापथां ॥ ७ ॥ विंध्यमेरुगिरिप्रख्यैः प्रासादैर्नैकभूमिभिः ॥ ददर्श गिरिनद्यश्च विम
लास्तत्र राघवः ॥ ८ ॥ अंगदस्य गृहं रम्यं मैंदस्य द्विविदस्य च ॥ गवयस्य गवाक्षस्य गजस्य शरभस्य च ॥ ९ ॥ ॥ ॥

यो बभूवुरित्यन्वयः ॥ २ ॥ पर्यवारयन् भयेन लक्ष्मणं परिवार्य गंतुं नाशक्नुवन्नित्यर्थः ॥ ३ ॥ पुष्पितानि काननानि यस्यां तां रत्नसमाकीर्णां अनेकोत्तमवस्तुकां तां
४ ॥ तस्यैव प्रपंचः हर्म्येति सर्वकामफलैः सर्वैरपेक्षितफलयुतैः ॥ ५ ॥ ६ ॥ पद्मं पद्मकाख्यगंधद्रव्यं सुरभिगंधितां सुगंधितां मधूनां च संमोदितेति शेषः ॥ ७ ॥ ८ ॥ ९

॥रा॰वा॰कि॰॥
॥८१॥

१०॥११॥१२॥१३॥पांडुरेणशैलेनपरिक्षिप्तंस्फटिकशिलामयवप्रेणवेष्टितं॥१४॥१५॥महेंद्रदत्तैःवृक्षैःकल्पवृक्षैः॥१६॥१७॥१८॥१९॥सप्तकक्ष्याद्भुतस्यानिके

विद्युन्मालेश्चसंपातेःसूर्याक्षस्यहनूमतः॥वीरवाहोःसुवाहोश्चनलस्यचमहात्मनः॥१०॥कुमुदस्यसुषेणस्यतारजांववतोस्त
था॥दधिवक्त्रस्यनीलस्यसुपाटलसुनेत्रयोः॥११॥एतेषांकपिमुख्यानांराजमार्गेमहात्मनां॥ददर्शगृहमुख्यानिमहासा
राणिलक्ष्मणः॥१२॥पांडुराभ्रनिकाशानिगंधमाल्ययुतानिच॥प्रभूतधनधान्यानिस्त्रीरत्नैःशोभितानिच॥१३॥पांडुरे
णतुशैलेनपरिक्षिप्तंदुरासदं॥वानरेंद्रगृहंरम्यंमहेंद्रसदनोपमं॥१४॥शुक्लैःप्रासादशिखरैःकैलासशिखरोपमैः
सर्वकामफलैर्वृक्षैःपुष्पितैरुपशोभितं॥१५॥महेंद्रदत्तैःश्रीमद्भिर्नीलजीमूतसन्निभैः॥दिव्यपुष्पफलैर्वृक्षैःशीतच्छा
यैर्मनोरमैः॥१६॥हरिभिःसंवृतद्वारंबलिभिःशस्त्रपाणिभिः॥दिव्यमाल्यावृतंशुभ्रंतप्तकांचनतोरणं॥१७॥सुग्रीवस्यगृ
हंरम्यंप्रविवेशमहाबलः॥अवार्यमाणःसौमित्रिर्महाभ्रमिवभास्करः॥१८॥सप्तप्रकक्ष्याधर्मात्मायानासनसमावृताः
ददर्शसुमहद्गुप्तंददर्शांतःपुरंमहत्॥१९॥हैमराजतपर्यंकैर्बहुभिश्चवरासनैः॥महार्हास्तरणोपेतैस्तत्रतत्रसमावृतं
॥२०॥प्रविशन्नेवसततंशुश्रावमधुरस्वरं॥तंत्रीगीतसमाकीर्णंसमतालपदाक्षरं॥२१॥ ॐ ॥ ॐ ॥ ॐ ॥ ॥

त
स्यानिशेषः॥२०॥तंत्रीगीतेनवीणावाद्यघोषेणसहितंमधुरस्वनंमुरजादेःशुश्राव॥२१॥श्रीरामायरामचंद्रायश्रीकृष्णायवासुदेवायनमोनमस्तुः

158

॥राम॰॥
॥८१॥

२२॥अभिजनसंपन्नाआभिजात्ययुक्ताःवरमाल्यकृतव्ययाःउत्तममाल्यांवरस्त्रजांकृतंकरणंव्यया॥२३॥अव्ययान्परिचर्याव्ययरहितान्॥अनुदात्तपरिच्छदा
न्प्रशस्तालंकाररहितान्॥२४॥लज्जितोभवत्अयोध्यातोप्यधिकसौभाग्यदर्शनात्लज्जा॥परस्त्रीदर्शनकृतालज्जेत्यन्ये॥२५॥रोषवेगेनप्रकुपितःनेदानीम

बह्वीश्चविविधाकारारूपयौवनगर्विताः॥स्त्रियःसुग्रीवभवनेददर्शसमहाबलः॥२२॥दृष्ट्वाभिजनसंपन्नास्तत्रमाल्यकृतस्र
जः॥वरमाल्यकृतव्यग्राभूषणोत्तमभूषिताः॥२३॥नातृप्तान्नातिचव्यग्रान्नानुदात्तपरिच्छदान्॥सुग्रीवानुचरांश्चापि
लक्षयामासलक्ष्मणः॥२४॥कूजितंनूपुराणांचकाञ्चीनांनिस्वनंतथा॥सनिशम्यततःश्रीमान्सौमित्रिर्लज्जितोभवत्
२५॥रोषवेगप्रकुपितःश्रुत्वाचाभरणस्वनं चकारज्यास्वनंवीरोदिशःशब्देनपूरयन्॥२६॥चारित्रेणमहाबाहुरपकृ
ष्टःसलक्ष्मणः॥तस्थावेकान्तमाश्रित्यरामकोपसमन्वितः॥२७॥तेनचापस्वनेनाथसुग्रीवःप्लवगाधिपः विज्ञायागम
नंत्रस्तःसंचचालवरासनात्॥२८॥अंगदेनयथामह्यंपुरस्तात्प्रतिवेदितं॥सुव्यक्तमेषःसंप्राप्तःसौमित्रिर्भ्रातृवत्स
लः॥२९॥अंगदेनसमाख्यातोज्यास्वनेनचवानरः॥बुबुधेलक्ष्मणंप्राप्तंमुखंचास्यव्यशुष्यत॥३०॥ततस्तारांहरिश्रे
ष्ठःसुग्रीवःप्रियदर्शनां॥उवाचहितमव्यग्रस्त्राससंभ्रांतमानसः॥३१॥

ऽपिकामभोगंत्यजतीतिकोपहेतुःरोषवेगप्रचालितइतिपाठांतरं॥अ
र्थस्तुल्यः॥आभरणस्वनंश्रुत्वास्त्रीणांमनोनिहन्तयेज्यास्वनंचकार।२६॥नदेवाहचारित्रेणेति॥चारित्रेणस्त्रीगोष्ठ्यप्रवेशनोचितमिति आचारपर्यालोचनयाअपकृ
ष्टःनिवर्त्तितान्तःपुरप्रवेशःसन्एकान्तमाश्रितस्तरामकोपसमन्विताःरामकार्यप्रहंतृदर्शनजकोपेनसमन्वितस्तस्थौ॥२७॥२८॥२९॥समाख्यातःबोधितलक्ष्मणा

गमनःउपशुष्यनउपाशुष्यत॥३०॥३१॥

सरोषइवसरोषएव॥३२॥ रोषस्थानंरोषकारणंमामपराधमित्यर्थः॥३३॥ अस्माभिःकृतंयत्किंचिदित्यन्वयः॥३४॥ निर्निमित्तकोपासंभवान्निमित्तंचानिर्णीयस्वस्यसमीपगमनमनुचितमितिपक्षांतरंगृह्णाति॥ अथवेतिस्वयमेवमांविहायेत्यर्थः॥३५॥ विशुद्धात्मागतक्रोधचित्तः॥३६॥ उपक्रांतंउपक्रांतक्षमापनं॥३७॥

किन्नुदुःकारणंशुभ्रुप्रकृत्यामृदुमानसः॥ सरोषइवसंप्राप्तोयेनायंराघवानुजः॥३२॥ किंपश्यसिकुमारस्यरोषस्थानमनिंदिते॥ नखल्वकारणेकोपमाहरेन्नरपुंगवः॥३३॥ यद्यस्यकृतमस्माभिर्बुध्यसेकिंचिदप्रियं॥ तद्बुध्यासंप्रधार्याशुक्षिप्रमेवाभिधीयतां॥३४॥ अथवास्वयमेवैनंद्रष्टुमर्हसिभामिनि॥ वचनैःसांत्वयुक्तैश्चप्रसादयितुमर्हसि॥३५॥ त्वद्दर्शनेविशुद्धात्मानस्मकोपंकरिष्यति॥ नहिस्त्रीषुमहात्मानःक्वचित्कुर्वंतिदारुणं॥३६॥ त्वयासांत्वैरुपक्रांतंप्रसन्नेंद्रियमानसं॥ ततःकमलपत्राक्षंद्रक्ष्याम्यहमरिंदमं॥३७॥ साप्रस्खलंतीमदविह्वलाक्षीप्रलंबकांचीगुणहेमसूत्रा॥ सलक्षणाल्लक्ष्मणसन्निधानंजगामतारानमितांगयष्टिः॥३८॥ सतांसमीक्ष्यैवहरीशपत्नींतस्थावुदासीनतयामहात्मा॥ अवाङ्मुखोभून्मनुजेंद्रपुत्रःस्त्रीसन्निकर्षाद्विनिवृत्तकोपः॥३९॥ सापानयोगाच्चनिवृत्तलज्जादृष्टिप्रसादाच्चनरेंद्रसूनोः॥ उवाचताराप्रणयप्रगल्भंवाक्यंमहार्थंपरिसांत्वरूपं॥४०॥

प्रस्खलंतीमदालसतयापदेपदेस्खलंती॥ मदविह्वलाक्षी॥ भोगार्थंकृतमधुपानमदेनालसचकितनेत्रा॥ प्रालंबेकांचीगुणहेमसूत्रेयस्याःकांचीगुणोरशनानमितांगयष्टिःस्तनभारेणेतिशेषः॥३८॥ हरीशपत्नींसुग्रीवपत्नींतारां॥३९॥ प्रणयप्रगल्भंमैत्रीसमर्थनसमर्थंपरिसांत्वरूपं॥ परितःसांत्वरूपंपरिसांत्वेतिपाठःसुगमः॥४०॥ श्रीरामायरामचंद्रायनमः॥ ॥छ॥ ॥

वाङ्गिदेशे अनुशिष्टकार्याननुष्ठाने ॥ आपतंतं दग्धानिष्ठंतं ॥ ४१ ॥ भूयोधिकं प्रणयप्रकाशपूर्वं हृष्टोर्थो यस्मिन् तत् ॥ ४२ ॥ अयं ते भर्त्ता लुप्तधर्मात्मसंग्रहो वर्त्तते ॥ अर्थोत्र मित्ररूपः स्वनं किं न बुध्यसे ॥ ४३ ॥ लुप्तधर्मादित्वमेवाह नेति ॥ राज्यार्थं राज्यस्थैर्यार्थं तामान्यापरिषद्यस्य तादृशो भूत्वेति शेषः ॥ ४४ ॥ विहरन्त्वया क्रीडन् ४५ ॥ ४६ ॥ पानादर्थादिनाशमुपपादयति ॥ धर्मेति महान्धर्मः लोपः प्रतिज्ञाहानिरूपः कृतेउपकारेऽप्रतिकुर्वतः प्रत्युपकारमकुर्वतः नावप्रथमं ततो गु

किं कोपमूलं मनुजेंद्रपुत्र कालेन संतिष्ठति वाङ्गिदेशे ॥ कः शुष्कवृक्षं वनमापतंतं दवाग्निमासीदति निर्विशंकः ॥ ४१ ॥ स तस्या वचनं श्रुत्वा सांत्वपूर्वमशंकितः ॥ भूयः प्रणयदृष्टार्थं लक्ष्मणो वाक्यमब्रवीत् ॥ ४२ ॥ किमयं कामवृत्तस्ते लुप्तधर्मार्थसंग्रहः ॥ भर्त्ता भर्त्तृहिते युक्तेन चैनमवबुध्यसे ॥ ४३ ॥ न चिंतयति राज्यार्थं सोस्मांछोकपरायणान् सामान्यपरिषत्तारे काममेवोपसेवते ॥ ४४ ॥ समासांश्चतुरः कृत्वा प्रमाणं प्लवगेश्वरः ॥ व्यतीतांस्तान्मदोदग्रो विहरंतावबुध्यते ॥ ४५ ॥ न हि धर्मार्थसिध्यर्थं पानमेव प्रशस्यते ॥ पानादर्थश्च कामश्च धर्मश्च परिहीयते ॥ ४६ ॥ धर्मलोपो महांस्तावत्कृतेह्यप्रतिकुर्वतः ॥ अर्थलोपश्च मित्रस्य नाशे गुणवतो महान् ॥ ४७ ॥ मित्रं ह्यर्थगुणश्रेष्ठं सत्यधर्मपरायणं ॥ तद्द्वयं तु परित्यक्तं न तु धर्मे व्यवस्थितं ॥ ४८ ॥ तदेवं प्रस्तुते कार्ये कार्यमस्माभिरुत्तरं ॥ तत्कार्यं कार्यतत्त्वज्ञो त्वमुदाहर्तुमर्हसि ॥ ४९ ॥

णवतो मित्रस्य मैत्रीनाशे महाननर्थलोपो भवति ॥ ४७ ॥ अर्थगुणश्रेष्ठं मित्रार्थसाधनं लक्षणश्रेष्ठगुणवत् सत्यधर्मपरायणं स्वतन्त्रगुणद्वयवत् मित्रं हि प्रसिद्धं मन्न गुणद्वयमपि तव भर्त्रा परित्यक्तं न तु धर्मे मैत्रीपालनरूपे धर्मे व्यवस्थितं ॥ ४८ ॥ तत्तस्मादेवं संति प्रस्तुते कार्ये प्रस्तुतकार्यसिद्धिनिमित्तं इतउत्तरं यदस्माभिः कार्यं तत्कार्यं उदाहर्त्तुमर्हसि ॥ ४९ ॥

धर्मार्थसमाधियुक्तं तत्संबंधयुक्तं ॥ आगतार्थे भ्रष्टप्रयोजने मनुजेंद्रकार्ये तद्विषये विश्वासयुक्तं यथा तथा भूयः पुनरुवाच ॥ ५० ॥ न कोपकालः अर्थस्यानतीतत्वादिति भावः प्रमादं अज्ञानभ्रममपराधं तस्य सोढुमना समर्थयति ॥ ५१ ॥ कोपं कथं नामेति अयं प्रकृष्टसत्त्वहीने सत्त्वावरुद्धः सहजसत्त्वगुणादरुद्धाविपरीतव्यापारः सत्त्वाविरुद्ध इति पाठे सहजगुणाविरुद्धव्यापारः अतएव तपसः प्रसूतिः ॥ ५२ ॥ जानामि कोपमिति हरिवीरवंधो रामस्य कोपं कोप

सा तस्य धर्मार्थसमाधियुक्तं निशम्य वाक्यं मधुरस्वभावं ॥ तारागतार्थे मनुजेंद्रकार्ये विश्वासयुक्तं तमुवाच भूयः ॥ ५० ॥
न कोपकालः क्षितिपालपुत्र न चापि कोपः स्वजने विधेयः ॥ त्वदर्थकामस्य जनस्य तस्य प्रमादमप्यर्हसि वीर सो-
ढुं ॥ ५१ ॥ कोपं कथं नाम गुणप्रकृष्टः कुमार कुर्यादपकृष्टसत्त्वे ॥ कस्त्वद्विधः कोपवशं हि गच्छेत्सत्त्वावरुद्धस्त-
पसः प्रसूतिः ॥ ५२ ॥ जानामि कोपं हरिवीरवंधोर्जानामि कार्यस्य च कालसंगं ॥ जानामि कार्यं त्वयि यत्कृतं नस्त-
च्चापि जानामि यदत्र कार्यं ॥ ५३ ॥ तच्चापि जानामि तथाविषह्यं बलं नरश्रेष्ठ शरीरजस्य ॥ जानामि यस्मिंश्च जनेऽव-
वद्धं कामेन सुग्रीवमसक्तमद्य ॥ ५४ ॥

निमित्तं कार्यस्य कालसंगं विलंबं च जानामि ॥ त्वयि यत् आयत्तं नः कार्यं राज्यदानलक्षणं त्वया कृतं तदपि जानामि । यदत्र विषये कार्यं प्रतिकर्त्तव्यरूपं तदपि जानामि ॥ ५३ ॥ तव कोपस्याप्युक्तत्वे हेतुमपि जानामीत्याह तच्चापीति शरीरजस्य कामस्य तथा ऽविषह्यं बलं तच्चापि जानामि एवं सुग्रीवं यस्मिन् जने स्त्रीजने कामेनावबद्धं संभावयामि तं च जानामि तथा ह्यन्यत्र कोपस्यासक्तं अव्यापारं च जानामि ॥ ५४ ॥

नन्वेवंसतिममकोपस्यायुक्तताकथमत आहनेतियथात्वंवैनिश्चयेनमन्युवशंप्रपन्नोदृश्यसेतथाजानामिकामतंत्रेकामस्वभावपरिज्ञानेतवबुद्धिर्ना
स्तिचिरकालंस्त्रीसंगाभावादितिभावः तमेवंकामस्वभावमाहनेतिहिप्रसिद्धंयथादेशकालौभोगायोग्यौनजानामितथार्थधर्मावपिनावेक्षसे
मनुष्यइति। मनुष्यापिनजानाति॥ किमुततिर्यक्जंतुरितिभावः॥५५॥ ममसन्निकृष्टंस्वभार्यायाममसमीपेकामवशाद्वर्त्तमानं॥ कामाभि-

नकामतंत्रेतवबुद्धिरस्तित्वंवैयथामन्युवशंप्रपन्नः॥ नदेशकालौहियथार्थधर्मौअवेक्ष्यसेकामरतिर्मनुष्यः॥५५॥
तंकामवृत्तंममसन्निकृष्टंकामाभियोगाच्चविमुक्तलज्जं॥ क्षमस्वतावत्परवीरहंतस्त्वद्भ्रातरंवानरवंशनाथ॥५६॥
महर्षयोधर्मतपोभिरामाः कामानुकामाः प्रतिबद्धमोहाः॥ अयंप्रकृत्याचपलःकपिस्तुकथंनसज्जेतसुखेषुराजा
॥५७॥ इत्येवमुक्त्वावचनंमहार्थंसावानरीलक्ष्मणमप्रमेयं॥ पुनःसखेदंमदविह्वलाक्षीभर्त्तुर्हितंवाक्यमिदंबभाषे
॥५८॥ उद्योगस्तुचिराज्ञप्तःसुग्रीवेणनरोत्तम॥ कामस्यापिविधेयेनतवार्थप्रतिसाधने॥५९॥ आगताहिमहावी
र्याहरयःकामरूपिणः॥ कोटीःशतसहस्राणिनानानगनिवासिनः॥६०॥ ॥६१॥

योगः कामावेशः क्षमस्वेति॥ परवशप्रवृत्तत्वापराधीनत्वात्तवभ्रातृत्वाच्चक्षमैवात्रयोग्यानतुकोपइत्याशयः॥५६॥ कामवशत्वंनास्यैवेत्याह॥ महर्षयइ
तिकामेकामभोगेअनुकामोभिलाषोयेषांतेअतस्त्वस्त्रीषुप्रतिबद्धमोहाःकपिस्तत्रापिराजा॥५७॥ भर्त्तुर्हितमनुद्दिश्येतिशेषः॥५८॥ चिराज्ञ
प्तःत्वदागमनात्पूर्वमेवेतिशेषः॥५९॥ कामविधेयस्योद्योगाज्ञापिनविश्वसनीयेत्यतआह॥ आगताइतिकोटीःशतसहस्रंबहुत्वेनान्वयं॥६०॥

चारित्रं रक्षितं ॥ ऊढिमांनः पुरागमनेन अच्छलं छलमधर्मः सनेनार्थः मित्रभावेननतु विकारेण ॥ ६१ ॥ त्वरया रामाज्ञाकरणत्वरया ॥ ६२ ॥ ६३ ॥ ६४ ॥ प्रमदाभिः समं ददर्शेत्यन्वयः ततः संरब्धतररक्ताक्षो वभूवेत्यन्वयः ॥ ६५ ॥ परिरभ्यावस्थितमश्ववसनं ददर्शेत्यन्वयः ॥ ६६ ॥ चशमानः ॥ इति रामाभिरा

तदागच्छ महाबाहो चारित्रं रक्षितं त्वया ॥ अच्छलं मित्रभावेन सतां दारावलोकनं ॥ ६१ ॥ तारयावाप्यनुज्ञातस्त्वरयावा
पिचोदितः ॥ प्रविवेश महाबाहुरभ्यंतरमरिंदमः ॥ ६२ ॥ ततः सुग्रीवमासीनं कांचने परमासने ॥ महार्हास्तरणोपे
तेददर्शादित्यसन्निभं ॥ ६३ ॥ दिव्याभरणचित्रांगं दिव्यरूपं यशस्विनं ॥ दिव्यमाल्यांवरधरं महेंद्रमिव दुर्जयं
॥ ६४ ॥ दिव्याभरणमालाभिः प्रमदाभिः समंततः ॥ संरब्धतररक्ताक्षो वभूवांतकसन्निभः ॥ ६५ ॥ रुमां तु वीरः परि
रभ्य गाढं वरासनस्थो वरहेमवर्णः ॥ ददर्श सौमित्रिमदीनसत्वं विशालनेत्रः सविशालनेत्रं ॥ ६६ ॥ इत्यार्षे श्री
मद्रामायणे किष्किंधाकांडे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥ तमप्रतिहतं क्रुद्धं प्रविष्टं पुरुषर्षभं ॥ सुग्रीवो लक्ष्मणं दृष्ट्वा
वभूव व्यथितेंद्रियः ॥ १ ॥ क्रुद्धं निश्वसमानं तं प्रदीप्तमिव तेजसा ॥ भ्रातुर्व्यसनसंतप्तं दृष्ट्वा दशरथात्मजं ॥ २ ॥
उत्पपात हरिश्रेष्ठो हित्वा सौवर्णमासनं ॥ महान्महेंद्रस्य यथा स्वलंकृत इव ध्वजः ॥ ३ ॥ रामाय रामचन्द्राय नमः

मे श्रीरामीये रामायणतिलके किष्किंधाकांडे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥ तमिति ॥ अप्रतिहतं केनाप्यप्रतिरुद्धं ॥ १ ॥ २ ॥ महान् महेंद्रध्वजो यथा

अन्तमेतुः पश्चादुत्थितवत्यः ।४। संचचार संमुखमाजगाम अवस्थितो बभूवेत्यस्य लक्ष्मण इति शेषः कल्पवृक्षोपमया सर्वहितत्वं व्यंग्यं ।५। सतारं शशिनमिवः
स्थितं ॥ ६ ॥ सत्त्वाभिजनाभ्यां संपन्नः लक्षणानि सानुक्रोशत्वादीनि ।७। अधर्मे स्थित इत्यन्वयः अधर्ममार्गस्थः नृशंसतरः क्रूरतरः ।८। प्रकृतोपयु
क्तमसत्यदोषमाह । शतमिति । एकाश्वनिमित्तकेऽनृते दानादिप्रतिज्ञाविघाते सति सोऽनृतवाक् शतं हंति शताश्वहननदोषभाक् गोविषयानृते

उत्पतंतमनूत्पेतुस्तमाप्रभृतयः स्त्रियः । सुग्रीवं गगने पूर्णं चंद्रं तारागणा इव ॥ ४ ॥ संरक्तनयनः श्रीमान्संचचार कृ
तांजलिः । बभूवावस्थितस्तत्र कल्पवृक्षो महानिव ॥ ५ ॥ रुमाद्वितीयं सुग्रीवं नारीमध्यगतं स्थितं । अब्रवील्लक्ष्मणः
क्रुद्धः सतारं शशिनं यथा ॥ ६ ॥ सत्त्वाभिजनसंपन्नः सानुक्रोशो जितेंद्रियः । कृतज्ञः सत्यवादी च राजा लोके मही
यते ॥ ७ ॥ यस्तु राजा स्थितोऽधर्मे मित्राणामुपकारिणां । मिथ्याप्रतिज्ञां कुरुते को नृशंसतरस्ततः ॥ ८ ॥ शतमश्वा
नृते हंति सहस्रं तु गवामनृते ॥ आत्मानं स्वजनं हंति पुरुषः पुरुषानृते ॥ ९ ॥ पूर्वं कृतार्थो मित्राणां न तत्प्रतिकरोति
यः । कृतघ्नः सर्वभूतानां स वध्यः प्लवगेश्वर ॥ १० ॥ गीतोऽयं ब्रह्मणा श्लोकः सर्वलोकनमस्कृतः । दृष्ट्वा कृतघ्नं क्रुद्धेन तन्नि
बोध प्लवंगम ॥ ११ ॥

गोसहस्रहननभाक्भाक् । एवं पुरुषानृते पुरुषविषयकिंचित्प्रतिज्ञाहानौ स पुरुषः प्रथममात्मानं हंति । आत्मघातदोषभाक् निजं पुण्यफलोकं नाशयति वा
तथा स्वजनस्यापि चादेः पुण्यफलोकं च नाशयति ।९। अथ कृतघ्नदोषभाक् पूर्वमिति कृतार्थो मित्रैरिति शेषः सर्वभूतानां सर्वलोकानां वध्यः सर्वलोकबहिष्का
र्य इत्यर्थः ॥ १० ॥ नायमर्थः स्वकल्पनामात्रकल्पित इत्याह गीत इति ब्रह्मणा हिरण्यगर्भेण अयं श्लोकः पूर्वोक्तः सर्वलोकनमस्कृतः ब्रह्मवदेव सर्वस्मृतः संमत इत्य
र्थः अथ रामवचनमाह दृष्ट्वेति कृतघ्नं दृष्ट्वा क्रुद्धेन रामेण यदुक्तं तच्छृणु ॥ ११ ॥

किंतत्राह गोघ्नेति ॥१२॥ ऊनोहं कृतघ्नत्वमाह पूर्वमिति ॥१३॥ मिथ्यावादित्वं दर्शयति यत्तः शाकप्रतिज्ञातः कृतमिच्छता कृतस्य प्रतिकृतं कर्तुमिच्छता ॥१४॥ मं
ण्डूकराविणं स्वष्टहीनमुखस्य मण्डूकशब्देन शब्दवन्तं सर्पं यथाज्ञनोऽनवलोकनात् मण्डूकमेव जानीते न तु सर्पं तथा तव स्वरूपं रामो नाज्ञासीदिति भावः

गोघ्ने चैव सुरापे च चौरे भग्नव्रते तथा ॥ निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥१२॥ अनार्यस्त्वं कृतघ्नश्च मिथ्या
वादी च वानर ॥ पूर्वं कृतार्थो रामस्य न तत्प्रतिकरोषि यत् ॥१३॥ ननु नाम कृतार्थेन त्वया रामस्य वानर ॥ सीताया मार्ग
णे यत्तः कर्तव्यः कृतमिच्छता ॥१४॥ स त्वं ग्राम्येषु भोगेषु सक्तो मिथ्याप्रतिश्रवः ॥ न त्वां रामो विजानीते सर्पं मण्डूकरा
विणं ॥१५॥ महाभागेन रामेण पापः करुणवेदिना ॥ हरीणां प्रापितो राज्यं त्वं दुरात्मा महात्मना ॥१६॥ कृतं चे
न्नाभिजानीषे राघवस्य महात्मनः ॥ सद्यस्त्वं निशितैर्बाणैर्हतो द्रक्ष्यसि वालिनं ॥१७॥ न स संकुचितः पंथा ये
न वाली हतो गतः ॥ समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥१८॥ न नूनमिक्ष्वाकुवरस्य कार्मुकाच्च्युतांश्शरा
न्पश्यसि वज्रसन्निभान् ॥ ततः सुखं नाम निषेवसे सुखी न रामकार्यं मनसाप्यवेक्षसे ॥१९॥ इत्यार्षे श्रीमद्रा
मायणे किष्किंधाकांडे चतुस्त्रिंशः सर्गः ॥३४॥

162

कश्चित्तु मण्डूकग्रहणार्थं सर्पो मण्डूकवद्रौति तेन स्वरेणास्वगण इति विस्रब्धः स्वसमी
पमागतो मण्डूकस्तेन ग्रस्यते एवं वंचकं त्वां नाज्ञासीदित्यर्थ इत्याह। ननु मृषालोकाप्रसिद्धोपेक्ष्यं ॥१५॥ पापस्त्वमित्यन्वयः ॥१६॥ (१७) ॥१८॥ शरान्स्तान्न पश्य
सि। यतो ग्राम्यसुखं निषेवसे तेन च सुखी सन् ॥ रामकार्यं मनसापि नावेक्षसे ॥१९॥ वकमानः ॥ इति रामाभिरामे श्रीरा॰ किष्किंधाकांडे चतुस्त्रिंशः सर्गः ॥३४॥

तथेतितवसुहृदोवक्तान्सुखादित्यर्थः॥१॥२॥नार्हसीत्यत्रहेतुर्नैवेमादित्यन्तनकथोऽनृतवाक॥३॥४॥५॥यदितत्कृतघ्नः कथंतर्हिकालासमयानभिज्ञस्तत्राह
सुदुःखेतिसुतरामत्यन्तदुःखः प्राप्तकालं।अवश्यकर्त्तव्यं॥६॥घृताच्यामिति॥अहः दिनं यद्यपि पूर्वं बालकाण्डे मेनकासंबंधउक्तस्तथाप्येतद्वचना

तथाब्रुवाणंसौमित्रिंप्रदीप्तमिवतेजसा॥अब्रवील्लक्ष्मणंताराताराधिपनिभानना॥१॥नैवंलक्ष्मणवक्तव्योनायंप
रुषमर्हति॥हरीणामीश्वरःश्रोतुंतववक्त्राद्विशेषतः॥२॥नैवाकृतज्ञःसुग्रीवोनशठोनापिदारुणः॥नैवानृतक
थोवीरनजिह्मश्चकपीश्वरः॥३॥उपकारंकृतंवीरोनाप्ययंविस्मृतःकपिः।रामेणवीरसुग्रीवोयदन्यैर्दुष्करंर
णे॥४॥रामप्रसादात्कीर्त्तिंचकपिराज्यंचशाश्वतं॥प्राप्तवानिहसुग्रीवोरुमांमांचपरंतप॥५॥सुदुःखशयितःपू
र्वंप्राप्येदंसुखमुत्तमं॥प्राप्तकालंनजानीतेविश्वामित्रोमहामुनिः॥६॥घृताच्यांकिलसंसक्तोदशवर्षाणिलक्ष्म
ण॥अहोमन्यतधर्मात्माविश्वामित्रोमहामुनिः॥७॥सहिप्राप्तंनजानीतेकालंकालविदांवरः।विश्वामित्रोमहा
तेजाःकिंपुनर्यःपृथग्जनः॥८॥देहधर्मंगतस्यास्यपरिश्रान्तस्यलक्ष्मण॥अवितृप्तस्यकामेषुरामःक्षन्तुमिहार्हति
॥९॥नचरोषवशंतातगन्तुमर्हसिलक्ष्मण॥निश्चयार्थमविज्ञायसहसाप्राकृतोयथा॥१०॥ छ ॥ छ ॥

त घृताचीसंबंधोपितत्सज्ञेयइत्याहुः॥७॥८॥देहधर्मः आहारनिद्रामैथुनादिपशुधर्मैतिपाठेपित्र्ययमेवार्थ॥९॥निश्चयार्थंकर्त्तव्यार्थंनिश्चयं॥१०

रोषेणासमुत्पन्नः संरंभः क्षोभः ॥ ११ ॥ १२ ॥ १३ ॥ १४ ॥ कथमयंरावणंहनिष्यतीत्यत्रमत्सहायकसाध्यत्वान्नतथ्यमित्याह ॥ शतेति एषासंख्याविवक्षितैव । दशकोटि
समुद्रः शतकोटिर्मध्यं मध्यानांसहस्रं तथापाश्विसहस्राधिकत्रिलक्षाणि तदुपरि षट्त्रिंशत्सहस्राणि तदुपरि तावंति शतानीत्यर्थः ॥ १५ ॥ १६
तावतांवधेपरमभूतस्यापि सहायापेक्षास्तीत्याह ॥ ते इति यस्मात् । असहायेन रामेण ते हंतुमशक्या यस्माद्रावणश्च क्रूरकर्मा क्रूरः पराक्रमः तस्य

सत्वयुक्ताहिपुरुषास्त्वद्विधाः पुरुषर्षभ ॥ आविमृश्यनरोपस्यसहसायांतिवश्यतां ॥ ११ ॥ प्रसादयेत्वांधर्मज्ञसुग्री
वार्थंसमाहिता ॥ महारोषसमुत्पन्नः संरंभस्त्यज्यतामयं ॥ १२ ॥ इमांमांचांगदंराज्यंधनधान्यपशूनिच ॥ रामप्रियार्थं
सुग्रीवस्त्यजेदितिमतिर्मम ॥ १३ ॥ समानेष्यतिसुग्रीवः सीतयासहराघवं ॥ शशांकमिवरोहिण्याहत्वानराक्षसा
धमं ॥ १४ ॥ शतकोटिसहस्राणिलंकायांकिलरक्षसां ॥ अयुतानिचषट्त्रिंशत्सहस्राणिशतानिच ॥ १५ ॥ अहत्वातां
श्चदुर्धर्षान्राक्षसान्कामरूपिणः ॥ अशक्यंरावणंहंतुंयेनसामैथिलीहृता ॥ १६ ॥ तेनशक्यारणेहंतुमसहायेनलक्ष्म
ण ॥ रावणः क्रूरकर्माचसुग्रीवेणविशेषतः ॥ १७ ॥ एवमाख्यातवान्वालीसह्यभिज्ञोहरीश्वरः ॥ आगमस्तुनमेव्यक्तः
श्रवात्तस्यब्रवीम्यहं ॥ १८ ॥

विशेषतः सुग्रीवेणासहायेनप्रयोजनमस्ति ॥ ननुतमप्रतिमसेनाघटनस्यसुग्रीवाधीनत्वात्सर्वेषांमध्यात्तुध्यत्वाज्ञानरवध्यत्वाच्चेतिभावः यत्तुनीय
सुग्रीवेणासहायेनतेराक्षसाहंतुमशक्याइत्यत्रयं हत्वावालीकिलोक्तवान्रावणवधायसुग्रीवंतथाप्रार्थयतेरामस्तस्यासावशक्यइतिकथांचकर्ष
यंतिमहत्पार्थकं ॥ रामस्यसहायापेक्षासमर्थनस्यैवप्रस्तुतत्वात् ॥ १७ ॥ नन्वेषारक्षःसंख्यात्वयाकथंज्ञातेत्यत्राह एवमिति ॥ आगमस्तुनमेव्यक्तः रावणस्यै
वंबलप्राप्तिप्रकारस्तुनमयाज्ञातः संख्यामात्रंप्रसंगात्सर्वैश्रुतं
तस्यश्रवात् तत्स्वरूपतोमयाश्रवणात् ॥ १८ ॥

न्तु सहायसंपत्तिप्रवृत्ते रस्मिन दर्शनात्कोपेन स्तत्राह त्वदिति ॥ १९ ॥ राघवार्थं नानु प्रतीक्षमाणास्तिष्ठति अनस्त्वेदानीं नानिर्यान्ति ॥ २० ॥ तेन तर्हि कदा आगमिष्यंतीतत्राह
कृतेति ॥ सुसंस्था शोभना आगमनकालमर्यादा ॥ पुरा पूर्वं कृतं प्रेषणसमये यथा कृता तथा तैः सर्वैरद्यागंतव्यं ॥ २१ ॥ रक्षःसेनापेक्षया त्वमेनाधिकमाह त्र

त्वत्सहायनिमित्तं हि प्रेषिता हरिपुंगवाः ॥ आनेतुं वानरान्युद्धे सुबहून्हरिपुंगवान् ॥ १९ ॥ तांश्च प्रतीक्षमाणोयं विक्रांतान्सुमहाब
लान् ॥ राघवस्यार्थसिध्यर्थं नानिर्याति हरीश्वरः ॥ २० ॥ कृता तु संस्था सौमित्रे सुग्रीवेण पुरा यथा ॥ अद्य तैर्वानरैः सर्वैरागं
तव्यं महाबलैः ॥ २१ ॥ ऋक्षकोटिसहस्राणि गोलांगूलशतानि च ॥ अद्य त्वामुपयास्यंति जहि कोपमरिंदम ॥ कोट्योनेकास्तु
काकुत्स्थ कपीनां दीप्ततेजसां ॥ २२ ॥ तव हि मुखमिदं निरीक्ष्य कोपात्क्षतजसमे नयने निरीक्ष्यमाणाः ॥ हरिवरवनिता न
यांति शांतिं प्रथमभयस्य हि शंकिताः स्म सर्वाः ॥ २३ ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे पंचत्रिंशः सर्गः ॥ ३५ ॥
इत्युक्तस्तारया वाक्यं प्रश्रितं धर्मसंहितं ॥ मृदुःस्वभावः सौमित्रिः प्रतिजग्राह तद्वचः ॥ १ ॥ तस्मिन्प्रतिगृहीते तु वाक्ये
हरिगणेश्वरः ॥ लक्ष्मणात्सुमहत्त्रासं वस्त्रं क्लिन्नमिवात्यजत् ॥ २ ॥ ततः कंठगतं माल्यं चित्रं बहुगुणं महत् ॥ चिच्छेद विम
दश्चासीत्सुग्रीवो वानरेश्वरः ॥ ३ ॥

सेति ॥ शतकोटिर्मध्यं तद्दशगुणात्मिका सहस्रकोटिः तत्संख्याः ऋक्षाः गोलांगूलानां शतानि च शतकोटिः अन्ये कपयोनेकाः कोट्यः असंख्या इत्यर्थः
२२ ॥ प्रथमभयस्य तत्सदृशभयस्य वालिवधवत् ॥ सुग्रीववधभयस्य पश्यामी ॥ २३ ॥ गरमानः ॥ इति रामाभिरामे श्रीरामीयेरा० किष्किंधाकांडे पंच
त्रिंशः सर्गः ॥ ३५ ॥ इतीति ॥ तस्मिन् तारानुनयवाक्ये ॥ २ ॥ माल्यं मालां बहुगुणबहुविधं कामसमदकरं ॥ अतएव तच्छेदफलं विमदश्चासीदिति ॥ ३ ॥

लक्ष्मणांसंप्रहर्षयंनिमन्वयः ॥ ४ ॥ ५ ॥ शक्तः समर्थः । तस्यदेवावतारस्यस्वेनकर्मणा ॥ धनुर्भंगवालिवधादिनाख्यातस्य । तादृशंतज्जनितोपकारसदृशं ॥ ६ ॥ सहायमा
त्रेण उपलक्षितंस्वयमेवार्थनिर्वाहकोऽहंतु परिकरमात्रमित्यर्थः ॥ ७ ॥ सहायकृत्यंसहायसाध्यंकृत्यंचेनयानालानितत्वयदैन्याश्च ॥ ८ ॥ ९ ॥ अनुया

सलक्ष्मणंभीमबलंसर्ववानरसत्तमः ॥ अब्रवीत्प्रश्रितंवाक्यंसुग्रीवःसंप्रहर्षयन् ॥ ४ ॥ प्रनष्टाश्रीश्चकीर्तिश्चकपिराज्यं
चशाश्वतं ॥ रामप्रसादात्सौमित्रेपुनश्चाप्तमिदंमया ॥ ५ ॥ कःशक्तस्तस्यदेवस्यख्यातस्यस्वेनकर्मणा ॥ तादृशंप्रति
कुर्वीतअंशेनापिनृपात्मज ॥ ६ ॥ सीतांप्राप्स्यतिधर्मात्मावधिष्यतिचरावणं ॥ सहायमात्रेणमयाराघवःस्वेनते
जसा ॥ ७ ॥ सहायकृत्यंकिंतस्ययेनसप्तमहाद्रुमाः ॥ गिरिश्चवसुधाचैवबाणेनैकेनदारिताः ॥ ८ ॥ धनुर्विस्फारया
णस्ययस्यशब्देनलक्ष्मण ॥ सशैलाकंपिताभूमिःसहायैःकिंनुतस्यवै ॥ ९ ॥ अनुयात्रांनरेंद्रस्यकरिष्येहंनरर्षभः
गच्छतोरावणंहंतुंवैरिणंसपुरःसरं ॥ १० ॥ यदिकिंचिदतिक्रांतंविश्वासात्प्रणयेनवा ॥ प्रेष्यस्यक्षमितव्यंमेनक
श्चिन्नापराध्यति ॥ ११ ॥ इतितस्यब्रुवाणस्यसुग्रीवस्यमहात्मनः ॥ अभवल्लक्ष्मणःप्रीतःप्रेम्णाचेदमुवाचह ॥ १२ ॥
सर्वथाहिममभ्रातासनाथोवानरेश्वर ॥ त्वयानाथेनसुग्रीवप्रश्रितेनविशेषतः ॥ १३ ॥ छ ॥ ॥ छ ॥

[illegible]

त्रांपश्चाद्गमनंसपुरःसरैःसहितंरावणं ॥ १० ॥ विश्वासात् अयंनक्रूरोमित्रे इतिविश्वासात् । प्रणयेनवा । यदिकिंचिदतिक्रांतं । अपराद्धंतदुक्तहेतुभ्यां । प्रे
ष्यस्यदासस्यक्षमितव्यंक्षंतव्यंयस्माद्धेतोर्दासोनापराध्यति ॥ तादृशेदासाः संभवः स्वामिचित्तानुवर्तनस्यसर्वथाऽसंभवात् ॥ ११ ॥ १२ ॥ १३ ॥

164

शौचमिंद्रियनिग्रहः। १४॥१५। उपपन्नंयोग्यंयुक्तंयुक्तियुक्तं॥१६॥ दोषज्ञोविद्वान्कोरामसुग्रीवाभ्यामन्योभवद्वाक्यसदृशंवाक्यंवक्तुमर्हति १७। १८ वयस्यंरामं
१९। स्वोक्तवाक्यानांरामोक्तत्वशंकाव्यावर्तयेत्स्वोक्तिंत्वमेवबोधयन्स्वापराधंक्षमापयति। यच्चेति रामभाषितंसीतावियोगजविलापरूपं। २०। नरमान-

यस्तेप्रभावः सुग्रीवयच्चतेशौचमीदृशं॥ अर्हस्त्वंकपिराज्यस्यश्रियंभोक्तुमनुत्तमां॥१४॥ सहायेनतुसुग्रीवत्वयारामःप्रतापवान्। व
धिष्यतिरणेशत्रून्नचिरान्नात्रसंशयः॥१५॥ धर्मज्ञस्यकृतज्ञस्यसंग्रामेष्वनिवर्तिनः। उपपन्नंचयुक्तंचसुग्रीवतत्वभाषितं। १६
दोषज्ञः सतिसामर्थ्येकोन्योभाषितुमर्हति॥ वर्जयित्वाममज्येष्ठंत्वांचवानरसत्तम॥१७॥ सदृशश्चापिरामेणविक्रमेणबले
नच। सहायोदैवतैर्दत्तश्चिरायहरिपुंगव॥१८॥ किंतुशीघ्रमितोवीरनिष्क्रमत्वंमयासह। सांत्वयस्ववयस्यंचभार्याह
रणदुःखितं॥१९। यच्चशोकाभिभूतस्यश्रुत्वारामस्यभाषितं॥ मयात्वंपरुषाण्युक्तस्तत्क्षमस्वसखेमम॥२०॥ इत्यार्षेश्री
मद्रामायणेवा० किष्किंधाकांडेषट्त्रिंशःसर्गः॥३६॥ एवमुक्तस्तुसुग्रीवोलक्ष्मणेनमहात्मना। हनूमंतंस्थितंपार्श्वेव
चनंचेदमब्रवीत्॥१॥ महेंद्रहिमवद्विंध्यकैलासशिखरेषुच। मंदरेपांडुशिखरेपंचशैलेषुयेस्थिताः॥२॥ तरुणादित्य
वर्णेषुभ्राजमानेषुनित्यशः॥ पर्वतेषुसमुद्रांतेपश्चिमस्यांतुयेदिशि॥३॥ आदित्यभवनेचैवगिरौसंध्याभ्रसन्निभे पद्माच
लवनंभीमाःसंश्रिताहरिपुंगवाः॥४॥

॥ इतिरामाभिरामेश्रीरामीयरा० किष्किंधाकांडेषट्त्रिंशःसर्गः॥३६॥ अथसुग्रीवेणापरिमितहरियू
थपाणामनेककोटिनिजसेनासंमेलनंस्ववशिष्टि ॥१॥२। पर्वतेषुउक्तादिकेषुतथापश्चिमस्यामित्यर्थः। ३। आदित्यभवनेगिरौयेस्थिताः उदयाचलास्ता
लयोरित्यर्थः पद्माचलोगिरिविशेषः॥५॥

महाशैलस्तदास्ख्यपर्वतः॥६॥७॥ तापसाश्रमरम्येषु रम्यतापसाश्रमेषु। यद्वानैरम्यैः क्षितिवनविशेषणं॥८॥ क्षिप्रमानयेत्युक्ते मयैव गंतव्यं किमिति
शंकाह। सामदानादिभिः कल्पैर्वानरैर्वेगवत्तरैः॥ इत्यादिना दुष्टेष्वदंडः कल्पैरुपायैश्चानयेत्यस्य वानापयेत्यर्थ इति कतकः॥९॥ ननु प्रेषिता एव सू

अंजनांबुदसंकाशाः कुंजरेंद्रमहौजसः॥ अंजने पर्वते चैव ये वसंति प्लवंगमाः॥५॥ महाशैलगुहावासा वानराः कनकप्र
भाः। मेरुपार्श्वगताश्चैव ये च धूम्रगिरिं श्रिताः॥६॥ तरुणादित्यवर्णाश्च पर्वते ये महारुणे। पिबंतो मधुमैरेयं भीमवे
गाः प्लवंगमाः॥७॥ वनेषु च सुरम्येषु सुगंधिषु महत्सु च॥ तापसाश्रमरम्येषु वनांतेषु समंततः॥८॥ तांस्तांस्त्वमानय
क्षिप्रं पृथिव्यां सर्ववानरान्॥ सामदानादिभिः कल्पैर्वानरैर्वेगवत्तरैः॥९॥ प्रेषिताः प्रथमं ये च मया ज्ञाता महाजवाः।
त्वरणार्थं तु भूयस्त्वं संप्रेषय हरीश्वरान्॥१०॥ ये प्रसक्ताश्च कामेषु दीर्घसूत्राश्च वानराः॥ इहानयस्व तान् शीघ्रं सर्वा
नेव कपीश्वरान्॥११॥ अहोभिर्दशभिर्ये च नागच्छंति ममाज्ञया। हंतव्यास्ते दुरात्मानो राजशासनदूषकाः॥१२॥ श
तान्यथ सहस्राणि कोट्यश्च मम शासनात्॥ प्रयांतु कपिसिंहानां निदेशे मम ये स्थिताः॥१३॥ मेघपर्वतसंकाशाश्छा
दयंत इवांबरं॥ घोररूपाः कपिश्रेष्ठा यांतु मच्छासनादितः॥१४॥

॥वंहूनाइत्यत्राह। प्रेषिता इति॥ प्रथमं पूर्वं ये महाजवा दूताः प्रेषि
तास्ते मया ज्ञाता एव तथापि तेषां त्वरणार्थं अपरान् हरीश्वरान् प्रेषय॥१०॥ कामेषु भोगेषु प्रसक्ता ये च दीर्घसूत्रा विलंबितव्यापाराः आनयस्व
आनापय॥११। ये हताः॥१२॥ प्रेषणीयहनसंख्यामाह। शतानीति। एतेन हतानां स्मुक्तं॥१३॥ नदेवस्य स्टयति छादयंत इवांबरमिति॥१४

165

गतिंगत्वावेगवत्तरांगतिंगत्वा ॥१५॥१६॥ विष्णुक्रांतंपदमाकाशंपतत्रिज्योतिरध्वगाः पक्षिणांनक्षत्राणांचमार्गताः ॥ ७ ॥१८॥ मृत्युकालोपमस्यनिग्रह

तेगतिज्ञागतिंगत्वापृथिव्यांसर्ववानराः ॥ आनयंतुहरीन्सर्वांस्त्वरिताशासनान्मम ॥१५॥ तस्यवानरराजस्यश्रुत्वावायुसु
तोवचः ॥ दिक्षुसर्वासुविक्रांतान्प्रेषयामासवानरान् ॥१६॥ तेपदंविष्णुविक्रांतंपतत्रिज्योतिरध्वगाः ॥ प्रयाताःप्रहि
ताराज्ञाहरयस्तुक्षणेनवै ॥ ७ ॥ तेसमुद्रेषुगिरिषुवनेषुचसरस्सुच ॥ वानरावानरान्सर्वान्रामहेतोरचोदयन् ॥१८॥
मृत्युकालोपमस्याज्ञांराजराजस्यवानराः ॥ सुग्रीवस्याऽययुःश्रुत्वासुग्रीवभयशंकिताः ॥१९॥ ततस्तेंजनसंकाशाःगि
रेस्तस्मान्महावलाः ॥ तिस्रःकोट्यःप्लवंगानांनिर्ययुर्यत्रराघवः ॥२०॥ अस्तंगच्छतियत्रार्कस्तस्मिन्गिरिवरेरताः
संतप्तहेमवर्णाभास्तस्मात्कोट्योदशच्युताः ॥२१॥ कैलासशिखरेभ्यश्चसिंहकेसरवर्चसा ॥ ततःकोटिसहस्राणि
वानराणांसमागमन् ॥२२॥ फलमूलेनजीवंतोहिमवंतमुपाश्रिताः ॥ तेषांकोटिसहस्राणांसहस्रंसमवर्तत ॥२३॥
अंगारकसमानानांभीमानांभीमकर्मणां ॥ विंध्याद्वानरकोटीनांसहस्राण्यपतन्द्रुतम् ॥२४॥ क्षीरोदवेलानिल
यास्तमालवनवासिनः ॥ नारिकेलाशनाश्चैवतेषांसंख्यानविद्यते ॥२५॥ वनेभ्योगह्वरेभ्यश्चसरिद्भ्यश्चमहावलाः
आगच्छद्वानरीसेनापिबंतीवदिवाकरं ॥२६॥ छ ॥

विषयेइतिशेषः ॥१९॥ तस्मान्गिरेः अंजनगिरेः ॥२०॥२१॥२२॥२३॥२४॥ असंख्यबलमित्याह ॥ तेषांसंख्यानविद्यतइति ॥२५॥२६॥ छ

॥रा॰बा॰कि॰॥
॥८९॥

येत्वन्वरयितुंयाताः हनुमत्प्रेषिताः महाद्रुमं आनिष्ठमित्यन्वयः भगवत्साम्भूतं माहेश्वरयज्ञवाटस्थं ददृशुः पूर्वंनीलप्रेषितान् हनुमांश्च ददृशुरितिशेषः ॥ अन्नलेपान्
नल्पवपराह्नति ॥२७॥ माहेश्वरोयज्ञः ममहेश्वरदेवमोदिव्याश्वमेध इतिकतकः सर्वदेवानांमनस्तोत्रायत्रस ॥२८॥ अन्ननिष्यंदात् ॥ होमद्रव्याज्यादित्ववणाः

येतुत्वरयितुंयातावानराःसर्ववानरान् ॥ तेवीराहिमवच्छैलेददृशुस्तंमहाद्रुमं ॥२७॥ तस्मिन्गिरिवरेपुण्येयज्ञोमाहेश्व
रःपुरा ॥ सर्वदेवमनस्तोषोवभूवसुमनोरमः ॥२८॥ अन्ननिष्यंदजातानिमूलानिचफलानिच ॥ अमृतस्वादुकल्पा
निददृशुस्तत्रवानराः ॥२९॥ तदन्नसंभवंदिव्यंफलमूलंमनोहरं ॥ यःकश्चित्सकृदश्नातिमासंभवतितर्पितः
॥३०॥ तानिमूलानिदिव्यानिफलानिचफलाशनाः ॥ औषधानिचदिव्यानिजगृहुर्हरिपुंगवाः ॥३१॥ तस्माच्चयज्ञायतना
त्पुष्पाणिसुरभीणिच ॥ आनिन्युर्वानरागत्वासुग्रीवप्रियकारणात् ॥३२॥ तेतुसर्वेहरिवराः पृथिव्यांसर्ववानरान् ॥ संचोदयि
त्वात्वरितंयूथानांजग्मुरग्रतः ॥३३॥ तेतुतेनमुहूर्तेनकपयःशीघ्रचारिणः ॥ किष्किंधांत्वरयाप्राप्ताःसुग्रीवोयत्रवानरः ॥३४॥
तेगृहीत्वौषधीःसर्वाःफलमूलंचवानराः ॥ तंप्रतिग्राहयामासुर्वचनंचेदमब्रुवन् ॥३५॥ सर्वेपरिसृताःशैलाःसरितश्चव
नानिच ॥ पृथिव्यांवानराःसर्वेशासनादुपयांतिते ॥३६॥ एवंश्रुत्वाततोहृष्टःसुग्रीवःप्लवगाधिपः ॥ प्रतिजग्राहचप्रीत
स्तेषांसर्वमुपायनं ॥३७॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेसप्तत्रिंशःसर्गः ॥३७॥

(न्त्वामानि ॥२९॥ ३०॥ औषधानिसंजीवन्यादी
नि ॥३१॥ ३२॥ तेतुसर्वेहनुमत्पाः यूथानांअग्रतः स्वश्रेणिनवलानागमनात्पूर्वमित्यर्थः ॥३३॥ ३४॥ तेहनुमत्प्रेषितसहिताःनीलप्रेषिताःहनाः ॥३५॥ ३६॥

॥२९॥ तलमानः इतिरामाभिरामेश्रीरा॰ किष्किंधा॰ सप्तत्रिंशःसर्गः ॥२९॥

166

॥राम॰॥
॥८९॥

प्रतिगृह्येति ॥ १ ॥ राघवं च कृतार्थमित्यनुषंगः ॥ २ ॥ ३ ॥ विनिष्क्रामेति प्रार्थने लोट् ॥ ४ ॥ स्थेयं तत्र स्थातव्यमित्यर्थः ॥ ५ ॥ ६ ॥ एहि एतेत्यर्थः ॥ ७ ॥ स्त्रीदर्शनक्षमाः स्त्री

प्रतिगृह्य च तत्सर्वमुपायनमुपाहृतं ॥ वानरान्सांत्वयित्वा च सर्वानेव विसर्जयत् ॥ १ ॥ विसर्जयित्वा स हरीञ्छूरांस्तान् कृत
कर्मणः ॥ मेने कृतार्थमात्मानं राघवं च महावलं ॥ २ ॥ स लक्ष्मणो भीमवलं सर्ववानरसत्तमं ॥ अब्रवीत्प्रश्रितं वाक्यं सु
ग्रीवं संप्रहर्षयन् ॥ ३ ॥ किष्किंधाया विनिष्क्रामो यदि ते सौम्य रोचते ॥ तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य सुभाषितं ॥ ४ ॥
सुग्रीवः परमप्रीतो वाक्यमेतदुवाच ह ॥ एवं भवतु गच्छाम स्थेयं त्वच्छासने मया ॥ ५ ॥ तमेवमुक्त्वा सुग्रीवो लक्ष्मणं शु
भलक्षणं विसर्जयामास तदा ताराद्याश्चैव योषितः ॥ ६ ॥ एहीत्युच्चैर्हरिवरान् सुग्रीवः समुदाहरत् ॥ तस्य तद्वच
नं श्रुत्वा हरयः शीघ्रमाययुः ॥ ७ ॥ वद्धांजलिपुटाः सर्वे ये स्युः स्त्रीदर्शनक्षमाः ॥ तानुवाच ततः प्राप्तान् राजार्कसदृ
शप्रभः ॥ ८ ॥ उपस्थापयत क्षिप्रं शिविकां मम वानराः ॥ श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः ॥ ९ ॥ समुपस्था
पयामासुः शिविकां प्रियदर्शनां ॥ तामुपस्थापितां दृष्ट्वा शिविकां वानराधिपः ॥ १० ॥ लक्ष्मणारुह्यतां शीघ्रमि
ति सौमित्रिमब्रवीत् ॥ इत्युक्त्वा कांचनं यानं सुग्रीवः सूर्यसन्निभं ॥ ११ ॥ वृहद्भिर्हरिभिर्युक्तमारुरोह सलक्ष्मणः ॥ पां
डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ १२ ॥ शुक्लैश्च वालव्यजनैर्धूयमानैः समंततः ॥ शंखभेरीनिनादैश्च वंदिभिश्चा

॥ ८० ॥ किष्कि

समूहेपि राजदर्शनक्षमाः अमात्या इति यावत् ॥ ८ ॥ ९ ॥ १० ॥ ११ ॥ हरिभिर्वाहकैः स लक्ष्मण इत्यनेनैकवाहनारोहणात्संख्यातिशयः सूचितः ॥ १२ ॥ १३ ॥

१४॥१५॥१६॥वानरश्चतथाऽभवन्॥कृतांजलिपुटाऽभवन्नित्यर्थः॥आल्हादकत्वात्तटाकोपमा तदुपमेयंवानराणांमहत्सैन्यं॥१७॥१८॥१९॥२०॥२१॥

निर्ययौप्राप्यसुग्रीवोराज्यश्रियमनुत्तमां॥सवानरशतैस्तीक्ष्णैर्वहुभिःशस्त्रपाणिभिः॥१४॥परिकीर्णोययौतत्रयत्ररामो
व्यवस्थितः॥सतंदेशमनुप्राप्यश्रेष्ठंरामनिषेवितं॥१५॥अवातरन्महातेजाःशिविकायाःसलक्ष्मणः॥आसाद्यचतत
तोरामंकृतांजलिपुटोऽभवत्॥१६॥कृतांजलौस्थितेतस्मिन्वानराश्चाभवंस्तथा॥तटाकमिवतंदृष्ट्वारामःकुड्मलपं
कजं॥१७॥वानराणांमहत्सैन्यंसुग्रीवेप्रीतिमानभूत्॥पादयोःपतितंमूर्ध्नातमुत्थाप्यहरीश्वरं॥१८॥प्रेम्णाचवहु
मानाच्चराघवःपरिषस्वजे॥परिष्वज्यचधर्मात्मानिषीदेतिततोऽब्रवीत्॥१९॥निषण्णंतंततोदृष्ट्वाक्षितौरामोऽब्रवी
त्ततः॥धर्ममर्थंचकामंचकालेयस्तुनिषेवते॥१०॥विभज्यसततंवीरसराजाहरिसत्तम॥हित्वाधर्मंतथार्थंचकामं
यस्तुनिषेवते॥२१॥सवृक्षाग्रेयथासुप्तःपतितःप्रतिबुध्यते॥अमित्राणांवधेयुक्तोमित्राणांसंग्रहेरतः॥२२॥
त्रिवर्गफलभोक्ताचराजाधर्मेणयुज्यते॥उद्योगसमयस्त्वेषप्राप्तःशत्रुनिषूदन॥२३॥संचिंत्यतांहिपिंगेशहरिभिः
सहमंत्रिभिः॥एवमुक्तस्तुसुग्रीवोरामंवचनमब्रवीत्॥२४॥प्रनष्टाश्रीश्चकीर्तिश्चकपिराज्यंचशाश्वतं॥त्वत्प्रसादा
न्महाबाहोपुनःप्राप्तमिदंमया॥२५॥

(वृक्षाग्रेसुप्तःपतितःसन्यथाप्रतिबुध्यतेतथाकामपरोराज्यभ्रष्टःसन्प्रतिबुध्यतइत्यर्थः॥२२॥त्रिवर्गोधर्मा
र्थकामलक्षणस्तस्यतत्फलस्यचयथाकालंभोक्ता॥२३॥संचिंत्यतांसीतान्वेषणादिप्रतिज्ञापरिपूर्त्युपायश्चिंत्यतामित्यर्थः॥२४॥ २५॥ ॥छ॥

167

हे देव तव प्रसादात् तव भ्रातुः प्रसादाच्चेत्यर्थः । परुषाणां मध्ये सर्वदूषको धर्मनाशक इत्यर्थः । २६ । आसाद्य आहूय । २७ । २८ । २९ । शनैरित्यादौ केचिदित्यध्याहारः
परिवृता इत्यर्थकमाहृता इति च सर्वत्र योज्यं शतसहस्रं लक्षशतं कोटिः दशसहस्रमयुतं कोटिलक्षं शंकुः । ३० । शंकुसहस्रमर्बुदं अर्बुदशतदशगुणं मध्यं

तव देव प्रसादाच्च भ्रातुश्च जयतां वर ॥ कृतं न प्रतिकुर्याद्यः पुरुषाणां हि दूषकः ॥ २६ ॥ एते वानरमुख्याश्च शतशः शत्रुसू-
दन ॥ प्राप्ताश्चादाय बलिनः पृथिव्यां सर्ववानरान् ॥ २८ ॥ ऋक्षाश्च वानराः शूरा गोलांगूलाश्च राघव । कांतारवनदुर्गाणा-
मभिज्ञा घोरदर्शनाः ॥ २८ ॥ देवगंधर्वपुत्राश्च वानराः कामरूपिणः ॥ स्वैः स्वैः परिवृताः सैन्यैर्वर्त्तन्ते पथि राघव ॥ २९ ॥ श-
तैः शतसहस्रैश्च वर्त्तन्ते कोटिभिस्तथा । अयुतैश्चावृता वीर शंकुभिश्च परंतप ॥ ३० ॥ अर्बुदैरर्बुदशतैर्मध्यैश्चांत्यै-
श्च वानराः । समुद्राश्च परार्धाश्च हरयो हरियूथपाः ॥ ३१ ॥ आगमिष्यंति ते राजन् महेंद्रसमविक्रमाः । मेघपर्व-
तसंकाशा मेरुविंध्यकृतालयाः ॥ ३२ ॥ ते त्वामभिगमिष्यंति राक्षसं योद्धुमाहवे ॥ निहत्य रावणं युद्धे ह्यानयिष्यंति मै-
थिलीं ॥ ३३ ॥ ततः समुद्योगमवेक्ष्य वीर्यवान् हरिप्रवीरस्य निदेशवर्त्तिनः । बभूव हर्षाद्वसुधाधिपात्मजः प्रबुद्धनीलो-
त्पलतुल्यदर्शनः ॥ ३४ ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडेऽष्टत्रिंशः सर्गः ॥ ३८ ॥ ६ ॥ श्रीरामाय नमः ॥

तस्माद्दशगुणोंत्यः ततो विंशतिगुणाः समुद्रः ततस्त्रिंशद्गुणाः परार्धस्तेनासंख्यान्यमुक्तं ॥ ३१ ॥ ३२ ॥ ये त्वानयिष्यंति ते त्वामभिगमिष्यंतीत्यन्वयः ॥ ३३ ॥ प्र-
बुद्धनीलोत्पलतुल्यदर्शनः विकसितनीलोत्पलसदृशनेत्रः ॥ ३४ ॥ भोगमानः । इति रामाभिरामे श्रीरा० ति० किष्किंधाकांडेऽष्टत्रिंशः सर्गः ॥ ३८ ॥

इतीमि ॥ १ ॥ उपकर्तृत्वं तव सहजधर्म एवेति भगवान् सुग्रीवं स्तौति । यदीति । वर्षन्न इति यत्तन्न चित्रं स्वाभाविकत्वादिति शेषः ॥ २ ॥ निर्मलां रविकिरणजन्मतापरहितां त्वद्विधः सात्त्विको मित्राणां प्रत्युपकारेण प्रीतिं कुर्यात् ॥ इति यत्तदपि न चित्रं ॥ ३ ॥ एवं त्वयि मित्रप्रत्युपकारार्थं सेनामेलनं यत्तन्न चित्रं । हे सौम्य शोभनं भद्रं जा

इति ब्रुवाणं सुग्रीवं रामो धर्मभृतां वरः ॥ बाहुभ्यां संपरिष्वज्य प्रत्युवाच कृतांजलिं ॥ १ ॥ यदिंद्रो वर्षते वर्षं न तच्चित्रं भविष्यति ॥ आदित्यो सौ सहस्रांशुः कुर्याद्वितिमिरं नभः ॥ २ ॥ चंद्रमा रजनीं कुर्यात्प्रभया सौम्य निर्मलां ॥ त्वद्विधो वापि मित्राणां प्रीतिं कुर्यात्परंतप ॥ ३ ॥ एवं त्वयि न तच्चित्रं भवेद्यत्सौम्य शोभनं ॥ जानाम्यहं त्वां सुग्रीव सततं प्रियवादिनं ॥ ४ ॥ त्वत्सनाथः सखे संख्ये जेतास्मि सकलानरीन् ॥ त्वमेव मे सुहृन्मित्रं साहाय्यं कर्तुमर्हसि ॥ ५ ॥ जहारात्मविनाशाय मैथिलीं राक्षसाधमः ॥ वंचयित्वा तु पौलोमीमनुह्लादो यथा शचीं ॥ ६ ॥ नचिरात्तं वधिष्यामि रावणं निशितैः शरैः ॥ पौलोम्याः पितरं दृप्तं शतक्रतुरिवारिहा ॥ ७ ॥ एतस्मिन्नंतरे चैव रजः समभिवर्तत ॥ उष्णां तीव्रां सहस्रांशोश्छादयद्गगने प्रभां ॥ ८ ॥ दिशः पर्याकुलाश्चासंस्तमसा तेन दूषिताः ॥ चचाल च मही सर्वा सशैलवनकानना ॥ ९ ॥ ततो नगेंद्रसंकाशैस्तीक्ष्णदंष्ट्रैर्महाबलैः ॥ कृत्स्ना संछादिता भूमिरसंख्येयैः प्लवंगमैः ॥ १० ॥

तं ॥ ४ ॥ संख्ये युद्धे ॥ ५ ॥ यथा पौलोमीपितरं वंचयित्वा कृतानुमतिकं कृत्वा शचीं पौलु ह्लादो जहारात्मविनाशाय इंद्रस्तत्पितरं अनुमंतारं हत्वा तं चानुह्लादं हत्वा शचीं प्रत्यानीतवानिति पुराणगाथा । एवं य आत्मविनाशाय मैथिलीं जहार मारीचेन मां वंचयित्वा तं नचिरात्क्षिप्रं अरिहा इंद्र इव वधिष्यामि पौलोम्याः पितरमिवेत्यनेन रावणकृतो जानक्यतिक्रमाभावः सूचितः ॥ ६ ॥ ७ ॥ अभिवर्तत अभ्यवर्तत ॥ ८ ॥ ९ ॥ १० ॥

168

उक्तमेवप्रपंचयति निमेषेति ।११। वनवासिभिःउक्ततालादिवनवासिभिः ।१२। हेमाहेमाचलः ।१३। १४। तारायपितासुषेणः ।१५। रुमापितातारः ।१६। ७ ॥१८। गोलांगूलो

निमेषांतरमात्रेणाततस्तैर्हरियूथपैः ।कोटीशतपरीवारैर्वानरैर्हरियूथपैः ॥११॥नादेयैःपार्वतेयैश्चसामुद्रैश्चमहावलैः ।हरिभिर्मे
घनिर्ह्रादैरन्यैश्चवनवासिभिः ।१२। तरुणादित्यवर्णैश्चशशिगौरैश्चवानरैः ।पद्मकेसरवर्णैश्चश्वेतैर्हेमकृतालयैः ।कोटी
सहस्रैर्दशभिःश्रीमान्परिवृतस्तदा ।वीरःशतवलिर्नामवानरःप्रत्यदृश्यत ॥१४॥ततःकांचनशैलाभस्तारायावीर्यवान्
पिता ।अनेकैर्वहुसाहस्रैःकोटिभिःप्रत्यदृश्यत ॥१५॥तथापरेणकोटीनांसहस्रेणसमन्वितः ।पितारुमायाःसंप्राप्तः
सुग्रीवश्वसुरोविभुः ॥१६॥पद्मकेसरसंकाशस्तरुणार्कनिभाननः ।वुद्धिमान्वानरश्रेष्ठःसर्ववानरसत्तमः ॥७॥अने
कैर्वहुसाहस्रैर्वानराणांसमन्वितः ।पिताहनुमतःश्रीमान्केसरीप्रत्यदृश्यत ॥१८॥गोलांगूलमहाराजोगवाक्षोभी
मविक्रमः ।वृतःकोटिसहस्रेणवानराणामदृश्यत ॥१९ ॥ऋक्षाणांभीमवेगानांधूम्रःशत्रुनिवर्हणः ।वृतःको
टिसहस्राभ्यांद्वाभ्यांसमभिवर्तत ॥२०॥महावलनिभैर्घोरैःपनसोनामयूथपः ।आजगाममहावीर्यस्तिसृभिःकोटि
भिर्वृतः ॥२१॥नीलांजनचयाकारोनीलोनामैषयूथपः ।अदृश्यतमहाकायःकोटिभिर्दशभिर्वृतः ॥२२॥ततःकांचन
शैलाभोगवयोनामयूथपः ॥आजगाममहावीर्यःकोटिभिःपंचभिर्वृतः ॥२३॥दरीमुखश्चवलवान्यूथपोभ्याययौ
तदाह्यत्रैकोटिसहस्रेणसुग्रीवंसमवस्थितः ।२४

वानराःवानरजातिः ॥१९ ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥श्रीरामायरामचन्द्रायनमः ॥ ❀ ॥ ❀ ॥ ❀ ॥ श्रीकृष्णायवासुदेवायनमः

२५॥२६॥२७॥२८॥२९॥नाराद्युतिर्नक्षत्रप्रभः अयंहमापितुरन्यसारः॥ ३०॥ ३१ ॥३२॥ ३३ ॥३४॥ ३५॥ ३६॥ ३७॥ ३८ ॥ ३९ ॥ ४० ॥

मैंदश्चद्विविदश्चोभावश्विपुत्रौमहावलौ॥कोटिकोटिसहस्रेणवानराणामदृश्यतां॥२५॥गजश्चवलवान्वीरस्त्रिसृभिःकोटिभिर्वृतः
ऋक्षराजोमहातेजाजांववान्नामनामतः॥२६॥कोटिभिर्दशभिर्व्याप्तःसुग्रीवस्यवशेस्थितः॥रुमणोनामतेजस्वीविक्रांतैर्वानरैर्वृतः
॥२७॥आगतोवलवांस्तूर्णंकोटीशतसमावृतः॥ततःकोटिसहस्राणांसहस्रेणशतेनच॥२८॥पृष्ठतोनुगतःप्राप्तोहरिभिर्गंधमादनः
ततःपद्मसहस्रेणवृतःशंखशतेनच॥२९॥युवराजोंगदःप्राप्तःपितृतुल्यपराक्रमः॥ततस्ताराद्युतिस्तारोहरिभिर्भीमविक्रमैः॥३०॥
पंचभिर्हरिकोटीभिर्दूरतःप्रत्यदृश्यत॥इंद्रजानुःकपिर्वीरोयूथपःप्रत्यदृश्यत॥३१॥एकादशानांकोटीनामीश्वरस्तैश्चसंवृ
तः॥ततोरंभस्त्वनुप्राप्तस्तरुणादित्यसन्निभः॥३२॥अयुतेनवृतश्चैवसहस्रेणशतेनच॥ततोयूथपतिर्वीरोदुर्मुखोनामवा
नरः॥३३॥प्रत्यदृश्यतकोटीभ्यांद्वाभ्यांपरिवृतोवली॥कैलासशिखराकारैर्वानरैर्भीमविक्रमैः॥३४॥वृतःकोटिसहस्रेण
हनुमान्प्रत्यदृश्यत॥नलश्चापिमहावीर्यःसंवृतोद्रुमवासिभिः॥३५॥कोटीशतेनसंप्राप्तःसहस्रेणशतेनच॥ततोदरीमुखः
श्रीमान्कोटिभिर्दशभिर्वृतः॥३६॥संप्राप्तोभिनदंस्तस्यसुग्रीवस्यमहात्मनः॥शरभःकुमुदोवह्निर्वानरोरंहएवच॥३७॥एते
चान्येचबहवोवानराःकामरूपिणः॥आवृत्यपृथिवींसर्वांपर्वतांश्चवनानिच॥३८॥यूथपाःसमनुप्राप्तायेषांसंख्यानविद्यते·
आगताश्चनिविष्टाश्चपृथिव्यांसर्ववानराः॥३९॥आप्लवंतःप्लवंतश्चगर्जंतश्चप्लवंगमाः॥अभ्यवर्तंतसुग्रीवंसूर्यमभ्रगणाइव॥४०

169

शिरोभिर्न्यवेदयन् ॥ वहुसंमर्दात् हरेः स्थितानां नमस्कारेणैवात्मानं न्यवेदयन्नित्यर्थः ॥४१॥ अपरे संगम्य समीपदेशं प्राप्य यथोचितं निवेद्य जग्मुः अपरे हनूमदंगदादयः समागम्य
निकटमागत्य स्थिताः ॥४२॥ धर्मज्ञो राजधर्मज्ञः रामाभिमुखं प्राञ्जलिः स्थितो भूत्वा सर्वान् यूथपतीन्निवेदयित्वा सुथयानब्रवीत् ॥४३॥ भो वानरेन्द्राः पर्वतादिषु यथासुखं

कुर्वाणा वहुशब्दांश्च प्रकृष्टावाहुशालिनः ॥ शिरोभिर्वानरेन्द्राय सुग्रीवाय न्यवेदयन् ॥४१॥ अपरे वानरश्रेष्ठाः संगम्य च यथोदितं सुग्री-
वेण समागम्य स्थिताः प्राञ्जलयस्तदा ॥४२॥ सुग्रीवस्त्वरितो रामे सर्वांस्तांस्त्वरितांस्तदा ॥ निवेदयित्वा धर्मज्ञः स्थितः प्राञ्जलिरब्र-
वीत् ॥४३॥ यथासुखं पर्वतनिर्झरेषु वनेषु सर्वेषु च वानरेन्द्राः ॥ निवेशयित्वा विधिवद्बलानि बलं बलज्ञः प्रतिपत्तुमीष्टे ॥४४॥
इत्यार्षे श्रीमद्रामायणे किष्किन्धाकांडे एकोनचत्वारिंशः सर्गः ॥३९॥ अथ राजा समृद्धार्थः सुग्रीवः प्लवगेश्वरः ॥ उवाच
नरशार्दूलं रामं परबलार्दनं ॥१॥ आगता विनिविष्टाश्च बलिनः कामचारिणः ॥ वानरेन्द्रा महेन्द्राभा ये मद्विषयवासि-
नः ॥२॥ त इमे वहुविक्रांतैर्बलिभिर्भीमविक्रमैः ॥ आगता वानरा घोरा दैत्यदानवसन्निभाः ॥३॥ ख्यातकर्मापदानाश्च
बलवन्तो जितक्लमाः ॥ पराक्रमेषु विख्याता व्यवसायेषु चोत्तमाः ॥४॥ पृथिव्यम्बुचरा राम नानानगनिवासिनः ॥ कोट्यो[illegible]
श्च इमे प्राप्ता वानरास्तव किंकराः ॥५॥

धा २

((तानि बलानि निवेशयित्वा ॥ तेषु यो बलज्ञः बलमन्वज्ञः प्रतिपत्तुं क आगतः को नागत इति ज्ञातुमीष्टे ईशो भवेत् लिङर्थे लट्
४४ ॥ इति रामाभिरामे श्रीरा० किष्कि० एकोनचत्वारिंशः सर्गः ॥३९॥ अथेति ॥१॥ विनिविष्टाश्चेति ॥ स्वस्वसेनानिवेश इति शेषः ॥ निवेशिता इत्यर्थः ॥ मद्विषयवासिनः मम
विषये वानरराज्ये वासिनः ॥२॥ वहुविक्रांतैः वहुषु स्थलेषु कृतपराक्रमैः ॥ अतएव भीमविक्रमैः स्वयूथैः सह इति शेषः ॥३॥ ख्यातं कर्म [illegible] अपदानं शौर्यं येषां ॥
४ ॥ अम्बुचाराः समुद्रमध्यद्वीपचराः कोट्योघा इति ॥ असंख्यातोपलक्षणं ॥५॥ ॥ ❀ ॥

गुरुहितेस्वामिहिते ॥ तवाभिप्रेतमनुष्ठातुं शक्ष्यंतिसमर्था इत्यर्थः ॥ ६ ॥ अनेकैः सहेति शेषः प्राप्तकालं कालोचितं तदुच्यतां सन्नियोगः कार्य इत्यर्थः नन्विदं त्वत्सैन्यं तमनियोज्य
तामहंनिनत्राह ॥ त्वत्सैन्यमिति ॥ ८ ॥ इदं कार्यं सीतान्वेषणरूपं ॥ ९ ॥ १० ॥ ११ ॥ तस्मिन्काले हतांतावगत्यनंतरकाले ॥ १२ ॥ अस्मिन्कार्ये वानरशेरणरूपे अस्य कार्यस्येति

निदेशवर्त्तिनः सर्वे सर्वे गुरुहिते स्थिताः ॥ अभिप्रेतमनुष्ठातुं तव शक्ष्यंत्यरिंदम ॥ ६ ॥ त इमे बहुसाहस्रैरनेकैर्बहुविक्रमैः ॥ आगता वानरा घोरा देवदानवसन्निभाः ॥ ७ ॥ यन्मन्यसे नरव्याघ्र प्राप्तकालं तदुच्यतां ॥ त्वत्सैन्यं त्वद्वशे युक्तमाज्ञापयितुमर्हसि ॥ ८ ॥ काममेषामिदं कार्यं विदितं मम तत्त्वतः ॥ तथापि तु यथायुक्तमाज्ञापयितुमर्हसि ॥ ९ ॥ तथा ब्रुवाणं सुग्रीवं रामो दशरथात्मजः ॥ बाहुभ्यां संपरिष्वज्य इदं वचनमब्रवीत् ॥ १० ॥ ज्ञायतां सौम्य वैदेही यदि जीवति वा न वा ॥ स च देशो महाप्राज्ञ यस्मिन्वसति रावणः ॥ ११ ॥ अभिगम्य तु वैदेहीं निलयं रावणस्य च ॥ प्राप्तकालं विधास्यामि तस्मिन्काले सह त्वया ॥ १२ ॥ नाहमस्मिन्प्रभुः कार्ये वानरेंद्र न लक्ष्मणः ॥ त्वमस्य हेतुः कार्यस्य प्रभुश्च प्लवगेश्वर ॥ १३ ॥ त्वमेवाज्ञापय विभो मम कार्यविनिश्चयं ॥ त्वं हि जानासि मे कार्यं मम वीर न संशयः ॥ १४ ॥ सुहृद्द्वितीयो विक्रांतः प्राज्ञः कालविशेषवित् ॥ भवानस्मद्धिते युक्तः सुहृदाप्तोऽर्थवित्तमः ॥ १५ ॥ एवमुक्तस्तु सुग्रीवो विनतं नाम यूथपं ॥ अब्रवीद्रामसान्निध्ये लक्ष्मणस्य च धीमतः ॥ १६ ॥ शैलाभं मेघनिर्घोषमूर्जितं प्लवगेश्वरं ॥ सोमसूर्यनिभैः सार्द्धं वानरैर्वानरोत्तम ॥ १७ ॥

निर्दिशेति शेषः ॥ १३ ॥ मम
कार्यविनिश्चयं ज्ञात्वेति शेषः ॥ हे वीर त्वं मम सुहृदित्यन्वयः ॥ १४ ॥ द्वितीयः सुहृल्लक्ष्मणापेक्षया ॥ १५ ॥ १६ ॥ सूर्यसोमनिभैस्तत्सदृशकांतिभिः ॥ १७ ॥

नयो नीतिः विज्ञः तज्ज्ञस्त्वमिति शेषः ॥१८॥ निलयं रावणस्य निलयनस्थानं यद्वा चतुर्दिक्षु रावणवासस्थानमनेन सूचितं ॥१९॥ मार्गध्वमिति सामान्यतो नियोगः वि
शेषेणाह नदीमित्यादि द्वितीयांतानां प्राप्येति शेषः ॥२०॥ कालिंदीं यमुनां यामुनो गिरिः यमुनोत्पत्तिस्थानभूतः कलिंदगिरिः ॥२१॥ महीकालमहीशोणौ अथ
प्राच्यदेशानाह । ब्रह्ममालानिति हिमवद्विंध्यमध्यवर्त्तिआर्यावर्तापेक्षया प्राच्यादिविभागोऽत्र विवक्षित इत्याहुः ॥२२॥ कोशकाराणां भूमिं । कौशेयतंतूत्पादक

देशकालनयैर्युक्तो विज्ञः कार्यविनिश्चये त्वतः शतसहस्रेण वानराणां तरस्विनां ॥१८॥ अधिगच्छ दिशं पूर्वां सशैलवन
काननां ॥ तत्र सीतां च वैदेहीं निलयं रावणस्य च ॥१९॥ मार्गध्वं गिरिदुर्गेषु वनेषु च नदीषु च ॥ नदीं भागीरथीं रम्यां सर
युं कौशिकीं तथा ॥२०॥ कालिंदीं यमुनां रम्यां यामुनं च महागिरिं ॥ सरस्वतीं च सिंधुं च शोणं मणिनिभोदकं ॥२१॥
महीं कालमहीं चापि शैलकाननशोभितां ॥ ब्रह्ममालान्विदेहांश्च मालवान्काशिकोसलान् ॥२२॥ मागधांश्च मह
ग्रामान्पुंड्रांस्त्वंगांस्तथैव च ॥ भूमिं च कोशकाराणां भूमिं च रजताकरां ॥२३॥ सर्वं च तद्विचेतव्यं मृगयद्भिस्ततस्त
तः ॥ रामस्य दयितां भार्यां सीतां दशरथस्नुषां ॥२४॥ समुद्रमवगाढांश्च पर्वतान्पत्तनानि च ॥ मंदरस्य च ये कोटिं सं
श्रिताः केचिदालयाः ॥२५॥ कर्णप्रावरणाश्चैव तथा चाप्योष्ठकर्णकाः ॥ घोरलोहमुखाश्चैव जवनाश्चैकपादकाः ॥२६॥

जंतूत्पत्तिस्थानभूतां भूमिं रजताकरां रजतखनिं ॥२३॥ एतानि प्राप्य एतत्सर्वोक्तं सर्वं सर्वावयवं विचेतव्यं । तत्र किं विचेतव्यं तत्राह । रामस्य दयितामिति ॥२४॥ समुद्र
मवगाढान् समुद्रांतर्गतान् पत्तनानि समुद्रद्वीपवर्त्तीनि आलया ग्रामाः ॥२५॥ कर्णप्रावरणाः प्रावरणं वस्त्रं तद्वद्विशालश्रवणयुताः ओष्ठकर्णकाः ओष्ठपर्यंतकर्णाः वा
हमुखाः लोहवत्कठिनकृष्णमुखाः एकपादकाः संतो जवनाः वेगगामिनः ॥२६॥

अक्षयाः अक्षयसंतानाः एते उक्ताः पुरुषाः तथैव पुरुषादका रक्षोभेदाः तीक्ष्णास्यायसदृशतैक्ष्ण्यवती चूडा केशपाशो एषां ॥२७॥ आममीनाशनाः अपक्वमत्स्यभुजः
नरव्याघ्राः अर्धप्रदेशे नराकाराः एवं तत उपरिभागे व्याघ्राकाराः अत एव घोराः ॥२८॥ काननौकस इति संबोधनं ॥ गिरिभिर्ये च गम्यंते ॥ गिरीनाक्रम्य ये देशा द्वीपाश्च गम्य
न्ते ये च प्लवनेन कूर्द्दनेन गम्यंते ये च प्लवेनोडुपेन गम्यंते ते च विचेया इत्यन्वयः ॥२९॥ ततः परं यत्नवंतो भूत्वा सप्तराज्योपशोभितं यवद्वीपं तथा सुवर्णद्वीपं रूप्य

अक्षयाबलवंतश्च तथैव पुरुषादकाः ॥ किरातास्तीक्ष्णचूडाश्च हेमाभाः प्रियदर्शनाः ॥२७॥ आममीनाशनाश्चापि किराता
द्वीपवासिनः ॥ अंतर्जलचरा घोरा नरव्याघ्रा इति स्मृताः ॥२८॥ एतेषामाश्रयाः सर्वे विचेयाः काननौकसः ॥ गिरिभिर्ये
च गम्यंते प्लवनेन प्लवेन च ॥२९॥ यत्नवंतो यवद्वीपं सप्तराज्योपशोभितं ॥ सुवर्णरूप्यकद्वीपं सुवर्णाकरमंडितं ॥३०॥
यवद्वीपमतिक्रम्य शिशिरो नाम पर्वतः ॥ दिवं स्पृशति शृंगेण देवदानवसेवितः ॥३१॥ एतेषां गिरिदुर्गेषु प्रपातेषु
वनेषु च ॥ मार्गध्वं सहिताः सर्वे रामपत्नीं यशस्विनीं ॥३२॥ ततो रक्तजलं प्राप्य शोणाख्यं शीघ्रवाहिनं ॥ गत्वा पारं समु
द्रस्य सिद्धचारणसेवितं ॥३३॥ तस्य तीर्थेषु रम्येषु विचित्रेषु वनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥३४॥
पर्वतप्रभवा नद्यः सुभीमबहुनिष्कुटाः ॥ मार्गितव्या दरीमंतः पर्वताश्च वनानि च ॥३५॥

कद्वीपं विचेतव्यमिति शेषः सुवर्णाकरमंडित
मिति सुवर्णं कुर्वंति ये तैः शोभितं ॥३०॥ ततः परं यवाख्यद्वीपमतिक्रम्य शिशिरनामा पर्वतोस्ति ॥३१॥ एतेषां उक्तद्वीपानां ॥३२॥ ततः समुद्रस्य पारं गत्वा रक्तवर्ण
जलं अत एव शोणाख्यं नदं प्राप्य ॥३३॥ तस्य तीर्थेष्ववतारभेदेषु ॥३४॥ बहुनिष्कुटाः बहुलवनप्रदेशाः दरीमंतः दरीयुक्ताः ॥३५॥ ॥छ॥ ॥छ॥ ॥

समुद्रद्वीपान् उक्तदेशात् परवर्त्तीन् समुद्रद्वीपान् ऊर्मिमंतं मत्त एव क्रोशंतं महाघोषं ॥३६॥ तत्र इक्षुसमुद्रे समनुज्ञाताः समनुज्ञातच्छायाधारकग्रहणसामर्थ्यादि
मंतः छाया गृहीतप्राणिभक्षणात् तृप्तिकाश्च ॥३७॥ इक्षुरसस्यापि श्यामत्वात्तद्वर्णैः कालमेघप्रतिमत्वं तीर्थेन उपायेनाभिगम्य प्राप्य ॥३८॥ इतन इक्षुसागरा
त्परतः रक्तजलं रक्तवर्णजलं अत एव लोहिताख्यां ॥ कूटशाल्मली द्वीपत्वप्रयोजकवृक्षं जंबूद्वीपजंबूवत् ॥३९॥ तत्र कूटशाल्मलीसमीपे ॥४०॥ शैलशृंगे
पुसुरासमुद्रांतर्वर्त्तिशैलशृंगे पुलंबंते ऽधोमुखा इति शेषः ॥४१॥ सूर्यस्योदयनं प्रति सूर्योदयं प्राप्य ऊर्ध्वमुखाः सूर्येणायुध्यमानाः सूर्येणाभितप्ताः तन्मंड

ततः समुद्रद्वीपांश्च सुभीमान्द्रष्टुमर्हथ ॥ ऊर्मिमंतं महारौद्रं क्रोशंतमनिलोद्धतम् ॥३६॥ तत्रासुरा महाकायाः छा
यां गृह्णंति नित्यशः ॥ ब्रह्मणा समनुज्ञाता दीर्घकालं बुभुक्षिताः ॥३७॥ तं कालमेघप्रतिमं महोरगनिषेवितं ॥ अभि
गम्य महानादं तीर्थेनैव महोदधिम् ॥३८॥ ततो रक्तजलं भीमं लोहितं नाम सागरम् ॥ गत्वा प्रेक्ष्यथ तां चैव बृहतीं
कूटशाल्मलीम् ॥३९॥ गृहं च वैनतेयस्य नानारत्नविभूषितं ॥ तत्र कैलाससंकाशं विहितं विश्वकर्मणा ॥४०॥ तत्र शैल
निभा भीमा मंदेहा नाम राक्षसाः ॥ शैलशृंगेषु लंबंते नानारूपभयावहाः ॥४१॥ ते पतंति जले नित्यं सूर्यस्योदयनं प्रति ।
अभितप्ताश्च सूर्येण लंबंते स्म पुनः पुनः ॥४२॥

((ले ब्रह्मतेजोभितप्ताः ब्रह्मतेजोभिरहन्यहनि त्रैवर्णिकप्रवर्त्तितैः ब्रह्मविद्यातेजोभिर्निहताः सुरोदजले वसं
ति । ततः पुनरुज्जीविताः लंबंते स्म शैलशृंगेष्विति शेषः अत्र कतककृतः ततः शैलशृंगेषु लंबंत इत्यादि श्लोकद्वयं प्रक्षिप्तं ॥ नाभिरक्षांसि मंदेहारुणद्वीपे प्रक्षिपंती त्रिषु
नो अरुणद्वीपेन प्रक्षेपोक्तेरवारुणद्वीपप्रसंगाभावात् प्राचीनपुस्तकेष्वदर्शनाच्चेत्याहुः ततः पांडुरेति अत्र सुराक्षीरोदयोर्मध्ये सर्पिर्दधिसमुद्रयोर्विवेचनाद्युक्तिमत्

विवेचनयद्दुर्गस्थलाभावादिति कतकः अनुक्रमपि तदुभयोर्विवेचनम
र्थतोऽवगंतव्यमिति तीर्थः ॥४२॥

४३ ॥ मुक्ताहारमिव ॥ उर्मिभिर्लक्षवंतमिवेत्यर्थः ॥ ४४ ॥ सरश्च नाम्ना सुदर्शनमित्यन्वयः ॥ ४५ ॥ नामशब्दः प्रसिध्यर्थः ॥ ४६ ॥ नलिनीयुक्तं सुदर्शनं सर इत्यर्थः ॥ ४७ ॥ ज
लोदं प्रभूतजलरूपोदकं ॥ तत्र जलमध्ये तत्कोपजं और्वज्वलनर्षिकोपजं हयमुखं वडवामुखं तेजो ज्वलरणाकृतमस्ति ॥ ४८ ॥ असाद्भुतं महावेगं सचराचरं सर्वं जग

निहता बलवत्तेजोभिरहन्यहनि राक्षसाः ॥ ततः पांडुरमेघाभं क्षीरोदं नाम सागरं ॥ ४३ ॥ गत्वा द्रक्ष्यथ दुर्धर्षा मुक्ताहारमिवोर्मि
भिः ॥ तस्य मध्ये महान्श्वेतो ऋषभो नाम पर्वतः ॥ ४४ ॥ दिव्यगंधैः कुसुमितै राजतैश्च नगैर्वृतः ॥ सरश्च राजतैः पद्मैर्ज्वलितै
र्हेमकेसरैः ॥ ४५ ॥ नाम्ना सुदर्शनं नाम राजहंसैः समाकुलं ॥ विबुधाश्चारणा यक्षाः किन्नराश्चाप्सरोगणाः ॥ ४६ ॥ हृष्टाः स
मधिगच्छंति नलिनीं तां रिरंसवः ॥ क्षीरोदं समतिक्रम्य ततो द्रक्ष्यथ वानराः ॥ ४७ ॥ जलोदं सागरं शीघ्रं सर्वभूतभयापहं ॥ त
त्र तत्कोपजं तेजः कृतं हयमुखं महत् ॥ ४८ ॥ अस्याहुस्तं महावेगमोदनं सचराचरं ॥ तत्र विक्रोशतां नादो भूतानां साग
रौकसां ॥ ४९ ॥ श्रूयते चासमर्थानां दृष्ट्वा तद्वडवामुखं ॥ स्वादूदस्योत्तरे तीरे योजनानि त्रयोदश ॥ जातरूपशिलो नाम
सुमहान्कनकप्रभः ॥ ५० ॥ तत्र चंद्रप्रतीकाशं पन्नगं धरणीधरं ॥ पद्मपत्रविशालाक्षं ततो द्रक्ष्यथ वानराः ॥ ५१ ॥
आसीनं पर्वतस्याग्रे सर्वदेवनमस्कृतं ॥ सहस्रशिरसं देवमनंतं नीलवाससं ॥ ५२ ॥ ॥ ॥

युगांते ओदनं वदंति । अनेन तस्य तत्स्वरूपमुक्तं । विनाद वडवामुखं दृष्ट्वा ॥ तत्र पतनभीत्या विक्रोशतां असमर्थानां चासमर्थानां चासमर्थानामपि सागरौकसां भूतानां यो
नादो भूत्स श्रूयते ॥ ४९ ॥ स्वादूदस्य इक्षुजोदकस्य समुद्रस्योत्तरे तीरे इति पाठः पाठः ॥ ५० ॥ चंद्रप्रतीकाशं श्वेतवर्णं ॥ ५१ ॥ ५२ ॥ श्रीरामाय रामचंद्राय

त्रिशिराः शिरःप्रदेशवर्त्तित्रिस्कंधवान् । सवेदिकः आधारवेदिवंधसहितः ॥ ५३ ॥ अयमेवतालः पूर्वस्यां दिशि पूर्वदिग्व्यवस्थायानिर्माणांकनं अभिज्ञाशंकुवत्प्रमाणं
निर्माणांकनमित्यर्थः । ५४ । कोटिः शिखरं सवेदिकामाधारपर्वता ॥ ५५ ॥ ५६ ॥ तत्र शतयोजनदीर्घेउदयगिरिशिखरे ॥ ५७ ॥ तत्र सोमनसेशृंगे त्रिविक्रमे

त्रिशिराः कांचनः केतुस्तालस्तस्य महात्मनः । स्थापितः पर्वतस्याग्रे विराजति सवेदिकः ॥ ५३ ॥ पूर्वस्यां दिशि निर्माणांक-
नं त्रिदशेश्वरैः । ततः परं हेममयः श्रीमानुदयपर्वतः ॥ ५४ ॥ तस्य कोटिर्दिवंस्पृष्टा शतयोजनमायता । जातरूपम-
यी दिव्या विराजति सवेदिका ॥ ५५ ॥ सालैस्तालैस्तमालैश्च कर्णिकारैश्च पुष्पितैः । जातरूपमयैर्दिव्यैः शोभते सूर्य-
सन्निभैः ॥ ५६ ॥ तत्र योजनविस्तारमुच्छ्रितं दशयोजनं ॥ शृंगं सौमनसं नाम जातरूपमयं ध्रुवम् ॥ ५७ ॥ तत्र पूर्वपदं
कृत्वा पुरा विष्णुस्त्रिविक्रमे ॥ द्वितीयं शिखरे मेरोश्चकार पुरुषोत्तमः ॥ ५८ ॥ उत्तरेण परिक्रम्य जंवुद्वीपं दिवाकरः
दृश्यो भवति भूयिष्ठं शिखरं तन्महोच्छ्रयम् ॥ ५९ ॥ तत्र वैखानसा नाम वालखिल्या महर्षयः । प्रकाशमाना दृश्यन्ते सू-
र्यवर्णास्तपस्विनः ॥ ६० ॥ अयं सुदर्शनो द्वीपः पुरो यस्य प्रकाशते । तस्मिंस्तेजश्च चक्षुश्च सर्वप्राणभृतामपि ॥ ६१ ॥

त्रिभिः पदैस्त्रिलोक्या आक्रमणप्रस्तावे । प्रथमं पदं तत्र कृत्वा द्वितीयं पदं मेरोः शिखरे चकार ॥ ५८ ॥ अस्मादनंतरमुत्तरेण जंबुद्वीपं परिक्रम्य तन्महोच्छ्रयं शिख-
रं सौमनसाख्यं प्राप्य स्थितो दिवाकरः । जंबुद्वीपवर्त्तिनां भूयिष्ठं दृश्यो भवति सौमनसे शिखरे इत्यर्थः इदं सम्यगभिप्रायं त्रेतायां क्षीरसागरमध्यगस्य द्वापरे
सुरोमध्यगस्य कलौ लंकामध्यगस्य जंबुद्वीपस्य मनुष्यदृश्यतायाः अन्यथोक्तवान् ॥ ५९ ॥ ६० ॥ यस्य पुरः पुरस्तात् समीपे एव अयं प्रागुक्तः सुदर्शनसमाख्यो द्वी-
पः प्रकाशते तस्मिन् सौमनसशिखरे भगवत्युदिते सर्वप्राणभृतां
प्राणिनां तेजः संबंधो भवति । चक्षुश्च प्रकाशते ॥ ६१ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

६२ ॥ कांचनशैलस्य सूर्यस्य तेजसाविष्टा सध्या कांता पूर्वा संध्या उदयावच्छिन्ना पूर्वा दिक् रक्ता सती प्रकाशते ॥ ६३ ॥ तदेवाह ॥ पूर्वमिति ॥ चो हेतौ यतो भुवनस्य प्रकाशनहेतोः सू
र्यस्योदयनमतोस्य पूर्वं प्रथमं पृथिव्याः एतद्द्वारं उर्ध्वस्थानां पृथिवीप्रवेशस्य द्वारं ॥ पृथ्वीस्थानां भुवनस्य ब्रह्मभुवनस्य प्रवेशद्वारमेतदुदयगिरिरूपं कृतमतः ए

शैलस्य तस्य पृष्ठेषु कंदरेषु वनेषु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६२ ॥ कांचनस्य च शैलस्य सूर्यस्य च महात्मनः
आविष्टा तेजसा संध्या पूर्वा रक्ता प्रकाशते ॥ ६३ ॥ पूर्वमेतत्कृतं द्वारं पृथिव्या भुवनस्य च ॥ सूर्यस्योदयनं चैव पूर्वा ह्येषा दिगु
च्यते ॥ ६४ ॥ तस्य शैलस्य पृष्ठेषु निर्झरेषु गुहासु च ॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥ ६५ ॥ ततः परमगम्या स्याद्दि
क्पूर्वा त्रिदशावृता ॥ रहिता चंद्रसूर्याभ्यामदृश्या तमसावृता ॥ ६६ ॥ शैलेषु तेषु सर्वेषु कंदरेषु नदीषु च ॥ ये च नोक्ता
मया देशा विचेया तेषु जानकी ॥ ६७ ॥ एतावद्वानरैः शक्यं गंतुं वानरपुंगवाः ॥ अभास्करममर्यादं न जानीमस्ततः प
रम् ॥ ६८ ॥ अभिगम्य तु वैदेहीं निलयं रावणस्य च ॥ मासे पूर्णे निवर्तध्वमुदयं प्राप्य पर्वतं ॥ ६९ ॥ ऊर्ध्वं मासान्न वस्त
व्यं वसन्वध्यो भवेन्मम ॥ सिद्धार्थाः सन्निवर्तध्वमधिगम्य च मैथिलीं ॥ ७० ॥ महेंद्रकांतां वनखंडमंडितां दिशं चरित्वा
निपुणेन वानराः ॥ अवाप्य सीतां रघुवंशजप्रियां ततो निवृत्ताः सुखिनो भविष्यथ ॥ ७१ ॥ इत्यार्षे श्रीरामा० किष्किं० ध्व छि

षां पूर्वा दिगुच्यते अन्ये तु एतद्द्वारमेतद्दिग्वर्त्तिमहद्विवरं सृष्टं प्रलयानन्तरमत एषा पूर्वा दिगुच्यते ॥ ६४ ॥ तस्य शैलस्य उदयशैलस्य ॥ ६५ ॥ ततः परं उदयाद्रेः परस्तात् त्रिद
शावृता ॥ नहि दिगधिष्ठात्रिंद्रादित्रिदशाधिष्ठिता उदयादेस्तात्परमगम्यत्वे हेतुमाह ॥ रहितेति उक्तार्थोपसंहारः शैलेष्वित्यादि ॥ ६७ ॥ ६८ ॥ ६९ ॥ सिद्धार्थाः कृतान्वेषणकार्याः

173

ततइति अभिलक्षितान् । कार्यसमर्थत्वेन निर्णीतान् ॥ १ ॥ २ ॥ ३ ॥ अयं सुषेणस्तारापितुरन्यः हुताशनसुताविति । अग्नित्वव्याप्यं हुताशनत्वमित्याग्निहुताशनयोर्भेदः ॥ ४ ॥ विशेषवित् । अन्वेष्टव्यदेशविशेषवित् ॥ ५ ॥ अग्रेसरं मुखं अत्र संग्रहमिति पाठे संकोचप्रमुमित्यर्थः ॥ दक्षिणां दिशमादिशन् । अन्वेष्टव्यत्वेनेति शेष

ततः प्रस्थाप्य सुग्रीवस्तन्महद्वानरं बलं । दक्षिणां प्रेषयामास वानरानभिलक्षितान् ॥ १ ॥ नीलमग्निसुतं चैव हनूमंतं च वानरं । पितामहसुतं चैव जांबवंतं महौजसं ॥ २ ॥ सुहोत्रं च शरारिं च शरगुल्मं तथैव च । गजं गवाक्षं गवयं सुषेणं वृषभं तथा ॥ ३ ॥ मैंदं च द्विविदं चैव सुषेणं गंधमादनं । उल्कामुखमनंगं च हुताशनसुतावुभौ ॥ ४ ॥ अंगदप्रमुखान्वीरान्वीरः कपिगणेश्वरः । वेगविक्रमसंपन्नान्संदिदेश विशेषवित् ॥ ५ ॥ तेषामसंग्रहं चैव बृहद्बलमथांगदं । विधाय हरिवीराणामादिशद्दक्षिणां दिशं ॥ ६ ॥ ये केचन समुद्देशास्तस्यां दिशि सुदुर्गमाः । कपीशः कपिमुख्यानां स तेषां समुदाहरत् ॥ ७ ॥ सहस्रशिरसं विंध्यं नानाद्रुमलतायुतं । नर्मदां च नदीं रम्यां महोरगनिषेवितां ॥ ८ ॥ ततो गोदावरीं रम्यां कृष्णावेणीं महानदीं । मेखलानुत्कलांश्चैव दशार्णनगराण्यपि ॥ ९ ॥ आब्रवंतीमवंतीं च सर्वमेवानुपश्यत । विदर्भानृष्टिकांश्चैव रम्यान्माहिषकानपि ॥ १० ॥ तथा मत्स्यकलिंगांश्च कौशिकांश्च समंततः । अन्वीक्ष्य दंडकारण्यं सपर्वतनदीगुहां ॥ ११ ॥

६ ॥ तस्यां दिशि ये सुदुर्गमास्तान्समुदाहरन्नुवाच ॥ ७ ॥ अत्राप्यार्यावर्तापेक्षया दक्षिणत्वं तदाह । सहस्रशिरसं सहस्रशिखरं ॥ ८ ॥ गोदावरीं विन्ध्यपूर्वप्रदेशवाहिनीं गोदावरीं नदीं मेखलादयो देशभेदाः ॥ ९ ॥ ऋष्टिकानिति पाठः ॥ १० ॥ मत्स्यांश्च कलिंगांश्च तान् ॥ ११ ॥

॥ ए॰ वा॰ कि॰ ॥
॥ ९७ ॥

नदीं गोदावरीं दंडकारण्यगोदावरीप्रदेशं ॥ १२ ॥ अयोमुख इति मलयस्य नामांतरं सुचंदनवनत्वलिंगात् ॥ १३ ॥ १४ ॥ तस्यायोमुखपर्वतस्य ॥ १५ ॥ अगस्त्यमिति । यद्यपि पं
चवटीतउदग्भागेगस्त्याश्रमः पूर्वमुक्तस्तथाप्यत्रापि बोध्यः वाल्मीकेरनेकदेशेष्वाश्रमवत् ॥ समाननामान्यस्य वायमित्यन्ये ॥ १६ ॥ ग्राहजुष्टामित्यादि ताम्रपर्णीं वि

नदीं गोदावरीं चैव सर्वमेवानुपश्यत ॥ तथैवांध्रांश्च पुंड्रांश्च चोलान्पांड्यांश्च केरलान् ॥ १२ ॥ अयोमुखश्च गंतव्यः पर्वतो
धातुमंडितः ॥ विचित्रशिखरः श्रीमान्चित्रपुष्पितकाननः ॥ १३ ॥ सुचंदनवनोद्देशो मार्गितव्यो महागिरिः ॥ ततस्तामा
पगां दिव्यां प्रसन्नसलिलाशयां ॥ १४ ॥ तत्र द्रक्ष्यथ कावेरीं विहृतामप्सरोगणैः ॥ तस्यासीनं नगस्याग्रे मलयस्य महौ
जसः ॥ १५ ॥ द्रक्ष्यथादित्यसंकाशमगस्त्यमृषिसत्तमं ॥ ततस्तेनाभ्यनुज्ञाताः प्रसन्नेन महात्मना ॥ १६ ॥ ताम्रपर्णीं ग्राह
जुष्टां तरिष्यथ महानदीं ॥ सा चंदनवनैश्चित्रैः प्रच्छन्नद्वीपवारिणी ॥ १७ ॥ कांतेव युवती कांतं समुद्रमवगाहते ॥ ततो हे
ममयं दिव्यं मुक्तामणिविभूषितं ॥ १८ ॥ युक्तं कवाटं पांड्यानां गता द्रक्ष्यथ वानराः ॥ ततः समुद्रमासाद्य संप्रधार्या
र्थनिश्चयं ॥ १९ ॥ अगस्त्येनांतरे तत्र सागरे विनिवेशितः ॥ चित्रसानुनगः श्रीमान्महेंद्रः पर्वतोत्तमः ॥ २० ॥ जातरू
पमयः श्रीमानवगाढो महार्णवं ॥ नानाविधैर्नगैः फुल्लैर्लताभिश्चोपशोभितः ॥ २१ ॥

॥ सेपूर्णं चंदनैः प्रच्छन्नानि द्वीपानि वारि च यस्याः सा
प्रच्छन्नद्वीपवारिणी प्रच्छन्नशरीरेति यावत् स्मरत्स्वयुवतीकांतेव ॥ १८ ॥ युक्तं प्राकारघटितं ॥ १९ ॥ अर्थे समुद्रतरणरूपे निश्चयं शक्याशक्यनिश्चयं
संप्रधार्य कृत्वा ॥ तत्र जवनसाधनभूतः पर्वत उपादिश्यते अगस्त्येनेति सागरेंतरे सागरखातसंबंधिन्यंतरेऽवकाशेगस्त्येन विनिवेशितः प्रतिष्ठापितो महेंद्रः प
र्वतोत्तमोस्ति श्रीमान्महेंद्रः ॥ २० ॥ अवगाढः प्रविष्टैकपार्श्वः ॥ २१ ॥

॥ रामः ॥
॥ ९७ ॥

174

२२ ॥ मंउक्तविशेषणविशिष्टं सहस्राक्षउपेंद्रोत्मनेनमहेंद्राधिष्ठितत्वात् ॥ अन्वर्थनामकत्वं महेंद्रस्य सूचितं । अपरेपारे पारं परतीरं ॥ अपरशब्दोविशेषवाचीपर
तीरविशेषेप्रतिष्ठितइति शेषः द्वीप इति उत्तरभागे दक्षिणेलवणसमुद्र इतितस्य द्वीपत्वं ॥ सगररचितोप्येकदेशोतो दग्धभागे वसमुद्रसंबद्धः ॥ २३ ॥ द्वीपःस्व
र्णभूयिष्ठत्वात् ॥ तत्र द्वीपेसर्वात्मनासर्वप्रकारेणविशेषतः एकदेशमप्यनुपेत्य ॥ २४ ॥ २५ ॥ समुद्रसंबद्धत्वात्सागरोपि समुद्रत्वेन समुद्रश्च सागर

देवर्षियक्षप्रवरैः अप्सरोभिश्च शोभितं ॥ सिद्धचारणसंघैश्च प्रकीर्णसुमनोरमं ॥ २२ ॥ तमुपैति सहस्राक्षः सदा पर्वसु
पर्वसु ॥ द्वीपस्तस्यापरे पारे शतयोजनविस्तृतः ॥ २३ ॥ अगम्यो मानुषैर्दीप्तस्तं मार्गध्वं समंततः ॥ तत्र सर्वात्मना सीतामा
र्गितव्या विशेषतः ॥ २४ ॥ सहि देशस्तु वध्यस्य रावणस्य दुरात्मनः ॥ राक्षसाधिपतेर्वासः सहस्राक्षसमद्युतेः ॥ २५ ॥
दक्षिणस्य समुद्रस्य मध्ये तस्य तु राक्षसी ॥ अंगारकेति विख्याता छायामाक्षिप्य भोजनी ॥ २६ ॥ एवं निः संशयान् कृत्वा
संशयान्नष्टसंशयाः ॥ मृगयध्वं नरेंद्रस्य पत्नीममिततेजसः ॥ २७ ॥ तमतिक्रम्य लक्ष्मीवान् समुद्रे शतयोजने ॥ गिरिः पुष्पि
तको नाम सिद्धचारणसेवितः ॥ २८ ॥ चंद्रसूर्यांशुसंकाशः सागरांबुसमाश्रयः ॥ भ्राजते विपुलैः शृंगैरंबरं विलिख
न्निव ॥ २९ ॥ तस्यैकं कांचनं शृंगं सेवते यं दिवाकरः ॥ न तं कृतघ्नाः पश्यंति न नृशंसा न नास्तिकाः ॥ ३० ॥

(त्वेनव्यवह्रियतइत्यविरोधः

तस्यतुरावणस्यतुभोजनीभोक्तुंशीला ॥ २६ ॥ संशयान्संशयविषयान्देशान्निःसंशयान् सम्यगन्वेषणेन कृत्वा ततो नष्टसंशयाः प्राप्तसत्वासत्वनिश्चयास्तत्रासत्वे सी
तांलंकाद्वीपमतिक्रम्य मृगयध्वं ॥ २७ ॥ क्रमार्गणीयातत्राहलक्ष्मीवानिति ॥ २८ ॥ २९ ॥ तस्यकांचनंशृंगमस्ति यं भगवान् सूर्यः सेवतेनित्यंतस्मान्निहिमोभवतिशृंगशब्दोर्धवादिः

अमभ्वेंद्रस्याधिष्ठितत्वात्तं कृतघ्ना न पश्यंति ॥ ३० ॥

स्मा॰२

३१ ॥ चतुर्दशोन्नितैरुपलक्षित इत्यर्थः ॥ ३२ ॥ ३३ ॥ ३४ ॥ तत्रकुंजरपर्वतोऽगस्त्यभुवनवर्णनंयोजनेत्यादि ॥ इदंतृतीयमगस्त्यस्थानं ॥ ३५ ॥ शरणंगृहमगस्त्यस्येति
शेष ॥ तत्रकुंजरपर्वतेस्वश्चालयशाखोनिम्नपङ्क्तिंगः यद्यपिभोगवतीरसातलेप्रसिद्धातथापिरावणस्यजनस्थानवत्तर्पणमपिभोगवत्यारक्षेणरंभावप्य

प्रणम्यशिरसाशैलंतंविमार्गथवानराः ॥ तमतिक्रम्यदुर्धर्षंसूर्यवान्नामपर्वतः ॥ ३१ ॥ अध्वनादुर्विगाहेनयोजनानिचतुर्दश ॥
ततस्तमप्यतिक्रम्यवैद्युतोनामपर्वतः ॥ ३२ ॥ सर्वकामफलैर्वृक्षैःसर्वकालमनोहरैः ॥ तत्रभुक्त्वावरार्हाणिमूलानिचफला
निच ॥ ३३ ॥ मधूनिपीत्वाजुष्टानिपरंगच्छतवानराः ॥ तत्रनेत्रमनःकान्तःकुंजरोनामपर्वतः ॥ ३४ ॥ अगस्त्यभवनंयत्र
निर्मितंविश्वकर्मणा ॥ तत्रयोजनविस्तारमुच्छ्रितंदशयोजनं ॥ ३५ ॥ शरणंकांचनंदिव्यंनानारत्नविभूषितं ॥ तत्रभोग
वतीनामसर्पाणामालयःपुरी ॥ ३६ ॥ विशालरथ्यादुर्धर्षासर्वतःपरिरक्षिता ॥ रक्षितापन्नगैर्घोरैस्तीक्ष्णदंष्ट्रैर्म
हाविषैः ॥ ३७ ॥ सर्पराजोमहाघोरोयस्यांवसतिवासुकिः ॥ निर्यायमार्गितव्याचसाचभोगवतीपुरी ॥ ३८ ॥ तत्रचा
नंतरोद्देशायेकेचनसमावृताः ॥ तंचदेशमतिक्रम्यमहानृषभसंस्थितिः ॥ ३९ ॥ सर्वरत्नमयःश्रीमानृषभोनाम
पर्वतः ॥ गोशीर्षकंपद्मकंचहरिश्यामंचचंदनं ॥ ४० ॥ दिव्यमुत्पद्यतेयत्रतच्चैवाग्निसमप्रभं ॥ नतुतच्चंदनंदृष्ट्वास्प्रष्ट व्यंकदाचन ॥ ४१ ॥

तीतिवासुकेर्भुवउपर्यपियोगवैभवान्स्थितिरितिबोनरैर्वागंतव्यंयथागस्त्यस्यकुंजरपर्वतावासित्वेविश्वकर्मनिर्मितभवनेनक्षत्रपदेमलयेपंचवटीदक्षिणभा
गेचवासस्तथेतिध्येयंनिर्यायविशेषतोगंतव्या ॥ ३६ ॥ ३७ ॥ ३८ ॥ समावृताःगुप्तायेचमार्गितव्याःऋषभसंस्थितिःऋषभाकारसंस्थानवान् ॥ ३९ ॥ गोशीर्षकादयश्चंदनभेदाः ॥ ४० ॥ ४१ ॥

तच्चंदनस्पृष्टव्यत्वे हेतुः रोहिता इति ॥४२॥ ततः अपभानपरतः पृथिव्या अंते पुण्यकर्मणां निवासः तत्र स्वर्गजित एव स्थिता भवंति ॥४३॥ अतो हेमोत्ततः परं पितृलोकोन वस्त
व्यः अगम्यः ॥४४॥४५॥४६॥४७॥ बहुशः कृतापराधोपी अर्थः ॥४८॥ लभध्वंलस्पधंनथा तत्कार्यसुद्दिश्य पाक्षिपुरामाधिकरुरामेयेन प्रपुरुषार्थप्ररुषयत्नमा

रोहिता नाम गंधर्वा घोरं रक्षंति तद्वनं । तत्र गंधर्वपतयः पंच सूर्यसमप्रभाः ॥४२॥ शैलूषो ग्रामणीः शिक्षः शुको बभ्रुस्त
थैव च ॥ रविसोमाग्निवपुषां निवासः पुण्यकर्मणां ॥४३॥ अंते पृथिव्या दुर्धर्षास्ततः स्वर्गजितः स्थिताः । ततः परं न वः
सेव्यः पितृलोकः सुदारुणः ॥४४॥ राजधानी यमस्यैषा कष्टेन तमसावृता । एतावदेव युष्माभिर्वीर वानरपुंगवाः
शक्यं विचेतुं गंतुं वा नातो गतिमतां गतिः ॥४५॥ सर्वमेतत्समालोक्य यच्चान्यदपि दृश्यते ॥ गतिं विदित्वा वैदेह्याः स
न्निवर्तितुमर्हथ ॥४६॥ यश्च मासान्निवृत्तोग्रे दृष्टा सीतेति वक्ष्यति ॥ मत्तुल्यविभवो भोगैः सुखं स विहरिष्यति ॥४७॥ त
तः प्रियतरो नास्ति मम प्राणाद्विशेषतः । कृतापराधो बहुशो मम बंधुर्भविष्यति ॥४८॥ अमितबलपराक्रमा भवंतो
विपुलगुणेषु कुलेषु च प्रसूताः ॥ मनुजपतिसुतां यथा लभध्वं तदधिगुणं पुरुषार्थमारभध्वं ॥४९॥ इत्यार्षे श्रीम
द्रामायणे किष्किंधाकांडे एकचत्वारिंशः सर्गः ॥४१॥ अथ प्रस्थाप्य स हरीन्सुग्रीवो दक्षिणां दिशं । अब्रवीन्मेघ
संकाशं सुषेणं नाम वानरं ॥१॥ तारायाः पितरं राजा श्वशुरं भीमविक्रमं ॥ अब्रवीत्प्रांजलिर्वाक्यमभिगम्य प्रणम्य च ॥२॥

रभध्वं ॥४९॥ इति रामाभिरामे श्रीरा० किष्किं० एकचत्वारिंशः सर्गः ॥४१॥ अथेति ॥१॥ श्वशुरत्वात्प्रांजलिः प्रणम्याब्रवीत् एतद्विशेषकथनायैव पुनरब्रवीदि

कि ॥ ९ ॥

महर्षिपुत्रंमारीचंमहर्षेर्मरीचेःपुत्रंअर्चिष्मंतं।अर्चिष्मदाख्यंत्रयंतेषुप्रधानं।अर्चिर्माल्याख्या अन्येपिमरीचपुत्राः॥३॥मारीचशब्दस्यबहुत्वमत्यंतरसंभ
वान्मरीचिपुत्रानित्युक्तं॥४॥५॥परिमार्गथमार्गध्वंचंद्रचित्रानितिभूरान्भीमानितिपाठांतरंदेशविशेषाइमे॥६॥विपुलानिविशालानिकुक्षिर्देश

महर्षिपुत्रंमारीचमर्चिष्मंतंमहाकपिं॥वृतंकपिवरैःशूरैर्महेंद्रसदृशद्युतिं॥३॥बुद्धिविक्रमसंपन्नंवैनतेयसमद्युतिं
मरीचिपुत्रान्मारीचानर्चिर्माल्यान्महाबलान्॥४॥ऋषिपुत्रांश्चतान्सर्वान्प्रतीचीमादिशद्दिशं॥द्वाभ्यांशतसहस्राभ्यांकपीनां
कपिसत्तमाः॥५॥सुषेणप्रमुखायूयंवैदेहींपरिमार्गथ॥सौराष्ट्रान्सहबाल्हीकान्चंद्रचित्रांस्तथैवच॥६॥स्फीतान्
जनपदान्रम्यान्विपुलानिपुराणिच॥पुन्नागगहनंकुक्षिंबकुलोद्दालकाकुलं॥७॥तथाकेतकषंडांश्चमार्गध्वंहरिपुं
गवाः॥प्रत्यक्स्रोतोवहाश्चैवनद्यःशीतजलाःशिवाः॥तापसानामरण्यानिकांतारगिरयश्चये॥तत्रस्थलीर्मरुप्रायात्य
मुच्चाशिशिराःशिलाः॥९॥गिरिजालावृतांदुर्गांमार्गित्वापश्चिमांदिशं॥ततःपश्चिममागम्यसमुद्रंद्रष्टुमर्हथ॥१०॥
तिमिनक्राकुलजलंगत्वाद्रक्ष्यथवानराः॥ततःकेतकखंडेषुतमालगहनेषुच॥११॥कपयोविहरिष्यंतिनारिके
लवनेषुच॥तत्रसीतांचमार्गध्वंनिलयंरावणस्यच॥१२॥वेलातलनिविष्टेषुपर्वतेषुवनेषुच।मुरचीपत्तनं
चैवरम्यंचैवजटापुरं॥१३॥

विशेषः॥७॥प्रत्यक्स्रोतोवहाःपश्चिमाभिमुखप्रवाहा॥८॥कांतारगिरयःकांतारस्थागिरयःस्थली
अकृत्रिमात्रःशिशिराःशीतला॥९॥तत्रादर्शनेततःकिंचित्पश्चिमंगत्वासमुद्रंद्रष्टुमर्हथतत्रसमुद्रंद्रक्ष्यसेथेतिनिश्चयस्व॥११॥कपयाभवत्तेनि
कि॥११॥१२॥१३

॥ राम॰ ॥
॥ ९९ ॥

176

अवंती अंगलेपे पुर्यौ आलक्षिताख्यं वनं ॥१४॥ महाद्रुमः महान्तो द्रुमा यस्मिन्सः ॥१५॥ सिंहाः सटाख्याः पक्षगमाः पक्षिणः स्थिताः ते पक्षिणः तिमिमत्स्यगजान् नीडानि स्ववासस्थानान्यारोपयंति ॥१६॥ ७॥ तोयपूर्णे प्रस्थे ॥१८॥ कोटिः शृंगं समुद्रस्य मध्ये इति शेषः ॥१९॥ २०॥

अवंतीमंगलेपां च तथा चालक्षितं वनं ॥ राष्ट्राणि च विशालानि पत्तनानि ततस्ततः ॥१४॥ सिंधुसागरयोश्चैव संगमे तत्र पर्वतः ॥ महान्सोमगिरिर्नाम शतशृंगो महाद्रुमः ॥१५॥ तत्र प्रस्थेषु रम्येषु सिंहाः पक्षगमाः स्थिताः ॥ तिमिमत्स्यगजांश्चैव नीडान्यारोपयंति ते ॥१६॥ तानि नीडानि सिंहानां गिरिशृंगगतांश्च ये ॥ दृप्तास्तृप्ताश्च मातंगास्तोयदस्वननिस्वनाः ॥७॥ विचरंति विशालेस्मिन्तोयपूर्णे समंततः ॥ तस्य शृंगं दिवस्पर्शं कांचनं चित्रपादपं ॥१८॥ सर्वमाशु विचेतव्यं कपिभिः कामरूपिभिः ॥ कोटिं तत्र समुद्रस्य कांचनीं शतयोजनां ॥१९॥ दुर्दर्शां पारियात्रस्य गत्वा द्रक्ष्यथ वानराः ॥ कोट्यस्तत्र चतुर्विंशद्गंधर्वाणां तपस्विनां ॥२०॥ वसंत्यग्निनिकाशानां घोराणां पापकर्मणां पावकार्चिप्रतीकाशाः समवेताः समंततः ॥२१॥ नात्यासादयितव्यास्ते वानरैर्भीमविक्रमैः ॥ नादेयं च फलं तस्माद्देशात्किंचित्प्लवंगमैः ॥२२॥ दुरासदा हि ते वीराः सत्ववंतो महाबलाः ॥ फलमूलानि ते तत्र रक्षंते भीमविक्रमाः ॥२३॥

घोराणामतएव पापकर्मणां संहर्तृणां। पावकार्चिःप्रतीकाशाः कोट्यः समवेता इत्यन्वयः ॥२१॥ नात्यासादयितव्याः न द्रष्टव्या नापराद्धव्या वा नादेयं न ग्राह्यं ॥२२॥२३॥

यत्नः कर्त्तव्यो मार्गणा इति शेषः नतु पापकारित्वात्तद्वासादने कथं तत्र मार्गणासंभवो नत्र्प्राह नहि तेभ्य इति तद्देशमृगपक्ष्यादिवत्त्राक्रान्तमृगस्वभावेतित्तूनामित्यर्थः
अतएव नापराद्धव्या इति पूर्वव्याख्यानं॥२४॥ वैडूर्यवर्णाभ्राभाचयस्य स॰ वज्रवत्कठिनसंस्थानेन संस्थितः॥२५॥ समुदितः प्रतिष्ठितः समं आयामतो विस्तारत

तत्र यत्नश्च कर्त्तव्यो मार्गितव्या च जानकी॥ नहि तेभ्यो भयं किंचित्कपित्वमनुवर्त्ततां॥२४॥ तत्र वैडूर्यवर्णाभो वज्रसंस्थानसं
स्थितः॥ नानाद्रुमलताकीर्णो वज्रो नाम महागिरिः॥२५॥ श्रीमान्समुदितस्तत्र योजनानां शतं समं गुहास्तत्र विचेतव्याः
प्रयत्नेन प्लवंगमाः॥२६॥ चतुर्भागे समुद्रस्य चक्रवान्नाम पर्वतः॥ तत्र चक्रं सहस्रारं निर्मितं विश्वकर्मणा॥२७॥ त
त्र पंचजनं हत्वा हयग्रीवं च दानवं॥ आजहार ततश्चक्रं शंखं च पुरुषोत्तमः॥२८॥ तत्र सानुषु रम्येषु विशालासु
गुहासु च॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥२९॥ योजनानि चतुःषष्टिर्वराहो नाम पर्वतः॥ सुवर्णशृंगः सु
महानगाधे वरुणालये॥३०॥ तत्र प्राग्ज्योतिषं नाम जातरूपमयं पुरं॥ तस्मिन्वसति दुष्टात्मा नरको नाम दानवः
॥३१॥ तत्र सानुषु रम्येषु विशालासु गुहासु च॥ रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः॥३२॥ तमतिक्रम्य शैलेन्द्रं
कांचनांतरदर्शनं॥ पर्वतः सर्वसौवर्णो धारा प्रस्रवणायुतः॥३३॥ ❀ ॥

श्वशतयोजनमित्यर्थः॥२६॥ चतुर्भागे चतुर्थभागे गत इति शेषः॥२७॥ तत्र चक्रवत्पर्वते पंचजनं तदाख्यं हयस्येव ग्रीवा यस्य तं च॥२८॥ २९॥३०॥
तत्र वराहपर्वते जातरूपं स्वर्णं॥३१॥३२॥ कांचनांतरदर्शनं कांचनगर्भांतराणि दरा यस्मिंस्तस्य दर्शनं भविष्यतीति शेषः॥ ३३॥ रामरामराम

177

तत्रोपस्थिता गजादयस्तेन शब्देन ध्वनिः प्रतिध्वनिना शब्देन दर्पिताः सर्वतोभिगर्जंति ॥ ३४ ॥ सः सौवर्ण इत्युक्तः ॥ ३५ ॥ ३६ ॥ ३७ ॥ तेषां षष्टिसहस्रपर्वतानां मध्ये राजेव
महत्वात्कांचनः उन्नतः पर्वतो लिस्त्वं सावर्णिमेरुरिति वदंति ॥ ३८ ॥ कीदृशो नरस्तत्राह मेनैवमिति ॥ आदित्येन स्वयमुक्त इत्येवं शब्दार्थः सर्वस्वेति ॥ ३९ ॥ तेभक्त

तं गजाश्च वराहाश्च सिंहा व्याघ्राश्च सर्वतः ॥ अभिराजंति सततं तेन शब्देन दर्पिताः ॥ ३४ ॥ यस्मिन् हरिहयः श्रीमान्महेंद्रः पाकशासनः ॥ अभिषिक्तः सुरै राजा मेघो नाम स पर्वतः ॥ ३५ ॥ तमतिक्रम्य शैलेंद्रं महेंद्रपरिपालितं ॥ षष्टिगिरिसहस्राणि कांवनानि गमिष्यथ ॥ ३६ ॥ तरुणादित्यवर्णानि भ्राजमानानि सर्वशः ॥ जातरूपमयैर्वृक्षैः शोभितानि सुपुष्पितैः ॥ ३७ ॥ तेषां मध्ये स्थितो राजा मेरुरुत्तमपर्वतः ॥ आदित्येन प्रसन्नेन शैलो दत्तवरः पुरा ॥ ३८ ॥ तेनैवमुक्तः शैलेंद्रः सर्व एव त्वदाश्रयाः ॥ मत्प्रसादाद्भविष्यंति दिवा रात्रौ च कांचनाः ॥ ३९ ॥ त्वयि ये चापि वत्स्यंति देवगंधर्वदानवाः ॥ ते भविष्यंति भक्ताश्च प्रभया कांचनप्रभाः ॥ ४० ॥ विश्वेदेवाश्च वसवो मरुतश्च दिवौकसः ॥ आगम्य पश्चिमां संध्यां मेरुमुत्तमपर्वतं ॥ ४१ ॥ आदित्यमुपतिष्ठंति तैश्च सूर्योभिपूजितः ॥ अदृश्यः सर्वभूतानामस्तं गच्छति पर्वतं ॥ ४२ ॥ योजनानां सहस्राणि दशतानि दिवाकरः ॥ मुहूर्तार्धेन तं शीघ्रं अभियाति शिलोच्चयं ॥ ४३ ॥

(मयीति शेषः कांचनप्रभाश्च भविष्यंति ॥ ४० ॥ विश्वे
देवादयस्तमुत्तमपर्वतं मेरुं सावर्णिमेरुमागम्य तत्र स्थित्वा पश्चिमां संध्यां प्राप्य आदित्यमुपतिष्ठंति इत्यग्रिमेणान्वयः ॥ ४१ ॥ इतः पूर्वभागस्था अत्युन्नता अपि हीयावि
त्वेन व्या इत्यर्थतः सिद्धं ॥ ४२ ॥ ततः परं दशयोजनसहस्रेऽस्ताचल इत्याह ॥ योजनामिति तानि उक्तसंख्यायोजनानि अतीत्येति शेषः मुहूर्तार्धमेकाघटीतयातं शिलोच्चयम

किष्कि ॥ ४३ ॥

अथ वरुणपुरवर्णनं शृंगेति ॥४४॥ ४५॥ दशशिरः दशस्कंधः ॥४६॥४७॥ यत्र मेरौ ब्रह्मणा समः महामेरुर्वर्णि प्रजापतिसमः ॥४८॥ मैथिलीं प्रति प्रवृत्तिं मैथि-

शृंगे तस्य महद्दिव्यं भवनं सूर्यसन्निभं । प्रासादगणसंबाधं विहितं विश्वकर्मणा ॥४४॥ शोभितं तरुभिश्चित्रैर्नानापक्षिसमाकुलैः
निकेतं पाशहस्तस्य वरुणस्य महात्मनः ॥४५॥ अंतरा मेरुमस्तं च तालो दशशिरा महान् ॥ जातरूपमयः श्रीमान्भ्राजते चित्र
वेदिकः ॥४६॥ तेषु सर्वेषु दुर्गेषु सरस्सु च सरित्सु च । रावणः सह वैदेह्या मार्गितव्यस्ततस्ततः ॥४७॥ यत्र तिष्ठति धर्मज्ञस्तप
सा स्वेन भावितः । मेरुसावर्णिरित्येष ख्यातो वै ब्रह्मणा समः ॥४८॥ प्रष्टव्यो मेरुसावर्णिर्महर्षिः सूर्यसन्निभः । प्रणम्य शि
रसा भूमौ प्रवृत्तिं मैथिलीं प्रति ॥४९॥ एतावज्जीवलोकस्य भास्करो रजनीक्षये । कृत्वा वितिमिरं सर्वमस्तं गच्छति पर्वतं ५०
एतावद्वानरैः शक्यं गंतुं वानरपुंगवाः । अभास्करममर्यादं न जानीमस्ततः परं ॥५१॥ अवगम्य तु वैदेहीं निलयं रावण
स्य च । अस्तं पर्वतमासाद्य पूर्णे मासे निवर्तत ॥५२॥ ऊर्ध्वं मासान्न वस्तव्यं वसन्वध्यो भवेन्मम ॥ सहैव शूरो युष्माभिः
श्वशुरो मे गमिष्यति ॥५३॥ श्रोतव्यं सर्वमेतस्य भवद्भिर्दिष्टकारिभिः । गुरुरेष महाबाहुः श्वशुरो मे महाबलः ॥५४ ॥
भवंतश्चापि विक्रांताः प्रमाणं सर्व एव हि । प्रमाणमेनं संस्थाप्य पश्यध्वं पश्चिमां दिशं ॥५५॥ कृतकृत्या भविष्यामः कृतस्य
प्रतिकर्मणा । अतोन्यदपि यत्कार्यं कार्यस्यास्य प्रियं भवेत् ॥५६॥ संप्रधार्य भवद्भिश्च देशकालार्थसंहितं ॥५६॥ ॥

लीसंबंधि प्रवृत्तिं प्रष्टव्य इत्यन्वयः ॥४९॥ एतावदुदयाचलमारभ्य मेरुसावर्णिपर्यंतं ॥५०॥५१॥ निवर्त्तत अनिवर्त्तध्वं ॥५२॥५३॥ दिष्टं संदिष्टं ॥५४॥ प्रमाणं क-
र्त्तव्याकर्त्तव्यनिश्चायकाः । अथाधिपत्येनं सुषेणं विशिष्य प्रमाणं संस्थाप्य ॥५५॥ कृतस्य प्रतिकर्मणा उपकारप्रत्युपकारेण अस्य कार्यस्येति रावणवधानंतरमक-

178

॥ राम॰ ॥
॥ १०१ ॥

५७ ॥ इतिरामाभिरामेश्रीरामीयरामायणतिलके किष्किंधाकांडे द्विचत्वारिंशः सर्गः ॥ ४२ ॥ ततइति ॥ १ ॥ सर्वज्ञः देशवृत्ताभिज्ञः ॥ २ ॥ वैवस्वतसुतैर्यमसुतैः ॥ ३ ॥ विक्रां-
तेनिशितबलिनः संयुक्तैः सर्वत इति सामान्यतोनियोगः ॥ ४ ॥ विनिर्वृत्ते विशेषेणानुष्ठिते कृतार्थाः कृतकृत्याः अर्थविदालब्धाभीष्टानां संधिरार्षः ॥ ५ अस्मिन्नि-

ततः सुषेणप्रमुखाः प्लवंगमाः सुग्रीववाक्यानि निशम्य ॥ आमंत्र्य सर्वे प्लवगाधिपास्ते जग्मुर्दिशं तां वरुणाभिगुप्तां ॥ ५७ ॥ इत्या-
र्षे श्रीमद्रामायणे किष्किंधाकांडे द्विचत्वारिंशः सर्गः ॥ ४२ ॥ ततः संदिश्य सुग्रीवः श्वशुरं पश्चिमां दिशं ॥ वीरं शतबलिं नाम
वानरं वानरेश्वरः ॥ १ ॥ उवाच राजा सर्वज्ञः सर्ववानरसत्तमः ॥ वाक्यमात्महितं चैव रामस्य च हितं तदा ॥ २ ॥ वृतः शतसह-
स्रेण त्वद्विधानां वनौकसां ॥ वैवस्वतसुतैः सार्धं प्रविष्टः सर्वमंत्रिभिः ॥ ३ ॥ दिशं ह्युदीचीं विक्रांतां हिमशैलावतंसिकां ॥ सर्वतः
परिमार्गध्वं रामपत्नीं यशस्विनीं ॥ ४ ॥ अस्मिन्कार्ये विनिर्वृत्ते [illegible] कृते दाशरथेः प्रिये ॥ ऋणान्मुक्ता भविष्यामः कृतार्थार्थवि-
दंवर ॥ ५ ॥ कृतं हि प्रियमस्माकं राघवेण महात्मना ॥ तस्य चेत्प्रतिकारोस्ति सफलं जीवितं भवेत् ॥ ६ ॥ अर्थिनः कार्य-
निर्वृत्तिमकर्तुरपि यश्चरेत् ॥ तस्य स्यात्सफलं जन्म किं पुनः पूर्वकारिणः ॥ ७ ॥ एतां बुद्धिं समास्थाय दृश्यते जानकी य-
था ॥ तथा भवद्भिः कर्तव्यमस्मत्प्रियहितैषिभिः ॥ ८ ॥ अयं हि सर्वभूतानां मान्यस्तु नरसत्तमः ॥ अस्मासु चागतः प्रीतिं रामः
परपुरंजयः ॥ ९ ॥ इमानि वनदुर्गाणि नद्यः शैलांतराणि च ॥ भवंतः परिमार्गंतु बुद्धिविक्रमसंपदा ॥ १० ॥ तत्र म्लेच्छान्पु-
लिंदांश्च भूरसेनांस्तथैव च ॥ प्रस्थलान्भरतांश्चैव कुरूंश्च सह मद्रकैः ॥ ११ ॥

॰येन ॥ ६ ॥ अर्थिनः स्वस्मात्प्रयोजनार्थिनः कार्यनिर्वृत्तिं तत्प्र-
योजनानुष्ठानं अकर्तुः सर्वमुपकाराः कर्तुरपि यश्चरेत्तं न कुर्यात् ॥ ७ ॥ ८ ॥ ९ ॥ इमानि वक्ष्यमाणानि ॥ १० ॥ प्रस्थलाभरतांश्च देशविशेषाः कुरून्दक्षिणकुरू

लोध्रपद्मकखंडेषुहैमवतेष्वितिशेषः ॥ तंकालाख्यंपर्वतं ॥ १४ ॥ तस्यशैलेषुगंडपर्वतेषु ॥ पर्वतैःसंततोमहत्सुतेषु ॥ १५ ॥ तंकालपर्वतं ॥ १६ ॥ ततःसुदर्शनात्परतः

कांबोजयवनांश्चैवशकानांपत्तनानिच ॥ अन्वीक्ष्यवरदांश्चैवहिमवंतंविचिन्वथ ॥ १२ ॥ लोध्रपद्मकखंडेषुदेवदारुवनेषुच ॥ राव
णःसहवैदेह्यामार्गितव्यस्ततस्ततः ॥ १३ ॥ ततःसोमाश्रमंगत्वादेवगंधर्वसेवितं ॥ कालंनाममहासानुंपर्वतंतंगमिष्यथ ॥ १४ ॥
महत्सुतस्यशैलेषुपर्वतेषुगुहासुच ॥ विचिन्वतमहाभागांरामपत्नीमनिंदितां ॥ १५ ॥ तमतिक्रम्यशैलेंद्रंहेमगर्भंमहागि
रिं ॥ ततःसुदर्शनंनामपर्वतंगंतुमर्हथ ॥ १६ ॥ ततोदेवसखोनामपर्वतःपतगालयः ॥ नानापक्षिसमाकीर्णोविविधद्रु
मभूषितः ॥ १७ ॥ तस्यकांचनखंडेषुनिर्दरेषुगुहासुच ॥ रावणःसहवैदेह्यामार्गितव्यस्ततस्ततः ॥ १८ ॥ तमतिक्रम्यचा
काशंसर्वतःशतयोजनं ॥ अपर्वतनदीवृक्षंसर्वसत्वविवर्जितं ॥ १९ ॥ तंतुशीघ्रमतिक्रम्यकांतारंरोमहर्षणं ॥ कैला
संपांडुरंप्राप्यहृष्टायूयंभविष्यथ ॥ २० ॥ तत्रपांडुरमेघाभंजांबूनदपरिष्कृतं ॥ कुवेरभवनंरम्यंनिर्मितंविश्वक
र्मणा ॥ २१ ॥ विशालानलिनीयत्रप्रभूतकमलोत्पला ॥ हंसकारंडवाकीर्णाअप्सरोगणसेविता ॥ २२ ॥ तत्रवैश्रवणो
राजासर्वलोकनमस्कृतः ॥ धनदोरमतेश्रीमान्गुह्यकैःसहयक्षराट् ॥ २३ ॥ तस्यचंद्रनिकाशेषुपर्वतेषुगुहासुच ॥ राव
णःसहवैदेह्यामार्गितव्यस्ततस्ततः ॥ २४ ॥

पतगाःपक्षिणः ॥ १७ ॥ १८ ॥ तंदेवसखपर्वतमतिक्रम्य ॥ आकाशंभूप्रदेशं ॥ अत्राकाशोपपादकमपर्वतेत्यादि ॥ १९ ॥ कांतारंदुर्गपर्वतवनत्वाद्दिनारो
महर्षणंभयंकरत्वात् ॥ २० ॥ २१ ॥ नलिनीसरसी ॥ २२ ॥ २३ ॥ तस्यकैलासस्यपर्वतेषुगंडपर्वतेषु ॥ २४ ॥ रामरामरामरामरामराम

179

॥ राम ॥
॥ १०२ ॥

नस्य क्रौंचस्य विलं स्कंदशक्तिक्रान्तं विवरं ॥ २५ ॥ तत्र क्रौंचगुहायां ॥ २६ ॥ २७ ॥ कामशैलं कामतः यस्थानं शैलं । तद्विशेषणं महावृक्षं मानसं तदाख्यं । तत्र मानसपर्वते ॥ २८ ॥ सेवेति । क्रौंचपर्वत इत्यर्थः सानूनि प्रस्थाश्च भूधराः पर्यन्तपर्वतालेः सहितः मैनाक इति । मैनाकोयं समुद्रमग्नादन्यः ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ । वैखानसं वैखानसानामिदं ॥ ३३

क्रौंचं तु गिरिमासाद्य विलं तस्य सुदुर्गमं ॥ अप्रमत्तैः प्रवेष्टव्यं दुष्प्रवेशं हि तत्स्मृतं ॥ २५ ॥ वसंति हि महात्मानस्तत्र सूर्यसमप्रभाः । देवैरभ्यर्थिताः सम्यग्देवरूपा महर्षयः ॥ २६ ॥ क्रौंचस्य तु गुहाश्चान्याः सानूनि शिखराणि च ॥ दर्दराश्च नितंवाश्च विचेतव्यास्ततस्ततः ॥ २७ ॥ अवृक्षं कामशैलं च मानसं विहगालयं ॥ न गतिस्तत्र भूतानां देवानां न च रक्षसां ॥ २८ ॥ स च सर्वैर्विचेतव्यः ससानुप्रस्थभूधरः क्रौंचं गिरिमतिक्रम्य मैनाको नाम पर्वतः ॥ २९ ॥ मयस्य भवनं तत्र दानवस्य स्वयंकृतं ॥ मैनाकस्तु विचेतव्यः ससानुप्रस्थकंदरः ॥ ३० ॥ स्त्रीणामश्वमुखीनां तु निकेतास्तत्र तत्र तु ॥ तं देशं समतिक्रम्य आश्रमं सिद्धसेवितं ॥ ३१ ॥ सिद्धा वैखानसास्तत्र वालखिल्याश्च तापसाः । वंदितव्यास्ततः सिद्धास्तपसा वीतकल्मषाः ॥ ३२ ॥ प्रष्टव्या चापि सीतायाः प्रवृत्तिर्विनयान्वितैः । हेमपुष्करसंछन्नं तत्र वैखानसं सरः ॥ ३३ ॥ तरुणादित्यसंकाशैर्हंसैर्विचरितं शुभैः ॥ औपवाह्यः कुबेरस्य सार्वभौम इति स्मृतः ॥ ३४ ॥ गजः पर्येति तं देशं सदा सह करेणुभिः ॥ तत्सरः समतिक्रम्य नष्टचंद्रदिवाकरं ॥ अनक्षत्रगणं व्योम निष्पयोदमनादितं ॥ ३५ । गभस्तिभिरिवार्कस्य स तु देशः प्रकाश्यते ॥ विश्राम्यद्भिस्तपःसिद्धैर्देवकल्पैः स्वयंप्रभैः ॥ ३६ ॥

॥ विचरितं निसेवितं । औपवाह्यः वाहनं ॥ ३४ ॥ तत्सरोनिक्रम्य वर्तमानं व्योमाक्रियानवकाशः । चंद्रादिसर्वज्योतिर्गणप्रकाशरहितः ॥ ३५ ॥ नापि सांधकारः इत्याह गभस्तिभिरिवेति । चंद्रादिज्योतींष्यभिसृत्य । अर्कगभस्तिसदृशैः स्वीयैर्गभस्तिभिः प्रकाश्यमेकेनेयैः स्वगभस्तिभिः प्रकाश्यतेनेत्याह । विश्राम्यद्भिरिति सुखोपविष्टैः स्वतपःसिद्धैरत एव देवकल्पैः सूर्यादिदेवतुल्यैः स्वयंप्रभैः

॥ए·वा·कि॥
॥१०३॥

श्च सूर्यादिवत्तद्देशः प्रकाश्यते। यत्तु तत्र चंद्रादीनां संचाराभाव एवेति तन्न॥ अग्रेषु प्रसिद्धचंद्रादिसंचारवदुत्तरकुरूणां न हूर्ध्वमुपदेशात्तु यपत्तेः॥३६॥ निम्नगा अस्तीति शेषः अंतः सुषिरो वेणुः कीचकः॥३७॥ परं तीरं शैलोदाया इति शेषः कृतपुण्यानां प्रतिश्रयाः निवासभूताः॥३८॥ पद्मिनीभिः सरसीभिः कांतोदकाः कांतोदककार्याः ३९॥ इत आरभ्योत्तरकुरुदेशस्य भोगभूमित्वकथनं दिव्यनद्योपि तत्र संतीत्याह नीलेत्यादि॥४०॥ जलाशयास्तटाकादयः॥४१॥ निस्तुलाभिर्वर्तुलाभिः निस्तुलं वृत्तम्

तंतु देशमतिक्रम्य शैलोदा नाम निम्नगा॥ उभयोस्तीरयोस्तस्याः कीचका नाम वेणवः॥३७॥ ते नयंति परं तीरं सिद्धान्प्रत्यानयंति च॥ उत्तराः कुरवस्तत्र कृतपुण्यप्रतिश्रयाः॥३८॥ ततः कांचनपद्माभिः पद्मिनीभिः कृतोदकाः॥३९॥ नीलवैदूर्यपत्राढ्या नद्यस्तत्र सहस्रशः॥ रक्तोत्पलवनैश्चात्र मंडिताश्च हिरण्मयैः॥४०॥ तरुणादित्यसंकाशाः भांति तत्र जलाशयाः॥ महार्हमणिरत्नैश्च कांचनप्रभकेसरैः॥४१॥ नीलोत्पलवनैश्चित्रैः स देशः सर्वतोवृतः॥ निस्तुलाभिश्च मुक्ताभिर्मणिभिश्च महाधनैः॥४२॥ उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः॥ सर्वरत्नमयैश्चित्रैरवगाढा नगोत्तमैः॥४३॥ जातरूपमयैश्चापि हुताशनसमप्रभैः नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः॥४४॥ दिव्यगंधरसस्पर्शाः सर्वकामान्स्रवंति च॥ नानाकाराणि वासांसि फलंत्यन्ये नगोत्तमाः॥४५॥ मुक्तावैदूर्यचित्राणि भूषणानि तथैव च॥ स्त्रीणां यान्यनुरूपाणि पुरुषाणां तथैव च॥४६॥ सर्वर्तुसुखसेव्यानि फलंत्यन्ये नगोत्तमाः॥ महार्हमणिचित्राणि फलंत्यन्ये नगोत्तमाः॥४७॥

मित्यमरः॥४२॥ जातरूपैः स्वर्णैरुद्धूतपुलिनाः उद्धृतपुलिनाः नगोत्तमैः पर्वतैः अवगाढा व्याप्ताः॥४३॥ नगा वृक्षाः पत्ररथैः पक्षिभिराकुला व्याप्ताः॥४४॥४५॥ इत उत्तरं केचित्श्लोका रमंते समतं तत्र नारीभिर्भास्वरप्रभा इत्यंताः प्रक्षिप्ताः प्राचीनपुस्तकेष्वनुपलंभादिति कतकः॥४६॥४७॥ रामाय रामचन्द्राय श्रीकृष्णाय वासुदेवाय

180

॥रा·म·॥
॥१०३॥

४८ । ४९ । ५० ।। ५१ ५२ ।। अमदविषमानांप्रियंयस्यतादृशः । ५३ । अत्रसुमेर्वर्णनंनोक्तं । तत्रराक्षसानांवासासंभवादित्याह । मध्ये उत्तरसमुद्रमध्ये ।। ५४ । सतु
देशः विस्तीर्णोपि । सूर्यसंचाररहितोपि । तस्यभासासोमगिरिप्रभयातपसाविवस्वतायुक्तदेशाइवसूर्यलक्ष्मा । सूर्योपेतदेशश्रियायुक्तः प्रकाशते । ५५ ।।

शयनानिप्रस्तूयंतेचित्रास्तरणवंतिच ।। मनःकांतानिमाल्यानिफलंपत्रापरेद्रुमाः ।। ४८ ।। पानानिचमहार्हाणिभक्ष्या
णिविविधानिच ।। स्त्रियश्चगुणसंपन्नारूपयौवनलक्षिताः ।। ४९ ।। गंधर्वाः किन्नराःसिद्धानागाविद्याधरास्तथा ।
रमंतेसततंतत्रनारीभिर्भास्वरप्रभाः ।। ५० ।। सर्वेसुकृतकर्माणः सर्वेरतिपरायणाः ।। सर्वेकामार्थसहिताव
संतिसहयोषितः ।। ५१ ।। गीतवादित्रनिर्घोषःसोत्कृष्टहसितस्वरैः । श्रूयतेसततंतत्रसर्वभूतमनोरमः ।। ५२ ।।
तत्रनामुदितःकश्चिन्नात्रकश्चिदसत्प्रियः ।। अहन्यहनिवर्धंतेगुणास्तत्रमनोरमाः ।। ५३ ।। तमतिक्रम्यशैलें
द्रमुत्तरस्तोयसांनिधिः ।। तत्रसोमगिरिर्नाममध्येहेममयोमहान् ।। ५४ ।। सतुदेशोविसूर्योपितस्यभासाप्रकाशते ।
सूर्यलक्ष्माभिविज्ञेयस्तपतेवविवस्वता ।। ५५ ।। भगवांस्तत्रविश्वात्माशंभुरेकादशात्मकः । ब्रह्मावसतिदेवेशोब्रह्म
र्षिपरिवारितः ।। ५६ ।। नकथंचनगंतव्यंकुरूणामुत्तरेणवः । अन्येषामपिभूतानांनानुक्रामतिवैगतिः ।। ५७ ।।

विश्वमततिव्याप्नोतीतिविश्वात्माव्यापकः तेनविष्णुरूपः विष्लृव्याप्तावित्यनुसारात् । सएवशंभुः शंभवत्यस्मात् । सएवैकादशात्मकः एकादशात्त्ववाकार्थेएकादशरुद्रात्म
कः सएवब्रह्मा बृंहणाद्वाज्जगत्सृष्टत्वात् । स्वरूपत्रयात्माभगवान्तत्रसोमगिरौकार्यब्रह्मलोकवाहमतीत्यर्थः । ५६ । नानुक्रामतिवैगतिः तस्यकार्यब्रह्मलोकत्वेनब्रह्म

र्विद्यातिरिक्तस्यतत्रागतेः ब्रह्मर्षिपदेनदहरादिमार्गेणब्रह्मोपासकाअप्युच्यंते ।। ५७ ।।

नसहदेवानामपि दुर्गम इति ॥ ५८ ॥ ५९ ॥ नचापि मतिः क्रियतामिति अन्वेषणायेति भावः ॥ ६० ॥ प्रियमित्यस्य स्वस्येत्यादिः ॥ विदेहजादर्शनजेन कर्मणा विदेहजा
दर्शनप्रवृद्धिरूपजातेन कर्मणा अन्वेषणकर्मणेति यावत् ॥ ६१ ॥ भूतधराः भूतैः प्राणिभिर्ध्रियन्ते ते भूतधराः प्राणिभिरुपजीव्या इत्यर्थः ॥ ६२ ॥ इति रामाभिरा
मे श्रीरा॰ किष्किंधाकांडे त्रिचत्वारिंशः सर्गः ॥ ४३ ॥ हनूमत्यर्थस्य सविशेषमुक्तौ हेतुः स हीति अर्थसाधने । तद्विषये निश्चितार्थः तादृशार्थविषयकनिश्च

सहि सोमगिरिर्नाम देवानामपि दुर्गमः । तमालोक्य ततः क्षिप्रमुपावर्तितुमर्हथ ॥ ५८ ॥ एतावद्वानरैः शक्यं गंतुं वान
रपुंगवाः । अभास्करममर्यादं न जानीमस्ततः परं ॥ ५९ ॥ सर्वमेतद्विचेतव्यं यन्मया परिकीर्तितं । यदन्यदपि नोक्तं
चतत्रापि क्रियतां मतिः ॥ ६० ॥ ततः कृतं दाशरथेर्महत्प्रियं महत्प्रियं चापि ततो मम प्रियं । कृतं भविष्यत्यनिलानलो
पमा विदेहजादर्शनजेन कर्मणा ॥ ६१ ॥ ततः कृतार्थाः सहिताः सबांधवा मयार्चिताः सर्वगुणैर्मनोरमैः । चरिष्यथो
र्वीं प्रतिशांतशत्रवः सहप्रिया भूतधराः प्लवंगमाः ॥ ६२ ॥ इत्यार्षे श्रीमद्रामायणे वा॰ किष्किंधाकांडे त्रिचत्वारिंशः
सर्गः ॥ ४३ ॥ विशेषेण तु सुग्रीवो हनूमत्यर्थमुक्तवान् । स हि तस्मिन् हरिश्रेष्ठे निश्चितार्थोऽर्थसाधने ॥ १ ॥ अब्रवी
च्च हनूमंतं विक्रांतमनिलात्मजं । सुग्रीवः परमप्रीतः प्रभुः सर्ववनौकसां ॥ २ ॥ न भूमौ नांतरिक्षे वा नांबरे नामराल
ये । नाप्सु वा गतिसंगं ते पश्यामि हरिपुंगव ॥ ३ ॥ सासुराः सहगंधर्वाः सनागनरदेवताः । विदिताः सर्वलोकास्ते ससा
गरधराधराः ॥ ४ ॥

यवान् ॥ १ ॥ उक्तिप्रकारं दर्शयति अब्रवीच्चेति सर्ववनौकसां मध्ये इति शेषः ॥ २ ॥ अंतरिक्षं तदधिवासस्तु पक्षिमार्गः अंबरं मेघमार्गः । अमरालयः स्वर्गः गतिसंगति
प्रबंधः ॥ ३ ॥ सर्वलोकविशेषणं सासुरा इत्यादि ॥ ४ ॥

181

लाघवंक्षिप्रकारित्वं ॥५॥ भूतंप्राणि ॥ तत्तस्माद्यथासीतालभ्येतेनतत् ॥ अर्थजातंत्वमेवानुचिंतय ॥ ६ ॥ बलंशारीरंपराक्रमउत्साहः ॥ देशकालानुवृत्तिस्तदुचितकर्मानु
ष्ठानंनयेनीतिशास्त्रे ॥ पंडितेतिसंबुद्धिः ॥ ७ ॥ ततःस्वंसुग्रीववचनात् ॥ कार्यसमासंगं ॥ कार्यसिद्धिसंबंधं ॥ अवगम्य स्वयंचतत्सामर्थ्याद्यनुभवेनतस्मिन्कार्ये
साधकत्वंविदित्वाचात्तअस्यदेशस्यवसीतांविदित्वाचिंतयामास ॥ अस्मिन्स्वकर्तव्यसमर्थरांगुक्तामितिविचारयामास ॥ ८ ॥ चिंताप्रकारमाह सर्वथेति नि

गतिर्वेगश्चतेजश्चलाघवंचमहाकपे ॥ पितुस्तेसदृशंवीरमारुतस्यमहौजसः ॥ ५ ॥ तेजसावापितेभूतंनसमंभुविविद्यते
तद्यथालभ्यतेसीतातत्त्वमेवानुचिंतय ॥ ६ ॥ त्वय्येवहनुमन्नस्तिबलंबुद्धिःपराक्रमः ॥ देशकालानुवृत्तिश्चनयश्चनयपंडित
॥ ७ ॥ ततःकार्यसमासंगमवगम्यहनूमति ॥ विदित्वाहनुमंतंचचिंतयामासराघवः ॥ ८ ॥ सर्वथानिश्चितार्थोयंहनूमतिह
रीश्वरः ॥ निश्चितार्थतरश्चापिहनूमान्कार्यसाधने ॥ ९ ॥ तदेवंप्रस्थितस्यास्यपरिज्ञातस्यकर्मभिः ॥ भर्त्रापरिगृहीतस्यध्रु
वःकार्यफलोदयः ॥ १० ॥ तंसमीक्ष्यमहातेजाव्यवसायोत्तरंहरिं ॥ कृतार्थइवसंहृष्टःप्रहृष्टेंद्रियमानसः ॥ ११ ॥ ददौतस्य
ततःप्रीतःस्वनामांकोपशोभितं ॥ अंगुलीयमभिज्ञानंराजपुत्र्याःपरंतपः ॥ १२ ॥ अनेनत्वांहरिश्रेष्ठचिह्नेनजनकात्
मजा ॥ मत्सकाशादनुप्राप्तमनुद्विग्नानुपश्यति ॥ १३ ॥ व्यवसायश्चतेवीरसत्वयुक्तश्चविक्रमः ॥ सुग्रीवस्यचसंदेशः सिद्धिंकथयतीवमे

श्चितार्थःएतदर्थविषयकनिश्चयवान्स्वतोप्ययमतिशयेनकार्यसाधनेनिश्चितार्थः ॥ ९ ॥ प्रस्थितस्यभर्त्राप्रस्थापितस्यपरिज्ञातस्यपरीक्षितस्यपरिगृहीतस्यश्रेष्ठतये
तिशेषः कार्यस्यफलोदयःसीतादर्शनप्राप्तिरूपःसध्रुवोनिश्चितार्थः ॥ १० ॥ व्यवसायोत्तरंकार्यसाधनेश्रेष्ठंतंहरिंहनूमंतंसमीक्ष्यप्रहृष्टेंद्रियमानसोबभूव ॥ ११ ॥ ततो
निश्चितकार्यसाधकत्वादेवहेतोःराजपुत्र्याःअभिज्ञानंप्रत्यभिज्ञासाधनंददौ ॥ १२ ॥ १३ ॥ तावत्समर्पितमत्कृतमनिश्चयःकथमतआहव्यवसायश्चेति ॥ १४ ॥ ॐ ॥

ततस्तमभिज्ञानपदार्थं ॥१५॥ सननत् हरिणांदीर्घाभावश्चार्षः महद्बलं प्रकर्षन् ॥१६॥ हरिवरविक्रमश्रेष्ठसिंहविक्रम ॥ अतिबलपवनसुत हनूमन् तवैव बलमाश्रितोहमस्मि अतोऽनल्पैर्विक्रमैर्जनकसुता यथाधिगम्यते तथा कुरुष इत्यब्रवीदिति शेषः ॥ रामसुग्रीवयोः साधारणमिदं वचः ॥१७॥ कनकेऽत्र चतुस्त्रिंशत्स

सततस्त्वयहरिश्रेष्ठः कृत्वा मूर्ध्निकृतांजलिः ॥ वंदित्वा चरणौ चैव प्रास्थितः प्लवगर्षभः ॥१५॥ स ततः प्रकर्षन् हरिणां महद्बलं बभूव वीरः पवनात्मजः कपिः ॥ गतांबुदे व्योम्नि विशुद्धमंडलः शशीव नक्षत्रगणोपशोभितः ॥१६॥ अतिबलबलमाश्रितस्तवाहं हरिवरविक्रम विक्रमैरनल्पैः ॥ पवनसुत यथाधिगम्यते सा जनकसुता हनुमंस्तथा कुरुष ॥१७॥ इति श्री आर्षे श्रीमद्रामायणे किष्किंधाकांडे चतुश्चत्वारिंशः सर्गः ॥४४॥ सर्वांश्चाहूय सुग्रीवः प्लवगान्प्लवगर्षभः ॥ समस्तांश्चाब्रवीद्राजा रामकार्यार्थसिद्धये ॥१॥ एवमेतद्विचेतव्यं भवद्भिर्वानरोत्तमैः ॥ तदुग्रशासनं भर्तुर्विज्ञाय हरिपुंगवाः ॥२॥ शलभा इव संछाद्य मेदिनीं संप्रतस्थिरे ॥ रामः प्रस्रवणे तस्मिन्न्यवसत्सह लक्ष्मणः ॥३॥ प्रतीक्षमाणस्तं मासं सीताधिगमने कृतः ॥ उत्तरां तु दिशं रम्यां गिरिराजसमावृतां ॥४॥ प्रतस्थे सहसा वीरो हरिः शतबलिस्तदा ॥ पूर्वां दिशं प्रतिययौ विनतो हरियूथपः ॥५॥ ताराङ्गदादिसहितः प्लवगः पवनात्मजः अगस्त्यचरितामाशां दक्षिणां हरियूथपः ॥६॥

((एषाश्लोकः सर्गोऽयमुक्तः ॥ इति रामाभिरामे श्रीरा॰ किष्किंधाकांडे चतुश्चत्वारिंशः सर्गः ॥४४॥ सर्वानिति ॥१॥ उक्तिप्रकारएवमिति ॥२॥ आप्तनियोगनातुद्योगः शलभा इवेति ॥३॥ यः सीताध्यधिगमेन हनूमानज्ञानेऽवधिभूतः कृतस्तं मासमभिव्याप्य गिरिराजो हिमालयः ॥४॥

182

॥राम॥
॥१०५॥

७ ॥ यथातथ्यं यथायोग्यमित्यर्थः सुमोदविक्रीड ॥ ८ ॥ अभिप्रेत्य उद्दिश्य नादादयः शब्दा वानरभेदाः ॥ ९ ॥ १० ॥ आनयिष्यामहे इमादेरूडरित्यनेनान्वयः ॥ ११ ॥

पश्चिमां च दिशं घोरां सुषेणः प्लवगेश्वरः ॥ प्रतस्थे हरिशार्दूलो दिशं वरुणपालितां ॥ ७ ॥ ततः सर्वा दिशो राजा चोदयित्वा
यथातथं ॥ कपिसेनापतिर्वीरो मुमोद सुखितः सुखं ॥ ८ ॥ एवं संचोदिताः सर्वे राज्ञा वानरयूथपाः ॥ स्वां स्वां दिशम
भिप्रेत्य त्वरिताः संप्रतस्थिरे ॥ ९ ॥ नदंतश्चोन्नदंतश्च गर्जंतश्च प्लवंगमाः ॥ क्ष्वेडंतो धावमानाश्च विनदंतो महाबलाः
॥ १० ॥ एवं संचोदिताः सर्वे राज्ञा वानरयूथपाः ॥ आनयिष्यामहे सीतां हनिष्यामश्च रावणं ॥ ११ ॥ अहमेको वधिष्या
मि प्राप्तं रावणमाहवे ॥ ततश्चोन्मथ्य सहसा हरिष्ये जनकात्मजां ॥ १२ ॥ वेपमानां श्रमेणाद्य भवद्भिः स्थीयतामि
ति ॥ एक एवाहरिष्यामि पातालादपि जानकीं ॥ १३ ॥ विधमिष्याम्यहं वृक्षान् दारयिष्याम्यहं गिरीन् ॥ धरणीं दा
रयिष्यामि क्षोभयिष्यामि सागरान् ॥ १४ ॥ अहं योजनसंख्यायाः प्लवेयं नात्र संशयः ॥ शतयोजनसंख्यायाः श
तं समधिकं त्वहं ॥ १५ ॥ भूतले सागरे वापि शैलेषु च वनेषु च ॥ पातालस्यापि वा मध्ये न ममाच्छिद्यते गतिः ॥ १६ ॥
इत्येकैकस्तदा तत्र वानरा बलदर्पिताः ॥ ऊचुश्च वचनं तस्य हरिराजस्य सन्निधौ ॥ १७ ॥ इत्यार्षे श्रीमद्रामायणे कि०
पंचचत्वारिंशः सर्गः ॥ ४५ ॥

१२ ॥ श्रमेण वेपमानामिति जनकजाविशेषणं ॥ १३ ॥ १४ ॥ अहं योजनेत्येकस्य वाक्यांशं शतयोजनेत्यन्यस्य ॥ १५ ॥ १६ ॥ एकैकः एकाकी इत्यर्थः ॥ १७ ॥ धोकमानः

इति रामाभिरामे श्रीरा० कि० पंचचत्वारिंशः सर्गः ॥ ४५ ॥

गतेष्विति ॥ १ ॥ पुरातनञ्चात्मा देहो यस्यासीदिति ॥ २ ॥ दुंदुभिर्नामेति ॥ अत्र दुंदुभिशब्देन महिषशब्देन च तत्सुतो मायावि नाम दानव उच्यते न हृत्तांतस्यैवाग्रे वक्ष्यमाणत्वात् ॥ मायावी नाम तेजस्वी दुंदुभेः पूर्वजः सुत इति प्रागुक्तेस्तस्य तत्पुत्रत्वं ॥ पितुर्महिषाकारत्वात् तत्पुत्रस्य च तदाकारत्वमिति च बोध्यं ॥ ३ ॥ मलयं मलयगुहां ॥ ४ ॥

गतेषु वानरेंद्रेषु रामः सुग्रीवमब्रवीत् ॥ कथं भवान्विजानीते सर्वं वै मंडलं भुवः ॥ १ ॥ सुग्रीवश्च ततो रामं उवाच प्रणतात्मवान् ॥ श्रूयतां सर्वमाख्यास्ये विस्तरेण वचो मम ॥ २ ॥ यदा तु दुंदुभिर्नाम दानवं महिषाकृतिं ॥ प्रतिकालयते वाली मलयं प्रति पर्वतं ॥ ३ ॥ तदा विवेश महिषो मलयस्य गुहां प्रति ॥ विवेश वाली तत्रापि मलयं तज्जिघांसया ॥ ४ ॥ ततो हं तत्र निक्षिप्तो गुहाद्वारि विनीतवत् ॥ न च निष्क्रमते वाली तदा संवत्सरे गते ॥ ५ ॥ ततः क्षतजवेगेन आपुपूरे तदा बिलं ॥ तदहं विस्मितो दृष्ट्वा भ्रातृशोकविषार्दितः ॥ ६ ॥ अथाहं गतबुद्धिस्तु सुव्यक्तं निहतो गुरुः ॥ शिलापर्वतसंकाशा बिलद्वारि मया कृता ॥ ७ ॥ अशक्नुवन्निष्क्रमितुं महिषो विनशिष्यति ॥ ततोहमागां किष्किंधां निराशस्तस्य जीविते ॥ ८ ॥ राज्यं च सुमहत्प्राप्य तारां च रुमया सह ॥ मित्रैश्च सहितस्तत्र वसामि विगतज्वरः ॥ ९ ॥ आजगाम ततो वाली हत्वा तं वानरर्षभः ॥ ततोहमददां राज्यं गौरवाद्भययंत्रितः ॥ १० ॥ स मां जिघांसुर्दुष्टात्मा वाली प्रव्यथितेंद्रियः ॥ परिकालयते वाली धावंतं सचिवैः सह ॥ ११ ॥

॥ ५ ॥ आपुपूरे संपूर्णं ॥ ६ ॥ निहत इति गतबुद्धिः भ्रान्तबुद्धिः जात इति शेषः ततो मयेत्यादि ॥ ७ ॥ विनशिष्यतीत्यस्यैतद्बुध्येति शेषः ॥ तस्य वालिनः ॥ ८ ॥ तारां च प्राप्येति संबंधः वसामि अवसं ॥ ९ ॥ १० ॥ परिकालयते सचिवैः सह धावंतमनुधावति स्म ॥ ११ ॥ रामकृष्णाय नमः ॥ ९ ॥

183

॥ राम. ॥
॥ १०६ ॥

ततस्तेनवालिनासोहमनुवद्धोनुद्रुतःप्रधावितः॥ १२ ॥ ततोवैतदनुधावनहेतोर्मयागोष्पदवत्परिक्रम्यमाणेयंपृथिवीअलातचक्रप्रतिमाआदर्शतलसंका
शाचदृष्टागोष्पदवदित्यनेनलंघनेऽप्रयासउक्तः अलातचक्रेत्यनेनत्वरीयोभ्रमणावेगः॥ आदर्शतलेत्यनेनभूचक्रवर्त्तिपदार्थस्यस्पष्टमनुभवउक्तः॥ १३ ॥
उक्तमेवविवृणोतिपूर्वांदिशमिति॥ १४ ॥ अमरसशब्दोकारांतोप्यार्षः॥ १५ ॥ परिकाल्यमानःपरिकालयमानःपलायनमानइत्यर्थः अकारलोपआर्षः

ततोहंवालिनातेनसोनुवद्धः प्रधावितः॥ नदीश्चविविधाः पश्यन्वनानिनगराणिच॥ १२ ॥ आदर्शतलसंकाशाततोवै
पृथिवीमया॥ अलातचक्रप्रतिमादृष्टागोष्पदवत्कृता॥ १३ ॥ पूर्वांदिशंततोगत्वापश्यामिविविधान्द्रुमान्॥ प
र्वतान्सदरीन्रम्यान्सरांसिविविधानिच॥ १४ ॥ उदयंतत्रपश्यामिपर्वतंधातुमंडितं॥ क्षीरोदंसागरंचैवनित्यम ॥ ४ ॥
प्सरसालयं॥ १५ ॥ परिकाल्यमानस्तुतदावालिनाभिद्रुतोह्यहं॥ पुनरावृत्यसहसाप्रस्थितोहंतदाविभो॥ १६ ॥
दिशस्तस्यास्ततोभूयःप्रस्थितोदक्षिणांदिशं॥ विंध्यपादपसंकीर्णांचंदनद्रुमशोभितां॥ १७ ॥ द्रुमशैलांतरेपश्य कि॰
न्भूयोदक्षिणतोपरां॥ अपरांचदिशंप्राप्तोवालिनासमभिद्रुतः॥ १८ ॥ सपश्यन्विविधान्देशानस्तंचगिरिसत्त रा॰
मं॥ प्राप्यचास्तंगिरिश्रेष्ठंउत्तरंसंप्रधावितः॥ १९ ॥ हिमवंतंचमेरुंचसमुद्रंचतथोत्तरं॥ यदानविंदेशरणंवालिनास

पुनरावृत्यउदयगिरिमुपः॥ १६ ॥ तस्यादिशःतांदिशंत्यक्त्वाद्रुमांतरेशैलांतरेचतव्यवहितंवालिनंपश्यन्॥ अपरांपश्चिमांदिशंसमभिद्रुतइतिशेषः
१७ ॥ १८ ॥ गिरिसत्तमंचाभिधावितइतिशेषः॥ १९ ॥ मेरुंमहामेरुंनाविंदेनलभे॥ २० ॥ श्रीरामायरामचन्द्रायनमः॥ ६ ॥ रामरामरामः

किमब्रवीत्तदाह॥ इदानीमिति मे मया स्मृतं किं स्मृतं तदाह॥ यथेति॥ २१॥ तदा पूर्वकाले अस्मिन्नाश्रममंडले वाली यदा प्रविशेत्तदास्य मूर्धा शतधा भवेदिति हरीश्वरो मतंगे
न शप्तः॥ २२॥ तत्र मतंगाश्रमे निरुद्विग्नः निर्भयः। आसाद्य स्थितस्य मम समीपमिति शेषः॥ न विवेशेत्यन्वयः॥ २३॥ तदा जानता शापकृतादिति शेषः॥ गुहां ऋष्यमूकस्येति शे

ततो मां बुद्धिसंपन्नो हनुमान्वाक्यमब्रवीत्॥ इदानीं मे स्मृतं राजन्यथा वाली हरीश्वरः॥ २१॥ मतंगेन तदा शप्तो ह्यस्मिन्नाश्रम
मंडले॥ प्रविशेद्यदि वा वाली मूर्धास्य शतधा भवेत्॥ २२॥ तत्र वासः सुखोस्माकं निरुद्विग्नो भविष्यति॥ तत्र पर्वतमासाद्य
ऋष्यमूकं नृपात्मज॥ २३॥ न विवेश तदा वाली मतंगस्य भयात्तदा॥ एवं मया तदा राजन्प्रत्यक्षमुपलक्षितं॥ पृथिवी
मंडलं सर्वं गुहामस्यागतस्ततः॥ २४॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे षट्चत्वारिंशः सर्गः॥ ४६॥ दर्श
नार्थं तु वैदेह्याः सर्वतः कपिकुंजराः॥ व्यादिष्टाः कपिराजेन यथोक्तं जग्मुरंजसा॥ १॥ ते सरांसि सरित्कक्षानाकाशं
नगराणि च॥ नदीदुर्गांस्तथा देशान्विचिन्वंति समंततः॥ २॥ सुग्रीवेण समाख्याताः सर्वे वानरयूथपाः॥ तत्र देशा
न्विचिन्वंति सशैलवनकाननान्॥ ३॥ विचित्य दिवसं सर्वे सीताधिगमने धृताः॥ समायांति स्म मेदिन्यां निशाकाले
प्लवानराः॥ ४॥

ततः॥ २४॥ वरमान॥ इतिरामाभिरामे श्रीरामीयरामायणे वाल्मीकीये किष्किंधाकांडे षट्चत्वारिंशः सर्गः॥ ४६॥ यथोक्तं स्वस्वान्वे
षणीयतयोक्तं देशमनतिक्रम्येत्यर्थः॥ १॥ आकाशं वनगिर्यंतान्तप्रदेशमित्यर्थः नदीदुर्गाणि नदीप्रवाहैर्गंतुमशक्यादेशान्नदीदुर्गास्तान्॥ २॥ ३॥
दिवसमित्यत्यंतसंयोगे द्वितीया॥ धृताः उद्युक्ताः मेदिन्यां सर्वाधारभूतायां निद्रासौकर्यार्थमिति भावः॥ ४॥ श्रीरामाय रामचन्द्राय श्रीकृष्णाय वासुदेवाय नमः॥

नेषु देशेषु सर्वर्त्तुकाननिमित्तसन्निहितसर्वर्त्तुयुक्तानन एव । सदा सफलद्रुमान् ॥ सर्वेष्वहःसु विचयनसमये समासाद्य कामं प्राप्य रजनीं रजन्यां शय्यां चक्रुः । नाहश
न्नक्षवत्त्वं च देशस्य रामप्रसादात् ॥५॥ तदहः प्रस्थानदिवसं प्रथमं कृत्वा ॥ गताः पुनर्मासे गते निराशाः सीताऽलाभे प्रस्रवणं गताः आगताः कपिराजेन स

सर्वर्त्तुकांश्च देशेषु वानराः सफलद्रुमान् ॥ आसाद्य रजनीं शय्यां चक्रुः सर्वेष्वहःसु ते ॥५॥ तदहः प्रथमं कृत्वा मासे प्रस्रव
णं गताः ॥ कपिराजेन संगम्य निराशाः कपिकुंजराः ॥६॥ विचित्य तु दिशं पूर्वां यथोक्तां सचिवैः सह ॥ अदृष्ट्वा विनतः
सीतामाजगाम महाबलः ॥७॥ दिशमप्युत्तरां सर्वां विविच्य स महाकपिः ॥ आगतः सह सैन्येन भीतः शतबलिस्तदा
॥८॥ सुषेणः पश्चिमामाशां विविच्य सह वानरैः ॥ समेत्य मासे पूर्णे तु सुग्रीवमुपचक्रमे ॥९॥ तं प्रस्रवणपृष्ठस्थं
समासाद्याभिवाद्य च ॥ आसीनं सह रामेण सुग्रीवमिदमब्रुवन् ॥१०॥ विचिताः पर्वताः सर्वे वनानि गहनानि च
निम्नगाः सागरान्ताश्च सर्वे जनपदाश्च ये ॥११॥ गुहाश्च विचिताः सर्वा यास्त्वया परिकीर्त्तिताः ॥ विचिताश्च महागु
ल्मा लताविततसंतताः ॥१२॥ गहनेषु च देशेषु दुर्गेषु विषमेषु च सत्त्वान्यतिप्रमाणानि विचितानि हतानि च ॥१३॥
ये चैव गहना देशा विचितास्ते पुनः पुनः ॥१३॥ उदारसत्त्वाभिजनो हनूमान्स मैथिलीं ज्ञास्यति वानरेंद्र । दिशं तु या
मेव गता तु सीता तामास्थितो वायुसुतो हनूमान् ॥१४॥

(गम्यास्थिता इत्यन्वयः ॥६॥७॥८॥ उपचक्रमे प्राप्तः ॥९॥१०॥ सागरान्ताः सागरसमीप
वर्त्तिद्वीपाः ॥११॥ लताविततैर्लताप्रतानैः संतताः समन्ताद्व्याप्ता दृशा महागुल्मा लतागृहविशेषाः ॥१२॥१३॥ दिक्त्रयासत्त्वनिश्चयात्सिद्धमर्थमनुवदति उदारेति ॥१४॥

अभेटमानः॥ इतिरामाभिरामे श्रीरामीये रामायणे किष्किंधाकांडे सप्तचत्वारिंशः सर्गः॥ ४७॥ प्रचक्रमे ऽन्वेष्टुमिति शेषः॥ १॥ २॥ ३॥ अन्वेषमाणास्ते विविध
निफलान्यपि भक्षयंतः सीतां न ददृशुः॥ ४॥ ५॥ यत्र निर्जलत्वादिव रूहनं तादृशान्यपि दुरन्वेष्याणि विचित्येत्यन्वयः भृशपीडिताः निर्जलारण्यान्वेषणेनक्षु

इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे सप्तचत्वारिंशः सर्गः॥ ४७॥ सह ताराङ्गदाभ्यां तु सहसा हनुमान्कपिः सुग्रीवे
णयथोद्दिष्टं गंतुं देशं प्रचक्रमे॥ १॥ स तु दूरमुपागम्य सर्वैस्तैः कपिसत्तमैः॥ ततो विचित्य विंध्यस्य गुहाश्च गहना
नि च॥ २॥ पर्वताग्रनदीदुर्गान्सरांसि विपुलद्रुमान्॥ वृक्षखंडांश्च विविधान्पर्वतान्वनपादपान्॥ ३॥ अन्वेष
माणास्ते सर्वे वानराः सर्वतो दिशः॥ न सीतां ददृशुर्वीरा मैथिलीं जनकात्मजां॥ ४॥ ते भक्षयंतो मूलानि फला
नि विविधान्यपि॥ निर्जलं निर्जनं शून्यं गहनं घोरदर्शनं॥ ५॥ तादृशान्यप्यरण्यानि विचित्य भृशपीडिताः
स देशश्च दुरन्वेष्यो गुहागहनवान्महान्॥ ६॥ त्यक्त्वा तु तं ततो देशं सर्वे वै हरियूथपाः॥ देशमन्यं दुराधर्षं
विविशुश्चाकुतोभयाः॥ ७॥ यत्र वंध्यफला वृक्षा विपुष्पाः पर्णवर्जिताः॥ निस्तोयाः सरितो यत्र मूलं यत्र सुदु
र्लभं॥ ८॥ न संति महिषा यत्र न मृगा न च हस्तिनः॥ शार्दूलाः पक्षिणो वापि ये चान्ये वनगोचराः॥ ९॥

त्पिपासाभ्यां पीडिताः स देशो निर्जलादि देशो यद्यपि दुरन्वेष्यस्तथापि तं विचित्य ततस्तं देशं त्यक्त्वा अन्यदेशं विविशुरित्याग्रिमेणान्वयः॥ ६॥ ७॥ वंध्यफल
ाः फलशून्याः॥ ८॥ ९॥

185

वल्योवृक्षाश्चाश्रिताः वीरुधोभूम्याधाराः स्थलेयत्रस्थलेनेत्यनुकर्षः ॥ १० ॥ भ्रमरैर्विवर्जिताः विगतंवर्जितंयास्तुताः संयुक्ता इत्यर्थः तादृशाः फुल्लपंकजाश्चयत्रत
स्मिन्यत्रवनेकंडुर्नाममहर्षिरासीत् ॥ ११ ॥ वनेपूर्वमितिशेषः इदानीमुक्तलक्षणे ॥ १२ ॥ जीवितांतायजीवितांतंगत्वाप्रनष्टः तेनवालदुर्मरणेनक्रुद्धो

नचात्रवृक्षानौषध्योनवल्योनापिवीरुधः ॥ स्निग्धपत्रास्थलेयत्रपद्मिन्यःफुल्लपंकजाः ॥ १० ॥ प्रेक्षणीयाःसुगंधाश्चभ्रमरैश्च
विवर्जिताः ॥ कंडुर्नाममहाभागःसत्यवादीतपोधनः ॥ ११ ॥ महर्षिःपरमामर्षीनियमैर्दुःप्रधर्षणः ॥ तस्यतस्मिन्वनेपुत्रो
वालकोदशवार्षिकः ॥ १२ ॥ प्रनष्टोजीवितांतायक्रुद्धस्तेनमहामुनिः ॥ तेनधर्मात्मनाशप्तंकृत्स्नंतत्रमहद्वनं ॥ १३ ॥
अशरण्यंदुराधर्षंमृगपक्षिविवर्जितं ॥ तस्यतेकाननांतांस्तुगिरीणांकंदराणिच ॥ १४ ॥ प्रभवाणिनदीनांचविचिन्वं
तिसमाहिताः ॥ तत्रचापिमहात्मानोनापश्यन्जनकात्मजां ॥ १५ ॥ हर्तारंरावणंवापिसुग्रीवप्रियकारिणः ॥ तेप्र
विश्यतुतंभीमंलतागुल्मसमावृतं ॥ १६ ॥ ददृशुर्भीमकर्माणमसुरंसुरनिर्भयं ॥ तंदृष्ट्वावानराघोरंस्थितंशैलमि
वासुरं ॥ १७ ॥ गाढंपरिहिताःसर्वेदृष्ट्वातंपर्वतोपमं ॥ सोपितान्वानरान्सर्वान्नष्टास्थेत्यब्रवीद्बली ॥ १८ ॥ अभ्यधावत
संक्रुद्धोमुष्टिमुद्यम्यसंगतं ॥ तमापतंतंसहसावालिपुत्रोंगदस्तदा ॥ १९ ॥

मुनिरभूत् ॥ ततस्तेनधर्मात्मनाशापानुग्रहसमर्थप्रवलध
र्मवतातत्रकालेशप्तमभूत् ॥ १३ ॥ शापस्वरूपमाह अशरण्यं अनावासं तेवानरास्तस्यकाननांतान्विचिन्वंतीत्यन्वयः ॥ १४ ॥ नदीनांप्रभवाणिउत्पत्तिस्थाना
नि ॥ १५ ॥ तेप्रविश्यवनांतरमितिशेषः ॥ तमसुरंददृशुरित्यन्वयः ॥ १६ ॥ सुरेभ्योनिर्भयःसुरनिर्भयः ॥ तथावरदानादितिभावः ॥ १७ ॥ गाढंपरिहिताः दृढंपरिवद्ध
वस्त्राःसंनद्धाइतियावत् ॥ १८ ॥ ५९ ॥

२०॥२१॥ सर्वं विचितं ज्ञात्वेति शेषः॥ २२॥२३॥ लुंठमानः॥ इति रामाभिरामे श्रीरामीये रा॰ किष्किंधाकांडे अष्टचत्वारिंशः सर्गः॥४८॥ समाश्वास्य वानरान् इति शेषः॥१
२॥ रक्षः तद्रूपापहर्त्रमाद्यर्थः॥३॥ नो महात्मानः मासमध्ये इति शेषः तन्मध्ये ऽल्पावशिष्ट इति भावः परात्तत्र गमने महदनिष्टमित्याह सुग्रीवश्चेति॥४॥ तथा विचि

रावणोयमिति ज्ञात्वा तलेनाभिजघान ह॥ स वालिपुत्राभिहतो वक्त्राच्छोणितमुद्वहन्॥२०॥ असुरो न्यपतद्भूमौ पर्यस्त इव पर्वतः। ते
तु तस्मिन्निरुच्छ्वासे वानरा जितकाशिनः॥२१॥ विचिन्वन्प्रायशस्तत्र सर्वं ते गिरिगह्वरं॥ विचितं तु ततः सर्वं सर्वैस्ते काननौकसः
॥२२॥ अन्यदेवापरं घोरं विविशुर्गिरिगह्वरं॥ ते विचित्य पुनः खिन्ना विनिष्पत्य समागताः॥ एकान्ते वृक्षमूले तु निषेदुर्दीनमा
नसाः॥२३॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे ऽष्टचत्वारिंशः सर्गः॥४८॥ अथांगदस्तदा सर्वान्वानरानिदमब्र
वीत्॥ परिश्रान्तो महाप्राज्ञः समाश्वास्य शनैर्वचः॥१॥ वनानि गिरयो नद्यो दुर्गाणि गहनानि च। दर्यो गिरिगुहाश्चैव
विचिताः सर्वमंततः॥२॥ तत्र तत्र सहास्माभिर्जानकी न च दृश्यते॥ तथा रक्षोपहर्ता च सीतायाश्चैव दुष्कृती॥३॥ काल
श्च नो महान्यातः सुग्रीवश्चोग्रशासनः॥ तस्माद्भवंतः सहिता विचिन्वंतु समंततः॥४॥ विहाय तंद्रीं शोकं च निद्रां चैव समु
त्थितां॥ विचिनुध्वं तथा सीतां पश्यामो जनकात्मजां॥५॥ अनिर्वेदं च दाक्ष्यं च मनसश्चापराजयं॥ कार्यसिद्धिकराण्या
हुस्तस्मादेतद्ब्रवीम्यहं॥६॥ अद्यापीदं वनं दुर्गं विचिन्वंतु वनौकसः॥ खेदं त्यक्त्वा पुनः सर्वं वनमेतद्विचिन्वतां॥७॥

नुध्वं यथा सीतां पश्याम इत्यन्वयः॥५॥ अनिर्वेदम् अखेदं दाक्ष्यं सामर्थ्यं अपराजयं कार्यात् पराङ्मुखत्वं एतत्त्वक्ष्यमाणं॥६॥ हे वनौकसः इदं दुर्गं वनम् अद्यापि विचिन्वं
तु भवंतः आदरात् पुनराह॥ खेदं त्यक्त्वा पुनः विचिन्वतां विचीयतां॥७॥ श्रीरामाय रामचंद्राय श्रीकृष्णाय वासुदेवाय नमः॥ ॥ ॥ ॥ रामरामरामराम

186

निर्वेदं खेदं नोन्मीलनमनुन्मीलनं ॥ अत उद्योग इति यावत् न क्षमं न युक्तं ॥ ८ ॥ तत्र हेतुः सुग्रीव इति ॥ यदि मदुक्तमेतन्न रोचते तर्हि यदन्यत् क्षमं तदुच्यतां ॥ १० ॥ ११ ॥ वो यु

अवश्यं कुर्वतां तस्य दृश्यते कर्मणः फलं । परां निर्वेदमागम्य नहि नोन्मीलनं क्षमं ॥ ८ ॥ सुग्रीवः क्रोधनो राजा तीक्ष्णादंडश्च वानराः
भेतव्यं तस्य सततं रामस्य च महात्मनः ॥ ९ ॥ हितार्थमेतदुक्तं वः क्रियतां यदि रोचते । उच्यतां हि क्षमं यत्तत्सर्वेषामेव वानराः
१० ॥ अंगदस्य वचः श्रुत्वा वचनं गंधमादनः । उवाच व्यक्तया वाचा पिपासाश्रमखिन्नया ॥ ११ ॥ सदृशं खलु वो वाक्यमं
गदो यदुवाच ह । हितं चैवानुकूलं च क्रियतामस्य भाषितं ॥ १२ ॥ पुनर्मार्गामहे शैलान्कंदरांश्च शिलास्तथा । काननानि
च भून्यानि गिरिप्रस्रवणानि च ॥ १३ ॥ यथोद्दिष्टानि सर्वाणि सुग्रीवेण महात्मना । विचिन्वंतु वनं सर्वे गिरिदुर्गा
णि संगताः ॥ १४ ॥ ततः समुत्थाय पुनर्वानरास्ते महाबलाः । विंध्यकाननसंकीर्णां विचेरुर्दक्षिणां दिशं ॥ १५ ॥ ते शा
रदाभ्रप्रतिमं श्रीमद्रजतपर्वतं । शृंगवंतं दरीवंतमधिरुह्य च वानराः ॥ १६ ॥ तत्र लोध्रवनं रम्यं सप्तपर्णवनानि च । विचिन्वं
तो हरिवराः सीतादर्शनकांक्षिणः ॥ १७ ॥ तस्याग्रमधिरूढास्ते श्रांता विपुलविक्रमाः । न पश्यंति स्म वैदेहीं रामस्य महिषीं
प्रियां ॥ १८ ॥ ते तु दृष्टिगतं दृष्ट्वा तं शैलं बहुकंदरं । अध्यारोहंत हरयो वीक्ष्यमाणाः समंततः ॥ १९ ॥ अवरुह्य ततो भूमिं श्रांता वि
गतचेतसः । स्थिता मुहूर्तं तत्राथ वृक्षमूलमुपाश्रिताः ॥ २० ॥ ते मुहूर्तं समाश्वस्ताः किंचिद्भग्नपरिश्रमाः । पुनरेवोद्यताः कृत्स्नां
मार्गितुं दक्षिणां दिशं ॥ २१ ॥

ष्माकं यदंगद उवाच तत्सदृशं तस्यैवेति शेषः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ तस्य रजतपर्वतस्य ॥ १८ ॥ दृष्टिगतं दृष्टिगोचरं अध्यारोहंत अवारोहंत्यर्थः ॥ १९ ॥ २० ॥ २१ ॥

आदित्यस्तावद्विंध्यं विचेरुरन्वेषणायेति शेषः ॥ तावद्दृष्टो वा कालंकारे ॥ २२ ॥ रेफमानः ॥ इति रामाभिरामे श्रीरा॰ किष्किंधाकांडे एकोनपंचाशः सर्गः ॥ ४९ ॥ स
हेति विषमेषु क्लेशजनकेषु ॥ २ ॥ दक्षिणापश्चिमां कोटिं नैर्ऋत्यभागीयशृंगं ॥ सकालः सुग्रीवकल्पितः कालः व्यत्ययवर्तनव्यतिक्रांतः ॥ ३ ॥ सदेशः नैर्ऋत्यविंध्यको

हनुमत्प्रमुखास्तावत्प्रस्थिताः प्लवगर्षभाः ॥ विंध्यमेवादितः कृत्वा विचेरुश्च समंततः ॥ २२ ॥ इत्यार्षे श्रीमद्रामायणे वा॰
किष्किंधाकांडे एकोनपंचाशः सर्गः ॥ ४९ ॥ सह तारांगदाभ्यां तु संगम्य हनुमान्कपिः ॥ विचिनोति च विंध्यस्य गुहाश्च गह
नानि च ॥ १ ॥ सिंहशार्दूलजुष्टाश्च गुहाश्च परितस्तदा ॥ विषमेषु नगेंद्रस्य महाप्रस्रवणेषु च ॥ २ ॥ आसेदुस्तस्य शैलस्य
कोटिं दक्षिणपश्चिमां ॥ तेषां तत्रैव वसतां स कालो व्यत्यवर्तत ॥ ३ ॥ स हि देशो दुरन्वेष्यो गुहागहनवान्महान् ॥ तत्र
वायुसुतः सर्वं विचिनोति स्म पर्वतं ॥ ४ ॥ परस्परेण रहिता अन्योन्यस्याविदूरतः ॥ गजो गवाक्षो गवयः शरभो गंध
मादनः ॥ ५ ॥ मैंदश्च द्विविदश्चैव हनूमान्जांबवानपि ॥ अंगदो युवराजश्च तारश्च वनगोचराः ॥ ६ ॥ गिरिजाला
वृतान्देशान्मार्गित्वा दक्षिणां दिशं ॥ विचिन्वंतस्ततस्तत्र ददृशुर्विवृतं बिलं ॥ ७ ॥ दुर्गमृक्षबिलं नाम दानवेनाभि
रक्षितं ॥ क्षुत्पिपासापरीतास्तु श्रांतास्तु सलिलार्थिनः ॥ ८ ॥ अवकीर्णं लतावृक्षैर्ददृशुस्ते महाबिलं ॥ तत्र क्रौंचाश्च
हंसाश्च सारसाश्चापि निष्क्रमन् ॥ ९ ॥ जलार्द्राश्चक्रवाकाश्च रक्तांगाः पद्मरेणुभिः ॥ ततस्तद्बिलमासाद्य सुगंधि दुरतिक्रमं ॥ १० ॥

टिप्रदेशः ॥ ४ ॥ परस्परेण रहिताः प्रत्येकमन्योन्यस्याविदूरतो भूत्वा हनूमान्गजादयश्च विचिन्वंति स्म ॥ ५ ॥ ६ ॥ विवृतमनावृतद्वारं ॥ ७ ॥ दुर्गं दुर्गमं दानवेन मयेन ॥ ८
तत्रतत्र निष्क्रमन् निराक्रमन् ॥ ९ ॥ सुगंधिबिलांतर्वेष्टमाणाद्दिव्यगंधपुष्प
संवृक्षवातसंगात् ॥ १० ॥

संजातपरिशंकाः। संजातजलसंभावनाः ॥११॥ दैत्येंद्रनिलयः पातालं ॥१२॥१३॥ कांतारवनकोविदः तत्तद्देशप्रवेशादौ समर्थः ॥१४॥१५॥१६॥ इत्युक्त्वा
हनूमतेतिशेषः। ७॥ निशाम्य अवलोक्य ॥१८॥ नसज्जते नप्रतिवध्यते। तेजः प्रभावः। अस्मेतु तेषां दृष्टिर्न सज्जते। तत्रास्य पदार्थे इति शेषः तिमिरावृतत्वा

विस्मयव्यग्रमनसो वभूवुर्वानरर्षभाः ॥ संजातपरिशंकास्ते तद्विलं प्लवगोत्तमाः ॥११॥ अभ्यपद्यंत संहृष्टास्तेजोवंतो
महावलाः ॥ नानासत्वसमाकीर्णं दैत्येंद्रनिलयोपमं ॥१२॥ दुर्दर्शमिव घोरं च दुर्विगाह्यं च सर्वशः ॥ ततः पर्वतकू
टाभो हनूमान्मारुतात्मजः ॥१३॥ अब्रवीद्वानरान्घोरान्कांतारवनकोविदः ॥ गिरिजालावृतान्देशान्मार्गित्वा दक्षिणां दि
शं ॥१४॥ वयं सर्वे परिश्रांता न च पश्याम मैथिलीं ॥ अस्माच्चापि विलाद्धंसाः क्रौंचाश्च सह सारसैः ॥१५॥ जलार्द्राश्चक्रवा
काश्च निष्पतंति स्म सर्वशः ॥ नूनं सलिलवानत्र कूपो वा यदि वा ह्रदः ॥१६॥ तथा चेमे विलद्वारे स्निग्धास्तिष्ठंति पादपाः
इत्युक्त्वा तद्विलं सर्वे विविशुस्तिमिरावृतं ॥७॥ अचंद्रसूर्यं हरयो ददृशू रोमहर्षणं ॥ निशाम्य तस्मात्सिंहांश्च तांस्तांश्च
मृगपक्षिणः ॥१८॥ प्रविष्टा हरिशार्दूला विलं तिमिरसंवृतं ॥ न तेषां सज्जते दृष्टिर्न तेजो न पराक्रमः ॥१९॥ वायोरि
व गतिस्तेषां दृष्टिस्तमसि वर्तते ॥ ते प्रविष्टास्तु वेगेन तद्विलं कपिकुंजराः ॥२०॥ प्रकाशं चाभिरामं च ददृशुर्देशमुत्तमं।
ततस्तस्मिन्विले भीमे नानापादपसंकुले ॥२१॥

तु अतस्तेजःपराक्रमयोरपि कुंठितगमनं यद्यपि वायोरिव गतिस्तथापि यतो दृष्टिस्तम
सिप्रतिवध्यते अतो वेगेन परस्परहस्तग्रहणपूर्वकं प्रविष्टा इत्यर्थः ॥ अतस्ते वद्धहस्तैः परस्परमित्यग्रे हनुमदुक्तिरित्याहुः ॥१९॥२०॥२१॥

अन्योन्यंसंपरिष्वज्य।तिमिरदेशविनिर्गमजसंतोषवशादितिशेषः॥यद्वान्योन्यंहस्तावलंबनंकृत्वाहस्तेनपरस्परस्योरस्थादिसम्यक्स्पृष्ट्वेतियावत्।सर्वे
कस्यैवाविस्तरः॥नष्टसंज्ञाःतृषावशात्नदाहन्तृषिताइति॥२२॥परिपेतुरिति।अधोमार्गलंबनांधकारेगताः॥२३॥आलोकमेवददृशुर्नतुजलंजीवितेनिरा

अन्योन्यंसंपरिष्वज्यजग्मुर्योजनमंतरं।तेनष्टसंज्ञास्तृषिताःसंभ्रांताःसलिलार्थिनः॥२२॥परिपेतुर्बिलेतस्मिन्कंचित्का
लमतंद्रिताः॥तेकृशादीनवदनाःपरिश्रांताःप्लवंगमाः॥२३॥आलोकंददृशुर्वीरानिराशाजीवितेयदा ततस्तंदेशमा
गम्यसौम्यावितिमिरंवनं॥२४॥ददृशुःकांचनान्वृक्षान्दीप्तवैश्वानरप्रभान्॥सालांस्तालांस्तमालांश्चपुंनागान्व
जुलान्धवान्॥२५॥चंपकान्नागवृक्षांश्चकर्णिकारांश्चपुष्पितान्॥स्तवकैःकांचनैश्चित्रैरक्तैःकिसलयैस्तथा॥२६॥
आपीडैश्चलताभिश्चहेमाभरणभूषितान्॥तरुणादित्यसंकाशान्वैडूर्यमयवेदिकान्॥२७॥विभ्राजमानान्वपुषापा
दपांश्चहिरण्मयान्॥नीलवैडूर्यवर्णांश्चपद्मिनीःपतगैर्वृताः॥२८॥महद्भिःकांचनैर्वृक्षैर्वृतंबालार्कसन्निभैः॥जातरूप
मयैर्मत्स्यैर्महद्भिश्चाथपंकजैः॥२९॥नलिनीस्तत्रददृशुःप्रसन्नसलिलायुताः॥कांचनानिविमानानिराजतानितथैवच
॥३०॥ तपनीयगवाक्षाणिमुक्ताजालावृतानिच॥हैमराजतभौमानिवैडूर्यमणिमंतिच॥३१॥

(शायसवम्ब्रुत्तदोच्यमानलक्षणं
देशमागम्यकांचनान्वृक्षांश्चददृशुः यदाजीवितेनिराशाबभूवुस्तदाभगवत्कृपयाआलोकंददृशुरुच्यमानविशेषणोदेशेकांचनान्वृक्षान्ददृशुः॥२४॥२५
२६॥आपीडैस्तवकशेखरैः लताभिश्चसंयुक्तान्पादपान्ददृशुः॥२७॥पद्मिनीःपद्मवनानि॥२८॥पद्मादियुतानलिनीसरांसिचददृशुः॥२९॥३०॥मुक्ताजालैर्युक्त

खचितजालेराजतानिहैमेमादि ददृशुस्थानीत्यस्यविशेषणानि॥३१॥

३२॥३३॥३४॥३५॥यानानिशिविकादीनि॥३६॥३७॥३८॥व्यवतिष्ठंततूष्णीमवस्थितावभूवुः॥३९॥पप्रच्छहनूमानिमर्थस्यैवमविशेषप्रतिपादनंत

ददृशुस्तत्रहरयोगृहमुख्यानिसर्वशः॥पुष्पितान्फलिनोवृक्षान्प्रवालमणिसन्निभान्॥३२॥कांचनभ्रमरांश्चैवमधूनि
चसमंततः॥मणिकांचनचित्राणिशयनान्यासनानिच॥३३॥विविधानिविशालानिददृशुस्तेसमंततः॥हैमराजतकां
स्यानांभाजनानांचराशयः॥३४॥अगरूणांचदिव्यानांचंदनानांचसंचयान्॥शुचीन्यभ्यवहार्याणिमूलानिचफ
लानिच॥३५॥महार्हाणिचयानानिमधूनिरसवंतिच॥दिव्यानामंवराणांचमहार्हाणांचसंचयान्॥३६॥कं
वलानांचचित्राणामजिनानांचसंचयान्॥तत्रतत्रविचिन्वंतोविलेतत्रमहाप्रभाः॥३७॥ददृशुर्वानराःशूराः
स्त्रियंकांचिददूरतः॥तांचतेददृशुस्तत्रचीरकृष्णाजिनांवरां॥३८॥तापसींनियताहारांज्वलंतीमिवतेजसा
विस्मिताहरयस्तत्रव्यवतिष्ठंतसर्वशः॥३९॥पप्रच्छहनुमांस्तत्रकासित्वंकस्यवाविलं॥३९॥ततोहनूमान्
गिरिसन्निकाशःकृतांजलिस्तामभिवाद्यवृद्धां॥पप्रच्छकात्वंभवनंविलंचरत्नानिचेमानिवदस्वकस्य॥४०॥
इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेपंचाशःसर्गः॥५०॥इत्युक्त्वाहनुमांस्तत्रचीरकृष्णाजिनांवरां॥अब्रवीत्तां
महाभागांतापसींधर्मचारिणीं॥१॥इदंप्रविष्टाःसहसाविलंतिमिरसंवृतं॥क्षुत्पिपासापरिश्रांताःपरिखिन्नाश्च

तोहनूमानिति॥४०॥अनघमानःइतिरामाभिरामेकिष्किं०पंचाशःसर्गः॥५०॥इत्युक्त्वाकात्वंभवनमित्यादिस्पष्टं॥१॥किमब्रवीत्तदाह इदमितिसहसाहठा

उक्तमेवार्थंप्रपंचयति महदिति भावान्पदार्थान् ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ कस्यतेजसासंभृता इति शेषः ॥ ७ ॥ आत्मनः ॥ तवेत्यर्थः ॥ कस्य वान्यस्य वेत्यर्थः ॥ ८ ॥ अजानतां एतत्स्वरूपमजानतां ॥ ९ ॥ १० ॥ मायया विचित्रनिर्माणशक्त्या कोमय इत्याशंक्य तन्नामप्रसिद्धिमाह ॥ पुरेति ॥ विश्वकर्मा शिल्पी ह प्रसिद्धं ॥ ११ ॥ येनेदं निर्मितं स दानवानां विश्व

महद्धरण्याविवरं प्रविष्टास्म पियासिताः ॥ इमांस्त्वेवंविधान्भावान्विविधानद्भुतोपमान् ॥ ३ ॥ दृष्ट्वा वयं प्रव्यथिताः संभ्रांता नष्टचेतसः ॥ कस्येमे कांचना वृक्षास्तरुणादित्यसन्निभाः ॥ ४ ॥ शुचीन्यभ्यवहार्याणि मूलानि च फलानि च ॥ कांचनानि विमानानि राजतानि गृहाणि च ॥ ५ ॥ तपनीयगवाक्षाणि मणिजालावृतानि च ॥ पुष्पिताः फलवंतश्च पुण्याः सुरभिगंधयः ॥ ६ ॥ इमे जांबूनदमयाः पादपाः कस्य तेजसा ॥ कांचनानि च पद्मानि जातानि विमले जले ॥ ७ ॥ कथं मत्स्याश्च सौवर्णा दृश्यंते सह कच्छपैः ॥ आत्मनस्त्वनुभावाद्वा कस्य वैतत्तपोबलं ॥ ८ ॥ अजानतां नः सर्वेषां सर्वमाख्यातुमर्हसि ॥ एवमुक्ता हनुमता तापसी धर्मचारिणी ॥ ९ ॥ प्रत्युवाच हनूमंतं सर्वभूतहिते रता ॥ मयो नाम महातेजा मायावी दानवर्षभ ॥ १० ॥ तेनेदं निर्मितं सर्वं मायया कांचनं वनं ॥ पुरा दानवमुख्यानां विश्वकर्मा बभूव ह ॥ ११ ॥ येनेदं कांचनं दिव्यं निर्मितं भवनोत्तमं ॥ स तु वर्षसहस्राणि तपस्तप्त्वा महद्वने ॥ १२ ॥ पितामहाद्वरं लेभे सर्वमौशनसं धनं ॥ विधाय सर्वं बलवान् सर्वकामेश्वरस्तदा ॥ १३ ॥

कर्मेत्यन्वयः निर्माणशक्तिबीजमाह स त्विति ॥ १२ ॥ वरं विचित्रसृष्टिसामर्थ्यरूपं अपि च सर्वमौशनसं धनं निर्माणसाधनपदार्थजातं निर्माणसाधनशिल्पशास्त्रज्ञानं च लेभे शिल्पशास्त्रस्योशनःप्रणीतत्वात्तद्धनत्वव्यपदेशः ॥ बलवान् उक्तरूपबलवान् सर्वकामेश्वरः स्वस्वेष्टभोग्यविशेषाणामीश्वरो भोक्ता ॥ १३ ॥

सुचिरितोऽत्रोवासहेमायांतदाखाप्सरसिसक्तं॥ १४ ॥ दानवपुंगवमशनिंगृह्यगृहीत्वाविक्रम्यैवबुद्धिंकृत्वैवपुरंदरोजघानयद्यप्यसुरशिल्पीमयोनित्यइतिकथंहन्
नंतस्यतथापियस्यवासुरशिल्पिपदस्थःसर्वोपिमयावध्यइतिब्रह्मवाहनिन्यतैवतस्येंद्रवदितिनदोषःतस्मिंश्चहतेइदंवनंशाश्वतःकामभोगइदंगृहंच। मय
भुक्तायैहेमायैत्यायद्वानात्वान्भगवताब्रह्मणादत्तमित्यर्थःएतेनविचित्रनिर्माणसामर्थ्यगुणयोगादत्रब्रह्मशब्दोमयदानवपरइत्यपास्तंहतेनदानास्

उवाससुचिरितःकालंकांचिदस्मिन्महावने॥ तमप्सरसिहेमायांसक्तंदानवपुंगवम्॥ ४ ॥ विक्रम्यैवाशनिंगृह्यज
घानेशःपुरंदरः॥ इदंचब्रह्मणादत्तंहेमायैवनमुत्तमं॥ १५ ॥ शाश्वताःकामभोगाश्चगृहंचेदंहिरण्मयं॥ दुहिता
मेरुसावर्णेरहंतस्याःस्वयंप्रभा॥ १६ ॥ इदंरक्षामिभवनंहेमायावानरोत्तम॥ ममप्रियसखीहेमानृत्तगीतवि
शारदा॥ ७ ॥ तयादत्तवराचास्मिरक्षामिभवनंमहत्॥ किंकार्यंकस्यवाहेतोःकान्ताराणिप्रपद्यथ॥ १८ ॥ कथं
चेदंवनंदुर्गंयुष्माभिरुपलक्षितं॥ शुचीन्यभ्यवहाराणिमूलानिचफलानिच॥ भुक्त्वापीत्वाचपानीयंसर्वंमे
वक्तुमर्हसि॥ १९ ॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेएकपंचाशःसर्गः॥ ५१ ॥ अथतानब्रवीत्सर्वान्विश्रां
तान्हरियूथपान्॥ इदंवचनमेकाग्रातापसीधर्मचारिणी॥ १ ॥

भवात्॥ १५ ॥ स्वयंप्रभेत्यन्वर्थंनामतस्याःतेनसूर्यावलोकाभावे
पिप्रकाशवत्वमुपपादितं। तस्याहेमायाःभवनमित्यन्वयः॥ १६ ॥ ननुत्वंकिमर्थंरक्षसितत्राहममप्रियसखीति॥ ७ ॥ दत्तवरारक्षणसामर्थ्यवान्॥ स
खित्वेनप्रार्थितरक्षणाच। एवंस्ववृत्तांतमुक्त्वाहनूमदादिवृत्तांतंपृच्छतिकिमिति॥ १८ ॥ अभ्यवहाराणिअभ्यवहार्याणि॥ १९ ॥ ब्रुवमानः। इतिरामाभिरामे॰

यदि चैतन्किं कार्यमित्यादि श्राकटस्थार्थनत्वं ॥२॥३॥ सर्वलोकराजत्वेन तस्येश्वरत्वं सूचितं ॥४॥ बलात् बलात्कारेण ॥५॥६॥ अंगदप्रमुखैर्वानरैः सह वयं प्रस्थापि
ताः ॥७॥ सहिता मिलिताः संतो रावणं सीतया सह मार्गध्वमिति वयं चोदिताश्च स्मः ॥८॥ तदा हविविचिन्वन्ति समुद्रं विचेतुकामा इति शेषः ॥९॥ नाधिगच्छामहे इति

वानरा यदि वः खेदः प्रनष्टः फलभक्षणात् ॥ यदि चैतन्मया श्राव्यं श्रोतुमिच्छामि तां कथां ॥२॥ तस्यास्तद्वचनं श्रुत्वा हनूमा
न्मारुतात्मजः ॥ आर्जवेन यथा तत्वमाख्यातुमुपचक्रमे ॥३॥ राजा सर्वस्य लोकस्य महेंद्रवरुणोपमः ॥ रामो दाशरथिः
श्रीमान्प्रविष्टो दंडकावनं ॥४॥ लक्ष्मणेन सह भ्रात्रा वैदेह्या सह भार्यया ॥ तस्य भार्या जनस्थाना द्रावणेन हृता बलात्
॥५॥ वीरस्तस्य सखा राज्ञः सुग्रीवो नाम वानरः ॥ राजा वानरमुख्यानां येन प्रस्थापिता वयं ॥६॥ अगस्त्यचरितामा
शां दक्षिणां यमरक्षितां ॥ सहैभिर्वानरैर्मुख्यैरंगदप्रमुखैर्वयं ॥७॥ रावणं सहिताः सर्वे राक्षसं कामरूपिणं ॥ सीत
या सह वैदेह्या मार्गध्वमिति चोदिताः ॥८॥ विचित्य तु वनं सर्वं समुद्रं दक्षिणां दिशं ॥ वयं बुभुक्षिताः सर्वे वृक्षमूल
मुपाश्रिताः ॥९॥ विवर्णवदनाः सर्वे सर्वे ध्यानपरायणाः ॥ नाधिगच्छामहे पारं मग्नाश्चिंतामहार्णवे ॥१०॥ चारयं
तस्ततश्चक्षुर्दृष्टवंतो महद्बिलं ॥ लतापादपसंपन्नं तिमिरेण समावृतं ॥ ११ ॥ अस्माद्धंसा जलक्लिन्नाः पक्षैः सलि
लरेणुभिः ॥ कुररा सारसाश्चैव निष्पतंति पतत्रिणः ॥१२॥ श्रीरामाय रामचन्द्राय नम ॥ छ ॥ रामरामरामरामराम

स्वयंप्रभासंबोधनं नाध्यगच्छाम ॥ पारं चिंतामहार्णवस्येति शेषः ॥१०॥११॥ सलिलं रेणुभिः सलिलपररेणुयुक्तपक्षैरुपलक्षिता इत्यर्थः निष्पतंति निष्पतिताः ॥१२॥ छ ॥

190

अनुमानं जलानुमापको हेतुः आगतं मनः प्राप्तं ॥ १३ ॥ अस्मिन्देशे ततो गच्छाम इत्युक्तानि विडांधकारत्वात् । परस्परं हस्तैर्गाढं दृढं गृहीत्वा निपतिताः गुहामिति शेषः हस्तैरि
ति पाठेपि हस्तैरित्येवार्थः ॥ परिष्वज्येति पूर्वोक्तस्वरसात् ॥ १४ ॥ एतत्सीतान्वेषणरूपं ॥ १५ ॥ यतो बुभुक्षिताः अतः परिद्यूनाः क्षीणाः ॥ १६ ॥ ७ ॥ किं नेऽकुर्वन्तुपि

साध्वत्र प्रविशामेति मयात्युक्ताः प्लवंगमाः ॥ तेषामपि हि सर्वेषामनुमानमुपागतं ॥ १३ ॥ अस्मिन्निपतिताः सर्वेप्यथ कार्यत्व
रान्विताः ॥ ततो गाढं निपतिता गृह्य हस्तैः परस्परं ॥ १४ ॥ इदं प्रविष्टाः सहसा बिलं तिमिरसंवृतं ॥ एतन्नः कार्यमेतेन कृत्येन
वयमागताः ॥ १५ ॥ त्वां चैवोपगताः सर्वे परिद्यूना बुभुक्षिताः ॥ आतिथ्यधर्मदत्तानि मूलानि च फलानि च ॥ १६ ॥ अस्मा
भिरुपयुक्तानि बुभुक्षापरिपीडितैः ॥ यत्त्वया रक्षिताः सर्वे म्रियमाणा बुभुक्षया ॥ ७ ॥ ब्रूहि प्रत्युपकारार्थं किं ते कुर्व
न्तु वानराः ॥ एवमुक्ता तु सर्वज्ञा वानरैस्तैः स्वयंप्रभा ॥ १८ ॥ प्रत्युवाच ततः सर्वानिदं वानरयूथपान् ॥ सर्वेषां परितुष्टा
स्मि वानराणां तरस्विनां ॥ चरन्त्या मम धर्मेण न कार्यमिह केनचित् ॥ १९ ॥ इत्यार्षे श्रीमद्रामायणे वा॰ किष्किंधाकांडे ॥
द्विपंचाशः सर्गः ॥ ५२ ॥ एवमुक्तः शुभं वाक्यं तापस्या धर्मसंहितं ॥ २० ॥ उवाच हनुमान्वाक्यं तामनिंदितलोचनां ॥ श
रणं त्वां प्रपन्नाः स्मः सर्वे वै धर्मचारिणि ॥ २१ ॥ यः कृतः समयोस्माकं सुग्रीवेण महात्मना ॥ स तु कालो व्यतिक्रान्तो बिले च

षमिति शेषः ॥ १८ ॥ परितुष्टास्मि प्रत्युपचिकीर्षावचनेनैवेति भावः । धर्मेण चरन्त्याः धर्मानुष्ठानेन वर्तमानायाः ॥ १९ ॥ अत्र कतकस्तु । द्विपंचाशः सर्गः
५२ ॥ ॥ एवमुक्त इति ॥ २० ॥ समयः कालावधिर्मासरूपः विले च विल एव ॥ २१ ॥ २२ ॥ श्रीरामाय रामचन्द्राय श्रीकृष्णाय वासुदेवाय नमः ॥ ६ ॥

तस्मादेतो रस्माद्बिलादस्मानित्यन्वयः॥ गतायुषोनष्टजीविताः॥ तत्र हेतुः सुग्रीववचनादतिक्रांतानिति॥ सुग्रीवाज्ञप्तकालादतिक्रांतकालानित्यर्थः॥ २३ ॥ २४॥
२५॥ प्रविष्टेन इदं विष्टं प्रविष्टेन प्राणिना जीवता अस्मान्निवर्त्तितुं दुष्करं मन्ये नहि वयं किंकर्मणत्राह॥ तपस इति॥ २६॥ २७ ॥ निमीलिताः संतोऽकस्मादुन्मी

सा त्वमस्माद्बिलादस्मात्तारयितुमर्हसि॥ तस्मात्सुग्रीववचनादतिक्रांतान्गतायुषः॥२३॥ त्रातुमर्हसि नः सर्वान्सुग्री
वभयशंकितान्॥ महच्च कार्यमस्माभिः कर्त्तव्यं धर्मचारिणि॥ २४॥ तच्चापि न कृतं कार्यमस्माभिरिह वासिभिः॥ एवमु
क्ता हनुमता तापसी वाक्यमब्रवीत्॥२५॥ जीवता दुष्करं मन्ये प्रविष्टेन निवर्त्तितुं॥ तपसः सुप्रभावेण नियमोपा
र्जितेन च॥२६॥ सर्वानेव बिलादस्मात्तारयिष्यामि वानरान्॥ निमीलयत चक्षूंषि सर्वे वानरपुंगवाः॥२७॥ नहि नि
ष्क्रमितुं शक्यमनिमीलितलोचनैः॥ ततो निमीलिताः सर्वे सुकुमारांगुलैः करैः॥२८॥ सहसा पिदधुर्दृष्टिं हृष्टा ग
मनकांक्षया॥ वानरास्तु महात्मानो हस्तरुद्धमुखास्तदा॥२९॥ निमेषांतरमात्रेण बिलादुत्तारितास्तया॥ उवा
च सर्वांस्तांस्तत्र तापसी धर्मचारिणी॥ ३०॥ निःसृतान्विषमात्तस्मात्समाश्वास्येदमब्रवीत्॥ एष विंध्यो गिरिः श्री
मान्नानाद्रुमलतायुतः॥३१॥ एष प्रस्रवणः शैलः सागरोयं महोदधिः॥ स्वस्ति वोस्तु गमिष्यामि भवनं वानरर्षभाः॥३२॥
इत्युक्त्वा तद्बिलं श्रीमत्प्रविवेश स्वयंप्रभा॥३२॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे द्विपंचाशः सर्गः॥५२॥

(लनभियासुकुमारांगुलैः
करैः॥२८॥ सहसा दृष्टिंपिदधुः॥२९॥३०॥ इदमब्रवीत्हिश्रोहशांसर्थमितिभावः॥ ३१॥ प्रस्रवणः किष्किंधासमीपप्रस्रवणादन्यो पभिन्नः ऋ: त्र्यमुच्चवात्तोपितस्यद

शंतमिमन्यं पत्र छायातत्र गत व्यामंततनाम्यर्थः॥३३॥ स्वगमानः॥ इतिरामा०
किष्कि० टि० द्विपंचाशः सर्गः॥ कतकरीत्या त्रिपंचाशः सर्गः

191

ततइतिगिरिदुर्गंऋक्षबिलाख्यंसमयःकालावधिः ॥२॥ नद्धाशिशिरारंभसमये ॥३॥ पुष्पातिभारसंक्रान्यग्राणियेषांवासंतिकान्वसंतकालेफलवतः । आम्रादी-
न् ॥४॥ भयकृतशंकाविहृगोति । तेइति वसंतमनुप्राप्तं । प्रकृतशिशिरकालस्यांतरकालमासत्रतयाप्राप्तप्रायंनष्टःसंदेशकालेराजसंदिष्टमासत-

ततस्तेददृशुर्घोरंसागरंवरुणालयं ॥ अपारमभिगर्जंतंघोरैरूर्मिभिराकुलं ॥१॥ मयस्यमायाविहितंगिरिदुर्गंविचिन्व-
तां ॥ तेषांमासोव्यतिक्रांतोयोराज्ञासमयःकृतः ॥२॥ विंध्यस्यतुगिरेःपादेसंप्रपुष्पितपादपे ॥ उपविश्यमहात्मानश्चिं-
तामापेदिरेतदा ॥३॥ ततःपुष्पातिभाराग्रान्लताशतसमावृतान् ॥ द्रुमान्वासंतिकान्दृष्ट्वाबभूवुर्भयशंकिताः ॥४॥
तेवसंतमनुप्राप्तंप्रतिवेद्यपरस्परं ॥ नष्टसंदेशकालार्थानिपेतुर्धरणीतले ॥५॥ ततस्तान्कपिवृद्धांश्चशिष्टांश्चै-
ववनौकसः । वाचामधुरयाभाष्ययथावदनुमान्यच ॥६॥ सतुसिंहवृषस्कंधःपीनायतभुजःकपिः ॥ युवराजो
महाप्राज्ञअंगदोवाक्यमब्रवीत् ॥७॥ शासनात्कपिराजस्यवयंसर्वेविनिर्गताः ॥ मासःपूर्णोबिलस्थानांहरयः
किन्नबुध्यत ॥८॥ ❀ ॥ श्रीरामायरामचंद्रायश्रीकृष्णायवासुदेवायनमः ॥ ❀ ॥ ८ ॥ ❀ ॥ ॥

येकालेऽनुष्ठानेयेपार्थोयेषांते ॥५॥ तानभयेनभूतलेपतितान्शिष्टान्वृद्धेभ्योऽन्यान् ॥ अनुमान्यसंपूज्य ॥६॥ प्राज्ञअंगदइत्यार्षं ॥७॥ शास
नाव्यतिक्रमंदर्शयति ॥ मासइति ॥ अन्वेषणावधित्वेनदत्तइत्यर्थः किन्नबुध्यतनावबुध्यत । कालात्ययमितिशेषः ॥८॥ रामरामरामरामरामरामः

॥रा॰वा॰कि॰॥
॥११५॥

कालात्ययमेवाह। वयमिति॥ आश्वयुजे ऽतीते प्राप्ते इति शेषः कार्त्तिके समनुप्राप्ते त्वं रावणवधे यतेत्युक्तेः ततः पंचदशरात्रकालसंख्यया प्रवर्तितहतै
र्व्यवस्थिताः मिलिताः एवं चामीतमानेनाश्विनाश्विनस्योत्तरे दीपोत्सवामायुते सर्वसेनागमनं किष्किंधायां। रामस्य क्रोधस्तु तत्रैव पक्षे कार्त्तिकसन्नि
धावपि तदुद्यमाभावकृतः। ततः कार्त्तिके वधिरन्वेषणस्य॥ ततो मार्गभुक्ते इदं वचनं॥ आयस्तद्वर्षे पौषः क्षयमासः कार्त्तिकादित्रयेणान्यत
इत्युक्तेः॥ अतो मार्गभुक्त एव आम्रादीनां पुष्प्योद्गमः॥ उत्पाततो वा॥ तादृशरीत्या पुष्प्योद्गमं दृष्ट्वापि वसंतासन्नतानुमानेन तद्भयोपपत्तिः कत
कादयस्तु॥ अन्वेषणावधित्वेन दत्तः पौषो मासः॥ आश्वयुजे इत्यस्य तत्त्वेन्यासत्व कार्त्तिकांते इत्यर्थः कालसंख्येति॥ कार्त्तिकोत्तरं पंचदशरात्रसं

वयमाश्वयुजे मासि कालसंख्याव्यवस्थिताः॥ प्रस्थिताः सोपि चातीतः किमतः कार्यमुत्तरं॥९॥ भवंतः प्रत्ययं प्राप्ता नीतिमार्ग
विशारदाः॥ हितेष्वभिरता भर्तुर्निसृष्टाः सर्वकर्मसु॥१०॥ कर्मस्व प्रतिमाः सर्वे दिक्षु विश्रुतपौरुषाः॥ मां पुरस्कृत्य नि
र्याताः पिंगाक्षप्रतिचोदिताः॥११॥

ख्याकालेनावधिना वानरानयनाय हस्तप्रेषणं॥ ततः पूर्णिमांतमानेन मार्गभुक्तेन सर्ववानरागमनं ततः पौषशु
दिने दिक्ष्वन्वेषणाय वानरप्रस्थानं॥ तत्र पौषमाघफाल्गुनीयकिंचिद्दिनसहिते ऽतीते इदं वाक्यमित्याहुः। तेषां सीतानयनोत्तरं सीतां प्रति द्वादशमासारा
वणावधिरिति स्पष्टमेव। पंपायां चैत्रे आगमनमित्यस्योक्तत्वात् ततः पूर्वफाल्गुने सीतापहार इति च स्पष्टमेव एवं च माघकृष्णे तत्तुल्यादौ वा ऽह हनूम
तः सीतासमीपगमने हनूमंतं प्रति वर्तते दशमो मासो द्वौ तु शेषौ प्लवंगमेति सीतोक्तिविरोधः॥ किंच हनूमतो लंकाप्रवेशदिने प्रदोषसमये एव पूर्ण
कल्पचंद्रोदयवर्णनाविरोध इत्याहुः॥९॥ उक्तमेवाविस्तरेणाह॥ भवंत इति॥ प्रत्ययं अन्वेषणार्थं राजनियोगं प्राप्ताः ज्ञातवंतो भवंतः॥ मां पुरस्कृत्यः
निर्याता इत्यन्वयः॥१०॥ ११॥ श्रीरामाय रामचंद्राय नमः॥ ॐ॥ श्रीकृष्णाय वासुदेवाय नमः॥ ॐ॥ रामरामरामरामरामः॥ ॐ॥

192

॥राम॰॥
॥११५॥

तस्यकालस्यचविलेगतत्वात् । इदानीमकृतार्थानामस्माकंमर्त्तव्यंमरणमेवानुष्ठेयं । अतस्तत्राह । हरिराजस्ये ॥१२॥ प्रायोपवेशनंयुक्तंप्राणत्यागायेति
शेषः ॥१३॥ स्वामिभावेनिग्रहानुग्रहकृद्राजभावे । व्यवस्थितः अपराधःकालातिक्रमरूपःगतान्स्वसमीपंप्राप्तान् ॥१४॥ अप्रवृत्तौप्रवृत्तिप्रति
पादनाभावेपापंवधरूपं ॥१५॥ पुत्रादित्यक्त्वाप्रायोपवेशनंगन्तुंकर्तुंक्षमंयुक्तमित्यन्वयः । तत्रहेतुःध्रुवमिति ॥१६॥ अप्रतिरूपेण अपराधमूल

इदानीमकृतार्थानांमर्त्तव्यंनात्रसंशयः । हरिराजस्यसंदेशमकृत्वाकःसुखीभवेत् ॥१२॥ अस्मिन्नतीतेकालेतुसुग्रीवेण
कृतेस्वयं । प्रायोपवेशनंयुक्तंसर्वेषांचवनौकसां ॥१३॥ तीक्ष्णःप्रकृत्यासुग्रीवःस्वामिभावव्यवस्थितः । नक्षमिष्यतिनःस
र्वानपराधकृतोगतान् ॥१४॥ अप्रवृत्तौचसीतायाःपापमेवकरिष्यति । तस्मात्क्षममिहाद्यैवगन्तुंप्रायोपवेशनं ॥१५॥
त्यक्त्वापुत्रांश्चदारांश्चधनानिचगृहाणिच । ध्रुवंनोहिंसतेराजासर्वान्प्रतिगतानितः ॥१६॥ वधेनाप्रतिरूपेणश्रेया
न्मृत्युरिहैवनः ॥ नचाहंयौवराज्येनसुग्रीवेणाभिषेचितः ॥१७॥ नरेन्द्रेणाभिषिक्तोस्मिरामेणाक्लिष्टकर्मणा । सपूर्वं
बद्धवैरोमांराजादृष्ट्वाव्यतिक्रमं ॥१८॥ घातयिष्यतिदंडेनतीक्ष्णेनकृतनिश्चयः । किंमेसुहृद्भिर्व्यसनंपश्यद्भिर्जीवितां
तरे ॥१९॥ इहैवप्रायमासिष्येपुण्येसागररोधसि ॥१९॥ एतच्छ्रुत्वाकुमारेणयुवराजेनभाषितं सर्वेतेवानरश्रेष्ठाः करुणंवाक्यमब्रुवन् ॥२०॥

त्वेनास्यवधस्याप्रतिरूपत्वं । ननुयुवराजत्वेनाभिषिच्यकथमसौत्वांहनिष्यतीत्यतआह । नचाहमिति ॥१७॥ पूर्वंमांप्रतिबद्धवैरःसराजासुग्रीवोव्यतिक्र
ममाज्ञालंघनंदृष्ट्वाघातयिष्यत्येव ॥१८॥ जीवितान्तरेराजाज्ञयाजीवितनाशावधौकालेप्राप्तेममव्यसनंपश्यद्भिरपिसुहृद्भिः किंकार्यमितिकिंसाध्यमित्यर्थकंशेषः यदेवमतइहैवेति ॥१९॥२०॥

प्रियायांरक्तोऽनुरक्तः तस्मिन्समये ऽन्वेषणायवधिकाले ॥२१॥२२॥ अपराद्धानांकृतापराधानांस्वामिपार्श्वतःस्वामिपार्श्वे ॥ सुग्रीवस्यप्रधानभूताःसेवकावयमिहसमा
गताः ॥२३॥ उपलभ्यवागच्छाम ॥ नोचेदिहैवस्थित्वायमसद्मगमिष्यामः ॥२४॥ विलंस्वयंप्रभाविलं ॥ २५ ॥ कथमत्रप्राणत्राणमतआह ॥ इदंहीतिनोऽस्मिँल्लो

तीक्ष्णप्रक्रमात्सुग्रीवः ॥ प्रियारक्तश्चराघवः ॥ समीक्ष्याकृतकार्यांस्तुतस्मिंश्चसमयेगते ॥ २१ ॥ अदृष्टायांचवैदेह्यांदृष्ट्वा
चैवसमागतान् ॥ राघवप्रियकामायघातयिष्यत्यसंशयं ॥ २२ ॥ नक्षमंचापराद्धानांगमनंस्वामिपार्श्वतः ॥ प्रधान
भूताश्चवयंसुग्रीवस्यसमागताः ॥२३॥ इहैवसीतामन्वीक्ष्यप्रवृत्तिमुपलभ्यवा ॥ नोचेद्गच्छामतंवीरंगमिष्यामो
यमक्षयम् ॥२४॥ प्लवंगमानांतुभयार्दितानांश्रुत्वावचस्तारइदंवभाषे ॥ अलंविषादेनविलंप्रविश्यवसा
मसर्वेयदिरोचतेवः ॥२५॥ इदंहिमायाविहितंसुदुर्गमंप्रभूतपुष्पोदकभोज्यपेयं ॥ इहास्तिनोनैवभयंपुरं
दरान्नराघवाद्वानरराजतोपिवा ॥२६॥ श्रुत्वांगदस्यापिवचोऽनुकूलमूचुश्चसर्वेहरयःप्रतीताः ॥ यथानहन्ये
मतथाविधानमसक्तमद्यैवविधीयतांनः ॥२७॥ इत्यार्षेश्रीमद्रामायणेवा॰ किष्किंधाकांडेत्रिपंचाशःसर्गः ॥५३॥
तथाब्रुवतितारेतुताराधिपतिवर्चसि ॥ अथमेनेहृतंराज्यंहनूमानंगदेनतत् ॥१॥

कोक्तौ ॥२६॥ अंगदस्यापिअपितारस्यच
सक्तमविलंबं ॥२७॥ कतकरीत्याचतुःपंचासत् ॥ इतिरामाभिरामेश्रीरा॰ किष्किंधाकांडेत्रिपंचाशःसर्गः ॥५२॥ ताराधिपतिवर्चसितारेतथाब्रुवतितुशब्दादंग
देप्रतिषेधाकरणात्तदनुमन्यमानेसति ॥ अथानंतरमंगदेनराज्यंसुग्रीवीयंकपिराज्यंहृतमितिमेने ॥ तद्राज्यंस्वयंप्रभाविलराज्यमित्यर्थइत्यन्ये ॥ १ ॥ ६ ॥

नतु अंगदे कथं राज्यापहारचिंताऽत आह बुध्येति अष्टांगया अष्टगुणयानेत्र गुणाः शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा ॥ ऊहापोहार्थविज्ञानं तत्वज्ञानं च धीगुणा इ
तिप्रसिद्धाः ॥ चतुर्बलं सामदानभेदनिग्रहरूपोपायचतुष्टयजं चतुर्दशगुणाः ॥ देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानता दाक्ष्यमूर्जः संवृतमंत्रता
अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता शरणागतवात्सल्यममर्षित्वमचापलं इत्युक्तचतुर्दशगुणायुक्तं ॥ २ ॥ ३ ॥ तारस्य वचः शुश्रूषमाणं यतोपश्यन्तारा
ज्यं हृतं मेने शुक्रस्य च पुरंदरं ॥ विपरीतोपदेशाग्रहे उपमैषा ॥ शुक्रशिष्योऽत्र बृहस्पतिपर इति कश्चित् ॥ ४ ॥ भर्तुः सुग्रीवस्यार्थेऽर्थकरणे परिश्रांतं विक्लवं सर्व

बुध्याह्यष्टांगयायुक्तं चतुर्बलसमन्वितं ॥ चतुर्दशगुणां मेने हनूमान्वालिनः सुतं ॥ २ ॥ आपूर्यमाणं शश्वच्च तेजोबलप
राक्रमैः ॥ शशिनं शुक्लपक्षादौ वर्धमानमिव श्रिया ॥ ३ ॥ बृहस्पतिसमं बुध्या विक्रमे सदृशं पितुः ॥ शुश्रूषमाणं ता
रस्य शुक्रस्येव पुरंदरं ॥ ४ ॥ भर्तुरर्थे परिश्रांतं सर्वशास्त्रविशारदः ॥ अभिसंधातुमारेभे हनूमानंगदं ततः ॥ ५ ॥ स च
तुर्णामुपायानां द्वितीयमुपवर्णयन् ॥ भेदयामास तान्सर्वान्वानरान्वाक्यसंपदा ॥ ६ ॥ तेषु सर्वेषु भिन्नेषु ततोऽभी
षयदंगदं ॥ भीषणैर्विविधैर्वाक्यैः कोपोपायसमन्वितैः ॥ ७ ॥ ५४ ॥ श्रीरामाय सचराचरनतमस्तुते ॥ ६ ॥

शास्त्रविशारद इति हनुमद्विशेषणं ॥ अभिसंधातुं तारादिभ्यो भेदयितुं ॥ ५ ॥ स इति अभिसंधितुर्हनुमानित्यर्थः द्वितीय उपायः भेदः तमुपवर्णयन् हेतौ शता ॥ तदुपा
यावलंबनहेतुना ॥ तान्सर्वान् अंगदानुवर्तिनः ॥ वाक्यसंपदा भेदजननक्षमन्यायोपेतेन हीनाश्रयो न कर्तव्यः कर्तव्यो महदाश्रय इत्यादिवाक्यसमूहेन ॥ ६ ॥
कोपोपायो दंडस्तत्समन्वितैः कोपोपायसमन्वितैरिति यांक्रः पाठः कोपायनयनसामर्थ्ययुक्तैः अभीषयत् न्यायप्रदर्शनपूर्वं भयमुत्पादयामास ॥ ७ ॥

मेघरामेवस्तुतिपूर्वंकरोति॥त्वमिति।त्वंपित्रासुग्रीवेणाप्युद्धेसमर्थतरः यतस्त्वंपित्रासदृशइतिशेषः अतएवयुद्धेसमर्थतरइत्यर्थः दृढंधारयितुंशक्तः अस्ययदिस
वैकपथस्त्वामनुवर्त्स्यतीतिशेषः कपिराज्यंकिष्किंधायांवा।ऋक्षबिलेवा॥८॥नचनदस्तीत्याहनित्यमितिस्वभावादितिभावः।अस्थैर्यकारणांतरमप्याह।
पुत्रदारंविनेति॥पुत्रदाराणांकिष्किंधावर्तिनांसुग्रीवायत्तत्वात्।त्वयासहबिलेवस्थाने॥नहियोगस्यस्पष्टत्वात्॥निष्ठत्वस्थापनमप्यशक्यमित्याह।त्व
याज्ञाप्यंत्वत्कर्तृकमाज्ञापनंनसहिष्यंति॥त्वत्तोप्यधिकबलत्वादितिभावः॥९॥पुत्रदारंहित्वाएतेत्वांनानुरंजेयुः।त्वयिनानुरक्ताभवेयुःउक्तमर्थंस्प

त्वंसमर्थतरःपित्रायुद्धेतारेयवैध्रुवं॥दृढंधारयितुंशक्तःकपिराज्यंयथापिता॥८॥नित्यमस्थिरचित्ताहिकपयोहरि
पुंगव॥नाज्ञाप्यंविषहिष्यंतिपुत्रदारंविनात्वया॥९॥त्वांनैतेह्यनुरंजेयुःप्रत्यक्षंप्रवदामिते॥यथायंजाम्बवान्नीलःसु
होत्रश्चमहाकपिः॥१०॥नह्यहंतेइमेसर्वेसामदानादिभिर्गुणैः।दंडेननत्वयाशक्याःसुग्रीवादपकर्षितुं॥११॥विगृ
ह्यासनमप्याहुर्दुर्बलेनबलीयसा॥आत्मरक्षाकरस्तस्मान्नविगृह्णीतदुर्बलः॥१२॥यांचेमांमन्यसेधात्रीमेतद्बिल
मितिश्रुतं।एतल्लक्ष्मणबाणानामीषत्कार्यंविदारणे॥१३॥

ष्टंयथाभवतितथाप्रवदामि।प्रदर्शयामि।तदेवदर्शयतिअयंजांबवानिति॥१०॥
अहमितिस्वनिर्देशःतेइमेसर्वेसामदानादिभिर्गुणैरुपायैस्त्वयासुग्रीवादपकर्षितुंशक्यानहिनापिदंडेन॥११॥ननुगच्छतस्स्वयमपिएकेनैवमयास्थेयमतआह
विगृह्येति॥दुर्बलेनसहविगृह्यबलीयसाआसनंस्थितिःशक्येत्याहुःननुदुर्बलस्यबलीयसाविगृह्यासनंशक्यंतस्मात्आत्मरक्षाकरःआत्मरक्षाकरणोद्युः
पुरुषःदुर्बलःसन्बलीयसानविगृह्णीत॥१२॥नन्वेषागुहानबलवतःसाध्येत्याशंक्याहयामिति।यामिमांगुहांधात्रींरक्षिकांमन्यसेतेयंरक्षिकेतिशेषःअत
स्तत्राहयदेतद्बिलंऋक्षबिलंनिर्भयमितिताराकुलंएतत्॥एतद्विषयविदारणेलक्ष्मणबाणानामीषत्कार्यंईषत्करंस्वल्पभावश्चार्थः॥१३॥ छ ॥

॥राम·॥
॥११७॥

194

पुरा पूर्वं मयपराक्रमतलांतर्निर्मितेन तमसुरं वर्णिमयपवधार्थं अशनिं तत्प्रदेशं अविक्षिपता इंद्रेण स्वल्पमेव कृतमयवधमात्रं कृतं तत्तुपुरं भग्नं ॥ लक्ष्मणस्तु निशितैर्बाणै रे
तत्पुरमपि पत्रपुटमिव अभिंद्यात् ॥१४॥ कृतमसत्त्राह लक्ष्मणस्येति तद्विधा इन्यस्मविवरणं वज्राशनीत्यादि वज्रमिंद्रकरस्थं अशनिर्मेघस्थः यद्वा तद्विधाः
वालिहंतृबाणसदृशाः ॥१५॥ यदेवात्र विलंबमवस्थानमासिष्यसि प्राप्स्यसि तेन दैवसर्वे हरयः कृतनिश्चयाः त्वां त्यक्ष्यंति ॥१६॥ नित्योद्विग्नाः रामल

स्वल्पं हि कृतमिंद्रेण क्षिपता ह्यशनिं पुरा ॥ लक्ष्मणेन निशितैर्बाणैर्भिंद्यात् पत्रपुटं यथा ॥१४॥ लक्ष्मणस्य च नाराचा बा
हवः संति तद्विधाः वज्राशनिसमस्पर्शा गिरीणामपि दारकाः ॥१५॥ अवस्थानं यदैव त्वमासिष्यसि परंतप ॥ तदै
व हरयः सर्वे त्यक्ष्यंति कृतनिश्चयाः ॥१६॥ स्मरंतः पुत्रदाराणां नित्योद्विग्ना बुभुक्षिताः ॥ खेदिता दुःखशय्याभिस्त्वां क
रिष्यंति पृष्ठतः ॥१७॥ सत्वं हीनः सुहृद्भिश्च हितकामैश्च बंधुभिः ॥ तृणादपि भृशोद्विग्नः स्पंदमानाद्भविष्यसि ॥१८॥
अनुग्रवेगा निशिता घोरा लक्ष्मणसायकाः अपावृतं जिघांसंतो महावेगा दुरासदाः ॥१९॥ अस्माभिस्तु गतं सार्धं वि
नीतवदुपस्थितं आनुपूर्व्यात्तु सुग्रीवो राज्ये त्वां स्थापयिष्यति ॥२०॥

लक्ष्मणसुग्रीवेभ्यः बुभुक्षिताः पुत्रदारादिजसुखभोगच्युताः त्वया दुःख
शय्याभिर्दुःखस्थितमादिभिः खेदिताः संतस्त्वां पृष्ठतः करिष्यंति सर्वथा त्यक्ष्यंत्येवेत्यर्थः ॥१७॥ स्पंदमानात्तृणादपि लघुरिति शेषः ॥ अतएव भृशोद्विग्नो भविष्य
सि यद्वा तादृशात्तृणात्तदृक्षाद्भृशोद्विग्नो रामागमनशंकयेति भावः ॥१८॥ अतोऽनुग्रवेगा निशिता घोरा लक्ष्मणसायकाः अपावृतं गुप्तिरहितं त्वां जिघां
संतो भवेयुः सर्वत्रात्र लक्ष्मणनामग्रहणं तस्य क्रूरस्वभावत्वात् ॥ ईदृशा नाराचाः लक्ष्यत्वाच्च ॥१९॥ एवं वालिवधभयं प्रदर्श्य सुग्रीवसमाश्रयणमेव हि
तमिनाह ॥ अस्माभिरिति आनुपूर्व्यात् ज्येष्ठपुत्रत्वप्रयुक्तात् क्रमात् ॥ २० ॥ श्रीरामाय रामचंद्राय नमः ॥ ॥ श्रीकृष्णाय वासुदेवाय नमः ॥ ॥

राज्येऽवस्थाने हेतुमाह ॥ धर्मराज इति धर्ममार्गवर्ती राजा तथा प्रीतिकामस्त्वयि न तु त्वद्वधकामः ॥ २१ ॥ इतश्च सर्वथैव मैवेत्याह प्रियकाम इति अस्य जीवितं तदर्थं त्वन्मातुः प्रीति
संपादनप्रयोजनं गम्यतां अस्माभिः सार्धमिति शेषः ॥ २२ ॥ अखरमणः कनकस्तु पंचपंचाश ॥ ५५ ॥ इति रामाभिरामे श्रीरामीये रा॰ किष्किंधाकांडे चतुःपंचाशः सर्गः
प्रश्रितं विनीतं स्वामिसत्कारयुक्तं सुग्रीवसन्मानयुक्तमिति हनुमद्वाक्यविशेषणं ॥ १ ॥ आत्ममनसोः शौचं कामादिदोषराहित्यं ॥ २ ॥ तदनुपपत्तिमेव दर्शयति भ्रा

धर्मराजः पितृव्यस्ते प्रीतिकामो दृढव्रतः ॥ शुचिः सत्यप्रतिज्ञश्च स त्वां जातु न नाशयेत् ॥ २१ ॥ प्रियकामश्च ते मातुस्तदर्थं
चास्य जीवितं ॥ तस्यापत्यं च नास्त्यन्यत्तस्मादंगद गम्यतां ॥ २२ ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे चतुःपंचाशः स
र्गः ॥ ५४ ॥ श्रुत्वा हनूमतो वाक्यं प्रश्रितं धर्मसंहितं ॥ स्वामिसत्कारसंयुक्तमंगदो वाक्यमब्रवीत् ॥ १ ॥ स्थैर्यमात्मम
नःशौचमानृशंस्यमथार्जवं ॥ विक्रमश्चैव धैर्यं च सुग्रीवे नोपपद्यते ॥ २ ॥ भ्रातुर्ज्येष्ठस्य यो भार्यां जीवतो महिषीं
प्रियां ॥ धर्मेण मातरं यस्तु स्वीकरोति जुगुप्सितः ॥ ३ ॥ कथं स धर्मं जानीते येन भ्रात्रा दुरात्मना ॥ युद्धायाभिनियु
क्तेन बिलस्य पिहितं मुखं ॥ ४ ॥ सत्यात्पाणिगृहीतश्च कृतकर्मा महायशाः ॥ विस्मृतो राघवो येन स कस्य सुकृतं

तुरिति ज्येष्ठस्य भ्रातुर्भार्यायां धर्मेण मातरं ॥ धर्ममार्गेणावर्तनात् ज्येष्ठभ्रातृपत्नीनां मातृतुल्यां जीवतो मम समक्षं अनेन देवराच्च सुतोत्पत्तिमित्यतोऽपि धर्मत्वं वारितं य
द्वा जीवतो महिषीमिति महिषीपदं कालिकस्वीकारपरं यः स्वीकरोति कथं स धर्मं जानीते इत्यन्वयः एतेन हनूमदुक्तधर्मराजत्वं प्रत्याख्यातं एतद्वचोंगदस्य केवलरोषमू
लं त्रैवर्णिकातिरिक्तधर्मास्मरणमूलकं ॥ ३ ॥ स उक्तजुगुप्सितकर्मकारी धर्मज्ञाने उपपन्नतरमित्याह युद्धायेति युद्धार्थं गच्छता भ्रात्राभिनियुक्तेन बिलरक्षणनियुक्ते
नेत्यर्थः ॥ ४ ॥ सत्यादग्निसाक्षिकतया पाणिगृहीतो मित्रः कृतो राघवो येन विस्मृतः स कस्य सुकृतमुपकारं स्मरेत् । न कस्यापीत्यतः कथं कृतज्ञ इत्यर्थः ५

195

॥ राम॰ ॥
॥ ११८ ॥

ननुतत्कार्यंप्रवृत्तत्वात्कथंनकृतज्ञोऽसित्त्राहलक्ष्मणस्येतिभयोपाधिकेषाप्रवृत्तिर्नधर्ममूलेतिभावः।धर्ममस्मिन्नितिपाठेधर्मंधर्मधीमूलंप्रवर्त्तनमित्यर्थः॥६॥स्व
तिभिन्नेस्मृतिर्मत्वादीनांभिन्नात्मकायेनचलात्मनि।चंचलात्मनःकरणेनतत्कुलीनःसत्त्वानिकोऽपिप्रविष्टः॥७॥नदेवविह्वलणोनिराज्येइतिसुग्रीवःसगुणोनिर्गुणो
वास्तुनमेनविचारेणाकिंचित्॥अपितुशत्रुकुलीनंमांउत्तरांराज्येप्रतिष्ठाप्यकथंसुग्रीवोजीवयिष्यतिनकथमपीत्यर्थः॥८॥इतोपिनजीवयिष्यतीत्याह॥

लक्ष्मणस्यभयेनेहनाधर्मभयभीरुणा॥आदिष्टामार्गितुंसीतांधर्मस्तस्मिन्कथंभवेत्॥६॥तस्मिन्पापेकृतघ्नेतुस्मृतिभि
न्नेचलात्मनि॥आर्यःकोविश्वसेज्जातुतत्कुलीनोविशेषतः॥७॥राज्येपुत्रंप्रतिष्ठाप्यसगुणोविगुणोपिवा॥कथंशत्रु
कुलीनंमांसुग्रीवोजीवयिष्यति॥८॥भिन्नमंत्रोपराद्धश्चभिन्नशक्तिःकथंह्यहं॥किष्किंधांप्राप्यजीवेयंअनाथइव
दुर्बलः॥९॥उपांशुदंडेनहिमांबंधनेनोपपादयेत्॥शठःक्रूरोनृशंसश्चसुग्रीवोराज्यकारणात्॥१०॥बंधनाद्वाव
सादान्मेश्रेयःप्रायोपवेशनं॥अनुजानंतुमांसर्वेगृहंगच्छंतुवानराः॥११॥अहंवःप्रतिजानामिनगमिष्याम्यहंपुरीं॥
इहैवप्रायमासिष्येश्रेयोमरणमेवमे॥१२॥अभिवादनपूर्वंतुराजाकुशलमेवच॥अभिवादनपूर्वंतुराघवौबलशा

भिन्नेतिभिन्नोबिलप्रवेशरूपोमंत्रोयस्यसः॥एवंमंत्रस्ययस्यकस्यापिमुखात्श्रवणेऽवश्यंभाविनिस्पष्टमपराद्धश्चभवामिहीनशक्तिःसुग्रीवापेक्षयाहीनबलः
हनुमदुक्तरीत्यासहायबलहीनश्च॥९॥उपांशुदंडस्यैवरूपंबंधनेनेति॥पुत्रइतिकृत्वावधाभावःअपराद्धइतिचबंधननिश्चयः॥१०॥नहेवद्दृढयन्नाह॥बंध
नादितिअवसादोबंधनजंदुःखं॥११॥१२॥राज्ञासुग्रीवःकुशलमेववाच्यइत्यनुकर्षःनत्विदानींदुःखवशादुक्तमित्यर्थः॥राघवौकुशलंवाच्यौ॥१३॥

अथमातुःकुशलविज्ञापनाशेषमन्याश्चारोग्यपूर्वकत्वविशेषाभिधित्सया च पुनः सुग्रीवे कुशलविज्ञापनमाह । वाच्यस्तात इति ॥ १५ ॥ ब्रुवान्जांबवदादीन् ॥ १६ ॥ १७ ॥
सुग्रीवं निंदंतः अंगदं पश्या इति शेषः ॥ १८ ॥ अवसन् व्यवास्यन्नित्यर्थः ॥ १९ ॥ २० ॥ हरिश्रेष्ठा अपि एतत् प्रायोपवेशनमेवास्माकमद्य क्षमं । युक्तमिति मन्यंते स्मेति शे

वाच्यस्तातो यवीयान्मे सुग्रीवो वानरेश्वरः ॥ आरोग्यपूर्वं कुशलं वाच्या माता रुमा च मे ॥ १४ ॥ मातरं चैव मे तात समाश्वास
यितुमर्हथ ॥ प्रकृत्या प्रियपुत्रा सा सानुक्रोशा तपस्विनी ॥ १५ ॥ विनष्टमिह मां श्रुत्वा व्यक्तं हास्यति जीवितं ॥ एतावदु
क्त्वा वचनं वृद्धांस्तानभिवाद्य च ॥ १६ ॥ विवेश चांगदो भूमौ रुदन् दर्भेषु दुर्मुखः ॥ तस्य संविशतस्तत्र रुदंतो वानर
र्षभाः ॥ १७ ॥ नयनेभ्यः प्रमुमुचुरुष्णं वै वारि दुःखिताः ॥ सुग्रीवं चैव निंदंतः प्रशशंसंतवालिनं ॥ १८ ॥ परिवार्यां
गदं सर्वे व्यवसन्प्रायमासितुं ॥ तद्वाक्यं वालिपुत्रस्य विज्ञाय प्लवगर्षभाः ॥ १९ ॥ उपस्पृश्योदकं सर्वे प्राङ्मुखाः समुपावि
शन् ॥ दक्षिणाग्रेषु दर्भेषु उदक्तीरं समाश्रिताः ॥ २० ॥ मुमूर्षवो हरिश्रेष्ठा एतत्क्षममिति स्म ह ॥ रामस्य वनवासं
वक्षयं दशरथस्य च ॥ २१ ॥ जनस्थानवधं चैव वधं चैव जटायुषः ॥ हरणं चैव वैदेह्या वालिनश्च वधं तथा ॥ २२ ॥
समं विशद्भिर्बहुभिर्महीधरो महाद्रिकूटप्रतिमैः प्लवंगमैः ॥ बभूव सन्नादितनिर्झरांतरो भृशं नदद्भिर्जलदैरिवांवरं ॥ २३ ॥ रामकोपं च वदतां हरीणां भयमागतं ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे पंचपंचाशः सर्गः ॥ ५५ ॥

षः स्वामिनि म्रियमाणे तं परित्यज्यास्माकं गमनमयुक्तं इतिनस्समत्वव्यवसायः रामस्य वनवासमित्यादिनाग्रिमसर्गार्थसंक्षेपः ॥ २१ ॥ भयमागतं संपातिजं । वक्ष्यमा
णं भयमित्यर्थः ॥ २२ ॥ भृशं नदद्भिः संपातिजभयादिति शेषः ॥ २३ ॥ कतकरीत्या षट्पंचाशः सर्गः ॥ ५६ ॥ इति रामाभिरामे श्री रा॰ कि॰ पंचपंचाशः सर्गः

196

॥ राम॰ ॥
॥ ११९ ॥

गिरिस्थले गिरिप्रदेशे ॥१॥२॥३॥ विधिः क्रियाफलं नरं प्राणिनां विधानेन प्राचीनकर्मानुसारेण ॥ यथा न यथा न तथोत्थान इत्यर्थः ॥ अयमामिषरूपोस्माकं भक्ष्यः चि-
रान्ममयं स्वतस्वोपागतः ॥४॥ यतः परंपराणां पंक्तित उपविष्टानां वानराणां मध्ये मृतं मृतं क्रमात् भक्षिष्यन् स्मादिति पूर्वेणासंबंधः परमायस्तः परमखिन्नः ॥६॥

उपविष्टास्तु ते सर्वे यस्मिन्प्रायं गिरिस्थले ॥ हरयो गृध्रराजश्च तं देशमुपचक्रमे ॥१॥ संपातिर्नाम नाम्ना तु चिरजीवी विहं-
गमः ॥ भ्राता जटायुषः श्रीमान्विख्यातबलपौरुषः ॥२॥ कंदरादभिनिष्क्रम्य स विंध्यस्य महागिरेः ॥ उपविष्टान्हरी-
न्दृष्ट्वा हृष्टात्मा गिरमब्रवीत् ॥३॥ विधिः किल नरं लोके विधानेनानुवर्तते ॥ यथायं विहितो भक्ष्यश्चिरान्मह्यमुपा-
गतः ॥४॥ परंपराणां भक्षिष्ये वानराणां मृतं मृतम् ॥ उवाचैतद्वचः पक्षी तान्निरीक्ष्य प्लवंगमान् ॥५॥ तस्य तद्वचनं
श्रुत्वा भक्ष्यलुब्धस्य पक्षिणः ॥ अंगदः परमायस्तो हनूमंतमथाब्रवीत् ॥६॥ पश्य सीतापदेशेन साक्षाद्वैवस्वतो
यमः ॥ इमं देशमनुप्राप्तो वानराणां विपत्तये ॥७॥ रामस्य न कृतं कार्यं न कृता राजशासनं ॥ हरीणामियमज्ञाता
विपत्तिः सहसागता ॥८॥ वैदेह्याः प्रियकामेन कृतं कर्म जटायुषा ॥ गृध्रराजेन यत्तत्र श्रुतं वस्तदशेषतः ॥९॥
तथा सर्वाणि भूतानि तिर्यग्योनिगतान्यपि ॥ प्रियं कुर्वंति रामस्य त्यक्त्वा प्राणान्यथा वयं ॥१०॥ ६ ॥ ६ ॥

सीतापदेशेनेति सीताव्याजेन प्राप्त प्रायोपवेशानामित्यर्थः गृध्रापदेशेनेति पाठः सुगमः ॥७॥ अज्ञाता अचिंतिता ॥८॥ तिर्यग्योनिभूतानामस्माकमिवाति-
र्यग्योन्यंतरस्यापि सीतानिमित्तं वियत्तिर्जातेत्याह वैदेह्या इति प्रत्यक्षे क्रियमाणाया इति शेषः ॥९॥ रामस्य प्रियं कुर्वंतीत्यनेन तस्मिन्सर्वेप्रेमास्पदत्वं सूचय-

रामविजयरूपिणी ॥१००

सार्वात्म्यमेव दृढयति अन्योन्यमिति स्नेहकारुण्ययंत्रिताः रामे इति शेषः सर्वस्य रामभृत्यात्त्वदीयस्नेहेनैव परस्परोपकारकरणमित्यर्थः स्नेहविषतारामानिरिक्तेनेतित्र
नेन स्वचितं॥ ननः उक्तस्नेहादियंत्रणा नः तस्य रामस्य उपकारार्थमित्यस्य व्यहत्ता इति शेषः॥११॥ ननु प्राणत्यागेन कथं रामस्य संतोषः तत्राह। प्रियमिति। हियतो जटायु
षा प्राणान्त्यजता प्रियं कृतमिति रामस्य मतमिति शेषः॥ तथास्मन्मरणेनापि रामस्तथा मंस्यतीति भावः॥१२॥ सुखीति सुखित्वमेव परमगतिप्राप्त्या दर्शि

अन्योन्यमुपकुर्वंति स्नेहकारुण्ययंत्रिताः॥ ततस्तस्योपकारार्थं त्यजतात्मानमात्मना॥११॥ प्रियं कृतं हि रामस्य धर्मज्ञेन जटा
युषा॥ राघवार्थे परिश्रांता वयं संत्यक्तजीविताः॥१२॥ कांताराणि प्रपन्नाः स्म न च पश्याम मैथिलीं॥ स सुखी गृध्रराजस्तु रा
वणेन हतो रणे॥ मुक्तश्च सुग्रीवभयाद्गतश्च परमां गतिं॥१३॥ जटायुषो विनाशेन राज्ञो दशरथस्य च॥ हरणेन च वैदे
ह्याः संशयं हरयो गताः॥१४॥ रामलक्ष्मणयोर्वासमरण्ये सह सीतया॥ राघवस्य च बाणेन वालिनश्च तथा वधं॥१५॥
रामकोपादशेषाणां रक्षसां च तथा वधं॥ कैकेय्या वरदानेन इदं च विकृतं कृतं॥१६॥ तदसुखमनुकीर्तितं वचो भु
वि पतितांश्च निरीक्ष्य वानरान्॥ भृशचकितमतिर्महामतिः कृपणमुदाहृतवान्स गृध्रराजः॥१७॥ ॥६॥ ॥

यति रावणेनेत्यादि मुक्तश्चेति अनेन सर्वतिर्यग्योनिराजत्वं कपीन्द्रस्य सूचितं गतश्च परमां गतिं शमात्प्रयहादिति शेषः॥१३॥ जटायुषो विनाशेन त्वागिति शेषः
यदि पुनर्जटायुः क्षणमात्रमपि पुरो रावणं निरुंध्यात्तदा रामदृग्गोचरो रावणः सीतां न हरेदिति भावः राज्ञो दशरथस्य चक्षाग्विनाशेन यदि पक्षमात्रमपि राजजीवनं
स्यात्तदा रामं प्रस्थानयेदेवेति भावः॥ वैदेहीहरणात्तस्य दृष्टमेव वानराणां प्राणसंशयकारणं॥१४॥१५॥ विकृतं अरण्यवासवालिवधरक्षोवधरूपं॥ इदं च अ
स्मन्मरणरूपं च कैकेय्या वरदानेनैव कृतमित्यर्थः॥ भृशचकितमतिः क्षुभितचित्तः कृपणं दीनं॥१७॥ श्रीरामाय रामचन्द्राय नमः॥ ६ ॥ रामराम रामराम॥

:कंपयन्न् इव मे मनः ॥ कथमासीज्जनस्थाने युद्धं राक्षसगृध्रयोः ॥ नामधेयमिदं भ्रातु र

अस्यैवं प्रपंचस्त्विति ॥१९॥ को घोषयतीति समया प्रष्टव्य इति शेषः प्रश्नमेवाह कथमिति ॥२०॥ गिरिदुर्गान्भवद्भिरवतारितुमिच्छेयं आत्मानमिति शेषः अवतारणफलमाह ॥ यवीयस इति कनिष्ठस्येत्यर्थः ॥२१॥ श्रोतुमिच्छेयं युष्मत्समीपमागत्येति शेषः अन्वयस्तु यस्य रामः प्रियः पुत्रः स दशरथो मम भ्रातुः तस्यैव जटायुषः सखा ॥ अस्मात्स्नेहात् प्रयतमानस्य तस्य जनस्थानवासिनस्तस्य प्रसिद्धविक्रमस्य जटायुषो विनाशः कथमभवदिति तस्य विनाशं श्रोतुमिच्छेयमि

तत्तु श्रुत्वा तथा वाक्यमंगदस्य मुखोद्गतं अब्रवीद्वचनं गृध्रस्तीक्ष्णतुंडो महास्वनः ॥१९॥ कोयं गिरा घोषयति प्राणैः प्रियतरस्य मे ॥ जटायुषो वधं भ्रातुश्चिरस्याद्य मया श्रुतं ॥२०॥ इच्छेयं गिरिदुर्गाच्च भवद्भिरवतारितुं ॥ यवीयसो गुणज्ञस्य श्लाघनीयस्य विक्रमैः ॥२१॥ अतिदीर्घस्य कालस्य परितुष्टोस्मि कीर्तनात् ॥ तदिच्छेयमहं श्रोतुं विनाशं वानरर्षभाः ॥२२॥ भ्रातुर्जटायुषस्तस्य जनस्थाननिवासिनः ॥ तस्यैव च मम भ्रातुः सखा दशरथः कथं ॥२३॥ यस्य रामः प्रियः पुत्रो ज्येष्ठो गुरुजनप्रियः ॥ सूर्यांशुदग्धपक्षत्वान्न शक्नोमि विसर्पितुं ॥२४॥ इच्छेयं पर्वतादस्मादवतर्तुमरिंदमाः ॥ ॥२५॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे षट्पंचाशः सर्गः ॥५६॥ शोकाद्भ्रष्टस्वरमपि श्रुत्वा वानरयूथपाः श्रद्दधुर्नैव तद्वाक्यं कर्मणा तस्य शंकिताः ॥१॥

॥ तिकथं सखेत्यन्वयस्तु नोचितः तदुत्तरस्याग्रेऽभावात् स्वस्यावतारणापेक्षत्वे हेतुमाह सूर्येति ॥ २२ ॥२३॥२४॥ अवतर्तुं अवतारयितुं ॥२५॥ इति रामाभिरामे श्री रा० रा० किष्किंधाकांडे षट्पंचाशः सर्गः ॥५६॥ भ्रष्टस्वरमपि भक्षणावचनस्वरापेक्षया भ्रष्टस्वरमित्यर्थः तेन स्वरेण यद्यपि मनिश्चिन्नशोकः परितुष्टोस्मीति श्रद्धेयवचनो भवति तथापि न श्रद्दधुः यतस्तस्य कर्मणा शंकिताः भक्षणार्थं वंचनमेव

करोतीति शंकिता इति भावः ॥१॥

तद्देवाह ॥ चक्रुरित्यादि त्र्यस्यार्थस्येतीतिशेषः ॥ २ ॥ सिद्धिंमरणाख्यां ॥ ३ ॥ एतांवुद्धिंभक्षणाभीष्टत्ववुद्धिं ॥ ४ ॥ कोयंघोषयतीतिप्रथमप्रश्नोत्तरमाहवभूवेति·
आर्यः पितामहःपार्थिवोवानराणामितिशेषः ॥ ५ ॥ धनवलौवज्रवलौ ॥ अमोघवलाविनिपाठांतरं ॥ ६ ॥ ७ ॥ ८ ॥ रावणेनविहायसीतिपाठेक्रियमाणामितिशे

तेप्रायमुपविष्टास्तुदृष्ट्वागृध्रंप्लवंगमाः ॥ चक्रुर्वुद्धिंतदारौद्रांसर्वान्नोभक्षयिष्यति ॥ २ ॥ सर्वथाप्रायमासीनान्यदिनोभक्षयि
ष्यति ॥ कृतकृत्याभविष्यामःक्षिप्रंसिद्धिमितोगताः ॥ ३ ॥ एतांवुद्धिंततश्चक्रुःसर्वेतेहरियूथपाः ॥ अवतार्यगिरेःशृंगा
द्गृध्रमाहांगदस्तदा ॥ ४ ॥ वभूवर्क्षरजोनामवानरेंद्रःप्रतापवान् ॥ ममार्यःपार्थिवःपक्षिन्धार्मिकौतस्यचात्मजौ
॥ ५ ॥ सुग्रीवश्चैववालीचपुत्रौघनवलावुभौ ॥ लोकेविश्रुतकर्माभूद्राजावालीपितामम ॥ ६ ॥ राजाकृत्स्नस्यजगतइ
क्ष्वाकूणांमहारथः ॥ रामोदाशरथिःश्रीमान्प्रविष्टोदंडकावनं ॥ ७ ॥ लक्ष्मणेनसहभ्रात्रावैदेह्यासहभार्यया ॥ पि
तुर्निदेशनिरतोधर्म्यंपंथानमाश्रितः ॥ ८ ॥ तस्यभार्याजनस्थानाद्रावणेनहृतावलात् ॥ रामस्यतुपितुर्मित्रंजटा
युर्नामगृध्रराट् ॥ ददर्शसीतांवैदेहींह्रियमाणांविहायसा ॥ ९ ॥ रावणंविरथंकृत्वास्थापयित्वाचमैथिलीं ॥ परि
श्रांतश्चवृद्धश्चरावणेनहतोरणे ॥ १० ॥ एवंगृध्रोहतस्तेनरावणेनवलीयसा ॥ संस्कृतश्चापिरामेणजगामगति
मुत्तमां ॥ ११ ॥ ततोममपितृव्येणसुग्रीवेणमहात्मना ॥ चकारराघवःसख्यंसोवधीत्पितरंमम ॥ १२ ॥

षः ॥ ९ ॥ स्थापयित्वाभूमावितिशेषः ॥ १० ॥ ११ ॥ १२ ॥ श्रीरामायरामचन्द्रायनमः ॥ ॐ ॥ श्रीकृष्णायवासुदेवायनमः ॥ ॐ ॥ रामरामरामः ॥

138

स्वपितृवधेकारणमाह ममेति निरुद्धो निरुद्धराज्यः॥१३॥१४॥१५॥१६॥१७॥१८॥१९॥धयमानः इति रामाभिरामे श्रीरा०रा०ति० किष्किंधाकांडे सप्तपंचाशः सर्गः

ममपित्रानिरुद्धोहिसुग्रीवःसचिवैःसह॥निहत्यवालिनंरामस्ततस्तमभिषेचयत्॥१३॥सराज्येस्थापितस्तेनसुग्रीवोवानरेश्वरः
राजावानरमुख्यानांतेनप्रस्थापितावयं॥१४॥एवंरामप्रयुक्तास्तुमार्गमाणास्ततस्ततः॥वैदेहींनाधिगच्छामोरात्रौसूर्यप्र
भामिव॥१५॥तेवयंदंडकारण्यंविचित्यसुसमाहिताः॥अज्ञानात्तुप्रविष्टाःस्मधरण्याविवृतंबिलं॥१६॥मयस्यमाया
विहितंतद्बिलंचविचिन्वतां॥व्यतीतस्तत्रनोमासोयोराज्ञासमयःकृतः॥१७॥तेवयंकपिराजस्यसर्वेवचनकारि
णः॥कृतांसंस्थामतिक्रांताभयात्प्रायमुपासिताः॥१८॥क्रुद्धेतस्मिंस्तुकाकुत्स्थेसुग्रीवेचसलक्ष्मणे॥गतानामपि
सर्वेषांतत्रनोनास्तिजीवितं॥१९॥इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेसप्तपंचाशःसर्गः॥५७॥इत्युक्तःकरुणं
वाक्यंवानरैस्त्यक्तजीवितैः॥सबाष्पोवानरान्गृध्रःप्रत्युवाचमहास्वनः॥१॥यवीयान्ममभ्राताजटायुर्नामवान
रः॥यमाख्यातहतंयुद्धेरावणेनबलीयसा॥२॥वृद्धभावादपक्षत्वाच्छृण्वंस्तदपिमर्षये॥नहिमेशक्तिरस्त्यद्य
भ्रातुर्वैरविमोक्षणे॥३॥

५७॥ कतकटीकायां सप्तपंचाशः सर्गः॥५८॥ त्यक्तजीवितैः त्यक्तजीवनाशभयैः सबाष्पोऽश्रुपूर्णनयनः सबाष्पानितिपाठांतरं॥१॥ आख्यात आ
ख्यातवन्तः॥२॥ तदपि भ्रातृवधमपि॥३॥ श्रीरामायनमः॥ छ॥ श्रीरामायरामचन्द्रायनमः॥ छ॥ श्रीकृष्णायनमः॥ छ॥ छ॥

त्र च शक्तिर्नास्तीत्यनेन पूर्वं महती शक्तिरासीदिति सूचितं तदेवाह पुरेति पुरा पूर्वं वृत्रवधे वृत्ते सति ॥ स जटायुरहं च जयैषिणौ वृत्रवधेनेन्द्रस्यातिप्रबलत्वं निरीक्ष्य तज्ज
येषिणौ भूत्वा ॥ प्रथममाकाशमार्गेण स्वर्गं गतौ ततो गरुडवत् भृशं जवेन तं विजित्य आवृत्य प्रत्यावृत्यादित्यं दर्पादुपयातौ स्वः अथ तमुपयातयोरावयोर्मध्ये जटायुः
सवितरि मध्यं प्राप्ते ऽवसीदति स्मेति कतक ॥ अन्ये तु जयैषिणौ परस्परं येनात्मन्यादित्यः प्रथमं प्राप्यते स आवयोः प्रबल इति प्रतिज्ञापूर्वमिति शेष इत्याहुः ते

पुरा वृत्रवधे वृत्ते स चाहं च जयैषिणौ ॥ आदित्यमुपयातौ स्वो ज्वलंतं रश्मिमालिनं ॥४॥ आवृत्याकाशमार्गेण जवेन स्वर्गतौ भृ
शं ॥ मध्यं प्राप्ते तु सूर्ये तु जटायुरवसीदति ॥५॥ तमहं भ्रातरं दृष्ट्वा सूर्यरश्मिभिरर्दितं ॥ पक्षाभ्यां छादयामास स्नेहात्परम
विह्वलं ॥६॥ निर्दग्धपक्षः पतितो विंध्येहं वानरर्षभाः ॥ अहमस्मिन्वसन्भ्रातुः प्रवृत्तिं नोपलक्षये ॥७॥ जटायुषस्त्वेव
मुक्तो भ्रात्रा संपातिना तदा ॥ युवराजो महाप्राज्ञः प्रत्युवाचांगदस्तदा ॥८॥ जटायुषो यदि भ्राता श्रुतं ते गदितं मया
आख्याहि यदि जानासि निलयं तस्य रक्षसः ॥९॥ अदीर्घदर्शिनं तं वै रावणं राक्षसाधमं । अंतिके यदि वा दूरे यदि जा
नासि शंस नः ॥१०॥ ततोब्रवीन्महातेजा भ्राता ज्येष्ठो जटायुषः ॥ आत्मानुरूपं वचनं वानरान्संप्रहर्षयन् ॥ ११ ॥

वामावृत्येति पदस्येंद्रप्रसंगस्य वा संगतिः ॥४॥५॥ छादयामास अपरोक्षेपि लिङ् त्वमध्यार्थः ॥६॥ निर्दग्धपक्षः सूर्यकिरणैरिति शेषः भ्रातुर्जटायुषः प्रवृत्तिमित्यन्व
यः ॥७॥ जटायुषो भ्रातेत्यन्वयः ॥८॥ यदि जटायुषो रामभक्तस्य भ्राता यदि च मत्कथितं रामवृत्तांतरूपं वचनं त्वया श्रुतं यदि च तस्य रक्षसो निलयं जानासि त
र्ह्याख्याहीति प्रार्थने लोट् ॥९॥ अदीर्घदर्शिनं भाव्यनर्थविचारासमर्थं रावणमंतिके दूरे वा स्थितं यदि जानासि तदा नः शंस ॥ १० ॥ ११ ॥ रामाय नमः ॥ छ ॥

रामस्यसहाय्यंरामकार्यप्रवृत्तानांयुष्माकंसहायत्वमित्यर्थः॥१२॥वारुणाल्लोकाञ्जलप्रधानाल्लोकान्।त्रैविक्रमान्त्रिविक्रमावतारेणाक्रांतान्भूरादिलोकान्देवा
सुरविमर्दान्तद्युष्मानिहिश्चार्थेअमृतस्यमंथनंचअनेनतुलाहरादिक्षरणमारभ्यैतल्लक्षणपर्यंतंसर्ववृत्तांतज्ञानंस्वस्यनिवेदितं॥१३॥रामस्येदंकार्यंप्रथमम

निर्दग्धपक्षोगृध्रोहंगतवीर्यःप्लवंगमाः॥वाङ्मात्रेणापिरामस्यकरिष्येसाह्यमुत्तमं॥१२॥जानामिवारुणांल्लोकान्विष्णोस्त्रैविक्र
मानपि।देवासुरविमर्दांश्चह्यमृतस्यविमंथनं॥१३॥रामस्ययदिदंकार्यंकर्तव्यंप्रथमंमया॥जरयाचहृतंतेजःप्राणाश्चशि
थिलामम॥१४॥तरुणीरूपसंपन्नासर्वाभरणभूषिता॥ह्रियमाणामयादृष्टारावणेनदुरात्मना॥१५॥क्रोशंतीरामरामेति
लक्ष्मणेतिचभामिनी।भूषणान्यपविध्यंतीगात्राणिचविधुन्वती॥१६॥सूर्यप्रभेवशैलाग्रेतस्याःकौशेयमुत्तमं।अ
सितेराक्षसेभातियथाविद्युद्दिवांबरे॥१७॥तांतुसीतामहंमन्येरामस्यपरिकीर्तनात्॥श्रूयतांमेकथयतोनिलयंतस्यर
क्षसः॥१८॥पुत्रोविश्रवसःसाक्षाद्भ्रातावैश्रवणस्यच।अध्यास्तेनगरींलंकांरावणोनामराक्षसः॥१९॥इतोद्वीपेसमुद्र
स्यसंपूर्णेशतयोजने।तस्मिन्लंकापुरीरम्यानिर्मिताविश्वकर्मणा॥२०॥जांबूनदमयैर्द्वारैश्चित्रैःकांचनवेदिकैः।प्रा
सादैर्हेमवर्णैश्चमहद्भिःसुसमाकृता॥२१॥प्राकारेणार्कवर्णेनमहताचसमन्विता।तस्यांवसतिवैदेहीदीनाकौशेयवा

वश्यंमयाकर्तव्यंपरंतुजरादिमत्वादशक्यमितिभावः॥१४॥१५॥१६॥१७॥तांतुरावणह्रियमाणत्वेनदृष्टांसीतात्वेनज्ञानहेतुःरामस्यपरिकीर्तनम्॥१९॥सा
चलंकेतःशतयोजनात्परतस्थितेसमुद्रस्यद्वीपेतिष्ठतीतिशेषः।तस्मिन्द्वीपेसालंकापुरीविश्वकर्मणानिर्मिता॥२०॥२१॥२२॥रामरामरामरामः॥

तस्यांमैथिलींद्रक्ष्यथ॥२३॥एतदग्रेलंकायामित्यादिश्लोकद्वयंप्राक्षिप्तमितिकतकः देवयोनित्वेनदिव्यज्ञानेनयूयंतांदृष्ट्वाप्रत्यागमिष्यथेत्यपिपश्यामिअतोनिःसंशयं
गच्छतेतिशेषः॥अथस्वस्यदेवयोनित्वप्रदर्शनशेषतया पक्षिमार्गानाह आद्यइति पंथा आकाशमार्गः अन्येधान्यजीविनः पारावतादयः॥२४॥वलिभोजाःका
काः वृक्षफलाशनाःशुकादयः भासाःपक्षिविशेषाः॥२५॥ वलवीर्येत्यादिहंसविशेषणं॥२६॥वैनतेयान्॥विनतापुत्रादरुणात्॥तस्मात्तातोहमरुणा

रावणांतःपुरेरुद्धाराक्षसीभिःसुरक्षिता॥जनकस्यात्मजांराज्ञस्तस्यांद्रक्ष्यथमैथिलीं॥२३॥लंकायामभिगुप्तायांसागरेणास
मंततः॥संप्राप्यसागरस्यांतेसंपूर्णंशतयोजने॥आसाद्यदक्षिणंकूलंततोद्रक्ष्यथरावणं॥तत्रैवत्वरिताःक्षिप्रंविक्रम
ध्वंप्लवंगमाः॥ज्ञानेनखलुपश्यामिदृष्ट्वाप्रत्यागमिष्यथ॥आद्यःपंथाकुलिंगानांयेचान्येधान्यजीविनः॥२४॥द्वितीयोव
लिभोजानांयेचवृक्षफलाशनाः॥भासास्तृतीयंगच्छंतिक्रौंचाश्चकुररैःसह॥२५॥श्येनाश्चतुर्थंगच्छंतिगृध्रागच्छंतिपं
चमं॥वलवीर्योपपन्नानांरूपयौवनशालिनां॥२६॥षष्ठस्तुपंथाहंसानांवैनतेयगतिःपरा॥वैनतेयाच्चनोजन्मसर्वे
षांवानरर्षभाः॥२७॥गर्हितंतुकृतंकर्मयेनस्मापिशिताशिनः॥प्रतिकार्यंचमेतस्यवैरंभ्रातृकृतंभवेत्॥२८॥इहस्थो
हंप्रपश्यामिरावणंजानकींतथा॥अस्माकमपिसौपर्णंदिव्यंचक्षुर्वलंतथा॥२९॥ छ ॥

त्संपातिस्तुममाग्रजइतिआरण्येजटायुवाक्यात्॥एवंदिव्यज्ञानेनयुष्मत्कृतज्ञानं॥२७॥युष्मत्साहायकरणंचवैरशुध्यास्वप्रयोजनमपीत्याह येनरावणेनपरदा
रहरणरूपंगर्हितंकर्मकृतंतस्यपिशिताशिनः॥भ्रातृकृतंवैरंतुद्विष्टस्यप्रतिकार्यंतच्चमेकृतंभवेद्युष्मत्प्रवर्तनेनेतिशेषः॥२८॥ननुकथंलंकास्थासीतेतित्वयाज्ञा
तंतत्राह॥इहस्थइतिसौपर्णंसुपर्णलिंगकंचक्षुर्नीविद्यासिद्धिजं॥साचविद्यावहुचब्राह्मणान्तर्गतपंचिकायामुक्ता॥२९॥श्रीरामायनमः॥ छ ॥ छ ॥

200

तस्मादुक्तविद्यासिद्धेः निसर्गेणाहारवीर्येणाच मांसविशेषाहारबलेनच आउभिविधौ सायामन्किंचिदधिकाद्योजनशतान् ॥३०॥ अस्माकंतुनिसर्गेणाज्ञातिस्वभावेन दू
रतः दूरवर्त्तिदर्शनबलसंपादकेन भक्ष्यविशेषेण दृष्टिर्विहिताधात्रेतिशेषः कुक्कुटादीनांतुस्वावासवृक्षमूलेएवतावन्दूरदृष्टिमात्रसंपादिका चदृष्टिर्विहिता ॥३१
गमिष्यथकिष्किंधामितिशेषः ॥३२॥ नेतुंनामयितुं ॥३३॥३४॥३५॥ मृगमानः ॥ इतिरामाभिरामेश्रीरा॰किष्किंधाकांडेअष्टपंचाशत्तमसर्गः ॥५८॥ कतकःए

तस्मादाहारवीर्येणनिसर्गेणचवानराः ॥ आयोजनशतात्साग्राद्वयंपश्यामनित्यशः ॥३०॥ अस्माकंविहितादृष्टिर्निसर्गेणचदूरतः
विहितावृक्षमूलेतुवृत्तिश्चरणयोधिनां ॥३१॥ उपायोदृश्यतांकश्चिल्लंघनेलवणाम्भसः ॥ अभिगम्यतुवैदेहींसमृद्धार्थागमिष्यथ ॥३२॥ समुद्रंनेतुमिच्छामिभवद्भिर्वरुणालयं ॥ प्रदास्याम्युदकंभ्रातुःस्वर्गतस्यमहात्मनः ॥३३॥ ततोनीत्वातुतंदेशंतीरेनदनदीपतेः ॥ निर्दग्धपक्षंसंपातिंवानराःसुमहौजसः ॥३४॥ तंपुनःप्रापयित्वाचतंदेशंपतगेश्वरं ॥ बभूवुर्वानराहृष्टाःप्रवृत्तिरुपलप्स्यते ॥३५॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेकिष्किंधाकांडेअष्टपंचाशःसर्गः ॥५८॥ ततस्तदमृतास्वादंगृध्रराजेनभाषितं ॥ निशम्यवदतोहृष्टास्तेवचःप्लवगर्षभाः ॥१॥ जांबवान्वानरश्रेष्ठःसहसर्वैःप्लवंगमैः ॥ भूतलात्सहसोत्थायगृध्रराजानमब्रवीत् ॥२॥ कसीताकेनवादृष्टाकोवाहरतिमैथिलीं ॥ तदाख्यातुभवान्सर्वंगतिर्भवववनौकसां ॥३॥ ॥ ॥ ॥

कोनषष्टितमःसर्गः ॥५९॥ ततइतितत्रैववानरर्षभाः अमृतास्वादंगृध्रराजाभिभाषितंनिशम्यहर्षादेवतद्वदतः अनुवदंतोहृष्टाबभूवुरित्यर्थः वदत
इत्यत्रतुमभावआर्षः ॥१॥ अब्रवील्लंकायांसीतादर्शनंत्वदेकसाक्षिकमन्यसाक्षिकमपिवेत्तिदाशरथेर्भार्यादृष्टादित्यर्थः भूतलादुत्थायप्रायोपवेशात्य
क्त्वेत्यर्थः ॥२॥ प्रश्नमेवाहकेनसीताकोहरतिस्माह्रियमाणाचकेनदृष्टात्वयान्येनापिवा ॥ हृताचकवावर्त्ततेइतिसर्वंभवानाख्यातुसामान्यःश्रु

त्वाप्रायोपवेशादुत्थितानांविशिष्यवदतित्यर्थःकोजानकीहर्त्तास्वयंरामबाणानांविक्रमंनचिंतयतीत्यन्वयः॥४॥ प्रतिसंमुक्तान्मत्कृतप्रायोपवेशान्
सीताश्रुतिसमाहितान्सीताविषयवृत्तांतश्रवणेसावधानान् पुनराश्वासयन् अन्यसाक्षिकतांप्रदेशेनभूयःस्वोक्तार्थंप्रत्यापयन्॥५॥ वैदेह्याह
रणंयथामेमयाश्रुतंयेनचममाख्यातंयत्रसाआयतलोचनावर्त्ततइतिश्रुतंतदपीहेदानींश्रूयतां॥६॥ तदेवाह अहमितिदुर्गेदुर्गमेक्षीणःत्रा

कोदाशरथिबाणानांवज्रवेगनिपातिनां॥ स्वयंलक्ष्मणमुक्तानांनचिंतयतिविक्रमं॥४॥ सहरीन्प्रतिसंमुक्तान्सीताश्रुतिसमाहि
तान्॥ पुनराश्वासयन्प्रीतइदंवचनमब्रवीत्॥५॥ श्रूयतामिहवैदेह्यायथामेहरणंश्रुतं॥ येनचापिममाख्यातंयत्रचायत
लोचना॥६॥ अहमस्मिन्गिरौदुर्गेबहुयोजनमायते॥ चिरान्निपतितोवृद्धःक्षीणप्राणपराक्रमः॥७॥ तंमामेवंगतंपु
त्रःसुपार्श्वोनामनामतः॥ आहारेणयथाकालंबिभर्त्तिपततांवरः॥८॥ तीक्ष्णकामास्तुगंधर्वास्तीक्ष्णकोपाभुजंगमाः॥
मृगाणांतुभयंतीक्ष्णंततस्तीक्ष्णक्षुधावयं॥९॥ सकदाचित्क्षुधार्त्तस्यममाहाराभिकांक्षिणः॥ गतःसूर्येऽहनिप्राप्तो
ममपुत्रोह्यनामिषः॥१०॥ समयाहारसंरोधात्पीडितःप्रीतिवर्द्धनः॥ अनुमान्ययथातत्त्वमिदंवचनमब्रवीत्॥११॥

णोबलंपराक्रमश्चयस्यसः॥७॥८॥ तीक्ष्णकामाःस्त्रीकामावैगंधर्वाइतिश्रुतेःयथाकामादिविषयेगंधर्वादेस्तैक्ष्ण्यंस्वभावात्ततएवस्वभावादेववयंप
तगास्तीक्ष्णक्षुधाइत्यर्थः॥९॥ यस्मादेवमतःक्षुधार्त्तस्यातएवाहारकांक्षिणोममाहारार्थंसूर्येऽहनिअह्निसूर्येसूर्योदयकालेगतोममपुत्रःसायमनामिषः
प्राप्तआगतः॥१०॥ यतएवमतःसममप्रीतिवर्धनःमयाहारसंरोधात्पीडितोदुर्वचनेनखेदंप्रापितःसन्मामनुमान्यक्षमापयित्वायथातत्त्वमिदंवक्ष्यमाणं
वचनमब्रवीत्॥११॥

ऽसमाश्रितः स्थितः ॥ १२ ॥ पंथानं सन्निरोद्धुमवलमित्यन्वयः ॥ १३ ॥ सूर्योदयसमं प्रभां उदयकालिकसूर्यसमप्रभां ॥ १४ ॥ तौ स्त्रीपुरुषौ कृतनिश्चयः इमा
विवहत्वापि तु रस्यवहारार्थं नेष्यामीति कृतनिश्चयः इत्यर्थः । ततस्तेन विनीतेन सता सान्त्वैव पंथानमभियाचितोस्मि अतएवासौ न्यक्त इति शेषः ॥ १५ ॥
न च हेतुर्न हिंसामेति ॥ १६ ॥ अथ सस्त्रीकस्य तस्य गमनानंतरं खेचरैर्भूतैः सिद्धचारणादिभिः सभाजितः पूजितोस्मि ॥ १७ ॥ दिष्ट्याजीवसि सीतेतिपाठः

अहं तात यथाकालमामिषार्थी खमाप्लुतः ॥ महेन्द्रस्य गिरेर्द्वारमावृत्य सुसमाश्रितः ॥ १२ ॥ तत्र सत्त्वसहस्राणां सागरान्तर
चारिणां । पंथानमेकोध्यवसं सन्निरोद्धुमवाङ्मुखः ॥ १३ ॥ तत्र कश्चिन्मया दृष्टः सूर्योदयसमप्रभां ॥ स्त्रियमादाय ग
च्छन्वै भिन्नांजनचयोपमः ॥ १४ ॥ सोहमप्यवहारार्थं तौ दृष्ट्वा कृतनिश्चयः । तेन साम्ना विनीतेन पंथानमनुयाचितः ।
१५ ॥ नहि सामोपपन्नानां प्रहर्त्ता विद्यते भुवि ॥ नीचेष्वपि जनः कश्चित्किमंग वत मद्विधः ॥ १६ ॥ स यातस्तेजसा व्योम
संक्षिपन्निव वेगितः ॥ अथाहं खेचरैर्भूतैरभिगम्य सभाजितः ॥ १७ ॥ दिष्ट्याजीवसि सीतेति अब्रुवन्मां महर्षयः । कथंचि
त्सकलत्रोसौ गतस्ते स्वस्त्यसंशयं ॥ १८ ॥ एवमुक्तस्ततोहं तैः सिद्धैः परमशोभनैः । स च मे रावणो राजा रक्षसां प्रतिवे

दिष्ट्या सीते त्वं दृष्टिपथं प्राप्ताज्जीवितिस्म । त्वया तज्जननस्येष्टकरत्वात् ॥ एवं सभाजयित्वा मां महर्षयोब्रुवन् असौ त्वया दृष्टः पुरुषः सकलत्रः कथंचि
त् । कुशली गतोतो ऽसंशयं ते स्वस्त्यस्तु इति कतकः । अन्ये तु दिष्ट्याजीवसि मानेतिपाठः । हे तात त्वं दिष्ट्या रावणं प्राप्यापि जीवसीत्यब्रुवन् । यतोसौ सकलत्रो ऽ
तो ऽसंशयं त्वां संशयमप्राप्य गतो ऽतस्ते स्वस्ति जातमित्यर्थमाहुः ॥ १८ ॥ अथ स हर्त्ता रावण इति सा रामभार्येति चाहं प्रतिवेदितः ॥ १९ ॥ ६२ ॥

अतो हं न स्वभरणात्वादित्युक्तां रामभार्यां मार्गयन्नस्थित इति । एवमतावत्ते कालात्ययः कालातिपातहेतुरिति समयमेतदर्थं वाक्यविदांवरः सुपार्श्वो मेत्र म्यवेदयत् ॥ २० ॥
२१ ॥ न ह्युत्सायीति सामान्यतः सर्वं मया दृष्टमपि पुत्रात् कृत्तो रावणो हृतारामपत्नीति निश्चित्यस्तु न्वापि ॥ २२ ॥ बाहुद्भिर्भ्यां साध्यो योयं त्वराउपकारलक्षणोस्म
न्न वक्तनेशीलेन ॥ २३ ॥ पौरुषाश्रयं पराक्रमप्रतिष्ठाभूतं । किं चैषउपकारो न केवलं भवत्प्रयोजनस्त्वापि तु स्वप्रयोजनफलोपीत्याह वाङ्मतिभ्यामि

पश्यन्दाशरथेर्भार्यां रामस्य जनकात्मजां ॥ भ्रश्यमाभरणां कोशेयां शोकवेगपराजितां ॥ २० ॥ रामलक्ष्मणयोर्नाम क्रोशंतीं मुक्तमू
र्धजां ॥ एष कालात्ययस्तावदिति वाक्यविदां वरः ॥ २१ ॥ एतदर्थं समग्रं मे सुपार्श्वः प्रत्यवेदयत् ॥ न ह्युत्सायी हि मे बुद्धिर्नासी
त्काचित्पराक्रमे ॥ २२ ॥ अपक्षो हि कथं पक्षी कर्म किंचित्समारभेत् ॥ यत्तु शक्यं मया कर्त्तुं वाग्बुद्धिगुणवर्त्तिना ॥ २३ ॥
श्रूयतां तत्प्रवक्ष्यामि भवतां पौरुषाश्रयं ॥ वाङ्मतिभ्यां हि सर्वेषां करिष्यामि प्रियं हि वः ॥ २४ ॥ यद्धि दाशरथेः कार्यं ममतन्ना
त्र संशयः ॥ तद्भवंतो मतिश्रेष्ठा बलवंतो मनस्विनः ॥ २५ ॥ प्रहिताः कपिराजेन देवैरपि दुरासदाः ॥ रामलक्ष्मणबाणाश्च
विहिताः कं पत्रिणः ॥ २६ ॥ त्रयाणामपि लोकानां पर्याप्तास्त्राणनिग्रहे ॥ कामं खलु दशग्रीवस्तेजोबलसमन्वितः ॥ भव
तां तु समर्थानां न किंचिदपि दुष्करं ॥ २७ ॥

का २

202

इति दाशरथेः कार्यमुद्दिश्य एवः सर्वेषां वाङ्मतिभ्यां यत्प्रियं करिष्यामि तन्ममैव कार्यं तत्र संशयो न
२४ ॥ न त्वात्मसया भवतां कार्यमस्तीति क्रेर संशयं ष्ठ त्याह । भवंतो दशं कार्यं यत्नं नामिति शेषः ॥ २५ ॥ विहिताः विधात्रेति शेषः ॥ २६ ॥ त्राणनिग्रहे त्रा
णेनिग्रहे च पर्याप्ताः समाहारद्वंद्वः यद्यपि दशग्रीवो लोकदृष्ट्या प्रबलस्तथापि भवतां रामलक्ष्मणसहायत्वेनैव समर्थानां सुकर एवेति भावः ॥ २७ ॥

कालसंगः कालविलंबः मज्जंते अलसा भवंति ॥ २८ ॥ हरमानः । इति रामाभिरामे श्रीरा० किष्किंधाकांडे एकोनषष्ठितमः सर्गः ॥ ५९ ॥ ततः इति ॥ १ ॥ जनितप्रत्ययः
एष्यं अन्वेषका इति निशाकरमुनुक्रीत्या रामहूनागमननिशाकरोक्तयक्षप्ररोहादिदर्शनाच्च । निशाकरवचसि विश्वस्तः हर्षात् पक्षलाभजनितह

तदलं कालसंगेन क्रियतां बुद्धिनिश्चयः । नहि कर्मसु मज्जंते बुद्धिमंतो भवद्विधाः ॥ २८ ॥ इत्यार्षे श्रीमद्रामायणे वा० किष्किंधाकां
डे एकोनषष्ठितमः सर्गः ॥ ५९ ॥ ततः कृतोदकं स्नातं तं गृध्रं हरियूथपाः ॥ उपविष्टा गिरौ रम्ये परिवार्य समंततः ॥ १ ॥ तमंगद
मुपासीनं तैः सर्वैर्हरिभिर्वृतं । जनितप्रत्ययो हर्षात्संपातिः पुनरब्रवीत् ॥ २ ॥ कृत्वा निःशब्दमेकाग्राः शृण्वंतु हरयो मम ॥
तथ्यं संकीर्तयिष्यामि यथा जानामि मैथिलीं ॥ ३ ॥ अस्य विंध्यस्य शिखरे पतितोस्मि पुरानघ सूर्यतापपरीतांगो निर्द
ग्धः सूर्यरश्मिभिः ॥ ४ ॥ लब्धसंज्ञस्तु षड्रात्राद्विवशो विह्वलन्निव ॥ वीक्ष्यमाणो दिशः सर्वा नाभिजानामि किंचन ॥ ५ ॥
ततस्तु सागरान् शैलान्नदीः सर्वाः सरांसि च ॥ वनानि च प्रदेशांश्च निरीक्ष्य मतिरागमत् ॥ ६ ॥ हृष्टपक्षिगणाकीर्णः कं
दरोदरकूटवान् । दक्षिणस्योदधेस्तीरे विंध्योयमिति निश्चितः ॥ ७ ॥ आसीच्चात्राश्रमं पुण्यं सुरैरपि सुपूजितं । ऋषिर्नि
शाकरो नाम यस्मिन्नुग्रतपा भवत् ॥ ८ ॥ अष्टौ वर्षसहस्राणि तेनास्मिन्नृषिणा गिरौ ॥ वसतो मम धर्मज्ञे स्वर्गते तु निशाकरे २

र्षात् । आत्मानमुपासीनं अंगदं प्रति पुनरब्रवीत् । तथ्यं मैथिलीं जानामीति मद्वाक्यं सत्यं यथा भवद्भिः प्रतिपन्नवं तथा संकीर्तयिष्यामि ॥ ३ ॥ सूर्यरश्मिभिर्निर्द
ग्धोऽत एव विवशः षड्रात्रात्परं लब्धसंज्ञः विह्वलन्निव परमार्तः एव सन् ॥ ४ ॥ ५ ॥ ६ ॥ कंदराणि उदरे यस्य सः चासौ कूटवान् शृंगवान् इत्यर्थः ॥ ७ ॥ यस्मिन्नाश्रमे

उग्रतपा भवदिति संबंधः ॥ ८ ॥ निशाकरे ऋषौ स्वर्गते तेन वि
नात्र गिरौ वसतो मम अष्टौ वर्षसहस्राणि गतानीति शेषः ॥ ९ ॥

अथ तात्स्यातिकालिकीं दर्शनप्रवृत्तिमाह ॥ अवतीर्येति ॥ तीक्ष्णा दर्भा तीक्ष्णाग्रा दर्भा यस्यां ॥ १० ॥ तमृषिं द्रष्टुकामोस्मि द्रष्टुकामोभूवमित्यर्थः अतस्त्वदुःखेन
नदृश्या आश्रममभ्यागतः ॥ ननु न वसोत्रेति त्वया कथं ज्ञातमत आह ॥ जटायुषेति ॥ अधिगतः प्राप्तः सेवित इत्यर्थः ॥ ११ ॥ १२ ॥ १३ ॥ उदङ्मुखमुपावृत्तं समुद्रे स्नात्वो द

अवतीर्य च विंध्याग्रात्कृच्छ्रेण विषमाच्छनैः ॥ तीक्ष्णदर्भां वसुमतीं दुःखेन पुनरागतः ॥ १० ॥ तमृषिं द्रष्टुकामोस्मि दुःखेनाभ्यागतो
भृशं ॥ जटायुषा मया चैव बहुशोधिगतो हि सः ॥ ११ ॥ तस्याश्रमपदाभ्याशे ववुर्वाताः सुगंधिनः ॥ वृक्षो नापुष्पितः कश्चिद
फलो वा न दृश्यते ॥ १२ ॥ उपेत्य चाश्रमं पुण्यं वृक्षमूलमुपाश्रितः ॥ द्रष्टुकामः प्रतीक्षे च भगवंतं निशाकरं ॥ १३ ॥ अथ प
श्यामि दूरस्थमृषिं ज्वलिततेजसं ॥ कृताभिषेकं दुर्धर्षमुपावृत्तमुदङ्मुखं ॥ १४ ॥ तमृक्षाः सृमरा व्याघ्राः सिंहा नानासरीसृ
पाः ॥ परिवार्योपगच्छंति दातारं प्राणिनो यथा ॥ १५ ॥ ततः प्राप्तमृषिं ज्ञात्वा तानि सत्वानि वै ययुः ॥ प्रविष्टे राजनि यथा स
वं सामात्यकं बलं ॥ १६ ॥ ऋषिस्तु दृष्ट्वा मां तुष्टः प्रविष्टश्चाश्रमं पुनः ॥ मुहूर्तमात्रान्निर्गम्य ततः कार्यमपृच्छत ॥ १७ ॥ सौ
म्य वैकल्यतां दृष्ट्वा रोम्णां ते नावगम्यते ॥ अग्निदग्धाविमौ पक्षौ प्राणाश्चापि शरीरके ॥ १८ ॥ गृध्रौ द्वौ दृष्टपूर्वौ मे मात
रिश्वसमौ जवे ॥ गृध्राणां चैव राजानौ भ्रातरौ कामरूपिणौ ॥ १९ ॥

ङ्मुखतया प्रत्यावृत्तं ॥ १४ ॥ तस्य स्वसेवायोग्यत्वप्रदर्शनाय तिर्यग्योनि
सेव्यत्वं तपोमहिमजं दर्शयति तमृक्षा इति ॥ १५ ॥ प्राप्तं आश्रममागतं ॥ १६ ॥ १७ ॥ ते रोम्णां वैकल्यं दृष्ट्वा नावगम्यसे न प्रत्यभिज्ञायसे भवान् इत्यर्थः वैकल्यमेवा
ह अग्निदग्धाविव अतस्त्व शरीरके अल्पे शरीरे प्राणाश्चात विक्रमबलेऽपि तेऽल्पकल्पा ॥ १८ ॥ अथ प्रत्यभिज्ञामूलामभिज्ञामाह गृध्राविति ॥ १९ ॥ छ ॥

203

॥ राम॰ ॥
॥ १२६ ॥

अविनीतानः गृह्णीताम गृह्णीतां ॥२०॥ किं कीदृशं व्याधिसमुत्थानमिति षष्ठीतत्पुरुषः अयं दंडः व्रणाकरः प्रहारः केन कृतः केन कृतः ॥२१॥ परमानः इतिरामाभि
रामे श्रीरा० किष्किंधाकांडे षष्टितमः सर्गः ॥६०॥ कनकरीन्यास्एकषष्ठिः ॥६१॥ तद्दारुणां कर्म इंद्रेण मुग्धरूपं अन्येन दुष्करं सहसा दर्पात्कृतं प्रथममाचचक्षे
तथा तदनंतरं कृतं सूर्यानुगमनं सर्वप्रकृतविध्वंसपतनप्रयोजनं च नाचचक्षे ॥१॥ तदेवाह भगवन्निति व्रणयुक्तत्वात् इंद्रमुक्तवज्रप्रहारजव्रणयुक्तत्वात्प

ज्येष्ठोऽवितस्त्वं संपाते जटायुरनुजस्तव। मानुषं रूपमास्थाय गृह्णीतां चरणौ मम ॥२०॥ किं ते व्याधिसमुत्थानं पक्षयोः पतनं
कथं। दंडो वायं धृतः केन सर्वमाख्याहि पृच्छतः ॥२१॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे षष्ठितमः सर्गः ॥६०॥ त
तस्तद्दारुणं कर्म दुष्करं सहसा कृतं। आचचक्षे मुनेः सर्वं सूर्यानुगमनं तथा ॥१॥ भगवन्व्रणयुक्तत्वाल्लज्जया चाकुले
न्द्रियः। परिश्रांतो न शक्नोमि वचनं परिभाषितुं ॥२॥ अहं चैव जटायुश्च संघर्षात् दर्पमोहितौ। आकाशं पतितौ दूराज्जिज्ञा
संतौ पराक्रमं ॥३॥ कैलासे शिखरे बध्वा मुनीनामग्रतः पणं। रविः स्यादनुयातव्यो यावदस्तं महागिरिं ॥४॥ अप्यावां
युगपत्प्राप्तौ अपश्याव महीतले। रथचक्रप्रमाणानि नगराणि पृथक् पृथक् ॥५॥ क्वचिद्वादित्रघोषश्च क्वचिद्भूषण
निस्वनः। गायंतीः स्मांगना बह्वीः पश्याव रक्तवाससः ॥६॥

रिश्रांततया पक्षनाशफलकानुचितकर्मकरणजलज्जया आकुलितेंद्रियश्चा
हं प्रतिभाषितुं सम्यगुत्तरं दातुं न शक्नोमि तथापि कथंचित् ब्रवीमीति शेषः ॥२॥ संघर्षात् पतनविषयस्पर्धातः गर्वे मोहितौ ॥ इंद्रजयगर्वमोहितौ
पणां बध्वा प्रतिज्ञां कृत्वा प्रतिज्ञामेवाह ॥ रविरिति रविर्यावदस्तं महागिरिं यायात्ततः प्रागावाभ्यां रविरनुयातव्योऽनुगन्तव्य इति प्रतिज्ञा ॥४॥ युगप

प्राप्तावाकाशमिति शेषः अपश्याव दृष्टवंतौ ॥५॥ क्ववि
हर्म्यादिकप्रदेशविशेषे ॥६॥

चाकाशंचाकाशपथादर्वाक्तनंभुवन्निवनं ॥ शाड्वलसंस्थितंशाड्वलानांवालान्ठणावहेशानामिवसंस्थानंयस्यतत् ॥७॥ उपलैःसूक्ष्मपाषाणैः ॥८॥ नागाःगजाः ॥
९ ॥ नद्यासविनरिमध्यंप्राप्तेमोहोदिग्मोहः ॥ ततोमोहादनंतरंदारुणामूर्छासंद्वियमनउपप्लवोमूर्छामोहस्तूर्छेरेवप्रकाशयतिन्वेचेति ॥ युगांतेनियतोः
नियतदाहोपिलोकः आवाभ्यांतत्कालेग्निनादग्धोहतइवदृष्टोभूत् ॥११॥ मनश्चमेभूयोभ्यधिकंसंभ्रयंदर्शनाश्रयंचक्षुःप्राप्यतेनमहहमंसौरतेजस

तूर्णांत्युत्पत्यचाकाशमादित्यपदमास्थितौ ॥ आवामालोकयावस्तद्वनंशाड्वलसंस्थितं ॥७॥ उपलैरिवसंछन्नादृश्यतेभूःशिलोच्चयैः
आपगाभिश्चसंवीतासूत्रैरिववसुंधरा ॥८॥ हिमवांश्चैवविंध्यश्चमेरुश्चसुमहागिरिः ॥ भूतलेसंप्रकाशंतेनागाइवजलाश
ये ॥९॥ तीव्रःस्वेदश्चखेदश्चभयंचासीत्तदावयोः ॥ समाविशतमोहश्चततोमूर्छाचदारुणा ॥१०॥ नचदिग्ज्ञायतेयाम्यानचा
ग्नेयीनवारुणी ॥ युगांतेनियतोलोकोहतोदग्धइवाग्निना ॥११॥ मनश्चमेहतंभूयःचक्षुःप्राप्यतुसंश्रयं ॥ यत्नेनमहतास्य
स्मिन्मनःसंधायचक्षुषी ॥१२॥ यत्नेनमहतानेयोभास्करःप्रतिलोकितः ॥ तुल्यःपृथ्वीप्रमाणेनभास्करःप्रतिभातिनौ ॥१३॥
जटायुर्मामनापृच्छ्यनिपपातमहींततः ॥ तंदृष्ट्वातूर्णमाकाशादात्मानंमुक्तवानहं ॥१४॥ पक्षाभ्यांचमयागुप्तोजटायुर्नप्र
दह्यत ॥ प्रमादात्तत्रनिर्दग्धःपतन्वायुपथादहं ॥१५॥ आशंकेतंनिपतितंजनस्थानेजटायुषं ॥ अहंतुपतितोविंध्येदग्धपक्षो
जडीकृतः ॥१६॥

प्रतिहतदर्शनशक्तिकमभूत् अस्मिन्सूर्येपुनश्चक्षुषीमनश्चसंधाय ॥१२॥ कथंसूर्योदृष्टइत्यत्रतत्प्रकारमाह तुल्यइतिपृथ्व्यत्रजंबुद्वीपावच्छिन्नाबोध्या ॥१३॥
ततःसूर्यदर्शनानंतरंअनापृच्छ्यमोहवशादितिशेषः नदृष्ट्वेति मोहात्ततंजटायुंदृष्ट्वाआकाशादात्मानंमुक्तवानिति सूर्यसमीपवर्त्याकाशप्रदेशादात्मानंस्व
शरीरंजटायुरक्षणार्थंमुक्तवान् ॥ पक्षौविस्तार्यपतितवानित्यर्थः ॥१४॥ प्रमादात्जटायुपरित्राणविषयचित्ताभिषंगात्तत्रनभसितत्कालेनिर्दग्धः निर्दग्धपक्षः अथवा

युपथात्पतन्नहं ॥१५॥ आशंके आनुमितवान् नतुप्रत्यक्षतोदृष्टवानित्यर्थः ॥१६॥

204

सर्वथामर्त्तुमेवेछन् ॥ शिखरान्पतिष्ये इत्याहेति शेषः ॥ ७ ॥ साक्रमानः ॥ इति रामाभिरामे श्रीरा० किष्किंधाकांडे एकषष्ठितमः सर्गः ॥ ६१ ॥ कतकरीत्यादि षष्ठितमः ॥ ६२ ॥
एवमिति ॥ १ ॥ पक्षश्च पक्षौ सूक्ष्मपक्ष महापक्षौ प्राणाः पुष्टप्राणाः चक्षुषी उद्भूतशक्तिके पुराणे नारदादिभिरुच्यमाने भविष्य रामचरितरूपे पुराणे श्रुत्वा विदितं
तपसा हृष्टं च ॥ ३ ॥ किं तत्तत्राह राजेत्यादि ॥ ४ ॥ तस्मिन्नर्थे अरण्यगमनरूपे ॥ ५ ॥ ६ ॥ प्रलोभ्यंती प्रलोभ्यमाना ॥ ७ ॥ परमान्नं पायसं ज्ञात्वा निराहारतामिति

राज्याच्च हीनो भ्राता च पक्षाभ्यां विक्रमेण च ॥ सर्वथा मर्त्तुमेवेछन् पतिष्ये शिखराद्गिरेः ॥ ७ ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे ए
कषष्ठितमः सर्गः ॥ ६१ ॥ एवमुक्त्वा मुनिश्रेष्ठमरुदं भृशदुःखितः ॥ अथ ध्यात्वा मुहूर्त्तं च भगवानिदमब्रवीत् ॥ १ ॥ पक्षौ च ते
प्रपक्षौ च पुनरन्यौ भविष्यतः ॥ चक्षुषी चैव प्राणाश्च विक्रमश्च बलं च ते ॥ २ ॥ पुराणे सुमहत्कार्यं भविष्यं हि मया श्रुतं ॥ दृष्टं मे
तपसा चैव श्रुत्वा च विदितं मम ॥ ३ ॥ राजा दशरथो नाम कश्चिदिक्ष्वाकुवर्धनः ॥ तस्य पुत्रो महातेजा रामो नाम भविष्यति ॥ ४ ॥
अरण्यं च सह भ्रात्रा लक्ष्मणेन गमिष्यति ॥ तस्मिन्नर्थे नियुक्तः सन्पित्रा सत्यपराक्रमः ॥ ५ ॥ नैर्ऋतो रावणो नाम तस्य भार्यां हरि
ष्यति ॥ राक्षसेंद्रो जनस्थाने अवध्यः सुरदानवैः ॥ ६ ॥ सा च कामैः प्रलोभ्यंती भक्ष्यैर्भोज्यैश्च मैथिली ॥ न भोक्ष्यति महाभागा दुःख
मग्ना यशस्विनी ॥ ७ ॥ परमान्नं च वैदेह्या ज्ञात्वा दास्यति वासवः ॥ यदन्नममृतप्रख्यं सुराणामपि दुर्लभं ॥ ८ ॥ छ ॥ ॥

शेषः ॥ वासवः दास्यति स्वप्रभुत्वद्वारेति शेषः ॥ ८ ॥ छ ॥ श्रीराम
रामः ॥ छ ॥

इंद्रान इंद्रपुरुषात् । ननु रावणपुरुषादिति विज्ञाय अभूतलस्पर्शित्वादिरूपैर्देवचिह्नैः राम आगम्य एनं हत्वा त्वां नयिष्यति । तं वत्सरं त्वन्निकरमिदमन्नं भुक्ष्वा देव
कार्यसिद्ध्यै मनुष्यभावं प्राप्तवत्या प्राणा धर्तव्या देवैरपि मनुष्यभावेन आहारं विना जीवितुं न कालेइत्यादिवचनैश्च निश्चित्य इत्यर्थः । निर्वापयिष्यति दास्यति । ननु
त्रेतायामस्थिप्राणवासस्योक्तत्वाज्जीवितुं शक्यमेतदेवेति चेन्न तथा सत्यपि क्षीणतायां देहवैरूप्ये रावणस्यानुरागभंगेन तत्पुरुषक्षयेन तस्य वधो न स्यादिति
रूपलावण्यद्युत्यै तदायतनद्यानेनादोषात् । एवं रावणस्यानुरागार्थं वरूपादिदर्शनेन तदन्नाहारग्रहणोपि तन्न्यफलाद्यन्याहारं । करोतीति ध्यानस्यानामतु

तदन्नं मैथिली प्राप्य विज्ञायेन्द्रादिदं त्विति ॥ अग्रमुद्धृत्य रामाय भूतले निर्वपिष्यति ॥ ९ ॥ यदि जीवति मे भर्ता लक्ष्मणो वापि देवरः ॥ देवत्वं गच्छतो वापि तयोरन्नमिदं त्विति ॥ १० ॥ एष्यति प्रेषितास्तत्र रामदूताः प्लवंगमाः ॥ आरब्धे या राममहिषी त्वया तेभ्यो विहंगमः ॥ ११ ॥ सर्वथा तु न गन्तव्यमीदृशः क्व गमिष्यसि ॥ देशकालौ प्रतीक्षस्व पक्षौ त्वं प्रतिपत्स्यसे ॥ १२ ॥ उत्सहेयमहं कर्तुं मद्यैव त्वां सपक्षकं ॥ इहस्थस्त्वं हि लोकानां हितं कार्यं करिष्यसि ॥ १३ ॥ त्वयापि खलु तत्कार्यं तयोश्च नृपपुत्रयोः ॥ ब्राह्मणानां गुरूणां च मुनीनां वासवस्य च ॥ १४ ॥

((यानिश्चयः एतेनाहारं विनापि पूर्ववत्रूपादिमत्त्वज्ञानेन तस्य तस्या मन्तव्यम् खलु पौनस्त्यं वंचाज्ञमेपि त
त्वद्वारा मनोरावणवधो न स्यादिति भावः ॥ ९ ॥ दानमंत्रः यदीति ॥ यदि जीवति तदा प्रयच्छ यतः कालान्तरे देवत्वं गच्छतोः प्राप्नुवतोरपि तयोरिदमस्त्विति शे
षः ॥ १० ॥ तत्र लंकायां गन्तुं ॥ एष्यति आगमिष्यति इहेति शेषः ॥ ११ ॥ न गन्तव्यं इमं देशं विहायेति शेषः ॥ १२ ॥ उत्सहेयं ॥ यदि त्वया देवकार्यायेह न स्था
तव्यं स्यादिति शेषः पक्षवत्त्वे हि चापल्यात् गन्तव्यमेवेत्यस्य अन्वयेति भावः ॥ १३ ॥ लोकानामेवेत्येव तत्त्वापि तु तयोर्नृपपुत्रयोः तत्कार्यं हनूमतां सीतान्वे
षणरूपं त्वयापि कार्यं तदापि कर्तुमर्हं न वापि देवांशत्वेन तत्कार्ये अपि तदितिभावः तत्कार्यस्य लोकसंबंधित्वं दर्शयति ब्राह्मणानामिति ॥ तत्कार्यमिति शेषः

205

इच्छाम्यहमिति दृष्टतत्त्वार्थदर्शनः दृष्टं सिद्धं तत्त्वार्थदर्शनं यस्य सः महर्षिरेवंभावर्थमब्रवीत् अतो हेतोरहमपि भ्रातरौ रामलक्ष्मणौ द्रष्टुमिच्छामि यदि
महर्षिरेवं मां प्रतिनावक्ष्यत् ॥ तदा प्राणान्नाचिरं धारयितुं नैच्छं नैच्छं अपि तु कलेवरं त्यक्ष्ये इत्येवैच्छमित्यर्थ इति कतकः अन्ये तु निशाकरवाक्यमेवेदं अहं
यद्यर्थोपि स एवेत्याहुः ॥१५॥ मायमानः । इति श्रीरामाभिरामे श्रीरा० किष्किंधाकांडे द्विषष्टितमः सर्गः ॥ कतकरीत्या त्रिषष्टितमः सर्गः ॥ ६३ ॥ एतैरि

इच्छाम्यहमपि द्रष्टुं भ्रातरौ रामलक्ष्मणौ ॥ नैच्छे चिरं धारयितुं प्राणांस्त्यक्ष्ये कलेवरं ॥ महर्षिस्त्वब्रवीदेवं दृष्टतत्त्वार्थदर्शनः ॥ १५ ॥
इत्यार्षे श्रीमद्रामायणे वा० किष्किंधाकांडे द्विषष्टितमः सर्गः ॥ ६२ ॥ एतैरन्यैश्च बहुभिर्वाक्यैर्वाक्यविशारदः ॥ मां प्रशस्या
भ्यनुज्ञाप्य प्रविष्टः स स्वमालयं ॥ १ ॥ कंदरात्तु विसर्पित्वा पर्वतस्य शनैः शनैः ॥ अहं विंध्यं समारुह्य भवतः प्रतिपालये ॥ २ ॥
अद्य त्वेतस्य कालस्य वर्षं साग्रशतं गतं ॥ देशकालप्रतीक्षोस्मि हृदि कृत्वा मुनेर्वचः ॥ ३ ॥ महाप्रस्थानमासाद्य स्वर्गते तु नि
शाकरे ॥ मां निर्दहति संतापो वितर्कैर्बहुभिर्वृतं ॥ ४ ॥ उदितां मरणे बुद्धिं मुनिवाक्यैर्निवर्तये ॥ बुद्धिर्या तेन मे दत्ता प्राणानां र
क्षणे मम ॥ ५ ॥ सा मेपनयते दुःखं दीप्तेवाग्निशिखा तमः ॥ बुध्यता च मया वीर्यं रावणस्य दुरात्मनः ॥ ६ ॥

((निमां प्रशस्य भाविदेवकार्यसा
धकत्वेन स्तुत्वा अभ्यनुज्ञाप्य आमंत्र्य ॥ १ ॥ पर्वतकंदरादहं शनैः शनैः विसर्पित्वा निःसृत्य विंध्यां विंध्यशिखरं ॥ २ ॥ एतस्य कालस्य । मुनिसंवादानंतरकालस्य
साग्रं वर्षशतं गतं शतशब्दोनंतवाची तेनाकिंचिदधिकाष्टवर्षसहस्राणीत्यर्थः प्राक्तनथैवमेनोक्तेः ॥ ३ ॥ वितर्कैर्विचारैः संतापः पक्षादिहीनजीवनजः ॥
४ ॥ निवर्तयेस्मेति शेषः । मम प्राणानां रक्षणे तेन तया मे बुद्धिर्दत्तेत्यन्वयः रावणस्य वीर्यं बुध्यता मया तु अवीर्यादल्पमिति जानता ॥ ५ ॥ ६ ॥ ७ ॥

कथं नत्वा नेति संतर्जितः नत्रु सीतेयज्ञानादरक्षणाभ्राम आह तस्या इति हा राम हा लक्ष्मणेत्येवमात्मकं तस्या विलपितं श्रुत्वा तौ रामलक्ष्मणौ सीताविना कृतौ इति सिद्धानां वचः श्रुत्वा ऽ तया विना कृतौ रामलक्ष्मणाविति सुज्ञानं रुपां रामपत्नीति च सुज्ञानमिति भावः ॥ ७ ॥ तस्मा दृशरथस्नेहाद्वश्यकर्त्तव्यं प्रियं मे पुत्रेणोत्पादितं ॥ ८ ॥ अरुणाछदैः अरुणवर्णपत्रैः ॥ ९ ॥ १० ॥ ११ ॥ १२ ॥ सिद्धिप्रत्ययः कार्यसिद्धिविश्वासः ॥ १३ ॥ गतिं जिज्ञासुः उत्पतितपक्षैः घाग्वमुखग

पुत्रः संतर्जितो वाग्भिर्नत्वा ता मैथिली कथं ॥ तस्या विलपितं श्रुत्वा तौ च सीतावियोजितौ ॥ ७ ॥ तमेद दशरथस्नेहात्पुत्रेणोत्पादितं प्रियं ॥ तस्यत्वेवं ब्रुवाणस्य संहृष्टैर्वानरैः सह ॥ ८ ॥ उत्पेतनुस्तदा पक्षौ समक्षं वनचारिणां ॥ स दृष्ट्वा स्वां तनुं पक्षैरुद्गतैररुणाछदैः ॥ ९ ॥ प्रहर्षमतुलं लेभे वानरांश्चेदमब्रवीत् ॥ निशाकरस्य राजर्षेः प्रसादादमितौजसः ॥ १० ॥ आदित्यरश्मिनिर्दग्धौ पक्षौ पुनरुपस्थितौ ॥ यौवने वर्त्तमानस्य ममासीद्यः पराक्रमः ॥ ११ ॥ तमेवाद्यावगच्छामि बलं पौरुषमेव च ॥ सर्वथा क्रियतां यत्नः सीतामधिगमिष्यथ ॥ १२ ॥ पक्षलाभो ममायं वः सिद्धिप्रत्ययकारकः ॥ इत्युक्त्वा तान्हरीन्सर्वान्संपातिः पतगोत्तमः ॥ १३ ॥ उत्पपात गिरेः शृंगाज्जिज्ञासुः खगमो गतिं ॥ तस्य तद्वचनं श्रुत्वा प्रीतिसंहृष्टमानसाः ॥ १४ ॥ बभूवुर्हरिशार्दूला विक्रमाभ्युदयोन्मुखाः ॥ अथ पवनसमानविक्रमाः प्लवगवराः प्रतिलब्धपौरुषाः ॥ अभिजिदभिमुखां दिशं ययुर्जनकसुतापरिमार्गणोन्मुखाः ॥ १५ ॥ इत्यार्षे श्रीमद्रामायणे किष्किंधाकांडे त्रिषष्टितमः सर्गः ॥ ६३ ॥

निर्विण्णान्गमितुं विक्रमसाध्येऽभ्युदये सीताधिगमनरूपे उन्मुखाः
१४ ॥ प्रतिलब्धं प्राप्तं पौरुषं पौरुषप्रवृत्तिकालो यैस्ते अभिजिदभिमुखां अभिजिन्नक्षत्रसंमुखां दिशं दक्षिणां ययुः ऽभिजिन्वाउलकात्मकर्मणिक्किप् अभिजनत्यो रावण संमुखो यस्यां तां दिशं ॥ १५ ॥ मायमानः ॥ इति रा॰ रा॰ भो॰ रा॰ कि॰ त्रिषष्टितमः सर्गः ॥

कनकरीमाचतुःषष्ठिः ॥ ६४ ॥ आख्याताः आख्यातसीतावृत्तांताः संगताः मिलिताः ॥ १ ॥ रावणाक्षयं रावणनाशं रावणस्यहं चोद्दिश्योक्तं वचनं श्रुत्वा ॥ २ ॥ तं देशं
सागरतीरवासरूपदेशमभिगम्य यत्रेत्यादिः यत्र महतो लोकस्य सचंद्रार्कग्रहस्य कृत्स्नं प्रतिविंवं स्थितं तं समुद्रं ददृशुः प्रतिविंवमवस्थितमिति

आख्याता रघुराजेन समुत्तस्थुस्प्लवंगमाः ॥ संगताः प्रीतिसंयुक्ता विनेदुः सिंहविक्रमाः ॥ १ ॥ संपातेर्वचनं श्रुत्वा हरयो रा
वणाक्षयं ॥ हृष्टाः सागरमाजग्मुः सीतादर्शनकांक्षिणः ॥ अभिगम्य तु तं देशं ददृशुर्भीमविक्रमाः ॥ कृत्स्नं लोकस्य म
हतः प्रतिविंवमवस्थितं ॥ ३ ॥ दक्षिणस्य समुद्रस्य समासाद्योत्तरां दिशं ॥ सन्निवेशं ततश्चक्रुर्हरिवीरा महाबलाः ॥ ४ ॥
प्रसुप्तमिव चान्यत्र क्रीडंतमिव चान्यतः ॥ क्वचित्पर्वतमात्रैश्च जलराशिभिरावृतं ॥ ५ ॥ संकुलं दानवेंद्रैश्च पाताल
तलवासिभिः ॥ रोमहर्षकरं दृष्ट्वा विषेदुः कपिकुंजराः ॥ ६ ॥ आकाशमिव दुष्पारं सागरं प्रेक्ष्य वानराः ॥ विषेदुः सहिताः
सर्वे कथं कार्यमिति ब्रुवन् ॥ ७ ॥ विषण्णां वाहिनीं दृष्ट्वा सागरस्य निरीक्षणात् ॥ आश्वासयामास हरीन् भयार्त्तान् हरि
सत्तमः ॥ ८ ॥ न विषादे मनः कार्यं विषादो दोषवत्तरः ॥ विषादो हंति पुरुषं बालं क्रुद्ध इवोरगः ॥ ९ ॥ यो विषादं प्रसह
ते विक्रमे समुपस्थिते ॥ तेजसा तस्य हीनस्य पुरुषार्थो न सिध्यति ॥ १० ॥

प्राचीनपाठः प्रतिविंवमिवास्थितमित्याधुनिकपाठेन युक्तः कृत्स्न
लोकप्रतिविंवभावात् प्रसिद्धेः ॥ ३ ॥ तस्य च दक्षिणसमुद्रस्योत्तरां दिशमाश्रित्य सन्निवेशं अवस्थितिस्थलं चक्रुः ॥ ४ ॥ प्रसुप्तमिव चान्यत्र निस्तरंगप्रदे
शात् अन्यतः अन्यत्र पर्वतमात्रैः तत्सदृशैर्जलराशिभिरूर्मिभिः ॥ ५ ॥ ६ ॥ ब्रुवन् अब्रुवन् ॥ ७ ॥ हरिसत्तमः अंगदः ॥ ८ ॥ विषादो दोषवत्तर इत्यस्य विवरणं
विषादो हंतीत्यादि ॥ ९ ॥ प्रसह्य विषादे प्रवर्तते ॥ तेजसा हीनस्य
विषादवशादिति भावः ॥ १० ॥

११॥१२॥१३॥ अनुमान्य अभियज्य ॥१४॥ सत्यसंधंसत्यासंधासीताप्रत्यर्पणप्रतिज्ञायस्यताहशं ॥१५॥१६॥१७॥१८॥१९॥२०॥ अपदेशकुलेविगतोऽपदेशःक

तस्यांरात्र्यांव्युष्टीतायामंगदोवानरैःसह ॥ हरिवृद्धैःसमागम्यपुनर्मंत्रममंत्रयत् ॥११॥ सावानराणांध्वजिनीपरिवार्यांगदंवभौ ॥ वा
सवंपरिवार्यैवमरुत्तांवाहिनीस्थिता ॥१२॥ कोन्यस्तांवानरींसेनांशक्तःस्तंभयितुंभवेत् ॥ अन्यत्रवालितनयादन्यत्रचहनूमतः
॥१३॥ ततस्तान्हरिवृद्धांश्चतच्चसैन्यमरिंदमः ॥ अनुमान्यांगदःश्रीमान्वाक्यमर्थवदब्रवीत् ॥१४॥ कइदानींमहातेजालंघयि
ष्यतिसागरं ॥ कःकरिष्यतिसुग्रीवंसत्यसंधमरिंदमं ॥१५॥ कोवीरोयोजनशतंलंघयेत्प्लवंगमः ॥ इमांश्चयूथपान्सर्वान्मोच
येत्कोमहाभयात् ॥१६॥ कस्यप्रसादाद्दाराँश्चपुत्रांश्चैवगृहाणिच ॥ इतोनिवृत्ताःपश्येमसिद्धार्थाःसुखिनोवयं ॥१७॥
कस्यप्रसादाद्रामंचलक्ष्मणंचमहावलं ॥ अभिगच्छेमसंहृष्टाःसुग्रीवंचवनौकसं ॥१८॥ यदिकश्चित्समर्थोवःसागरे
प्लवनेहरिः ॥ सददात्विहनःशीघ्रंपुण्यामभयदक्षिणां ॥१९॥ अंगदस्यवचःश्रुत्वानकश्चित्किंचिदब्रवीत् ॥ स्तिमिते
वाभवत्सर्वासानत्रहरिवाहिनी ॥२०॥ पुनरेवांगदःप्राहतान्हरीन्हरिसत्तमः ॥ सर्वेवलवतांश्रेष्ठाभवंतोदृढविक्रमाः ॥ व्य
पदेशकुलेजाताःपूजिताश्चाप्यभीक्ष्णशः ॥२१॥ नहिवोगमनेसंगःकदाचित्कस्यचिद्भवेत् ॥ ब्रुवध्वंयस्ययाशक्तिःप्लवने
प्लवगर्षभाः ॥२२॥ इत्यार्षेश्रीमद्रामायणेकिष्किंधाकांडेचतुःषष्टितमःसर्गः ॥६४॥ ॥६॥ ॥६॥ ॥

लंकोयस्मात्ताहशेकुलेपूजिताराज्ञामहावलत्वेनसत्कृताः २१ संगःप्रतिबंधः ब्रुवध्वंब्रूध्वं २२ स्वरसान्तः इतिश्रीरामायणेकिष्किं॰चतुःषष्टितमःसर्गः ॥६४

.207

कनकसुपंचषष्टिः ॥ अथेति ॥ १ ॥ २ ॥ ३ ॥ त्रिंशद्विमर्थेत्रिंशतमित्यार्षं ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ पराक्रमेगमने ॥ ९ ॥ वृद्धतमस्तेषामितिनिर्धारणेषष्ठी ॥ १० ॥

अथांगदवचः श्रुत्वाते सर्वेवानरर्षभाः ॥ स्वंस्वंगतौ समुत्साहमूचुस्तत्रयथाक्रमं ॥ १ ॥ गजोगवाक्षोगवयः शरभोगंधमादनः
मैंदश्चद्विविदश्चैवअंगदोजांववांस्तथा ॥ २ ॥ आबभाषेगजस्तत्रप्लवेयंदशयोजनं ॥ गवाक्षोयोजनान्याहगमिष्यामीतिविं
शति ॥ ३ ॥ शरभोवानरस्तत्रवानरांस्तानुवाचह ॥ त्रिंशतंतुगमिष्यामियोजनानांप्लवंगमाः ॥ ४ ॥ ऋषभोवानरस्तत्र
वानरांस्तानुवाचह ॥ चत्वारिंशद्गमिष्यामियोजनानांनसंशयः ॥ ५ ॥ वानरांस्तुमहातेजाअब्रवीद्गंधमादनः ॥ योजनानां
गमिष्यामिपंचाशत्तुनसंशयः ॥ ६ ॥ मैंदस्तुवानरस्तत्रवानरांस्तानुवाचह ॥ योजनानांपरंषष्ठिमहंप्लवितुमुत्सहे
७ ॥ ततस्तत्रमहातेजाद्विविदः प्रत्यभाषत ॥ गमिष्यामिनसंदेहः सप्ततिंयोजनान्यहं ॥ ८ ॥ सुषेणस्तुमहातेजाः स
त्ववान्कपिसत्तमः ॥ अशीतिंप्रतिजानेहंयोजनानांपराक्रमे ॥ ९ ॥ तेषांकथयतांतत्रसर्वांस्ताननुमान्यच ॥ ततोवृद्धत
मस्तेषांजांववान्प्रत्यभाषत ॥ १० ॥ पूर्वमस्माकमप्यासीत्कश्चिद्गतिपराक्रमः ॥ तेवयंवयसः पारमनुप्राप्ताःस्मसांप्रतं ॥ ११ ॥
किंतुनैवंगतेशक्यमिदंकार्यमुपेक्षितुं ॥ यदर्थंकपिराजश्चरामश्चकृतनिश्चयौ ॥ १२ ॥ सांप्रतंकालमस्माकंयागतिस्तां
निबोधत ॥ नवतिंयोजनानांतुगमिष्यामिनसंशयः ॥ १३ ॥ तांश्चसर्वान्हरिश्रेष्ठान्जांववानिदमब्रवीत् ॥ नखल्वेतावदेवा

सत्त्वः इत्यर्थः ॥ ११ ॥ एवंगतेकृच्छ्रप्राप्तेयदर्थंकृतनिश्चयौ ॥ अस्मन्नतिष्ठितमयैतद्विषयेकृतनिश्चयौसांप्रतंकालंसंप्रतिकाले ॥ १३ ॥ १४ ॥ रामरामरामः

१५॥१६॥ एतावताप्लवनेन॥१७॥१८॥१९॥२०॥ काममितिशतसहस्रमपियोजनानांगंतुंत्वंकामंसमर्थस्तथापिस्वामिनस्तवएषविधिःप्लवनंनयुक्तमित्युच्य
तेस्माभिरितिशेषः। इममेवार्थंप्रपंचयति। योजनानामितिशतसहस्रमितिशेषः गंतुंप्रतिनिवर्तितुंचशक्तइत्यर्थः॥२१॥ प्रेषयितास्वामीनप्रेष्यःप्रेष्येरि

मयावैरोचनेयज्ञेप्रभविष्णुःसनातनः। प्रदक्षिणीकृतःपूर्वंक्रममाणस्त्रिविक्रमः॥१५॥ सइदानीमहंवृद्धःप्लवनेमंदविक्र
मः॥ यौवनेचतदासीन्मेबलमप्रतिमंपरं॥१६॥ संप्रत्येतावदेवाद्यशक्यंमेगमनेस्वतः॥ नैतावताचसंसिद्धिःकार्यस्यास्य
भविष्यति॥७॥ अथोत्तरमुदारार्थमब्रवीदंगदस्तदा॥ अनुमान्यतदाप्राज्ञोजांववंतंमहाकपिं॥१८॥ अहमेतद्गमिष्या
मियोजनानांशतंमहत्॥ निवर्तनेतुमेशक्तिःस्यान्नवेतिननिश्चितं॥१९॥ तमुवाचहरिश्रेष्ठंजांववान्वाक्यकोविदः॥ ज्ञाय
तेगमनेशक्तिस्तवहर्यृक्षसत्तम॥२०॥ कामंशतसहस्रंवानह्येषविधिरुच्यते॥ योजनानांभवान्शक्तोगंतुंप्रतिनिव
र्तितुं॥२१॥ नहिप्रेषयितातातस्वामीप्रेष्यःकथंचन॥ भवतायंजनःसर्वःप्रेष्यःप्लवगसत्तम॥२२॥ भवान्कलत्रम
स्माकंस्वामिभावेव्यवस्थितः॥ स्वामीकलत्रंसैन्यस्यगतिरेषापरंतप॥२३॥ अपिचैतस्यकार्यस्यभवान्मूलमरिंदम य
स्मात्कलत्रवत्तातप्रतिपाल्यःसदाभवान्॥२४॥

तिशेषः॥२२॥ भवान्कलत्रंकलत्रवद्दृढस्वीयस्त्वमायावत्प्राणावलंपरिपाल्यइत्यर्थः स्वा
मीभावेस्वामित्वेएतेनलोकेकलत्रस्यभर्त्तासंसारव्यवहारविषयेआज्ञाप्यत्वमुक्तंतत्रकलत्रंलोकनिदर्शितंतस्मात्स्वामीसैन्यस्यकलत्रवत्परिपाल्यःस्वामिनाच
कलत्रेणाभर्त्रेवसैन्यमाज्ञाप्यंस्याद्गतिःलोकस्येतिशेषः॥२३॥ तदेवस्पष्टमाह तस्मात्कलत्रवदिति॥ २४ ॥श्रीरामायरामचंद्रायनमः॥ ६ ॥ रामरामरामराम

208

वयोनिश्चयगुणागुणाभूताः अप्रधानभूताः इतियावत् तादृशाः फलोदयाः फलोत्पत्तयः सिध्यंति ॥२५॥ साधनपदस्यैवव्याख्यांहेतुरिति ॥२६॥ गुरुर्युवराजत्वात्
उ॥२८॥ यद्यहंनगमिष्यामि ॥ अन्यश्चनगमिष्यति ॥ तदापुनर्मरणमेवज्यायइतिभावः ॥२९॥ तस्यधीमतोहरिपतेः संदेशमकृत्वाप्राणानांपरिरक्षणंनपश्यामि
तत्रापिलंकामपिगत्वा आगमनशक्त्यभावात्तंनपश्यामीत्यन्वयः ॥३०॥ सुग्रीवः प्रसादेत्यर्थंकोपेचेश्वरः निग्रहानुग्रहाधिकृतइतिभावः गमनेकिंचिद्गागमने ॥३१

मूलमर्थस्यसंरक्ष्यमेषकार्यविदांनयः ॥ मूलेहिसतिसिध्यंतिगुणाः सर्वेफलोदयाः ॥२५॥ तद्भवानस्यकार्यस्यसाधनंसत्यवि
क्रम ॥ बुद्धिविक्रमसंपन्नोहेतुरत्रपरंतप ॥२६॥ गुरुश्चगुरुपुत्रश्चत्वंहिनः कपिसत्तम ॥ भवंतमाश्रित्यवयंसमर्थाह्य
र्थसाधने ॥२७॥ उक्तवाक्यंमहाप्राज्ञंजांबवंतंमहाकपिः ॥ प्रत्युवाचोत्तरंवाक्यंवालिसूनुरथांगदः ॥२८॥ यदिनाहंगमि
ष्यामिनान्योवानरपुंगवः ॥ पुनः खल्विदमस्माभिःकार्यंप्रायोपवेशनं ॥२९॥ नह्यकृत्वाहरिपतेः संदेशंतस्यधीमतः ॥
तत्रापिगत्वाप्राणानांनपश्येपरिरक्षणं ॥३०॥ सहिप्रसादेचात्यर्थंकोपेचहरिरीश्वरः ॥ अतीत्यतस्यसंदेशंविनाशो
गमनेभवेत् ॥३१॥ तत्तथाह्यस्यकार्यस्यनभवत्यन्यथागतिः ॥ तद्भवानेवदृष्टार्थःसंचिंतयितुमर्हति ॥३२॥ सोंगदेनत
दावीरःप्रत्युक्तःप्लवगर्षभः ॥ जांबवानुत्तमंवाक्यंप्रोवाचेदंततोंगदं ॥३३॥ तस्यतेवीरकार्यस्यनकिंचित्परिहास्यते ॥ ए
षसंचोदयाम्येनंयःकार्यंसाधयिष्यति ॥ ॥३४॥

तत्तस्मादस्यकार्यस्यसमुद्रलंघनस्यगतिः प्राप्तिरन्यथायथानभवति अस्तिवायथानभवतिहिनिश्चयेननतथाभवानेवमुद्दिश्यसंचिंतयितुमर्हति यतोभवान्दृ
ष्टार्थबुद्धिमत्वाच्चिरदृष्टत्वात् वापरोक्षीकृतसमस्तकार्याकृत्यतत्वार्थ इत्यर्थः ॥३२॥३३॥ कार्यस्यनपरिहास्यतेशेषेषष्ठी अनुष्ठानमितिशेषोवा ॥ स्थवःस
षोहमित्यर्थः एतेन ॥३४॥

एकांतमाश्रित्येति। पृथग्वहिः कश्चिदिति शेषः ॥ ३५ ॥ मंडमानः ॥ इति रामाभिरामे श्रीरा० किष्किंधाकांडे पंचषष्टितमः सर्गः ॥ ६५ ॥ कनकलुषट्षष्ठिः ॥ अनेके
ति ॥ १ ॥ एवमब्रवीदित्येवं शशार्थौ वीरवानरेति ॥ वानरलोकस्य वीरेत्यन्वयः ॥ निर्धारणे षष्ठी ॥ यद्वा हे वीर वानरलोकस्य कृत्यमुद्दिश्य किं न जल्पसि इत्यन्वयः ॥
२ ॥ वलेन च सम इत्यनुकर्षः ॥ ३ ॥ अरिष्टनेमिनः काश्यपस्य नाम्नवमार्षसर्वपक्षिणामुत्तमो गरुत्मानिव भवान् ॥ सर्वोत्तमो विख्यात इत्यन्वयः ॥ ४ ॥ महावल इ

ततः प्रतीतं प्लवतां वरिष्ठमेकांतमाश्रित्य सुखोपविष्टं ॥ संचोदयामास हरिप्रवीरो हरिप्रवीरं हनुमंतमेवं ॥ ३५ ॥ इत्यार्षे श्री
मद्रामायणे वा० किष्किंधाकांडे पंचषष्टितमः सर्गः ॥ ६५ ॥ अनेकशतसाहस्रीं विषण्णां हरिवाहिनीं ॥ जांववान्समुदीक्ष्यैवं
हनूमंतमथाब्रवीत् ॥ १ ॥ वीरवानरलोकस्य सर्वशास्त्रविदांवर ॥ तूष्णीमेकांतमाश्रित्य हनुमन्किं न जल्पसि ॥ २ ॥ हनु
मन्हरिराजस्य सुग्रीवस्य समो ह्यसि ॥ रामलक्ष्मणयोश्चापि तेजसा च वलेन च ॥ ३ ॥ अरिष्टनेमिनः पुत्रो वैनतेयो महावलः
गरुत्मानिति विख्यात उत्तमः सर्वपक्षिणां ॥ ४ ॥ वहुशो हि मया दृष्टः सागरे स महावलः ॥ भुजंगानुद्धरन्पक्षी महावाहु
र्महावलः ॥ ५ ॥ पक्षयोर्यद्वलं तस्य भुजवीर्यवलं तव ॥ विक्रमश्चापि तेजश्च न ते तेनापिहीयते ॥ ६ ॥ वलं बुद्धिश्च तेजश्च स
त्त्वं च हरिपुंगव ॥ विशिष्टं सर्वभूतेषु किमात्मानं न सज्जसे ॥ ७ ॥ ● ॥

त्येकत्र वलं शारीरं परत्रांतरमिति भेदः ॥ ५ ॥ भुजवीर्यवलं तवेति प्राचीनपाठेन तस्य पक्षयोर्यद्वलं तव च यद्भुजवीर्यवलं तदुभयं तुल्यमिति शेषः। न विक्रमश्च तेजश्च तेन ग
रुत्मता नापहीयते न न्यूनो भवति ॥ ६ ॥ विशिष्टमात्मानं अभिजनवलपराक्रमवैभवविशिष्टमात्मानं किं न सज्जसे ॥ समुद्रलंघनाय किं न सज्जीकरोषीत्यर्थः ॥ ७ ॥

209

तदेवं बोधयति अप्सराप्सरसामिति ॥ अप्सरा इत्येकवचनांतोपि संधिरार्षः अप्सरा इत्यावंत आर्षः इत्यन्ये पुंजिकस्थलेति नाम्ना या विख्याता सैव केसरिणः पत्नी अंजनेति
नाम्ना ख्याता ॥ ८ ॥ तस्या वानरपत्नीत्वे हेतुः अभिशापादिति । अभिशापाद्वानरीजन्मा कपित्वे कपिशरीरत्वेपीत्यर्थः कामरूपिणी देवतास्वभावानुवृत्तेरिति
भावः ॥ ९ ॥ अत्र तज्जन्मप्रत्राह दुहितेति ॥ १० ॥ अंबुदसन्निभे इति पर्वताग्रविशेषणं ॥ ११ ॥ रक्ता दशाः सांप्रतं तंतवो यस्य तत् ॥ १२ ॥ सुसंहतौ ॥ सुसंश्लि

अप्सराप्सरसांश्रेष्ठा विख्याता पुंजिकस्थला ॥ अंजनेति परिख्याता पत्नी केसरिणो हरेः ॥ ८ ॥ विख्याता त्रिषु लोकेषु रूपेणाप्र
तिमा भुवि ॥ अभिशापादभूत्तात कपित्वे कामरूपिणी ॥ ९ ॥ दुहिता वानरेंद्रस्य कुंजरस्य महात्मनः । मानुषं विग्रहं कृत्वा रूपयौ
वनशालिनी ॥ १० ॥ विचित्रमाल्याभरणा कदाचित्क्षौमधारिणी ॥ अचरत्पर्वतस्याग्रे प्रावृडंबुदसन्निभे ॥ ११ ॥ तस्या वस्त्रं
विशालाक्ष्याः पीतरक्तदशं शुभं । स्थितायाः पर्वतस्याग्रे मारुतोपहरच्छनैः ॥ १२ ॥ स ददर्श ततस्तस्या वृत्तावूरू सुसंहतौ ।
स्तनौ च पीनौ सहितौ सुजातं चारु चाननं ॥ १३ ॥ तां बलादायतश्रोणीं तनुमध्यां यशस्विनीं ॥ दृष्ट्वैव शुभसर्वांगीं पवनः
काममोहितः ॥ १४ ॥ स तां भुजाभ्यां दीर्घाभ्यां पर्यष्वजत मारुतः । मन्मथाविष्टसर्वांगो गतात्मा तामनिंदितां ॥ १५ ॥ सा तु
तत्रैव संभ्रांता सुव्रता वाक्यमब्रवीत् ॥ एकपत्नीव्रतमिदं को नाशयितुमिच्छति ॥ १६ ॥ छ ॥ रामाय नमः ॥ छ ॥

ष्टौ सहितौ परस्परसंसक्तौ पीनौ च स्तनौ ददर्श ॥ १३ ॥ पवनः काममोहित आसीदिति शेषः । १४ ॥ मारुतस्तां पर्यष्वजत् । मन्मथाविष्टसर्वांगः कामाक्रांत
क्रांताज्ञानकर्मेंद्रियः अत एव गतात्मा तद्गर्भं प्रविष्टात्मतेजाः बभूव देवत्वादिनापि योनिसंबंधेन निजतेजःप्रवेशनमिति बोध्य । १५ । एकः पतिर्यस्याः तद्व्रतं तं धर्मं ॥ १६ ॥

त्वां न हिंसामि योनिसंबंधेन तावकमेकपत्नीव्रतं न नाशयामि। अनेन बलात् परपुरुषेणालिंगनादावपि न पातिव्रत्यभंगः किंतु योनिभोगेनैवेति सूचितं ॥१७॥
यत् यस्मात्त्वां परिष्वज्य मनसा मानसभोगेनैव त्वां गतोस्मि स्वतेजसा त्वद्गर्भे प्राप्तोस्मि तस्मादीदृशस्ते पुत्रो भविष्यति ॥१८॥ मया मारुतेन ॥१९॥ ततस्तुह्यम
नसा। महादेव तत्तेजः संक्रमकथनात् गुहायां तत्सर्वत्र गुहायां तदानीमेवेति भावः ॥२०॥ फलमिति। जिघृक्षुरुत्पत्य उत्प्लुत्य दिवमभ्युत्थित इतियोजना उदय

अंजनाया वचः श्रुत्वा मारुतः प्रत्यभाषत। न त्वां हिंसामि सुश्रोणि मा भूत्ते मनसो भयं ॥१७॥ मनसास्मि गतो यत्त्वां परिष्वज्य य
शस्विनी। वीर्यवान्बुद्धिसंपन्नस्तव पुत्रो भविष्यति ॥१८॥ महासत्त्वो महातेजा महाबलपराक्रमः ॥ लंघने प्लवने चैव भवि
ष्यति मया समः ॥१९॥ एवमुक्ता ततस्तुष्टा जननी ते महाकपे। गुहायां त्वां महाबाहो प्रजज्ञे प्लवगर्षभ ॥२०॥ अभ्यु
त्थितं ततः सूर्यं बालो दृष्ट्वा महावने ॥ फलं चेति जिघृक्षुस्त्वमुत्प्लुत्याभ्युत्पतो दिवं ॥२१॥ शतानि त्रीणि गत्वाथ योजना
नां महाकपे। तेजसा तस्य निर्धूतो न विषादं गतस्ततः ॥२२॥ त्वामप्युपगतं तूर्णमंतरिक्षं महाकपे ॥ क्षिप्तमिंद्रेण ते व
ज्रं कोपाविष्टेन तेजसा ॥२३॥ तदा शैलाग्रशिखरे वामो हनुरभज्यत। ततोभिनामधेयं ते हनुमानिति कीर्त्तितं ॥२४॥
ततस्त्वां निहतं दृष्ट्वा वायुर्गंधवहः स्वयं ॥ त्रैलोक्यं भृशसंक्रुद्धो न ववौ वै प्रभंजनः ॥२५॥

कालिकभास्करस्यात्र फलवद्रूक्ष्यत्वात् फल
बुद्धिविषयत्वं यथाजातमात्राऽजादिबालानां धात्रीस्तनवासनया स्तनपानादौ प्रवृत्तिस्तथैवास्य जातमात्रस्य वानरोचितफलादानप्रवृत्तिरिति बोध्यं ॥२१॥ तस्य रवेस्तेजसा
निर्धूतः क्षिप्तोपि ततः वायुबलवत्त्वात् न विषादं गतः ॥२२॥ तूर्णं शीघ्रं अंतरिक्षमुपगतं प्राप्तं त्वां दृष्ट्वा इंद्रेण ते तव शरीरे वज्रं क्षिप्तं ॥२३॥ तदा तस्मिन्काले ॥२४॥ त्रै
लोक्यं न ववौ न गच्छति स्म ॥२५॥

२६ ॥ २७ ॥ वज्रस्यनिपातेनचाद्रिशौनिपातेनचविरुजं। तत्रनिमित्तपीडाभाववंतंनेन[illegible]नुत्पादितव्यथमितियावत् ॥ २८ ॥ २९ ॥ मारुतस्यौरसइतितथादर्शितंप्राक् ३० ॥ कपिराजःसुग्रीवः ३१ ॥ त्रिविक्रमेत्रिविक्रमावतारसमये ३२ ॥ देवशासनात्संचिताःयाभिःसागरेप्रक्षिप्यअमृतंनिर्मथ्यंनिमथनेनलभ्यं ३३ ॥

संत्रांताश्चसुराःसर्वेत्रैलोक्येक्षुभितेसति। प्रसादयंतिसंक्रुद्धंमारुतंभुवनेश्वराः ॥ २६ ॥ प्रसादितेचपवनेब्रह्मातुभ्यंवरंददौ। अशस्त्रवध्यतांतातसमरेसत्यविक्रमः ॥ २७ ॥ वज्रस्यचनिपातेनविरुजंत्वांसमीक्ष्यच। सहस्रनेत्रःप्रीतात्माददौते वरमुत्तमं ॥ २८ ॥ स्वच्छंदतश्चमरणंतवस्यादितिवैप्रभो। सत्वंकेसरिणःपुत्रःक्षेत्रजोभीमविक्रमः ॥ २९ ॥ मारुतस्यौरसःपुत्रस्तेजसाचापितत्समः ॥ त्वंहिवायुसुतोवत्सप्लवनेचापितत्समः ॥ ३० ॥ वयमद्यगतप्राणाभवानस्मासुसांप्रतं। दाक्ष्यविक्रमसंपन्नःकपिराजइवापरः ॥ ३१ ॥ त्रिविक्रमेमयातातसशैलवनकानना। त्रिःसप्तकृत्वःपृथिवीपरिक्रांताप्रदक्षिणं ॥ ३२ ॥ तदाचौषधयोस्माभिःसंचितादेवशासनात् ॥ निर्मथ्यममृतंयाभिस्तदानींनोमहद्बलं ॥ ३३ ॥ सइदानीं महंवृद्धःपरिहीनपराक्रमः। सांप्रतंकालमस्माकंभवान्सर्वगुणान्वितः ॥ ३४ ॥ तद्विजृंभस्वविक्रांतःप्लवतामुत्तमोह्यसि। त्वद्वीर्यंद्रष्टुकामाहिसर्वावानरवाहिनी ॥ ३५ ॥ उत्तिष्ठहरिशार्दूललंघयस्वमहार्णवं। पराहिसर्वभूतानांहनुमन्याग

४८
किष्कि

सांप्रतंकालमितिसप्तम्यर्थेद्वितीयाअस्माकमितिनिर्धारणेषष्ठीअस्मिन्कालेऽस्माकंमध्येभवानेवसर्वगुणान्वितइत्यर्थः ॥ ३४ ॥ तद्विजृंभस्वनिःसीमनिजबलविजृंभणंकुरु ॥ ३५ ॥ उत्तिष्ठलंघयस्वेत्यत्रहेतुःपराहीतिहेहनुमन्पराश्रेष्ठतरायातवगतिर्लंकाद्वीपगमनंसासर्वभूतानामुपकारायनकेवलमस्माकमेवेतिशेषः ॥ ३६ ॥

विषण्णाः अर्थस्य स्वाः साध्यात् वाहीनाः किमुपेक्षसे मानिनिश्चेष्टः ॥ २७ ॥ कपीनामृषभेण कपिश्रेष्ठेन कृत्स्नियायेनाक्षस्य साधारणः रूपं समुद्रतरणोचितम
हाविग्रहं प्रकृतेन दशयन्त्वा रूपमहत्त्वस्वल्पत्वकरणं नानुपपन्नं एवं जाम्बवता हनुमदभिजनपराक्रमादिज्ञापनेन स्वसहजबलाविर्भावाय ना
धात्तापनं हितं स्वस्य तदाविर्भावकारणमिति दैवकृतसमयः यद्यपि इतरादिके त्रयपेक्षितं वानराणामपि समुद्रसमुद्र परवर्द्धयास्तावलादिप
र्यंतगमनमुपदिष्टं तथापि तन्मार्गे समुद्रमध्ये विंशतित्रिंशदादियोजनेषु पर्वतानां सत्वात्स्वबलं वेन प्लवनेन तथा कष्टमिह हनुनिरवलंवश

विषण्णा हरयः सर्वे हनुमन्किमुपेक्ष्यसे ॥ विक्रमस्व महावेग विष्णुस्त्रीन्विक्रमानिव ॥ २७ ॥ ततः कपीनामृषभेण चोदितः
प्रतीतवेगः पवनात्मजः कपिः ॥ प्रहर्षयंस्तां हरिवीरवाहिनीं चकार रूपं पवनात्मजस्तदा ॥ २८ ॥ इत्यार्षे श्रीमद्रामा
यणे किष्किंधाकांडे षट्षष्टितमः सर्गः ॥ ६६ ॥ संहृष्टाञ्जृंभमाणं ते क्रमितुं शतयोजनं ॥ वेगेनापूर्यमाणं च सहसा वा
नरोत्तम ॥ १ ॥ सहसा शोकमुत्सृज्य प्रहर्षेण समन्विताः ॥ विनेदुस्तुष्टुवुश्चापि हनूमंतं महाबलं ॥ २ ॥ प्रहृष्टा विस्मिता
श्चापि ते वीक्षंते समंततः ॥ त्रिविक्रमं कृतोत्साहं नारायणमिव प्रजाः ॥ ३ ॥

नयोजनप्लवनमन्यासाध्यमिति निश्चेषः अत्रत्या मध्यपर्वतास्तुरा
क्षसैर्भक्ता मज्जिता दुर्गसिद्धये न वाश्रमज्जिता अतस्त्वाज्ञानुग्रीवेणानेनोक्ताः अतस्त्ववश्यमाशिंशे सर्गे पूर्वदिक्प्रेषितवानराः अपि समुद्रान्तरगतदेशमुपक्र
म्य गिरिभिर्यत्र गम्यं तत्र प्लवनेन वर्तुक्र ॥ ३८ ॥ रुत्तमानः ॥ कतककृतं षट्षष्टितमः ॥ इति रामाभिरामे श्रीरा० कि० षट्षष्टितमः सर्गः ॥ ६६ ॥ अथ षष्टीतमह
विग्रहस्य हनूमतो वानरबलाभ्यासनायनिजबलप्रख्यापनपूर्वं समुद्रलंघनाय महेंद्रपर्वतारोहणमाह तमिति जृंभमाणं वर्धमानं तेन वानराः ॥ १ ॥ २ ॥ कृतोत्साहं त्रिलो

॥ ३ ॥

2 1 1

[illegible]

समाविध्यास्फाल्य ॥ ४ ॥ ५ ॥ ६ ॥ अंबरीषंभ्राष्ट्रंतदुपमं ॥ अतस्तद्दीप्तंप्रज्वलत् ॥ अंगारवर्णाग्रतप्रभाश्रोपमामितियावत् ॥ स्वयंचविहंगमपावकइवाशोभत अंब
रीषोपमंदीप्तंविधूमइवपावकइतिप्राचीनःपाठः ॥ ७ ॥ ८ ॥ अरुजत् अग्रसंतंभिंदमानः हुताशनस्यसखाउच्यमानेगुणोयोवायुर्गमनशीलोऽनिलोऽस्ति ॥
९ ॥ तस्यमारुतस्याहमौरसःपुत्रःप्लवनेनगुणेनतत्समोऽस्मि ॥ १० ॥ मेरुंगिरिमसंगेनमध्येविश्रामायकंचित्क्षणमपिस्थितिराहित्येनैवसहस्रशःप

संस्तूयमानोहनुमान्व्यवर्धतमहाबलः ॥ समाविध्यचलांगूलंहर्षाद्बलमुपेयिवान् ॥ ४ ॥ तस्यसंस्तूयमानस्यहृष्टैर्वानरपुं
गवैः ॥ तेजसापूर्यमाणस्यरूपमासीदनुत्तमं ॥ ५ ॥ यथाविजृंभतेसिंहोविवृतेगिरिगह्वरे ॥ मारुतस्यौरसःपुत्रस्तथासंप्र
तिजृंभते ॥ ६ ॥ अशोभतमुखंतस्यजृंभमाणस्यधीमतः ॥ अंबरीषोपमंदीप्तंविधूमइवपावकः ॥ ७ ॥ हरीणामुत्थितोम
ध्यात्संप्रहृष्टतनूरुहः ॥ अभिवाद्यहरीन्वृद्धान्हनुमानिदमब्रवीत् ॥ ८ ॥ अरुजत्पर्वताग्राणिहुताशनसखोऽनिलः बल
वानप्रमेयश्चवायुराकाशगोचरः ॥ ९ ॥ तस्याहंशीघ्रवेगस्यशीघ्रगस्यमहात्मनः मारुतस्यौरसःपुत्रःप्लवनेनास्मित
त्समः ॥ १० ॥ उत्सहेयंहिविस्तीर्णमालिखंतमिवांबरं ॥ मेरुंगिरिमसंगेनपरिगंतुंसहस्रशः ॥ ११ ॥ बाहुवेगप्रणुन्नेनसा
गरेणाहमुत्सहे ॥ समाप्लावयितुंलोकंसपर्वतनदीह्रदं ॥ १२ ॥ ममोरुजंघावेगेनभविष्यतिसमुत्थितः ॥ समुत्थितमहा
ग्राहःसमुद्रोवरुणालयः ॥ १३ ॥ पन्नगाशनमाकाशेपतंतंपक्षिसेवितं ॥ वैनतेयमहंशक्तःपरिगंतुंसहस्रशः ॥ १४ ॥ ॥

रिगंतुमुत्सहे एकेनैववेगेनसहस्रवारंप्रदक्षिणंकर्तुंशक्तोमीत्याशयः ॥ ११ ॥ १२ ॥ समुत्थितः अतिक्रांतवेलः ॥ १३ ॥ पक्षिसेवितंपक्षिराजंवैनतेयमाकाशेपतंतं

महमपिसहस्रशःपरिगंतुंशक्तःतस्यैकपातंयावदहंसहस्रवारंप
तितुंशक्तइतियावत् ॥ १४ ॥

उदयगिरेः प्रस्थितं अनस्तमितमेव गंतुं गत्वा स्प्रष्टुमुत्सहे ॥ ततः तं स्पृष्ट्वा पुनः प्रत्याहृत्य अस्तपर्यंतमागम्य भुवमस्पृष्ट्वैव पुनस्तदभिमुखं गंतुमुत्सहे । प्रवेगेन प्र-
सृतैकयत्नेन स्ववंशनयोजनगमनागमनयोर्न कश्चित्स्रेयास इति ध्वनितं ॥१५॥१६॥ आकाशगोचराय हर्षादयः ॥ ७ ॥ लतानां विविधं पुष्पं पादपानां च
पुष्पं हरिष्यामीत्यन्वयः ॥१८॥ तच्च पुष्पं वायुवेगेनेव मम वेगेनाहृतं मामनुयास्यति ॥१९॥ स्वातेः पंथा इति स्वातिपथः छायापथ इत्युच्यते । सन्तु प्रकीर्णवडु-

उदयात्प्रस्थितं वापि ज्वलंतं रश्मिमालिनं ॥ अनस्तमितमादित्यमहं गंतुं समुत्सहे ॥१५॥ ततो भूमिमसंस्पृष्ट्वा पुनरागंतुमुत्स-
हे ॥ प्रवेगेनैव महता भीमेन प्लवगर्षभाः ॥१६॥ उत्सहेयमतिक्रांतुं सर्वानाकाशगोचरान् । सागरान् शोषयिष्यामि दारयिष्यामि मे-
दिनीम् ॥७॥ पर्वतांश्चूर्णयिष्यामि प्लवमानः प्लवंगमाः ॥ हरिष्याम्यूरुवेगेन प्लवमानो महार्णवे ॥१८॥ लतानां विविधं पुष्पं
पादपानां च सर्वशः । अनुयास्यति मामद्य प्लवमानं विहायसा ॥१९॥ भविष्यति हि मे पंथाः स्वातेः पंथा इवांबरे ॥ चरंतं घोर-
माकाशमुत्पतिष्यंतमेव च ॥२०॥ द्रक्ष्यंति निपतंतं च सर्वभूतानि वानराः ॥ महामेरुप्रतीकाशं मां द्रक्ष्यथ प्लवंगमाः ॥
॥२१॥ दिवमावृत्य गच्छंतं ग्रसमानमिवांबरं ॥ विधमिष्यामि जीमूतान्कंपयिष्यामि पर्वतान् ॥ सागरं शोषयिष्यामि प्ल-
वमानः समाहितः ॥२२॥ वैनतेयस्य वा शक्तिर्मम वा मारुतस्य वा । ऋते सुपर्णराजानं मारुतं वा महाबलं ॥ न तद्भूतं प्रपश्या-
मि यन्मां प्लवमानमनुव्रजेत् ॥२३॥

नक्षत्रः मम पंथा अपि प्रकीर्णवडुपुष्पकः चरंतं मार्गमध्ये इति आकाशं प्रति उत्पतिष्यंतमेव ॥२०॥ निपतंतं परेपारे इति शेषः द्रक्ष्यंति अनेनोत्पतनपतनयोरे-
ककालत्वोक्त्याऽतिवेगः सूचितः अंबरं ग्रसमानमिव मां द्रक्ष्यथेत्यन्वयः ॥२१॥२२॥ वैनतेयस्येति त्रयाणामेवैषां सर्वभूतातिशायिनी शक्तिर्नान्यस्येति भावः सु
नं मांतो ऋते यदनुव्रजेत्तद्भूतं न पश्यामि ॥२३॥

विष्णुपदमपाशे घ्रेणावरूढे शव्याप्तिर्दृश्यते ॥२४॥ नराणां त्रिविक्रमावतारकाले ॥२५॥ ममांहि संदेहपदेषु वस्तुषु प्रमाणमंतःकरणप्रवृत्तय इति न्यायेना
ह। तुष्यतीति निश्चयात्मकांतःकरणेनेत्यर्थः। तथा मे मनश्चेष्टा मनोव्यापारोऽनुमानरूपः किं पश्यसि किं विषयाचते मनश्चेष्टेत्यत्राह द्रक्ष्यामीति ॥२६॥
वेगजवौ पर्यायौ अद्भुतमिति यत्नेनाप्रमेयबलत्वं प्रकाश्यते नतु परिच्छेदः वस्तुनः तदभावात् रावणोपि वक्ष्यतीति न मारुते रस्तिगतिः प्रमाणमिति

निमेषांतरमात्रेण निरालंवनमंवरम् ॥ सहसा निपतिष्यामि घनाद्विद्युदिवोत्थिता ॥ २४ ॥ भविष्यति हि मे
रूपं प्लवमानस्य सागरं ॥ विष्णोः प्रक्रममाणस्य तदा त्रीन्विक्रमानिव ॥ २५ ॥ बुध्या चाहं प्रपश्यामि मनश्चे
ष्टा च मे तथा ॥ अहं द्रक्ष्यामि वैदेहीं प्रमोदध्वं प्लवंगमाः ॥ २६ ॥ मारुतस्य समो वेगे गरुडस्य समो जवे ॥ अ
युतं योजनानां तु गमिष्यामीति मे मतिः ॥ २७ ॥ वासवस्य सवज्रस्य ब्रह्मणो वा स्वयंभुवः ॥ विक्रम्य सहसा ह
स्तादमृतं तदिहानये ॥ २८ ॥ लंकां वापि समुत्क्षिप्य गच्छेयमिति मे मतिः ॥ तमेवं वानरश्रेष्ठं गर्जंतममि
तप्रभम् ॥ २९ ॥ प्रहृष्टा हरयस्तत्र समुदैक्षंत विस्मिताः ॥ तच्चास्य वचनं श्रुत्वा ज्ञातीनां शोकनाशनं ॥ ३० ॥

२७ ॥ वासवस्येति। वासवहस्ते स्वर्गिभोग्यममृतं। ब्रह्मणो हस्ते च योगिभोग्यममृतं। तदानयनवचोऽत्युक्त्यलंकारपरं ॥ २८ ॥ समुत्क्षिप्य स्वस्थाना
दुत्पाटनपूर्वकं टहीत्वा यद्यानतः परतोपि गच्छेयमित्यर्थः ॥ २९ ॥ ३० ॥ श्रीरामाय रामचन्द्राय नमः ॥ छ ॥ श्रीकृष्णाय नमः ॥ छ ॥

वेगवच्चिंतिसंतुद्भिः ॥ ३१ ॥ त्वत्संबंधिन्यां कल्याणाहृदौ रुचिरभिलाषो येषांति यद्वा नवकल्याणं वांछितारः ॥ ३२ ॥ वृद्धमतं आशीर्वादः ॥ ३३ ॥ तव यावदागमनं ए
कपादेन स्थास्यामः त्वरया प्रियं श्रोतुं एकपादेनास्थित्वा तपश्चरिष्याम इत्यर्थः ॥ ३४ ॥ ३५ ॥ प्लवने सति मम वेगं न कोपि धारयिष्यति शिलासंकटशिलास

उवाच परिसंहृष्टो जांववान्प्लवगेश्वरः ॥ वीरकेसरिणः पुत्र वेगवन्मारुतात्मजः ॥ ३१ ॥ ज्ञातीनां विपुलः शोकस्त्वया तात प्र
णाशितः ॥ तव कल्याणरुचयः कपिमुख्याः समागताः ॥ ३२ ॥ मंगलान्यर्थसिध्यर्थं करिष्यंति समाहिताः ॥ ऋषीणां च प्रसा
देन कपिवृद्धमतेन च ॥ ३३ ॥ गुरूणां च प्रसादेन संप्लवस्व महार्णवं ॥ स्थास्यामश्चैकपादेन यावदागमनं तव ॥ ३४ ॥ त्व
द्गतानि च सर्वेषां जीवनानि वनौकसां ॥ ततस्तु हरिशार्दूलस्तानुवाच वनौकसः ॥ ३५ ॥ कोपि लोके न मे वेगं प्लवने धार
यिष्यति ॥ एतानीह नगस्यास्य शिलासंकटशालिनः ॥ ३६ ॥ शिखराणि महेंद्रस्य स्थिराणि च महांति च ॥ येषु वेगं
गमिष्यामि महेंद्रशिखरेष्वहं ॥ ३७ ॥ नानाद्रुमविकीर्णेषु धातुनिष्यंदशोभिषु ॥ एतानि मम वेगं हि शिखराणि म
हांति च ॥ ३८ ॥ प्लवतो धारयिष्यंति योजनानामितः शतं ॥ ततस्तु मारुतप्रख्यः स हरिर्मारुतात्मजः ॥ आरुरोह नगश्रे
ष्ठं महेंद्रमरिमर्दनः ॥ ३९ ॥ वृतं नानाविधैः पुष्पैः मृगसेवितशाद्वलं ॥ लताकुसुमसंबाधं नित्यपुष्पफलद्रुमं ॥ ४० ॥

मूहः ॥ अत एवैतानि स्थिराणि शिखराणीत्यन्वयः ॥ ३६ ॥ ३७ ॥ धातुनिष्यंदः धातुसमूहः ॥ ३८ ॥ मारुतप्रख्यः मारुतसदृशः ॥ ३९ ॥ मृगैः सेवितं शाड्वलं तृणाव

किष्किंधा ॥ ४० ॥

सलिलोत्पीडोनिर्झरः॥ ४१ ॥उच्छ्रितोमहाबलोहनूमान्महेंद्रस्यमहद्भिःशृंगैर्विचचार॥शृंगाच्छृंगांतरंजगाम॥ ४२ ॥रासस्त्ववर्णिप्राणिशब्देनेतिशेषः॥ ४३ ॥
४४ ॥पानेसंसर्गेचकर्कशैरत्यासक्तैःगंधर्वाणांतथात्वंचस्वभावः॥ ४५ ॥शैलशृंगस्यशिलानामुत्पातः॥पतनंयस्मिंस्तः॥ ४६ ॥ ४७ ॥ ४८ ॥ मनसाजगामसः

सिंहशार्दूलसहितंमत्तमातंगसेवितं॥मत्तद्विजगणोद्घुष्टंसलिलोत्पीडसंकुलं॥ ४१ ॥महद्भिरुच्छ्रितैःशृंगैर्महेंद्रस्यमहाबलः॥
विचचारहरिश्रेष्ठोमहेंद्रसमविक्रमः॥ ४२ ॥बाहुभ्यांपीडितस्तेनमहाशैलोमहात्मना॥रराससिंहाभिहतोमहान्मत्तइवद्वि
पः॥ ४३ ॥मुमोचसलिलोत्पीडान्विप्रकीर्णशिलोच्चयः॥वित्रस्तमृगमातंगःप्रकंपितमहाद्रुमः॥ ४४ ॥नागगंधर्वमिथुनैः
पानसंसर्गकर्कशैः॥उत्पतद्भिर्विहंगैश्चविद्याधरगणैरपि॥ ४५ ॥त्यज्यमानमहासानुःसन्निलीनमहोरगः॥शैलशृंगशि
लोत्पातस्तदाभूत्समहागिरिः॥ ४६ ॥निश्वसद्भिस्तदातैस्तुभुजगैर्विषनिःसृतैः॥सपताकइवाभातिसतदाधरणीधरः
४७ ॥ऋषिभिस्त्राससंभ्रांतैस्त्यज्यमानःशिलोच्चयः॥सीदन्महतिकांतारेसार्थहीनइवाध्वगः॥ ४८ ॥सवेगवान्वेगसमाहि
तात्माहरिप्रवीरःपरवीरहंता॥मनःसमाधायमहानुभावोजगामलंकांमनसामनस्वी॥ ४९ ॥इत्यार्षेश्रीमद्रामायणेवा
ल्मीकीयेकिष्किंधाकांडेसप्तषष्ठितमःसर्गः॥ ६७ ॥किष्किंधाकांडसमाप्तं॥ ॥अतःपरंसुंदरकांडंतस्यायमाद्यश्लोकः॥

स्मारेत्यर्थः॥ ४९ ॥धधमानः॥इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेकिष्किंधाकांडेसप्तषष्ठितमःसर्गः॥ ६७ ॥कतकरीत्याऽष्टषष्ठित
मःसर्गः॥ ६८ ॥सरामप्रीयतांमह्यमंतर्यामीकुजाधवः॥शवरीस्वपदंनीतायेनपंपावलोकिना॥ १ ॥किष्किंधाकांडटीकासमाप्तं॥ शुभम् ॥

सुंदर ५

[illegible]

वाल्मीकीय रामायण

तिलकटीका

१श्रीगणेशायनमः॥ ॥सुंदरेयस्यदासोब्धिंतीर्त्वादृष्ट्वाचमैथिलीं। हृष्टासीत्तेन्यमप्यवोचन्नंरामंनौमिचिद्घनं॥१॥अथसमुद्रकूर्दनमिछन्निस्म·
ननइतिततःशत्रुकर्षणोहनुमान्·रावणानीतायाःरावणाहृतायाःसीतायाःपदमवस्थितिस्थानं·अन्वेष्टुंचारणैर्देवजातिविशेषैराचरि
तेक्रियमाणसंचारेपथिआकाशमार्गेगमनायइयेष॥१॥निष्प्रतिद्वंद्वंसहायांतररहितंप्रतिबंधरहितंच·अन्यैर्दुष्करंकर्मलं
घनपूर्वंसीतान्वेषणाकर्मसमुदग्रमुन्नतंशिरोग्रीवाचयस्यसः अतस्वगवांपतिर्वृषइवबभौ॥२॥वैडूर्यवर्णशाद्वलप्रदेशस्वसमु

श्रीरामचंद्रायनमः॥ ॥ततोरावणनीतायाःसीतायाःशत्रुकर्षणः॥इयेषपदमन्वेष्टुंचारणाचरितेपथि॥१॥दुष्करंनि
ष्प्रतिद्वंद्वंचिकीर्षन्कर्मवानरः॥समुदग्रशिरोग्रीवोगवांपतिरिवाबभौ॥२॥अथवैडूर्यवर्णेषुशाद्वलेषुमहाबलः
धीरःसलिलकल्पेषुविचचारयथासुखं॥३॥द्विजान्वित्रासयन्धीमानुरसापादपान्हरन्॥मृगांश्चसुबहून्निघ्नन्
प्रवृद्धइवकेसरी॥४॥नीललोहितमांजिष्ठपद्मवर्णैःसितासितैः॥स्वभावसिद्धैर्विमलैर्धातुभिःसमलंकृतं॥५॥

इजलवन्नशष्पमत्वमृदुत्वाभ्यामुरसाप्लवनसहशक्रियाकालिकोरःपेषणेनप्रहृष्टःकेसरीवविचचार॥४॥नीललोहितोरक्तश्यामःमांजिष्ठःकृष्ण
पांडुरइतिकनकःमांजिष्ठःपाटलइत्यन्येपद्मवर्णःप्रसिद्धःसितासितैःकल्माषैःकृष्णपांडुरैरितियावत्स्वभावसिद्धैःशैलस्वभावसिद्धैर्नतुकृत्रिमैर्विमलैर्धा
तुभिःसमलंकृतंकामरूपित्वादिविशेषणवद्भिर्यक्षादिभिरभीक्ष्णमाविश्यमानसागिरिवर्यस्यनलंतनचनागदरैराससमंतात्पुष्पैर्निष्ठन्सकपिःइंद्रेना
गइववभौगिरीइहसाम्यंस्यामलत्वेन॥ ५ ॥

६॥७॥स्वयंभुवेपवनायपूयतेयेनस्वज्ञानेनयोगिहृंदःसपवनोभगवान्प्रम्पकन्तन्वन्मोरामः एतेनसकलविघ्ननिवारणायेष्टदेवताप्रार्थनसर्वयात्राकर्तव्येतिसदाचा
रोवोधितः॥८॥आत्मयोनयेपवनायस्वजनकवायवेइत्यर्थःदक्षिणाःकुशलाः॥९॥रामवृद्ध्यर्थंरामाभ्युदयाय॥१०॥निष्प्रमाणशरीरःपरिछेदातिक्रांतदेहः
पीडयामाससलिलंघयिषासन्नाहवशनः॥११॥एकेनपीडनव्यापारेणमुहूर्त्तपर्यंतंचलनं।अशातयत्पर्वतःकर्त्ताचलनंकरणं॥१२॥पुष्पमयोयं

कामरूपिभिराविष्टमभीक्ष्णांसपरिछदैः॥यक्षकिन्नरगंधर्वैर्देवकल्पैःसपन्नगैः॥६॥सतस्यगिरिवर्यस्यतलेनागवरायुते।तिष्ठन्कपि
वरस्तत्रह्रदेनागइवाबभौ॥ससूर्यायमहेंद्रायपवनायस्वयंभुवे॥भूतेभ्यश्चांजलिंकृत्वाचकारगमनेमतिं॥८॥अंजलिंप्राङ्मुखंकुर्वन्प
वनायात्मयोनये॥ततोहिववृधेगंतुंदक्षिणोदक्षिणांदिशं॥९॥प्लवगप्रवरैर्दृष्टःप्लवनेकृतनिश्चयः॥ववृधेरामवृद्ध्यर्थंसमुद्रइवप
र्वसु॥१०॥निष्प्रमाणशरीरःसंल्लिलंघयिषुरर्णवं॥बाहुभ्यांपीडयामासचरणाभ्यांचपर्वतं॥११॥सचचालाचलश्चापिमुहूर्त्तंक
पिपीडितः॥तरूणांपुष्पिताग्राणांसर्वंपुष्पमशातयत्॥१२॥तेनपादपमुक्तेनपुष्पौघेणसुगंधिना।सर्वतःसंवृतःशैलोबभौपुष्प
मयोयथा॥१३॥तेनचोत्तमवीर्येणपीड्यमानःसपर्वतः।सलिलंसंप्रसुस्रावमदमत्तइवद्विपः॥१४॥पीड्यमानस्तुबलिनामहेंद्र
स्तेनपर्वतः।रीतीर्निर्वर्त्तयामासकांचनांजनराजतीः॥१५॥मुमोचचशिलाःशैलोविशालाःसमनःशिलाः मध्यमेनार्चिषाजुष्टोधूम
राजिरिवानलः॥१६॥

था।पुष्पप्रचुरःस्वयमिवेत्यर्थः॥१३॥उत्तमवीर्येणतेनपीड्यमानःसपर्वतःसलिलंप्रसुस्राव॥१४॥उक्तार्थस्यैवविवरणं।पीड्यमानइति।कांचनांजनराज
तीस्तदाभा।रीतीःस्रोतःप्रकारान्निर्वर्त्तयामासतदाभत्वमुपाधिकृतं॥१५॥किंचसशैलःसमनःशिलाविशालाःशिलामुमोचनिपीडनात्।अतएवमध्यमेन
मध्यभागेनार्चिषाज्वालयाजुष्टोयोनलस्तस्यधूमराजिरिवबभावित्यर्थः यत्तस्येत्यध्याहारःधूमराजिरिवेतिह्रस्वपाठः।तीर्थस्तुमध्यमेनार्चिषा।मध्यमाख्य
याग्निजिह्वयाजुष्टःविशिष्टोग्निर्धूमराजीरिवधूमनिचयानिवेत्यर्थः
धूमराजीरिवेतिचपाठइत्याह॥१६॥

हरिणाहनूमतापीड्यमानेनपर्वतेनपीड्यमानानिसत्वानि ॥१७॥ समहासत्वेतिपाठेमहासत्वामहाजंतवस्तेषांसन्नादइतितीर्थः समहान्सत्वसन्नादइतिपा
ठांतरं ॥१८॥ स्वस्तिकःफणास्थनीलरेखात्मकचिह्नैःशिरोभिरुपलक्षिताःददंशुःपीडाजनितक्रोधवशात् ॥१९॥ सविषैस्तैःसर्पैर्दष्टास्तस्यःपावकोद्दीप्ता

हरिणापीड्यमानेनपीड्यमानानिसर्वतः ॥ गुहाविष्टानिसत्वानिविनेदुर्विकृतैःस्वरैः ॥१७॥ समहान्सत्वसन्नादःशैलपीडानिमित्तजः ॥ पृ
थिवींपूरयामासदिशश्चोपवनानिच ॥१८॥ शिरोभिःपृथुभिर्नागाव्यक्तस्वस्तिकलक्षणैः ॥ वमंतःपावकंघोरंददंशुर्दशनैःशिलाः
१९ ॥ तास्तदासविषैर्दष्टाःकुपितैस्तैर्महाशिलाः ॥ जज्वलुःपावकोद्दीप्ताबिभिदुश्चसहस्रधा ॥२०॥ यानित्वौषधजालानितस्मिञ्जा
तानिपर्वते ॥ विषघ्नान्यपिनागानांनशेकुःशमितुंविषं ॥२१॥ भिद्यतेयंगिरिर्भूतैरितिमत्वातपस्विनः ॥ त्रस्ताविद्याधरास्तस्मादुत्पेतुःस्त्री
गणैःसह ॥२२॥ पानभूमिगतंहित्वाहैममासनभाजनं ॥ पात्राणिचमहार्हाणिकरकांश्चहिरण्मयान् ॥२३॥ लेह्यानुच्चावचान्भक्ष्यान्मां
सानिविविधानिच ॥ आर्षभाणिचचर्माणिखड्गांश्चकनकत्सरून् ॥२४॥ कृतकंठगुणाःक्षीबारक्तमाल्यानुलेपनाः ॥ रक्ताक्षाःपुष्कराक्षाश्चग
गनंप्रतिपेदिरे ॥२५॥ हारनूपुरकेयूरपारिहार्यधराःस्त्रियः ॥ विस्मिताःसस्मितास्तस्थुराकाशेरमणैःसह ॥२६॥ ॥ छ ॥ ॥

इवजज्वलुःबिभिदुःभिन्नाबभूवुश्च ॥ २० ॥ शमितुंशमयितुं ॥ २१ ॥ भूतैर्बलक्षःप्रभृतिमहाभूतैः ॥ २२ ॥ हित्वेत्यत्रविद्याधराःकर्तारः ॥ २३ ॥ आ
र्षभाणिऋषभचर्मनिर्मितानिचर्माणिफलकानित्सरुःखड्गमुष्टिः ॥ २४ ॥ कृताःकंठेगुणाःस्रजोयैस्तेक्षीबामत्ताःपुष्करंपद्मं ॥ २५ ॥ पारिहा
रशब्दःश्रेष्ठवाचीतिकनकःपारिहार्योवलयइतितीर्थः ॥ २६ ॥ श्रीरामायरामचंद्रायनमः ॥ छ ॥ श्रीरघुकुलभूषणायनमः ॥

215

एतदग्रे श्लोकद्वयं प्रक्षिप्तं क्वचिदिति कतकः तेषां तपस्विनां आकाशचारितपस्विनां वाचः एष पर्वतसंकाश इत्यादिश्लोकद्वयरूपः श्रुत्वा विद्याधराः तमप्र
मेयं ददृशुः तद्वाक्श्रवणात्पूर्वं तु भूतैरियं गिरिर्भिद्यत इति ज्ञातवंतः ॥ २७ ॥ २८ ॥ २९ ॥ दुधुवे च स हनुमान् ॥ ३० ॥ ३१ ॥ आनुपूर्व्या वृत्तं त्रिवलयं लांगूलं
विचिक्षेपेत्यन्वयः ॥ ३२ ॥ आविद्धं आस्फालितं भुग्नं च ॥ ३२ ॥ बाहू संस्तंभयामासेति उत्प्लवनसंनाहाभिनयः बाह्वोः संस्तंभनं नाम पर्वतोपरि दृढप्रति

दर्शयंतो महाविद्यां विद्याधरमहर्षयः । सहितास्तस्थुराकाशे वीक्षांचक्रुश्च पर्वतं ॥ २७ ॥ शुश्रुवुश्च तदा शब्दं ऋषीणां भावितात्मनां ।
चारणानां च सिद्धानां स्थितानां विमलेंबरे ॥ २८ ॥ एष पर्वतसंकाशो हनुमान्मारुतात्मजः । तितीर्षति महावेगः समुद्रं वरुणा
लयं ॥ २९ ॥ रामार्थं वानरार्थं च चिकीर्षन्कर्म दुष्करं । समुद्रस्य परं पारं दुष्प्रापं प्राप्तुमिच्छति ॥ ३० ॥ इति विद्याधरा वाचः श्रुत्वा तेषां तपस्वि
नां । तमप्रमेयं ददृशुः पर्वते वानरर्षभं ॥ ३१ ॥ दुधुवे च स रोमाणि चकंपे चानलोपमः । ननाद च महानादं सुमहानिव तोयदः ॥ ३२ ॥ आ
नुपूर्व्याच्च वृत्तं तल्लांगूलं लोमभिश्चितं । उत्पतिष्यन्विचिक्षेप पक्षिराज इवोरगं ॥ ३१ ॥ तस्य लांगूलमाविद्धमतिवेगस्य पृष्ठतः । ददृ
शे गरुडेनेव ह्रियमाणो महोरगः ॥ ३२ ॥ बाहू संस्तंभयामास महापरिघसन्निभौ । आससाद कपिः कट्यां चरणौ संचुकोच च ॥ ३३ ॥
संहृत्य च भुजौ श्रीमांस्तथैव च शिरोधरां । तेजः सत्त्वं तथा वीर्यमाविवेश स वीर्यवान् ॥ ३४ ॥ ॐ ॥

ष्ठापनं कपिः कट्यां कटिप्रदेशे आससाद कायप्रसरणात् कृशोभूत् उरःशिरसोरूर्ध्वप्रसारणेन पृष्ठचरणभागस्याधःसंकोचनेन तथात्वं कटिदे
शस्येति बोध्यं ॥ ३३ ॥ भुजौ संहृत्य अंसप्रदेशे संकुच्य शिरोधरां ग्रीवां कंठदेशे संकुच्य तेजः पराभिभवसामर्थ्यं सत्त्वं बलं शारीरं वीर्यं मानसं बलं ॥ ३४

हरन्मार्गमालोकयन् अतएवोर्ध्वप्रणिहितेक्षणः हृदये प्राणप्रतिष्ठास्थाने ॥ ३५ ॥ कर्णौ निकुच्य संकुच्य उत्पतन सन्नाहवशाद्धि कर्णसंकोचो भवति
३६ ॥ श्वसनस्य वायोरिव विक्रमो वेगो यस्य सः ॥ ३७ ॥ तद्वद्गमिष्यामि· अनेन तद्वदेव गत्वा कृतकार्य आगमिष्यामीति सूचितं· तस्यैव प्रपंचो नहीत्या
दि ॥ ३८ ॥ अनेनैव एवंविधेनैव ॥ ३९ ॥ आनयिष्यामि आनेष्यामि· सीतया सह मिलित्वेति शेषः ॥ ४० ॥ समुत्पात्येति· औषधपर्वतोत्पाटनवदिति भाव

मार्गमालोकयन्दूरादूर्ध्वप्रणिहितेक्षणः ॥ दधौ हृदये प्राणानाकाशमवलोकयन् ॥ ३५ ॥ पद्भ्यां दृढमवस्थानं कृत्वा स कपिकुंजरः ॥ निकुच्य
कर्णौ हनुमानुत्पतिष्यन्महाबलः ॥ ३६ ॥ वानरान्वानरश्रेष्ठ इदं वचनमब्रवीत् ॥ यथा राघवनिर्मुक्तः शरः श्वसनविक्रमः ॥ ३७ ॥
गच्छेत्तद्वद्गमिष्यामि लंकां रावणपालितां ॥ नहि द्रक्ष्यामि यदि तां लंकायां जनकात्मजां ॥ ३८ ॥ अनेनैव हि वेगेन गमिष्यामि सुरालयं·
यदि वा त्रिदिवे सीतां न द्रक्ष्याम्यकृतश्रमः ॥ ३९ ॥ बध्वा राक्षसराजानमानयिष्यामि रावणं ॥ सर्वथा कृतकार्योहमेष्यामि सह सीत
या ॥ ४० ॥ आनयिष्यामि वा लंकां समुत्पाट्य सरावणां ॥ एवमुक्त्वा तु हनुमान्वानरो वानरोत्तमः ॥ ४१ ॥ उत्पपाताथ वेगेन वेगवा
नविचारयन् ॥ सुपर्णमिव चात्मानं मेने स कपिकुंजरः ॥ ४२ ॥ समुत्पतति वेगात्तु वेगात्ते नगरोहिणः ॥ संहृत्य विटपान्सर्वान्समुत्पे
तुः समं ततः ॥ ४३ ॥ समत्तकोयष्टिमकान्पादपान्पुष्पशालिनः ॥ उद्वहन्नुरुवेगेन जगाम विमलेंबरे ॥ ४४ ॥ ऊरुवेगोत्थिता वृक्षा
मुहूर्त्तं कपिमन्वयुः ॥ प्रस्थितं दीर्घमध्वानं स्वबंधुमिव बांधवाः ॥ ४५ ॥

॥ ४१ ॥ अविचारयन् लंघनक्लेशलेशं· मध्यगणयन् तस्यैव प्रपंचनं सुपर्णमित्या
दि ॥ ४२ ॥ वेगाद्धन्तमति समुत्पतति सति तेन नगरोहिणाः पर्वतस्थवृक्षाः सर्वान्विटपान्सर्वाः शाखाः संहृत्य संक्षिप्य वेगात्समुत्पेतुः ॥ ४३ ॥ मत्ताः कोयष्टिमा येषु ता
न्कोयष्टिभेपर्यायो ॥ ४४ ॥ ४५ ॥

॥ राम· ॥
॥ ३ ॥

216

कोयष्टि·

सालाः सर्ज्जवृक्षाः सैन्यशब्दोर्थवादिः ॥४६॥ पर्वताकारः तत्त्वं वृहत्वेन पुष्पितवृक्षवत्वेन च ॥४७॥ सारवंतो गुरुत्वान्निशययुक्ताः खदिरादयस्ते गुरुत्वाल्लवणांभसि
न्यमज्जन् अर्थात् अन्ये लघवः सहैव गता इति बोध्यं महेंद्रस्य भयात् पक्षच्छेदभयात् पर्वता इव न्यमज्जन् ॥४८॥ नानाकुसुमैः स्वानुयायिद्रुमीयैः सांकुरको
रकैः कानिचित्कुसुमानि अंकुरितानि कानिचित्कोरकरूपाणि कानिचिद्विकसितानीत्यर्थः ॥४९॥ न स हनूमतो वेगं न विमुक्तास्तस्तो विभक्तास्ते वृक्षाः स

तमूरुवेगोन्मथिताः सालाश्चान्ये नगोत्तमाः। अनुजग्मुर्हनूमंतं सैन्या इव महीपतिं ॥ ४६ ॥ सुपुष्पिताग्रैर्बहुभिः पादपैरन्वितः कपिः
हनूमान्पर्वताकारो बभूवाद्भुतदर्शनः ॥ ४७ ॥ सारवंतोथ ये वृक्षा न्यमज्जंल्लवणांभसि ॥ भयादिव महेंद्रस्य पर्वता वरुणालये ॥४८॥
स नानाकुसुमैः कीर्णः कपिः सांकुरकोरकैः ॥ शुशुभे मेघसंकाशः खद्योतैरिव पर्वतः ॥४९॥ विमुक्तास्तस्य वेगेन मुक्त्वा पुष्पाणि ते
द्रुमाः। व्यवशीर्यंत सलिले निवृत्ताः सुहृदो यथा ॥५०॥ लघुत्वेनोपपन्नं तद्विचित्रं सागरेऽपतत्। द्रुमाणां विविधं पुष्पं कपिवायुसमीरि
तं ॥५१॥ पुष्पौघेणासुगंधेन नानावर्णेन वानरः। बभौ मेघ इवोद्यन्वै विद्युद्गणविभूषितः ॥५२॥ तस्य वेगसमुद्धूतैः पुष्पैस्तोयमदृश्यत
ताराभिरिव रामाभिरुदिताभिरिवांबरं ॥५३॥ तस्यांबरगतौ बाहू ददृशाते प्रसारितौ। पर्वताग्राद्विनिष्क्रांतौ पंचास्याविव पन्नगौ ॥५४॥
पिबन्निव बभौ चापि सोर्मिजालं महार्णवं ॥ पिपासुरिव चाकाशं ददृशे स महाकपिः ॥ ५५ ॥

((लिले व्यवशीर्यंत आर्षोऽडभावः सुहृदो यथा बंधुप्र
स्थापनार्थं गताः सुहृदस्ते यथा तान्प्रस्थाप्य निवर्त्तंते न तद्वत् ॥५०॥ अपतदिति छेदः यदपतत्तल्लघुत्वेनोपपन्नं उपपन्नमिति सर्ववर्णानां विद्युत्समत्वात्
नानावर्णपुष्पौघानुबंधस्य सविद्युद्गणमेघोपमा ॥ ५२ ॥ रामाभिः रमणीयाभिः ॥ ५३ ॥ ५४ ॥ विहगवक्त्रत्वात् पिबन्निवेति अधोवक्त्रत्वे इयमुत्प्रेक्षा

विप्रकाशेतेविशेषेणप्रकाशेतेस्मत्रनलौदावानलौ ॥५६॥ पिंगेपिंगलवर्णेपरिमंडलेपरितोवद्धप्रभामंडलेस्थितौचंद्रसूर्याविव·एकगिरौउदयेपिंगलमंडल
तयावस्थितौचंद्रसूर्याविवेत्यर्थः ॥५७॥ नासिकयाताम्रमितिशेषः संध्याकालिकंसूर्यमंडलंयथातथावभावित्यर्थः ॥५८॥ शुक्लदंष्ट्रःस्वस्वरूपकथनमात्र
न्तुपरिवेषिभास्करोपमोपयोगि ॥६०॥ स्फिक्देशेनकटिप्रदेशेन·तन्मात्रस्यातिताम्रत्ववर्णनात्अन्यत्राल्पतद्वर्णत्वंचअतएवदारितगैरिकधातुउपक्र

तस्यविद्युत्प्रभाकारेवायुमार्गानुसारिणः ॥ नयनेविप्रकाशेतेपर्वतस्थाविवानलौ ॥५६॥ पिंगेपिंगाक्षमुख्यस्यबृहतीपरिमंड
ले ॥ चक्षुषीसंप्रकाशेतेचंद्रसूर्याविवस्थितौ ॥५७॥ मुखंनासिकयातस्यताम्रयाताम्रमावभौ ॥ संध्ययासमभिस्पृष्टंयथास्या
त्सूर्यमंडलं ॥५८॥ लांगूलंचसमाविद्धंप्लवमानस्यशोभते ॥ अंबरेवायुपुत्रस्यशक्रध्वजइवोच्छ्रितं ॥५९॥ लांगूलचक्रोहनुमा
न्शुक्लदंष्ट्रोनिलात्मजः ॥ व्यरोचतमहाप्राज्ञःपरिवेषीवभास्करः ॥६०॥ स्फिग्देशेनाभिताम्रेणरराजसमहाकपिः ॥ महतादारि
तेनेवगिरिर्गैरिकधातुना ॥६१॥ तस्यवानरसिंहस्यप्लवमानस्यसागरं ॥ कक्षांतरगतोवायुर्जीमूतइवगर्जति ॥६२॥ खेयथानि
पतत्युल्काउत्तरांताद्विनिःसृता ॥ दृश्यतेसानुबंधाचतथासकपिकुंजरः ॥६३॥ पतत्पतंगसंकाशोव्यायतःशुशुभेकपिः ॥ प्रवृद्ध
इवमातंगःकक्ष्ययावध्यमानया ॥६४॥

॥गिरिरुपमा ॥६१॥ जीमूतेइतिसप्तम्यंतइतिकतकः·गर्जतिजगर्ज ॥६२॥ उत्तरांतात्उत्तरोर्ध्व
दिग्भागात्·सानुबंधासपुच्छोल्कांतरानुबंधाइदंविशेषणंपुच्छसाहित्यात् ॥६३॥ पतत्पतंगसंकाशःव्यायतोदीर्घःकपिःकक्ष्ययाकक्षावस्त्रेणवध्य
मानयागजमध्यबंधनरज्ज्वायुक्तःप्रवृद्धोमातंगइवबभौ·कक्षाप्रकोष्ठेहर्म्यादेःकांच्यांमध्येभबंधनेइति ॥६४॥ श्रीजानकीवल्लभायनमः ॥६४॥

व२

गतसर्गसंख्याः २

विकर्षन्नूर्मिजालानि बृहन्ति लवणांभसि ॥ पुप्लुवे कपिशार्दूलो विकिरन्निव रोदसी ॥ ६९ ॥

उपरिजात्वेगछन्नास्वशरीरेणाधः सागरेवगाढया स्वस्य छायया प्रतिबिंबेन लक्षितः स सागरे मारुताविष्टा नौरिवासीत् नौश्चोपरि विद्यमानपदार्थेन सह सागरे वायु
वशाद्वेगेन चंचलागच्छतीति तदुपमा ॥ ६५ ॥ सोन्माद इव सापस्मार इव घूर्णनफेनवमनविक्रोशनादिविकारसाम्यात् ॥ ६६ ॥ ऊर्मिजालानामभिघ्नन् कर्मणः
शेषत्वविवक्षया षष्ठी। तान्यभिघ्नन्निति यावत् शैलसदृशेनच्वनेन सागरो मीराणमनुत्तनन्वंस्त्वितं ॥ ६७ ॥ कपिवातः कपिनोत्थापितः वातः मेघवातः मेघमंड

उपरिष्ठाच्छरीरेण छायया चावगाढया ॥ सागरे मारुताविष्टा नौरिवासीत्तदा कपिः ॥ ६५ ॥ यं यं देशं समुद्रस्य जगाम स महाकपिः ॥ स
तु तस्यांगवेगेन सोन्माद इव लक्ष्यते ॥ ६६ ॥ सागरस्योर्मिजालानामुरसा शैलवर्ष्मणा ॥ अभिघ्नंस्तु महावेगः पुप्लुवे स महाकपिः ॥
६७ ॥ कपिवातश्च बलवान्मेघवातश्च निर्गतः ॥ सागरं भीमनिर्ह्रादं कंपयामासतुर्भृशं ॥ ६८ ॥ मेरुमंदरसंकाशानुद्गतान्सुमहार्ण
वे ॥ अत्यक्रामन्महावेगस्तरंगान्गणयन्निव ॥ ७० ॥ तस्य वेगसमुत्पुष्टं जलं सजलदं तदा ॥ अंबरस्थं विबभ्राजे शरदभ्रमिवाततं ॥ ७१ ॥
तिमिनक्रझषाः कूर्मा दृश्यंते विवृतास्तदा ॥ वस्त्रापकर्षणेनेव शरीराणि शरीरिणां ॥ ७२ ॥ क्रममाणं समीक्ष्याथ भुजगाः सागरंगमाः
व्योम्नि तं कपिशार्दूलं सुपर्णमिव मेनिरे ॥ ७३ ॥ दशयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ छाया वानरसिंहस्य जवे चारुतराभवत् ॥ ७४

लगो वातः ॥ ६८ ॥ रोदसी द्यावापृथिव्यौ विकरन्निव पृथक्क्षिपन्निव ॥ ६९ ॥ अतीत्यातीत्य गमनाद्गणयन्निवेत्युत्प्रेक्षा ॥ ७० ॥ तस्य वेगेन समु
त्पुष्टं उर्ध्वक्षिप्तं अत एव सजलदं जलदसहचरं मेघमंडलपर्यंतमूर्ध्वगतं अंबरस्थं जलमाततं विततं शरदभ्रमिव शरन्मेघ इव बभौ शुक्लत्वा
दिभावः ॥ ७१ ॥ विवृताः वेगाज्जलोत्सारणेन व्यक्तदेहाः वस्त्रापकर्षणेन वस्त्रापहारेण शरीराणि अवयवाः ॥ ७२ ॥ ७३ ॥ छायाप्रमाणवर्णनेन तत्कृ

शरीरप्रमाणमपि वर्णितं प्रायः इयं माध्याह्निकी छाया ॥ ७४ ॥

श्वेताभ्रघनराजीव श्वेताभ्रयुक्तमेघपंक्तिवत् तस्य छाया शुशुभे युक्तां इत्यादि नानावर्णत्वादुक्तोपमानिर्वाहः ॥ ७५ ॥ ७६ ॥ द्रोणी हर्म्यादौ जलनिर्गमकाष्ठयंत्रं तज्ज
लधारायुक्त इव क्तो द्रोणीकृतः मेघप्रसादाधानेन तेभ्यो जलस्रवणादिति भावः ॥ ७७ ॥ आयनं यस्मिन्वियायालो मार्गः पांडुरत्वादिगुणकानि मेघजालानि

श्वेताभ्रघनराजीव वायुपुत्रानुगामिनी ॥ तस्य सा शुशुभे छाया पतिता लवणांभसि ॥ ७५ ॥ शुशुभे स महातेजा महाकायो महाकपिः वायुमार्गे नि
रालंबे पक्षवानिव पर्वतः ॥ ७६ ॥ येनासौ याति बलवान्वेगेन कपिकुंजरः तेन मार्गेण सहसा द्रोणीकृत इवार्णवः ॥ ७७ ॥ आपाते पक्षिसंघा
नां पक्षिराज इव व्रजन् हनूमान्मेघजालानि प्रकर्षन्मारुतो यथा ॥ ७८ ॥ पांडुरारुणवर्णानि नीलमांजिष्ठकानि च कपिनाकृष्यमाणा
नि महाभ्राणि चकाशिरे ॥ ७९ ॥ प्रविशन्नभ्रजालानि निष्पतंश्च पुनःपुनः प्रच्छन्नश्च प्रकाशश्च चंद्रमा इव दृश्यते ॥ ८० ॥ प्लवमानं
तु तं दृष्ट्वा प्लवगं त्वरितं तदा ववृषुस्तत्र पुष्पाणि देवगंधर्वदानवाः ॥ ८१ ॥ तताप न हि तं सूर्यः प्लवंतं वानरेश्वरं सिषेवे च तदा वायु
रामकार्यार्थसिद्धये ॥ ८२ ॥ ऋषयस्तुष्टुवुश्चैनं प्लवमानं विहायसा जगुश्च देवगंधर्वाः प्रशंसंतो वनौकसं ॥ ८३ ॥ नागाश्च तुष्टु
वुर्यक्षा रक्षांसि विविधानि च प्रेक्ष्य सर्वे कपिवरं सहसा विगतक्लमं ॥ ८४ ॥ तस्मिन्प्लवगशार्दूले प्लवमाने हनूमति इक्ष्वाकुकु
लमानार्थी चिंतयामास सागरः ॥ ८५ ॥ साहाय्यं वानरेंद्रस्य यदि नाहं हनूमतः करिष्यामि भविष्यामि सर्ववाच्यो विवक्षतां ॥ ८६ ॥

प्रकर्षन्मारुतो यथा तथा बभूवेति शेषः ॥ ७८ ॥ कपिनाकृष्यमाणानि महाभ्राणि चकाशिरे मारुतेनाकृष्यमाणानीवेति शेषः ॥ ७९ ॥ ८० ॥ तत्र प्लवगे ॥ ८१ ॥ तं न हि तताप
सन्वयः वायुः सिषेवे श्रमापनयनायेति भावः ॥ ८२ ॥ ८३ ॥ कपिवरं विगतक्लमं वीक्ष्य नागादयस्तुष्टुवुः ॥ ८४ ॥ इक्ष्वाकुलस्य स्वोत्पादकस्य मानं सत्कारमर्थयते तथाभूतः
कु

॥ ८४ ॥ ८५ ॥ विवक्षतां वागिंद्रियवतां प्राणिनां सर्ववाच्यो निंदा यस्मिन्तादृ
शो भविष्यामि सर्वनिंदास्पदं भविष्यामीत्यर्थः ॥ ८६ ॥

218
मा ३

उक्रमे दविह्नरणेनेति अहमिति· तत्तस्मात्· एष अवसादितुं· अवसन्नुं श्रमं गंतुं नार्हसि· सागरेण विवर्धित इत्युक्त्या काश्चिद्वेशः सगरखातस्याप्येतत्संबंध इति ज्ञाय
ते ॥ ८७ ॥ शेषमार्गशेषं ॥ ८८ ॥ अंभसि स्वांभसि छन्नं हिरण्यनाभं हिरण्यप्रधानं तन्मयमिति यावत् नाभिः प्रधाने कस्तूर्यामिति ॥ ८९ ॥ परिघ इति यक्ष
छिद्रभयात् समुद्रप्रवेशानंतरं पातालस्थराक्षसनिरोधार्थं द्वारनिरोधकपरिघवन्मैनाकस्थापित इत्यर्थः ॥ ९० ॥ ज्ञातवीर्याणां देवराजेनेति शेषः एवा

अहमिक्ष्वाकुनाथेन सागरेण विवर्धितः ॥ इक्ष्वाकुसचिवश्चायं तन्नार्हस्यवसादितुं ॥ ८७ ॥ तथा मया विधातव्यं विश्रमेत यथा कपिः
शेषं च मयि विश्रांतः सुखी सोऽतितरिष्यति ॥ ८८ ॥ इति कृत्वा मतिं साध्वीं समुद्रश्छन्नमंभसि ॥ हिरण्यनाभं मैनाकमुवाच गिरि
सत्तमं ॥ ८९ ॥ त्वमिहासुरसंघानां देवराज्ञा महात्मना ॥ पातालनिलयानां हि परिघः सन्निवेशितः ॥ ९० ॥ त्वमेषां ज्ञातवीर्याणां पु
नरेवोत्पतिष्यतां ॥ पातालस्याप्रमेयस्य द्वारमावृत्य तिष्ठसि ॥ ९१ ॥ तिर्यगूर्ध्वमधश्चैव शक्तिस्ते शैल वर्धितुं ॥ तस्मात्संचोदया
मि त्वां उत्तिष्ठ गिरिसत्तम ॥ ९२ ॥ स एष कपिशार्दूलस्त्वामुपर्येति वीर्यवान् ॥ हनूमान् रामकार्यार्थं भीमकर्मा खमाप्लुतः ॥ ९४ ॥
श्रमं च प्लवगेंद्रस्य समीक्ष्योत्थातुमर्हसि ॥ ९३ ॥ हिरण्यगर्भो मैनाको निशम्य लवणांभसः ॥ उत्पपात जलात्तूर्णं महाद्रुमलतावृतः

मसुराणां ॥ ९१ ॥ शक्तिस्ते अस्तीति शेषः तस्मात्सिहितपातालमुखस्थवसन् यद्विशत्तया वर्धमानः सन्नूर्ध्वमुत्तिष्ठ ॥ ९२ ॥ उपर्येति तवोपरिप्रदेशं प्राप्नोति· त
स्माद्विश्रमाय त्वमुत्तिष्ठेति पूर्वेणान्वयः एतदुत्तरं हनूमान् रामकार्यार्थं भीमकर्मा खमाप्लुतः श्रमं च प्लवगेंद्रस्य समीक्ष्योत्थातुमर्हसीति प्राचीनः पाठः
पाठः अत्र खमाप्लुत इत्यनंतरं केचित् श्लोकाः प्रक्षिप्ताः परैरिति कतकः यतो रामकार्यार्थी यातश्च श्राम्यतीति ततस्तस्य श्रमं समीक्ष्योत्थातुमर्हसि ॥ ९३ ॥

लवणांभसो वचो निशम्येत्यर्थः ॥ ९४ ॥

९५॥९६॥ समुत्तरं शातकुंभमयैरित्यादि अत्रापि श्लोकप्रक्षेपः परेषां हिरण्यनाभत्वविवरणं शातकुंभमयैरिति आदित्योदयसंकाशैरित्युपलक्षि
तमिति शेषः॥९७॥ शस्त्रसंकाशं शस्त्रवत् श्यामम् आकाशं कांचनप्रभमभवत्॥९८॥९९॥ असंगेन अविलंबेन॥१००॥ पातयामास तमत्यर्थमुच्छ्रितं दृष्ट्वा

स सागरजलं भित्वा बभूवाभ्युच्छ्रितस्तदा॥ यथा जलधरं भित्वा दीप्तरश्मिर्दिवाकरः॥९५॥ स महात्मा मुहूर्त्तेन पर्वतः सलिलावृतः। दर्श
यामास शृंगाणि सागरेण नियोजितः॥९६॥ शातकुंभमयैः शृंगैः सकिंनरमहोरगैः। आदित्योदयसंकाशैरालिखद्भिरिवांब
रं॥९७॥ तस्य जांबूनदैः शृंगैः पर्वतस्य समुत्थितैः॥ आकाशं शस्त्रसंकाशमभवत्कांचनप्रभं॥९८॥ जातरूपमयैः शृंगैर्भ्रा
जमानैर्महाप्रभैः॥ आदित्यशतसंकाशः सोभवद्गिरिसत्तमः॥९९॥ समुत्थितमसंगेन हनूमानग्रतः स्थितं॥ मध्ये लवणतोय
स्य विघ्नोयमिति निश्चितः॥१००॥ स तमुच्छ्रितमत्यर्थं महावेगो महाकपिः। उरसा पातयामास जीमूतमिव मारुतः॥१०१॥ स
तदा सादितस्तेन कपिना पर्वतोत्तमः॥ बुध्वा तस्य हरेर्वेगं जहर्ष च ननाद च॥२॥ तमाकाशगतं वीरमाकाशे समुपस्थितः। प्री
तो हृष्टमना वाक्यमब्रवीत्पर्वतः कपिं॥३॥ मानुषं धारयन् रूपमात्मनः शिखरे स्थितः। दुष्करं कृतवान् कर्म त्वमिदं वानरोत्त
म॥४॥ निपत्य मम शृंगेषु स्वं विश्रम्य गम्यतां। राघवस्य कुले जातैरुदधिः परिवर्धितः॥५॥६॥ रामाय रामचन्द्राय नमः॥६॥

तच्छृंगं पातयामासेत्यर्थः॥१०१॥ सादितोत्र अवसादितो ऽधः कृत इति यावत् जहर्ष च ननाद चेति प्राचीनः पाठः बलवैभवं दृष्ट्वा जहर्ष स्वोत्थानप्रयोजनावेदनाय ननाद
शब्दं कृतवान् ननर्देति त्वाधुनिकः कल्पितः पाठः॥२॥ तदेवाविष्करोति तमिति॥३॥४॥ राघवस्य कुले जातैः सगरपुत्रैः॥५॥ श्रीरामाय नमः॥६॥

219

॥रा॰ सु॰॥
॥६॥

कृतमुपकारः ॥ ६ ॥ सोयंराघवकुलजः सागरः तत्प्रतिकारार्थी तत्कुलप्रसुतुपकारार्थी त्वत्तः सत्क्रियमाणात् द्वारभूतात्त्वंमानंराघवकुलपूजामर्हतीतित्वन्निमित्तंत्वत्
कारार्थंप्रचोदितः प्रेरितः ॥ ७ ॥ प्रेरणाप्रकारोयोजनानामिति योजनानांशतमपि प्रक्रमितुंखमाप्लुतः एष कपिःशेषंप्रक्रान्तावशेषंतवसानुषुविश्रान्तः सन्
प्रक्रमतामितियतः प्रेरितोस्मि · अतोमयितिष्ठस्थित्वाविश्रम्यपश्चाद्गम्यतामितियोजना · अत्रतिष्ठत्वमित्यर्धंप्रक्षिप्तमितिकेचित् ॥ ८ ॥ तत्तस्मात् यदिदंकं

सत्वांरामहितेयुक्तंप्रत्यर्चयतिसागरः ॥ कृतेचप्रतिकर्तव्यमेषधर्मः सनातनः ॥ ६ ॥ सोयंतत्प्रतिकारार्थी त्वत्तःसम्मानमर्हति ॥ त्व
न्निमित्तमनेनाहंवहुमानात्प्रचोदितः ॥ ७ ॥ योजनानांशतंचापिकपिरेषखमाप्लुतः ॥ तवसानुषुविश्रान्तःशेषंप्रक्रमतामिति ॥ ८ ॥
तिष्ठत्वंहरिशार्दूलमयिविश्रम्यगम्यतां ॥ तदिदंगंधवत्स्वादुकंदमूलफलंवहु ॥ ९ ॥ तदास्वाद्यहरिश्रेष्ठविश्रांतोथगमिष्य
सि ॥ अस्माकमपिसंवंधःकपिमुख्यत्वयास्तिवै ॥ प्रख्यातस्त्रिषुलोकेषुमहागुणपरिग्रहः ॥ ११० ॥ वेगवंतःप्लवंतोयेप्लवगामारु
तात्मज ॥ तेषांमुख्यतमंमन्येत्वामहंकपिकुंजर ॥ १११ ॥ अतिथिःकिन्नपूजार्हःप्राकृतोपिविजानता ॥ धर्मंजिज्ञासमानेनकिं
पुनर्यादृशोभवान् ॥ १२ ॥ त्वंहिदेववरिष्ठस्यमारुतस्यमहात्मनः ॥ पुत्रस्तस्यैववेगेनसदृशःकपिकुंजर ॥ १३ ॥ छ ॥ ॥

यः
शादिमयिवहुदृश्यतेतन्नास्वाद्यमत्व ॥ ९ ॥ अस्माकमपिसंवंधस्त्वत्साहाय्यकरणप्रयोजकइतिशेषः तंसंवंधंवहुमाहः प्रख्यातइतिभवान्महागुणपरिग्र
हः वहुव्रीहिरयं अतस्त्रिषुलोकेषुप्रख्यातः ॥ १० ॥ तादृशावांयेवेगवंतःप्लवगाःसंतितेषांमुख्यतमंमन्ये ॥ ११ ॥ भवान्यादृशस्तादृशःपूज्यइतिकिंपुन
रितियोजना ॥ १२ ॥ विवक्षितप्राशस्त्यमेवाहत्वंहीति ॥ १३ ॥ श्रीरामायरामचन्द्रायनमः ॥ छ ॥ श्रीरामरामरामरामरामरामः ॥ छ ॥

हनूमद्द्वारकमारुतपूजायाः कारणांतरमप्याह शृणु चापीति ॥१४॥१५॥१६॥१७॥ क्षिप्तः आकाशमुत्क्षिप्तः ॥१८॥ ततः उक्तकारणात् एष संबंधः पूजाप्रयोजकः स्वरक्षकत्व
स्वरूपः ॥२०॥ अस्मिन्कार्ये प्रत्युपकाररूपे एवं गते सति चिरात्प्राप्ते सति मया समुद्रेण चेति शेषः त्वं पूजास्वीकारेण नयोः प्रीतिं कर्तुमर्हसि ॥२१॥ मान्यस्य वायोस्तु संबंधात्त्व

पूजिते त्वयि धर्मज्ञे पूजां प्राप्नोति मारुतः ॥ तस्मात्त्वं पूजनीयो मे शृणु चाप्यत्र कारणं ॥११४॥ पूर्वं कृतयुगे तात पर्वताः पक्षिणोऽभवन् ॥ तेपिज
ग्मुर्दिशः सर्वा गरुडा इव वेगिनः ॥१५॥ ततस्तेषु प्रयातेषु देवसंघा महर्षिभिः ॥ भूतानि च भयं जग्मुस्तेषां पतनशंकया ॥१६॥ ततः क्रुद्धः
सहस्राक्षः पर्वतानां शतक्रतुः ॥ पक्षांश्चिच्छेद वज्रेण ततः शतसहस्रशः ॥१७॥ स मामुपगतः क्रुद्धो वज्रमुद्यम्य देवराट् ततोहं सहसा
क्षिप्तः श्वसनेन महात्मना ॥१८॥ अस्मिन्लवणतोये च प्रक्षिप्तः प्लवगोत्तम ॥ गुप्तपक्षः समग्रश्च तव पित्राभिरक्षितः ॥१९॥ ततो
हं मानयामि त्वां मान्यो हि मम मारुतः ॥ त्वया ममैष संबंधः कपिमुख्य महागुणः ॥२०॥ अस्मिन्नेवंगते कार्ये सागरस्य ममैव च ॥ प्री
तिं प्रीतमनाः कर्तुं त्वमर्हसि महामते ॥२१॥ श्रमं मोक्षय पूजां च गृहाण हरिसत्तम ॥ प्रीतिं च मम मान्यस्य प्रीतोस्मि तव दर्शनात् ॥२२॥
एवमुक्तः कपिश्रेष्ठस्तं नगोत्तममब्रवीत् ॥ प्रीतोस्मि कृतमातिथ्यं मन्युरेषोपनीयताम् ॥२३॥ त्वरते कार्यकालो मे अहश्चाप्यतिव
र्त्तते ॥ प्रतिज्ञा च मया दत्ता न स्थातव्यमिहांतरा ॥२४॥ इत्युक्त्वा पाणिना शैलमालभ्य हरिपुंगवः ॥ जगामाकाशमाविश्य वीर्यवान्प्र
हसन्निव ॥२५॥ स पर्वतसमुद्राभ्यां बहुमानादवेक्षितः ॥ पूजितश्चोपपन्नाभिराशीर्भिरभिनंदितः ॥२६॥

((वपूज्यस्य मम प्रीतिं कुरु इति शेषः
२२ ॥ मन्युः पूजानंगीकारजं दैन्यं ॥२३॥२४॥ शैलमालभ्य स्पृष्ट्वा प्रहसन्निवेति एतावत्प्लवनेपि श्रममारोप्यहं तथा यं प्रयास एतयोरिति प्रहासः ॥२५॥ उपपन्ना
मिलनकालोपयुक्ताभिः ॥२६॥

220

अथउर्ध्वंयत्रदेशेस्थितस्ततोपिवहूर्ध्वंपितुःपंथानंवायुमार्गं ॥ २७ ॥ भूयउर्ध्वंततोपिवऊर्ध्वंनगंगिरिमधःप्रदेशवर्त्तिनमवलोकयन् ॥ २८ ॥ तत्द्वि
तीयंकर्मअविघ्नमेवपुनरत्यूर्ध्वपतनरूपंकर्म ॥ २९ ॥ तत्रस्थामैनाकेस्थाःगमनस्थावानस्यकांचनमयस्यसुनाभस्यशोभनमध्यस्यमैनाकस्यकर्म

अथोर्ध्वंदूरमाप्लुत्यहित्वाशैलमहार्णवौ ॥ पितुःपंथानमास्थायजगामविमलेंबरे ॥ २७ ॥ भूयश्चोर्ध्वगतिंप्राप्यगिरिंतमवलोकयन्
वायुसूनुर्निरालंबोजगामकपिकुंजरः ॥ २८ ॥ तद्द्वितीयंहनुमतोदृष्ट्वाकर्मसुदुष्करं ॥ प्रशशंसुःसुराःसर्वेसिद्धाश्चपरमर्षयः
२९ ॥ देवताश्चाभवन्हृष्टास्तत्रस्थास्तस्यकर्मणा ॥ कांचनस्यसुनाभस्यसहस्राक्षश्चवासवः ॥ १३० ॥ उवाचवचनंधीमान्परितो
षात्सगद्गदं ॥ सुनाभंपर्वतश्रेष्ठंस्वयमेवशचीपतिः ॥ ३१ ॥ हिरण्यनाभशैलेंद्रपरितुष्टोस्मितेभृशं ॥ अभयंतेप्रयच्छामिग
च्छसौम्ययथासुखं ॥ ३२ ॥ साह्यंकृतंतेसुमहद्विक्रांतस्यहनूमतः ॥ क्रमतोयोजनशतंनिर्भयस्यभयेसति ॥ ३३ ॥ रामस्यैष
हितायैवयातिदाशरथेःकपिः ॥ सत्क्रियांकुर्वताशक्त्यातोषितोस्मिदृढंत्वया ॥ ३४ ॥ सततःप्रहर्षमलभद्विपुलंपर्वतोत्तमः ॥ दे
वतानांपतिंदृष्ट्वापरितुष्टंशतक्रतुं ॥ ३५ ॥ सवैदत्तवरःशैलोबभूवावस्थितस्तदा ॥ हनूमांश्चमुहूर्तेनव्यतिचक्रामसागरं ॥ ३६ ॥
ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः ॥ अब्रुवन्सूर्यसंकाशांसुरसांनागमातरं ॥ ३७ ॥

णाजलादुत्थानरूपेणदेवताइंद्रश्चतुष्टः ॥ ३१ ॥ अ
भयंस्वकृतपक्षच्छेदशंकाजनितभयाभावं ॥ ३२ ॥ निर्भयस्यापिभयेसतीवोपचारार्थंसाह्यंकृतंयतोनःपरितुष्टइत्यन्वयः ॥ ३३ ॥ ३४ ॥ ३५ ॥ अवस्थितः
जलांतरमग्नइत्यर्थःसागरंमैनाकाधिष्ठितसागरप्रदेशं ॥ ३६ ॥ अथदेवैर्लंकाप्रविष्टस्यहनूमतःकार्यक्षमबलपरीक्षणार्थंसुरसाप्रवर्त्तनंततइ

१
सुं
टि

३८ ॥ नभस्स्थशमिति पुंस्त्वमार्षं वक्त्रशब्दोर्द्धर्चादिर्वा ॥ ३९ ॥ वलं ज्ञानवलं उपायवलं च · पराक्रमं च ज्ञातुमिच्छामहे · न देवविहरणोति त्वामिति ॥ ४० ॥ ४१ ॥
४२ ॥ भयस्य च भयावहमिति पाठे सर्वलोकभयस्यापीत्यर्थः ॥ ४२ ॥ ईश्वरैर्देवैः ॥ ४३ ॥ एषवरः पुरस्त्वागतस्य वदनप्रवेशरूपः इत्युक्तेति शेषः सत्वरा व

अयं वातात्मजः श्रीमान्प्लवते सागरोपरि ॥ हनूमांस्तामनस्यत्वं मुहूर्त्तं विघ्नमाचर ॥ ३८ ॥ राक्षसं रूपमास्थाय सुघोरं पर्व
तोपमं ॥ दंष्ट्राकरालं पिंगाक्षं वक्त्रं कृत्वा नभस्स्पृशं ॥ ३९ ॥ वलमिच्छामहे ज्ञातुं भूयश्चास्य पराक्रमं ॥ त्वां विजेष्यत्युपाये
न विषादं वा गमिष्यति ॥ १४० ॥ एवमुक्तातु सा देवी दैवतैरभिसत्कृता ॥ समुद्रमध्ये सुरसा विभ्रती राक्षसं वपुः ॥ १४१ ॥
विकृतं च विरूपं च सर्वस्य च भयावहं ॥ प्लवमानं हनूमंतमावृत्येदमुवाच ह ॥ ४२ ॥ मम भक्ष्यः प्रदिष्टस्त्वमीश्वरैर्वान
र्षभ ॥ अहं त्वां भक्षयिष्यामि प्रविशेदं ममाननं ॥ ४३ ॥ वर एष पुरा दत्तो मम धात्रेति सत्वरा ॥ व्यादाय वक्त्रं विपुलं स्थि
ता सा मारुतेः पुरा ॥ ४४ ॥ एवमुक्तः सुरसया प्रहृष्टवदनोब्रवीत् ॥ रामो दाशरथिर्नाम प्रविष्टो दंडकावनं ॥ ४५ ॥ लक्ष्म
णेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥ ४६ ॥ अन्यकार्यविषक्तस्य वद्धवैरस्य राक्षसैः ॥ तस्य सीता हृता भार्या रावणेन य
शस्विना ॥ ४७ ॥ तस्याः सकाशं दूतोहं गमिष्ये रामशासनात् ॥ कर्त्तुमर्हसि रामस्य साहाय्यं विषयवासिनी ॥ ४८ ॥ छ ॥

रासहिता सा सुरसा ॥ ४४ ॥ प्रहृष्टवदनः दत्तभक्षणावरायास्त्वपि सकाशान्निस्तारोपायज्ञानजो हर्षः ॥ ४५ ॥ ४६ ॥ कार्यविषक्तस्य मायामृगवधे प्रसक्त
स्य वद्धवैरस्य शूर्पणखाविरूपकरणादिकर्मणेति शेषः ॥ ४७ ॥ रामसाहाय्यकरणे हेतुः रामस्य विषयवासिनीति तस्य सर्वाधिपतित्वात् ॥ ४८ ॥

रामंचेतिदृष्ट्वावृत्तान्तंचविज्ञाप्येतिशेषः॥४९॥ कश्चिदपिमांनातिवर्त्तेत् अभक्षितोनगच्छेदित्यर्थः परस्मैपदमार्षं॥५०॥ तंप्रयान्तंपुनरागच्छामीत्युक्त्वा
वरदानंश्रुत्वापिप्रयाणोन्मुखंहनूमन्तंतस्यबलंजिज्ञासमानासुरसावाक्यमब्रवीत्॥५१॥ निविश्येतिप्रविश्यैवगन्तव्यंयदिशक्तिरस्तीत्यर्थः इत्यब्रवी

अथवामैथिलींदृष्ट्वारामंचाक्लिष्टकारिणं॥ आगमिष्यामितेवक्त्रंसत्यंप्रतिशृणोमिते॥४९॥ एवमुक्ताहनुमतासुरसा
कामरूपिणी॥ अब्रवीन्नातिवर्त्तेन्मांकश्चिदेषवरोमम॥१५०॥ तंप्रयान्तंसमुद्वीक्ष्यसुरसावाक्यमब्रवीत्॥ बलंजिज्ञासमा
नासानागमाताहनूमतः॥५१॥ निविश्यवदनंमेद्यगन्तव्यंवानरोत्तम॥ वरएषपुरादत्तोममधात्रेतिसत्वरा॥५२॥ व्या
दायविपुलंवक्त्रंस्थितासामारुतेःपुरः॥ एवमुक्तःसुरसयाक्रुद्धोवानरपुंगवः॥५३॥ अब्रवीत्कुरुवैवक्त्रंयेनमांवि
सहिष्यसि॥ इत्युक्त्वासुरसांक्रुद्धोदशयोजनमायतं॥५४॥ दशयोजनविस्तारोहनुमानभवत्तदा॥ चकारसुरसा
प्यास्यंविंशद्योजनमायतं॥५५॥ तंदृष्ट्वाव्यादितंत्वास्यंवायुपुत्रःसबुद्धिमान्॥ दीर्घजिह्वंसुरसयासुभीमंनरको
पमं॥५६॥ तद्दृष्ट्वामेघसंकाशंविंशद्योजनमायतं॥ हनूमांस्तुततःक्रुद्धस्त्रिंशद्योजनमायतः॥५७॥ ॥

दित्यन्वयः॥५२॥५३॥ दशयोजनमायतं आयतवक्त्रामित्यर्थः॥५४॥ चकारसुरसाप्यास्यंविंशद्योजनमायतमित्यनन्तरंतत्दृष्ट्वाव्यादितंत्वास्यमितिप्राची
नःपाठः तद्दृष्ट्वामेघसंकाशमित्यादिशतयोजनमायतमित्यन्तग्रन्थोकाश्चित्प्रक्षिप्ताइतिकतक॥५५॥ व्यादितंव्यात्तंदीर्घजिह्वत्वादिगुणविशिष्टंव्यात्तंतत्रस्या
आस्यंदृष्ट्वेत्यन्वयः॥५६॥५७॥

५८ ॥ इदं वचनमितीदंशब्दार्थः प्रविष्ट इति दाक्षायणि दक्षप्रजापतिसंताने अनस्वनातिः सत्यआसीत् सत्योजात इत्यर्थः वदनप्रवेशरूपत्वानस्य ॥ ५९
६० ॥ अथ सा तु ष्टक्लाति अर्थसिध्यै इति राघवेणाब्धिज्ञापितं हत्रांतेन समानय संगमय ॥ ६१ ॥ तत्तृतीयं सुरसावक्त्रान्निष्क्रमणारूपं ॥ ६२ ॥ ६३ ॥

चकार सुरसा वक्त्रं चत्वारिंशत्तथोच्छ्रितं ॥ बभूव हनुमान्वीरः पंचाशद्योजनोच्छ्रितः ॥ चकार सुरसा वक्त्रं षष्टियोजनमुच्छ्रितं
तदैव हनुमान्वीरः सप्ततियोजनोच्छ्रितः ॥ चकार सुरसा वक्त्रमशीतिंयोजनोच्छ्रितं ॥ हनूमाननलप्रख्यो नवतियोजनोच्छ्रि
तः ॥ चकार सुरसा वक्त्रं शतयोजनमायतं ॥ स संक्षिप्यात्मनः कायं जीमूत इव मारुतिः ॥ तस्मिन्मुहूर्त्ते हनुमान्बभूवांगु
ष्ठमात्रकः ॥ ५७ ॥ सोभिपत्याथ तद्वक्त्रं निष्पत्य च महाबलः ॥ अंतरिक्षे स्थितः श्रीमानिदं वचनमब्रवीत् ॥ ५८ ॥ प्रवि
ष्टोस्मि हि ते वक्त्रं दाक्षायणि नमोस्तु ते ॥ गमिष्ये यत्र वैदेही सत्यश्चासीद्वरस्तव ॥ ५९ ॥ तं दृष्ट्वा वदनान्मुक्तं चंद्रं राहु
मुखादिव ॥ अब्रवीत्सुरसा देवी स्वेन रूपेण वानरं ॥ ६० ॥ अर्थसिध्यै हरिश्रेष्ठ गच्छ सौम्य यथासुखं ॥ समानयव वै
देहीं राघवेण महात्मना ॥ ६१ ॥ तत्तृतीयं हनुमतो दृष्ट्वा कर्म सुदुष्करं ॥ साधु साध्विति भूतानि प्रशशंसुस्तदा ह
रिं ॥ ६२ ॥ स सागरमनाधृष्यमभ्येत्य वरुणालयं ॥ जगामाकाशमाविश्य वेगेन गरुडोपमः ॥ ६३ ॥ सेविते वारिधाराभिः
पतगैश्च निषेविते ॥ चरिते कैशिकाचार्यैरैरावतनिषेविते ॥ ६४ ॥

वारिधारासेवितत्वाद्दिविशेषणाकेचंद्रसूर्यपथे जगामेत्यन्वयः पतगैः पक्षिभिः कैशिकं गानं तस्य विद्या तदाचार्यैस्तुंबुरुप्रभृतिभिर्गंधर्वैश्चरिते सेविते ऐरावतं
ऋजुदीर्घमिंद्रध्वजरितितीर्थः गजविशेष इत्यन्ये ॥ ६४ ॥

222

पन्नगोरगाः पक्षिसर्पाः ॥ ६५ ॥ वज्राशनिसमस्पर्शैस्तद्वज्राणहरैः पावकैः पंचाग्निभिरिव स्वर्गजिद्भिरधिष्ठितेसमघातैरिति पाठे ताभ्यां तुल्यत्राघातो भिघातो
स्वपातैरित्यर्थः ॥ ६६ ॥ चित्रभानुना पंचाग्निभिर्योयमग्निश्चित्रभानुः ॥ ६७ ॥ विश्वेविश्वाश्चयेविश्वावसुर्गंधर्वराजः ॥ ६८ ॥ देवराजानां गजाः पुंडरीक

सिंहकुंजरशार्दूलपन्नगोरगवाहनैः ॥ विमानैः संपतद्भिश्च विमलैः समलंकृते ॥ ६५ ॥ वज्राशनिसमाघातैः पावकैरिवशो
भिते ॥ कृतपुण्यैर्महाभागैः स्वर्गजिद्भिरधिष्ठिते ॥ ६६ ॥ वहता हव्यमत्यंतं सेविते चित्रभानुना ॥ ग्रहनक्षत्रचंद्रार्कताराग ३
णाविभूषिते ॥ ६७ ॥ महर्षिगणगंधर्वनागयक्षसमाकुले ॥ विविक्ते विमले विश्वे विश्वावसुनिषेविते ॥ १६८ ॥ देवराजग
जाक्रांते चंद्रसूर्यपथे शिवे ॥ विताने जीवलोकस्य विमले ब्रह्मनिर्मिते ॥ ६९ ॥ बहुशः सेविते वीरैर्विद्याधरगणैर्वृते ॥ जगाम
वायुमार्गे च गरुत्मानिव मारुतिः ॥ ७० ॥ हनूमान्मेघजालानि प्राकर्षन्मारुतो यथा ॥ कालागरुसवर्णानि रक्तपीतसितानि च ॥ ७१ ॥
कपिना कृष्यमाणानि महाभ्राणि चकाशिरे ॥ प्रविशन्नभ्रजालानि निष्पतंश्च पुनः पुनः ॥ ७२ ॥ प्रावृषीन्दु[illegible]भ्राणि निष्पतन्प्र
विशंस्तथा ॥ प्रदृश्यमानः सर्वत्र हनूमान्मारुतात्मजः ॥ ७३ ॥ भेजेंवरं निरालंवं पक्षयुक्त इवाद्रिराट् ॥ प्लवमानं तु तं दृष्ट्वा सिंहिका
नामराक्षसी ॥ ७४ ॥ मनसा चिंतयामास प्रवृद्धा कामरूपिणी ॥ अद्य दीर्घस्य कालस्य भविष्याम्यहमाशिता ॥ ७५ ॥ इदं मम महासत्वं
चिरस्य वशमागतं ॥ इति संचिंत्य मनसा छायामस्य समाक्षिपत् ॥ ७६ ॥ छायायां गृह्यमाणायां चिंतयामास वानरः ॥ समाक्षिप्तोस्मि
सहसा पंगूकृतपराक्रमः ॥ ७७ ॥

दयः विताने अवकाशावरणावस्त्रे चांदवा इति प्रसिद्धे ॥ ६९ ॥ ७० ॥ ७२ ॥ ७४ ॥ आशिता कृतभोजना ॥ ७५ ॥ समाक्षिपत् जग्राह छायाग्रहणेन तद्गतिनिरोधशक्तिमत्सत्वबलद
त्रा ॥ ७६ ॥ पंगूकृतः स्तब्धगतिः पराक्रमो यस्य ॥ ७७ ॥

रि या द

का ३

महानौर्यथायंत्रकृतपराक्रमात्सङ्गतिः प्रतिलोमेनवातेनक्रियते गम्यदेशगतिनिरोधरूपात्तत्सङ्गतिस्त्वं ॥ यद्वातेनयथाविपरीतगतिवारणाययंत्रैः ॥
सङ्गतिःकार्यतेतथाहंकेनचित्सङ्गतिःकृतः ॥ ७८ ॥ महासत्त्वंस्त्रीरूपंप्राणिनं ॥ ७९ ॥ ८० ॥ अर्थतत्त्वेनछायाग्रहणरूपार्थक्रियया ॥ ८१ ॥ पातालां
बरसन्निभंपातालाकाशमध्यभागसदृशं ॥ ८२ ॥ ८३ ॥ कायमात्रंस्वशरीरकवलनंपर्याप्तंशरीरप्रमाणमित्यर्थः इतितीर्थः मात्रशब्दोऽल्पवाचीति

प्रतिलोमेनवातेनमहानौरिवसागरे ॥ तिर्यगूर्ध्वमधश्चैववीक्षमाणस्तदाकपिः ॥ ७८ ॥ ददर्शसमहासत्त्वमुत्थितंलवणांभसि ॥
द्र२ तद्दृष्ट्वाचिंतयामासमारुतिर्विकृताननं ॥ ७९ ॥ कपिराज्ञायथाख्यातंसत्त्वमद्भुतदर्शनं ॥ छायाग्राहिमहावीर्यंतदिदंनात्रसं
शयः ॥ ८० ॥ सतांबुद्ध्वार्थतत्त्वेनसिंहिकांमतिमान्कपिः ॥ व्यवर्धतमहाकायःप्रावृषीवबलाहकः ॥ ८१ ॥ तस्यसाकायमुद्वीक्ष्यव
र्धमानंमहाकपेः ॥ वक्त्रंप्रसारयामासपातालांबरसन्निभं ॥ ८२ ॥ घनराजीवगर्जंतीवानरंसमभिद्रवत् ॥ सददर्शततस्तस्याविकृ
तंसुमहन्मुखं ॥ ८३ ॥ कायमात्रंचमेधावीमर्माणिचमहाकपिः ॥ सतस्याविकृतेवक्त्रेवज्रसंहननःकपिः ॥ ८४ ॥ संक्षिप्यमुहुरात्मानं
निपपातमहाकपिः ॥ आस्येतस्यानिमज्जंतंददृशुःसिद्धचारणाः ॥ ८५ ॥ ग्रस्यमानंयथाचंद्रंपूर्णंपर्वणिराहुणा ॥ ततस्तस्यानं
खैस्तीक्ष्णैर्मर्माण्युत्कृत्यवानरः ॥ ८६ ॥ उत्पपाताथवेगेनमनःसंपातविक्रमः ॥ तांतुदृष्ट्वाचधृत्याचदाक्षिण्येननिपात्यसः ॥ ८७ ॥

कृन्तकःमर्माणिचभेदनार्थंददर्शेत्यन्वयः ॥ ८४ ॥ तस्यावक्त्रेआत्मानंमुहुःसंक्षिप्यआधिक्यंसंकुच्यनिष्पपातेत्यन्वयः ॥ ८५ ॥ ८६ ॥ मनःसंपातविक्रमः
मनोवेगतुल्यवेगः दिष्ट्यादेवायहेणाहस्येतिपाठेतत्क्षणदर्शनेत्यर्थः भ्रान्त्यासहजधैर्येणदाक्षिण्येनकालोचितक्रमवाजुर्येणचतांनिपात्यनिहत्यवेगेनो
ने१

न्तु प्रथमप्रवृत्तवेगस्य सुरसादिभिः कुंठीभावे सति कथं पुनराकाशगमनं तत्राह आत्मवान्वायोरिवस्वाधीनएवनतुमनविषयोयतः पूर्वमंतु आकाश
मार्गप्राप्तिमात्रमहेंद्रपर्वतालंबनमिनरजनप्रसारणापवेग्याऊः हृत्तहृत् क्षेत्रे हृदयलक्षणप्राणस्थानात्प्राणएवविद्धराद्याणाभूत्वा त्वं भ्रमसि पयान
त्रत्रकविरुपेक्षणेनतस्याः छायाग्रहणमात्रेण भक्षणादिशक्तिमत्याः सिंहिकाया निपातनेति यावत् निमित्तेरावणानाशायस्वात्मरूपरामवत्स्वस्वरू

कपिप्रवीरोवेगेनववृधेपुनरात्मवान्॥ हतहत्ताहनुमतामाययानविधुरांभसि॥ स्वयंभुवैवहनुमान्सृष्टस्तस्यानिपातने ॥८८॥
तांहतांवानरेणाशुपतितांवीक्ष्यसिंहिकां॥ भूतान्याकाशचारीणितमूचुःप्लवगोत्तमम्॥८९॥ भीममद्यकृतंकर्ममहत्सत्वं
त्वयाहतं॥ साधयार्थमभिप्रेतमरिष्टंप्लवतांवर॥१९०॥ यस्यत्वेतानिचत्वारिवानरेंद्रयथातव॥ धृतिर्दृष्टिर्मतिर्दाक्ष्यंसकर्म
सुनसीदति॥९१॥ सतैःसंभावितःपूज्यःप्रतिपन्नप्रयोजनः। जगामाकाशमाविश्यपन्नगाशनवत्कपिः॥९२॥ प्राप्तभूयिष्ठपा
रस्तुसर्वतःपरिलोकयन्॥ योजनानांशतस्यान्तेवनराजींददर्शसः॥९३॥ ददर्शचपतन्नेवविविधद्रुमभूषितं॥ द्वीपंशाखा
मृगश्रेष्ठोमलयोपवनानिच॥९४॥ सागरंसागरानूपान्सागरानूपजान्द्रुमान्॥ सागरस्यचपत्नीनांमुखान्यपिविलोकयन्॥९५॥

पाहनूमान्सृष्टः॥८८॥ महत्सत्वंमहाबलापराक्षसीरावणावद्दशकसंहारात्वयासंहृतेत्यर्थः अरिष्टंबाधारहितंरिषहिंसायां॥९०॥ निर्बाधंकर्मसाधनेहेतुमाहयस्य
त्विति॥९१॥ सतैःसंपूजितःतैःपूर्वोक्तैर्भूतैःप्रतिपन्नप्रयोजनःअभिमतंसाधयेत्यनुमत्यानुष्टहीतकार्यः॥९२॥ प्राप्तभूयिष्ठःप्राप्तकाल्पःपारोयेनसः॥९३॥
पतन्नेवगच्छन्नेवमलयोपवनानि·अनेनोत्तरतीरइवदक्षिणतीरेपिमलयाख्यःपर्वतोस्तीतिगम्यते॥९४॥ सागरंदक्षिणतीरसमीपवर्तिसागरंअनूपःकच्छदेश

सागरस्यपत्नीनांलंकाद्वीपाद्गागम्यसागरंप्रविशंतीनांनदीनांमु
खानिसंगमस्थानानि· विलोकयन्व्यलोकयत्॥९५॥

आत्मानंस्वशरीरंमहत्वा साकाशंनिरुंधंतमिव मतिंकर्त्तव्यनिश्चयं ॥ ९६ ॥ कौतूहलमाश्चर्यधियादिदृक्षामित्यर्थः ॥ ९७ ॥ प्रकृतिंनिजमाकारंवीतमोहः न
ष्टेवासनावशादागतः कामादिमोहो यस्य सः आत्मवान्जीवन्मुक्तयोगी प्रकृतिंभगवद्दत्तस्वतत्त्वतालक्षणांस्वभावमित्यर्थः ॥ ९८ ॥ अतिसंक्षिप्य अतिसं
कोच्यत्रीन्क्रमान्यदातिविक्रम्य आक्षिप्य वलेर्वीर्यस्य हरो हरिरिव प्रकृतौस्थितः ॥ ९९ ॥ चारुनानाविधरूपधारीनानावर्णाकृतिरूपधारी तत्त्वतस्ध्या

समहामेघसंकाशंसमीक्ष्यात्मानमात्मवान् ॥ निरुंधंतमिवाकाशंचकारमतिमान्मतिं ॥ ९६ ॥ कायवृद्धिंप्रवेगंचममद्दष्ट्वैवरा
क्षसाः ॥ मयिकौतूहलंकुर्युरितिमेनेमहामतिः ॥ ९७ ॥ ततःशरीरंसंक्षिप्यतन्महीधरसन्निभं ॥ पुनःप्रकृतिमापेदेवीतमोहइवात्मवा
न् ॥ १९८ ॥ तद्रूपमतिसंक्षिप्यहनूमान्प्रकृतौस्थितः ॥ त्रीन्क्रमानिवविक्रम्यवलिवीर्यहरोहरिः ॥ ९९ ॥ सचारुनानाविधरूपधारी
परंसमासाद्यसमुद्रतीरं ॥ समीक्ष्यलंकांगिरिवर्यमूर्ध्निकपिस्तुतस्मिन्निपपातपर्वते ॥ विधायरूपंचयथपन्नगद्विजान्समागरंदा
नवपन्नगायुतं ॥ वलेनविक्रम्यमहोर्मिमालिनंनिपत्यतीरेचमहोदधेस्तदा ॥ परैरशक्यंप्रतिपन्नरूपःसमीक्षितात्मासमवेक्षिता
र्थः ॥ २०० ॥ ततःसलंबस्यगिरेःसमृद्धेविचित्रकूटेनिपपातकूटे ॥ सकेतकोद्दालकनारिकेलेमहाभ्रकूटप्रतिमोमहात्मा ॥ २०१ ॥

नेषुस्पष्टंपरैरशक्यंसमुद्रतीरमासाद्येत्यन्वयः समीक्षितात्मासमालोकितात्मानिष्क्रमात्स्वशरीरः समवेक्षितार्थः आलोचितानंतरकार्यः प्रतिपन्नरू
पः अंगीकृतस्वल्पदेहोमहदितिशेषः ॥ २०० ॥ लंबस्यलंबाख्यस्यविचित्राणिकूटानि अवांतरशिखराणियस्यतादृशेकूटे ॥ प्रधानशिखरे ॥ उद्दालकः
श्लेष्मातकः ॥ २०१ ॥ श्रीरामायरामचन्द्रायनमः ॥ ६ ॥ श्रीजानकीवल्लभायनमः ॥ ६ ॥ रामरामरामरामरामरामरामः ॥ ६ ॥

224

गिरिवर्यमूर्ध्निस्थितामितिशेषः॥ उपसंहरति कपिस्त्विति सकपिरुच्यमानविशेषणांसागरमतिक्रम्यतस्मिल्लंगाख्यपर्वते मृगादीन्व्यथयन्पीडयन्निपपात·
निपत्यचततःप्राचीनंरूपंविधूयमहोदधेस्तीरेऽमरावतीमिवस्थितांलंकांददर्श॥ २०२॥२०३॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेसुंदरकांडे
प्रथमःसर्गः॥१॥ त्रिकूट स्यलंबसपरपर्यायस्यपर्वतस्यतटेस्थितःस्वस्थोभूत्वालंकांददर्श ॥१॥पुष्पमयःपुष्पमयवानरइव॥२॥अनिश्वसन्न

ततस्तुसंप्राप्यसमुद्रतीरंसमीक्ष्यलंकांगिरिवर्यमूर्ध्नि॥ कपिस्तुतस्मिन्निपपातपर्वतेविधूयरूपंव्यथयन्मृगद्विजान्॥२०२॥ससा
गरंदानवपन्नगायुतंबलेनविक्रम्यमहोर्मिमालिनं॥निपत्यतीरेचमहोदधेस्तदाददर्शलंकाममरावतीमिव॥२०३॥गतरमानः॥
इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेसुंदरकांडेप्रथमःसर्गः॥ १ ॥ससागरमनाधृष्यमतिक्रम्यमहाबलः॥त्रिकूटस्यतटेलंकांस्थितः
स्वस्थोददर्शह॥१॥ततःपादपमुक्तेनपुष्पवर्षेणवीर्यवान्॥अभिवृष्टस्ततस्तत्रबभौपुष्पमयोहरिः॥२॥योजनानांशतंश्रीमांस्तीर्त्वा
प्युत्तमविक्रमः॥अनिश्वसन्कपिस्तत्रनग्लानिमधिगच्छति॥३॥शतान्यहंयोजनानांक्रमेयंसुबहून्यपि॥किंपुनःसागरस्यांतंसंख्यातं
शतयोजनं॥४॥सतुवीर्यवतांश्रेष्ठःप्लवतामपिचोत्तमः॥जगामवेगवाल्लंकांलंघयित्वामहोदधिं॥५॥शाद्वलानिचनीलानिगंधवं
तिवनानिच॥मधुमंतिचमध्येनजगामनगवंतिच॥६॥

((मजस्त्वासरहितःतदेवाह·नग्लानिमितिकविवाक्यमेतत्॥३॥अहंयोजनानांबहूनि
शतान्यपिक्रमेयंक्रामेयंक्रमितुंशक्तःशतयोजनमितिसंख्यातंसागरस्यांतंपरंपारंक्रामेयमितिकागणनाममेतिमन्यतेस्मेतिशेषः॥हनुमदभिप्रायानुवादःकवेः
४॥जगामलंकांपर्वतशिखरादेवहेलयेतिशेषः॥५॥मध्येनजगाम·मध्यमार्गेणवनादीन्पश्यन्जगामनगवंतिवृक्षवंतिप्राशस्त्येमतुप्॥६॥ ७॥ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

शैलान्लंबगिरिपादरूपान् ॥ ७ ॥ मनस्विन्लंबपर्वतेति सन्लंकायावनान्युपवनानिचददर्श अपिचसपवनात्मजः तांलंकांनगाग्रेपर्वताग्रेस्थितांददर्श ॥ ८ ॥
अस्यैवप्रपंचः सरलानित्यादि मुचुलिंदोजंबीरा इत्याहुः ॥ ९ ॥ गंधपूर्णान् गंधाढ्यान् ॥ १० ॥ ११ ॥ एवगणनयोवलानस्यांसर्वेवृक्षाः सर्वदापुष्पिता इतिनक

शैलांश्चतरुसंछन्नान्वनराजीश्चपुष्पिताः ॥ अभिचक्रामतेजस्वीहनूमान्प्लवगर्षभः ॥ ७ ॥ सतस्मिन्नचलेतिष्ठन्वनान्युपवनानिच ॥
सनगाग्रेस्थितांलंकांददर्शपवनात्मजः ॥ ८ ॥ सरलान्कर्णिकारांश्चखर्जूरांश्चसुपुष्पितान् ॥ प्रियालान्मुचुलिंदांश्चकुटजान्केत
कानपि ॥ ९ ॥ प्रियंगून्गंधपूर्णांश्चनीपान्सप्तच्छदांस्तथा ॥ असनान्कोविदारांश्चकरवीरांश्चपुष्पितान् ॥ १० ॥ पुष्पभारनिबद्धां
श्चतथामुकुलितानिच ॥ पादपान्विहगाकीर्णान्पवनाधूतमस्तकान् ॥ ११ ॥ हंसकारंडवाकीर्णावापीः पद्मोत्पलावृताः ॥ आक्री
डान्विविधान्रम्यान्विविधांश्चजलाशयान् ॥ १२ ॥ संततान्विविधैर्वृक्षैः सर्वर्तुफलपुष्पितैः ॥ उद्यानानिचरम्याणिददर्शकपि
कुंजरः ॥ १३ ॥ समासाद्यचलक्ष्मीवान्लंकांरावणपालितां ॥ परिखाभिः सपद्माभिः सोत्पलाभिरलंकृतां ॥ १४ ॥ सीतापहरणार्थे
नरावणेनसुरक्षितां ॥ समंताद्विचरद्भिश्चराक्षसैरुग्रधन्विभिः ॥ १५ ॥ कांचनेनावृतांरम्यांप्राकारेणमहापुरीं ॥ गृहैश्चगिरिसंकाशैः
शारदांबुदसन्निभैः ॥ १६ ॥

(क्वचिद्विरोधः आक्रीडाः क्रीडापर्वता इतिकतकः साधारणोद्यानान्याक्रीडा इत्यन्ये । तत्रासाधारणान्युद्यानान्याक्रीडा इति
तीर्थः ॥ १२ ॥ १३ ॥ समासाद्यलंकांलंकासमीपंप्राप्यवक्ष्यमाणविशेषणांलंकांददर्शेत्यन्वयः ॥ १४ ॥ सीतापहरणात् सीतांलंकायामपहृत्यस्थापना
द्धेतोरित्यर्थः राक्षसाश्चरक्षणोकरणाभूताः ॥ १५ ॥ १६ ॥ श्रीरामायरामचन्द्रायनमः ॥ ❀ ॥ श्रीजानकीवल्लभायनमः ॥ ॥ ❀ ॥ ॥ १६ ॥ ॥

225

प्रतोलीरथ्याः तासांपांडुरत्वमुत्तमत्वंचतत्रत्यसौधसंबंधकृतं ॥ अट्टालकाः प्राकारशिरांसि पताकाध्वजपटः तद्युक्तध्वजपुटः तद्युक्तध्वजशोभितां ॥ ७ ॥ लतापंक्ति
ःनदाकारचित्रविशेषास्तयाविराजितैः शोभमानैः तोरणैर्युक्तां देवइंद्रः देवपुरीं अमरावतीमिव ॥ अनेनपरिखांतर्जलमितितीर्थः ॥ २१ ॥ विश्वकर्मणानिर्मि
तांनेनापिमनसाकृतामिवस्थितां ॥ द्वारमुत्तरमासाद्यसमुद्रदक्षिणतटे प्लवनेनतस्यैवप्रथमंप्राप्तेः ॥ चिंतावक्ष्यमाणप्रकारा ॥ २२ ॥ कैलासेविलय

पांडुराभिः प्रतोलीभिरुच्चाभिरभिसंवृतां ॥ अट्टालकशताकीर्णां पताकाध्वजशोभितां ॥ ७ ॥ तोरणैः कांचनैर्दिव्यैर्लतापंक्तिवि
राजितैः ॥ ददर्श हनुमांल्लंकां देवो देवपुरीमिव ॥ १८ ॥ गिरिमूर्ध्निस्थितांलंकांपांडुरैर्भवनैः शुभैः ॥ ददर्श स कपिः श्रीमान्पुरी
माकाशगामिव ॥ १९ ॥ पालितां राक्षसेंद्रेण निर्मितां विश्वकर्मणा ॥ प्लवमानामिवाकाशे ददर्श हनुमान्कपिः ॥ २० ॥ वप्रप्रा
कारजघनां विपुलांबुवनांबरां ॥ शतघ्नीशूलकेशांतामट्टालकावतंसकाम् ॥ २१ ॥ मनसेव कृतां लंकां निर्मितां विश्वकर्म
णा ॥ द्वारमुत्तरमासाद्य चिंतयामास वानरः ॥ २२ ॥ कैलासनिलयप्रख्यमालिखंतमिवांबरं ॥ ध्रियमाणमिवाकाशमुच्छ्रि
तैर्भवनोत्तमैः ॥ २३ ॥ संपूर्णां राक्षसैर्घोरैर्गुहा माशीविषैरिव ॥ तस्याश्च महतीं गुप्तिं सागरं च निरीक्ष्य सः ॥ २४ ॥ रावणं
च रिपुं घोरं चिंतयामास वानरः ॥ २४ ॥

(स्थानं यस्याः लंकाद्वारस्य तत्प्रख्यमुत्तरद्वारं उच्छ्रितैर्भवनोत्तमैरंबरमालिखंतमिव आकाशं ध्रियमाण
मिव आकाशधरणांकुर्वदिव ॥ २३ ॥ एतदग्रे संपूर्णां राक्षसैर्घोरैर्गुहामाशीविषैरिवेतिपाठः इतरत्राक्षिप्तमितिकतकः राक्षसैः पूर्णां नगरीं महतीं
गुप्तिं रिपुं रावणं च सागरं च निरीक्ष्य चिंतयामास ॥ मादरं चिंतयामासेत्यर्थः ॥ २४ ॥ श्रीरामाय रामचन्द्राय नमः ॥ ॐ ॥ रामरामरामरामराम ॥ ॐ ॥

चिंताप्रकारः आगम्यापीति अपिना आगमनस्यैवाशक्यतास्त्विमा एषैव सागरनिरीक्षणेनस्त्विमा ॥ सुरैरपिजेतुमशक्यायदत्रः ॥२५॥ इमांत्विति
अविषमां न विद्यते विषमं यतस्तां प्राप्यापीत्यपिनापदातित्वादागमनमेवाशक्यमितिसूच्यते किंकरिष्यतिराघवः ॥ प्रायोराघवस्यापिदुःसाध्येत्य
र्थः ॥२६॥ अवकाशोनेति ॥ उपचितार्थत्वाद्बलदर्पपराक्रमसंपन्नत्वात्सुस्निग्धदृढप्रकृतित्वाच्चनसामादीनामवकाशइतिभावः ॥२७॥ पूर्वमाग

आगम्यापीह हरयो भविष्यंति निरर्थकाः ॥ नहियुद्धेन वै लंका शक्या जेतुं सुरैरपि ॥२५॥ इमां त्वविषमां लंकां दुर्गां रावणपालितां ॥ प्रा
प्यापि स महाबाहुः किंकरिष्यति राघवः ॥२६॥ अवकाशो न सान्त्वस्य राक्षसेष्वभिगम्यते ॥ न दानस्य न भेदस्य नैव युद्धस्य दृ
श्यते ॥२७॥ चतुर्णामिव हि गतिर्वानराणां तरस्विनां ॥ वालिपुत्रस्य नीलस्य मम राज्ञश्च धीमतः ॥२८॥ यावज्जानामि वैदेहीं यदि जी
वति वा न वा ॥ तत्रैव चिंतयिष्यामि दृष्ट्वा तां जनकात्मजां ॥२९॥ ततः स चिंतयामास मुहूर्तं कपिकुंजरः ॥ गिरेः शृंगे स्थितस्त
स्मिन्रामस्याभ्युदयं ततः ॥३०॥ अनेन रूपेण मया न शक्या रक्षसां पुरी ॥ प्रवेष्टुं राक्षसैर्गुप्ता क्रूरैर्बलसमन्वितैः ॥३१॥ महो
जसो महावीर्या बलवंतश्च राक्षसाः ॥ वंचनीया मया सर्वे जानकीं परिमार्गता ॥३२॥ लक्ष्यालक्ष्येण रूपेण रात्रौ लंकापुरी
मया प्राप्तकालं प्रवेष्टुं मे कृत्यं साधयितुं महत् ॥३३॥

॥तर्हिकस्य हनुमानिदानींसर्ववानरागमनासंभवएवेत्याह चतुर्णामिवेति ॥२८॥ ननुजानकी
जीवनज्ञानेनमोक्षणायबलाबलादिचिंताऽनस्मुहूर्तेनचिंतैवप्रथमंकुतोनेत्याह यावज्जानामीति यावत्पुरेमिलद्रष्टास्मे इत्यर्थः तत्रैवजानकीदर्शनविषयेऽप्य
वप्रथममितिशेषः प्रथमंतांदृष्ट्वापश्चाद्यत्किंत्यन्तत्सर्वमेवाचिंतयामीतिशेषः ॥२९॥ रामस्याभ्युदयंतदभ्युदयरूपसीतान्वेषणोपायं ॥३०॥ चिंताप्र
कारोऽनेनेति ॥३१॥३२॥ लक्ष्यंकार्यप्रद्युम्नानुमेयंतच्चानदलक्ष्यंचेंद्रियागोचरमित्यर्थः महत्कृत्यंसीतान्वेषणरूपंसाधयितुंअनेनरूपेणलंकापुरीप्रवेष्टुं

प्राप्तकालंज्ञात्वा ॥३३॥

226

तेन रूपेणाप्यन्वेषणं कथं घटेतेति पुनश्चिन्तयति तां पुरीमिति ॥ ३४ ॥ ३५ ॥ नेति रहिते एकान्ते कथं पश्येयमित्यन्वयः ॥ ३६ ॥ ननु सीतादर्शने किमर्थमेकान्तापे
क्षा तत्राह ॥ भूतार्थाः सिद्धप्रायकार्याणि विक्लवं कातरं ॥ अविमृश्यकारिणां दूतमासाद्य देशकालाभ्यामुचितप्रवृत्तिहीनाभ्यां विरोधिताः सन्तः सूर्योदये
तमइव विनश्यन्ति ॥ अतोऽसहायेन मयैतादृशे देशे काले कार्ये चतुरस्रमेव प्रवर्त्तितव्यमिति भावः ॥ ३७ ॥ न केवलं कार्यहानिः किन्तु अन्यदपि स्यादित्या

तां पुरीं तादृशीं दृष्ट्वा दुराधर्षां सुरासुरैः ॥ हनूमांश्चिन्तयामास विनिश्वस्य मुहुर्मुहुः ॥ ३४ ॥ केनोपायेन पश्येयं मैथिलीं जनकात्म
जां ॥ अदृष्टो राक्षसेन्द्रेण रावणेन दुरात्मना ॥ ३५ ॥ न विनश्येत्कथं कार्यं रामस्य विदितात्मनः ॥ एकामेकस्तु पश्येयं रहिते जन
कात्मजां ॥ ३६ ॥ भूताश्चार्था विनश्यन्ति देशकालविरोधिताः ॥ विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥ अर्थानर्थां
तरे बुद्धिर्निश्चितापि न शोभते ॥ घातयन्तीह कार्याणि दूताः पंडितमानिनः ॥ ३८ ॥ न विनश्येत्कथं कार्यं वैक्लव्यं न कथं भ
वेत् ॥ लंघनं च समुद्रस्य कथं नु न भवेद्वृथा ॥ ३९ ॥ मयि दृष्टे तु रक्षोभी रामस्य विदितात्मनः ॥ भवेद्व्यर्थमिदं कार्यं रावणा
नर्थमिच्छतः ॥ ४० ॥ न हि शक्यं क्वचित्स्थातुमविज्ञातेन राक्षसैः ॥ अपि राक्षसरूपेण किमुतान्येन केनचित् ॥ ४१ ॥ ६ ॥

य
ह अर्थानर्थान्तरे इति अर्थानर्थान्तरे कार्याकार्यविषये ॥ निश्चितापि बुद्धिः न शोभते विक्लवं दूतमासाद्येति शेषः न देवदृढेति घातयन्तीति एवं सति
लोको मत्स्वामिनं बुद्धिभ्रष्टं मा विजानीयादित्याशयः ॥ ३८ ॥ यदेवमतः कार्यं राजकार्यं न विनश्येत् ॥ वैक्लव्यं बुद्धिहीनता तत्प्रसिद्धिः स्वस्य
स्वस्वामिनश्च ॥ ३९ ॥ रावणानर्थं रावणवधं ॥ ४० ॥ अदर्शनेन संचारश्च सर्वथाऽशक्य इत्याह न हीति ॥ ४१ ॥ ६ ॥ ६ ॥

l Sanskrit University, Balmiki Campus, Kathmandu

४२॥ रक्षसामविदितं रक्षोभिरविदितं न किंचिदस्ति कृत्रिमरूपमिति शेषोऽतः प्राकृतमहं न कपिरूपेणैव स्थातव्यमिति भावः॥ ४३॥ किंच यावदस्तमयं स्वगोपनमेवोचितमित्याह इहेति। स्वेन रूपेण संवृतः सन्नुक्तः सन् इहाद्रिदेशे च यदि तिष्ठामि तदास्य रक्षःपरैरवगम्यमानत्वात् विनाशस्तु यया स्वामिभर्तुरर्थहानिश्च तस्मादासायमत्रैव क्वचित् गिरिगुहायां निःशंकं स्थित्वा रजन्यामपि स्वेन रूपेणैव। परं तु ह्रस्वतां गतो भवेवा

वायुरप्यत्र नाज्ञातश्चरेदिति मतिर्मम॥ न ह्यस्त्यविदितं किंचिद्रक्षसां भीमकर्मणां॥ ४२॥ [redacted] ॥ ४२॥ इहाहं यदि तिष्ठामि स्वेन रूपेण संवृतः॥ विनाशमुपयास्यामि भर्तुरर्थश्च हास्यति॥ ४३॥ तदहं स्वेन रूपेण रजन्यां ह्रस्वतां गतः॥ लंकामभियतिष्यामि राघवस्यार्थसिद्धये॥ ४४॥ रावणस्य पुरीं रात्रौ प्रविश्य सुदुरासदां॥ प्रविश्य भवनं सर्वं द्रक्ष्यामि जनकात्मजां॥ ४५॥ इति निश्चित्य हनुमान् सूर्यस्यास्तमयं कपिः॥ आचकांक्षे तदा वीरो वैदेह्या दर्शनोत्सुकः॥ ४६॥ सूर्ये चास्तं गते रात्रौ देहं संक्षिप्य मारुतिः॥ वृषदंशकमात्रोऽथ बभूवाद्भुतदर्शनः॥ ४७॥ प्रदोषकाले हनुमांस्तूर्णमुत्प्लुत्य वीर्यवान्॥ प्रविवेश पुरीं रम्यां प्रविभक्तमहापथां॥ ४८॥ प्रासादमालाविततां स्तंभैः कांचनसन्निभैः॥ शातकुंभनिभैर्जालैर्गंधर्वनगरोपमां॥ ४९॥

लंकामभियतिष्यामीत्यन्वयः॥ ४३॥ ४४॥ प्रथमतः पुरीं प्रविश्य ततः सर्वं भवनं रावणगृहं प्रविश्य॥ ४५॥ ४६॥ वृषान्मूषकान्दशतीति वृषदंशको मार्जारस्तन्मात्रस्तत्प्रमाणः॥ ४७॥ प्रविवेश पुरीमिति प्रवेशश्चर्वकान्वेषणसंकल्पोक्तिः॥ ४८॥ स्तंभैर्यानैरुपलक्षितामिति शेषः॥ ४९॥

सप्तेति भूमीनां समूहैः सप्तसंख्यावयवयुक्तैः रुपलक्षितां स्फटिकसंकीर्णैः स्फटिकरत्नखचितैः स्थलैरित्यर्थः स्थलं भूः तलैरिति पाठेपि स एवार्थः तैस्तैः प्रासादैरिति शेषः ॥ ५० ॥ रक्षसां तोरणानि रक्षोगृहद्वारस्थतोरणानि ॥ ५१ ॥ अचिंत्यामशक्यान्वेषणां चिंतां अयं विषादहेतुः अद्भुताकारामिति हर्षहेतुः ॥ ५२ ॥ पांडुराः सुधाधवला आविद्धाः परस्परसंविद्धा विमानानां सप्तभूमिकप्रासादानां मालास्यामस्तितां आवि

सप्तभौमाष्टभौमैश्च सदद्दर्श महापुरीं ॥ स्थलैः स्फटिकसंकीर्णैः कार्त्तस्वरविभूषितैः ॥ ५० ॥ तैस्तैः शुशुभिरे नाभिर्भवनान्यत्र रक्षसां ॥ ५० ॥ कांचनानि विचित्राणि तोरणानि च रक्षसां ॥ लंकामुद्योतयामासुः सर्वतः समलंकृतां ॥ ५१ ॥ अचिंत्यामद्भुताकारां दृष्ट्वा लंकां महाकपिः ॥ आसीद्विषण्णो हृष्टश्च वैदेह्या दर्शनोत्सुकः ॥ ५२ ॥ स पांडुराविद्धविमानमालिनीं महार्हजांबूनदजालतोरणां ॥ यशस्विनीं रावणबाहुपालितां क्षपाचरैर्भीमबलैः सुपालितां ॥ ५३ ॥ चंद्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो विराजन् ॥ ज्योत्स्नावितानेन वितत्य लोकानुत्तिष्ठतेनेकसहस्ररश्मिः ॥ ५४ ॥

वेशेति शेषः ॥ ५३ ॥ मध्यगतः खमध्यगतः अनेकसहस्रेमनेन पूर्णत्वं अनेकेत्यस्यैव सहस्रेमनेन विवरणं उत्तिष्ठते आर्षस्तङ् ज्योत्स्नावितानेन लोकान्वितत्य आवार्य सम्यगवलोकनसाधनतया ऽस्य हनूमतः साचिव्यं साहाय्यं कुर्वन्निव ननु खमध्यगतस्य प्रदोषे उदयोऽसम्भवो न तदा पूर्णत्वं पूर्णस्य तु न खमध्यगतस्योदय इति चेन्न शुक्लैकादश्यां खमध्यगतस्य समीपगतत्वेन मध्यगतत्वोपचारात् पूर्णत्वं च पूर्णकल्पत्वेन व्यवहृतं यद्वा अनेकसनाः सहस्रं रश्मयो यस्येति मध्यमपदलोपितत्पुरुषगर्भो बहुव्रीहिः अतएव रात्रिशेषे हनूमत्यशोकवनिकास्थे सीतासविधे रावणस्यागमनकाले दी

l Sanskrit University, Valmiki Campus, Kathmandu

पिकावर्णनंकृतंतेनहिनदावंद्रास्तानुमानंज्ञात्वेयंमार्गशीर्षस्यफाल्गुनेलंकांप्रविश्यायाःसीतायावर्तनेदशमोमासोबोद्धुशेषोत्तवंगमेनिह
नूमंतंप्रतिवचनात् हरणादिनेऽस्वच सीतायालंकाप्रवेशंरामभयादितिस्पष्टमेव॥ ५४॥ पोप्लूयमानंभृशंप्लवमानं॥ ५५॥ शमोमानः
इतिश्रीरामाभिरामेश्रीरा॰सुंद॰द्वितीयःसर्गः॥ २॥ लंबशिखरेउन्नतशिखरेलंबेलंबाख्यपर्वतेअतएवलंबतोयदसन्निभेसत्वंसत्व

शंखप्रभंक्षीरमृणालवर्णमुद्गच्छमानंव्यवभासमानं॥ददर्शचंद्रंसकपिप्रवीरःपोप्लूयमानंसरसीवहंसं॥ ५५ ॥
इत्यार्षेश्रीमद्रामायणेवा॰सुंदरकांडेद्वितीयःसर्गः॥ २ ॥ सलंबशिखरेलंबेलंबतोयदसन्निभे॥ सत्वमा
स्थायमेधावीहनूमान्मारुतात्मजः॥ १ ॥ निशिलंकांमहासत्वोविवेशकपिकुंजरः॥ रम्यकाननतोयाढ्यांपुरींराव
णपालितां॥ २ ॥ शारदांबुधरप्रख्यैर्भवनैरुपशोभितां॥ सागरोपमनिर्घोषांसागरानिलसेवितां॥ ३ ॥ सुपुष्टबल
संपुष्टांयथैवविटपावतीं॥ चारुतोरणनिर्यूहांपांडुरद्वारतोरणां॥ ४ ॥ भुजगाचरितांगुप्तांशुभांभोगवतीमिव॥ तांस
विद्युद्घनाकीर्णांज्योतिर्गणनिषेवितां॥ ५॥

॥गुणमपेक्षितबलंचतज्जन्मनःप्रधानरक्षोजयायसत्वमुत्साहमाश्रयं॰मेधावीकालोचित
विचारज्ञः॥ १॥ २॥ सागरोपमनिर्घोषांसागरस्यइवसहस्ररक्षःशब्दवतीं॥ ३॥ विटपावतीअलकापुरीनिर्यूहामत्तवारणाःचारुतोरणास्थनि
र्यूहायस्यास्तां॰पांडुरसुधाधवलद्वारतोरणायस्यांतां॥ ४ ॥ भुजगैराचरितांलक्ष्मसंचारांभोगवतींसर्पनगरींसविद्युद्भिर्घनैर्व्याप्तांज्योतिषांग्र
हर्क्षादीनांगणैर्निषेवितामिमुन्नतत्वादपि॥ ५ ॥ ६ ॥

चंडमारुतानां परिवहादीनां शब्दो यस्या तादृशीममरावतीमिव स्थितां अत्रामराः संत्यस्यामित्यमरावती द्यौः असंज्ञायामपि मतोवहुव इत्यावोदीर्घः नन्विहेंद्रपुरी अमरावती उक्तलक्षणाभावात् लंकाया उक्तमुसाहश्पंवसालंकार राक्षसवत्वात् वलवत् घोषवाऊत्याच्चेतिकांकः शातकुंभेन स्वर्णमयेन ॥६॥ किंकिणीजालैः क्षुद्रघंटिकासमूहैः शब्दो यासां ताभिः ॥७॥ वैडूर्यमणिभिः कृतावेदिकाश्चत्वरा येषु ताह

चंडमारुतनिर्ह्रादां यथा चाप्यमरावतीं ॥ शातकुंभेन महता प्राकारेणाभिसंहृतां ॥ ६ ॥ किंकिणीजालघोषाभिः पताकाभिरलंकृतां ॥ आसाद्य सहसा हृष्टः प्राकारमभिपेदिवान् ॥ ७ ॥ विस्मयाविष्टहृदयः पुरीमालोक्य सर्वतः ॥ जांबूनदमयैर्द्वारैर्वैडूर्यकृतवेदिकैः ॥ ८ ॥ मणिस्फटिकमुक्ताभिर्मणिकुट्टिमभूषितैः ॥ तप्तहाटकनिर्यूहै राजतामलपांडुरैः ॥ ९ ॥ वैडूर्यकृतसोपानैः स्फाटिकांतरपांसुभिः ॥ चारुसंजवनोपेतैः खमिवोत्पतितैः शुभैः ॥ १० ॥ क्रौंचवर्हिणसंघुष्टैः राजहंसनिषेवितैः ॥ तूर्याभरणनिर्घोषैः सर्वतः परिनादितां ॥ ११ ॥ ॥ ६ ॥ ॥

र्द्वारैः ॥ ८ ॥ मणिस्फटिकमुक्ताभिः युक्तकृतवेदिकैर्द्वारैः सर्वत उपलक्षितां कुट्टिमो निवद्धाभूः निर्यूहो मत्तवारणः राजतामलपांडुरैः रजतमयामलपांडुरा परिच्छदेशैः सर्वत्र द्वारविशेष्य ॥ ९ ॥ वैडूर्यमणिभिः कृतानि सोपानानि येषु तैः स्फाटिकाः स्फटिकरचिताः अंतर्मध्यप्रदेशा अपांसव श्च येषु तैर्द्वारैः चारुसंजवनैः सभाभिरुपेतैर्द्वारैः खमुत्पतितैरिव शुभैर्ग्रहैरुपलक्षितैर्द्वारैः ॥१

संघुष्टैः कृतघोषैर्द्वारैः ॥ ११ ॥

वस्वोकसाराऽलकातत्सदृशीं ह्रस्वश्चार्षः जांबूनदमयद्वारत्वादिना सादृश्यं खमिवोत्पतितां गिरिमूर्ध्नि प्रतिष्ठितत्वात् ॥ १२ ॥ १३ ॥ १४ अनेनवर्षयि
तुमशक्यां किं सर्वथा नेत्याह ॥ कुमुदेत्यादि प्रसिद्धा प्रकर्षेण सिद्धगतिका ॥ १५ ॥ कुशपर्वणा इति कुशपर्वसदृशलोमवत इत्यर्थकं ऋक्षस्य विशे
षणं अतिदीर्घकठोरलोमवत्त्वात् ॥ कपिमुख्यस्येति विशेषणं च तस्यैव ममचैव गतिरस्यामिति शेषः ॥ १६ ॥ रामस्यपराक्रमं लक्ष्मणस्य

वस्वोकसाराप्रतिमां समीक्ष्य नगरीं ततः ॥ खमिवोत्पतितां लंकां जहर्ष हनुमान्कपिः ॥ १२ ॥ तां समीक्ष्य पुरीं लंकां रा
क्षसाधिपतेः शुभां ॥ अनुत्तमामृद्धिमतीं चिंतयामास वीर्यवान् ॥ १३ ॥ नेयमन्येन नगरी शक्या धर्षयितुं बला
त् ॥ रक्षिता रावणबलैरुद्यतायुधपाणिभिः ॥ १४ ॥ कुमुदांगदयोर्वापि सुषेणस्य महाकपेः ॥ प्रसिद्धेयं भवेद्भूमि
र्मैंदद्विविदयोरपि ॥ १५ ॥ विवस्वतस्तनूजस्य हरेश्च कुशपर्वणः ॥ ऋक्षस्य कपिमुख्यस्य मम चैव गतिर्भवेत् ॥ १६ ॥
समीक्ष्य च महाबाहो राघवस्य पराक्रमं ॥ लक्ष्मणस्य च विक्रांतमभवत्प्रीतिमान्कपिः ॥ ७ ॥ तां रत्नवसनोपेतां गोष्ठा
गारावतंसिकां ॥ यंत्रागारस्तनीमृद्धां प्रमदामिव भूषितां ॥ १८ ॥ तां नष्टतिमिरां दीपैर्भास्वरैश्च महागृहैः ॥ नगरीं रा
क्षसेंद्रस्य स ददर्श महाकपिः ॥ १९ ॥

विक्रांतं शौर्यं च समीक्ष्येदृश्यपि मदीयचारैरीशी भस्मकारध्वंसेति विचार्य प्रीतिमानभवत् अविषमोऽभूत्
७ ॥ रत्नवसनोपेतां रत्नाकरवाससं · रत्नप्राकारवाससंच · गोष्ठान्यागाराणि चाऽवतंसोऽस्याः सा गोष्ठं गोशाला इदं वाजिशालादेरप्युपलक्ष
णं ॥ यंत्राणि प्राकारोपरि स्थापितानि ॥ शतघ्न्यादीनि तन्मूलस्तनीं ॥ १८ ॥ तां प्रसिद्धां लंकां भास्वरैश्च महागृहैः वा चंद्रकिरणैः ॥ १९ ॥ ६ ॥

229

॥ रामः ॥
॥ १६ ॥

सानगरीस्वेनरूपेणाधिष्ठात्रदेवतारूपेणायुक्तानंददर्श ॥२०॥ स्वयमेवोत्थिता अनन्यप्रेरितेतियावत् ॥२१॥ अतिष्ठत देवतारूपं प्रकाशि
नवती ॥२२॥ वनालयवानरमन्दमात्यं ॥२३॥ त्वयाएषाप्रवेष्टुंनशक्यंक्षुद्रउपसर्गंसम्यक्यामितिवत् नशक्येतिपाठस्तुसुगमएव ॥२४॥ २५ ॥ अथत

अथसाहरिशार्दूलंप्रविशंतंमहाकपिं ॥ नगरीस्वेनरूपेणददर्शपवनात्मजं ॥२०॥ सातंहरिवरंदृष्ट्वालंकारावणपालिता
स्वयमेवोत्थितातत्रविकृताननदर्शना ॥२१॥ पुरस्तात्तस्यवीरस्यवायुसूनोरतिष्ठत ॥ मुंचमानामहानादमब्रवीत्प
वनात्मजं ॥२२॥ कस्त्वंकेनचकार्येणइहप्राप्तोवनालय ॥ कथयस्वेहयत्तत्त्वंयावत्प्राणाधरंतिते ॥२३॥ नशक्या
खल्वियंलंकाप्रवेष्टुंवानरत्वया ॥ रक्षितारावणबलैरभिगुप्तासमंततः ॥२४॥ अथतामब्रवीद्वीरोहनूमानग्रतःस्थि
तां ॥ कथयिष्यामितत्तत्त्वंयन्मांत्वंपरिपृच्छसि ॥२५॥ कात्वंविरूपनयनापुरद्वारेवतिष्ठसे ॥ किमर्थंचापिमांक्रोधान्नि
र्भर्त्सयसिदारुणे ॥२६॥ हनुमद्वचनंश्रुत्वालंकासाकामरूपिणी ॥ उवाचवचनंक्रुद्धापरुषंपवनात्मजं ॥२७॥ अहं
राक्षसराजस्यरावणस्यमहात्मनः ॥ आज्ञाप्रतीक्षादुर्धर्षारक्षामिनगरीमिमां ॥२८॥ नशक्यंमामवज्ञायप्रवेष्टुंनगरी
मिमां ॥ अद्यप्राणैःपरित्यक्तःस्वप्स्यसेनिहतोमया ॥२९॥ अहंहिनगरीलंकास्वयमेवप्लवंगम ॥ सर्वतःपरिरक्षामित्र
नस्तेकथितंमया ॥३०॥

याएषोहनुमांस्तांप्रतिनत्रभोत्तरकथनंप्रतिज्ञायसुरसावदेषापूज्यावासिंहिकावद्वध्यावेतिनिर्णेतुंपृच्छतिकात्वमिति ॥२६॥२७॥ आज्ञाप्रतीक्षाति
योगपरिपालिका ॥२८॥ २९ ॥ अथायिकात्वमत्राह अहंहीति ॥ स्वयंस्वदेवतास्वरूपेणेत्यर्थः ॥३०॥ श्रीरामायनमः रामचन्द्रायनमः ॥

l Sanskrit University, Balmiki Campus, Kathmandu

यत्नवान्लंकाधिष्ठातृत्वेनावगतत्वात्तद्विजयोपाये यत्नवान्॥ ३१॥ स्त्रीरूपविकृतां विकृतस्त्रीरूपां॥ अथ लङ्काप्रश्नोत्तरमाह आबभाषे इति॥ ३२॥ द्र
क्ष्यामीत्यर्थमिह संप्राप्त इत्यन्वयः दर्शनं प्रयोजनमुद्दिश्येत्यर्थः॥ ३३॥ वनं कृत्रिमकाननमकृत्रिमं॥ ३४॥ भूयोधिकं परुषाक्षरं वाक्यं पुनर्बभाषे इति

नू २

लंकाया वचनं श्रुत्वा हनूमान्मारुतात्मजः॥ यत्नवान्स हरिश्रेष्ठः स्थितः शैल इवापरः॥ ३१॥ स तां स्त्रीरूपविकृतां दृष्ट्वा वानरपुं
गवः॥ आबभाषेथ मेधावी सत्ववान्प्लवगर्षभः॥ ३२॥ द्रक्ष्यामि नगरीं लंकां साट्टप्राकारतोरणां॥ इत्यर्थमिह संप्राप्तः प
रं कौतूहलं हि मे॥ ३३॥ वनान्युपवनानीह लंकायाः काननानि च॥ सर्वतो गृहमुख्यानि द्रष्टुमागमनं हि मे॥ ३४॥ तस्य तद्व
चनं श्रुत्वा लंका सा कामरूपिणी॥ भूय एव पुनर्वाक्यं बभाषे परुषाक्षरं॥ ३५॥ मामनिर्जित्य दुर्बुद्धे राक्षसेश्वरपालि
तां॥ न शक्यं त्वद्य ते द्रष्टुं पुरीयं वानराधम॥ ३६॥ ततः स हरिशार्दूलस्तामुवाच निशाचरीं॥ दृष्ट्वा पुरीमिमां भद्रे पुन
र्यास्ये यथागतं॥ ३७॥ ततः कृत्वा महानादं सा वै लंका भयंकरं॥ तलेन वानरश्रेष्ठं ताडयामास वेगिना॥ ३८॥ ततः स हरि
शार्दूलो लंकया ताडितो भृशं॥ ननाद सुमहानादं वीर्यवान्मारुतात्मजः॥ ३९॥ ततः संवर्तयामास वामहस्तस्य सोंगुलीः
मुष्टिनाभिजघानैनां हनूमान्क्रोधमूर्छितः॥ ४०॥

संबंधः॥ ३५॥ ३६॥ अनिर्जित्य द्रष्टुं न शक्यमित्युक्तोपि कस्यापि वस्तुनोऽग्रहणरूपं केवलं दर्शनमात्रेण का क्षतिरित्याशयेनाह तत इति हनुमान्
॥ ३७॥ वेगिना संजातवेगा॥ ३८॥ महानादं ननादेति निर्भयत्वद्योतनं॥ ३९॥ अंगुलीः संवर्तयामास मुष्टिं बबंधेत्यर्थः॥ ४०॥ श्रीरामाय रामचन्द्राय

श्री

वामहस्तमुष्टिवधे आशयमाह ॥ स्त्री चेति तेन प्रहारेण ॥ वाममुष्टिकृतसदयताडनेनापीत्यर्थः ॥ विकृताननदर्शना विकृतवक्त्रदृष्टिः ॥ ४१ ॥ ४२ ॥ उद्विग्नासीत्यत्र गर्वि-
तं गर्वरहितं ॥ ४३ ॥ त्रायस्व मा प्राणनाशं कुर्वित्यर्थः तत्र हेतुः समये इति स्त्री न हन्तव्येति शास्त्रमर्यादायामित्यर्थः ॥ ४४ ॥ यद्यप्यहं लंकाधिष्ठातृदेवतात्वात्

स्त्री चेति मन्यमानेन नातिक्रोधः स्वयंकृतः ॥ सा तु तेन प्रहारेण विह्वलांगी निशाचरी ॥ ४१ ॥ पपात सहसा भूमौ विकृताननदर्श-
ना ॥ ४१ ॥ ततस्तु हनुमान्वीरस्तां दृष्ट्वा विनिपातितां ॥ कृपां चकार तेजस्वी मन्यमानः स्त्रियं च तां ॥ ४२ ॥ ततो वै भृशमुद्विग्ना लंका
सा गद्गदाक्षरं ॥ उवाचागर्वितं वाक्यं हनूमन्तं प्लवंगमं ॥ ४३ ॥ प्रसीद सुमहाबाहो त्रायस्व हरिसत्तम ॥ समये सौम्य तिष्ठन्ति सत्त्व-
वन्तो महाबलाः ॥ ४४ ॥ अहं तु नगरी लंका स्वयमेव प्लवंगम ॥ निर्जिताहं त्वया वीर विक्रमेण महाबल ॥ ४५ ॥ इदं च तथ्यं शृणु मे
ब्रुवंत्या वै हरीश्वर ॥ स्वयं स्वयंभुवा दत्तं वरदानं यथा मम ॥ ४६ ॥ यदा त्वां वानरः कश्चिद्विक्रमाद्वशमानयेत् ॥ तदा त्वया हि विज्ञे-
यं रक्षसां भयमागतम् ॥ ४७ ॥ स हि मे समयः सौम्य प्राप्तोऽद्य तव दर्शनात् ॥ स्वयंभूविहितः सत्यो न तस्यास्ति व्यतिक्रमः ॥ ४८ ॥
सीतानिमित्तं राज्ञस्तु रावणस्य दुरात्मनः ॥ रक्षसां चैव सर्वेषां विनाशः समुपागतः ॥ ४९ ॥ तत्प्रविश्य हरिश्रेष्ठ पुरीं रावणपालि-
तां ॥ विधत्स्व सर्वकार्याणि यानि यानीह वांछसि ॥ ५० ॥

दुर्जया तथापि त्वया निर्जिता ॥ ४५ ॥ इदं च तथ्यं शृणु तदनुग्रहार्थमुच्यमानमित्यर्थः वरदा-
नं दत्तं कृतमित्यर्थः ॥ ४६ ॥ रक्षसां भयमिति एवं च मज्जयोयं सर्वरक्षोजयसूचक इति भावः ॥ ४७ ॥ न तस्यास्ति व्यतिक्रमः भगवद्दत्तवरस्य रावणस्य त्व-
त्कृताधिक्षेपक्षुभितनन्दिकेश्वरशापात् ॥ सद्यः प्राप्तो विनाशः स्वयंभूवरवशाद्वानरास्कन्दनपर्यन्तं प्रतिबद्ध इति कथात्रानुसंधेयेति तीर्थः ॥ ४८ ॥ ४९

सुन्दरकाण्डे ॥ ५० ॥

l Sanskrit University, Valmiki Campus, Kathmandu

शापोपहतांमत्यसंकल्पस्यभगवद्वचनेननंदिकेशशापेनचप्रापितनाशकालां॥हरीश्वरस्त्वंप्रविश्ययदृच्छयास्वेच्छयासर्वत्ररावणांतःपुरपर्यंतंयथा
सुखंगतःसन्सतींमप्रच्युतपातिव्रत्यांजानकींविमार्गस्वान्वेषय॥अनेनचवचनेनसीतायाःकल्याणात्वपुरेवर्ततइतिउपदिष्टं॥५१॥कामस्मानः॥इति
रामाभिरामेश्रीरा०सुंदरकांडेद्वितीयःसर्गः॥३॥सइति॥१॥प्राकारमद्वारेणावपुप्लुवेशत्रोःपुरंयामंदृहवा॥अद्वारेणप्रविशेकृतुविनाशा

प्रविश्यशापोपहतांहरीश्वरःपुरींशुभांराक्षसमुख्यपालितां॥यदृच्छयात्वंजनकात्मजांसतींविमार्गसर्वत्रगतोयथासुखं
११ ॥इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेसुंदरकांडेद्वितीयःसर्गः॥ २ ॥सनिर्जित्यपुरींलंकांश्रेष्ठांतांकामरूपिणीं॥वि
क्रमेणमहातेजाहनूमान्कपिसत्तमः॥१॥अद्वारेणमहावीर्यःप्राकारमवपुप्लुवे॥निशिलंकांमहासत्वोविवेश
कपिकुंजरः॥२॥प्रविश्यनगरींलंकांकपिराजहितंकरः॥चक्रेथपादंसव्यंचशत्रूणांसतुमूर्धनि॥३॥प्रविष्टःसत्वसं
पन्नोनिशायांमारुतात्मजः॥समहापथमास्थायमुक्तपुष्पविराजितं॥४॥ततस्तुतांपुरींलंकांरम्यामभिययौकपिः
हसितोत्कृष्टनिनदैस्तूर्यघोषपुरस्कृतैः॥ ५ ॥

((येतिनीतिनिस्ठ्नेरितिभावः॥ २ ॥अद्वारेणप्रवेशोपिसव्यंपादंवामपादंप्रथमतश्चक्रे यतः
सतुप्रथमनिक्षिप्तवामपादस्तुशत्रूणांमूर्धन्येवनिहितोभवतितथाविजयप्रदोभवतीतिभावः॥उक्तंचप्रयाणकालेस्वगृहप्रवेशोविवाहकालेपिच
दक्षिणांघ्रिंकृत्वाग्रतःशत्रुपुरप्रवेशोवामंनिदध्यात्चरणंनृपालयइति॥ ३ ॥महापथंराजमार्गः॥ ४ ॥हसितैरट्टहासैरुत्पन्नायेउत्कृष्ट
निनदास्तूर्यघोषैःपुरस्कृतास्तैरुपलक्षितां॥ ५ ॥श्रीरामायरामचन्द्रायनमः॥ ६ ॥श्रीकृष्णार्पणमस्तु॥ ६ ॥

वज्राणां मंजूशानां निकाशाः प्रतिमा येषु गृहेषु तैर्बभासे ॥ वज्रनिर्मितानि जालानि गवाक्षाणि तैर्विभूषितैर्गृहैः ॥ ६ ॥ पद्मादिसंज्ञकं संस्थितं स्थानं येषां तैः ॥ ७ ॥
वर्धमानगृहैः वर्धमाननामकसंस्थानवत् ॥ गृहैः चतुःशालं चतुर्द्वारं सर्वतोभद्रसंज्ञितं ॥ पश्चिमद्वाररहितं नंद्यावर्त्ताख्यं उत्तमम् दक्षिणद्वाररहि-
तं वर्धमानं धनप्रदं प्राग्द्वाररहितं स्वस्तिकाख्यं पुत्रधनप्रदमित्युक्तेः हितंकर इत्यर्थः ॥ ८ ॥ चरन्तां ददर्शेत्यन्वयः ॥ ९ ॥ विविधाकृतिरूपा-

वज्रांकुशनिकाशैश्च वज्रजालविभूषितैः ॥ गृहमेघैः पुरी रम्या बभासे द्यौरिवांबुदैः ॥ ६ ॥ प्रजज्वाल तदा लंका रक्षोगणगृ-
हैः शुभैः ॥ सिताभ्रसदृशैश्चित्रैः पद्मस्वस्तिकसंस्थितैः ॥ ७ ॥ वर्द्धमानगृहैश्चापि सर्वतः सुविभूषितैः ॥ तां चित्रमाल्या-
भरणां कपिराजहितंकरः ॥ ८ ॥ राघवार्थं चरन् श्रीमान् ददर्श च ननंद च ॥ भवनाद्भवनं गच्छन् ददर्श कपिकुंजरः ॥ ९ ॥
विविधाकृतिरूपाणि भवनानि ततस्ततः ॥ शुश्राव रुचिरं गीतं त्रिस्थानस्वरभूषितं ॥ १० ॥ स्त्रीणां मदनविद्धानां दिवि
चाप्सरसामिव ॥ शुश्राव कांचीनिनदं नूपुराणां च निःस्वनं ॥ ११ ॥ सोपाननिनदांश्चापि भवनेषु महात्मनां ॥ आस्फोटित-
निनादांश्च क्ष्वेडितांश्च ततस्ततः ॥ १२ ॥ शुश्राव जपतां तत्र मंत्रान् रक्षोगृहेषु वै ॥ स्वाध्यायनिरतांश्चैव यातुधानान् ददर्श सः ॥ १३ ॥

णि विविधा आकाराः रूपाणि वर्णाश्च येषां तानि भवनानि ददर्शेति पूर्वेणान्वयः ॥ त्रिस्थानस्वरभूषितं उरःकंठशिरोरूपस्थानत्रयजैर्मंद्रमध्यतारस्वरैर्भू-
षितं ॥ १० ॥ ११ ॥ सोपाननिनदान् सोपानसंचरत्कांताजनकांचीमंजीरनिनदान् यद्वा सोपानेषु पादाघातजशब्दान् आस्फोटितं विलासार्थं करा-
स्फालनं तज्जन्यनिनादान् क्ष्वेलितान् सिंहनादान् ॥ १२ ॥ मंत्रान्वेदमंत्रान् स्वाध्यायः स्वार्थे निरताः ॥ १३ ॥ छ ॥ ॥

१४॥ मध्यमेगुल्मेमध्यमकक्ष्याप्रदेशे वरान्नगरवृत्तांतावेदकस्टचारान्दीक्षितन्जटिलमुंडाः इहिवनियमवयः गोजिनंगवाजिनंतद्वाससोंबरवाससोवि
वाससः॥ ननुलंकायाभारतखंडबहिर्भावेनकर्मभूमित्वाभावात्कथंतत्ररक्षसांदीक्षितत्वमितिचेन्ननित्यकर्मस्वस्वदेशेप्यधिकारात् रावणादेस्त
पोमहात्म्यात्तत्रकाम्यकर्मसिद्धिरपीत्यवगम्यते यथात्वष्टुरमेंद्रमेवसोममाजह्रुरित्यादिश्रुतयथोक्तरीत्या एतेनदेवानामीषद्दिक्षितानामपियज्ञानुदर्श
यतीतिभाष्यरीत्याचांगवैकल्येप्यनुष्ठितात्कर्मणोहत्रोत्पत्तिरूपकामनासिद्धिस्तथाप्रकृतदेशरूपांगवैकल्येपिनसिद्धिःरक्षसामपिदेवयो

रावणास्तवसंयुक्तान्गर्जतोराक्षसानपि॥ राजमार्गसमाहृत्यस्थितंरक्षोगणंमहत्॥१४॥ ददर्शमध्यमेगुल्मेराक्षसस्य
चरान्बहून्॥ दीक्षितान्जटिलान्मुंडान्गोजिनांबरवाससः॥१५॥ दर्भमुष्टिप्रहरणानग्निकुंडायुधांस्तथा॥ कूटमुद्गरपाणीं
श्चदंडायुधधरानपि॥१६॥ एकाक्षानेककर्णांश्चचलदेकपयोधरान्॥ करालान्भुग्नवक्त्रांश्चविकटान्वामनांस्तथा॥७॥
धन्विनःखड्गिनश्चैवशतघ्नीमुसलायुधान्॥ परिघोत्तमहस्तांश्चविचित्रकवचोज्ज्वलान्॥१८॥ नातिस्थूलान्नातिकृशा
न्नातिदीर्घातिह्रस्वकान्॥ नातिगोरान्नातिकृष्णान्नातिकुब्जान्नवामनान्॥१९॥ विरूपान्बहुरूपांश्चसुरूपांश्चसुवर्चसः॥ ध्वजि
नःपताकिनश्चैवददर्शविविधायुधान्॥२०॥

(निःवान्॥१५॥ अरिष्टनिवारणपूर्वकमनुष्ठाननिर्वाहायदर्भमुष्टिप्रहरणत्वंकेषांचित्यथाव
ज्रंहरेःपाशोनथाविश्वकरेकशाशनिस्मृतेः इत्याद्युग्न्यादनेहाराशत्रु [illegible] मास्कतयाऽग्निकुंडानामायुधत्वंकूटोऽयस्कारकूटः आयुधविशेषः॥१६॥
एकपयोधरान्परभागेसूक्ष्मसन्निवेशस्तनेनापिरहितानान्विकटान्विकटागान्॥७॥१८॥ नातिदीर्घातिह्रस्वकानित्यत्रभंगरेफहकारसंयोगपरात्
ह्लघुकार्यकारीतिन॥१९॥ छंदोभंगआर्षः॥२०॥

॥रा.॥
॥१९॥

232

वृक्षायुधाः वक्रलगुडाद्यायुधाः पट्टिशाशनी आयुधविशेषे क्षेपणीभिंडिपालः ॥२१॥ यथास्वैरचरान् यथेष्टं स्वैरविहारं गमनात् ॥२२॥
अव्यग्रं सावधानं आरक्षं आसमंतात् अंतःपुररक्षकसैन्यं मध्यमं मध्यमकक्ष्यास्थितं ॥२३॥ अंतःपुराग्रतः रावणांतःपुरस्याग्रतः स
न्नद्धं आरक्षावस्थितिगृहं हद्धासः प्रकृतः प्रसिद्धः कपिः ॥२४॥ राक्षसेंद्रस्य गृहमुच्यमानविशेषणं ददर्श पुंडरीकावतंसाभिः श्वेतप

शक्तिवृक्षायुधांश्चैव पट्टिशाशनिधारिणः ॥ क्षेपणीपाशहस्तांश्च ददर्श स महाकपिः ॥२१॥ स्रग्विणस्त्वनुलिप्तांश्च व
राभरणभूषितान् ॥ नानावेषसमायुक्तान् यथास्वैरचरान्बहून् ॥२२॥ तीक्ष्णशूलधरांश्चैव वज्रिणश्च महाबलान्
शतसाहस्रमव्यग्रमारक्षं मध्यमं कपिः ॥२३॥ रक्षोधिपतिनिर्दिष्टं ददर्शांतःपुराग्रतः ॥ सनद्धांतन्नृहंहद्धामहाहाट
कतोरणं ॥२४॥ राक्षसेंद्रस्य विख्यातमद्रिमूर्ध्नि प्रतिष्ठितं ॥ पुंडरीकावतंसाभिः परिखाभिः समावृतं ॥२५॥ प्राका
राहतमत्यंतं ददर्श स महाकपिः ॥ त्रिविष्टपनिभं दिव्यं दिव्यनादविनादितं ॥२६॥ वाजिहेषितसंघुष्टमद्भुतैश्च हयै
स्तथा ॥ रथैर्यानैर्विमानैश्च तथा हयगजैः शुभैः ॥२७॥ वारणैश्च चतुर्दंतैः श्वेताभ्रनिचयोपमैः ॥ भूषितैरुचिरद्वारं
मत्तैश्च मृगपक्षिभिः ॥२८॥ रक्षितं सुमहावीर्यैर्यातुधानैः सहस्रशः ॥ राक्षसाधिपतेर्गुप्तमाविवेश गृहं कपिः ॥२९॥

द्मभूषिताभिः ॥२५॥२६॥ विमानैः पुष्पकादिभिः विचित्रवर्णादिमत्वादद्भुतत्वं हयानां हयगजैः हयाकारैर्गजैः स्वल्पगजैरितियावत् ॥२७॥ घा
रमित्यस्य ददर्शेतिशेषः ॥२८॥ आविवेश आससाद ॥२९॥

हेमत्नप्रवर्णस्वर्णत्वमाहितेनजांबूनदेनषोडशवर्णस्वर्णेननिर्मितं ॥ चक्रवालं प्राकारमंडलं यस्य महार्हमुक्तामणिभिः भूषितोंतः शिरोभागो
यस्य पराध्याभ्यामुत्तमाभ्यां कालागरुचंदनाभ्यामर्हीर्हणा पूजा यस्य नदंतः पुरमाविवेश सहनुमान् ॥ ३० ॥ नरामानः ॥ इतिश्रीरामाभिरामे
श्रीरा० सुंदरकांडे चतुर्थः सर्गः ॥ ४ ॥ ततः अंतःपुरप्रवेशोत्तरं रात्रेः प्रथमयामस्य समाप्तिकल्पमंत्रेति वोध्यं ॥ मध्यंगतं व्योममध्यं तारा

स हेमजांबूनदचक्रवालं महार्हमुक्तामणिभूषितांतं ॥ परार्ध्यकालागरुचंदनार्हं स रावणांतःपुरमाविवेश ॥ ३० ॥
इत्यार्षे श्रीमद्रामायणे वा० सुंदरकाण्डे चतुर्थः सर्गः ॥ ४ ॥ चंद्रोपि साचिव्यमिवास्य कुर्वंस्तारागणैर्मध्यगतो
विराजन् ॥ ज्योत्स्नावितानेन वितत्य लोकानुत्तिष्ठतेनैकसहस्ररश्मिः ॥ १ ॥ शंखप्रभाक्षीरमृणालवर्णमुद्गच्छ
मानं व्यवभासमानं ॥ ददर्श चंद्रं स कपिप्रवीरः पोप्लूयमानं सरसीव हंसं ॥ २ ॥ ततः समध्यंगतमंशुमंतं ज्यो
त्स्नावितानं मुहुरुद्वमंतं ॥ ददर्श धीमान् भुवि भानुमंतं गोष्ठे वृषं मत्तमिव भ्रमंतं ॥ १ ॥ लोकस्य पापानि विनाश
यंतं महोदधिं चापि समेधयंतं ॥ भूतानि सर्वाणि विराजयंतं ददर्श शीतांशुमथाभियांतं ॥ २ ॥

। मध्यं व्याप्तं अंशुमंतं शी
तांशुं भानुमंतं सूर्ययोगेन प्रकाशवंतं किरणमंतं गोष्ठे वृषं मत्तं वृषमिव ॥ १ ॥ पापानि पापजनकदुःखानि नाशयंतं लोकाल्हादजनक
त्वात् समेधयंतं वर्धयंतं ॥ विराजयंतं प्रकाशयंतं अभितो यांतं अंतःपुरदर्शनसाधनत्वेन खमध्यं प्राप्तं ॥ २ ॥ रामाय नमः ॥ श्री ॥

233

॥राम.॥
॥२०॥

भुविमंदरस्था भाति त्र्यधिकसन्निधाना भवति पुष्करस्थात्र श्रीनिशेषः सेदानीं निशाकरस्थेति पर्यायालंकारः पादचतुष्टयस्था इत्येकपदय
मकंच भुविमंदरे प्रदोषे सागरे ऽधिकलक्ष्मीसंधानं अधिवचनादेवावसेयं ॥ ३ ॥ हंसो यथेति किंचिदाधारप्रतिष्ठितमुक्तवस्तुत्वम
नेणावरस्थ वंडेसादृश्यमिति कनकः कुंजरोप्यत्र श्वेत एव अंबरमपि नान्विरगौरे वश्वेतमिति बोध्यं अंबरस्थो ऽवरमध्यस्थः ॥ ४
परिदग्धशृंगः परिदग्धकलंकरूपहरिणशृंग इत्यर्थः जांबूनदबद्धेति स्वरूपकथनमात्रं ॥ ५ ॥ विनष्टः शीतांबुतुषाररूपः शीतल

याभाति लक्ष्मीर्भुवि मंदरस्था यथा प्रदोषेषु च सागरस्था ॥ तथैव तोयेषु च पुष्करस्था रराज सा चारुनिशाकरस्था.
३ ॥ हंसो यथा राजतपंजरस्थः सिंहो यथा मंदरकंदरस्थः ॥ वीरो यथा गर्वितकुंजरस्थश्चंद्रोपि बभ्राज तथांबरस्थः
४ ॥ स्थितः ककुद्मानिव तीक्ष्णशृंगो महाबलः श्वेत इवोर्ध्वशृंगः ॥ हस्तीव जांबूनदबद्धशृंगो विभाति चंद्रः परि
दग्धशृंगः ॥ ५ ॥ विनष्टशीतांबुतुषारपंको महाग्रहग्राहविनष्टपंकः ॥ प्रकाशलक्ष्म्याश्रयनिर्मलांको रराज चंद्रो
भगवांछशांकः ॥ ६ ॥ शिलातलं प्राप्य यथा मृगेंद्रो महारणं प्राप्य यथा गजेंद्रः ॥ राज्यं समासाद्य यथा नरेंद्रस्तथा प्रकाशो विरराज चंद्रः ७

जलविंदुसंपर्करूपः पंको यस्य तन्न त्वं च वर्षकालस्यातीतत्वात् वस्तुतो हिमकालेपि विनष्टः शीतजजलविंदुसंपर्करूपः कंपो यस्य तमित्यथ
हिमालयस्यातिदूरत्वादिति भावः महाग्रहस्य सूर्यस्य ग्रहेणाकिरणसंक्रमेणापि विनष्टो विनाशितः पंकस्तमो येन सः अत एव प्रकाशलक्ष्म्याश्र
यणहेतुना निर्मलांकः व्यक्तास्फुरद्दृश्याच्छन्नः रराज गगनमध्यं प्राप्य निशेषः ॥ ६ ॥ शिलातलं गुहावहिःस्थं ॥ ७ ॥ ॐ ॥ ॐ ॥

॥रा.वा.सुं.॥
॥२१॥

प्रकाशयुक्तचंद्रस्योदयेनऽर्ध्वभागमनेननष्टो नाशितोंनरर्हहेयदोषस्तिमिररजोप्येनतथाभूतश्चदोषोरजनीमुखंयामार्द्धनंप्रसन्नावर्धिताराक्षसांपि शितनाशनरूपादोषायेन॥ पिशितभक्षणास्यदोषयत्वमाविहिंसनो वहिंसाहेतुत्वात् रामाणामभिरामाविषयकोरमणविषयकईरितोनिरस्त चित्तदोषः प्रणायकलहरूपो येनस्वर्गस्यसुखस्यप्रकाशोयतः॥ अत एव भगवान्सूर्योरराजेत्यनुकर्षः॥८॥ सुष्टक्ताःभेदग्रहाविषयाः स्वहंताइतिपाठे स्वंस्वीयंसहजपानि उन्मत्तलक्षणां हन्तं चारित्रं यासांताः नक्तंचराउलूकादयोराक्षसाश्चतथाविहर्तुंप्रवृत्ताः॥९॥ [illegible]

प्रकाशचंद्रोदयनष्टदोषः प्रवृद्धरक्षःपिशिताशदोषः॥ रामाभिरामेरितचित्तदोषः स्वर्गप्रकाशो भगवान्प्रदोषः
॥८॥ मंत्रीस्वराःकर्णसुखाःप्रवृत्ताः स्वयंनिनार्यःपतिभिःसुयुक्ताः॥ नक्तंचराश्चापि तथा प्रवृत्ता विहर्तुमत्यद्भुत
रौद्रवृत्ताः॥९॥ मत्तप्रमत्तानि समाकुलानि रथाश्वभद्रासनसंकुलानि॥ वीरश्रिया चापि समाकुलानि ददर्श धी
मान्स कपिः कुलानि॥१०॥ परस्परं चाधिकमाक्षिपंति भुजांश्च पीनानधिविक्षिपंति॥ मत्तप्रलापानधिविक्षिपंति ॥१२॥ मत्तानि चान्योम मधिक्षिपंति॥
११॥ रक्षांसि वक्षांसि च विक्षिपंति गात्राणि कांतासु च विक्षिपंति॥ रूपाणि चित्राणि च विक्षिपंति दृढानि चापानि च विक्षिपंति॥

दिमत्ताःप्रमत्तामद्यादिनायेषुतानिकुलानिस्वसमाकुलानिकुलानिरक्षसांगृहाणिरथाश्वेतिसर्वयानोपलक्षणंभद्रासनंस्वर्णपीठं॥१०॥ आक्षिपंति उन्नरप्रत्युत्तरंकुर्वंति अधिविक्षिपंति परस्परमित्यनुकर्षः मत्तप्रलापानधिकंविक्षिपंति मुंचंतिभर्त्सयंति वा मत्तानिरक्षांसीत्याकर्ष अधिक्षिपंति निरस्कुर्वंति वक्षांसि विक्षिपंति परस्परमास्फालयंति गात्राणांहस्तादीनांकांतासुक्षेपोन्यासः चित्राणिरूपाणिनानाविधवेषान्विक्षिपंतिकुर्वंतिकांता

पीनयेसपादयंतिधनुर्गुणांविक्षेपोविस्फारणंइहस्तानिरक्षांसिद
दृशीशस्त्रांतान्यमानि॥१२॥

॥राम॥
॥२१॥

234

समालभंत्यः चंदनादीनि निश्शेषः द्वितीयार्थे इमाः प्रथमाः तत्रासनूनाश्च ददर्शेति शेषो वा ॥१३॥ सुसद्भिः सुतरां संतो विभीषणादयः रराज पुरमिति शेषः
विनिश्वसद्भिः स्वापेक्षितयोरलाभात् ॥१४॥ वुद्धिः प्रधानं प्रधानगुणो येषां रुचिरमभिधानं वचनं येषां सम्यक् श्रद्दधानान् आस्तिकान् रुचिः
राभिधानान् रुचिरनाम्नः नानाप्रकारं विधानं वेषादेर्येषां तान् ॥१५॥ आत्मगुणानुरूपान् तदुचितव्यवहारवतः कांश्चित् पुनर्विरूपानपि वि

ददर्श कांताश्च समालभंत्यस्तथा परास्तत्र पुनः स्वपंत्यः ॥ सुरूपवक्त्राश्च तथा हसंत्यः क्रुद्धाः पराश्चापि विनिश्वसंत्यः ॥१३॥
महागजैश्चापि तथा नदद्भिः सुपूजितैश्चापि तथा सुसद्भिः ॥ रराज वीरैश्च विनिश्वसद्भिर्ह्रदो भुजंगैरिव निश्वसद्भिः ॥१४॥
वुद्धिप्रधानान् रुचिराभिधानान् संश्रद्दधानान् जगतः प्रधानान् ॥ नानाविधानान् रुचिराभिधानान् ददर्श तस्यां पुरि यातुधाना
न् ॥१५॥ ननंद दृष्ट्वा च सतां सुरूपाः [illegible] ॥ विघोनमानान् स्ववचनानुरूपान् ददर्श कांश्चिच्च पुनर्वि
रूपान् ॥१६॥ ततो वरार्हाः सुविशुद्धभावास्तेषां स्त्रियस्तत्र महानुभावाः ॥ प्रियेषु पानेषु च सक्तभावा ददर्श तारा इव सु
स्वभावाः ॥१७॥ स्त्रियो ज्वलंतीस्त्रपयोपगूढा निशीथकाले रमणोपगूढाः ॥ ददर्श कांश्चित्प्रमदोपगूढा यथा विहंगा विहगोपगूढाः ॥१८॥

घोनमानान् सुरूपानिव ददर्शेत्यर्थः ॥१६॥ वरार्हाः श्रेष्ठविभूषणादियोग्याः उत्तमोत्तमरूपाश्च भावाः कटाक्षादयः अनुभावः प्रभावः भावो नः क
रणं ताराः तारकाः ॥१७॥ ज्वलंतीः रूपसंपदा ज्वलंतीरिव त्रपा लज्जा प्रमदेन हर्षेणोपगूढाः संवेष्टाः यथा विहंगाः विहंगीरिवेत्यर्थः इंद्रनीलमणिमयो
गेहेषु नीलनभःसदृशेषु शयनान्तलाहर्म्य ॥१८॥

नानागुणानात्मगुणानुरूपान् ३

भर्तुः पराः उन्नतस्तनेनाभिमताः धर्मपराः भर्तृसेवालक्षणधर्मतत्पराः निविष्टकुडाः निवेशः शिविरो गाहविन्यासेष्विति कोशः मदनउपविष्टेण
सुमदनाश्रया इत्यर्थः ॥१९॥ अप्रावृता उत्तरीयहीनाः कांचनराजिवर्णाः कनकरेखाकाराः परार्ध्याः उत्तमाः तपनीयवर्णाः तप्तस्वर्णव
र्णाः शशलक्ष्मा चंद्रः कांतप्रहीणाः प्रियावियुक्ताः रुचिरांगवर्णाः सुंदरदेहकांतयः प्रथमं ददर्श ॥२०॥ प्रियान्प्राप्य प्रीतियुक्ताः अस

अन्याः पुनर्हर्म्यतलोपविष्टास्तत्र प्रियांकेषु सुखोपविष्टाः ॥ भर्तुः पराधर्मपरानिविष्टाद ददर्श धीमान्मदनोपविष्टाः
१९ ॥ अप्रावृताः कांचनराजिवर्णाः काश्चित्परार्ध्यास्तपनीयवर्णाः ॥ पुनश्च काश्चिच्छशलक्ष्मवर्णाः कांतप्रही
णा रुचिरांगवर्णाः ॥२०॥ ततः प्रियान्प्राप्य मनोभिरामान्सुप्रीतियुक्ताः सुमनोभिरामाः ॥ गृहेषु हृष्टाः परमाभिरा
माः हरिप्रवीरः स ददर्श रामाः ॥२१॥ चंद्रप्रकाशाश्च हि वक्त्रमाला वक्राः सुपक्ष्माश्च सुनेत्रमालाः ॥ विभूषणानां च दद
र्श मालाः शतह्रदानामिव चारुमालाः ॥२२॥ न त्वेव सीतां परमाभिजातां पथि स्थिते राजकुले प्रजातां ॥ लतां प्रफुल्ला
मिव साधुजातां ददर्श तन्वीं मनसाभिजातां ॥२३॥

॥ नसुमनोभिः पुष्पैरभिरामा अत एव हृष्टाः रामा ददर्शेति शेषः परमया शोभया ऽभिरा
माः स्वस्वकांतमनोहरा रामाः गृहेषु ददर्श प्रसमीक्ष्य रामा इति पाठे प्रियान्प्राप्य तान्समीक्ष्य प्रीतियुक्ताः रामसेः प्रियैः रम्यमाणाः अत एव गृहे
षु हृष्टाः रामा ददर्शेति शेषः ॥२१॥ वहीयाद्दृश्यूरकांव वक्त्रमालाः वक्त्रसमूहः वक्रा वक्रप्रेक्षणाः सुपक्ष्माः शोभनपक्ष्मयुक्ता नेत्रमाला ददर्श श
तह्रदानां माला इव भूषणानां माला ददर्श ॥ वक्राक्षिपक्ष्मा इति पाठे ऽक्षिपक्ष्माधिकं वक्रपक्ष्मा इत्येवाचितं परमसुवक्रत्वमपि किमित्यपि चिंत्यं

॥२२॥ पथिस्थिते स्वधर्ममार्गस्थे नत्वेव ददर्शेत्यन्वयः साधुजातामिति लता विशेषणं ॥ मनसाभिजातां धात्रा मनसा सृष्टां ॥२३॥

सनातनेवर्त्मनिनिश्चविच्छेदप्रवृत्ते पातिव्रत्यमार्गेराममीक्षतेध्यायतिरामेक्षणींतांमदनेनरामविषयेणाभिविष्टांव्याप्तांश्रीमन्मभर्तुःमनोऽनुप्र
विष्टांअनेनपरस्परानुरागोध्वनितः॥२४॥उष्मार्दितांविरहतापपीडितांअनुत्तमांस्वेनाप्रवृत्तवाष्पेणसहवर्तमानःकंठोयस्यास्तांअत्रअी
वार्द्रकंठमितिवापाठः॥पुरारामसंनिधिकालेवराणाउत्तमभूषणानामर्हानिस्वोत्तमानिकःउत्तमभूषणःकंठोयस्यास्तांअभिरक्तोमधुर

सनातनेवर्त्मनिसन्निविष्टांरामेक्षणींतांमदनाभिविष्टां॥भर्तुर्मनःश्रीमदनुप्रविष्टांस्त्रीभ्यःपराभ्यश्चसदाविशि
ष्टां॥२४॥उष्मार्दितांसानुसृतास्रकंठींपुरावराहोत्तमनिष्ककंठीं॥सुजातपक्ष्मामभिरक्तकंठींवनेप्रवृत्तामिवनील
कंठीं॥२५॥अव्यक्तरेखामिवचंद्रलेखांपांसुप्रदिग्धामिवहेमरेखां॥क्षतप्ररूढामिववाणरेखांवायुप्रभग्नामिवमे
घरेखां॥२६॥सीतामपश्यन्मनुजेश्वरस्यरामस्यपत्नींवदतांवरस्य॥वभूवदुःखोपहतश्चिरस्यप्लवंगमोमंदइवा
चिरस्य॥२७॥इत्यार्षेश्रीमद्रामायणेवा०सुंदरकांडेपंचमःसर्गः॥ ५ ॥सनिकामविमानेषुविचरन्कामरूप
धृक॥विचचारकपिर्लंकांलाघवेनसमन्वितः॥१॥आससादवलक्ष्मीवान्राक्षसेंद्रनिवेशनं॥प्राकारेणार्कवर्णे
नभास्वरेणाभिसंवृतं॥२॥

स्वरःकंठोयस्यास्तांअभिरक्तोमधुरस्वरःकंठोयस्यास्तांनीलकंठीमयूरी॥२५॥अव्यक्ताअभ्रादिनाऽस्पष्टारेखाकारोयस्यास्तांप्रदिग्धारू
षिताक्षतप्ररूढाप्रमग्नांवाणरेखांवाणाव्रणचिह्नंतद्वद्वामस्पेदनींपीडाजननींरावणस्यवा॥२६॥चिरस्यचिरमित्यर्थेऽव्ययंचिर
मन्विष्याप्यपश्यन्अचिरस्यसद्यःमंदइवअन्वेषणाद्यकुशलइवदुःखोपहतोवभूवअत्रसर्गेयमकालंकारः॥२७॥सारमानः॥इ

निरा०रा०सुंद०पंचमसर्गः॥५॥विमानेषुसंचरन्नपिप्रासा
देषुलाघवेनशीघ्रेणराक्षसेंद्रनिवेशनमाससाद॥१॥२॥

चकाशे चंद्रसाहित्या वक्कान्वेषणक्रियो वभूवेत्यर्थः ॥३॥ रूप्यकं रजतं तेनोपहितैः शोभार्थं लिखितैः ॥४॥ गजास्थितैर्गजारूढैः महामात्रैर्हस्तिपकैः उपस्थितं युक्तं असंहार्यैः अप्रतिहतवेगैः स्यंदनयायिभिः स्यंदनवाहकैः प्रशस्ताश्वैरित्यर्थः ॥५॥ सिंहव्याघ्रतनुत्राणान्वादिरथवि

रक्षितं राक्षसैर्भीमैः सिंहैरिव महद्वनम् ॥ समीक्षमाणो भवनं चकाशे कपिकुंजरः ॥३॥ रूप्यकोपहितैश्चित्रैस्तोरणैर्हेमभूषणैः ॥ विचित्राभिश्च कक्ष्याभिर्द्वारैश्च रुचिराहृतम् ॥४॥ गजास्थितैर्महामात्रैः शूरैश्च विगतश्रमैः ॥ उपस्थितमसंहार्यैर्हयैः स्यंदनयायिभिः ॥५॥ सिंहव्याघ्रतनुत्राणैर्दांतकांचनराजतैः ॥ घोषवद्भिर्विचित्रैश्च सदा विचरितं रथैः ॥६॥ बहुरत्नसमाकीर्णं परार्ध्यासनभूषितम् ॥ महारथसमावापं महारथमहासनम् ॥७॥ दृश्यैश्च परमोदारैस्तैस्तैश्च मृगपक्षिभिः ॥ विविधैर्बहुसाहस्रैः परिपूर्णं समंततः ॥८॥ विनीतैरंतपालैश्च रक्षोभिश्च सुरक्षितम् ॥ मुख्याभिश्च वरस्त्रीभिः परिपूर्णं समंततः ॥९॥ मुदितप्रमदारत्नं राक्षसेंद्रनिवेशनम् ॥ वराभरणसंह्रादैः समुद्रस्वननिस्वनम् ॥१०॥

शेषं स्पष्टं दांता शिविकारागांता इत्यतः तस्य प्रतिमास्ताश्च रजिरिति शेषः घोषवत्त्वं किंकिणीभिः ॥६॥ महतां रथानामावापः स्थानं संमतो यस्मिन् तन्महारथानां रूकोटिशसहस्राणि योधयेद्यस्तु धन्विनां शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते इत्युक्तलक्षणमहारथानां महासनं सदावासस्थानं ॥७॥ दृश्यैः ईक्षणीयैरमरवपरमोदारैः अतिसुंदरैः ॥८॥ अंतपालैः पर्यंतरक्षकैः ॥९॥

राक्षसेंद्राणां महाभार्यादीनां निवेशनानि यस्मिन्तत् भूषणशब्दैः समुद्रस्वनसदृशनिस्वनं ॥१०॥

तद्राजगुणसंपन्नैस्तैः प्रसिद्धैराजभवनगुणैः छत्रचामरादिभिः संपन्नं॰ वरचंदनैश्च संपन्नमित्यनुकर्षः पर्वसु सुतः सोमो यास्मिन् यज्ञार्थे तत्पर्वसुतं राक्षसैः सदा पूजितं पूजितस्वपूजनीयदेवताकं ॥ १२ ॥ परिच्छदोऽलंकारः महात्मनो रावणस्य महद्वेश्म ददर्शेत्यन्वयः ॥ १३ १४ ॥ अमन्यत तद्राव

तद्राजगुणसंपन्नं मुख्यैश्च वरचंदनैः ॥ महाजनसमाकीर्णं सिंहैरिव महद्वनं ॥ ११ ॥ भेरीमृदंगाभिरुतं शंखघोषविना
दितं ॥ नित्यार्चितं पर्वसुतं पूजितं राक्षसैः सदा ॥ १२ ॥ समुद्रमिव गंभीरं समुद्रसमनिस्वनं ॥ महात्मनो महद्वेश्म म
हारत्नपरिच्छदं ॥ १३ ॥ महारत्नसमाकीर्णं ददर्श स महाकपिः ॥ विराजमानं वपुषा गजाश्वरथसंकुलं ॥ १४ ॥
लंकाभरणमित्येव सोऽमन्यत महाकपिः ॥ चचार हनुमांस्तत्र रावणस्य समीपतः ॥ १५ ॥ गृहाद्गृहं राक्षसा
नामुद्यानानि च सर्वशः ॥ वीक्ष्यमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥ १६ ॥ अवप्लुत्य महावेगः प्रहस्तस्य
निवेशनं ॥ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ १७ ॥ अथ मेघप्रतीकाशं कुंभकर्णनिवेशनं ॥ विभी
षणस्य च तथा पुप्लुवे स महाकपिः ॥ १८ ॥ महोदरस्य च तथा विरूपाक्षस्य चैव हि विद्युज्जिह्वस्य भवनं विद्यु
न्मालेस्तथैव च ॥ १९ ॥ वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ शुकस्य च महावेगः सारणस्य च धीमतः ॥ २० ॥

णवेश्मेति शेषः रावणस्य रावणभवनस्य समीपतस्तत्प्राकारप्रदेशेषु ॥ १५ ॥ गृहाद्गृहं राजवेश्म महाप्रकारं तद्वर्तिप्रधानरक्षसामेकस्य गृहा

द्परं गृहमित्यर्थः ॥ १६ ॥ अस्यैव प्रपंचो वप्लुत्येत्यादि ॥ १७ ॥ १९ ॥ २० ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

२१ ॥ २२ ॥ २३ ॥ २४ ॥ विद्युज्जिह्वद्विजिह्वानामिति बहुवचनमार्षं तयोरित्यर्थः विद्युज्जिह्वेंद्रजिह्वानामिति पाठांतरं ॥ २५ ॥ २६ ॥ २७ ॥ २८ ॥

तथा चेंद्रजितो वेश्म जगाम हरियूथपः ॥ जंबुमालेः सुमालेश्च जगाम हरिसत्तमः ॥ २१ ॥ रश्मिकेतोश्च भवनं सूर्यशत्रो
स्तथैव च ॥ वज्रकायस्य च तथा पुप्लुवे स महाकपिः ॥ २२ ॥ धूम्राक्षस्याथ संपातेर्भवनं मारुतात्मजः ॥ विद्युद्रूपस्य भी
मस्य घनस्य विघनस्य च ॥ २३ ॥ शुकनाभस्य चक्रस्य शठस्य कपटस्य च ॥ ह्रस्वकर्णस्य दंष्ट्रस्य लोमशस्य च रक्षसः
२४ ॥ युद्धोन्मत्तस्य मत्तस्य ध्वजग्रीवस्य सादिनः ॥ विद्युज्जिह्वद्विजिह्वानां तथा हस्तिमुखस्य च ॥ २५ ॥ करालस्य
विशालस्य शोणिताक्षस्य चैव हि ॥ प्लवमानः क्रमेणैव हनूमान्मारुतात्मजः ॥ २६ ॥ तेषु तेषु महार्हेषु भवने
षु महायशाः ॥ तेषामृद्धिमतामृद्धिं ददर्श स महाकपिः ॥ २७ ॥ सर्वेषां समतिक्रम्य भवनानि समंततः ॥ आस
सादाथ लक्ष्मीवान्राक्षसेंद्रनिवेशनं ॥ २८ ॥ रावणस्योपशायिन्यो ददर्श हरिसत्तमः ॥ विचरन्हरिशार्दू ॥ ३१ ॥
लो राक्षसीर्विकृतेक्षणाः ॥ २९ ॥ शूलमुद्गरहस्ताश्च शक्तितोमरधारिणीः ॥ ददर्श विविधान्गुल्मांस्तस्य रक्षः
पतेर्गृहे ॥ ३० ॥ राक्षसांश्च महाकायान्नानाप्रहरणोद्यतान् ॥ रक्तान्श्वेतान्सितांश्चापि हरींश्चापि महाजवान्

रा ॥ ३० ॥ हरीन् अभ्यान् ॥ ३१ ॥

उपशायिन्यः उपशायोपशामश्च पर्यायशयनार्थकाः पर्यायेण शयनस्थानरक्षिका इत्यर्थ इत्याहुः ॥ २९ ॥ गुल्मान्राक्षससमूह

॥ राम. ॥
॥ २४ ॥

237

परगजारुजान्शत्रुगजान्आरुजंतिभंजयंतितान्॥३२॥३३॥मेघस्तनितनिर्घोषत्वादिविशिष्टान्गजान्ददर्शेत्यन्वयः सहस्रंवाहिनीः
अनेकसेनाः॥३४॥हेमजालैरविच्छन्नाः सर्वतोभूषिताः इतिशिविकाविशेषणं॥३५॥शिविकाः ददर्शेत्यनुकर्षः चित्रशालागृहाणि

कुलीनान्रूपसंपन्नान्गजान्परगजारुजान्।शिक्षितान्गजशिक्षायामैरावतसमान्युधि॥३२॥निहंतॄन्परसैन्या
नांगृहेतस्मिन्ददर्शसः।क्षरतश्चयथामेघान्स्रवतश्चयथागिरीन्॥३३॥मेघस्तनितनिर्घोषान्दुर्धर्षान्समरे
परैः॥सहस्रंवाहिनीस्तत्रजांबूनदपरिष्कृताः॥३४॥हेमजालैरविच्छिन्नास्तरुणादित्यसन्निभाः।ददर्शराक्षसें
द्रस्यरावणस्यनिवेशने॥३५॥शिविकाविविधाकाराःसकपिर्मारुतात्मजः।लतागृहाणिचित्राणिचित्र
शालागृहाणिच॥३६॥क्रीडागृहाणिचान्यानिदारुपर्वतकानिच।कामस्यगृहकंरम्यंदिवागृहकमेवच
३७॥ददर्शराक्षसेंद्रस्यरावणस्यनिवेशने।समंदरसमप्रख्यंमयूरस्थानसंकुलं॥३८॥ध्वजयष्टिभिराकीर्णंददर्शभव
नोत्तमं॥अनंतरत्ननिचयंनिधिजालंसमंततः॥३९॥धीरनिष्ठितकर्मांगंगृहंभूतपतेरिव॥३९॥अर्चिर्भिश्चापिरत्नानांतेज
सारावणस्यच।विरराजचतद्वेश्मरश्मिवानिवरश्मिभिः॥४०॥

चित्रयुक्तशालावंतिगृहाणि॥३६॥दारुनिर्मिताःक्रीडापर्वताःदारुपर्वतका
निक्रीवान्वमार्थकामस्यगृहकंरतिगृहंदिवागृहंदिनविहारगृहंसर्वत्राऽन्त्यंतस्वार्थिकःकन्॥३७॥मयूरस्थानैःक्रीडामयूरस्थानैःसंकुलंव्याप्तं॥३८॥निधि
जालंनिधिजालवदित्यर्थः॥३९॥धीरनिष्ठितकर्मांगंधीरैर्निर्भयस्थिरचित्तैःनिष्ठितंनिर्वर्तितं कर्मणोनिधिरक्षादिकर्मणोंगंमहिषादिबलिरूपंयस्मिन्क

ल्पितंकर्मांगमितिपठित्वाधीरैर्निष्ठितस्यअनुष्ठितस्यकर्मणःतत्फलयोरूप
स्थानंफलरूपमित्यर्थमाह भूतपतेःमहेश्वरस्ययक्षेश्वरस्यवा॥३९॥४०॥

४१ ॥ मधासवयोरवांतरभेदः ताभ्यां कृतक्लेदमार्द्रमित्यर्थः ॥ ४२ ॥ घोषवद्भिर्मृदंगातिरिक्तैरपि घोषवद्भिर्वाद्यैर्निनादितं ॥ ४३ ॥ ४४ ॥ भावमानः इति एमाभिरामे०
सुं० षष्ठः सर्गः ॥ ६ ॥ अथ रावणप्रधानगृहं वर्णयति स इति व्यासक्तानि संबद्धानि वैडूर्यरत्नचितानि च सुवर्णजालानि स्वर्णगवाक्षाणि यस्मिन्तत्स

जांबूनदमयान्येव शयनान्यासनानि च । भाजनानि च शुभ्राणि ददर्श हरियूथपः ॥ ४१ ॥ मध्वासवकृतक्लेदं मणिभाजनसंकुलं ।
मनोरममसंबाधं कुबेरभवनं यथा ॥ ४२ ॥ नूपुराणां च घोषेण कांचीनां निस्वनेन च । मृदंगतलनिर्घोषैर्घोषवद्भिर्विना-
दितं ॥ ४३ ॥ प्रासादसंघातयुतं स्त्रीरत्नशतसंकुलं । सुव्यूढकक्ष्यं हनुमान्प्रविवेश महागृहं ॥ ४४ ॥ इत्यार्षे श्रीमद्रामायणे सुं-
दरकांडे षष्ठः सर्गः ॥ ६ ॥ स वेश्मजालं बलवान्ददर्श व्यासक्तवैडूर्यसुवर्णजालं । यथा महत्प्रावृषि मेघजालं विद्युत्पिनद्धं
सविहंगजालं ॥ १ ॥ निवेशनानां विविधाश्च शालाः प्रधानशंखायुधचापशालाः । मनोहराश्चापि पुनर्विशाला ददर्श
वेश्माद्रिषु चंद्रशालाः ॥ २ ॥ गृहाणि नानावसुराजितानि देवासुरैश्चापि सुपूजितानि । सर्वैश्च दोषैः परिवर्जितानि कपि-
र्ददर्श स्वबलार्जितानि ॥ ३ ॥ तानि प्रयत्नाभिसमाहितानि मयेन साक्षादिव निर्मितानि । महीतले सर्वगुणोत्तराणि ददर्श-
लंकाधिपतेर्गृहाणि ॥ ४ ॥

विहंगजालमिति गृहमेघयोर्विशेषणं ॥ १ ॥ प्रधानैः प्रशस्तैः शंखादिभिः शालंते शोभंते ता दृशीः ॥ निवेशनानां शालाश्चावांतरगृहाणि ददर्श पुनश्च
विशालाश्चंद्रशाला ददर्श वेश्माद्रिषु औन्नत्यादद्रितुल्यवेश्मसु चंद्रशालाः शिरोगृहाणि चंद्रकांतमणिबद्धशाला वा ॥ २ ॥ वसु धनं स्वबलेनेत्यत्र स्वश-
ब्देन रावणो वाची कुबेराद्रावणेन लंकाया आछिद्य गृहीतत्वात् यद्वा स्वशब्दो हनुमद्वाची स्वबलेनार्जितानि लब्धप्रवेशानि ॥ ३ ॥ प्रयत्नेनाभितः सम्यगाहि-
तानि यथायोगं स्थापितानि प्रयत्नाभिसमाहितानि विश्वकर्मकृ-
तान्यपि मायया विचित्ररचनादक्षेण मयेन निर्मितानीव ॥ ४ ॥

238

गृहोत्तमंप्रधानगृहेष्वप्युत्तमंअप्रतिरूपरूपंनिरूपमरूपम्॥५॥प्रकीर्णापानितंरत्नकीर्णारत्नपूर्णारजसापुष्परजसा॥६॥नारीप्रवेकैःनारीश्रेष्ठैःइवस्वार्थेतडि
द्भिरर्च्यमानंपूज्यमानंअंभोधरंमेघमिव।हंसश्रेष्ठैर्वाह्यमानमुह्यमानंविमानमिव॥७॥नानावर्णैर्युक्तोपितद्युक्तःकृतोयुक्तीकृतःसचासौचारुमेघश्चतद्व
द्विचित्रंविमानंपुष्पकाख्यं॥८॥यत्रपुष्पकेमहीअनेकजनानामाधारस्थानंपर्वतराज्यापूर्णापर्वतादयश्चात्रमणिस्वर्णादिनिर्मिताःतन्निदंचित्ररूप

ततोददर्शोच्छ्रितमेघरूपंमनोहरंकांचनचारुरूपं॥रक्षोधिपस्यात्मबलानुरूपंगृहोत्तमंह्यप्रतिरूपरूपं॥५॥महीतलेस्वर्गमिवप्रकीर्णंश्रियाज्व
लंतंबहुरत्नकीर्णं॥नानातरूणांकुसुमावकीर्णंगिरेरिवाग्रंरजसावकीर्णं॥६॥नारीप्रवेकैरिवदीप्यमानंतडिद्भिरंभोधरमर्च्यमानं॥हं
सप्रवेकैरिववाह्यमानंश्रियायुतंखेसुकृतंविमानं॥७॥यथानगाग्रंबहुधातुचित्रंयथानभश्चग्रहचंद्रचित्रं॥ददर्शयुक्तीकृतचारुमेघचि
त्रंविमानंबहुरत्नचित्रं॥८॥महीकृतापर्वतराजिपूर्णाशैलाःकृतावृक्षवितानपूर्णाः॥वृक्षाःकृताःपुष्पवितानपूर्णाःपुष्पंकृतंकेसरपत्र
पूर्णं॥९॥कृतानिवेश्मानिचपांडुराणितथासुपुष्पाण्यपिपुष्कराणि॥पुनश्चपद्मानिसकेसराणिवनानिचित्राणिसरोवराणि॥१०॥पु
ष्पाह्वयंनामविराजमानंरत्नप्रभाभिश्चविघूर्णमानं॥वेश्मोत्तमानामपिचोच्चमानंमहाकपिस्तत्रमहाविमानं॥११॥कृताश्चवैडूर्यमयाविहंगारूप्य
प्रवालैश्चतथाविहंगाः॥चित्राश्चनानावसुभिर्भुजंगाजात्यानुरूपास्तुरगाःशुभांगाः॥१२॥

॥मितिश्रमितत्वंज्ञानंतथानरसेनायानिर्वाधंतत्रावस्थानस्यवस्
माराणांवाहकिंचस्वामीच्छानुसारेणसंकोचविकासौतस्यवस्पतिस्वेच्छयाहंतुमदेववत्वितानंसमूहःएकावलीअत्रालंकारः॥९॥कृतानिअस्ययत्रेत्यादिशेषः
॥१०॥पुष्पाह्वयंनामददर्शेत्यन्वयःवेश्मोत्तमानांदेववेश्मभूतविमानानांमध्येउच्चमानंसौभाग्यपरमकाष्ठांप्राप्तं॥११॥कृताश्चेतितत्रविमानेइतिशेषःनानाव

सुभिःस्वस्वर्णादिःजात्यानुरूपाजातितुरंगसदृशाःशुभांगविशेषणंचैतत्॥१२॥

॥ रा·वा·कि ॥
॥ २६ ॥

प्रवालजांबूनदकृतानि पुष्पाणि पक्षेषु येषां आवर्जिताः संकुचिताजिह्मावक्राः पक्षा येषां ते· साक्षात्कामस्य पक्षा इव येषां पक्षा भांति· तदुद्दीपकत्वात्तादृशा उच्यमानगु
णा विहंगास्तत्र कृताः ॥१३॥ नियुज्यमानाः व्याप्रियमाणाः वक्ष्यमाणाया लक्ष्म्या अभिषेके इति शेषः हस्तशुंडा· पद्माकरविहारिगजाकारनिर्माणात् सकेसरत्व
मुत्फुल्लपत्रहस्तत्वं च तेषां तादृशा गजास्तत्र कृता बभूवुरिति शेषः पद्मिनि पद्मवत्सरसि ॥१४॥ इतीव एवं प्रकारं चारुकंदरं चारुगृहं नगमिव ॥ पर्वतमिव चारुदर्श
नं तत् गृहमभिगम्य सविस्मयो बभूव इति शेषः हिमात्यये वसंते परमसुगंधि चारुकंदरं नगमिव वृक्षमिव कंदरा अत्र कोटरः पुनश्चाभिगम्य सविस्मयोभूदिति शेषः

प्रवालजांबूनदपुष्पपक्षाः सलीलमावर्जितजिह्मपक्षाः ॥ कामस्य पक्षा इव भांति पक्षाः कृता विहंगाः सुमुखाः सुपक्षाः ॥१३॥ नियुज्यमानाश्च गजा
ः सुहस्ताः सकेसराश्चोत्पलपत्रहस्ताः ॥ बभूव देवी च कृता सुहस्ता लक्ष्मीस्तथा पद्मिनि पद्महस्ता ॥१४॥ इतीव तद्गृहमभिगम्य शोभनं सविस्मयो
नगमिव चारुकंदरं ॥ पुनश्च तत्परमसुगंधि सुंदरं हिमात्यये नगमिव चारुकंदरं ॥१५॥ ततः स तां कपिरभिपत्य पूजितां चरन् पुरीं दशमुखबाहुपा
लितां ॥ अदृश्य तां जनकसुतां सुपूजितां सुदुःखितां पतिगुणवेगनिर्जितां ॥१६॥ ततस्तदा बहुविधभावितात्मनः कृतात्मनो जनकसुतां सुवर्त्मनः
अपश्यतोभवदतिदुःखितं मनः सचक्षुषः प्रविचरतो महात्मनः ॥१७॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे सप्तमः सर्गः ॥ ७ ॥

ः परिच्छेदानवगमादिति भावः ॥१५॥ अभिपत्याभिपत्य चरन् संचरन् ॥ पतिगुणवेगनिर्जितां पतिगुणावेगेन पतिगुणानिरंतरध्यानेन निर्जितां निर्जि
तदुःखां अदृश्य अदृष्ट्वा दुःखितोभूदिति शेषः आर्षो ल्यप् ॥१६॥ बहुविधभावितात्मनः नानाप्रकारेण सर्वजगत्पूजितस्वभावस्य स्वभाववाची आत्मशब्दः
वः कृतात्मनः शिक्षितांतःकरणस्य सुवर्त्मनः शोभननीतिमार्गवर्तिनः सचक्षुषः श्रुतिस्मृतिन्यायरूपचक्षुः सहितस्य ॥१७॥ शंक्रमानः ॥ इत्यध्यायः ॥ ७ ॥

239

॥ राम· ॥
॥ २६ ॥

अथविशिष्यपुष्पकंवर्णयितुमाह ॥ सइतिमणिरत्नैर्मणिश्रेष्ठैश्चित्रितं प्रतप्तजांबूनदजालानांतन्मयगवाक्षाणां कृत्रिमंकृतिर्यस्मिन्तत्तस्यभवनस्यरा
वणगृहस्यमध्येमहद्विमानंपुष्पकंददर्श ॥ १ ॥ अप्रमेयप्रतिकारकृत्रिमंअप्रमेयैरपरिच्छेद्यसौंदर्यादिभिःप्रतीकारैःप्रतिमादिभिःकृत्रिमंनिर्वृत्तंचित्र
शोभंपाठांतरंत्वसांप्रदायिकमितिकतकः ॥ विश्वकर्मणाच स्वयंसाध्वितिकृतंमत्कृतिर्मितिपुइदमतिसाध्वित्यनुमोदितमित्यर्थः दिवमाकाशंगतेवायुपथे
प्रतिष्ठितं ॥ वायुपथस्येवादित्यपथत्वात्तस्यचिह्नभूतं ॥ २ ॥ तत्रतादृशंकिंचिन्नयत्रयत्नेनोनकृतंअपितुसर्वंप्रयत्नकृतमेवेत्यर्थः यदवयवजातंमह

सतस्यमध्येभवनस्यसंस्थितोमहद्विमानंमणिरत्नचित्रितं ॥ प्रतप्तजांबूनदजालकृत्रिमंददर्शधीमान्पवनात्मजःकपिः ॥ १ ॥ तदप्रमेय
प्रतिकारकृत्रिमंकृतंस्वयंसाध्वितिविश्वकर्मणा ॥ दिवंगतेवायुपथेप्रतिष्ठितंव्यराजतादित्यपथस्यलक्ष्मवत् ॥ २ ॥ नतत्रकिंचिन्नकृ
तंप्रयत्नतोनतत्रकिंचिन्नमहार्घरत्नवत् ॥ नतेविशेषानियताःसुरेष्वपिनतत्रकिंचिन्नमहाविशेषवत् ॥ ३ ॥ तपःसमाधानपराक्र
मार्जितंमनःसमाधानविचारचारिणं ॥ अनेकसंस्थानविशेषनिर्मितंततस्ततस्तुल्यविशेषनिर्मितम् ॥ ४ ॥ ॥ छ ॥ ॥

र्घरत्नवत्तद्बहुमूल्यरत्नवत्तत्रतादृशंकिंचिदपिन तेयेविशेषारचनाविशेषास्तत्रनियताःप्रतिष्ठितास्तेसुरेषुसुरविमानेष्वपिन महाविशेषोगुणाधिक्यं
॥ ३ ॥ तपसाउपवासादिनासमाधानेनभगवतिचित्तसमाधानेनलब्धोयःपराक्रमस्तेनरावणार्जितं मनःसमाधानेनयत्रविचारोगमनंस्यात्तत्रसंच
रणशीलं मनःसंकल्पितदेशगमनशीलं संस्थानविशेषारचनाविशेषाः ततस्ततस्तस्मात्तस्मादाहृतेनतुल्येनदिव्यविमाननिर्माणोचितेनविशेषेणावि
शिष्टपदार्थेननिर्मितं ॥ ४ ॥

मनःसमाधायस्वामिमनोनुरूपतःशीघ्रगामित्वादिवार्कं दुरासदं पापिभिरितिशेषः दुरावरमितिपाठे शत्रुभिर्दुर्निवारमित्यर्थः महर्षिनांदीर्घाभावश्छांद
सः एवंतुल्यगामिनमित्यत्रपुंस्त्वंविमानशब्दोर्धर्चादिर्वा अथ्यामुदां महासुखवानां पुण्यकृतामेवालयं चास्पदं इवशब्द एवार्थे अत्र तस्याचेतनत्वेपि
तदाभिमानिदेवतायाश्चित्तज्ञत्वादिबोध्यं ॥५॥ विशेषं गतिविशेषमालेव्य विशेषे व्योमलक्षणादेशविशेषे संस्थितं। विचित्राणामाश्चर्यवस्तूनां कूटं सम

मनःसमाधायतुशीघ्रगामिनंदुरासदंमारुततुल्यगामिनं॥ महात्मनांपुण्यकृतांमहर्द्धिनांयशस्विनामग्र्यमुदामिवालयं॥५॥ विशेषमाले
व्यविशेषसंस्थितंविचित्रकूटंबहुकूटमंडितं॥ मनोभिरामंशरदिंदुनिर्मलंविचित्रकूटंशिखरंगिरेर्यथा॥६॥ वहंतियंकुंडलशोभितानना
महाशनाव्योमचरानिशाचराः॥ विवृत्तविध्वस्तविशाललोचनामहाजवाभूतगणाःसहस्रशः॥७॥ वसंतपुष्पोत्करचारुदर्शनंवसंतमा
सादपिचारुदर्शनं॥ सपुष्पकंतत्रविमानमुत्तमंददर्शतद्वानरवीरसत्तमः॥८॥ इत्यार्षेश्रीमद्रामायणेसुंदरकांडेऽष्टमः सर्गः॥८॥
तस्यालयवरिष्ठस्यमध्येविमलमायतं॥ ददर्शभवनश्रेष्ठंहनूमान्मारुतात्मजः॥१॥ अर्द्धयोजनविस्तीर्णमायतंयोजनंमहत्॥ भवनंरा
क्षसेंद्रस्यबहुप्रासादसंकुलं॥२॥ मार्गमाणस्तुवैदेहींसीतामायतलोचनां॥ सर्वतःपरिचक्रामहनूमानरिसूदनः॥३ ॥ ॥ ॥

वायभूतं बहुभिः कूटैः शालाभिर्मंडितं गिरेर्विचित्रावानरर्षभंगवत् शिखरमिव ॥६॥ उच्यमानविशेषणाभूतगणाय वहंति तद्विमानं तत्र ददर्शेत्य
न्वयः विवृत्तानि विघूर्णानि विध्वस्तानि स्कनिमेषाणि विशालानि लोचनानि येषां निशाचरा निशास्वप्यहरविशेषं चरंतीति ते ॥७॥ वसंतपुष्पोत्करचा
रुदर्शनं वसंतकालिकपुष्पसमूहेन चारुदर्शनं ॥८॥ अहमानः ॥ इत्यध्यायः ॥८॥ तस्यापि आलयवरिष्ठस्य लंकामध्यवर्तिनो गृहसमूहस्य वेश्मनो महा
गृहस्य ॥१॥ अर्द्धयोजनविस्तीर्णानि यैकप्रमाणा ॥२॥ २॥

आवासं वडूरा राक्षसस्याधारणं वासस्थानं राक्षसेंद्रनिवेशनं तन्मात्रवासस्थानं ॥४॥ परिक्षिप्तं युक्तं ईदृशगजादिसत्वेपि असंबाधत्वेनातिविस्तृतत्वं सू
च्यते ॥५॥ राक्षसीभिः राक्षसजातिजाभिः पत्नीभिराहृतं तथा विक्रम्याहृताभी राजकन्याभिश्चाहृतं ॥६॥ पन्नगैर्युतं सागरमिव तमस्पृशतिस्म ॥७॥ ल
क्ष्मीशोभा रावणगृहे लंकायां ॥८॥ आढ्यैरैश्वर्यैस्तद्विशिष्टा ततोप्यधिका ॥९॥ तस्य हर्म्यस्य अर्धयोजनविस्तीर्णत्वादिश्च मेगाः वेश्म सत्रीकशयनगृ

उत्तमं राक्षसावासं हनूमानवलोकयन् । आससादाथ लक्ष्मीवान् राक्षसेंद्रनिवेशनं ॥४॥ चतुर्विषाणैर्द्विरदैस्त्रिविषाणैस्तथैव च ॥ प
रिक्षिप्तमसंबाधं रक्ष्यमाणमुदायुधैः ॥५॥ राक्षसीभिश्च पत्नीभी रावणस्य निवेशनं । आहृताभिश्च विक्रम्य राजकन्याभिराहृतं ॥६॥ तन्न
क्रमकराकीर्णं तिमिंगिलझषाकुलं । वायुवेगसमाधूतं पन्नगैरिव सागरं ॥७॥ या हि वैश्रवणे लक्ष्मीर्या चंद्रे हरिवाहने । सा रावणगृहे रम्या नित्यमेवा
नपायिनी ॥८॥ या च राज्ञः कुवेरस्य यमस्य वरुणस्य च । तादृशी तद्विशिष्टा वा ऋद्धी रक्षोगृहेष्विव ॥९॥ तस्य हर्म्यस्य मध्यस्थं वेश्म चान्यत्सुनिर्मितं
बहुनिर्यूहसंयुक्तं ददर्श पवनात्मजः ॥१०॥ व्रह्मणोर्थे कृतं दिव्यं दिवि यद्विश्वकर्मणा । विमानं पुष्पकं नाम सर्वरत्नविभूषितं ॥११॥ परेण तप
सा लेभे यत्कुवेरः पितामहात् । कुवेरमोजसा जित्वा लेभे तद्राक्षसेश्वरः ॥१२॥ ईहामृगसमायुक्तैः कार्त्तस्वरहिरण्मयैः । सुकृतैराजितं स्तंभैः प्र
दीप्तमिव च श्रिया ॥१३॥ मेरुमंदरसंकाशैरुल्लिखद्भिरिवांबरं । कूटागारैः शुभागारैः सर्वतः समलंकृतं ॥१४॥ ॥हर्म्यमिति कनकः वेश्म पुष्पकाख्य
मिति तीर्थः अत्र तीर्थव्याख्याज्यायसी निर्यूहो मत्तवारणा ॥१०॥ पुनर्हेतुमद्दारोहणाशेषतया पुष्पकं वर्णयति व्रह्मणोर्थे इति भगवतो लीलाफलकमित
र्थं ॥११॥१२॥ कार्त्तस्वरहिरण्मये स्वर्णजातिविशेषौ रूप्यस्वर्णौ इति कश्चित् ईहामृगो वृकसंख्याप्रतिमायुक्तैः ॥१३॥ कूटागारैः गुप्तस्वल्पगृहैः शुभागारैः विहारयोग्य

१८
सुं

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

चार्वः सुंदराः प्रवराः श्रेष्ठा वेदिका यस्मिन् तत् ॥ १५ ॥ जालवातायनयोः कांचनकार्त्तस्वरयोर्मधासवयोश्च कंचिद्भेदं परिकल्प्य निर्वाहः एवमिंद्रनीलमहानीलयोरपि
॥ १६ ॥ निस्तुलाभिर्वर्त्तुलाभिर्निरुपमाभिर्वा तलेन कुट्टिमप्रदेशेन ॥ १७ ॥ आदित्यतरुणोपमं तरुणादित्यसदृशं ॥ १८ ॥ तत्रस्थः पुष्पकविमानस्थः ॥ १९ ॥ संमू
र्छितं व्याप्तं गंधवहमनिलमपि तत् गंधेन रूपवंतमिव गंधद्रव्यस्वरूपमिव तद्वायुसंबंधात् स गंधः स्वयं महासत्त्वं उत्तमं बंधुर्बंधुरिव जिघ्रन् भूतगंधापरो
क्ष्यात् तद्वहवायुरप्यपरोक्ष इवाभूत् ॥ २० ॥ यत्र स रावणस्तत्र स्थाने इत एहीत्युवाचेव उक्तरूपो वायुः कर्ता दिव्यगंधेन रावणाशयनगृहं ज्ञातवानित्यर्थः तत

ज्वलनार्कप्रतीकाशं सुकृतं विश्वकर्मणा ॥ हेमसोपानयुक्तं च चारुप्रवरवेदिकं ॥ १५ ॥ जालवातायनैर्युक्तं कांचनैः स्फाटिकैरपि ॥ इंद्रनीलमहा
नीलमणिप्रवरवेदिकं ॥ १६ ॥ विद्रुमेण विचित्रेण मणिभिश्च महाधनैः ॥ निस्तुलाभिश्च मुक्ताभिस्तलेनाभिविराजितं ॥ १७ ॥ चंदनेन च रक्तेन त
पनीयनिभेन च ॥ सुपुण्यगंधिना युक्तमादित्यतरुणोपमं ॥ १८ ॥ विमानं पुष्पकं दिव्यमारुरोह महाकपिः ॥ कूटागारैर्महागारैः सर्वतः समलंकृ
तम् तत्रस्थः सर्वतो गंधं पानभक्षान्नसंभवं ॥ १९ ॥ दिव्यं संमूर्छितं जिघ्रन् रूपवंतमिवानिलं ॥ स गंधस्तं महासत्त्वं बंधुर्बंधुमिवोत्तमं ॥ २० ॥
इत एहीत्युवाचेव तत्र यत्र स रावणः ॥ ततस्तां प्रस्थितः शालां ददर्श महतीं शिवां ॥ २१ ॥

॥ तस्मात्पुष्पकादवरुह्य गंधानुमितां तां रावणाशयन
शालां प्रस्थितस्तां शालां ददर्श यत्तु पुष्पकस्यैव सा शाला तत इत्यस्य तदनंतरमित्यर्थ इति तन्न तस्य प्रस्थित इति पदस्वारस्यात् अर्धयोजनविस्तीर्णमि
त्यादिना भूतालयप्रदर्शनोपक्रमाच्च भूतालयं दृष्ट्वा तद्बहिःस्थपुष्पकमन्विष्य तत्रस्थश्च रावणाशयनगृहं मत्वा गृहवर्ण्यं तस्मात्पुष्पकादवरुह्य तां
प्रतिस्थितस्तां ददर्शेत्येव न्याय्यमिति कतकः यत्त्वित्यादिनोक्ता व्याख्यैव युक्तेति मम भाति अवतीर्य विमानाच्च हनुमान्मारुतात्मज इत्यग्रे उपसंहारात् ॥ २१ ॥

241

महाकांतां अतिरमणीयामित्यर्थः कंशालाविशेषणं कांतां कमनीयां तां शालामेव विशिनष्टि मणीत्यादिना ॥ श्रियःसंजननीमिवेत्यनेन मणिकृतसोपानानि विशेषेणा
कृतानि यस्यां ॥२२॥ तलेकुट्टिमभूः दंतांतरितरूपिकामिति दंतैरंतरितानि मध्ये मध्ये निर्मितानि रूपाणि यस्यां सा चामीकरैरपि अंतरितरूपिकामित्यनुकर्ष
ः॥२३॥ वज्रत्ववोधनाय पुनस्तंभानुवादः वज्रत्वं च विपुलत्वं समंतात्सुविभूषितैः रत्नादिभिरितिशेषः ॥२४॥ अत्युच्चैः पक्षैरिवात्युच्चैः स्तंभैः दिवं सप्रस्थितमिव उत्रे

रावणस्य महाकांतां कांतामिव वरस्त्रियं ॥ मणिसोपानविकृतां हेमजालविराजितां ॥२२॥ स्फाटिकैरावृततलां दंतांतरितरूपिकां मुक्तावज्रप्रवालै
श्च रूप्यचामीकरैरपि ॥२३॥ विभूषितां मणिस्तंभैः सुवहुस्तंभभूषितां ॥ समैरृजुभिरत्युच्चैः समंतात्सुविभूषितैः ॥२४॥ स्तंभैः पक्षैरिवात्युच्चैर्दि
वं संप्रस्थितमिव ॥ महत्या कुथयास्तीर्णां पृथिवीलक्षणांकया ॥२५॥ पृथिवीमिव विस्तीर्णां सराष्ट्रगृहशालिनीं ॥ नादितां मत्तविहगैर्दिव्यगंधा
धिवासितां ॥२६॥ परार्घ्यास्तरणोपेतां रक्षोधिपनिषेवितां ॥ धूम्रामगरुधूपेन विमलां हंसपांडुरां ॥२७॥ पत्रपुष्पोपहारेण कल्माषीमिव सुप्र
भां ॥ मनसो मोदजननीं वर्णस्यापि प्रसाधिनीं ॥२८॥ तां शोकनाशिनीं दिव्यां श्रियः संजननीमिव ॥ इंद्रियाणींद्रियार्थैस्तु पंच पंचभिरुत्तमैः ॥२९॥
तर्पयामास सा मातेव तदा रावणपालिता ॥ स्वर्गोयं देवलोकोयमिंद्रस्यापि पुरी भवेत् ॥३०॥

॥ क्षात्रकुथया विशालविचित्रकंवलास्तरणेन पृथिवील
क्षणां चतुरस्रत्वं ॥२५॥ सराष्ट्रगृहशालिनीमिति पृथिवीविशेषणं ॥२६॥ हंसपांडुरां हंसवत्पांडुरां ॥२७॥ कल्माषी शवलवर्णा वसिष्ठगौः अनेन सर्वान
ददायित्वं रिपूणामक्षुभ्यत्वं च सर्वमनोरथपूरकत्वं च सूच्यते वर्णस्य देहकांतेः प्रसाधिनी संपादिका ॥२८॥ तां शालां ददर्शेति पूर्वेण संबंधः पंचभिरिंद्रि
यार्थैः शब्द स्पर्शरूपरसगंधैः पंचेंद्रियाणि श्रोत्रत्वक्चक्षुरसनघ्राणानि ॥२९॥ तर्पयामास हनूमत इति शेषः रावणपालिता शालेति शेषः स्वर्गः ज्योतिष्टोमा

दिफलभोगभूमिः देवलोको वायुवरुणादिलोकः इंद्रस्य पुरी अमरावती ॥३०॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

पराग्गांधर्वीसिद्धिः तन्मायेत्यर्थः ॥३१॥ प्रध्यायतो ध्याननिष्ठान् धूर्तोक्षदेवनः तत्रातिसमर्थो महाधूर्तः महाधूर्तेन देवनेन पराजितो हि धूर्तः धननाशात् ध्यायन्ति वा स्ते कांचनान् दीपान् कांचनदीपस्तंभस्थदीपान् विपुलदीपा येषु उडुदीपप्रभा इव रावणतेजोभिभूतान पश्यदित्यर्थः ॥३२॥ प्रदीप्ता अग्निजिह्वा लाज्वलिता अने नाग्निसोग्निदाहः भूषितः ॥३३॥ कथासीनं कथासीनाः कथायांशयाने ॥३४॥ बलवत्प्रसुप्तमपश्यदित्यनुकर्षः ॥३५॥ तत्प्रसुप्तं प्रसुप्तजनं रावणगृहं निःशब्दान्तरं निर्गतस्वस्वशब्दभेदैर्नूपुरसिंजित्यादिर्भूषितं ॥३६॥ निद्रितत्वात्संवृतानि संवृतपक्ष्माणि तादृशानि च तानि निद्रानानि म्लानानि निमीलिताक्षीणि अतिसंवृतपक्ष्मा

सिद्धिर्वैयं पराहि स्यादित्यमन्यत मारुतिः ॥३१॥ प्रध्यायत इवापश्यत् प्रदीप्तांस्तत्र कांचनान्। धूर्तानिव महाधूर्तैर्देवनेन पराजितान् ॥३२॥ दीपानांच प्रकाशेन तेजसा रावणस्य च। अर्चिर्भिर्भूषणानां च प्रदीप्तेत्यभ्यमन्यत ॥३३॥ ततोपश्यत् कुथासीनं नानावर्णाम्बरस्रजं। सहस्रं वरनारीणां नानावेषविभूषितं ॥३४॥ परिवृत्तेर्धरात्रे तु पाननिद्रावशंगतं। क्रीडित्वोपरतं रात्रौ प्रसुप्तं बलवत्तदा ॥३५॥ तत्प्रसुप्तं विरुरुचे निःशब्दान्तरभूषितं। निःशब्दहंसभ्रमरं यथा पद्मवनं महत् ॥३६॥ तासां संवृतदन्तानि मीलिताक्षीणि मारुतिः। अपश्यत् पद्मगन्धीनि वदनानि सुयोषितां ॥३७॥ प्रबुद्धानीव पद्मानि तासां भूत्वा क्षपाक्षये। पुनः संवृतपत्राणि रात्राविव बभुस्तदा ॥३८॥ इमानि मुखपद्मानि नियतं मत्तषट्पदाः। अंबुजानीव फुल्लानि प्रार्थयन्ति पुनः पुनः ॥३९॥

णि तादृशानि च तानि द्रांतानि म्लानानि निमीलिताक्षीणि अतिसंवृतपक्ष्माणि स्वर्गे देवलोकादेरिव संवृतमीलितयोरपि भेदो बोध्यः यद्वा संवृतदंतानीत्यस्य व्याख्यानं निमीलिताक्षीणीति यद्वा संवृतत्वसाम्यो ॥३७॥ क्षपाक्षये पद्मानीव प्रबुद्धानि भूत्वा पुना रात्रौ संवृतपत्राणि पद्मानीव बभूवुरित्यन्वयः ॥३८॥ मुखानि दृष्ट्वा हनूमतो जातां संभावनामाह इमानीति फुल्लानि प्रार्थयन्तीत्यन्वयः ॥

बु·२

नियतंनित्यं ॥३८॥ उपपन्नाभुक्ता ॥३९॥

सलिलोद्भवैः पद्मैः ॥ ४० ॥ ४१ ॥ ४२ ॥ पुण्यशेषसमावृतास्तद्युक्ताः संगताः एकदेशमिलिताः अनेन सौंदर्यानुक्तिरूपोनुक्त्यलंकारः ॥ ४३ ॥ तदेवाह ताराणामिति प्रभा देहकां
न्तिः वर्णो रूपं प्रसादस्तैरुज्वलं ॥ ४४ ॥ व्यावृत्ताः कचाः पीनस्रजश्च यासां ताश्च प्रकीर्णानि इतस्ततः श्रयानि वरभूषणानि यासां ताः पानव्यायामकालेषु पानानंतर
कालिकगाननृत्यरत्यादिक्रीडाकालेषु उक्तगुणा अनन्तरमेव श्रमान्निद्रोपहतचेतसः ॥ ४५ ॥ उक्तं भूषणाप्रकिरणमेव प्रपंचयति व्यावृत्तेति उद्भ्रान्ताः स्वस्थानात्स्र

इति वामन्यत श्रीमानुपपन्यां महाकपिः ॥ मेने हि गुणतस्तानि समानि सलिलोद्भवैः ॥ ४० ॥ सा तस्य शुशुभे शाला ताभिः स्त्रीभिर्विराजिता ॥ शरदीव प्र
सन्ना द्यौस्ताराभिरभिशोभिता ॥ ४१ ॥ स च ताभिः परिवृतः शुशुभे राक्षसाधिपः ॥ यथा ह्युडुपतिः श्रीमांस्ताराभिरिव संवृतः ॥ ४२ ॥
याश्च्यवंतेंवरात्ताराः पुण्यशेषसमावृताः ॥ इमास्ताः संगताः कृत्स्ना इति मेने हरिस्तदा ॥ ४३ ॥ ताराणामिव सुव्यक्तं महतीनां शुभार्चिषां ॥ प्र
भा वर्णप्रसादाश्च विरेजुस्तत्र योषितां ॥ ४४ ॥ व्यावृत्तकचपीनस्रक्प्रकीर्णवरभूषणाः ॥ पानव्यायामकालेषु निद्रोपहतचेतसः ॥ ४५ ॥ व्या
वृत्ततिलकाः काश्चित्काश्चिदुद्भ्रान्तनूपुराः ॥ पार्श्वे गलितहाराश्च काश्चित्परमयोषितः ॥ ४६ ॥ मुक्ताहारवृताश्चान्याः काश्चित्प्रस्रस्तवाससः ॥ व्याविद्ध
रशनादामाः किशोर्य इव वाहिताः ॥ ४७ ॥ सुकुंडलधराश्चान्या विच्छिन्नाम्लदितस्रजः ॥ गजेंद्रमृदिताः फुल्ला लता इव महावने ॥ ४८ ॥

जितानूपुरा यासां ताः पार्श्वे एकस्मिन्गलिता विस्रस्तहारा यासां ताः ॥ ४६ ॥ मुक्ताहारैर्वृताः छिन्नमुक्ताहाराः व्याविद्धं विक्षिप्तं रशनादाम कांचीगुणो यासां ताः
एवं भूषणाबंधराहित्येन शयने उपमा वाहिताः किशोर्य इव कृतभारवहनाः श्रांताः किशोर्यो वडवा यथा श्रमापनयनाय लुंठनेन व्यस्तपल्ययन
बंधाः शेरते तद्वत् ॥ ४७ ॥ सुकुंडलधराः कुंडलधररहिताः गलितकुंडला इति यावत् विच्छिन्नाश्च मृदिताश्च स्रजो यासां ताः अत्र रेजुरित्यनुकर्षः ॥ ४८ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

अंशवःप्रभाःकिरणास्तद्वाराः अंशवः सूक्ष्मरश्मयः किरणाःस्थूलरश्मयः इत्यन्ये वैपरीत्येनस्थिताः हाराःमुक्ताहाराः॥४९॥ वैडूर्या वैडूर्यमणिमालाः कादंबाःक
लहंसाः अत्र कादंबशब्देनकारंडवपरत्वाद्योजलकाकउच्यते अन्यथावैडूर्योपमानत्वमसंगतंस्यात् हेमसूत्राणिचअत्रापिस्तनमध्योन्नतानीत्युत्कर्षः चक्र
वाकानांपीतत्वसादृश्यात्पांडुपमानत्वं॥५०॥ स्त्रीषुनानावर्णभूषणानिहंसादिस्थानीयानि स्त्रीकटीप्रदेशभागोजघनं॥५१॥ किंकिणीजालसंकाशाः तद्वन्मुकु
लितनयनाः तत्स्थानेचनद्याःमुकुलितकुमुदानिहेमविपुलाब्जानिनवक्त्राणिगरणां उपमानेतुनर्निगरणं किंकिणीजालसंबाधा इतिपाठे किंकिणीजालसंवा

चंडांशुकिरणाभाश्चहाराःकासांचिदुन्नताः॥ हंसाइवबभुःसुप्तास्तनमध्येषुयोषितां॥४९॥ अपरासांचवैडूर्याःकादंबाइवपक्षिणः॥ हेम
सूत्राणिचान्यासांचक्रवाकाइवाभवन्॥५०॥ हंसकारंडवोपेताश्चक्रवाकोपशोभिताः॥ आपगाइवतारेजुर्जघनैःपुलिनैरिव॥५१॥ किंकिणीजालसंका
शास्ताहेमविपुलांबुजाः॥ भावग्राहायशस्तीराःसुप्तानद्यइवाबभुः॥५२॥ मृदुष्वंगेषुकासांचित्कुचाग्रेषुचसंस्थिताः॥ बभूवुर्भूषणानीवशुभाभूष
णराजयः॥५३॥ अंशुकांताश्चकासांचिन्मुखमारुतकंपिताः॥ उपर्युपरिवक्त्राणांव्याधूयंतेपुनःपुनः॥५४॥ ताःपताकाइवोद्धूताःपत्नीनांरुचिरप्र ॥राम॥
भाः॥ नानावर्णसुवर्णानांवक्त्रमूलेषुरेजिरे॥५५॥ ॥यत्तूभयत्रापिस्पष्टमेवशाबलत्वसाधर्म्यात् किंकिणीशब्देनलहरीणामप्युक्तेः॥ भावविलासा ॥३०॥
एवस्वाभाविकसुरतभावोवायाहायासांताः यशांसिशुभ्राणिवलक्षत्वयशएवतीरंयासांताः यशःशब्देनलक्षणयाकांतिरित्यन्येसुप्तानायोनद्यइवबभूवुः॥५२॥ बु:२
भूषणराजयः विमर्दजनितरेखाः भूषणराशय इतिपाठेप्ययमेवार्थोलक्षणादिनाबोध्यः॥५३॥ वक्त्राणामुपर्युपरीत्यन्वयः॥५४॥ व्याधूयमानमंशुकांतमु
त्प्रेक्षतेताइति विधेयमपेक्ष्यस्त्रीलिंगनिर्देशः पत्नीनां अर्थाद्रावणस्यअनेकवर्णावत्सुवर्णानांतुनिर्मितवाससांपताकाइवेत्यन्वयः॥ ५५ ॥ छ ॥

243

शुभार्चिषांकासांचिद्योषितांकुंडलानिसुखमारुतसंकंपैसुखमारुतसंसर्गकृतचलनैर्मंदंमंदंववल्गुःतेनकुंडलानामतिलघुतातेनतासांसौकुमार्यातिश
योव्यंग्यःशार्करासवःआसवविशेषस्तद्योगाद्गंधःप्रकृत्याचसुरभिरतएवसुखस्तासांवदननिश्वासोरावणांसिषेवे यद्वाप्रकृत्यासुरभिरपिवासुरिति
शेषःतासांवदननिश्वासस्तद्युक्तत्वमर्थआयजंतंअतएवशार्करासवगंधोरावणांसिषेवे॥५७॥ रावणाननशंकाःमदनिद्राभयजविभ्रवैवश्यात्सपत्नी

ववल्गुश्चात्रकासांचित्कुंडलानिशुभार्चिषां॥ सुखमारुतसंकंपैर्मंदंमंदंचयोषितां॥५६॥ शार्करासवगंधःसप्रकृत्यासुरभिःसुखः॥ ता
सांवदननिश्वासःसिषेवेरावणंतदा॥५७॥ रावणाननशंकाश्चकाश्चिद्रावणयोषितः॥ सुखानिचसपत्नीनांउपाजिघ्रन्पुनःपुनः
॥५८॥ अत्यर्थंसक्तमनसोरावणेतावरस्त्रियः॥ अस्वतंत्राःसपत्नीनांप्रियमेवाचरंस्तदा॥५९॥ वाहूउपनिधायान्याःपारिहार्यविभूषिताः
अंशुकानिचरम्याणिप्रमदास्तत्रशिशियिरे॥६०॥ अन्यावक्षसिचान्यस्यास्तस्याःकाचित्पुनर्भुजं॥ अपरात्वंकमन्यस्यास्तस्याश्चाप्यपराकुचौ
॥६१॥ ऊरुपार्श्वकटीपृष्ठमन्योन्यस्यसमाश्रिताः॥ परस्परनिविष्टांग्योमहस्नेहवशानुगा॥६२॥ अन्योन्यस्यांगसंस्पर्शात्प्रीयमाणाःसुमध्य
माः॥ एकीकृतभुजाःसर्वाःसुषुपुस्तत्रयोषितः॥६३॥ ॥छ॥

॥नांचसपत्नीनामपिसुखाजिघ्रन्॥५८॥ ननुसपत्नीभिःकृतंसुखाघ्राणंताः
कथंसहंतेइत्यतआह अत्यर्थमितिअत्यासक्तेरेवास्वतंत्राःमदपारवश्याच्चतथाभूतावरस्त्रियःसपत्नीभिराघ्रातसुखाअपिसपत्नीनांप्रियमेवाचरन्ता
अपितासांसुखानिरावणमुखशंकयोपाजिघ्रन्नित्यर्थः॥५९॥ पारिहार्योवलयःउपनिधायउपधानंकृत्वाअंशुकानिचउपनिधायेत्यनुकर्ष॥६०॥ अन्येत्या
दिश्लोकद्वयेशिशियिरइतिपदंयथायोग्यंवचनविपरिणामेनयोज्यंउपनिधायेतिपदंच॥६१॥ स्नेहोत्ररावणीय॥६२॥ एकीकृतभुजाःपरस्परसंबद्धभुजा॥६३

॥रा०वा०सु०॥
॥३१॥

मूहः ३

अत्रएवाह अन्योन्येति मालापुष्पमालाउपमेयेमत्तषट्पदपदस्थानीयाः कचभारा नेत्रद्वंद्वानि च ॥६४॥ लतानां वनमिवेत्यन्वयः ॥ अन्योन्यसंबंधेन मालाकारैर्याग्रथि
तमिव प्रतिवेष्टितावृक्षाणां नायकानां वशोभनाः स्कंधा येन तत् अन्योन्यं धावंतो ये भ्रमरास्तैराकुलं स्त्रीणामपि पद्मिनीत्वात् भ्रमराकुलत्वं केशपाशनेत्राद
यो वा तासु भ्रमराः स्त्रीवनं स्त्रीसं ॥६५॥६६॥ तासां योषितां सुचिते सुस्थानेषु सुव्यक्तं प्रतिष्ठितानामपि भूषणांगांवरस्रजां विवेकमाधातुं कर्तुं न शक्यं अप

अन्योन्यभुजसूत्रेणास्त्रीमालाग्रथिताहिता ॥ मालेव ग्रथिता सूत्रे शुभे मत्तषट्पदा ॥६४॥ लतानां माधवे मासि फुल्लानां वायुसेवनात् ॥ अन्योन्यमा
लाग्रथितं संसक्तकुसुमोच्चयं ॥६५॥ प्रतिवेष्टितसुस्कंधमन्योन्यभ्रमराकुलं ॥ आसीद्वनमिवोद्धूतं स्त्रीवनं रावणस्य तत् ॥६६॥ उचितेष्वपि सुव्यक्तं
न तासां योषितां तदा ॥ विवेकः शक्यमाधातुं भूषणांगांवरस्रजां ॥६७॥ रावणे सुखसंविष्टे ताः स्त्रियो विविधप्रभाः ॥ ज्वलंतः कांचना दीपाः प्रेक्षंतो निमि
षा इव ॥६८॥ राजर्षिविप्रदैत्यानां गंधर्वाणां च योषितः ॥ रक्षसां चाभवन् कन्यास्तस्य कामवशंगताः ॥६९॥ युद्धकामेन ताः सर्वा रावणेन हृताः स्त्रियः ॥ सम
दा मदनेनैव मोहिताः काश्चिदागताः ॥७०॥

॥रिमितत्वात् भूषणाभूषणयोरैकरूप्यात् परस्परसंग्रथितत्वेन सुप्तत्वाच्च इमानि अस्या भूषणानि इमान्यस्या
इति विवेकः कर्तुमशक्य इति भ्रांतिमानलंकारोऽत्र व्यंग्यः ॥६७॥ सुखसंविष्टे सुखसुप्ते कांचनाः कांचनस्तंभगाः दीपाः दीपस्थानिसुरूपाः कर्तारः स्त्रियः कर्म
अनेन रावणो जाग्रतीति मामपि तद्दर्शने भयं सूचितं ॥६८॥ राजर्षयो विप्रदैत्याश्च अस्य बलराक्षसत्वात् अस्ति विप्रकन्याविवाहेऽधिकारः कामवशंगताः संततसं
स्य योषितोऽभवन् अनेन तासामप्यनुरागः सूचितः ॥६९॥ अस्य वक्तुः स्त्रीप्राप्तिर्बलात्कारस्याच्छेत्याह युद्धेत्यादि समर्थाइति वाऽकुल्याः अभिप्रायं त्रासां हरणे एनं

युभिर्युद्धं भविष्यतीति युद्धकामनापूर्वं हृताः काश्चित्स्वमंदास्तद्
गेपा मदनमोहिताः स्वयमेवैनं गतवत्यः ॥७०॥

॥रा०॥
॥३१॥

244

अस्यैव विवरणं· न तत्र काश्चिदिति वीर्योपपन्नेनापि तेन तत्र तासु मध्ये काश्चित्प्रमदाः प्रसह्य न लब्धाः किंतु गुणेन निरतिशयैश्वर्यवीर्यसौंदर्यादिगुणेन स्वतस्वल
ब्धाः तत्र लंकायामन्यकामा च नाहृता अन्यपूर्वा च नाहृता कथमेवं प्रत्यक्षापलापस्तत्राह विनेति वरार्हां श्रेष्ठरामार्हां ॥ ७१ ॥ उपचार उत्तमांवरभूषणमाला
दिः कांतस्य रावणस्य कमनीया मनोज्ञा न[illegible]ता दृशी चन ॥ ७२ ॥ अथ सीताप्येतत्स्वांतर्गता न वेति विकल्प्याये रावणस्य भद्रमेवेति बुद्धिर्हनूमतो जातेत्याह
बभूवेति साधुबुद्धेर्हरीश्वरस्येति बुद्धिर्बभूव· इमा महाराक्षसराजभार्याः यथा तद्युक्ताः राघवधर्मपत्न्यपि ईदृशी एतदंतर्गता एतद्युक्ता च यदि स्यात्तदा

न तत्र काश्चित्प्रमदाः प्रसह्य वीर्योपपन्नेन गुणेन लब्धाः ॥ न चान्यकामापि न चान्यपूर्वा विना वरार्हां जनकात्मजां तु ॥ ७१ ॥ न चाकुलीना न च हीनरूपा
नादक्षिणा नानुपचारयुक्ता ॥ भार्याभवत्तस्य न हीनसत्वा न चापि कांतस्य न कामनीया ॥ ७२ ॥ बभूव बुद्धिस्तु हरीश्वरस्य यदीदृशी राघवधर्मपत्नी ॥
इमा महाराक्षसराजभार्याः सुजातमस्येति हि साधुबुद्धेः ॥ ७३ ॥ पुनश्च सोचिंतयदात्तरूपो ध्रुवं विशिष्टा गुणतो हि सीता ॥ अथायमस्यां कृतवान्महा
त्मा लंकेश्वरः कष्टमनार्यकर्म ॥ ७४ ॥

ऽस्य रावणसुजातं भद्रमेव भवति रावणानुरक्तेति मया निवेदिते सति· सीतायां मृतामिव राघवस्योपेक्षणाद्रा
वण वधयत्नाऽप्रसक्तेरिति भावः ॥ ७३ ॥ यदीत्यनेन सूचितमस्य पक्षस्यात्यंतासंभावितत्वमाह पुनश्चेति ॥ पक्षांतरं च सोचिंतयत् विचारेण निश्चितवा
नित्यर्थः चिंताप्रकारः हि प्रसिद्धमेतत् यत्सीता देवी गुणतः पातिव्रत्यादिगुणैर्विशिष्टा अथ यत इत्यर्थे यतो महात्मा महाबलो लंकेश्वरः निरवधिकैश्व
र्यवैशिष्ट्यमनेन सूचितं ॥ ईदृशोस्यां जानक्यामनार्यकर्मापहरणरूपं कर्म आत्तरूपः परिगृहीतमायारूपः सन् कष्टसंक्लेशं यथा भवति तथा कृत
वान् यद्येषा ऐश्वर्यादौ सरागा स्यात् तदा स्वरसत एव नयनं स्यात् न च तदस्ति अस्माभिः तद्विक्रोशनादेरावणेनक्लेशपूर्वं नयस्य चानुभवादित्याशयः

आर्तरूप इति पाठे आर्तं संजातं रूपं यस्येत्यर्थः हनूमद्विशेषणं· आर्त
रपीडासूचकरूप इत्यर्थः ॥ ७४ ॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

॥ रा॰वा॰सु ॥
॥ ३२ ॥

वासमानः ॥ इति श्रीरामाभिरामे श्रीरा॰सुंद॰ नवमः सर्गः ॥ ९ ॥ तत्र शालायां दिव्योपमं दिविभवेन स्वर्गवर्तिपदार्थेनैवोपमा यस्य तत् शयनस्यासनं प
त्यंकप्रतिष्ठापनवेदिका अवेक्षमाणः इतस्ततः पश्यन् ॥ १ ॥ तस्यैव वर्णनं दांतेत्यादि गजदंतमयानि स्वर्णमयानि च चित्राणि चित्रयुतानि अंगानि पा
दादिरूपाणि येषां तैर्महार्हास्तरणोपेतैः बहुमूल्यास्तरणयुक्तैः वैडूर्यैरित्युपलक्षणं वैडूर्यपद्मरागादिनिर्मितैर्वरासनैः स्त्रीशयनपल्यंकैर्महाधनैर्व

इत्यार्षे श्रीमद्रामायणे सुंदरकांडे नवमः सर्गः ॥ ९ ॥ तत्र दिव्योपमं मुख्यं स्फाटिकं रत्नभूषितं ॥ अवेक्षमाणो हनुमान् ददर्श शयनासनं ॥ १ ॥
दांतकांचनचित्रांगैर्वैडूर्यैश्च वरासनैः ॥ महार्हास्तरणोपेतैरुपपन्नं महाधनैः ॥ २ ॥ तस्य चैकतमे देशे दिव्यमाल्योपशोभितं ॥ ददर्श पांडुरं
छत्रं ताराधिपतिसन्निभं ॥ ३ ॥ जातरूपपरिक्षिप्तं चित्रभानोः समप्रभं ॥ अशोकमालाविततं ददर्श परमासनं ॥ ४ ॥ वालव्यजनहस्ताभि वी
ज्यमानं समंततः ॥ गंधैश्च विविधैर्जुष्टं वरधूपेन धूपितं ॥ ५ ॥ परमास्तरणास्तीर्णमाविकाजिनसंवृतं ॥ दामभिर्वरमाल्यानां समंतादुपशो
भितं ॥ ६ ॥ तस्मिन् जीमूतसंकाशं प्रदीप्तोज्वलकुंडलं ॥ लोहिताक्षं महाबाहुं महारजतवाससं ॥ ७ ॥ लोहितेनानुलिप्तांगं चंदनेन सुगंधिना ॥
संध्यारक्तमिवाकाशे तोयदं सतडिद्गुणं ॥ ८ ॥

॥ ऊमूल्यैरुपपन्नं ॥ २ ॥ ३ ॥ परमासनं पल्यंकं तस्यैकदेशे ददर्श अशोकपुष्पमाला
युक्तं यद्वा यत्सन्निधाने शोकाभावस्तादृशमालाप्रथितं चित्रभानुरग्निः ॥ ४ ॥ वालव्यजनं चामरं तत्तु संभोगगृहे तत्रापि निद्राणस्य कथं वालव्यजन
वीजनं कथं च हस्तैस्ताभिरदर्शनमिति चेत्तत्र यंत्रनिर्मितस्त्रीप्रतिमादिभिः तत्रापि तत्संभवात् ॥ ५ ॥ आविकाजिनं ऊर्णायुचर्म तद्धि परममृदु
लं तेन संवृतं संवृतपर्यंतप्रदेशं माल्यं पुष्पं ॥ ६ ॥ तस्मिन् प्रसुप्तमिति शेषः महारजतं स्वर्णं तत्तंतुनिर्मितवासोधारिणं ॥ ७ ॥ रावणस्य तडित्स्थानी

कर्णिकावासं ॥ ८ ॥

245

॥ राम ॥
॥ ३२ ॥

सवृक्षवनगुल्माढ्यं पुष्पसहितवृक्षवनगुल्माढ्यं मंदरमिवस्थितं गाढवोस्यवृक्षानासादयोगुल्मा ॥ ९ ॥ १० ॥ पीत्वाप्युपरतं अपिनाक्रीडित्वाप्युपरतं ॥ ११ ॥ यथानागं
गजमिवनिश्वसंतंरावणं आसाद्यप्राप्यपरमोद्विग्नः अयंपापीदेवीं हृतवानित्येतत्समीपेवस्थानमनुचितमितिखिन्नचित्तोपासर्पत्सुभीतवत्सुभीतोयथा
भयहेतोपिशाचादिसंमुखेवस्थातुमशक्तोऽपसर्पतितद्वत् ॥ १२ ॥ आरोहणंसोपानंवेदिकांतरंसोपानपर्वमध्यं ॥ १३ ॥ यस्यगंधेनान्येगजाः पलायंतेसगंध

हृतमाभरणैर्दिव्यैः सुरूपंकामरूपिणं ॥ सवृक्षवनगुल्माढ्यं प्रसुप्तमिवमंदरं ॥ ९ ॥ क्रीडित्वोपरतंरात्रौ वराभरणभूषितं ॥ प्रियंराक्ष
सकन्यानांराक्षसानांसुखावहं ॥ १० ॥ पीत्वाप्युपरतंचापिददर्शसमहाकपिः ॥ भास्वरेशयनेवीरंप्रसुप्तंराक्षसाधिपं ॥ ११ ॥ निःश्वसं
तंयथानागंरावणंवानरोत्तमः ॥ आसाद्यपरमोद्विग्नःसोपासर्पत्सुभीतवत् ॥ १२ ॥ अथारोहणमासाद्यवेदिकांतरमाश्रितः ॥ क्षीवं
राक्षसशार्दूलंप्रेक्षतेस्ममहाकपिः ॥ १३ ॥ शुशुभेराक्षसेंद्रस्यस्वपतःशयनंशुभं ॥ गंधहस्तिनिसंविष्टेयथाप्रस्रवणंमहत् ॥ १४ ॥
कांचनांगदसन्नद्धौददर्शसमहात्मनः ॥ विक्षिप्तौराक्षसेंद्रस्यभुजाविंद्रध्वजोपमौ ॥ १५ ॥ ऐरावतविषाणाग्रैरापीडनकृतव्र
णौ ॥ वज्रोल्लिखितपीनांसौविष्णुचक्रपरिक्षतौ ॥ १६ ॥ पीनौसमसुजातांसौसंगतौबलसंयुतौ ॥ सुलक्षणनखांगुष्ठौस्वंगुलीयक
लक्षितौ ॥ १७ ॥ संहतौपरिघाकारौवृत्तौकरिकरोपमौ ॥ विक्षिप्तौशयनेशुभ्रेपंचशीर्षाविवोरगौ ॥ १८ ॥ ((गजः मत्तगजेननितरांसं

विष्टंअधिष्ठितंमहत्प्रस्रवणमिव ॥ १४ ॥ महात्मनः महाशरीरस्यविक्षिप्तौप्रसारितौ ॥ १५ ॥ आपीडनेसुद्धेकृतव्रणौकृतव्रणांकितौवज्रेणोल्लिखि
तौक्षतौपीनांसौययोस्तौवज्रचक्रयोरप्यसाध्यत्वमुरितिभावः ॥ १६ ॥ समौसुजातौचांसौसंगतौदृढसंधिबंधौस्वंगुलीयकलक्षितौशोभनांगुलीयकत्व

४८

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

शशस्यक्षतजंरक्तमतिलोहितवर्णौ॥१९॥उत्तमस्त्रीणांविमृदितौ विमर्दनमालिंगनादिययोस्तौ॥२०॥ददर्शस्वपादरेणाददर्शनातःपुनरुक्तिःमहा
हीमहासर्पौअत्रद्विभुजत्वकथनात् युद्धादिकालेएवविंशतिभुजत्वंदशशीर्षत्वंचेतिबोध्यं॥२१॥२२॥वकुलोत्तमसंयुतःउत्तमवकुलगंधयुतःस्व
यंप्रसुप्तविशेषमभ्यासधर्मेइमितकः चूतादिसुरभित्वंनूतनदधिवासितवस्तुसेवनात् मृष्टान्नरससंयुतः षड्रसोत्तमान्नगंधोपेतःपानंमधुराक्षस

शशक्षतजकल्पेनसुशीतेनसुगंधिना॥चंदनेनपरार्ध्येनस्वनुलिप्तौस्वलंकृतौ॥१९॥उत्तमस्त्रीविमृदितौगंधोत्तमनिषेवितौ॥यक्षपन्नगगं
धर्वदेवदानवराविणौ॥२०॥ददर्शसकपिस्तस्यबाहूशयनसंस्थितौ॥मंदरस्यांतरेसुप्तौमहाहीरुषिताविव॥२१॥ताभ्यांसपरिपूर्णाभ्या
मुभाभ्यांराक्षसेश्वरः॥शुशुभेचलसंकाशःशृंगाभ्यामिवमंदरः॥२२॥चूतपुन्नागसुरभिर्वकुलोत्तमसंयुतः॥मृष्टान्नरससंयुक्तःपानगंधपुर
स्सरः॥२३॥तस्यराक्षसराजस्यनिश्चक्राममहामुखात्॥शयानस्यविनिश्वासःपूरयन्निवतद्गृहं॥२४॥मुक्तामणिविचित्रेणकांचनेनविराज
ता॥मुकुटेनापवृत्तेनकुंडलोज्वलिताननं॥२५॥रक्तचंदनदिग्धेनतथाहारेणशोभिना॥पीनायतविशालेनवक्षसाभिविराजता २६
पांडुरेणापविद्धेनक्षौमेणक्षतजेक्षणं॥महार्हेणसुसंवीतंपीतेनोत्तरवाससा॥२७॥माषराशिप्रतीकाशंनिश्वसंतंभुजंगव
त्॥गांगेमहतितोयांतेप्रसुप्तमिवकुंजरं॥२८॥

त्वादेववामाचारेणपूजाकरणात् मधुपानं॥२३॥२४॥अपवृत्तेननि
द्रावशात्पर्यस्तेनविराजता·मुकुटेनउपलक्षितमितिशेषः॥२५॥शोभिनाहारेणशोभनहारवतावक्षसोपलक्षितमितिशेषः॥२६॥
अपविद्धेनपर्यस्तेनपांडुरेणक्षौमेनपरिधानीयेनकटेरधःसंवीतंपीतेनोत्तरीयेणसंवीतमितिशेषः॥२७॥तोयांतेतोयमध्ये॥२८॥

कांचनैः कांचनस्तंभगैः चतुर्दिशं चतुर्दिक्षु दीप्यमानं अत्यंतसंयोगेद्विनीयाविद्युत्त्वैरिवेति पाठे पुंस्त्वमार्षं ॥२९॥ उत्कृष्टगुणां रावणां ददर्श पादमूलगास्त
स्यत्नीश्च ददर्श रक्षःपतेर्गृहे इत्युत्तरान्वयि ॥३०॥ अम्लानमाल्याभरणा देवकन्या इत्यर्थः ॥३१॥ राक्षसेंद्रभुजांवंकत्वगछनिताः तथा प्रिया इति यावत् धा
रिणः धारिणीः निषण्णाः शयिता ॥३२॥ बाहूपधानत्वात् गदानामपि श्रवणांते दर्शनं बोध्यं ॥३३॥ विमानं मंचकविशेषः पुष्पकमित्यन्ये विराजतव

चतुर्भिः कांचनैर्दीपैर्दीप्यमानं चतुर्दिशं ॥ प्रकाशीकृतसर्वांगं मेघविद्युद्गणैरिव ॥२९॥ पादमूलगताश्चापि ददर्श सुमहात्मनः ॥ पत्नीः सप्रिय
भार्यस्य तस्य रक्षःपतेर्गृहे ॥३०॥ शशिप्रकाशवदना वरकुंडलभूषणाः ॥ अम्लानमाल्याभरणा ददर्श हरियूथपः ॥३१॥ नृत्यवादित्रकु
शला राक्षसेंद्रभुजांकगाः ॥ वराभरणधारिण्यो निषण्णा ददृशे कपिः ॥३२॥ वज्रवैडूर्यगर्भाणि श्रवणांतेषु योषितां ॥ ददर्श तापनीयानि
कुंडलान्यंगदानि च ॥३३॥ तासां चंद्रोपमैर्वक्त्रैः शुभैर्ललितकुंडलैः ॥ विराजत विमानं तन्नभस्तारागणैरिव ॥३४॥ मदव्यायामखिन्नास्ता राक्ष
सेंद्रस्य योषितः ॥ तेषु तेष्ववकाशेषु प्रसुप्तास्तनुमध्यमाः ॥३५॥ अंगहारैस्तथैवान्या कोमलैर्नृत्यशालिनी ॥ विन्यस्तशुभसर्वांगी प्रसुप्ता वरव
र्णिनी ॥३६॥ काचिद्वीणां परिष्वज्य प्रसुप्ता संप्रकाशते ॥ महानदीप्रकीर्णेव नलिनी पोतमाश्रिता ॥३७॥ अन्या कक्षगतेनैव मड्डुकेनासि
तेक्षणा ॥ प्रसुप्ता भामिनी भाति बालपुत्रेव वत्सला ॥३८॥ पटहं चारुसर्वांगी न्यस्य शेते शुभस्तनी ॥ चिरस्य रमणं लब्ध्वा परिष्वज्येव कामि
नी ॥३९॥

राजत ॥३४॥ मदव्यायामे नरतिजेन ॥३५॥ कोमलैः अकर्कशैः अंगहारैः अंगविक्षेपैः नृत्यशालिनी निवासनावलेनत्यभिनयोपेतनयासुप्तवतीत्य
र्थः विशेषेणान्यस्तं शुभं येषु धात्रा तादृशानि सर्वाणि अंगानि यस्याः ॥३६॥ महानदीप्रकीर्णा महानद्यां प्रकीर्णा पुष्पपत्रादैर्व्याप्तं गतेन पोतं प्लवमाश्रिता

नलिनी पद्मिनीव पोतस्था नेत्रवीणा ॥३७॥ मड्डुको वाद्यभेदः ॥३८॥
न्यस्य आलिंग्येत्यर्थः ॥३९॥

Nepal Sanskrit University, Balmiki Campus, Kathmandu

काचिदिति॥४०॥विपंचीवीणाविशेषः॥४१॥४२॥मदकृतश्रमामदवतीअर्शंआद्यच वादनेनकृतश्रमा च॥४३॥डिंडिमंपरिगृह्य आलिंग्य आसन्न
डिंडिमापृष्ठदेशसंवृतान्यडिंडिमा॥तरुणांरमणां वत्सं पुत्रंच परिगृह्य प्रसुप्तेव॥४४॥आडंवरंवाद्यभेदः भुजसंभोगेनभुजाश्लेषेणपीडितंआ

काचिद्वीणांपरिष्वज्यप्रसुप्ताकमलल्लोचना॥वरंप्रियतमंगृह्यसकामेवहिकामिनी॥४०॥विपंचीपरिगृह्यान्यानियतानृत्तशालिनी॥निद्रा
वशमनुप्राप्तासहकांतेवभामिनी॥४१॥अन्याकनकसंकाशैर्मृदुपीनैर्मनोरमैः॥मृदंगंपरिविध्यांगैःप्रसुप्तामत्तलोचना॥४२॥
भुजपाशांतरस्थेनकक्षगेनकृशोदरी॥पणवेनसहानिंद्यासुप्तामदकृतश्रमा॥४३॥डिंडिमंपरिगृह्यान्यातथैवासक्तडिंडिमा॥प्रसुप्ता
तरुणांवत्समुपगुह्येवभामिनी॥४४॥काचिदाडंवरंनारीभुजसंभोगपीडितं॥कृत्वाकमलपत्राक्षीप्रसुप्तामदमोहिता॥४५॥कल
शीमपविध्यान्याप्रसुप्ताभातिभामिनी॥वसंतेपुष्पशवलामालेवपरिमार्ज्जिता॥४६॥पाणिभ्यांचकुचौकाचित्सुवर्णकलशोपमौ॥उप
गुह्याबलासुप्तानिद्रावलमुपागता॥४७॥अन्याकमलपत्राक्षीपूर्णेंदुसदृशानना॥अन्यामालिंग्यसुश्रोणीनिद्रावशमुपागता॥४८॥
आतोद्यानिविचित्राणिपरिष्वज्यवरस्त्रियः॥निपीड्यचकुचैःसुप्ताःकामिन्यःकामुकानिव॥४९॥तासामेकांतविन्यस्तेशयानांशयनेशु
भे॥ददर्शरूपसंपन्नामथतांसकपिःस्त्रियं॥५०॥मुक्तामणिसमायुक्तैर्भूषणैःसुविभूषितां॥विभूषयंतीमिवचस्वश्रियाभवनोत्तमं॥५१॥

श्लिष्टंकृत्वा॥४५॥कलशीजलसंभृतामपविध्यपर्यस्यस्वपर्यस्तकलशोदकार्द्रशरीरानारीवसंतेपरिमार्जिताम्लानिपरिहारायकृतजलसेकापु
ष्पशवलाशवलपुष्पामालेवभाति॥४६॥४७॥४८॥आतोद्यानिवाद्यानि॥४९॥अथप्रधानमहिषीदर्शनंतासामितिएकांतविन्यस्तेतासांशयनात्

पृथग्विन्यस्तेतांस्त्रियंवक्ष्यमाणगुणांस्त्रियं॥५०॥५१॥

गौरींपीतामतस्त्वकनककवर्णाभाइत्योरावणस्यातिप्रियांत्रंतःपुरस्त्रीणांमीश्वरींकपिर्मंदोदरींददर्शेत्यन्वय॥५२॥तर्कयामाससंभावयामास॥कथरो
कांतेपरमसंचेत्र्यतिरूपायादर्शनात्प्रायेणायंसीतेतिसंभावनाहनूमतःतदेवाहरूपयौवनसंपदानत्वौचित्यालोचनंकृतवानितिभावः हर्षोमुख
विकासादिःआनंदोमानसः॥५३॥आनंदकार्यद्वाराहआस्फोटयामासेति आस्फोटपुच्छचुंबनादिजातिधर्मःजगामस्तंभानित्यनुकर्षःसर्वाअप्य

गौरीकनकवर्णाभामिष्टामंतःपुरेश्वरीं॥कपिर्मंदोदरींतत्रशयानांचारुरूपिणीं॥५२॥सतांदृष्ट्वामहाबाहुर्भूषितांमारुतात्मजः॥तर्क
यामाससीतेतिरूपयौवनसंपदा॥५३॥हर्षेणमहतायुक्तोननंदहरियूथपः॥५३॥आस्फोटयामासचुचुंबपुच्छंननंदचिक्रीडजगौजगा
म॥स्तंभानरोहन्निपपातभूमौनिदर्शयन्स्वांप्रकृतिंकपीनां॥५४॥इत्यार्षेश्रीमद्रामायणेसुंदरकांडेदशमःसर्गः॥१०॥अवधूय
चतांबुद्धिंबभूवावस्थितस्तदा॥जगामचापरांचिंतांसीतांप्रतिमहाकपिः॥१॥नरामेणवियुक्तासास्वप्तुमर्हतिभामिनी॥नभोक्तुंनाप्य
लंकर्तुंनपानमुपसेवितुं॥२॥नान्यंनरमुपस्थातुंसुराणामपिचेश्वरं॥नहिरामसमःकश्चिद्विद्यतेत्रिदशेष्वपि॥३॥अन्येयमितिनिश्चि
त्यभूयस्तत्रचचारसः॥पानभूमौहरिश्रेष्ठःसीतासंदर्शनोत्सुकः॥४॥

((निश्चेष्टाउपांश्चितेवोध्यंएवंचेष्टायांहेतुःस्वांकपीनांप्रकृतिंनिदर्शय
न्निति॥५४॥वामयान॥इतिरामाभिरामेसुंद०दशमःसर्गः॥१०॥अवधूयचतांबुद्धिंसीतासंभावनयाप्रवृत्तांकापेयविषयांबुद्धिंअवधूयत्यक्त्वा
अवस्थितःस्थिरतास्वभावेप्रतिष्ठितःसीतांप्रतितद्विषयामितरामन्यांचिंतांपूर्वचिंताविघटिकांजगाम॥१॥तामेवचिंतामभिनयतिनरामेणेति॥२॥
अन्यंनरंपुरुषमुपस्थातुमंगीकर्तुंनार्हतिनाध्यवस्यतिःतत्रहेतुर्नहिरामेति॥३॥यद्येवमतोऽन्येयमनुभूतेतिनिश्चित्यतत्रस्थेहेपानभूमौपानशालायां
चचारपुनःसम्यगन्वेषणायेतिशेषः॥४॥

अथ पानभूमौ दर्शनप्रकारः क्रीडितेनेति· क्रीडितेनाक्षादिक्रीडयाक्रान्ताः सत्यस्तथैव निद्रिता इति शेषः· विप्रहताः अतिनिद्रिताः स्त्रियो ददर्शेति शेषः ॥५॥ मुरजेषु मृदंगेषु चेलिकासु चेलिकावाद्यविशेषइत्याहुः तेषु प्रसक्ता एव संस्थिताः स्थिता एव निद्रिताः संविष्टाः [illegible] सुप्ताः ददर्शेति शेषः आकर्णो वा ॥६॥ रूपसल्लापशीलेन निद्रोद्भ्रमवशात्तस्यास्तस्या रूपविषयो यः संल्लापो वर्णनं तच्छीलेन युक्तं यथा भवति तथा गीतार्थस्य भाषणशीलेन ॥७॥ देशका

क्रीडितेनापराः क्लान्ता गीतेन च तथापराः ॥ नृत्येन चापराः क्लान्ताः पानविप्रहतास्तथा ॥५॥ मुरजेषु मृदंगेषु चेलिकासु च संस्थिताः । तथास्तरणमुख्येषु संविष्टाश्चापराः स्त्रियः ॥६॥ अंगनानां सहस्रेण भूषितेन विभूषणैः ॥ रूपसंल्लापशीलेन युक्तगीतार्थभाषिणा ॥७॥ देशकालाभियुक्तेन युक्तवाक्याभिधायिना ॥ रताधिकेन संयुक्तां ददर्श हरियूथपः ॥८॥ अन्यत्रापि वरस्त्रीणां रूपसंल्लापशायिनां ॥ सहस्रं युवतीनां तु प्रसुप्तं स ददर्श ह ॥९॥ देशकालाभियुक्तं तु युक्तवाक्याभिधायि तत् ॥ रताविरतसंसुप्तं ददर्श हरियूथपः ॥१०॥ तासां मध्ये महाबाहुः शुशुभे राक्षसेश्वरः ॥ गोष्ठे महति मुख्यानां गवां मध्ये यथा वृषः ॥११॥ स राक्षसेंद्रः शुशुभे ताभिः परिवृतः स्वयं ॥ करेणुभिर्यथारण्ये परिकीर्णो महाद्विपः ॥१२॥

॥लाभियुक्तेन· तद्विषयपरिज्ञानकुशलेन· युक्तवाक्यस्य देशकालोचितवाक्यस्याभिधानशीलेन· एतत्सर्वं निद्रोद्भ्रमवशादेव बोध्यं रताधिकेन उत्तमक्रीडावता संयुक्तां पानभूमिं ददर्श ॥८॥ अन्यत्रापीत्यादि श्लोकद्वयं नव्याः प्रामादान्न पठंति अन्यत्रापि पानभूमिभिन्ने रावणशयनगृहे बहिःस्थां पानभूमिं दृष्ट्वा पुनरभ्यंतरे शयनस्थाने आगम्यान्वेषणात् रूपविषयो यः सल्लापो वर्णनं· तत्पूर्वं शयानानां युवतीनां वरस्त्रीणां सहस्रमुच्यमानयुगं ददर्श· तत्पूर्वं दृष्टं रताविरतसंसुप्तं रतान्तेः विरतसुप्तं गाढसुप्तं ॥९॥१०॥ तासां मध्य इति ॥११॥ सइ

248

सस्त्रीकरावणगृहे पुनः सम्यगन्विष्य पुनर्बहिः पानभूमिमागत्य विचिनोति· सर्वकामैरिति· पूर्वन्तु मादिषु कृतन्तस्य स्त्रीमात्रदर्शनं· इदानीं तस्याः सर्वकामोपेतत्वदर्शनं ॥१३॥ तदेव प्रपंचयति मृगाणामिति ॥१४॥ पुनःपुनर्वराहादिमृगादिकथनं वक्षःस्थलवर्तितया भूयस्त्वप्रकाशनाय· वाध्रीणसः पक्षिविशेषः कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः स वै वाध्रीणसः प्रोक्त इति विश्वधर्मोक्तेः छागविशेषो वा· त्रिःपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिं वाध्रीणसं च तं प्राहुर्याज्ञिकाः श्राद्धकर्मणीति स्मृतेः मुखं कर्णौ च पानसमये जलं स्पृशन्ति यस्य सः त्रिःपिबः वाध्रीणसः खड्गमृग इति हलायुधः दध्ना सौवर्चलेन लवणविशेषेणाप्लुतान् संस्कृतान्

सर्वकामैरुपेतां च पानभूमिं महात्मनः ॥ ददर्श कपिशार्दूलस्तस्य रक्षःपतेर्गृहे ॥१३॥ मृगाणां महिषाणां च वराहाणां च भागशः ॥ तत्रन्यस्तानि मांसानि पानभूमौ ददर्श सः ॥१४॥ रौक्मेषु च विशालेषु भाजनेष्वप्यभक्षितान् ॥ ददर्श कपिशार्दूलो मयूरान्कुक्कुटांस्तथा ॥१५॥ वराहवाध्रीणसकान्दधिसौवर्चलायुतान् ॥ शल्यान्मृगमयूरांश्च हनूमानन्ववैक्षत ॥१६॥ क्रकलान्विविधान्छागान्शशकानर्धभक्षितान् ॥ महिषानेकशल्यांश्च मेषांश्च कृतनिष्ठितान् ॥१७॥ लेह्यानुच्चावचान्पेयान्भोज्यान्युच्चावचानि च ॥ तथाम्ललवणोत्तंसैर्विविधै रागषाडवैः ॥१८॥ महानूपुरकेयूरैरपविद्धैर्महाधनैः ॥ पानभाजनविक्षिप्तैः फलैश्च विविधैरपि ॥१९॥ ॥

॥१६॥ क्रकलक्रकरौ समौ पक्षिविशेषवाचकौ· एकशल्या मत्स्यविशेषाः· कृतनिष्ठितान्· कृतं निष्ठितं निष्ठानं पाको येषां तान् ॥१७॥ आम्लरसो लवणरसश्च उत्तंसौ जिह्वाजाड्यपरिहारकर्तारौ येषु भक्ष्यमाणेषु तैः रागषाडवैः सिता मध्वादि मधुरो द्राक्षादाडिमजो रसः विरलश्चेत्कृतो रागः सान्द्रश्चेत् षाडवः स्मृत इत्युक्तेः केशरादिभिः कृतवर्णाः षड्रसोपेताः पूपा रागषाडवा इत्यन्ये ॥१८॥ महाधनैर्वे

ऊम्लोः ॥१९॥

सुश्लिष्टैः सुकृतसंधिबंधैः ॥२०॥ उक्तैः सौवर्णैरत्नमयश्च शयनासनैः पानभूमिप्रदीप्तैर्वोपलक्ष्यते बहुप्रकारैः बहूपादानभेदैरतएवविविधैर्विविधरसवद्भिः वरसं-
स्कारैराग्श्रेष्ठसंस्कारकद्रव्ययोगेनसंस्कृतैः ॥२१॥ कुशलसंयुक्तैर्निपुणपाचकपक्वैर्मांसैः सहावसानपुराणाः सुरा ददर्श तत्रदिव्याः सुराः वृक्षेभ्यः कदंबादिभ्यः स्वतः
प्रादुर्भूताः कृताः सुराः शौंडिकैरुत्पादिताः ॥२२॥ कृतासुरावांतरभेदानाह शर्करासवेत्यादि· शर्करोपादानकश्चासवः मधूपादानो माध्वीकः द्राक्षोपादानक

कृतपुष्पोपहाराभूरधिकांपुष्यतिश्रियं ॥ तत्रतत्रचविन्यस्तैः सुश्लिष्टशयनासनैः ॥२०॥ पानभूमिर्विनावह्निंप्रदीप्तेवोपलक्ष्यते ॥ बहुप्रकारैर्वि-
विधैर्वरसंस्कारसंस्कृतैः ॥२१॥ मांसैःकुशलसंयुक्तैःपानभूमिगतैःपृथक् ॥ दिव्याःप्रसन्नाविविधाःसुराःकृतसुराअपि ॥२२॥ शर्करासवमाध्वीकाःपु-
ष्पासवफलासवाः ॥ वासचूर्णैश्चविविधैर्मृष्टास्तैस्तैःपृथक्पृथक् ॥२३॥ संततासुशुभेभूमिर्माल्यैश्चबहुसंस्थितैः ॥ हिरण्मयैश्चकलशैर्भाजनैः
स्फाटिकैरपि ॥२४॥ जांबूनदमयैश्चान्यैःकरकैरभिसंवृता ॥ राजतेषुचकुंभेषुजांबूनदमयेषुच ॥२५॥ पानश्रेष्ठांतथाभूमिंकपिस्तत्रददर्शह
सोपश्यच्छातकुंभानिसीधोर्मणिमयानिच ॥२६॥ तानितानिचपूर्णानिभाजनानिमहाकपिः ॥ क्वचिदर्धावशेषाणिक्वचित्पीतान्यशेषतः ॥२७॥
क्वचिन्नैवप्रपीतानिपानानिसददर्शह ॥ क्वचिद्भक्ष्यांश्चविविधान्क्वचित्पानानिविभागतः ॥२८॥

॥ इत्यस्य मधूकपुष्पादिजः पुष्पासवः खर्जूरफलादिजः
फलासवः वासचूर्णैः सुगंधद्रव्यचूर्णैः मृष्टाश्चाधिवासिताः इष्टा इति शेषः ॥२३॥ अथभूमिवर्णनं बहुषुदेशेषु संस्थितैर्माल्यैः संतता व्याप्ता भूमिः शुशुभे उ-
चमानविशेषणैः करकैर्घटैश्च संतता ॥२४॥ राजतादिषु कुंभेषु ॥२५॥ पानश्रेष्ठां संभृतप्रशस्तपानां सीधोर्मद्यस्य भाजनानीत्यन्वयः ॥२६॥ भाजना-
नि पानभाजनानि अर्धावशेषाणि अर्धावशिष्टपानानि पीतानि पीतासवानि ॥२७॥ नैवप्रपीतानि पूर्णासवान्येव पानानि पानभाजनानि विभागतः विभा-
गेन पानं ददर्श इदममुकमिदममुकमिति विभज्य ददर्शेत्यर्थः ॥२८॥

249

भूम्यानि पतिभूम्यानि अतएव परस्परं समाश्लिष्येति ॥ २९ ॥ अपहृत्य बलात् गृहीत्वा परस्य ग्राहस्य उपगम्य तच्छयनस्थानं प्राप्य तां वंपश्यन् विचचारे तिसंबंध ॥ ३० ॥ गात्रजं गात्रस्थं ॥ ३१ ॥ अथ पानभूमितोपि बाहिरागत्य तत्रास्थितपुष्पके प्रवृत्तिकाल इव निर्गमकालेपि वऊगंधो वायुरन्यास्त्वियथा तुम्हताइत्याह चंदनस्य चेत्यादि पानभूम्यादिकमपि पुष्पकस्थमेवेत्यन्ये सीधुमद्यं ॥ ३२ ॥ स्नानानां चंदनानामिति पाठे स्नानार्हचंदनानामित्यर्थः वि

क्वचिदर्धावशेषाणि पश्यन्वै विचचार ह ॥ शयनान्यत्र नारीणां भूम्यानि वऊधा पुनः ॥ परस्परं समाश्लिष्य काश्चित्सुप्ता वरांगनाः ॥ २९ ॥ काविच्चवस्त्रमन्यस्या अपहृत्यापरस्य च ॥ उपगम्याबला सुप्ता निद्राबलपराजिता ॥ ३० ॥ तासामुच्छ्वासवातेन वस्त्रं माल्यं च गात्रजं ॥ नात्यर्थं स्पंदते चित्रं प्राप्य मंदमिवानिलं ॥ ३१ ॥ चंदनस्य च शीतस्य सीधोर्मधुरसस्य च ॥ विविधस्य च माल्यस्य पुष्पस्य विविधस्य च ॥ ३२ ॥ वऊधा मारुतस्तस्य गंधं विविधमुद्वहन् ॥ स्नानानां चंदनानां च धूपानां चैव मूर्छितः ॥ ३३ ॥ प्रववौ सुरभिर्गंधो विमाने पुष्पके तदा ॥ श्यामावदातास्तत्रान्याः काश्चित्कृष्णा वरांगनाः ॥ ३४ ॥ काश्चित्कांचनवर्णांग्यः प्रमदा राक्षसालये ॥ तासां निद्रावशत्वाच्च मदनेन विमूर्छितं ॥ ३५ ॥ पद्मिनीनां प्रसुप्तानां रूपमासीद्यथैव हि ॥ एवं सर्वमशेषेण रावणांतःपुरं कपिः ॥ ३६ ॥ ददर्श स महातेजा न ददर्श च जानकीं ॥ ३७ ॥ निरीक्षमाणश्च ततस्ताः स्त्रियः स महाकपिः जगाम महतीं शंकां धर्मसाध्वसशंकितः ॥ ३८ ॥

((विधं गंधमुद्वहन् प्रववौ अतएव सुरभिर्गंधो विमाने मूर्छितो व्याप्तः ॥ ३३ ॥ तत्रान्याः बहिः प्रतिष्ठितपुष्पके इत्यर्थः ॥ ३४ ॥ राक्षसालये अंतरमध्यबहिः कक्षोपलक्षिते सर्वत्र ॥ ३५ ॥ निद्रावशत्वात् मदनेन तद्धेतुकरत्या च मूर्छितं क्लांतं तासां रूपं प्रसुप्तानां रात्रौ मुकुलितानां पद्मिनीनां नलिनीनां यथा रूपं तथैवासीत् एवंप्रकारेण ददर्श ॥ ३७ ॥ ततो निरीक्षमाणेन तरं नेक्षेत अन्यां परस्त्रियमिति शास्त्रस्मरणादि तिशेषः तदेवाह धर्मेति धर्मलोपनिमित्तं यत्साध्वसभयं तेन शंकितो भीत इत्यर्थ ॥ ३८ ॥

धर्मलोपं दर्शयति परदारावरोधस्य दारशब्दः स्त्रीसामान्यवाची अवरोधशब्दः स्वधर्मयुक्तकुलस्त्रीवाची प्रसुप्तस्येत्यनेन नग्नप्रायत्वं सूचितं तत्समये वसनानां विपर्यासात् ॥३९॥ मे दृष्टिः परदाराणामद्य यावत् विषयवर्तिनी न किंच परदारपरिग्रहस्तद्वानतिपापी रावणश्च दृष्टः तादृशदर्शनमपि धर्मलोपकारीति भावः ॥४०॥ अथ पुनर्विचारेणानन्दलोपबुद्धिरपुत्पन्नेत्याह तस्येति अन्या चिन्ता पूर्वचिन्ताविरोधिनी निश्चितेन प्रमाणप्रतिपन्नेन एः कान्ते सिद्धान्तेन तद्विषयज्ञानेन चित्तं यस्य सः अत एव सा चिन्ता कार्यनिश्चयदर्शिनी कर्तव्याकर्तव्यनिर्णयसमर्था ॥४१॥ तां चिन्तामभिनयति कामभिति वि

परदारावरोधस्य प्रसुप्तस्य निरीक्षणं ॥ इदं खलु ममात्यर्थं धर्मलोपं करिष्यति ॥३९॥ नहि मे परदाराणां दृष्टिर्विषयवर्तिनी ॥ अयं चात्र मया दृष्टः परदारपरिग्रहः ॥४०॥ तस्य प्रादुरभूच्चिन्ता पुनरन्या मनस्विनः ॥ निश्चितैकान्तचित्तस्य कार्यनिश्चयदर्शिनी ॥४१॥ कामं दृष्टा मया सर्वा विश्वस्ता रावणस्त्रियः ॥ न तु मे मनसा किंचिद्वैकृत्यमुपपद्यते ॥४२॥ मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ॥ शुभाशुभास्ववस्थासु तच्च मे सुव्यवस्थितम् ॥४३॥ नान्यत्र हि मया शक्या वैदेही परिमार्गितुं ॥ स्त्रियो हि स्त्रीषु दृश्यन्ते सदा संपरिमार्गणे ॥४४॥

श्वस्ता इतरालोकनशंकारहिताः वैकृत्यं विकारः स्वार्थे ष्यञ् नोपपद्यते न प्राप्नोति ॥४२॥ ननु किं तत्राह मनो हीति शुभाशुभास्ववस्थासु पुण्यपापकर्मसु इन्द्रियाणां प्रवर्तने मनो हेतुः मनसोऽसत्सदर्थे रागद्वेषतः इन्द्रियप्रवृत्तिर्हि पापाय इयं तु मम प्रवृत्तिर्न पापाय यतस्तन्मे मनः सुष्ठु व्यवस्थितं परदारेषु न रागवत् पुण्यपापव्यवस्थायां च तच्चित्तमेव साक्षीति भावः ॥४३॥ किंच राजाज्ञानुष्ठानरूपमेवकीय परमधर्मान्यथानुपपन्नापि न दोष इत्याह नान्यत्रेति तत्र हेतुः स्त्रियो हीति सदा संपरिमार्गणे मार्गणव्यवहारे लोकैरिति शेषः ॥४४॥ ॥ ॥

॥राम॥
॥३७॥

050

ष्ट्× तेन च जानकी ॥४६॥ देवगंधर्वकन्याश्च नागकन्याश्च वीर्यवान्। अवेक्षमाणो हनुमान्नैवापश्यत जानकीं ॥४७॥ तामपश्यन्कपिस्तत्र पश्यं×२ म्

सजातीयेष्वेव मार्गणं प्रसिद्धमित्याह यस्येति सत्वस्य प्राणिनः या योनिः या समानजातिः परिमार्गते लोक इति शेषः तत्रैवोपपत्तिमान शक्यमिति एतेन रा
वणादर्शनजोपि दोषः परिहृतः ॥४५॥४६॥४७॥ अपक्रम्य रावणांतःपुरं बहिः कक्षां त इति शेषः ॥४८॥ नासीनामन्यत्र विचेतुं प्रचक्रमे ॥४९॥ धावमा
नः ॥ इति श्रीरामाभिरामे॰ सुंद॰ एकादशः सर्गः ॥११॥ अथ व ऊडः रवचिंताकुलोऽन्विष्टमेव पुनः पुनरन्वेषयति स्मेत्याह स तस्येति तस्य भवनस्य

यस्य सत्वस्य या योनिस्तस्यां तत्परिमार्गते। न शक्यं प्रमदा नष्टा मृगीषु परिमार्गितुम् ॥४५॥ नदिदं मार्गितं तावच्छुद्धेन मनसा मया। रावणांतःपु
रं सर्वं दृश्यंथानावरस्त्रियः ॥ अपक्रम्य तदा वीरः प्रध्यातुमुपचक्रमे ॥४८॥ स भूयः सर्वतः श्रीमान्मारुतिर्यत्नमास्थितः। आपानभूमिमुत्सृ
ज्य तां विचेतुमुपचक्रमे ॥४९॥ इत्यार्षे श्रीमद्रामा॰ सुं॰ एकादशः सर्गः ॥११॥ स तस्य मध्ये भवनस्य संस्थितो लतागृहांश्चित्रगृहान्निशागृहान्। ज
गाम सीतां प्रतिदर्शनोत्सुको न चैव तां पश्यति चारुदर्शनां ॥१॥ स चिंतयामास ततो महाकपिः प्रियामपश्यन् रघुनंदनस्य तां। ध्रुवं न सीता ध्रियते य
थानमे विचिन्वतो दर्शनमेति मैथिली ॥२॥ सा राक्षसानां प्रवरेण वाला स्वशीलसंरक्षणतत्परा सती। अनेन नूनं प्रतिदुष्टकर्मणा हता भवेदार्य
पथे परे स्थिता ॥३॥ विरूपरूपा विकृता विवर्चसो महानना दीर्घविरूपदर्शनाः। समीक्ष्य ता राक्षसराजयोषिता भयाद्विनष्टा जनकेश्वरात्मजा ॥४॥

रावणभवनस्य निशागृहं रात्रिनिवासगृहं तान् विचेतुं जगाम ॥१॥ न ध्रियते न जीवति स्म ध्रुवं नु सीता म्रियत इति क्वचित्पाठः तत्र हेतुर्यथेति यत इत्यर्थ
: ॥२॥ स्वशीलं पातिव्रत्यं प्रतिदुष्टकर्मणा प्रतीष्टं दुष्टं कर्म यस्य तेन सकलसज्जनानर्थकारिणेत्यर्थः आर्यपथे आर्याणां पतिव्रतानां मार्गे ॥३॥ रावणास्या
नुरागान् स्त्रीवधदोषाद्धानद्वधः प्रच्छन्नो वापि स्वयमेव भयान्नष्टेत्याह विरूपेति दीर्घाणि विरूपाणि दर्शनानि यासां ताः दीर्घपदेन कर्मधारयो वा राक्षसराज
योषितः नराज्ञाकारिणी ॥४॥

पौरुषंसमुद्रलंघनरूपपराक्रमसाध्यंउयोजनंकालंविहृत्यसुग्रीवकृतंकालमतिक्रम्यसुग्रीवसमीपंगम्यतेययासागतिःमार्गोनास्तितत्रहेतुःसुतीः
क्ष्णोति॥५॥६॥अस्तुसुग्रीवसमीपगमनवानो·अंगदादिसमीपगमनमपिदुर्लभमित्याह किंन्विति·किन्नुवक्ष्यतीतिचिंताकृत्वापुनर्विचार्ययद्वक्तव्यंत
त्त्वयमेवानुवदन्तिगात्वेत्यादि·वदस्वइतिवक्ष्यतीत्यर्थः॥७॥किंप्रवक्ष्यामितान्प्रतीतिशेषःनकिमपीत्यर्थःयदेवमतोध्रुवमिति·कालस्यसुग्रीवकल्पि

सीतामदृष्ट्वाह्यनवाप्यपौरुषंविहृत्यकालंसहवानरैश्चिरं॥नमेस्तिसुग्रीवसमीपगागतिःसुतीक्ष्णदंडोबलवांश्चवानरः॥५॥दृष्टमंतःपुरं
सर्वंदृष्टाराक्षसयोषितः॥नसीतादृश्यतेसाध्वीवृथाजातोममश्रमः॥६॥किन्नुमांवानराःसर्वेगतंवक्ष्यंतिसंगताः॥गत्वातत्रत्वयावीरकिं
कृतंतद्वदस्वनः॥७॥अदृष्ट्वाकिंप्रवक्ष्यामितामहंजनकात्मजां॥ध्रुवंप्रायमुपासिष्येकालस्यव्यतिवर्तने॥८॥किंवावक्ष्यतिवृद्धश्चजांब
वानंगदश्चसः॥गतंपारंसमुद्रस्यवानराश्चसमागताः॥९॥अनिर्वेदःश्रियोमूलमनिर्वेदःपरंसुखं॥भूयस्तत्रविचेष्यामिनयत्रविचय
ःकृतः॥१०॥अनिर्वेदोहिसततंसर्वार्थेषुप्रवर्तकः॥करोतिसफलंजंतोःकर्मयच्चकरोतिसः॥११॥तस्मादनिर्वेदकरंयत्नंचेष्टेहमुत्तमं
अदृष्टांश्चविचेष्यामिदेशान्रावणपालितान्॥१२॥आपानशालाविचितास्तथापुष्पगृहाणिच॥चित्रशालाश्चविचिताभूयःक्रीडागृहा
णिच॥१३॥निष्कुटांतररथ्याश्चविमानानिचसर्वशः॥इतिसंचिंत्यभूयोपिविचेतुमुपचक्रमे॥१४॥

((तस्यव्यतिवर्तनेऽतिक्रमे॥८॥किंवावक्ष्यति
मांधिक्करिष्यन्तीत्यर्थःसमागतामिलिताअन्येवानराश्चाधिक्करिष्यंति॥९॥एवंक्षणमात्रंनिर्विद्यपुनरुत्साहमवलंब्याहअनिर्वेदइति·निर्वेदःकर
णीयामस्प्रवृत्तिवैमुख्यंतदभावउत्साहः॥१०॥यत्कर्मसकरोतितत्कर्मसफलंकरोति॥११॥अनिर्वेदकरंउत्साहजननंयत्नंविचयस्थैर्यंचेष्टेकरोमि॥१२॥

॥१३॥निष्कुटांतररथ्याःगृहाराममध्यगतावीथ्यःविमानानिपुष्पकादी

251

भूमीगृहान्भूविलगृहान् गृहातिगृहकाः गृहोपरिगृहा इति कतकः गृहानन्तीत्यान्तिद्वरे स्वैरविहारार्थनिर्मितगृहा इति तीर्थः विचेतुमुपचक्रमे इत्यनुक
र्षः उत्पतन् उन्नतमारुहन् निपतनमवरोह ॥१५॥ निष्पतनं निष्क्रमणं स्ववघटनं संवरणं ॥१६॥ यं स कपिर्न जगाम स तादृशश्चतुरंगुलमात्रोप्यवका

भूमीगृहांश्चैत्यगृहान्गृहातिगृहकानपि ॥ उत्पतन्निपतंश्चापि तिष्ठन्गच्छन्पुनः क्वचित् ॥१५॥ अपावृण्वंश्च द्वाराणि कपाटान्यवघट्टय
न् ॥ प्रविशन्निष्पतंश्चापि प्रपतन्नुत्पतन्निव ॥१६॥ सर्वमप्यवकाशं स विचचार महाकपिः ॥ चतुरंगुलमात्रोपि नावकाशः स विद्यते ॥ राव
णान्तःपुरे तस्मिन्यं कपिर्न जगाम सः ॥१७॥ प्राकारान्तरवीथ्यश्च वेदिकाश्चैत्यसंश्रयाः ॥ श्वभ्राश्च पुष्करिण्यश्च सर्वं तेनावलोकितं ॥१८॥ रा
क्षस्यो विविधाकारा विरूपा विकृतास्तथा ॥ दृष्टा हनूमता तत्र न तु सा जनकात्मजा ॥१९॥ रूपेणाप्रतिमा लोके परा विद्याधरस्त्रियः ॥ दृष्टा ह
नुमता तत्र न तु राघवनंदिनी ॥२०॥ नागकन्या वरारोहाः पूर्णचंद्रनिभाननाः ॥ दृष्टा हनूमता तत्र न तु सा जनकात्मजा ॥२१॥ प्रमथ्य राक्ष
सेंद्रेण नागकन्या बलाद्धृताः ॥ दृष्टा हनूमता तत्र न सा जनकनंदिनी ॥२२॥ सोपश्यंस्तां महाबाहुः पश्यंश्चान्या वरस्त्रियः ॥ विषसाद महाबा
हुर्हनुमान्मारुतात्मजः ॥२३॥ उद्योगं वानरेंद्राणां प्लवनं सागरस्य च ॥ व्यर्थं वीक्ष्यानिलसुतश्चिंतां पुनरुपागतः ॥२४॥ अवतीर्य विमाना
च्च हनूमान्मारुतात्मजः ॥ चिंतामुपजगामाथ शोकोपहतचेतनः ॥२५॥

॥शो न विद्यते ॥१७॥ प्राकारान्तरवीथ्यः प्राकारमध्यवर्तिमंत्रिकुमारादिगृ
हवीथ्यः चैत्यश्चतुष्पथवर्तिवृक्षः श्वभ्राः गर्ताः ॥१८॥ १९ ॥ राघवनंदिनी रामप्रिया ॥२०॥ २१ ॥ प्रमथ्य नागकन्या बलाद्धृता इत्यनेन वंदीकृतानां ग्रहणात्पू
र्वोक्तानां नागकन्यानां ग्रहणमिति न पुनरुक्तिः ॥२२॥ २३ ॥ २४ ॥ अवतीर्य विमानाच्चेति पुनरारुह्यावरुह्य चेत्यर्थः विमानेष्वेव तस्य सर्वदर्शनमिति तत्त्वं ॥२ ॥

मिरमानः ॥ इतिश्रीरामाभिरामे॰रा॰ति॰सुंद॰द्वादशःसर्गः ॥१२॥ वेगवान्हनूमान्विमानात्प्राकारंसंक्रम्यघनान्तरेतथाविद्युत्सशोभाआसीत्तथासीत्
प्राकारस्थेंद्रनीलकृतत्वमनेनध्वन्यते ॥१॥ रावणस्यनिवेशनान्तस्थान्संपरिक्रम्यपुनःपरिक्रमणानन्तरंदृष्ट्वाजानकीवादृष्ट्वाअब्रवीत्आत्मनैवेतिवो
ध्यं ॥२॥ भूयिष्ठंलोलितावज्रशोन्विष्टा ॥३॥४॥ तत्तदनुपलब्धिप्रमाणाद्भावनिश्चयस्यैवास्त्वतआहइहेति· रावणनिवेशनेष्वेवाख्यातात्द्वचश्चप्रमा

इत्यार्षेश्रीमद्रामायणेसुंदरकांडेद्वादशःसर्गः ॥१२॥ विमानात्तुससंक्रम्यप्राकारंहरियूथपः ॥ हनूमान्वेगवानासीद्यथाविद्युत्घनांतरे ॥१॥
संपरिक्रम्यहनुमान्रावणस्यनिवेशनात् ॥ अदृष्ट्वाजानकींसीतामब्रवीद्वचनंकपिः ॥२॥ भूयिष्ठंलोलितालंकारामस्यचरताप्रियं ॥ नहिपश्या
मिवैदेहींसीतांसर्वांगशोभनां ॥३॥ पल्वलानितटाकानिसरांसिसरितस्तथा ॥ नद्योन्यपवनांताश्चदुर्गाश्चधरणीधरा ॥४॥ लोलितावसुधा
सर्वानचपश्यामिजानकीं ॥ इहसंपातिनासीतारावणस्यनिवेशने ॥ आख्यातागृध्रराजेननचसादृश्यतेनुकिं ॥५॥ किंनुसीताथवैदेहीमैथि
लीजनकात्मजा ॥ उपतिष्ठेतविवशारावणेनहृताबलात् ॥६॥ क्षिप्रमुत्पततोमन्येसीतामादायरक्षसः ॥ विभ्यतोरामबाणानामंतराप
तिताभवेत् ॥७॥

एणांदृश्यतेनुनकिमिदमिति ॥५॥ बहुप्रकारंचिंतयतिकिंन्विति। पूर्वंदृष्टामंदोदरीसौंदर्यादिगुणैःपुनःसीतात्वेनसंभा
व्यतत्रिरासकवाक्यंरावणेनबलात्हृताविवशासतीसीताउपतिष्ठेतरावणमितिशेषःरावणाद्दृष्वारिणामितिपाठेतुयथाश्रुतमेवइदंकिंतुकस्मिंत
नुयतःसामैथिलीसासीतालांगलपद्धतिजत्वेनायोनिजावैदेहीजगत्प्रशस्ताविदेहवंशसंबद्धाजनकात्मजावृत्तविभुत्वा ॥६॥ तर्ह्यदर्शनेकुतस्तत्राह
नूनंत्वेक्षतेक्षिप्रमिति· एतेपक्षाःदुःखानिशयात्संपातिवचनविस्मरणान्मूलकाः· विभ्यतःकारणात्स्पष्टेतिशेषःरामबाणानामाघातादितिशेषःशे

२ [illegible]

रामपरोक्षंतथाभयायोगात्यक्षांतरमथवेतिहृदयंपतितंमनउत्क्रांतंमनउत्क्रमणस्यैवमरणात्वात्॥८॥९॥पीडितेनपीडनेनविवेष्टमानाविलु
ठती॥१०॥ननुसर्वमेतदसंभावितंरावणेनसर्वापायरहितंहरणस्यमत्करत्वादतःपक्षांतरमाह अहोइति अथवेत्यर्थः॥११॥ननुवज्रभक्षणासाम
ग्रीवत्वादनुरागवत्वाच्चतेनभक्षणमसंभावितमतआह अथवेति सापत्युःदुःखादितिभावः॥१२॥एतदुत्तरश्लोकद्वयंसंपूर्णचंद्रेत्यादिप्रक्षिप्तमिति

अथवाह्रियमाणायाःपथिसिद्धनिषेविते॥मन्येपतितमार्यायाहृदयंप्रेक्ष्यसागरे॥८॥रावणस्योरुवेगेनभुजाभ्यांपीडितेनच॥तयामन्ये
विशालाक्ष्यात्यक्तंजीवितमार्यया॥९॥उपर्युपरिसानूनंसागरंक्रमतस्तदा॥विवेष्टमानापतितासमुद्रेजनकात्मजा॥१०॥अहोक्षुद्रेण
चानेनरक्षंतीशीलमात्मनः॥अबंधुर्भक्षितासीतारावणेनतपस्विनी॥११॥अथवाराक्षसेंद्रस्यपत्नीभिरसितेक्षणा॥अदुष्टादुष्टभावा
भिर्भक्षितासाभविष्यति॥१२॥संपूर्णचंद्रप्रतिमंपद्मपत्रनिभेक्षणं॥रामस्यध्यायतीवक्त्रंपंचत्वंकृपणागता॥१३॥हारामलक्ष्मणेत्येवं
हायोध्येतिचभामिनी॥विलप्यवह्वैदेहीन्यस्तदेहाभविष्यति॥अथवानिहितामन्येरावणस्यनिवेशने॥भृशंलालप्यतेबालापंजरस्येवशारिका
१३॥जनकस्यकुलेजातारामपत्नीसुमध्यमा॥कथमुत्पलपत्राक्षीरावणस्यवशंव्रजेत्॥१४॥विनष्टावाप्रनष्टावामृतावाजनकात्मजा॥रामः
स्यप्रियभार्यस्यननिवेदयितुंक्षमं॥१५॥

॥कनक॥१३॥ननुसपत्नीभिरप्यशक्यंभक्षणंरावणेनस्वभोगार्थमानीतत्वादतआह अथवेति
निहितापुत्रतयास्यापिनाशइतिमन्ये॥नायमपिपक्षोयुक्तइत्याह एवमपिसाबालापंजरस्थाशारिकेवभृशंमुहुर्मुहुः रामेतिलालप्यतेलालप्यतेनवनद
रूपतेइतिभावः॥१३॥ननुतर्हिरावणसमीपएवभवेत्संपातिवचनप्रामाणात्मयातुसम्यक्नान्विष्टमित्याशंक्याह जनकस्येति तस्मादेतदप्ययुक्त

मितिभाव॥१४॥१५॥

१६ ॥ नन्वनेनविचारेणालंयथातुभूतंनिवेद्यतांतत्राह·विनष्टेति·अस्यकश्चिद्धन्तेनइतिशेषः राक्षसैश्चदर्शनइतिवान्वयानुसारादहृष्टासती ॥ कश्चिदसीतिव
क्तुमशक्यमक्षमंसर्वेणान्विष्टत्वात् प्रनष्टापगमनेनष्टमदर्शनंयस्याःसादृष्टेत्यर्थः एतदपिनवक्तुंक्षमंस्वयमदृष्टत्वात् एवंमृतेत्यपिवक्तुंनशक्यंत
साधकदृढतरप्रमाणाभावात् तस्माद्रामस्याग्रेकिमपिवक्तुंनशक्यं दूरदेशमायया‌ऽदर्शनविनाशः अदृश्यदेशेऽवस्थापनप्रणाशइतितुतीर्थः ॥
१५ ॥ तदेवस्पष्टयति·निवेद्यमानेति·नदृष्टेति·निवेद्यमानेदोषोवक्ष्यमाणरामप्राणत्यागरूपः अनिवेदनेस्वामिवचनातुरूपोदोषः तस्मान्निवेदनानि

निवेद्यमानेदोषःस्याद्दोषःस्यादनिवेदने॥ कथंनुखलुकर्तव्यंविषमंप्रतिभातिमे॥१६॥ अस्मिन्नेवंगतेकार्येप्राप्तकालंक्षमंचकिं॥ भवेदि
तिमतिंभूयोहनूमान्प्रविचारयन्॥१७॥ यदिसीतामदृष्ट्वाहंवानरेन्द्रपुरीमितः। गमिष्यामिततःकोमेपुरुषार्थोभविष्यति॥१८॥ ममेदंलं
घनंव्यर्थंसागरस्यभविष्यति॥ प्रवेशश्चैवलंकायाराक्षसानांचदर्शनम्॥१९॥ किंवावक्ष्यतिसुग्रीवोहरयोवापिसंगताः॥ किष्किंधामनुसंप्राप्
तौवादशरथात्मजौ॥२०॥ गत्वातुयदिकाकुत्स्थंवक्ष्यामिपरुषंवचः॥ नदृष्टेतिमयासीताततस्त्यक्ष्यतिजीवितं॥२१॥ परुषंदारुणंतीक्ष्णंक्रूर
मिंद्रियतापनं॥ सीतानिमित्तंदुर्वाक्यंश्रुत्वासननभविष्यति॥२२॥

॥वेदनरूपमुभयमपिविषमंदुरनुष्ठेयंप्रतिभाति॥१६॥ एतदनंतरंकविवाक्यम
स्मिन्निति·कार्येएवंगतेसतिदुर्निरूपेसतीत्यर्थः प्राप्तकालंकालोचितंकिंक्षमंकिंवक्तुंयुक्तंभवेदितिभूयोमतिंतद्विषयंपक्षंविचारयन्नभूदितिशेषः॥१७
विचारमेवप्रपंचयतियदीति·कोभविष्यति·नकोपीत्यर्थः॥१८॥१९॥ वक्ष्यति अस्मास्वेववक्ष्यतीत्यर्थः॥२०॥ नदृष्टेत्यप्रियंयदिवक्ष्यामिततस्तच्छ्रवणा
नंतरं॥२१॥ परुषंकर्णकठोरं·अतएवदारुणंभयंकरंतीक्ष्णंमर्मस्पृक्क्रूरमुग्रं इंद्रियाणांतापनंसंतापकं सीतानिमित्तंसीताविषयंसरामः॥२२॥

२३॥२४॥२५॥ततःदिवस्थरामदर्शनात्॥२६॥२७॥वालिजेनवालिमरणजेनपंचत्वमागतापंचत्वेणाकृतनिश्चयवती॥२८॥तस्मात्तदनंतरं॥२९॥३०॥यशस्विः

तंतुकच्छ्रगतंदृष्ट्वापंचत्वगतमानसं॥भृशानुरक्तोमेधावीनभविष्यतिलक्ष्मणः॥२३॥विनष्टौभ्रातरौश्रुत्वाभरतोपिमरिष्यति॥भरतंचमृतंदृ
ष्ट्वाशत्रुघ्नोनभविष्यति॥२४॥पुत्रान्मृतान्समीक्ष्याथनभविष्यंतिमातरः॥कौशल्याचसुमित्राचकैकेयीचनसंशयः॥२५॥कृतज्ञःसत्यसंधश्च
सुग्रीवःप्लवगाधिपः॥रामंतथागतंदृष्ट्वाततस्त्यक्ष्यतिजीवितं॥२६॥दुर्मनाव्यथितादीनानिरानंदातपस्विनी॥पीडिताभर्तृशोकेनरुमात्यक्ष्य
तिजीवितं॥२७॥वालिजेनतुदुःखेनपीडिताशोककर्षिता॥पंचत्वमागताराज्ञीतारापिनभविष्यति॥२८॥मातापित्रोर्विनाशेनसुग्रीवव्यसने
नच॥कुमारोप्यंगदस्तस्माद्विजहिष्यतिजीवितं॥२९॥भर्तृजेनतुदुःखेनअभिभूतावनौकसः॥शिरांस्यभिहनिष्यंतितलैर्मुष्टिभिरेवच॥३०॥
सांत्वेनानुप्रदानेनमानेनचयशस्विना॥लालिताःकपिनाथेनप्राणांस्त्यक्ष्यंतिवानराः॥३१॥नवनेषुनशैलेषुननिरोधेषुवापुनः॥क्रीडामनु
भविष्यंतिसमेत्यकपिकुंजराः॥३२॥सपुत्रदाराःसामात्याभर्तृव्यसनपीडिताः॥शैलाग्रेभ्यःपतिष्यंतिसमेषुविषमेषुच॥३३॥विषमुद्बंध
नंवापिप्रवेशंज्वलनस्यवा॥उपवासमथोशस्त्रंप्रचरिष्यंतिवानराः॥३४॥घोरमारोदनंमन्येगतेमयिभविष्यति॥इक्ष्वाकुकुलनाशश्चना
शश्चैववनौकसां॥३५॥सोहंनैवगमिष्यामिकिष्किंधांनगरीमितः॥नहिशक्ष्याम्यहंद्रष्टुंसुग्रीवंमैथिलींविना॥३६॥मय्यगच्छतिचेहस्थेधर्मा
त्मानौमहारथौ॥आशयातौधरिष्येतेवानराश्चतरस्विनः॥३७॥

॥नाकपिनाथेनसांत्वादिभिर्लालिताःप्राणांस्त्यक्ष्यंति॥३१॥निरोधेषुगृहादिसंवृत
देशेषु॥३२॥सपुत्रदाराइत्यादेःकपिकुंजराइतिविशेष्यं॥३३॥शस्त्रंशस्त्रघातंप्रचरिष्यंतिकरिष्यंति॥३४॥३५॥३६॥अगच्छतिगमनरहिते॥३७॥

आशयासीतावृत्तांतश्रवणप्रत्याशया धरिष्येतेप्राणानितिशेषः ॥३७॥ हस्तादानः हस्तपतितफलादिग्राहकस्तद्भोजीतियावत् एवंमुखादानोऽपु
खपतितभोजी नियतोनियमेंद्रियः वृक्षमूलिकोवृक्षमूलनिवासी ॥३८॥ अरणीसुतमग्निं ॥३९॥ उपविष्टस्यप्रायमुपविष्टस्यलिंगिनःप्राणलिं
गिनंलिंगशरीरवंतंवा आत्मानंसाधयिष्यतःशरीरेणविसर्जयिष्यतः लिंगिनोमितिपाठेप्राणलिंगिनोविनितिचैतन्यमित्यर्थः ॥४०॥ इदंवक्ष्यमा
णाग्राः अपदइत्यर्थः ॥४१॥ सीतामपश्यतोममयशस्विनीयशःसंपादिकामृतस्यख्यातिर्येषां सुजातम्मूलासुजातकारणवतीकीर्तिरूपामालाजीव

हस्तादानोमुखादानोनियतोवृक्षमूलिकः ॥ वानप्रस्थोभविष्याम्यदृष्ट्वाजनकात्मजां ॥३८॥ सागरानूपजेदेशेवहुमूलफलोदके ॥ वि
तिंकृत्वाप्रवेक्ष्यामिसमिद्धमरणीसुतं ॥३९॥ उपविष्टस्यवासम्यक्लिंगिनंसाधयिष्यतः ॥ शरीरंभक्षयिष्यंतिवायसाःश्वापदानिच
४०॥ इदमप्यृषिभिर्दृष्टंनिर्याणमितिमेमतिः ॥ सम्यगापःप्रवेक्ष्यामिनचेत्पश्यामिजानकीम् ॥४१॥ सुजातमूलासुभगाकीर्तिमालाय
शस्विनी ॥ प्रभग्नाचिररात्रायममसीतामपश्यतः ॥४२॥ तापसोवाभविष्यामिनियतोवृक्षमूलिकः ॥ नेतःप्रतिगमिष्यामितामदृष्ट्वासिते
क्षणां ॥४३॥ यदितःप्रतिगच्छामिसीतामनधिगम्यतां ॥ अंगदःसहितःसर्वैर्वानरैर्नभविष्यति ॥४४॥

॥तःसाकीर्तिःचिररात्रायेत्यव्ययंचिरायेत्य
र्थः चिरायभग्नात्यात्यंतिकलयंगतेत्यर्थः तीर्थस्तु चिररात्रीयंममेतिपाठंप्रकल्प्य सीतान्वेषणोपयुक्तत्वेनशोभनमूलासीतान्वेषणसौकर्यापाद
कचंद्रिकयासुभगासीतान्वेषणसहकारिणीतिसर्वैः क्रियमाणाकीर्तिरेवमालायस्याः सेयंचिररात्रीचिरकालविशिष्टादीर्घरात्रिःस्वस्यलंकाप्रवेशरा
त्रिःप्रभग्नानिष्फलाजातेत्यर्थः अनेनरामकार्यसहकारिणीस्वेच्छयारात्रिरप्यात्मानंवर्धितवतीतिसूचनइत्याह ॥४२॥ तापसःजटाकाषायादिचिह्नोय
तिः ॥४३॥ अदृष्ट्वागमनेनिश्चितमासन्नंदोषमाह यदित्विति नभविष्यति नजीविष्यति ॥४४॥

एवमगमनेनिश्चितेमरणाज्जीवितयोः किंश्रेयस्तत्राह विनाशइति दोषाः बहवः प्रागुक्ताः चिरंमदगमनेसीताविनाशनिश्चयेनरामादयोनस्युरेवआत्मघात
दयश्चजीवं स्तुमस्मान्माभद्रकंप्राप्नोति वक्ष्यमाणनानाविधोपायाश्रयणेन तस्मात्प्राणान्धरिष्यामियतोमयिजीवतिसतिसंगमः सुखसंगमोरामादीनां
ध्रुवः संभावितइत्यर्थः काव्यलिंगमत्रालंकारः तीर्थस्तत्रजीवितसंगमइतिपाठंकल्पयामास ॥४५॥ इतः परंकविवाक्यं एवमित्यादि ॥४६॥ कपिकुंजर
इत्यस्यइति चिंतयामासेतिशेषः ध्रुवोजीवितसंगमइत्युक्तेराशयंहनूमानाह रावणंवेति ॥४७॥ ननुरावणवधेनकिंसाधितंस्यात्तत्राह प्रत्याचीर्णावैरनि

विनाशेबहवोदोषाजीवन्प्राप्नोतिभद्रकं ॥ तस्मात्प्राणान्धरिष्यामिध्रुवोजीवितिसंगमः ॥४५॥ एवंबहुविधंदुःखंमनसाधारयन्मुहुः नाध्यगच्छत्त
दापारंशोकस्यकपिकुंजरः ॥४६॥ ततोविक्रममासाद्यधैर्यवान्कपिकुंजरः ॥ रावणंवावधिष्यामिदशग्रीवंमहाबलं ॥४७॥ काममस्तुहृतासीता
प्रत्याचीर्णंभविष्यति ॥४८॥ अथवैनंसमुत्क्षिप्यउपर्युपरिसागरं ॥ रामायोपहरिष्यामिपशुंपशुपतेरिव ॥४९॥ इतिचिंतांसमापन्नःसीतामनधि
गम्यतां ॥ ध्यानशोकपरीतात्माचिंतयामासवानरः ॥५०॥ यावत्सीतांनपश्यामिरामपत्नींयशस्विनीं ॥ तावदेतांपुरींलंकांविचिनोमिपुनःपुनः
॥५१॥ संपातिवचनाच्चापिरामंयद्यानयाम्यहं ॥ अपश्यन्राघवोभार्यांनिर्दहेत्सर्ववानरान् ॥५२॥

((र्यातनंकृतंभविष्यतीत्यर्थः एवंकृत्वागमनेसर्वेषांसुखमि
त्याशयः ॥४८॥ ननुमयाहृतइतीदंवचोऽविश्वनीयंस्यात्सीताऽलाभेनरामदुःखानिवृत्तिः श्रेयस्ततः पक्षांतरमथवेति एवंसति तल्लाभोपिसंभाव्यतइत्याशयः ॥४९॥
रावणस्यवधानयनेपिसीतांराक्षसाहन्युरितितदलाभएवेत्यतः शोकपरीतः पक्षांतरंचिंतयामास यावत्सीतामितिवर्त्तमानसमीपेलट् ॥५०॥ ५१ ॥ ननुत्वत्रा
वस्थितिनिश्चयेपुनःपुनरन्वेषणंसफलंस्यात्तत्राह संपातिवचनादिति तद्वचनविश्वासादेवेत्यर्थः ननुतत्पक्षप्ररोहान्निश्चितंप्रमाणंननुतद्वचनविश्वासादेवरा

मप्राप्तिसीतात्रास्तीत्युक्त्वाशीघ्रमेवात्रानेयः किमनेनकालविलंबेनेत्यत्राह
रामंयदीति रावणेनहृतेपि मयैवरामेणापि तददर्शनेरामः सर्ववानरनाशंकरिष्य
तीतिभावः ॥५२॥

तस्मादिहैव नियताहारो वत्स्यामि· विनश्येयुः सीतामदृष्ट्वा मद्गमनानंतरमितिभाव॥५३॥एवंचिंताकुलोनन्विष्टदेशंदृष्ट्वा संपातिवचनात्तत्र सीतास्थितिंनि
श्चिन्वानस्त्वाह·शोकेति॥५४॥तत्राप्यप्राप्तिशंकया तद्दर्शनप्रतिबंधकदुरितक्षयाय देवानुकूल्यं संपादयति· वसूनिति चाडामादीन्॥५५॥तपस्विनोसि
द्धीमिव तपःफलमिव तपःप्रसन्नादेवतेतिशेषः॥५६॥चिंतया वियथितानि संबद्धानि व्याकुलानि इंद्रियाणि यस्य सः॥५७॥प्रतिज्ञानंतरनमस्कारमत्त्वातिष्ठति

इहैव नियताहारो वत्स्यामि नियतेंद्रियः॥ न मत्कृते विनश्येयुः सर्वे ते नरवानराः॥५३॥अशोकवनिका चापि महतीयं महाद्रुमा॥इमामधिगमि
ष्यामि नहीयं विचिता मया॥५४॥वसून्रुद्रांस्तथादित्यानश्विनौ मरुतोपि च॥नमस्कृत्वा गमिष्यामि रक्षसां शोकवर्द्धनः॥५५॥जित्वा तु राक्षसा
न्देवीमिक्ष्वाकुकुलनंदिनीं॥संप्रदास्यामि रामाय सिद्धीमिव तपस्विने॥५६॥स मुहूर्त्तमिव ध्यात्वा चिंतावियथितेंद्रियः॥उदतिष्ठन्महाबाहुर्हनु
मान्मारुतात्मजः॥५७॥नमोस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै॥नमोस्तु रुद्रेंद्रयमानिलेभ्यो नमोस्तु चंद्राग्निमरुद्गणेभ्यः॥५८॥
स तेभ्यस्तु नमस्कृत्वा सुग्रीवाय च मारुतिः॥दिशः सर्वाः समालोक्य सोशोकवनिकां प्रति॥५९॥स गत्वा मनसा पूर्वमशोकवनिकां शुभां॥उत्त
रं चिंतयामास वानरो मारुतात्मजः॥६०॥ध्रुवं तु रक्षोबहुला भविष्यति वनाकुला॥अशोकवनिका पुण्या सर्वसंस्कारसंस्कृता॥६१॥ ॥

नमोस्तु रामायेति· अनेन रामस्य भगवदवतारत्वं सूचितं रुद्रादिनमस्कारेणाविराजो भगवतो नतिः॥५८॥स्वामित्वात्स्वयंज्ञात्वा च सुग्रीवनतिः अशोकवनि
कांगतः मनसेति शेषः अशोकवनिकां प्रतीति पाठे गत इत्यध्याहारः उत्तरं गमनोत्तरकर्तव्यकृत्यं॥५९॥६०॥चिंताहेतुं दर्शयति ध्रुवमिति वनाकुलाकानना
वृता संस्कारः खननसेकादिरूपवृक्षसंस्कारः अत्र ध्रुवं रक्षोबहुलेत्युत्प्रेक्षया वडास्तः सूचितः अन्यथा तत्प्रकाशेन निश्चय एव स्यात्॥६१॥ छ ॥

Nepal Sanskrit University, Bâlmeeki Campus, Kathmandu

अत्राशोकवनिकायांविहितानिद्रुक्ताःविश्वात्मावायुः॥ ६२॥ मयात्माशरीरमित्यर्थःरावणस्यचअर्थेहनुमत्कर्मःरावणाकर्तृकदर्शनपरिहारायेत्यर्थः ६३
पुनःसर्वात्मनाकार्यसिद्धयेस्मरतिब्रह्मेत्यादिदेवाभगवद्वयवदेवाःतानेवदर्शयति अग्निश्चेत्यादिसिद्धिंदिशन्त्वित्यन्वयः ६४ ६५ भूतानांप्र
भुःप्रजापतिःदास्यंतितेषामप्यस्यार्थस्येष्टत्वादितिभावःपूर्वंप्रार्थनाइदानींतुमन्निश्चयःपथिगोचराअदृष्टाअपिपथिमार्गेगोचरत्वेनासिद्धिंदत्वेन

रक्षिणश्चात्रविहितान्नूनंरक्षंतिपादपान्॥ भगवानपिविश्वात्मानातिक्षोभंप्रवात्यसौ॥ ६२॥ संक्षिप्तोयंमयात्माचरामार्थेरावणस्यच॥ सिद्धिं
दिशंतुमेसर्वेदेवाःसर्षिगणास्त्विह॥ ६३॥ ब्रह्मास्वयंभूर्भगवान्देवाश्चैवतपस्विनः॥ सिद्धिमग्निश्चवायुश्चपुरुहूतश्चवज्रभृत॥ ६४॥ वरुणः
पाशहस्तश्चसोमादित्यौतथैवच॥ अश्विनौचमहात्मानौमरुतःसर्वएवच॥ ६५॥ सिद्धिंसर्वाणिभूतानिभूतानांचैवयःप्रभुः॥ दास्यंतिमम
येचान्येप्यदृष्टाःपथिगोचराः॥ ६६॥ तदुन्नसंपांडुरदंतमव्रणंशुचिस्मितंपद्मपलाशलोचनं॥ द्रक्ष्येकदायोवदनंकदान्वहंप्रसन्नताराधि-
पतुल्यवर्चसं॥ ६७॥ क्षुद्रेणहीनेननृशंसमूर्तिनासुदारुणालंकृतवेषधारिणा॥ बलाभिभूताह्यबलातपस्विनीकथंनुमेदृष्टिपथेद्यसा
भवेत्॥ ६८॥ इत्यार्षेश्रीमद्रामायणेसुंदरकांडेत्रयोदशःसर्गः॥ १३॥ समुहूर्तमिवध्यात्वामनसाचाधिगम्यतां॥ अवप्लुतोमहातेजाःप्राकारं
तस्यवेश्मनः॥ १॥

॥शास्त्रेअदृष्टाअनुक्ताअपिनादृष्टाश्चयेतेपिसिद्धिंदास्यंति॥ ६६॥ उन्नतानासायस्मिन्तत्पांडुरंवियोगवशात्अव्रणमनवद्यं॥ ६७॥
उदारुणोप्यलंकृतवेषधारीविश्वसनीयवेषधारीतेन॥ ६८॥ आह्वमानः इतिरामाभि० श्री० सुं० त्रयोदशःसर्गः॥ १३॥ ध्यात्वाउत्प्लवनंनिश्चित्यनिश्चित्यतां
सीतांमनसाधिगम्यध्यात्वातस्यरावणस्यवेश्मनःवेश्मप्राकारात् प्राकारंवनप्राकारंअवप्लुतःउत्प्लवनेनप्राप्त॥ १॥ ७॥ ॥

संहृष्टसर्वांगः पुलकितसर्वांगः वसंतादौ वसंतादिसर्वर्तुषु संनिहितैः पुष्पैः पुष्पिताग्रान् ।। २ ।। भव्यान्मुञ्जफलान् उद्दालकान्वृक्षविशेषाः नागवृक्षान्नागकेसरवृक्षान् कपिमुखान् कपिमुखाकारफलवतः चूतविशेषजातिमेतत् ।। ३ ।। ज्यामुक्तः शर इतिशेषः ।। ४ ।। विचित्रां विचित्रपर्यंतां राजतैः रजतादिसंस्कृतैः नद्वशौर्वा ।। ५ ।। चित्रकाननां चित्रद्रुमखंडां उदितादित्यसंकाशां पुष्पैरितिशेषः ।। ६ ।। पुष्पोपगफलोपगैः पुष्पफलयुतैः ।। ७ ।। कालेसर्वस्मिन्नपि

सतु संहृष्टसर्वांगः प्राकारस्थो महाकपिः । पुष्पिताग्रान्वसंतादौ ददर्श विविधान्द्रुमान् ।। २ ।। सालानशोकान्भव्यांश्च चंपकांश्च सुपुष्पितान् । उद्दालकान्नागवृक्षांश्चूतान्कपिमुखानपि ।। ३ ।। अथाम्रवणसंछन्नान् लताशतसमन्वितान् । ज्यामुक्त इव नाराचः पुप्लुवे वृक्षवाटिकां ।। ४ ।। स प्रविश्य विचित्रां तां विहगैरभिनादितां । राजतैः कांचनैश्चैव पादपैः सर्वतोवृताम् ।। ५ ।। विहगैर्मृगसंघैश्च विचित्रां चित्रकाननां । उदितादित्यसंकाशां ददर्श हनुमान्बली ।। ६ ।। वृतां नानाविधैर्वृक्षैः पुष्पोपगफलोपगैः । कोकिलैर्भृंगराजैश्च मत्तैर्नित्यनिषेविताम् ।। ७ ।। प्रहृष्टमनुजां काले मृगपक्षिमदाकुलां । मत्तबर्हिणसंघुष्टां नानाद्विजगणायुतां ।। ८ ।। मार्गमाणो वरारोहां राजपुत्रीमनिंदितां । सुखप्रसुप्तान्विहगान्बोधयामास वानरः ।। ९ ।। उत्पतद्भिर्द्विजगणैः पक्षैर्वातैः समाहताः । अनेकवर्णा विविधा मुमुचुः पुष्पवृष्टयः ।। १० ।। पुष्पावकीर्णः शुशुभे हनूमान्मारुतात्मजः । अशोकवनिकामध्ये यथा पुष्पमयो गिरिः ।। ११ ।। दिशः सर्वाभिधावंतं वृक्षखंडगतं कपिं । दृष्ट्वा सर्वाणि भूतानि वसंत इति मेनिरे ।। १२ ।।

।। प्रहृष्टमनुजां सुखविकासादिलिंगकं पंकजनां मृगादीन् मदनाकुलयितीं प्रहृष्टमनुजे काले इति पदद्वये सप्तम्यंतपाठे तादृक्काले वसंतप्रारंभे वेतस्मिन्निहिते काले इत्यर्थः ।। ८ ।। बोधयामास शाखाचंक्रमणैरिति भावः ।। ९ ।। पक्षैरुत्पतद्भिः इत्यन्वयः समाहताः वृक्षा इति शेषः पुष्पवृष्टयः पुष्पवृष्टीः ।। १० ।। ११ ।। सर्वाभिधावंतमिति संधिरार्षः वसंत इति मेनिरे इति अन्यस्येह वनेऽशोकप्रवेशाभावात् वसंत इव वृक्षसंचारोचितं कपिरूपमास्थाय चरंतीति मेनिरे इत्यर्थः एतेन द्रष्टॄणां तस्मिन् विमतिनिवृत्तिः श्रीरामानुग्रहादिति सूचितं ।। १२ ।।

१३ ॥ वक्रप्रकारं कंपिता वक्रकंपिताः ॥ १४ ॥ निर्धूतपत्राणि शिखराणि अग्राणि च येषां ते ह्रस्वावृक्षक्षुर्णा ॥ १५ ॥ १६ ॥ स्कंधमात्रस्याश्रया न तु पुष्पादीनां अत एवागमाः अ
सेव्याः मारुतेन नतसुतेन हनूमता विनिर्धुताः इति ज्ञस्वच्छार्थः इति कतककलहथा ज्ञस्तस्यापि ध्वजसत्वात् ॥ १७ ॥ वर्णको विलेपनं निपीतः शुभदंतयुक्तश्चोष्ठो

वृक्षेभ्यः पतितैः पुष्पैरवकीर्णा पृथग्विधैः । रराज वसुधा तत्र प्रमदेव विभूषिता ॥ १३ ॥ तरस्विना ते तरवस्तरसा वक्रकंपिताः । कुसुमानि विचित्राणि
ससृजुः कपिना तदा ॥ १४ ॥ निर्धूतपत्रशिखराः शीर्णपुष्पफलद्रुमाः । निक्षिप्तवस्त्राभरणा धूर्ता इव पराजिताः ॥ १५ ॥ हनूमता वेगवता कंपितास्ते
नगोत्तमाः । पुष्पपत्रफलान्याशु मुमुचुः फलशालिनः ॥ १६ ॥ विहंगसंघैर्हीनास्ते स्कंधमात्राश्रया द्रुमाः । बभूवुरगमाः सर्वे मारुतेन विनिर्धुताः ॥ १७ ॥
विधूतकेशी युवतिर्यथा मृदितवर्णिका । निपीतशुभदंतोष्ठी नखैर्दंतैश्च विक्षता ॥ १८ ॥ तथा लांगूलहस्तैश्च चरणाभ्यां च मर्दिता । तथैवाशोकवनिका
प्रभग्ना इव पादपा ॥ १९ ॥ महालतानां दामानि व्यधमत्तरसा कपिः । यथा प्रावृषि वेगेन मेघजालानि मारुतः ॥ २० ॥ स तत्र मणिभूमीश्च राजतीश्च म
नोरमाः ॥ तथा कांचनभूमीश्च विचरन् ददृशे कपिः ॥ २१ ॥ वापीश्च विविधाकाराः पूर्णाः परमवारिणा । महार्हैर्मणिसोपानैरुपपन्नास्ततस्ततः ॥
॥ २२ ॥ मुक्ताप्रवालसिकतास्फाटिकांतरकुट्टिमाः । कांचनैस्तरुभिश्चित्रैस्तीरजैरुपशोभिताः ॥ २३ ॥ बुद्धपद्मोत्पलवनाश्चक्रवाकोपशोभिताः । नत्यू
हरुतसंघुष्टा हंससारसनादिताः ॥ २४ ॥ दीर्घाभिर्द्रुमयुक्ताभिः सरिद्भिश्च समंततः । अमृतोपमतोयाभिः शिवाभिरुपसंस्कृताः ॥ २५ ॥ छ

यस्याः सा ॥ १८ ॥ लांगूलहस्तैरित्यत्रैकवचनाभाव आर्षः ॥ १९ ॥ दामानि जालानि ॥ २० ॥ २१ ॥ उच्यमानविशिष्टा वापीर्ददर्श श्लोकपंचकमेकं वाक्यं ॥ २२ ॥ मुक्ता
प्रवालरूपा एव सिकता यासां अंतरकुट्टिमास्तु अभ्यंतरनिबद्धभूमिस्थला ॥ २३ ॥ नत्यूहो दात्यूहः ॥ २४ ॥ द्रुमयुक्ताभिः तीरद्रुमयुक्ताभिः वापीनां सरिदुपस्कृतत्वं
नित्यं पूर्णजलत्वाय ॥ २५ ॥

संतानः कल्पवृक्षः गुल्मावृतवनाः वनं जलं करवीरैः कृतमंतरं गवाक्षस्थानीयं यया सा तता ॥२६॥ ततो वापीदर्शनानंतरं ॥२७॥ जगति लोके रम्यं सुंदरवस्तुभ्योपि प
रमसुंदरं तीर्थं तु जगति पर्वतं जगती पर्वतमित्यर्थः क्रमस्त्वार्षः कृत्स्नपर्वतमिति यावदिति व्याचक्षाणास्तूपेक्ष्या एव ॥२८॥ निपतितां निःसृतां समुत्पत्य कोपा
दुत्थाय पतितां भूमिशयितां ॥२९॥ जलेन निपतिताग्रैः पादपैः परिरम्भवशादधःप्रसृतशाखाद्वारेण जलनिपतिताग्रत्वं वृक्षाणां कूलात्पानेन वा प्रियं प्रति

लताशतैरवतताः संतानकुसुमावृताः ॥ नानागुल्मावृतवनाः करवीरकृतांतराः ॥२६॥ ततोंबुधरसंकाशं प्रवृद्धशिखरं गिरिं ॥ विचित्रकूटं कूटैश्च
सर्वतः परिवारितं ॥२७॥ शिलागृहैरवततं नानावृक्षसमावृतं ॥ ददर्श कपिशार्दूलो रम्यं जगति पर्वतं ॥२८॥ ददर्श च नगात्तस्मान्नदीं निपतितां कपि
: अंकादिव समुत्पत्य प्रियस्य पतितां प्रियां ॥२९॥ जले निपतिताग्रैश्च पादपैरुपशोभितां ॥ वार्यमाणामिव क्रुद्धां प्रमदां प्रियबंधुभिः ॥३०॥ पुनरावृ
त्ततोयां च ददर्श स महाकपिः ॥ प्रसन्नामिव कांतस्य कांतां पुनरुपस्थितां ॥३१॥ तस्या दूरात्स पद्मिन्यो नानाद्विजगणायुताः ॥ ददर्श कपिशार्दूलो ह
नूमान्मारुतात्मजः ॥३२॥ कृत्रिमां दीर्घिकां चापि पूर्णां शीतेन वारिणा ॥ मणिप्रवरसोपानां मुक्तासिकतशोभितां ॥३३॥ विविधैर्मृगसंघैश्च वि
चित्रां चित्रकाननां ॥ प्रासादैः सुमहद्भिश्च निर्मितैर्विश्वकर्मणा ॥३४॥ काननैः कृत्रिमैश्चापि सर्वतः समलंकृतां ॥ ये केचित्पादपास्तत्र पुष्पोपगा फलोपगाः ॥३५॥

क्रुद्धां प्रियसमीपादन्यत्र जिगमिषुं प्रियबंधुभिः सखीभिर्वार्यमाणां प्रमदामिव ॥३०॥ अतएव कांतस्य प्रसन्नां पुनरुपस्थितां कांतामिव पुनरावृत्ततो
यां वृक्षाग्रप्रतिघातात् परावृत्तजलां ददर्श ॥३१॥ तस्य पर्वतस्य पद्मिन्यः [illegible] पद्मिनीः अकृत्रिमदीर्घिका ॥३२॥ उच्यमानविशेषणां कृत्रिमां दी
र्घिकामपि ददर्श सिकतशोभितामित्यत्र क्रमस्त्वार्षः ॥३३॥ प्रासादैरित्यस्य युतामिति शेषः ॥३४॥ ये केचित्तत्र वृक्षास्ते सर्वेपि पुष्पफलोभययुता एवेत्यर्थः ॥३५॥

257

सछत्राः छत्राकारसंस्थानवंतः तेनशीतलछायत्वसूचितं सवितर्दिकाः सवेदिकाः सौवर्णवेदिकाः राजतादिमहावेदिका इत्यर्थः लतेत्यर्धमुत्तरान्वयि ॥
३६ ॥ एकां मुख्यां वृक्षांतरसंबंधरहितां च कांचनीं तद्वर्णां शिंशुपां पिच्छिला गुरुशिंशपा इति कोशः ३७ ३८ मेरोः प्रभयाकर इव तेषां द्रुमाणां प्रभया कां
चनोस्मीत्यमन्यत कांचनवर्णमात्मशरीरं वीक्षते स्मेत्यर्थः ३९ ॥ तान् कांचनानिति किंकिणाः पत्रपुष्पफलादिवत्सहजाः अत एव विस्मयमागमत् ४० ॥

सछत्राः सवितर्दीकाः सर्वसौवर्णवेदिकाः ॥ लताप्रतानैर्बहुभिः पर्णैश्च बहुभिर्वृता ॥ ३६ ॥ कांचनीं शिंशुपामेकां ददर्श स महाकपिः ॥ वृतां हे
ममयीभिस्तु वेदिकाभिः समंततः ॥ ३७ ॥ सोपश्यद्भूमिभागांश्च नगप्रस्रवणानि च ॥ सुवर्णवृक्षानपरान्ददर्श शिखिसंनिभान् ॥ ३८ ॥ तेषां
द्रुमाणां प्रभया मेरोरिव महाकपिः ॥ अमन्यत तदा वीरः कांचनोस्मीति सर्वतः ॥ ३९ ॥ तान्कांचनान्वृक्षगणान्मारुतेन प्रकंपितान् ॥ किंकि
णीशतनिर्घोषान्दृष्ट्वा विस्मयमागतम् ॥ ४० ॥ सुपुष्पिताग्रान्रुचिरान्तरुणांकुरपल्लवान् ॥ तामारुह्य महावेगः शिंशुपां पर्णसंवृतां ४१ ॥
इतो द्रक्ष्यामि वैदेहीं रामदर्शनलालसां ॥ इतश्चेतश्च दुःखार्तां संपतंतीं यदृच्छया ॥ ४२ ॥ अशोकवनिका चेयं दृढं रम्या दुरात्मनः ॥ चंदनैः
श्चंपकैश्चापि बकुलैश्च विभूषिता ॥ ४३ ॥ इयं च नलिनी रम्या द्विजसंघनिषेविता ॥ इमां सा राजमहिषी नूनमेष्यति जानकी ॥ ४४ ॥

तेषां तरुधर्ममप्याह सुपुष्पिताग्रानिति तरुणाः कोमलास्त्वंकुराः पल्लवाश्च येषां तान् दृष्ट्वा विस्मयं प्राप्त इत्यन्वयः तां यस्याः पर्यंतवृक्षा एवंभूतास्ता
मारुह्य चिंतयामासेति शेषः ॥ ४१ इत इति ॥ आगतामिति शेषः तदेव स्पष्टयति इतश्चेतश्चेति ॥ ४२ ॥ रम्येयमशोकवनिका दुरात्मनो रावणस्यै
व दृढं ध्रुवं राक्षसांतरस्यैवंविधनदसंभवात् ॥ ४३ ॥ नलिनी चेयं रम्या सा च राजमहिषीत्वाद्रम्यप्रियात्वात् इमां नलिनीं नूनमेष्यति ॥ ४४ ॥ ॥

आरामा रामविप्रयुक्ता राजमहिषीत्वादेवउद्यानवनसंचारकुशला ॥४५॥ अयमेवार्थश्चादरेण बुद्धिस्थैर्यार्थं निरावर्त्यते ॥ अथवेति सर्वथेत्यर्थः ननु पक्षांतरमिदं न तत्त्वासंभवात् ॥४६॥ अशोकवनिकान्तःशिंशपाप्रदेशे सीताया आगमने हेत्वंतरमुन्नयति वनेचराणामिति मृगपक्ष्यादीनामित्यर्थः ॥४७॥४८॥ संध्यादिनरात्र्योः संधिरूपानुष्ठानकालो यस्य कर्मणस्तत्र मनो यस्याः सा तथा संध्यार्थे संध्याकालक्रियमाणस्नानाद्यर्थे पूर्ववदेवात्रापि उक्तस्यैवार्थस्यावृत्तिः रा

सा रामा राजमहिषी राघवस्य प्रिया सदा ॥ वनसंचारकुशला ध्रुवमेष्यति जानकी ॥४५॥ अथवा मृगशावाक्षी वनस्यास्य विचक्षणा ॥ वनमेष्यति सार्येह रामचिन्तासुकर्शिता ॥४६॥ रामशोकाभिसंतप्ता सा देवी वामलोचना ॥ वनवासरता नित्यमेष्यते वनचारिणी ॥४७॥ वनेचराणां सततं नूनं स्पृहयते पुरा ॥ रामस्य दयिता भार्या जनकस्य सुता सती ॥४८॥ संध्याकालमनाः श्यामा ध्रुवमेष्यति जानकी ॥ नदीं चेमां शुभजलां संध्यार्थे वरवर्णिनी ॥४९॥ तस्याश्चाप्यनुरूपेयमशोकवनिका शुभा ॥ शुभा याः पार्थिवेंद्रस्य पत्नी रामस्य संमता ॥५०॥ यदि जीवति सा देवी ताराधिपनिभानना ॥ आगमिष्यति सावश्यमिमां शीतजलां नदीं ॥५१॥ एवं तु गत्वा हनुमान्महात्मा प्रतीक्षमाणो मनुजेंद्रपत्नीं ॥ अवेक्षमाणश्च ददर्श सर्वं सुपुष्पिते पर्णघने निलीनः ॥५२॥

॥ त्रिशेषे हनुमतोऽस्य वचसः प्रवृत्तेः संध्याशब्देनात्र प्रातःकालो विवक्षितः तत्र कर्तव्यस्नानस्यैवास्यैव स्त्रीणामप्यधिकार इति कथं स्त्रीणां संध्यावंदनमिति परास्तं वेदितव्यं किंच सम्यक् भगवद्ध्यानस्यैव संध्यापदार्थत्वेनास्य वनत्रस्त्रियाश्चाधिकारः गायत्रीमंत्रेण तदर्थस्मरणपूर्वकध्याने तु द्विजस्यैवाधिकार इत्यन्यत् ॥४९॥ या रामस्य पत्नी संमता च पतिव्रतेति सर्वजनस्य तस्याः शुभायाः इयं नदी अशोकवनिका चानुरूपा योग्या ॥५०॥५१॥ प्रतीक्षमाणः सीतागमनमिति शेषः अवेक्षमाणः इतस्ततोऽवलोकयन् पर्णघने सुपुष्पिते शिंशपावृक्षे निलीनः सन् सर्वं ददर्शेत्यन्वयः ॥५२॥

रममाणाः॥इतिश्रीरामाभिरामेसुंदरकांडेचतुर्दशःसर्गः॥१४॥वीक्षमाणाःइतस्ततोवलोकयन्तत्रस्थःशिंशपास्थःमार्गमाणःमैथिलीहेतुनावोदः
ष्यामहीमवेक्षमाणाःसर्वांतांअशोकवनिकामन्ववेक्षत॥१॥तांविशिनष्टिसंतानकलताभिःसहितैःपादपैरित्यर्थः॥२॥तांसददर्शेत्यन्वयःनंद
नसंकाशांनंदनंचंदनद्राक्षाद्यनेकोपादेयवस्तुमतीं॥३॥वह्वासनैःकुथैरास्तरणैश्चोपेतांउपर्युपरिभूमियुक्ताःगृहाबहुभूमिगृहा॥४॥

इत्यार्षेश्रीरामायणेसुंदरकांडेचतुर्दशःसर्गः॥१४॥सवीक्षमाणास्तत्रस्थोमार्गमाणश्चमैथिलीं॥अवेक्षमाणश्चमहींसर्वांतामन्ववेक्षत
॥१॥संतानकलताभिश्चपादपैरुपशोभितां॥दिव्यगंधरसोपेतांसर्वतःसमलंकृतां॥२॥तांसनंदनसंकाशांमृगपक्षिभिरावृतां॥हर्म्यप्रासाद
संबाधांकोकिलाकुलनिस्वनां॥३॥कांचनोत्पलपद्माभिर्वापीभिरुपशोभितां॥वह्वासनकुथोपेतांबहुभूमिगृहायुतां॥४॥सर्वर्तुकुसु
मैरम्यैःफलवद्भिश्चपादपैः॥पुष्पितानामशोकानांश्रियासूर्योदयप्रभां॥५॥प्रदीप्तामिवतत्रस्थोमारुतिःसमुदैक्षत॥निष्पत्रशाखा
विहगैःक्रियमाणामिवासकृत्॥६॥विनिष्पतद्भिःशतशश्चित्रैःपुष्पावतंसकैः॥समूलपुष्परचितैरशोकैःशोकनाशनैः॥७॥पुष्प
भारातिभारैश्चस्पृशद्भिरिवमेदिनीं॥कर्णिकारैःकुसुमितैःकिंशुकैश्चसुपुष्पितैः॥८॥

॥सर्वर्तुषुकुसुमानियेषांतैःपादपैर्युक्तांसूर्यो
दयप्रभांउद्यत्सूर्यसमकांतिं॥५॥तत्रस्थःशिंशपास्थोमारुतिरशोकपुष्पैःप्रदीप्तामिवोदैक्षतेत्युत्प्रेक्षाअस्तत्कृच्छ्रतशोविनिष्पतद्भिश्चित्रैःपु
ष्पावतंसवत्प्रतीयमानानियेषांतैर्विहगैर्विडशाखामपिनिष्पत्रशाखांक्रियमाणांबहुपक्षिपक्षपिहितवर्णांतयापत्ररहितशाखामि
वेत्यर्थः॥६॥तथाउच्यमानविशेषणैरशोकैःपुष्पभारेणपुष्पसमूहेनजनितातिभारैरतस्त्वातिभारवशादतिप्रवृद्धशाखतयाभूमिस्पृशद्भिः

कर्णिकारैःकिंशुकैश्चउनःमदेशस्तेषांप्रभयाप्रदीप्ताइव॥७॥८॥

९ ॥१० ॥नीलांजननिभाइति एवमुक्ताऽशोकानामनेकवर्णपुष्पवत्वंसूचितं· विबुधोद्यानंनंदनंयथा नंदनंआल्हादकंतद्वदाल्हादकंचैत्ररथंकुबे
रवनंयथाचित्रंतद्वच्चित्रं ॥११॥ तदुभयमप्यतिवृत्तमिवआतिक्रम्येवस्थितं पुष्परूपज्योतिर्गणैरावृतं ॥१२॥ पुष्परूपैरत्नशतैः ॥१३॥ मृगादिभिः

सदेशः प्रभयातेषांप्रदीप्तइवसर्वतः ॥ पुन्नागाःसप्तपर्णाश्चचंपकोद्दालकास्तथा ॥९॥ विवृद्धमूलाबहवः शोभंतेस्मसुपुष्पिताः ॥ शात
कुंभनिभाः केचित्केचिदग्निशिखाप्रभाः ॥१०॥ नीलांजननिभाःकेचित्तत्राशोकाः सहस्रशः ॥ नंदनंविबुधोद्यानंचित्रंचैत्ररथंयथा ॥११॥
अतिवृत्तमिवाचिंत्यंदिव्यंरम्यश्रियावृतं ॥ द्वितीयमिवचाकाशंपुष्पज्योतिर्गणायुतं ॥१२॥ पुष्परत्नशतैश्चित्रंपंचमंसागरंयथा ॥ स
र्वर्तुपुष्पैर्निचितंपादपैर्मधुगंधिभिः ॥१३॥ नानानिनादैरुद्यानंरम्यंमृगगणैर्द्विजैः ॥ अनेकगंधप्रवहंपुण्यगंधंमनोहरं ॥१४॥ शै
लेंद्रमिवगंधाढ्यंद्वितीयंगंधमादनं ॥ अशोकवनिकायांतुतस्यांवानरपुंगवः ॥१५॥ सददर्शाविदूरस्थंचैत्यप्रासादमूर्जितं ॥ मध्येस्तं
भसहस्रेणस्थितंकैलासपांडुरं ॥१६॥ प्रवालकृतसोपानंतप्तकांचनवेदिकं ॥ मुष्णंतमिवचक्षूंषिद्योतमानमिवश्रिया ॥१७॥ नि
र्मलंप्रांशुभावत्वादुल्लिखंतमिवांबरं ॥ ततोमलिनसंवीतांराक्षसीभिःसमावृतां ॥१८॥ उपवासकृशांदीनांनिःश्वसंतींपुनःपुनः ॥ द
दर्शशुक्लपक्षादौचंद्ररेखामिवामलां ॥१९॥

॥स्वीयैर्नानाविधैःशब्दैरम्यंकृतंएवंविशेषणाकंउद्यानमशोकवनिकांतर्गतंददर्शे
त्यनुकर्षः ॥१४॥ शैलेंद्रोहिमवान्तस्यांपूर्ववर्णितायां ॥१५॥ चैत्यंवर्तुलाकारत्वात् उच्छ्रायतनमिवप्रासादंस्तंभसहस्रेणावष्टंभेन
स्थितं ॥१६॥१७॥ प्रांशुभाववत्वात्उच्चस्वभाववत्वात् ततस्तद्दर्शनानंतरंमलिनवासःसंवीतत्वादिविशेषणावतींसीतांहृदेवतन्मूलस्थांददर्शेत्यन्व

259

॥राम॥
॥४६॥

मंदप्रख्यायमानेनइदमिदमितिइदंतदितिवाकथंचिद्दृश्यमानेनरूपेणस्वरूपेणोपलक्षितां ॥ २० ॥ क्लिष्टेनजीर्णेनपांसुध्वास्तरेणनवाक्लिष्टेनसपंकांमलवद्धूरी
रांपद्मिनीलक्ष्मीलताच ॥ २१ ॥ अंगारकेनैवतत्तुल्येनग्रहेणकेतुनापीडितांरोहिणीमिव ॥ २२ ॥ २३ ॥ प्रियंजनंरामलक्ष्मणसुग्रीवादिरूपं जनंश्वगणेनभुनांगणेन
२४ ॥ जघनंपृष्ठभागंतंप्राप्तयैकयाहरणादिनष्टनैकसंस्कारवत्यायद्वापुरोभागीयवेणीद्वयराहित्येनपृष्ठलंबयैकयावेण्यानीलनागाभयानीलसर्पतुल्ययावेण्योप

मंदप्रख्यायमानेनरूपेणरुचिरप्रभां ॥ पिनद्धांधूमजालेनशिखामिवविभावसोः ॥ २० ॥ पीतेनैकेनसंवीतांक्लिष्टेनोत्तमवाससा ॥ सपंकामनलंकारांवि
पद्मामिवपद्मिनीं ॥ २१ ॥ पीडितांदुःखसंतप्तांपरिक्षीणांतपस्विनीं ॥ ग्रहेणांगारकेनेवपीडितामिवरोहिणीं ॥ २२ ॥ अश्रुपूर्णमुखींदीनांकृशामनश
नेनच ॥ शोकध्यानपरांदीनांनित्यंदुःखपरायणां ॥ २३ ॥ प्रियंजनमपश्यंतींपश्यंतींराक्षसीगणं ॥ स्वगणेनमृगींहीनांश्वगणेनावृतामिव ॥ २४ ॥ नील
नागाभयावेण्याजघनंगतयैकया ॥ नीलयानीरदापायेवनराज्यामहीमिव ॥ २५ ॥ सुखार्हांदुःखसंतप्तांव्यसनानामकोविदां ॥ तांविलोक्यविशालाक्षी
मधिकंमलिनांकृशां ॥ २६ ॥ तर्कयामाससीतेतिकारणैरुपपादिभिः ॥ ह्रियमाणातदातेनरक्षसाकामरूपिणा ॥ २७ ॥ यथारूपाहिदृष्टासातथारू
पेयमंगना ॥ पूर्णचंद्राननांसुभ्रूंचारुवृत्तपयोधरां ॥ २८ ॥ कुर्वंतींप्रभयादेवींसर्वावितिमिरादिशः ॥ तांनीलकंठींबिंबोष्ठींसुमध्यांसुप्रतिष्ठितां ॥ २९ ॥

लक्षितांअनेनतत्स्पर्शोन्यस्यमरणमेवेतिसूचितंमेघापायेनीलयावनराज्योपलक्षितांमहीमिवस्थितां ॥ २५ ॥ २६ ॥ उपपादिभिःसीतात्वनिश्चयोपपादनसमर्थैः
तत्कारणांप्रत्यभिज्ञानमाह ह्रियमाणेतियथारूपादृष्टायादृग्वेषवर्णादिमतीत्यनुभूतातथारूपेयंभेदेहिप्रत्यभिज्ञानमनुपपन्नमितिभावः ॥ २७ ॥ पूर्णचंद्रान
नत्वादिगुणवतींनिरीक्ष्यतस्यबुद्धिःसंदिहिहेइत्यष्टत्रिंशत्श्लोकेनान्वयःसुभ्रूंसुभ्रुवं ॥ २८ ॥ सर्वादिशोवितिमिराःकुर्वंतीनीलकंठींसौभाग्यसूचकेंद्रनीलमणिम
यकंठस्थभूषणप्रभयातद्वर्णाकंठांसुप्रतिष्ठितांसुप्रतिष्ठितसर्वावयव
संस्थानां ॥ २९ ॥

चंद्रप्रभासादृश्यंसर्वानंदकरत्वेन ॥३०॥ नियतांभूशयनादिरूपनियमवतीं ॥ तापसीमिवभूमावासीनां भुजगेंद्रवधूसादृश्यंदुष्प्रधृष्यत्वेन रक्षःकुलनाशकत्वे
नच ॥३१॥ नराजतीत्यराजतींविभावसोःशिखामिवपातिव्रत्यतेजसाज्वलंतीं ॥३२॥ स्मृतीमिवेतिदीर्घत्वमार्षंःसंदिग्धामर्थसंदेहवतीं ऋद्धिमैश्वर्यंनिपतिताम
न्यायवशादितिभावः विहतांनास्तिकत्वेनेतिभावः प्रतिहतांस्वविषयालाभादितिभाव ॥३३॥ सोपसर्गांसविघ्नांसकलुषांरागद्वेषादिकालुष्यवतीं अभूतेना

सीतांपद्मपलाशाक्षींमन्मथस्यरतिंयथा ॥ इष्टांसर्वस्यजगतःपूर्णांचंद्रप्रभामिव ॥३०॥ भूमौसुतनुमासीनांनियतामिवतापसीं ॥ निश्वासबहुलांभी
रुंभुजगेंद्रवधूमिव ॥३१॥ शोकजालेनमहताविततेननराजतीं ॥ संसक्तांधूमजालेनशिखामिवविभावसोः ॥३२॥ तांस्मृतीमिवसंदिग्धांऋद्धिंनिपति
तामिव ॥ विहतामिवचश्रद्धामाशांप्रतिहतामिव ॥३३॥ सोपसर्गांयथासिद्धिंबुद्धिंसकलुषामिव ॥ अभूतेनापवादेनकीर्तिंनिपतितामिव ॥३४॥ रामोप
रोधव्यथितांरक्षोगणनिपीडितां ॥ अबलांमृगशावाक्षींवीक्ष्यमाणांततस्ततः ॥३५॥ बाष्पांबुपरिपूर्णेनकृष्णवक्राक्षिपक्ष्मणा वदनेनाप्रसन्नेन
निश्वसंतींपुनःपुनः ॥३६॥ मलपंकधरांदीनांमंडनार्हाममंडितां ॥ प्रभांनक्षत्रराजस्यकालमेघैरिवावृतां ॥३७॥ तस्यसंदिदिहेबुद्धिस्तथासीतांनिरी
क्ष्यच ॥ आम्नायानामयोगेनविद्यांप्रशिथिलामिव ॥३८॥ दुःखेनबुबुधेसीतांहनूमाननलंकृतां ॥ संस्कारेणयथाहीनांवाचमर्थांतरंगतां ॥३९॥ ॥

पवादेनकेवलमारोपितेनकलंकेन ॥३४॥ रामोपरोधःरामसेवाप्रतिबंधः ॥३५॥ कृष्णानिवक्राणिचअक्षिपक्ष्माणियस्यतेन ॥३८॥ संस्कारःस्नानराहित्यान्मलपंकध
रत्वंत्वगादिमलरूपःपंकःनक्षत्रराजश्चंद्रः ॥३७॥ संदिदिहेप्रत्यभिज्ञावाधकान् कार्श्यमालिन्यादितिरोहितरूपत्वात्संदेहःआम्नायोभ्यासः ॥३८॥ वाधकस्या
किंचित्करत्वमाहदुःखेनेतिदुःखबोध्यत्वेहेतुरनलंकृतामितिसंस्कारेणेतिस्नानाङ्गलपनादिरंगसंस्कारःवाच्योव्याकरणजन्मादिजःसंस्कारःदेव्याश्चार्थांतरगत

त्वंदेशांतरगतत्वंवावस्तुविवक्षितार्थादन्यार्थबोधकत्वंवावोर्थोयथाव्याकर
णाद्यभ्यासदुःखेनबुस्मृतिसंपाद्यबुध्यतेतद्वत्सीताकष्टेनबुबुधे ॥३९॥

250

कारणैरुपपादयन् सीतानिश्चयहेतुभिरुपपत्तिमंतं संपादयन् ॥ ४० ॥ इदानीं सीतात्वोपपादकमाह वैदेह्या इति तदा स्वप्रस्थानसमये गात्रशोभीनीति पाठः कनकसमतः येष्वंगेषु यान्याभरणजालान्यकीर्तयत् तान्याभरणजालानि तत्र गात्रशोभीन्युपलक्षयदिति प्रत्यभिज्ञाप्रमाणोपसिद्धं तीर्थस्तु शाखाशोभीनीति पाठं प्रकल्प्य रामविश्लेषसमये भूषणाधारणस्यानुचितत्वाद्वैदेह्या भूषणानि स्वांगेभ्य उन्मुच्य शाखायां न्यस्तानीति गम्यत इति व्याचख्यौ तत्तु उत्तरश्लोकयोर्हस्तेष्विति तथा श्यामानि चिरयुक्तत्वादिति पदस्वरसविरुद्धं किं चैवं तदंगे रामोक्ताभरणाभावात् सीतात्वमेव स्यात् ॥ ४१ ॥ अथ कस्मिन् गात्रे किमाभरणं द

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिंदितां । तर्कयामास सीतेति कारणैरुपपादयन् ॥ ४० ॥ वैदेह्या यानि चांगेषु तदा रामोऽन्वकीर्तयत् । तान्याभरणजालानि गात्रशोभीन्यलक्षयत् ॥ ४१ ॥ सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ । मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च ॥ ४२ ॥ श्यामानि चिरयुक्तत्वात्तथा संस्थानवंति च । तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत् ॥ ४३ ॥ तत्र यान्यवहीनानि तान्यहं नोपलक्षये । यान्यस्या नावहीनानि तानीमानि न संशयः ॥ ४४ ॥ पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभं । उत्तरीयं नगासक्तं तदा दृष्टं प्लवंगमैः ॥ ४५ ॥

॥ श्यमेते तत्राह सुकृतौ सुनिर्मितौ कर्णवेष्टौ कुंडले । श्वदंष्ट्रौ कर्णाभरणविशेषौ त्रिकर्णकापरनामानौ सुसंस्थितौ । कर्णरूपांगेषु प्रतिष्ठितौ उपलक्षये इति शेषः हस्तेषु हस्तावयवेषु च यानि मणिविद्रुमचित्राण्याभरणानि रामेणोक्तानि तथैव सुस्थितानि उपलक्षये ४२ चिरयुक्तत्वात् चिरकालमसंस्कृतदेहस्थितत्वेनासंस्कृतत्वात् श्यामान्यपि श्यामवर्णान्यपि तथा संस्थानवंति रामोक्तसन्निवेशवंति यानि रामोऽन्वकीर्तयत् तान्येवेमानीति मन्ये ॥ ४३ ॥ इतोऽप्येवमेवेत्याह तत्रेति रामोपदिष्टेषु यान्याभरणानि अवहीनानि पतितानि अप्यन्तकदो इत्यर्थः ४४ कानि त्यक्तानीति त्वयावगतानि तत्राह पीतमिति कनकपट्टाभत्वेन स्वर्णतंतुमात्रनिष्पन्नत्वं तस्य सूच्यते नगासक्तं वृक्षासक्तं ॥ ४५ ॥ छ ॥

॥ रा.वा.सु. ॥
॥४८॥

अथयत्केवस्त्रभूषणात्यागोप्यनयैवकृतइत्याह· अनयैवेति ॥ ४६ ॥ इदंवसनंअंतरीयवस्त्रमित्यर्थः विरहतयाक्लिष्टवस्त्रंशयनादिनाम्रदितंतथापितद्वर्णास्तपी
नोरागः अत्नंअप्रस्तुतःक्लीवत्वमार्षं· अर्धर्चादित्वा वर्णाशब्दः तथाश्रीमत्क्रोभावतत्पथेतरत्· अस्मत्हीनसुन्दरीयामित्यर्थः ॥ ४७ ॥ एवंजातनिश्चयश्चाह इयमिति
प्रनष्टादर्शनत्वात्प्रापियस्यरामस्यमनसस्तुनप्रणश्यतिनाद्दष्टाभवतीति· नित्यंसन्निहिताभवतीत्यर्थः ॥ ४८ ॥ साइयमेवकेवलंवारत्नश्चाह· कारुण्येनेति· यदितापहेतु
कारुण्यादित्रयमेवदर्शयति· स्त्रीति· प्रनष्टापरेणपीडितामयाचसतीसानरक्षितात्रापदिस्त्रियोरक्षाइत्युक्तेस्तदकरणकृतकारुण्यात्परितापः वनंप्रस्थित

भूषणानिचमुख्यानिदृष्टानिधरणीतले ॥ अनयैवापविद्धानिस्वनवंतिमहांतिच ॥ ४६ ॥ इदंचिरगृहीतत्वाद्वसनंक्लिष्टवत्तरं ॥ तथाप्य
नूनंतद्वर्णंतथाश्रीमद्यथेतरत् ॥ ४७ ॥ इयंकनकवर्णांगीरामस्यमहिषीप्रिया ॥ प्रनष्टापिसतीयस्यमनसोनप्रणश्यति ॥ ४८ ॥ इयंसायत्कृ
तेरामश्चतुर्भिरिहतप्यते ॥ कारुण्येनानृशंसेनशोकेनमदनेनच ॥ ४९ ॥ स्त्रीप्रणष्टेतिकारुण्यमाश्रितेत्यानृशंस्यता ॥ पत्नीनष्टेतिशोकेन
प्रियेतिमदनेनच ॥ ५० ॥ तस्यादेव्यायथारूपमंगप्रत्यंगसौष्ठवं ॥ रामस्यचयथारूपंतस्येयमसितेक्षणा ॥ ५१ ॥ ॥ ❀

261

॥ राम ॥
॥४८॥

मपिमामाश्रितासाचनरक्षितेतिआनृशंस्यतः आश्रितसंरक्षणास्वभावत्वेनतदकरणात्परितापः पत्नीसर्वधर्मसाधनभूतानष्टेतिधर्मनाशचिंताशोकेनप
रितापः प्रियेति· परमरूपलावण्यादिमतीपरमसुखसाधनभूतानष्टेतिपूर्वसंभोगादिस्मरणाजमदनेनस्त्रंसितसर्वेंद्रियपरितापः ॥ ४९ ॥ ५० ॥ अस्यायथा
रूपादितथारामस्ययथारामस्यरूपादितथाअस्याअपिअतः सोऽस्यायोग्यः इयंचतस्यायोग्येत्यर्थः अनेनोभयोरन्योन्यमानुरूप्यंदर्शितं ॥ ५१ ॥ ❀ ॥
श्रीरामायरामचन्द्रायनमः ॥ ❀ ॥ श्रीरघुकुलभूषणायनमः ॥ . ❀ ॥ श्रीलक्ष्मणार्यनमस्तुः ॥ ❀ ॥ श्रीरामरामरामरामः ❀ ॥

अथान्योन्यानुरागमाह· अस्या देव्या इति येनास्याश्चित्तं रामे सक्तं तस्य चास्यां तेनेयं स च जीवति· चित्तसन्निधानेन वियोगाभावादिति भावः मुहूर्त्त
मपि· इत्यस्यान्यथेत्यादि न जीवेदिति च शेषः ॥५२॥ दुष्करमिति· अत्र तेनेति· वर्त्तमेतेन चित्तसन्निधानेन दुष्करं किं कृतवानित्यत्राह· धारय
तीति वर्त्तमानसामीप्ये लट्॥ दधारेत्यर्थः सीतामेवमेवंगुणां तथा मलिनवासः संवीतां त्वोपवासकृशां त्व शोकध्यानपरायणां त्वादि

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितं ॥ तेनेयं स च धर्मात्मा मुहूर्त्तमपि जीवति ॥५२॥ दुष्करं कृतवान्
रामो हीनो यदनया प्रभुः ॥ धारयत्यात्मनो देहं न शोकेनावसीदति ॥५३॥ एवं सीतां तथा दृष्ट्वा हृष्टः पवनसं
भवः ॥ जगाम मनसा रामं प्रशशंस च तं प्रभुं ॥५४॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे पंचदशः
सर्गः ॥१५॥ प्रशस्य तु प्रशस्तव्यां सीतां तां हरिपुंगवः ॥ गुणाभिरामं रामं च पुनश्चिंतापरोभवत् ॥१॥
समुहूर्त्तमिव ध्यात्वा बाष्पपर्याकुलेक्षणः ॥ सीतामाश्रित्य तेजस्वी हनूमान्विललाप ह ॥२॥ श्रीरामाय नमः

पातिव्रत्यधर्मवर्तीं दृष्ट्वा हृष्टः सन् रामं सस्मार स्मृतं च तं प्रशशंस· एवं पातिव्रत्यगुणवत्पत्नीलाभेन भाग्यवत्तरो रामः ईदृश्या वियोगेन दृशी पीड
ईदृशी प्राप्तये दुःखमभ्याविलएवेति वा सीतां च प्रशशंस बलवता भव्येन प्रभुणा हि मापिया एवं पातिव्रत्यात्तदेषे च सर्वोत्तमेत्येवं प्रशशंस ॥५
वसमानः ॥ इति रामाभिरामे श्रीरा॰ सुंदर॰ पंचदशः सर्गः ॥१५॥ सीतां प्रशस्य प्रशंसा च प्रागुक्तरूपा चिंतापरः सीताविषयदुःखेनेति भावः ॥१॥ सीताम

भिमसीताशुद्धिस्थ ॥२॥

गुरुभिर्विनीतस्य शिक्षितस्य॰ लक्ष्मणस्य गुरुप्रिया गुरोः रामस्य पत्नीत्वात्॰ न च देव परमोपास्यत्वेनाभीष्टा॰ सीता त्वयोनिजा निःसीमपातिव्रत्या राम॰
पत्न्यपि यदि दुःखार्त्ता दुःखपीडिता तर्हि कालो हि दुरतिक्रम इति हि निश्चितमित्यर्थः ॥ दुःखापायघटकत्वस्य कालस्यैव प्रसिद्धत्वादिति भावः
ननु न दुःखं सुखं वा कालमात्रजन्यं कर्मापेक्षान वैफल्यापत्तेः तत्सापेक्षकालजन्यत्वेऽपि ईश्वरावतारसीतारामयोः कर्माभावात्कथं दुःखमि
ति चेन्न वस्तुतस्तयोर्दुःखाभावेऽपि लोकानुग्रहाय गृहीतमनुष्यदेहयोस्तेषां मनुष्यत्वाभावबुद्धिप्रतिबंधाय नरवत् व्यवहारमभिनयतोः
सुखदुःखादिकालिकमुखविकाराद्यभिनयेन तन्मायामोहितस्यैव देवांशस्य हनूमतोऽभिनीतकार्यदर्शनेन तत्कारणानुमानात् ॥ दुः

मान्या गुरुविनीतस्य लक्ष्मणस्य गुरुप्रिया ॥ यदि सीता हि दुःखार्त्ता कालो हि दुरतिक्रमः ॥ ३ ॥ रामस्य व्यवसायज्ञा ल
क्ष्मणस्य च धीमतः ॥ नात्यर्थं क्षुभ्यते देवी गंगेव जलदागमे ॥ ४ ॥ तुल्यशीलवयोवृत्तां तुल्याभिजनलक्षणां ॥ राघ
वोऽर्हति वैदेहीं तं चेयमसितेक्षणा ॥ ५ ॥

खार्त्तत्वाद्युक्तेः सामंजस्यात्॰ यथा च परेणाबोधनं विना हनूमतः स्वबलपराक्रमांशे मोहस्तथा
तयोर्भगवत्स्वरूपत्वे इदानीं तस्य मोह इति वक्तुं शक्यत्वात् पश्चात्तु भगवदिच्छयैव तस्य तयोः स्वरूपज्ञानेऽपि न किंचिदवद्यं ॥ ३ ॥ नन्वेवंविधदुः
खातिशये जीवनहानिरेव स्यादत आह॰ रामस्येति स लक्ष्मणो राम एवंविधे दुर्गे स्थितामपि मां दिव्यास्त्रैः समुद्रमपि येन केनाप्युपायेनोल्लंघ्य
यत्पत्नी यास्यतीति तस्य व्यवसायज्ञा पराक्रमज्ञा सती॰ नात्यंतं क्षुभ्यते नैराश्यमूलकं प्राणत्यागसंपादकक्षोभं न प्राप्नोतीत्यर्थः जलदागमे वर्षा
कालेऽपि गंगा यथा इतरा क्षुद्रनदीव दुर्भरवेगं न प्राप्नोति तद्वत् ॥ ४ ॥ तुल्यशीलवयोवृत्तां राममतुल्यस्वभाववयश्चारित्रां अभिजनः कुलं॰ लक्षणं

सामुद्रिकोक्तं॰ अत एव सीताया रामस्य प्रकृत्यांतरेष्वंत
रेखाप्रवृत्तिः स्वभावस्तेनेति सूचितं ॥ ५ ॥

262

मनसा रामं जगाम· अस्याः स एवानुरूप इति सस्मारेत्यर्थः नवहेमाभं· नवीनं स्वर्णं हेमाभं चेत्यर्थः ॥ ६ ॥ अस्या हेतोः सर्वात्मनास्वसदृशपाः प्राप्त्यर्थमित्यर्थः ॥ ७
दूषणानंतरक्षोनिपातनश्चैतदासक्त्या भूर्पणखानिरासमूलत्वादन्वेषणाप्रतिबंधसंभावनामूलकत्वाच्चैतन्मूलस्यैवाशंकरीयं प्रद्युम्नहतादन्यस्यैव
महेंद्रपदेन तत्तुल्यप्रद्युम्नलक्षणा वा ॥ ८ ॥ ९ ॥ १० ॥ अस्या निमित्ते सप्तम्यर्थे षष्ठी (अस्यां निमित्ते सप्तम्यर्थे षष्ठी) अस्यां निमित्तभूतायां सत्यां

तां दृष्ट्वा नवहेमाभां लोककांतामिव श्रियं जगाम मनसा रामं वचनं चेदमब्रवीत् ॥ ६ ॥ अस्या हेतोर्विशालाक्ष्या हतो वाली म
हाबलः रावणप्रतिमो वीर्ये कबंधश्च निपातितः ॥ ७ ॥ विराधश्च हतः संख्ये राक्षसो भीमविक्रमः ॥ वने रामेण विक्रम्य महेंद्रे
णेव शंबरः ॥ ८ ॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणां ॥ निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ ९ ॥ खरश्च निहतः
संख्ये त्रिशिराश्च निपातितः ॥ दूषणश्च महातेजा रामेण विदितात्मना ॥ १० ॥ ऐश्वर्यं वानराणां च दुर्लभं वालिपालितं·
अस्या निमित्ते सुग्रीवः प्राप्तवान् लोकविश्रुतः ॥ ११ ॥ सागरश्च मया क्रांतः श्रीमान्नदनदीपतिः ॥ अस्या हेतोर्विशालाक्ष्याः पु
री चेयं निरीक्षिता ॥ १२ ॥ यदि रामः समुद्रांतां मेदिनीं परिवर्तयेत्· अस्याः कृते जगच्चापि युक्तमित्येव मे मतिः ॥ १३ ॥ राज्यं वा त्रि
षु लोकेषु सीता वा जनकात्मजा ॥ त्रैलोक्यराज्यं सकलं सीताया नाप्नुयात्कलां ॥ १४ ॥ इयं सा धर्मशीलस्य जनकस्य महात्मनः
सुता मैथिलराजस्य सीता भर्तृदृढव्रता ॥ १५ ॥

मित्यर्थ इति तीर्थः ॥ ११ ॥ १२ ॥ परिवर्तयेत्· अधरोत्तरं कुर्यात्· संहरेदिति यावत् ॥ १३ ॥ एवं म
तेर्युक्तत्वमुपपादयति· राज्यं चेति· त्रैलोक्यराज्यसीताप्राप्त्योः कतरदुत्कृष्टमिति विचारे आद्यं द्वितीयकोटिशतांशेन सादृश्यमपि नार्हतीत्यर्थ

॥ १४ ॥ आधिक्यमेवोपपादयति इयमिति· अनेन कुलं भर्तृदृढव्रतत्वेन चारि
त्र्यातिशयः मेदिनीं भित्त्वेत्यने नायोनिजतयाऽमानुषदिव्यरूपत्वं दर्शितं ॥ १५ ॥

१६॥ आर्यशीलस्य पूज्यशीलस्य अनेन महाकुलीनपाणिग्रहणं दर्शितं ॥१७॥ यद्येवमतयैवं प्राशस्त्यं दर्शितं तस्य कालस्य दुरतिक्रमत्वमाह इयं से
ति· राक्षसीवशमागता कालप्राबल्यादिति भावः फलमुपपत्तेरिति व्याससूत्रेणापि कालात्मनो भगवतः स्वकर्मफलप्रापणसामर्थ्यं दर्शितं
१८॥ भर्तृस्नेहबलात्कृता बलात्सबलात्प्रवर्तिता ॥१९॥ भर्तृशुश्रूषणापरा सन्नं तात्स्वार्थशिचिरापासभ्यंथे पुष्य ॥२०॥ पूर्ववदेवाह सेय

उत्थिता मेदिनीं भित्वा क्षेत्रे हलमुखक्षते ॥ पद्मरेणुनिभैः कीर्णा शुभैः केदारपांशुभिः ॥१६॥ विक्रांतस्यार्यशीलस्य संयुगेष्व
निवर्त्तिनः ॥ स्नुषा दशरथस्यैषा ज्येष्ठा राज्ञो यशस्विनी ॥१७॥ धर्मज्ञस्य कृतज्ञस्य रामस्य विदितात्मनः ॥ इयं सा दयिता भा
र्या राक्षसीवशमागता ॥१८॥ सर्वान्भोगान्परित्यज्य भर्तृस्नेहबलात्कृता ॥ अचिंतयित्वा कष्टानि प्रविष्टा निर्जनं वनं ॥१९॥
संतुष्टा फलमूलेन भर्तृशुश्रूषणापरा या परां भजते प्रीतिं वनेपि भवने यथा ॥२०॥ सेयं कनकवर्णांगी नित्यं सुस्मितभाषिणी
सहते यातनामेतामनर्थानामभागिनी ॥२१॥ इमां तु शीलसंपन्नां द्रष्टुमिच्छति राघवः ॥ रावणेन प्रमथितां प्रपामिव पिपा
सितः ॥२२॥ अस्या नूनं पुनर्लाभाद्राघवः प्रीतिमेष्यति ॥ राजा राज्यपरिभ्रष्टः पुनः प्राप्येव मेदिनीं ॥२३॥ कामभोगैः परित्य
क्ता हीना बंधुजनेन च ॥ धारयमात्मनो देहं तत्समागमकांक्षिणी ॥२४॥

मिति यातनां राक्षसीभिः संपाद्यमानतीव्रदुःखं · अनर्थाना
मापदां ॥२१॥ शीलसंपन्नां ईदृशदुःखेपि चारित्रप्रच्यवरहितां · प्रमथितां प्रमथितामपि · प्रपां पानीयशाला ॥२२॥२३॥ काम्यंत इति
कामाः भुज्यंत इति भोगाः स्रक्चंदनादयस्तैस्त्यक्ता · तत्समागमकांक्षिणी · रामजीवंतमानंदो नरं वर्षशतादपीति न्यायेनेति भावः ॥२४॥

२६३

राक्षस्यः राक्षसीरित्यर्थः एकस्मिन्लक्ष्ये तिष्ठति · तादृशं हृदयं यस्याः सा किं तदेकं लक्ष्यं तत्राह · नूनं राममेवेति ॥ २५ ॥ राममेवेत्यत्र बीजमाह · भर्त्तानाम्नि शोभनं शोभा ॥ २६ ॥ एतदेकहृदयत्वज्ञानादेव रामः प्रभुर्यज्जीवनरूपं दुःखेनावसादनाभावरूपं च दुष्करं कुरुते ॥ २७ ॥ ममापि निर्यत्नेनरपि विषयानभिज्ञस्यापि ॥ २८ ॥ क्षितितुल्या क्षमा यस्याः सा · दृष्टिमात्रेण रावणस्याभस्मीकरणात् · संरक्ष्यते परैरनपहृ

नैषा पश्यति राक्षस्यो नेमान्पुष्पफलद्रुमान् ॥ एकस्थहृदया नूनं राममेवानुपश्यति ॥ २५ ॥ भर्त्ता नाम परं नार्याः शोभनं भूषणादपि ॥ एषा हि रहिता तेन शोभनार्हा न शोभते ॥ २६ ॥ दुष्करं कुरुते रामो हीनो यदनया प्रभुः ॥ धारयत्यात्मनो देहं न दुःखेनावसीदति ॥ २७ ॥ इमामसितकेशांतां शतपत्रनिभेक्षणां ॥ सुखार्हां दुःखितां ज्ञात्वा ममापि व्यथितं मनः ॥ २८ ॥ क्षितिक्षमा पुष्करसन्निभेक्षणा या रक्षिता राघवलक्ष्मणाभ्यां सा राक्षसीभिर्विकृतेक्षणाभिः संरक्ष्यते संप्रति वृक्षमूले · २९ ॥ हिमहतनलिनीव नष्टशोभा व्यसनपरंपरयातिपीड्यमाना ॥ सहचररहितेव चक्रवाकी जनकसुता कृपणां दशां प्रपन्ना ॥ ३० ॥ अस्या हि पुष्पावनताग्रशाखाः शोकं दृढं वै जनयंत्यशोकाः ॥ हिमव्यपायेन च शीतरश्मिरभ्युत्थितो नैकसहस्र

तायगोप्यत इत्यर्थः ॥ २९ ॥ कृपणां शोच्यां ॥ ३० ॥ न केवलमशोक एव शोकजनकश्चंद्रोपीत्याह हिमव्यपायेन वसंतसमीपप्राप्तकालेनोपलक्षितः यद्वा लंकायां हिमव्यपायेन शीताभावेनाभ्युत्थितोतिप्रकाशतया स्थितः अत एव नैकसहस्ररश्मिः अभ्युत्थितः उदयं प्राप्तः शीतरश्मिश्च शोकं जनयतीत्यनुकर्षः ॥ ३१ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ३१ ॥ ॥ ६ ॥ ॥ ३१ ॥ ॥ ६ ॥ ॥

सीतेयमित्येव॰ इयं सीतैवेति जातबुद्धिस्तामेव बुद्धिं संश्रित्य ततः पराजुष्ठेय चिकीर्षया तस्मिन्शिंशपावृक्षे एव निषसाद तद्रात्रिशेषं परादि
नं च स्थित इत्यर्थः ॥ एवं च सुरावणान्तःपुरास्सर्वापि लंकायामत्र ये रात्रौ समुद्रलंघनदिनरात्रावेव विचिता तुर्ये यामेऽशोकवनिकाप्रवेश
इति वोध्यं ॥ ३२ ॥ रागमातः ॥ इति श्रीरामाभिरामे श्रीरा॰ सुंद॰ षोडशः सर्गः ॥ १६ ॥ ततः तद्दिनापरामोत्तरं कुमुदषंडः कुमुदसमूहस्तदा
भः श्वैत्येन निर्मलं नभो जगाम ॥ नभसो जगाम॰ नभसो निर्मलत्वं स्वस्थनीलवर्णत्वं॰ अत एवाह हंसो नीलमुदकमिवेति॰ नभसो नी

इत्येवमर्थं कपिरन्ववेक्ष्य सीतेयमित्येवमुजातबुद्धिः ॥ संश्रित्य तस्मिन्निषसाद वृक्षे वली हरीणामृषभस्तरस्वी ॥ ३२ ॥
इत्यार्षे श्रीमद्रामायणे वा॰ सुंद॰ षोडशः सर्गः ॥ १६ ॥ ततः कुमुदषंडाभो निर्मलं निर्मलोदयः ॥ प्रजगाम नभश्चंद्रो हं
सो नीलमिवोदकं ॥ १ ॥ साचिव्यमिव कुर्वन्सप्रभया निर्मलप्रभः ॥ चंद्रमा रश्मिभिः शीतैः सिषेवे पवनात्मजं ॥ २ ॥ स
ददर्श ततः सीतां पूर्णचंद्रनिभाननां ॥ शोकभारैरिव न्यस्तां भारैर्नावमिवांभसि ॥ ३ ॥ दिदृक्षमाणो वैदेहीं हनूमान्मारु
तात्मजः ॥ स ददर्शाविदूरस्था राक्षसीर्घोरदर्शनाः ॥ ४ ॥ एकाक्षीमेककर्णां च कर्णप्रावरणां तथा ॥ अकर्णां शंकुकर्णां च
मस्तकोच्छ्वासनासिकां ॥ ५ ॥

लत्वं प्रतीत्या कविसंप्रदायेन च वोध्यं नभो जगाम॰ किंचिन्नभउपरिभागं जगामेत्यर्थः साचिव्यमिव॰ सीतादर्शनादौ प्रभया त्वकांत्या साचि
व्यमिव साहायकमिव॰ दिवा क्वचिदेकांतप्रदेशे स्थितत्वान्निद्राव्याजलत्वाच्च तस्य राक्षसीनां सीतायाश्च दर्शनं॰ रात्रौ चंद्रोदये सति तु एतत्
समीपदेशे आगत्यास्थितस्य सम्यक्तत्वदर्शनं ॥ २ ॥ शोकभारैर्मग्नां प्रयोनीनामिव निमज्जमानामिव ॥ ३ ॥ दिदृक्षमाणः प्रकटतयातां द्रष्टुमिच्छुः ॥ ४

कर्णां प्रावरणामिति विशालकर्णीं॰ मस्तकोच्छ्वासनासिकां ऊर्ध्वमुखनासां ॥ ५ ॥

264

अतिकायोत्तमांगीं अतिप्रवृद्धोपरिभागदेहवतीं तनुदीर्घशिरोधरां अस्थूलदीर्घग्रीवामित्यर्थः शारीरकेशैः कंबलधारिणीमिव ॥ ६ ॥ चिवु
केसंवद्ध ओष्ठा यस्यास्ता ॥ ७ ॥ विकटा वक्रशरीरा करालाभयंकरकृष्णवर्णा ॥ ८ ॥ विकृतनखादिगुणाश्च या राक्षस्यस्तत्रास्थिनासादर्शनविवक्ष्य
माणोनान्वयः कूटे यस्कारकूटसम आयुधविशेषः ॥ ९ ॥ निखातशिरसः कबंधउरःप्रदेशगतशिरसः ॥ १० ॥ हरिकर्णीः सिंहकर्णीः ॥ ११ ॥ गजसं

अतिकायोत्तमांगीं च तनुदीर्घशिरोधरां ॥ ध्वस्तकेशीं तथाकेशीं केशकंबलधारिणीम् ॥ ६ ॥ लंबकर्णललाटां च लंबोदरपयोध
रां ॥ लंबोष्ठीं चिवुकोष्ठीं च लंबास्यां लंबजानुकाम् ॥ ७ ॥ ह्रस्वां दीर्घां च कुब्जां च विकटां वामनां तथा ॥ करालां भुग्नवक्त्रां च पिंगा
क्षीं विकृताननाम् ॥ ८ ॥ विकृताः पिंगलाः काल्यः क्रोधनाः कलहप्रियाः ॥ कालायसमहाशूलकूटमुद्गरधारिणीः ॥ ९ ॥ वरा
हमृगशार्दूलमहिषाजशिवामुखाः ॥ गजोष्ट्रहयपादाश्च निखातशिरसो परा ॥ १० ॥ एकहस्तैकपादाश्च खरकर्णश्वकर्णि
काः ॥ गोकर्णी हस्तिकर्णीश्च हरिकर्णीस्तथा पराः ॥ ११ ॥ अतिनासाश्च काश्चिच्च तिर्यङ्नासा अनासिकाः गजसंनिभनासाश्च ल
लाटोच्छ्वासनासिकाः ॥ १२ ॥ हस्तिपादा महापादा गोपादाः पादचूलिकाः ॥ अतिमात्रशिरोग्रीवाः अतिमात्रकुचोदरीः ॥ १३ ॥
अतिमात्रास्यनेत्राश्च दीर्घजिह्वाननास्तथा ॥ अजामुखी हस्तिमुखी गोमुखीः सूकरीमुखीः ॥ १४ ॥ हयोष्ट्रखरवक्त्राश्च राक्षसी घो
रदर्शना ॥ शूलमुद्गरहस्ताश्च क्रोधनाः कलहप्रियाः ॥ १५ ॥ करालाधूम्रकेशिन्यो राक्षसीर्विकृताननाः ॥ पिबंति सततं पानं सुरामां
ससदाप्रियाः ॥ १६ ॥ मांसशोणितदिग्धांगीर्मांसशोणितभोजनाः ॥ ता ददर्श कपिश्रेष्ठो रोमहर्षणदर्शनाः ॥ १७ ॥ ॥

न्निभनासाः शुंडादंडोपेतनासाः ॥ १२ ॥ पादचूलिकाः पादे संलग्नाचूडाशिरःकेशा यासां ताः पादे वा चूडाकाराः केशा यासां ताः अतिमात्रं अतिप्रमाणं ॥ १३

॥ १५ ॥ सुरामांससदाप्रियाः सुरामांसे सदाप्रियं यासां ताः ॥ १६ ॥ १७ ॥

॥रा·वा·सुं·॥
॥५२॥

स्कंधवंतंप्रशस्तशाखोपशाखावंतंवृक्षंशिंशपावृक्षं·परिवार्यतन्मूलादीषद्दूरेआसीनाःस्थिताःतस्याधस्तात्तन्मूलसमीपे॥१८॥१९॥दिवश्च्यु
तांभूमौपतितांतारामिव·चारित्रव्यपदेशःपातिव्रत्यजकीर्तिः·भर्तृदर्शनदुर्गतंदुर्लभंयस्यास्तां॥२०॥उत्तमभूषणाजशोभाहीनामपिभर्तृवात्सल्ये
ननास्तियत्वेनशोभावतीं·विनाकृतांरहितां॥२१॥पयोदांतेवर्षांतेअनेदुःखस्यात्यंतावशिष्टत्वंसूच्यते·असंस्पर्शात्·भर्तृस्पर्शाभा

स्कंधवंतमुपासीनाःपरिवार्यवनस्पतिं॥तस्याधस्ताच्चतांदेवींराजपुत्रीमनिंदितां॥१८॥लक्षयामासलक्ष्मीवान्हनूमान्ज
नकात्मजां॥निष्प्रभांशोकसंतप्तांमलसंकुलमूर्धजां॥१९॥क्षीणपुण्यांच्युतांभूमौतारांनिपतितामिव॥चारित्रव्यपदेशाढ्यां
भर्तृदर्शनदुर्गतां॥२०॥भूषणैरुत्तमैर्हीनांभर्तृवात्सल्यभूषितां॥राक्षसाधिपसंरुद्धांबंधुभिश्चविनाकृताम्॥२१॥वियूथां
सिंहसंरुद्धांबद्धांगजवधूमिव॥चंद्ररेखांपयोदांतेशारदाभ्रैरिवावृतां॥२२॥क्लिष्टरूपामसंस्पर्शादयुक्तामिववल्लकीं·
सतांभर्तृहितेयुक्तामयुक्तांरक्षसांवशे॥२३॥अशोकवनिकामध्येशोकसागरमाप्लुतां॥ताभिःपरिवृतांतत्रसग्रहामि
वरोहिणीं॥२४॥ददर्शहनुमांस्तत्रलतामकुसुमामिव॥सामलेनचदिग्धांगीवपुषाचाप्यलंकृता॥मृणालीपंकदिग्धेव
विभातिचनभातिच॥२५॥मलिनेनतुवस्त्रेणपरिक्लिष्टेनभामिनीं॥संवृतांमृगशावाक्षींददर्शहनुमान्कपिः॥२६॥

वान्·अतएवायुक्तां·वीणावादकवादनक्रियारहितांवल्लकींवीणामिवस्थितां·अयुक्तांरक्षसांवशे·रक्षोधीनत्वेऽयोग्यां॥२३॥शोकसागरमा
प्लुतांतत्रमग्नांताभिःराक्षसीभिःसग्रहांक्रूरग्रहविष्टां॥२४॥अकुसुमलतासादृश्यमाभरणाभावात्वपुषास्वरूपीयसहजसौंदर्येण·कारकदीपक

॥राम·॥
॥५२॥

265

भर्तृतेजसा भर्तृपराक्रमानुसंधानेनादीनहृदयां ॥ २७ ॥ २८ ॥ दुःखस्य दुःखसागरस्य अत्राधेयेनाधारनिगरणं ॥ २९ ॥ क्षामां कृशां विनाभरणशोभि-
नीं· आभरणानुग्रहमनपेक्ष्यैव सौंदर्येण शोभमानां ॥ ३० ॥ राघवं नमश्चक्रे इति भगवतो राघवस्यानुग्रहादेवेयं मया दृष्टेति पुनः पुनः स्तुत्वा न-
मस्कारः ॥ ३१ ॥ संवृतोभवत्· राक्षसीनां दर्शनपरिहाराय सूक्ष्मरूपमवलंब्य वृक्षमूलसमीपशाखासु निलीनोभवत् ॥ ३२ ॥ अरोगमानः इति

तां देवीं दीनवदनामदीनां भर्तृतेजसा ॥ रक्षितां स्वेन शीलेन सीतामसितलोचनां ॥ २७ ॥ तां दृष्ट्वा हनुमान्सीतां मृगशावनिभेक्ष-
णां ॥ मृगकन्यामिव त्रस्तां वीक्ष्यमाणां समंततः ॥ २८ ॥ दहंतीमिव निश्वासैर्वृक्षान्पल्लवधारिणः ॥ संघातमिव शोकानां दुः-
खस्योर्मिमिवोत्थितां ॥ २९ ॥ तां क्षामां सुविभक्तांगीं विनाभरणशोभिनीं ॥ प्रहर्षमतुलं लेभे मारुतिः प्रेक्ष्य मैथिलीं ॥ ३० ॥ हर्षजा-
नि च सोश्रूणि तां दृष्ट्वा मदिरेक्षणां ॥ मुमोच हनुमांस्तत्र नमश्चक्रे च राघवं ॥ ३१ ॥ नमस्कृत्वाथ रामाय लक्ष्मणाय च वीर्यवा-
न् ॥ सीतादर्शनसंहृष्टो हनूमान्संवृतोभवत् ॥ ३२ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे सप्तदशः सर्गः ॥ १७ ॥ तथा विप्रेक्षमा-
णस्य वनं पुष्पितपादपं ॥ विचिन्वतश्च वैदेहीं किंचिच्छेषा निशाभवत् ॥ १ ॥ षडंगवेदविदुषां क्रतुप्रवरयाजिनां ॥ शुश्राव ब्रह्मघो-
षान्स विरात्रे ब्रह्मरक्षसां ॥ २ ॥ अथ मंगलवादित्रैः शब्दैः श्रोत्रमनोहरैः ॥ प्राबोध्यत महाबाहुर्दशग्रीवो महाबलः ॥ ३ ॥ विबुध्य त-
महाभागो राक्षसेंद्रः प्रतापवान् ॥ स्रस्तमाल्यांबरधरो वैदेहीमन्वचिंतयत् ॥ ४ ॥

((रामाभि० श्रीरा० सुंद० सप्तदशः सर्गः ॥ १७ ॥ तथेति· किंचिच्छे-
षा· अपरयाममात्रशेषा विचिन्वतः तस्याः स्पष्टं दर्शनाय राक्षसीनिद्रारूपमवसरमन्वेषयतः ॥ १ ॥ विरात्रे रात्रिविपर्यासे अपररात्रे इत्यर्थः ब्रह्मरक्षसां वे-
दवेदतज्ञरक्षसां· तदेव स्पष्टीकृतं षडंगेत्यादिना ॥ २ ॥ ३ ॥ निद्रावशाद्देवस्रस्तमाल्यांबरधरः स्पष्टं नियुक्तः गाढाभिनिवेशेन चिंतः कामं कामवेगं ॥ ४ ॥

ईदृशेषुतीर्थस्यान्यथायोजनंत्वत्रांसेव· रक्षसत्तमोगुणाविष्टस्यभगवन्मायामोहितस्याकम्पेघेवप्रवृत्तेनअथाक्रियमाणंभगवद्ध्यानमपिपापभोगोत्तरंजन्मांतरे
उत्तमफलायेतिबोध्यं· अनरण्यवत्साश्वमेधनाम्नोराज्ञोदानस्नावकोऽस्मश्चत्रः नयुष्मवाजवंशोनिनितुष्टनमर्त्यः अवद्यमधिक्षेश्वरत् इति तस्याथ
वाजिमित्यन्वनामान्त्रदानेनयेसर्वेषांवंशवत्सेयासंबोधनंहेवाजवंश वः युष्मेयुष्मासु अधिसप्तम्यर्थानुवादो अधिः निनितुष्टनिंदने स्तुशीलोपिम
र्त्यत्र्यवधंनदीधरत्नस्वारयतिभवदनुसंधानेनैवनिष्पापत्वादिति एवंचभगवतोनिंदावरुद्धभावेनध्यानमपिनरकभोगोत्तरंजन्मांतरेउत्तमफल

भृशंनियुक्तस्तस्यांचमदनेनमदोत्कटः॥ नतुतंराक्षसःकामंशशाकात्मनिग्रहितुं ॥ ५ ॥ससर्वाभरणैर्युक्तोविभ्रच्छ्रियमनुत्त
मां॥तांनगैर्विविधैर्जुष्टांसर्वपुष्पफलोपगैः ॥ ६ ॥वृतांपुष्करिणीभिश्चनानापुष्पोपशोभितां॥सदामत्तैश्चविहगैर्विचित्रांपर
माद्भुतैः॥ ७ ॥ईहामृगैश्चविविधैर्वृतांदृष्टिमनोहरैः॥वीथीःसंप्रेक्षमाणश्चमणिकांचनतोरणां॥ ८ ॥नानामृगगणाकीर्णां
फलैःप्रपतितैर्वृतां॥अशोकवनिकामेवप्राविशत्संततद्रुमां॥ ९ ॥अंगनाःशतमात्रंतुतंव्रजंतमनुव्रजन्॥महेंद्रमिवपौल
स्त्यंदेवगंधर्वयोषितः॥ १० ॥दीपिकाःकांचनीःकाश्चिज्जगृहुस्तत्रयोषितः॥वालव्यजनहस्ताश्चतालवृंतानिचापराः॥ ११ ॥

यातस्त्वाख्यमरणोत्तरंचतुर्थचतुर्युगपर्यंतेचेदिराजकुलेजन्म चतुर्विंशतिचतुर्युगांतराभावनार इतिहरिवंशोक्तेः तावत्पर्यंतंचैतत्पापफलभोगइत्यर्था
यातमितिबोध्यं॥ ५ ॥ ६ ॥ ७ ॥वीथीः अशोकवनिकामार्गगमनवीथीः॥ ८ ॥ ९ ॥ अंगनाशतमात्रमित्यवधारणोइतिकतकः देवादि
योषितोमहेंद्रमिवपौलस्त्यंरावणंअनुव्रजन् अडभावआर्षः॥ १० ॥कांचनीःकांचनदंडाःवालव्यजनहस्ताइत्यस्यान्वव्रजन्नितिशेषः ता
लवृंतानीत्यस्यजगृहुरिति अनेनलंकायांहेमंतशिशिरयोरपिशीताभावोध्वनितः॥ ११ ॥ ॐ ॥

266

॥ राम·॥
॥५३॥

भृंगारैः कलशैः धनूरङ्गमुसमसदृशजलपात्रैरित्यर्थ इति तीर्थः मंडलाग्राः खड्गपर्यंताः वृसीरासनविशेषान्· तपस्विनामिमेतृणादिनात्रसंतु स्वर्णेनेति विशेषः ॥१२॥ पानस्य स्वर्णपानेन स्वर्णशेषपद्मीभाजनीं दीदीप्यमानां· दक्षिणा अनुकूला ॥१३॥१४॥१५॥ व्याविद्धाः स्थानादीषच्चलिताः सम्यग्

कांचनैश्चैव भृंगारैर्जह्रुः सलिलमग्रतः । मंडलाग्रा वृसीश्चैव गृह्यान्याः पृष्ठतो ययुः ॥१२॥ काचिद्रत्नमयीं पात्रीं स्वर्णपानस्य भाजनीं । दक्षिणा दक्षिणेनैव तदा जग्राह पाणिना ॥१३॥ राजहंसप्रतीकाशं छत्रं स्वर्णशशिप्रभं । सौवर्णदंडमपरा गृहीत्वा पृष्ठतो ययौ ॥१४॥ निद्रामदपरीताक्ष्यो रावणस्योत्तमस्त्रियः । अनुजग्मुः पतिं वीरं घनं विद्युल्लता इव ॥१५॥ व्याविद्धहारकेयूराः समामृदितवर्णकाः । समागलितकेशांताः सस्वेदवदनास्तथा ॥१६॥ घूर्णंत्यो मदशेषेण निद्रया च शुभाननाः स्वेदक्लिष्टांगकुसुमाः समाल्याकुलमूर्द्धजाः ॥७॥ प्रयांतं नैर्ऋतपतिं नार्यो मदिरलोचनाः । वहुमानाच्च कामाच्च प्रियभार्यास्तमन्वयुः ॥१८॥ स च कामपराधीनः पतिस्तासां महाबलः । सीतासक्तमना मंदो मंदांचितगतिर्बभौ ॥१९॥ ततः कांचीनिनादं च नूपुराणां च निस्वनं । शुश्राव परमस्त्रीणां कपिर्मारुतनंदनः ॥२०॥ तं चाप्रतिमकर्माणमचिंत्यबलपौरुषं । द्वारदेशमनुप्राप्तं ददर्श हनुमान्कपिः ॥२१॥ दीपिकाभिरनेकाभिः समंतादवभासितं गंधतैलावसिक्ताभिर्ध्रियमाणाभिरग्रतः ॥२२॥

मृदितो म्लिष्टो वर्णकोनुलेपनं यासां ताः ॥१६॥ समाल्याः सपुष्पा आकुला मूर्धजा यासां ताः ॥७॥ मदिरलोचनाः मदकरवीक्षणाः वहुमानात् भर्तृकृतसंमानात् भर्तृकृतसंमानात् कामात् स्वीयात् ॥१८॥ मंदो दुर्मतिः मंदं यथा तथांचिता गतिर्यस्य ॥१९॥२०॥ द्वारदेशं अशोकवनिकाप्राकारदेशं ॥२१॥ दीपिकाभिर्भासितं रात्रिशेषसत्वात्· द्वादशयामावशिष्टरात्रौ चंद्रस्यास्तगमनाच्च ॥२२॥ श्रीरामाय नमः ॥ ॥

स्तु

जिह्मादिगुणाके ईक्षणे यस्य तं समक्षं प्रत्यक्षं कंदर्पमिव स्थितं अपविद्धशरासनं न्यक्तेक्षुचापं ॥२३॥ अमृतं पयः मथितः पयः फेनं तत्तुल्या आभा यस्य तत्·
अरजो धौतं सपुष्पं पुष्पमालासहितं विमुक्तं विशिष्टमुक्तावतं· यद्वा स्थानात्च्युतमंगदे सक्तं वस्त्रं· अवकर्षंतं अंगदादाकृष्य यथास्थाने स्थापयं
तं· सपुष्पमवकर्षंतमित्येव पाठः तीर्थस्तु रत्नघोजनाशक्या सलीलमवकर्षंतमिति पाठं कल्पयति ॥२४॥ पत्रविटपे· निविडपत्रशाखायां विज्ञातुं

कामदर्पमदैर्युक्तं जिह्मताम्रायतेक्षणं ॥ समक्षमिव कंदर्पमपविद्धशरासनं ॥२३॥ मथितामृतफेनाभमरजोवस्त्रमुत्तमं ॥ स
पुष्पमवकर्षंतं विमुक्तं सक्तमंगदे ॥२४॥ तं पत्रविटपे लीनः पत्रपुष्पसमावृतः ॥ समीपमुपसंक्रांतं विज्ञातुमुपचक्रमे ॥२५॥
अवेक्षमाणस्तु तदा ददर्श कपिकुंजरः ॥ रूपयौवनसंपन्ना रावणस्य वरस्त्रियः ॥२६॥ ताभिः परिवृतो राजा सुरूपाभिर्महायशाः
तन्मृगद्विजसंघुष्टं प्रविष्टः प्रमदावनं ॥२७॥ क्षीबो विचित्राभरणः शंकुकर्णो महाबलः ॥ तेन विश्रवसः पुत्रः स दृष्टो राक्षसाधि
पः ॥२८॥ वृतः परमनारीभिस्ताराभिरिव चंद्रमाः ॥ तं ददर्श महातेजास्तेजोवंतं महाकपिः ॥२९॥ रावणोयं महाबाहुरि
ति संचिंत्य वानरः ॥ सोयमेव पुरा शेते पुरमध्ये गृहोत्तमे ॥ अवप्लुतो महातेजा हनूमान्मारुतात्मजः ॥३०॥ ॥६॥ ॥

अयममुक इति विशेषेण ज्ञातुं विज्ञातुमिति पाठे प्ययमेवार्थः ॥२५॥२६॥ प्रमदानां क्रीडार्हं वनं प्रमदावनं ॥२७॥ शंकुकर्णनामा तद्वन
रक्षी राक्षसः तेन विश्रवसः पुत्रो राक्षसो रावणो दृष्टः नान्येन केनापि पुरुषेणेत्यर्थः ॥२८॥२९॥ यः पुरमध्ये पुरा शेते शायितः सोयमेवे
त्यन्वयः तस्माद्रावणोयमिति संचिंत्य अवप्लुतः स्वाश्रितशाखायाः आमूर्धं शाखांतरे इति शेषः ॥३०॥ श्रीरामाय रामचंद्राय नमः

यद्यपिसःसमुद्गलंघनकर्णसमारुतात्मजोहनुमानुग्रतेजास्तथापितस्यरावणस्यतेजसानिर्धूतःतस्यपुरोवस्थातुमशक्नुवन्·पत्रेपत्रवङ्कुले·
अतस्एवगुह्यांतरेशाखांतरेसक्तःस्थितःतत्राप्यत्यल्पेशरीरतयासंवृतोगुप्तोभवत्·सर्वमायातिरस्कारकमायावतस्तस्यदृष्ट्रेगुप्तमाययाल्प
शरीरादिमत्वेनस्थातुमशक्यत्वादेवंकरणं॥३१॥उपावर्ततसमीपंप्राप्तः॥३२॥रंगमानः॥इतिरामाभिरामेश्रीरा०सुंद०ऽष्टादशःसर्गः

सतथाप्युग्रतेजाःसन्निर्धूतस्तस्यतेजसा॥पत्रेगुह्यांतरेसक्तोमतिमान्संवृतोभवत्॥३१॥सतामसितकेशांतांसुश्रोणींसं
हतस्तनीं॥दिदृक्षुरसितापांगीमुपावर्ततरावणः॥३२॥इत्यार्षेश्रीमद्रामायणेसुंदरकांडेऽष्टादशःसर्गः॥१८॥तस्मिन्ने
वततःकालेराजपुत्रीत्वनिंदिता॥रूपयौवनसंपन्नंभूषणोत्तमभूषितं॥१॥ततोदृष्ट्वैववैदेहीरावणंराक्षसाधिपं॥प्रावे
पतवरारोहाप्रवातेकदलीयथा॥२॥ऊरुभ्यामुदरंछाद्यबाहुभ्यांचपयोधरौ॥उपविष्टाविशालाक्षीरुदतीवरवर्णिनी॥३॥
दशग्रीवस्तुवैदेहींरक्षितांराक्षसीगणैः॥ददर्शदीनांदुःखार्तांनावंसन्नामिवार्णवे॥४॥असंवृतायामासीनांधरण्यांसंशि
तव्रतां॥छिन्नांप्रपतितांभूमौशाखामिववनस्पतेः॥५॥मलमंडनदिग्धांगींमंडनार्हाममंडनां॥मृणालीपंकदिग्धेववि
भातिनविभातिच॥६॥

१८॥ततोहनूमतःप्लवनानंतरंतस्मिन्नेवकालेअपररात्ररूपेआगमनकालेस्वरावणंदृष्ट्वाततोनंतरंप्रावेपत॥१॥२॥रुदत्युपविष्टाभूत्·भीत
स्वभावोक्त्यास्वभावोक्तिरत्रालंकारः॥३॥सन्नांशीर्णांशीर्णनौस्थजनमिवेत्यर्थः॥४॥असंवृतायामास्तरणरहितायां·संशितव्रतांरावणाव
धायनीक्षांव्रतमिवकुर्वाणां॥५॥मलेनमंडनस्थानेप्रदिग्धांगींरूषितांगीं·चित्रांगीमितिपठित्वा·मलरूपेणमंडनेनचित्रांगींकर्दरामि
त्यर्थंतीर्थआह·संन्यासिन्याउचितेवनस्यमलेपिमंडनत्वबुद्धिःईदृशींयांददर्शसापंकदिग्धामृणालीवविभातिनविभातिचस्वरूपशोभयावि
भातिमलावरणात्त्वनविभातीत्यर्थः॥६॥

संकल्पस्तच्चिंतनं तद्रूपाऽश्वसंयुक्तैर्मनोरथैर्देवरथैरामसमीपं यांतीमिव ॥ ७ ॥ अपश्यंतीं नामिव ॥ ८ ॥ आविष्टां मंत्राद्यवरुद्धां · धूप्यमानां संतप्यमा
नां धूमवर्णेन केतुना ॥ ९ ॥ वृत्तमाचारः शीलं सत्स्वभावस्तद्युते · विहितकर्मानुष्ठानवति च कुले जातां नां नाहयशास्त्र्व कुले पुनः संस्कारं पाणिग्रहणसंस्का
रमापन्नामपि दुष्कुले जातामनुपन्नां न चैव प्राप्तसंस्कारामिव च मलिनां स्थितां स्त्रीणां विवाहस्यैवोपनयनवत्द्विजीयजन्मस्थानत्वादिति भावः ॥

समीपं राजसिंहस्य रामस्य विदितात्मनः ॥ संकल्पहयसंयुक्तैर्यांतीमिव मनोरथैः ॥ ७ ॥ शुष्यंतीं रुदतीमेकां ध्यानशोकपराय
णां ॥ दुःखस्यांतमपश्यंतीं रामां राममनुव्रतां ॥ ८ ॥ चेष्टमानामथाविष्टां पन्नगेंद्रवधूमिव ॥ धूप्यमानां ग्रहेणेव रोहिणीं धूम
केतुना ॥ ९ ॥ वृत्तशीले कुले जातामाचारवति धार्मिके ॥ पुनः संस्कारमापन्नां जातामिव च दुष्कुले ॥ १० ॥ सन्नामिव महाकीर्तिं श्र
द्धामिव विमानितां ॥ प्रज्ञामिव परिक्षीणामाशां प्रतिहतामिव ॥ ११ ॥ आयतीमिव विध्वस्तामाज्ञां प्रतिहतामिव ॥ दीप्तामिव दिशं
काले पूजामपहृतामिव ॥ १२ ॥ पौर्णमासीमिव निशां तमोग्रस्तेंदुमंडलां ॥ पद्मिनीमिव विध्वस्तां हतशूरां चमूमिव ॥ १३ ॥ प्र
भामिव तमोध्वस्तामुपक्षीणामिवापगां ॥ वेदीमिव परामृष्टां शांतामग्निशिखामिव ॥ १४ ॥ उत्कृष्टपर्णकमलां वित्रासितवि
हंगमां ॥ हस्तिहस्तपरामृष्टामाकुलामिव पद्मिनीं ॥ १५ ॥ पतिशोकातुरां शुष्कां नदीं विस्त्रावितामिव ॥ परया मृजया हीनां कृ
ष्णपक्षे निशामिव ॥ १६ ॥

११ ॥ सन्नां क्षीणां विमानितां अनादृतां ॥ ११ ॥ आयती धनादिप्राप्तिः आज्ञा राज्ञ इति शेषः दिशं काले उत्पातकाले पूजां देवपूजां ॥ १२ ॥ पौर्णमासीं तमस्तंवि
नीं तमो राहुः प्रभां रविप्रकाशं तमोंधकारः परामृष्टां वेद वेदीरहितपजिनैराक्रांतां ॥ १४ ॥ उत्कृष्टानि त्रुटितानि पर्णानि कमलानि यस्याः सा ॥ १५ ॥

विस्त्राविता शोषभंगादिना अन्तःप्रापितजलां अत्र नस्त्वप्र
कृ॰ मृजया गात्रशुध्या हीनां ॥ १६ ॥

268

१७॥ गृहीतांक्षतांपश्चात्स्तंभेलाडितांबद्धां·कश्चित्तुगृहीतामालितामितिपठित्वा आलितां·आलातितामित्यर्थमाह ॥१८॥ अयन्त्रतइतिकेशसं
स्काराभावाद्यन्त्रतःसिद्धयेतिशेषः ॥१९॥ अल्पाहारांजलमात्राहारां·अस्नातया अन्नस्यग्रहीतुमशक्यत्वात्·देवराजतःपायसलाभेनतदन
पेक्षणाच्च ॥२०॥ तपोधनत्वाद्देवरघुमुख्यस्यसकाशात्·दशग्रीवपराभवं·आयाचमानांप्रार्थयंतीं·अतस्वभावेनांतर्ध्यानेनदेवतामि

सुकुमारींसुजातांगींरत्नगर्भगृहोचितां। तप्यमानामिवोष्णेनमृणालीमचिरोद्धृतां॥१७॥ गृहीतांलाडितांस्तंभेयूथपेन
विनाकृतां। निश्वसंतींसुदुःखार्त्तांगजराजवधूमिव॥१८॥ एकयादीर्घयावेण्याशोभमानामयत्नतः। नीलयानीरदा
पायेवनराज्यामहीमिव॥१९॥ उपवासेनशोकेनध्यानेनचभयेनच। परिक्षीणांकृशांदीनामल्पाहारांतपोधनां॥२०॥ आ
याचमानांदुःखार्त्तांप्रांजलिंदेवतामिव। भावेनरघुमुख्यस्यदशग्रीवपराभवं॥२१॥ समीक्षमाणांरुदतीमनिंदितांसु
पक्ष्मताम्रायतशुक्ललोचनां। अनुव्रतांराममतीवमैथिलींप्रलोभयामासवधायरावणः॥२२॥ इत्यार्षेश्रीमद्रामाय
णेसुंदरकांडेएकोनविंशःसर्गः॥१९॥ सतांपरिहृतांदीनांनिरानंदांतपस्विनीं। साकारैर्मधुरैर्वाक्यैर्न्यदर्शयतरा
वणः॥१॥ मांदृष्ट्वानागनासोरुगूहमानास्तनोदरं। अदर्शनमिवात्मानंभयान्नेतुंत्वमिच्छसि॥२॥

वस्वार्थेइवस्वकुलदेवतामे
वोद्दिश्यप्रांजलिंकृतनमस्कारां॥२१॥ क्रोधेनरोदनेनवाताम्रेप्रांतेशुक्लेलोचनेयस्यास्तां·वधायतावन्मात्रफलकमेवनतुस्वेष्टफलक
मितितात्पर्यं॥२२॥ आरवरमानः। इतिरा॰श्रीरा॰सुं॰एकोनविंशःसर्गः॥१९॥ परिहृतांराक्षसीभिरितिशेषः साकारैःसाभिप्रायैःआकारस्त्विंगि

ताकृती·न्यदर्शयतस्वाभिप्रायमितिशेषः॥१॥ नागोगजःस्तनोदरंगूहमाना
भयादिवभयादेवात्मानंस्वशरीरमदर्शनंनेतुमिच्छसि·तांकिमितिशेषः॥२॥

नेवं भीतिर्मन्तव्येत्युक्तेत्याह · कामयेइत्यादि ॥३॥ किमिदानीमदतिरिक्तपुरुषान्तरजं नवभयं अत्र मम स्पर्शो धर्महानिजं नावा इत्याह नेहेति मत्तः मदागमनात्समुत्थितं प्रस्तु
षान्तरागमनसंभावनया जातं भयं व्यपसर्पतु अन्येषामभावात् ॥४॥ नान्यइत्याह · स्वधर्मइति · नं स्वधर्ममाहगमनं वेति चानुकूल्यं संपादयति शेषः संप्रमथ्य वता
त्कृत्य एवं स्वधर्मत्वान्मम नाधर्मः बलात्कारे वा स्वतंत्रत्वात् स्त्रिया अपि न दोष इति भावः ॥५॥ एवं च एवमपि बलात्कारपक्षे तव मम च दोषाभावेपि तस्य पक्षस्य

कामये त्वां विशालाक्षि बहुमन्यस्व मां प्रिये। सर्वांगगुणसंपन्ने सर्वलोकमनोहरे ॥३॥ नेह किंचिन्मनुष्या वा राक्षसाः कामरूपिणः। व्य
पसर्पतु ते सीते भयं मत्तः समुत्थितं ॥४॥ स्वधर्मो रक्षसां भीरु सर्वदैव न संशयः। गमनं वा परस्त्रीणां हरणं संप्रमथ्य वा ॥५॥ एवं चैव
मकामां त्वां न च स्प्रक्ष्यामि मैथिलि। कामं कामः शरीरे मे यथाकामं प्रवर्त्ततां ॥६॥ देवि नेह भयं कार्यं मयि विश्वसिहि प्रिये। प्रणयस्व च
तत्त्वेन मैवं भूः शोकलालसा ॥७॥ एकवेणी अधःशय्या ध्यानं मलिनमंबरं। अस्थानेप्युपवासश्च नैतान्यौपयिकानि ते ॥८॥ विचित्राणि
च माल्यानि चंदनान्यगुरूणि च। विविधानि च वासांसि दिव्यान्याभरणानि च ॥९॥ महार्हाणि च पानानि शयनान्यासनानि च। गीतं नृत्यं
च वाद्यं च लभ मां प्राप्य मैथिलि ॥१०॥

रसाभाससंपादकत्वात् · अत एवमकामां · अनेन प्रकारेण मयि कामरहितां त्वां मद्विषयेच्छावतीं विना च न तु स्प्रक्ष्यामि स्
वं चैतदकामां त्वामिति पाठे एतद्रक्षोधर्मत्वं · एवं च एवमेवमङ्गीकृतरीतिकमेव तथाप्युक्तप्रकारेण त्वामकामां न स्प्रक्ष्यामीत्यर्थः नन्वेवं सति दुःसहा कामपी
डा तव स्यात्तत्राह · काममिति · कामो मन्मथः यथाकामं यथेष्टं कामं मद्विषयेच्छां प्रवर्त्ततां प्रवर्त्तयात्वित्यर्थः ॥६॥ अतः सर्वथा भयं न कार्यमित्याह देवीति ·
देवि सर्वतः पुरस्से इह मयि मद्विषये प्रणयस्व संमाननं कुरु संमाननेन यतेरात्मने यद् ॥७॥ अधःशय्या भूशयनं नौपयिकानि न पुरुषार्थोपयु
क्तानि ॥८॥ मां प्राप्य विचित्रमाल्यादीनि लभस्वेत्यर्थः ॥९॥१०॥ श्रीरामाय रामचन्द्राय नमः ॥ छ ॥ ॥ छ ॥ ॥

अनर्हाभूषणानामितिशेषः सुविग्रहे इति संबुद्धिः ॥ ११ ॥ अतिवर्तते अतिक्रम्य गच्छति स्रोतस्विनो जलप्रवाहाः स्रोतः तेन प्रवहज्जलं अतोभुंक्ष्वभोगानि
तिशेषः ॥ १२ ॥ रूपकर्त्रादिव्यरूपस्रष्टात्वांकृत्वानिर्माय उपरतो दिव्यरूपनिर्माणादिरत इतिमन्ये उत्प्रेक्षायां हेतुः हि यतस्तवरूपोपमानास्ति यदिपुनः
स उत्तमरूपनिर्माणोयमेतस्मादेवतवोपमेत्याशयः ॥ १३ ॥ कोनातिवर्त्ततेक्षुभ्यतेत्यर्थः कः पुमाननिवर्त्तेतिपाठे कामवशतामतिक्रम्य कोवर्त्ततेत्य

स्त्रीरत्नमसि मैवंभूः कुरुगात्रेषुभूषणां । मांप्राप्य हि कथं वा स्यास्त्वमनर्हा सुविग्रहे ॥ ११ ॥ इदं ते चारुसंजातं यौवनं ह्यतिवर्तते । य
दतीतं पुनर्नैति स्रोतः स्रोतस्विनामिव ॥ १२ ॥ त्वां कृत्वोपरतो मन्ये रूपकर्ता स विश्वकृत् । न हि रूपोपमा ह्यन्या तवास्ति शुभदर्शने
१३ ॥ त्वां समासाद्य वैदेहि रूपयौवनशालिनीं । कः पुमान्नातिवर्तेत साक्षादपि पितामहः ॥ १४ ॥ यद्यत्पश्यामि ते गात्रं शीतांशुसदृ
शानने । तस्मिंस्तस्मिन्पृथुश्रोणि चक्षुर्मम निबध्यते ॥ १५ ॥ भव मैथिलि भार्या मे मोहमेनं विसर्जय । बह्वीनामुत्तमस्त्रीणां मम
ग्रमहिषी भव ॥ १६ ॥ लोकेभ्यो यानि रत्नानि संप्रमथ्याहृतानि मे । तानि ते भीरु सर्वाणि राज्यं चैव ददामि ते ॥ १७ ॥ विजित्य पृथि
वीं सर्वां नानानगरमालिनीं । जनकाय प्रदास्यामि तव हेतोर्विलासिनि ॥ १८ ॥ नेह पश्यामि लोकेऽन्यं यो मे प्रतिबलो भवेत् । पश्य
मे सुमहद्वीर्यमप्रतिद्वंद्वमाहवे ॥ १९ ॥ असकृत्संयुगे भग्ना मया विमृदितध्वजाः । अशक्ताः प्रत्यनीकेषु स्थातुं मम सुराऽसुराः ॥ २० ॥
इच्छ मां क्रियतामद्य प्रतिकर्म तवोत्तमं । सुप्रभाण्यवसज्जंतां तवांगे भूषणानि हि ॥ २१ ॥

र्थः ॥ १४ ॥ निबध्यते बद्धं जायते ॥ १५ ॥ मोहं नैनं दृशा भ
विष्यामीति बुद्धिं ॥ १६ ॥ ७ ॥ तव हेतोस्त्वत्प्रीत्यर्थं ॥ १८ ॥ प्रतिबलो युद्धे जेता ॥ १९ ॥ प्रत्यनीकेषु प्रतिसैनिकभावेषु ॥ २० ॥ प्रतिकर्म प्रसाधनमलंक

प्रतिकर्मणायुक्तं ते रूपं पश्यामि भाविकमनालंकारः दाक्षिण्येन मद्विषयकक्षमया प्रतिकर्माभिसंयुक्ता भवेति शेषः ॥२२॥ २३॥ ललस्व ईप्सां कुरु·
मत्प्रसादात् मयि प्रसादात्· ललंताः मदीयाज्ञानिन प्रभावेन वर्द्धमानायाः ॥२४॥ ऋद्धिं पराक्रमादिसंपदं श्रियं धनादिसंपदं ॥२५॥ निक्षिप्तविजय
:निरस्तविजयसाधनः अत एव गतश्रीत्वादिगुणः जीवनस्यैव संदेहे पराक्रमादिसंभावना दूरत इत्यर्थः ॥२६॥ द्रष्टुं वापि प्राप्तिसुदूरमरेत्यर्थः उ

साधु पश्यामि ते रूपं संयुक्तं प्रतिकर्मणा· प्रतिकर्माभिसंयुक्ता दाक्षिण्येन वरानने ॥२२॥ भुंक्ष्व भोगान्यथाकामं पिब भीरु रमस्व
च ॥ यथेष्टं च प्रयच्छ त्वं पृथिवीं वा धनानि च ॥२३॥ ललस्व मयि विस्रब्धा धृष्टमाज्ञापयस्व च ॥ मत्प्रसादाल्ललंत्याश्च ललतां बांधवा
स्तव ॥२४॥ ऋद्धिं ममानुपश्य त्वं श्रियं भद्रे यशस्विनि ॥ किं करिष्यसि रामेण सुभगे चीरवासिना ॥२५॥ निक्षिप्तविजयो रामो
गतश्रीर्वनगोचरः ॥ व्रती स्थंडिलशायी च शंके जीवति वा न वा ॥२६॥ नहि वैदेहि रामस्त्वां द्रष्टुं वाप्युपलप्स्यते ॥ पुरो बलाके
रसितं मेघैर्ज्योत्स्नामिवावृतां ॥२७॥ न चापि मम हस्तात्त्वां प्राप्तुमर्हति राघवः ॥ हिरण्यकशिपुः कीर्तिमिंद्रहस्तगतामिव ॥२८॥ चा
रुस्मिते चारुदति चारुनेत्रे विलासिनि ॥ मनो हरसि मे भीरु सुपर्णः पन्नगं यथा ॥२९॥ क्लिष्टकौशेयवसनां तन्वीमप्यनलंकृतां·
त्वां दृष्ट्वा स्वेषु दारेषु रतिं नोपलभाम्यहं ॥३०॥ अंतःपुरनिवासिन्यः स्त्रियः सर्वगुणान्विताः ॥ यावंत्यो मम सर्वासामैश्वर्यं कुरु जानकि ॥३१॥

पलप्स्यते व्यसनयेन इयन् समर्थो भविष्यतीत्यर्थः पुरो बलाकैः अग्रेसर बलाकैः ॥२७॥ इंद्रहस्तगतां कीर्तिं कीर्तितुल्यां भार्यामिंद्रहृतां नारदमुखेन प्रार्थन
याय यथा हिरण्यकशिपुः प्राप्तवान्· नैवं त्वां रामः प्राप्स्यतीति भावः इयं च कथा भागवते प्रसिद्धेतीत्यर्थः ॥२८॥ २९॥ स्वेषु दारेषु मंदोदर्यामपि ॥३०॥ स्पष्ट

॥३२॥ [illegible]

270

३२॥ ३३ ॥ ३४ ॥ प्रदिश देहि· अभितो मेदिनीमपि इष्टेभ्यो देहि· लल ईप्सावतो भव· ललं तु प्राप्त मम मत्तोपि नाम वं तु ॥ ३५ ॥ ३६ ॥ तालमानः ॥ इति रामाभिरामे श्री
रा० सुं० द० विंशः सर्गः ॥ २० ॥ तस्येति दीनमिति क्रियाविशेषणं ॥ १ ॥ पतिमेव चिंतयन्ती प्रत्युवाचेति संबंधः ॥ २ ॥ तृणमंतरतः कृत्वा· परपुरुषस्य सा
क्षात्संभाषणानर्हत्वात्· भूम्यां किंचिदंतर्धायमत्वा द्विविसर्जनवत्· तृणांतरेणास्य सुखे प्रत्युत्तरदानं कथमस्य दुरात्मनो रजस्तमोभ्यां तस्य म

मम ह्यसितकेशांते त्रैलोक्यप्रवरस्त्रियः ॥ तास्त्वां परिचरिष्यंति श्रियमप्सरसो यथा ॥ ३२ ॥ यानि वैश्रवणे सुभ्रु रत्नानि च धनानि च
तानि लोकांश्च सुश्रोणि मया भुंक्ष्व यथासुखं ॥ ३३ ॥ न रामस्तपसा देवि न बले न च विक्रमैः ॥ न धनेन मया तुल्यस्तेजसा यशसापि वा
३४ ॥ पिब विहर रमस्व भुंक्ष्व भोगान् धननिचयं प्रदिशामि मेदिनीं च ॥ मयि लल ललने यथासुखं त्वं त्वयि च समेत्य ललंतु बांधवास्ते·
३५ ॥ कुसुमिततरुजालसंततानि भ्रमरयुतानि समुद्रतीरजानि ॥ कनकविमलहारभूषितांगी विहर मया सह भीरु काननानि
३६ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे विंशः सर्गः ॥ २० ॥ तस्य तद्वचनं श्रुत्वा सीता रौद्रस्य रक्षसः ॥ आर्ता दीनस्वरा दीनं प्रत्युवा
च ततः शनैः ॥ १ ॥ दुःखार्ता रुदती सीता वेपमाना तपस्विनी ॥ चिंतयंती वरारोहा पतिमेव पतिव्रता ॥ २ ॥ तृणमंतरतः कृत्वा प्र
त्युवाच शुचिस्मिता ॥ निवर्तय मनो मत्तः स्वजने प्रीयतां मनः ॥ ३ ॥

पि दुराशेति शुचिस्मिता· प्रत्युवाचेति पुनरभिधानं प्रकारविशेषकथना
र्थं स्वेनत्वरीकृतप्राणतया तृणतुल्यतया रावणस्य ग्रहणाच्च निर्भयप्रत्युत्तरदानमिति बोधितं· नं देवाहमत्तो मनो निवर्तय स्वजने प्रीय
तां प्रीतिं कुरु· स्वजनः स्वभार्यादिः कुतोत या मनः परादेः यौन कृतांनदोषभाक् वर्णनीय मयीभावाच्च· कुबेरपि तादृशं न दोषाय ॥ ३ ॥

सिद्धिं वृत्तलोकख्यातिं· एकपत्न्या पतिव्रतया अकार्यं परपुरुषस्पर्शरूपं ॥४॥ संप्राप्तया विवाहसंबंधेनेति शेषः ॥५॥ पृष्ठतः कृत्वा पराङ्मुखस्थिता
औपयिकी भोगभोग्या तत्र हेतुः सतीय परभार्येति ॥६॥ धर्मसाध्विति· परस्परसाधूनां व्रतं चर यथा तव मंदोदर्याः परपरिग्रहे रादुःखं स्वस्वमन्ये
षामपि स्वदाराणां परपरिग्रहे दुःखमिति ज्ञात्वा अन्येषां दारा रक्ष्याः परिहार्याः ॥७॥ यथा स्वदाराणां स्वस्मिन्नेव रमे इहामुत्र च सुखमिति स्व
स्य निश्चयस्तथा परेषामपीत्यर्थे आत्मानमेव दृष्टान्तीकृत्य स्वेष्वेव रम्यतां अन्यथा उभयोरपि धर्मलोप इति भावः ॥ विपक्षे बाधकांतरमप्या

न मां प्रार्थयितुं युक्तस्त्वं सिद्धिमिव पापकृत् ॥ अकार्यं न मया कार्यमेकपत्न्या विगर्हितं ॥४॥ कुलं संप्राप्तया पुण्यं कुले महति
जातया ॥ एवमुक्त्वा तु वैदेही रावणं तं यशस्विनी ॥५॥ रावणं पृष्ठतः कृत्वा भूयो वचनमब्रवीत् ॥ नाहमौपयिकी भार्या परभा
र्या सती तव ॥६॥ साधु धर्ममवेक्षस्व साधु साधुव्रतं चर ॥ यथा तव तथान्येषां रक्ष्या दारा निशाचर ॥७॥ आत्मानमुपमां कृत्वा स्वे
षु दारेषु रम्यतां ॥ अतुष्टं स्वेषु दारेषु चपलं चपलेंद्रियं ॥८॥ नयंति निकृतिप्रज्ञं परदाराः पराभवं ॥ इह संतो न वा संति
सतो वा नानुवर्तसे ॥ यथा हि विपरीता ते बुद्धिराचारवर्जिता ॥९॥

ह· अतुष्टमिति· निकृतिप्रज्ञं निकृतिरपकारः साधुकृताधिकारस्त
दास्पदप्रज्ञं· पराभवमजयरूपं· आतुरादिक्षयरूपं च ॥८॥ इह लंकानगरे संतः इहलोकपरलोकहितवक्तारो न वा नैव संति सन्तु वा तेषु
नान्वनुवर्तसे तत्समीपं न गच्छसि तेषां पि वा न पृच्छसि यथा ते विपरीता बुद्धिः आचारवर्जिता विहितकर्मविमुखी अविहितसंमुखी च ॥९॥

रं ३

सनुरूपनदुपदेशसत्वेपिमम्लोन्मूलनविकीर्षुर्दैववशात्त्वंनश्रृणोषीत्याहवत्स इति· विचक्षणौर्भाविकार्यपर्यालोचनचतुरैः पथ्यंहितोदर्कंवचउक्तमपि मिथ्याप्रणीतात्मा· तद्वचोमिथ्यावस्तुभूतमित्यश्रद्धयाप्रणीतः प्राप्तआत्माबुद्धिर्येनतादृशोराक्षसानामभावायनाशाय. नप्रतिपद्यसेनपरिगृह्णासि १०॥ नतुमयासज्जनोपदेशाग्रहेकृतेराक्षसनाशप्रसंगइत्यत्रात्रैवकृतोकस्थितिमाह अकृतेति· अकृतात्मानंसदुपदेशाग्राहिबुद्धिं॥११॥ तथैवेतिराजापराधतोऽशेषप्रजा· नाशस्यलोकप्रसिद्धत्वादितिभावः॥१२॥ किंचसज्जनोपदेशमश्रावतोनाशंसज्जनोनुमोदत इत्याहः· स्वकृतैरिति स्वकृ

वचोमिथ्याप्रणीतात्मा पथ्यमुक्तंविचक्षणैः॥ राक्षसानामभावायत्वंवानप्रतिपद्यसे॥१०॥ अकृतात्मानमासाद्यराजानमनयेरतं· समृद्धानिविनश्यन्तिराष्ट्राणिनगराणिच॥११॥ तथैवत्वांसमासाद्यलंकारत्नौघसंकुला॥ अपराधात्तवैकस्यनचिराद्विनशिष्यति॥१२॥ स्वकृतैर्हन्यमानस्यरावणादीर्घदर्शिनः॥ अभिनंदंतिभूतानिविनाशेपापकर्मणः॥१३॥ एवंत्वांपापकर्माणंवक्ष्यंतिनिकृताजनाः॥ दिष्ट्यैतद्व्यसनंप्राप्तोरौद्रइत्येवहर्षिताः॥१४॥ शकालोभयितुंनाहमैश्वर्येणधनेनवा॥ अनन्याराघवेणाहंभास्करेणयथाप्रभा॥१५॥ उपधायभुजंतस्यलोकनाथस्यसत्कृतं॥ कथंनामोपधास्यामिभुजमन्यस्यकस्यचित्॥१६॥

तैर्दुष्कृतैर्हन्यमानस्यावश्यप्राप्तनाशस्यादीर्घदर्शिनोभाव्यनर्थदर्शनासमर्थस्यविनाशेउपस्थितेभूतानिसर्वप्राणिनोनंदंति॥१३॥ एवंनिराकृतास्त्वयाक्लेशिताःसर्वजनाःएतद्व्यसनंस्वकृतप्राप्तनाशं॥१४॥ ऐश्वर्यकृतइत्यादियदुक्तंरावणेनप्रलोभनायतत्प्रत्याख्याति· शक्येति· अनन्याभिन्नात्वत्त्वाभाववतीप्रलोभनाशक्यात्वमेवस्पष्टयति उपधायेति· उपधानंकृत्वेतिसहशयित्वेतियावत्कस्यचिदन्यस्य॥१५॥ १६॥

औपयिकी योग्या व्रतस्नातस्य ब्रह्मचर्यव्रतस्नातस्य कृतसमावर्त्तनस्य यथाशास्त्रं मत्पाणिग्रहणं कृतवतः विदितात्मनः ज्ञातस्वमतस्य ज्ञातपुरुषार्थसाधनस्य च
तस्यैवाहं योग्या विप्रस्य विद्येव ब्रह्मविद्येव ब्रह्मविद्या यथा ब्राह्मणस्यैवासाधारणी स्वं न्यायप्राप्तं न तु संन्यासेन तस्यैवाधिकारात् ब्रह्मविद्यायां ब्राह्मणस्यै
वाधिकार इति भावः अन्ये तु विप्रपदं त्रैवर्णिकपरं त्रैवर्णिकस्यैव ब्रह्मविद्यायामधिकारः अत एव धीरस्येति क्वचित्पाठ इत्याहुः ॥१७॥ हे रावण मां
रामेण समानय तदेव ते साधु वने वाशितया कामुकया करेण्वा सार्धं गजाधिपमिव उपमानोपमेययोर्वाक्ययोर्वैषम्यं तूक्तिविरहिण्युक्तित्वान्न दोषावहं क

अहमौपयिकी भार्या तस्यैव वसुधापतेः ॥ व्रतस्नातस्य विद्येव विप्रस्य विदितात्मनः ॥१७॥ साधु रावण रामेण मां समानय दुःखितां ॥ वने
वाशितया सार्धं करेण्वेव गजाधिपं ॥१८॥ मित्रमौपयिकं कर्तुं रामः स्थानं परीप्सता ॥ वधं चानिच्छता घोरं त्वयासौ पुरुषर्षभः ॥१९॥
विदितः सर्वधर्मज्ञः शरणागतवत्सलः ॥ तेन मैत्री भवतु ते यदि जीवितुमिच्छसि ॥२०॥ प्रसादयस्व त्वं चैनं शरणागतवत्सलं ॥ मां चा
स्मै प्रयतो भूत्वा निर्यातयितुमर्हसि ॥२१॥ एवं हि ते भवेत्स्वस्ति संप्रदाय रघूत्तमे ॥ अन्यथा त्वं हि कुर्वाणो परां प्राप्स्यसि चापदम् ॥२२॥
वर्जयेद्वज्रमुत्सृष्टं वर्जयेदन्तकश्चिरं ॥ त्वद्विधं न तु संक्रुद्धो लोकनाथः स राघवः ॥२३॥

रेणुं गजाधिपे नेतुं वक्तुमुचितं ॥१८॥ बुधं तरं चोपदिश
तिमित्रमिति स्थानं परीप्सता लंकां रिरक्षिषता आत्मनो वधं च घोरं सकलंकं दुःखपीडाकरमनिच्छता त्वया पुरुषर्षभोऽसौ रामो मित्रं कर्तुमौपयिकं यु
क्तं ॥१९॥ कथमेवमपराद्धस्य मे तेन मैत्रीत्यत्राह विदित इति यतः सर्वधर्मज्ञ इति शत्रुरपि शरणागतो रक्षणीय इति धर्मज्ञत्वेन शरणागतवत्सलत्वे
न च विदितः प्रसिद्धः अतस्तेन मैत्री भवतु तेन मैत्री प्राप्तकालेत्यर्थः ॥२०॥ अत एव शरणागतवत्सलं त्वं प्रसादयस्व मां चास्मै निर्यातयितुं दातुमर्ह
सि ॥२१॥ संप्रदायेति मामिति शेषः ॥२२॥ मत्समर्पणं विना सर्वथा नवजीवनं नास्तीत्याह वर्जयेदिति त्वद्विधं शरणागतं न नाशयेदित्यर्थः राघवो न तु वर्ज

[illegible] ॥२३॥

272

महास्वनंमहान्तंनादं·नादोहिकश्चित्क्रुद्धधर्मः प्रतिशब्दरूपः श्रोष्यसियदिमांनददासीतिभावः॥२४॥ रामलक्ष्मणालक्षितास्तन्नामांकाइत्यर्थःकंकवा
ससोवाणाः असंपातमनवकाशं·असंबाधमितिपाठेराक्षससंमर्दरहितं॥२६॥ राक्षसेंद्ररूपान्महासर्पान्·उद्धरणशीघ्रउपमावैनतेयइवेति॥२७॥
नचापिममहस्तात्त्वांप्राप्तुमर्हसिराघवइत्यस्योत्तरमाहायनेष्यतीति॥२८॥ हतस्थानेहतास्पदे॥२९॥ नरसिंहयोःशून्यमाश्रमंप्रविश्यपयन्हु
तंनदसाध्वृत्तिःकिलेत्यर्थः·गोचरंगतयोःमायामृगहतानन्तरागतयोःगोचरंवनप्रदेशंगतयोरितिवार्थः॥३०॥ यस्माद्रामलक्ष्मणयोःगंधमु

रामस्यधनुषःशब्दंश्रोष्यसित्वंमहास्वनं॥ शतक्रतुविसृष्टस्यनिर्घोषमशनेरिव॥२४॥ इहशीघ्रंसुपर्वाणोज्वलितास्याइवोरगाः
इषवोनिपतिष्यंतिरामलक्ष्मणलक्षिताः॥२५॥ रक्षांसिनिहनिष्यंतःपुर्यामस्यांनसंशयः॥ असंपातंकरिष्यंतिपतंतःकंकवाससः
२६॥ राक्षसेंद्रमहासर्पान्सरामगरुडोमहान्॥ उद्धरिष्यतिवेगेनवैनतेयइवोरगान्॥२७॥ अपनेष्यतिमांभर्तात्वत्तःशीघ्रमरिंद
मः॥ असुरेभ्यःश्रियंदीप्तांविष्णुस्त्रिभिरिवक्रमैः॥२८॥ जनस्थानेहतस्थानेनिहतेरक्षसांबले॥ अशक्तेनत्वयारक्षःकृतमेतदसा
धुवै॥२९॥ आश्रमंतत्तयोःशून्यंप्रविश्यनरसिंहयोः॥ गोचरंगतयोर्भ्रात्रोरपनीतात्वयाधम॥३०॥ नहिगंधमुपाघ्रायरामलक्ष्म
णयोस्त्वया॥ शक्यंसंदर्शनेस्थातुंशुनाशार्दूलयोरिव॥३१॥ [illegible]

पाघ्रायशार्दूलयोःसंदर्शनेशुनेवसमक्षंस्थातुंत्वयानशक्यं॥३१॥ तस्यअधमवलस्याधमकृतस्यवृत्तेअग्रेपिताभ्यांविग्रहेकलहेप्रसक्तेसतियुगग्रह
णांमहायसंपत्तिरस्थिरा·जनस्थानवलसहायसंपत्तिवत्·तस्मात्तेनयुद्धेनवानिग्रहएव·वृत्रसंबंधिनएकस्यबाहोर्बाभ्यांमिंद्रबाहुभ्यांयुद्धेसतिबाहुप
राजयवत्·वज्रच्छिन्नैकबाहुर्वृत्रोवहुकालमिंद्रेणसहैकबाहुनायुद्धंकृतवान्पराजितश्चेतिभागवतेप्रसिद्धं॥३२॥ छ ॥ ॥

तस्मिंस्तेविग्रहेताभ्यांयुगग्रहणमस्थिरम्॥ वृत्रस्येवेन्द्रबाहुभ्यांबाहोरेकस्यविग्रहे॥३२॥१

॥ रा.सुं. ॥
॥ ६० ॥

मेनाथः स राम इत्यन्वयः ॥ ३३ ॥ कुवेरस्यालयं गिरिं कैलासं कैलासवद्गुणमभेद्युर्ध्वंधिःस्थसकललोकोपलक्षणं कालहतस्त्वमशनेः संवंधान्महाद्रुम इव दाश
रथेः संवंधाद्विमोक्ष्यसे प्राणानिति शेषः विमोक्ष्यसे इतियाक्कः पाठ इति कतक ॥ ३४ ॥ वर्गमानः ॥ इति श्री रा० सुंद० एकविंशः सर्गः ॥ २१ ॥ प्रियदर्शना सीता प्र
ति अनुनयोक्तिं कृत्वा ततो विप्रियमाहेति संवंधः ॥ १ ॥ लोके स्त्रीणां सांत्वयिता पुमान् यथा यथा सांत्वयति तथा तथा तत्र सांत्वानुसारेण स स्त्रीणां वश्य इष्टो
भवति त्वयि तु यथा यथाहं प्रियं वक्ता भवं तथा तथा त्वया परिभूत एवास्मीति शेषः ॥ २ ॥ एवं च त्वद्विषयेनापि प्राप्तु उत्पन्नं क्रोधं क्रोधकार्यं त्वद्विष

क्षिप्रं तव स नाथो मे रामः सौमित्रिणा सह ॥ तोयमल्पमिवादित्यः प्राणानादास्यते शरैः ॥ ३३ ॥ गिरिं कुवेरस्य गतोऽथवालयं सभां ग
तो वा वरुणस्य राज्ञः ॥ असंशयं दाशरथेर्विमोक्ष्यसे महाद्रुमः कालहतोऽशनेरिव ॥ ३४ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे एक
विंशः सर्गः ॥ २१ ॥ सीताया वचनं श्रुत्वा परुषं राक्षसेश्वरः ॥ प्रत्युवाच ततः सीतां विप्रियं प्रियदर्शनां ॥ १ ॥ यथा यथा सांत्वयिता वश्यः
स्त्रीणां तथा तथा ॥ यथा यथा प्रियं वक्ता परिभूतस्तथा तथा ॥ २ ॥ संनियच्छति मे क्रोधं त्वयि कामः समुत्थितः ॥ द्रवतो मार्गमासाद्य
हयानिव सुसारथिः ॥ ३ ॥ वामः कामो मनुष्याणां यस्मिन्किल निबध्यते ॥ जने तस्मिंस्त्वनुक्रोशः स्नेहश्च किल जायते ॥ ४ ॥ ६ ॥

२७३

॥ राम. ॥
॥ ६० ॥

ये समुत्थितः कामो नियच्छति निरुणद्धि न च हंस्यतः द्रवत इति अमार्गमासाद्य द्रवतो धावतो हयान्सुसारथिरिव ॥ ३ ॥ ननु विपरीतं क्रोध एव किं न
कामं रुणद्धि इत्यत्र कामस्योत्कर्षमाहेत्याह वाम इति क्रूर इत्यर्थः सव्ये क्रौर्ये सुंदरे च वाम इति कोशः कामक्रौर्यमेवाह यस्मिन्निति परम क्रोधवि
षयेपि यत्र जने कामो निवध्यते तत्र जने अनुक्रोशो दयास्नेहश्च जायते तस्मात्क्रोधात्काम उत्कटः क्रूरत्ववानित्यर्थः ॥ ४ ॥ श्रीरामायनमः ॥ ६

एतस्मादिति उत्कटकामविषयत्वादित्यर्थः मिथ्याप्रव्रजनेन निष्प्रयोजनमेव भोगत्यागरूपप्रव्रजनमार्गे रतां मिथ्याप्रव्रजिते इति पाठे रामे रतामित्यर्थः
७ ॥ अवधिः मासान् द्वादश भामिनीत्यारण्यकांडोक्तस्तन्मध्ये द्वौ मासाववशिष्टौ तौ मया रक्षणीयौ अद्यापि वर्त्तते दशमो मासो द्वौ तु शेषौ प्लवंगमेति सी
तावक्ष्यति तथा व्यत्यातरत्वात् मासद्वयरक्षणोक्तिरविरुद्धा ॥८॥ प्रातराशः प्रातःकालिकं भोजनं ॥९॥ देवगंधर्वकन्याः सीतावदेववलाहत्याइ

एतस्मात्कारणात्त्वां घातयामि वरानने ॥ वधार्हामवमानार्हां मिथ्याप्रव्रजने रतां ॥५॥ परुषाणीह वाक्यानि यानि यानि ब्रवी
षि मां ॥ तेषु तेषु वधो युक्तस्तव मैथिलि दारुणः ॥६॥ एवमुक्त्वा तु वैदेहीं रावणो राक्षसाधिपः ॥ क्रोधसंरंभसंयुक्तः सीतामु
त्तरमब्रवीत् ॥७॥ द्वौ मासौ रक्षितव्यौ मे योवधिस्ते मया कृतः ॥ ततः शयनमारोह मम त्वं वरवर्णिनि ॥८॥ द्वाभ्यामूर्ध्वं तु मा
साभ्यां भर्त्तारं मामनिच्छतीं ॥ मम त्वां प्रातराशार्थे सूदाश्छेत्स्यंति खंडशः ॥९॥ तां भर्त्स्यमानां संप्रेक्ष्य राक्षसेंद्रेण जानकीं ॥ देवगं
धर्वकन्यास्ता विषेदुर्विकृतेक्षणाः ॥१०॥ ओष्ठप्रकारैरपरा नेत्रैर्वक्त्रैस्तथापरा ॥ सीतामाश्वासयामासुस्तर्जितां तेन रक्षसा ॥११॥
ताभिराश्वासिता सीता रावणं राक्षसाधिपं ॥ उवाचात्महितं वाक्यं वृत्तशौंडीर्यगर्वितम् ॥१२॥ नूनं न ते जनः कश्चिदस्मिन्निःश्रे
यसि स्थितः ॥ निवारयति यो न त्वां कर्मणोऽस्माद्विगर्हितात् ॥१३॥

त्यर्थः ॥१०॥ ओष्ठप्रकारैः वराकोयं किं करिष्यति न भेतव्यमित्येवमोष्ठाग्रोत्क्षेपणै
नेत्रैः अक्षिनिमीलनोन्मीलनवद्भिः वक्त्रैः मुखचलनैः सीतामाश्वासयामासुः ॥११॥ आत्महितं रावणात्मनो हितं वृत्तेन सदाचारेण शौंडीर्येण अतिशौर्ये
णाच संजातगर्वं ॥१२॥ अस्मिन्नगरे नैतवनिश्रेयसि अभ्युदयसंपादने स्थितो जनो नूनं न कश्चिदस्ति यस्मात्त्वामस्माद्विगर्हितात्कर्मणो न कोपि निवारय

मनसापि कः प्रार्थयेत् किं पुनर्वचसेति भावः ॥ १४ ॥ यन्मायं मम शयनमारोहेत्यादिरूपं ह्यगतो मोक्ष्यसे न त्वत्ताध्यसमूलनाशस्य त्वया परिहारोऽशक्य इत्यर्थः ॥ १५ ॥ दृप्तो मातंगः शशश्च यदा वने दैवात्सहितौ युयुत्सू भवतः तयोश्च शशो यथातिक्षुद्रस्तथा रामेरासंयुगे त्वं शशावत्क्षुद्रः रामो गज इत्यर्थः ॥ १६ ॥ स त्वं रामादतिक्षुद्रः क्षिपन् निंदन् इह मत्सन्निधौ यावन्नोपगच्छसि तावदिह निंदन्न लज्जसे इत्यन्वयः ॥ १७ ॥ १८ ॥ १९ ॥ नतु न पतितेन शौर्यती

मां हि धर्मात्मनः पत्नीं शचीमिव शचीपतेः ॥ त्वदन्यस्त्रिषु लोकेषु प्रार्थयेन्मनसापि कः ॥ १४ ॥ राक्षसाधम रामस्य भार्याममिततेजसः ॥ उक्तवानसि यत्पापं क्व गतस्तस्य मोक्ष्यसे ॥ १५ ॥ यथा दृप्तश्च मातंगः शशश्च सहितौ वने ॥ तथा द्विरदवद्रामस्त्वं नीच शशवत्स्मृतः ॥ १६ ॥ स त्वमिक्ष्वाकुनाथं वै क्षिपन्निह न लज्जसे ॥ चक्षुषो विषये तस्य न यावदुपगच्छसि ॥ १७ ॥ इमे ते नयने क्रूरे विरूपे कृष्णपिंगले ॥ क्षितौ न पतिते कस्मान्मामनार्य निरीक्षतः ॥ १८ ॥ तस्य धर्मात्मनः पत्नीं स्नुषां दशरथस्य च ॥ कथं व्याहरतो मां ते न जिह्वा व्यवशीर्यति ॥ १९ ॥ असंदेशात्तु रामस्य तपसश्चानुपालनात् ॥ न त्वां कुर्मि दशग्रीव भस्म भस्मार्हतेजसा ॥ २० ॥ नापहर्तुमहं शक्या तस्य रामस्य धीमतः ॥ विधिस्तव वधार्थाय विहितो नात्र संशयः ॥ २१ ॥ शूरेण धनदभ्रात्रा बलैः समुदितेन वा ॥ अपोह्य रामं कस्माद्धि दारचौर्यं त्वया कृतं ॥ २२ ॥

शक्तिर्यदि पातिव्रत्यफलात्तर्हि तथापि त्वहं कस्मान्न करोषीत्यत्राह ॥ असंदेशादिति शापविषये रामाज्ञाभावात् शापसामर्थ्येपि तपोनुपालनाच्चोरपि भस्मार्हे राभस्मजनकत्वशक्तिमता तेजसा स्वीययापि तुल्यतेजसा न भस्मं कुर्मि करोमि ॥ २० ॥ अहं तस्य रामस्य भार्या त्वयापहर्तुं न शक्या ऽथापि अयं विधिः परहरणरूपविधिस्तव वधार्थाय दैवेन विहितोऽत्र न संशयः ॥ २१ ॥ शूरेणेत्याद्युग्मकं सोक्तिः अपोह्य मारीचमायया पसार्य कस्माद्दारचौर्यं त्वया कृतं तस्माद्धन्तमपूरस्य मित्रमुपहासः चिदिति पादद्वरो ॥ २२ ॥ श्रीरामायनमः

२३॥ सिंहसत्वगतिः सिंहवत्सत्वंपराक्रमोगतिश्चयस्यसः सिंहसंहननइतिपाठांतरं॥२४॥ वलमयंयस्यनाहरशमुक्तवान्॥२५॥ श्रोणिसूत्रेणकटिसू
त्रेणरशनयेत्यर्थः इंद्रनीलनद्धसुवर्णरक्तमणियुक्तत्वाच्चेतस्यमेचकत्वंभुजंगोवासुकिःसहिनीलवर्णइत्याहुःताभ्यांप्रसिद्धपराक्रमाभ्यांभुज
द्वयमेवसर्वदायुद्धादौस्वीकृयाद्दशभुजत्वमितिद्विवचनं·वामदक्षेषुभुजत्वजात्यैकवचनमित्यन्ये॥२७॥ वसंतइवभूषितोपिश्मशानचै

सीतायावचनंश्रुत्वारावणोराक्षसाधिपः॥ विवृत्तनयनेक्रूरेजानकीमन्ववैक्षत॥२३॥ नीलजीमूतसंकाशोमहाभुजशिरोधरः॥ सिं
हसत्वगतिःश्रीमान्दीप्तजिह्वोग्रलोचनः॥२४॥ चलाग्रमुकुटप्रांशुश्चित्रमाल्यानुलेपनः॥ रक्तमाल्यांवरधरस्तप्तांगदविभूष
णः॥२५॥ श्रोणीसूत्रेणमहतामेचकेनसुसंवृतः॥ अमृतोत्पादनेनद्धोभुजंगेनेवमंदरः॥२६॥ ताभ्यांसपरिपूर्णाभ्यांभुजाभ्यां
राक्षसेश्वरः॥ शुशुभेचलसंकाशःशृंगाभ्यामिवमंदरः॥२७॥ तरुणादित्यवर्णाभ्यांकुंडलाभ्यांविभूषितः॥ रक्तपल्लवपुष्पाभ्या
मशोकाभ्यामिवाचलः॥२८॥ सकल्पवृक्षप्रतिमोवसंतइवमूर्त्तिमान्॥ श्मशानचैत्यप्रतिमोभूषितोपिभयंकरः॥२९॥ अवे
क्षमाणोवैदेहींकोपसंरक्तलोचनः॥ उवाचरावणःसीतांभुजंगइवनिःश्वसन्॥३०॥ अनयेनाभिसंपन्नमर्थहीनमनुव्रते॥ ना
शयाम्यहमद्यत्वांसूर्यःसंध्यामिवौजसा॥३१॥ इत्युक्त्वामैथिलींराजारावणःशत्रुरावणः॥ संददर्शततःसर्वाराक्षसीर्घोरदर्शनाः
३२॥ एकाक्षीमेककर्णांचकर्णप्रावरणांतथा॥ गोकर्णींहस्तकर्णींचलंबकर्णीमकर्णिकां॥३३॥

त्यप्रतिमःतद्भयवत्परिहार्यदर्शनः
चैत्यंदेवायतनंश्मशानस्थंभयंकरः॥२९॥३०॥ अनयेनअनीत्यायुक्तं·अर्थहीनंप्रयोजनहीनंअनुव्रतेरामंवानुव्रते इतिसंबोधनं·ईदृशींत्वांनाशयामि·सूर्यउदि

तःसंध्यांतकालिकमंधकारमिव॥३१॥३२॥ एकाक्षींद्विरूपा
दानंव्यक्तिभेदात्॥३३॥

३४॥ भो राक्षस्यो यूयं प्रत्येकं कुरुत· सर्वा मिलित्वा वा तथा कुरुत· प्रतिलोमानुलोमेति· प्रातिकूल्यानुकूल्यव्यवहारैः॥३७॥ आवर्जयत आनुकूल्यं संपादयत॥३८॥ प्रतिगर्जत प्रत्युगर्जत· उपगम्य समीपमागम्य ततः अतिसंतर्जनं दृष्ट्वा सीता यो दृययेति शेषः॥३९॥ परिष्वज्य परिष्वंगेन प्रहारादि

हस्तिपद्यश्वपद्यौ च गोपदीं पादचूलिकां॥ एकाक्षीमेकपादीं च पृथुपादीमपादिकां॥३४॥ अतिमात्रशिरोग्रीवामतिमात्रकुचोदरीं॥ अतिमात्रास्यनेत्रां च दीर्घजिह्वनखामपि॥३५॥ अनासिकां सिंहमुखीं गोमुखीं सूकरीमुखीं॥ यथा मद्वशगा सीता क्षिप्रं भवति जानकी॥३६॥ तथा कुरुत राक्षस्यः सर्वाः क्षिप्रं समेत्य वा॥ प्रतिलोमानुलोमैश्च सामदानादिभेदनैः॥३७॥ आवर्जयत वैदेहीं दंडस्योद्यमनेन च॥ इति प्रतिसमादिश्य राक्षसेंद्रः पुनः पुनः॥३८॥ काममन्युपरीतात्मा जानकीं प्रतिगर्जत॥ उपगम्य ततः क्षिप्रं राक्षसी धान्यमालिनी॥३९॥ परिष्वज्य दशग्रीवमिदं वचनमब्रवीत्॥ मया क्रीड महाराज सीतया किं तवानया॥४०॥ विवर्णया कृपणया मानुष्या राक्षसेश्वर॥ नूनमस्यां महाराज न देवा भोगसत्तमान्॥४१॥ विदधत्यमरश्रेष्ठास्तव बाहुबलार्जितान्॥ अकामां कामयानस्य शरीरमुपतप्यते॥४२॥ इच्छंतीं कामयानस्य प्रीतिर्भवति शोभना॥ एवमुक्तस्तु राक्षस्या समुत्क्षिप्तस्ततो बली॥ प्रहसन्मेघसंकाशो राक्षसः स न्यवर्तत॥४३॥ प्रस्थितः स दशग्रीवः कंपयन्निव मेदिनीं॥ ज्वलद्भास्करसंकाशं प्रविवेश निवेशनं॥४४॥

प्रवृत्तिनिरूप्या॥४०॥४१॥ अमरश्रेष्ठा इंद्रादयो भोगसत्तमान् विदधति नानुमन्यंते· दैवहतेयमहृष्टी नेतिभावः॥४२॥ समुत्क्षिप्त अन्यतोपसारितः प्रहसन् धान्यमालिन्या उचितव्यवहारदर्शनेन अवशात्स्त्रीप्रहारायकीर्तिपरिहारेण च प्रसन्न इत्यर्थः॥४४॥

प्रविष्टुः प्रविविक्षुः ॥ ४५ ॥ ४६ ॥ उह्वावमानः ॥ इति रामाभिरामे श्रीरामीये रा० सुंदरकांडे द्वाविंशः सर्गः ॥ २२ ॥ शत्रून् रावयति हाहाशब्दं कारयतीति शत्रु-
त्रु रावणः ॥ १ ॥ २ ॥ ततः परं रावणागमनादनंतरं लोकोक्रौवा परमिति ॥ ३ ॥ भार्यात्वं भार्याभावं न बहु मन्यसे मोहादिति शेषः ॥ ४ ॥ ततः सर्व-

देवगंधर्वकन्याश्च नागकन्याश्च तास्ततः ॥ परिवार्य दशग्रीवं प्रविशुस्तद्गृहोत्तमं ॥ ४५ ॥ स मैथिलीं धर्मपरामवस्थितां प्रवेपमा-
नां परिभर्त्स्य रावणः ॥ विहाय सीतां मदनेन मोहितः स्वमेव वेश्म प्रविवेश रावणः ॥ ४६ ॥ इत्यार्षे श्रीमद्रामायणे वा० सुंदरकां-
डे द्वाविंशः सर्गः ॥ २२ ॥ इत्युक्त्वा मैथिलीं राजा रावणः शत्रुरावणः ॥ संदिश्य च ततः सर्वा राक्षसीर्निर्जगाम ह ॥ १ ॥ निष्क्रांते रा-
क्षसेंद्रे तु पुनरंतःपुरं गते ॥ राक्षस्यो भीमरूपास्ताः सीतां समभिदुद्रुवुः ॥ २ ॥ ततः सीतामुपागम्य राक्षस्यः क्रोधमूर्छिताः ॥ प-
रं परुषया वाचा वैदेहीमिदमब्रुवन् ॥ ३ ॥ पौलस्त्यस्य वरिष्ठस्य रावणस्य महात्मनः ॥ दशग्रीवस्य भार्यात्वं सीते न बहु मन्यसे
४ ॥ ततस्त्वेकजटा नाम राक्षसी वाक्यमब्रवीत् ॥ आमंत्र्य क्रोधताम्राक्षी सीतां करतलोदरीं ॥ ५ ॥ प्रजापतीनां षण्णां तु च-
तुर्थो यः प्रजापतिः ॥ मानसो ब्रह्मणः पुत्रः पुलस्त्य इति विश्रुतः ॥ ६ ॥ पुलस्त्यस्य तु तेजस्वी महर्षिर्मानसः सुतः ॥ नाम्ना स वि-
श्रवा नाम प्रजापतिसमप्रभः ॥ ७ ॥ तस्य पुत्रो विशालाक्षि रावणः शत्रुरावणः ॥ तस्य त्वं राक्षसेंद्रस्य भार्या भवितुमर्हसि
८ ॥ मयोक्तं चारुसर्वांगि वाक्यं किं नानुमन्यसे ॥ ततो हरिजटा नाम राक्षसी वाक्यमब्रवीत् ॥ ९ ॥

॥ साधारणेन वाक्यप्रयोगोत्र रमेकजटावि-
शिष्याब्रवीत् करतलोदरीं अनुंदिलामित्यर्थः ॥ ५ ॥ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुरित्युक्तानां षण्णां प्रजापतीनां चतुर्थः पुलस्त्यः ॥ ६ ॥ तस्य पु-

त्रद्यनेन कुलीनत्वस्य चित ॥ न ॥ किं किमर्थं ततः कुलानि
रूपणानंतरं ॥ ९ ॥

येनेत्यनेन पराक्रमातिशयसूचनम् ॥१०॥ न लिप्ससे नेच्छसीत्यर्थः ॥११॥ सर्वासां मध्ये वक्ष्यमाणां महाभागां अतिभाग्यवतीं मंदोदरीमपि त्यक्त्वा त्वामुपे
ष्यति ॥१२॥१३॥१४॥१५॥ यस्य भीतः सूर्यो न तपतीत्यर्थः न तिष्ठसे वशे इति शेषः ॥१६॥ यदेच्छति तदा सुस्रुवुरित्यर्थः ॥१७॥ भार्यार्थे भार्या

विवृत्तनयने कोपान्मार्जारसदृशेक्षणा ॥ येन देवास्त्रयस्त्रिंशद्देवराजश्च निर्जितः ॥१० ॥ तस्य त्वं राक्षसेंद्रस्य भार्या भवितु
मर्हसि ॥ वीर्योत्सिक्तस्य शूरस्य संग्रामेष्वनिवर्त्तिनः ॥ वलिनो वीर्ययुक्तस्य भार्या त्वं किन्न लिप्ससे ॥११ ॥ प्रियां वहुमतां भा
र्यां त्यक्त्वा राजा महावलः ॥ सर्वासां च महाभागां त्वामुपैष्यति रावणः ॥१२ ॥ समृद्धं स्त्रीसहस्रेण नानारत्नोपशोभितं ॥ अं
तःपुरं तदुत्सृज्य त्वामुपैष्यति रावणः ॥१३ ॥ अन्या तु विकटा नाम राक्षसी वाक्यमब्रवीत् ॥ असकृद्भीमवीर्येण नागा गंधर्व
दानवाः ॥ निर्जितास्समरे येन स ते पार्श्वमुपागतः ॥१४ ॥ तस्य सर्वसमृद्धस्य रावणस्य महात्मनः ॥ किमर्थं राक्षसेंद्रस्य
भार्यात्वं नेच्छसेऽधमे ॥१५ ॥ ततस्तां दुर्मुखी नाम राक्षसी वाक्यमब्रवीत् ॥ यस्य सूर्यो न तपति भीतो यस्य स मारुतः ॥ न वाति स्मा
यतापांगि किं त्वं तस्य न तिष्ठसे ॥१६ ॥ पुष्पवृष्टिं च तरवो मुमुचुर्यस्य वै भयात् ॥ शैलाः सुस्रुवुः पानीयं जलदाश्च यदेच्छति
॥१७ ॥ तस्य नैर्ऋतराजस्य राजराजस्य भामिनि ॥ किं त्वं न कुरुषे बुद्धिं भार्यार्थे रावणस्य हि ॥१८ ॥ साधु ते तत्त्वतो देवि कथितं
साधु भामिनि ॥ गृहाण सुस्मिते वाक्यमन्यथा न भविष्यसि ॥१९ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे त्रयोविंशः सर्गः ॥२३॥

त्वन्निमित्तं ॥१८॥ साधु कथितं साधु गृहाण न भविष्यसि मारयाम इत्यर्थः ॥१९॥ घटमानः ॥ इति रामाभिरामे श्री रा॰ सुंद॰ त्रयोविंशः सर्गः ॥२३

276

नतइति ॥१॥२॥ प्रत्याहरेति वर्णय स्वं त्वदभीष्टं रामसंगमरूपं वसुजानुकदाचिदप्यंतःपुरं नभविष्यति अत्र रामागमनस्यतववातत्रगमनस्यप्र
सक्तभावादितिभावः यद्वातःपरं जातु कदाचिदप्येवंभावश्चेत्त्वं भवतीन भविष्यति मारयामि इत्यर्थः ॥३॥४॥५॥ नेत्राभ्यामुपलक्षितेतिशेषः इ

ततः सीतां समस्तास्ता राक्षस्यो विकृताननाः ॥ परुषं परुषानर्हामूचुस्ता वाक्यमप्रियं ॥१॥ किं त्वमंतःपुरे सीते सर्वभूतमनोरमे ॥ म
हार्हशयनोपेते नवासमनुमन्यसे ॥२॥ मानुषे मानुषस्यैव भार्यात्वं वक्तुमन्यसे ॥ प्रत्याहर मनो रामान्नैवं जातु भविष्यसि ॥३॥
त्रैलोक्यवसुभोक्तारं रावणं राक्षसेश्वरं ॥ भर्तारमुपसंगम्य विहरस्व यथासुखं ॥४॥ मानुषी मानुषं तं तु राममिच्छसि शोभने ॥
राज्याद्भ्रष्टमसिद्धार्थं विक्लवं तमनिंदिते ॥५॥ राक्षसीनां वचः श्रुत्वा सीता पद्मनिभेक्षणा ॥ नेत्राभ्यामश्रुपूर्णाभ्यामिदं वच
नमब्रवीत् ॥६॥ यदिदं लोकविद्विष्टमुदाहरथ संगताः ॥ नैतन्मनसि वाक्यं मे किल्बिषं प्रतितिष्ठति ॥७॥ न मानुषी राक्षस
स्य भार्या भवितुमर्हति ॥ कामं खादत मां सर्वा न करिष्यामि वो वचः ॥८॥ दीनो वा राज्यहीनो वा यो मे भर्ता स मे गुरुः ॥ तं नि
त्यमनुरक्तास्मि यथा सूर्यं सुवर्चला ॥९॥ यथा शची महाभागा शक्रं समुपतिष्ठति ॥ अरुंधती वसिष्ठं च रोहिणी शशिनं
यथा ॥१०॥ लोपामुद्रा यथागस्त्यं सुकन्या च्यवनं यथा ॥ सावित्री सत्यवंतं च कपिलं श्रीमती यथा ॥११॥

॥ इदं वचनं तुष्णद्वयोऽनंगीकारे
मारणं चेच्छीघ्रं न देवाक्रियतामित्यर्थकं वक्ष्यमाणं ॥६॥ लोकविद्विष्टं लोकविद्विष्टपरपुरुषसंगार्थकं संगताः समेताः किल्बिषं किल्बि
षजनकार्थकं ॥७॥८॥ गुरुरूपास्यदेवता सुवर्चला सूर्यपत्नी सूर्याभिमुखपुष्पवती काचिदोषधिरित्यन्वयः ॥९॥ अतिदुःखसमयेपिदृ

ढव्रतत्वद्योतनायानेकसाध्वीनामुपन्यासो दृष्टान्तविषये साङ्ग ॥ १४७

भैमी दमयंती नैषधं पतिं यथानुव्रता ॥१२॥१३॥ अवलीनः सन् निर्वाक्यो मौनी शिंशपाद्रुमे स्थित इति शेषः सीतां तर्जयंतीः राक्षसीस्तत्र कपिरशृ
णोत् ॥१४॥ वेपमानां तामभिक्रम्य तत्समीपमागम्य संरब्धाः ॥ क्रुद्धास्ता राक्षस्यः दशनच्छदान् लिलिहुः लेहनं कुर्वंति स्म ॥१५॥ परश्वधान् उद्गृ
हीत्वा ऊचुश्च नेयं रावणं भर्तारमर्हति । अपि त्वस्माकं भक्षणमेवार्हति इति भावः ॥१६॥ भर्त्स्यमाना एवंप्रकारेणापीड्यमानाभूदिति शेषः तां शिं

सौदासं मदयंतीव केशिनी सगरं यथा ॥ नैषधं दमयंतीव भैमी पतिमनुव्रता ॥१२॥ तथाहमिक्ष्वाकुवरं रामं पतिमनुव्रता सी
तायाव वचनं श्रुत्वा राक्षस्यः क्रोधमूर्छिताः ॥ भर्त्सयंति स्म परुषैर्वाक्यै रावणचोदिताः ॥१३॥ अवलीनः स निर्वाक्यो हनूमान् शिं
शपाद्रुमे ॥ सीतां संतर्जयंतीस्ता राक्षसीरशृणोत्कपिः ॥१४॥ तामभिक्रम्य संरब्धा वेपमानां समंततः ॥ भृशं संलिलिहुर्दीप्तान्प्र
लंबान् दशनच्छदान् ॥१५॥ ऊचुश्च परमक्रुद्धाः प्रगृह्याशु परश्वधान् ॥ नेयमर्हति भर्तारं रावणं राक्षसाधिपं ॥१६॥ सा भर्त्स्यमाना
भीमाभी राक्षसीभिर्वरांगना ॥ सा बाष्पमपमार्जंती शिंशपां तामुपागमत् ॥१७॥ ततस्तां शिंशपां सीता राक्षसीभिः समावृता ॥ अभि
गम्य विशालाक्षी तस्थौ शोकपरिप्लुता ॥१८॥ तां कृशां दीनवदनां मलिनांबरवासिनीं ॥ भर्त्सयांचक्रिरे भीमा राक्षस्यस्ताः समंततः ॥१९॥
ततस्तु विनता नाम राक्षसी भीमदर्शना ॥ अब्रवीत्कुपिताकारा कराला निर्णतोदरी ॥२०॥ सीते पर्याप्तमेतावद्भर्तुः स्नेहः प्रदर्शितः
सर्वत्रातिकृतं भद्रे व्यसनायोपकल्पते ॥२१॥

(शपां हनूमदधिष्ठितां शिंशपां अन्यं तं तन्मूलसमीपमित्यर्थः ॥१७॥ ततः तन्मूलसमीपगमनानंत
रं ॥१८॥ निर्णतोदरी अतिनिम्नोदरी ॥२०॥ अतिकृतं अतिमात्राचरणं श्रीरपि समैवजायसीति लोकोक्तिरिति भावः व्यसने दुःखे ॥ २१ ॥ ६ ॥

277

॥ रामः ॥
॥ ६४ ॥

मानुषोमनुष्यजातावुचितोविधिरनुष्ठानंत्वयाज्ञातं·एतावदेवालमित्यर्थः ॥ २२ ॥ सुरेशंवासवमिव ॥ २३ ॥ कृपणांदीनां ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ तर्जनीत
र्जयंती ॥ २८ ॥ अनुक्रोशोदया· मृदुत्वमल्पप्रमाणत्वं ॥ २९ ॥ कालपुरस्कृतंकालोचितंतेनोवाक्यंनचक्रूरूषेणैतन्नोहितमितिशेषः मदेवोपयाद्य

परितुष्टास्मिभद्रंतेमानुषस्तेकृतोविधिः ॥ ममापितुवचःपथ्यंब्रुवंत्याःकुरुमैथिली ॥ २२ ॥ रावणंभजभर्त्तारंभर्त्तारंसर्वरक्षसां
विक्रांतमापतंतंचसुरेशमिववासवं ॥ २३ ॥ दक्षिणंत्यागशीलंचसर्वस्यप्रियवादिनं ॥ मानुषंकृपणंरामंत्यक्त्वारावणमा
श्रय ॥ २४ ॥ दिव्यांगरागावैदेहीदिव्याभरणभूषिता ॥ अद्यप्रभृतिलोकानांसर्वेषामीश्वरीभव ॥ २५ ॥ अग्नेःस्वाहायथादेवी
शचीवेंद्रस्यशोभने ॥ किंतेरामेणवैदेहिकृपणेनगतायुषा ॥ २६ ॥ एतदुक्तंचमेवाक्यंयदित्वंनकरिष्यसि अस्मिन्मुहूर्त्तेसर्वा
स्त्वांभक्षयिष्यामहेवयं ॥ २७ ॥ अन्यातुविकटानामलंबमानपयोधरा ॥ अब्रवीत्कुपितासीतांमुष्टिमुद्यम्यतर्जती ॥ २८ ॥ बहून्य
प्रतिरूपाणिवचनानिसुदुर्मते ॥ अनुक्रोशान्मृदुत्वाच्चसोढानितवमैथिलि ॥ २९ ॥ नचनःकुरुषेवाक्यंहितंकालपुरस्कृतं आ
नीतासिसमुद्रस्यपारमन्यैर्दुरासदं ॥ ३० ॥ रावणांतःपुरेघोरेप्रविष्टाचासिमैथिलि ॥ रावणस्यगृहेरुद्धाअस्माभिस्त्वभिरक्षिता
३१ ॥ नत्वांशक्तःपरित्रातुमपिसाक्षात्पुरंदरः ॥ कुरुष्वहितवादिन्यावचनंममैथिलि ॥ ३२ ॥ अलमश्रुनिपातेनत्यजशोकमनर्थ
कं ॥ भजप्रीतिंप्रहर्षंचत्यजैतांनित्यदैन्यतां ॥ ३३ ॥ सीतेराक्षसराजेनपरिक्रीडयथासुखं ॥ जानीमहेयथाभीरुस्त्रीणांयौवनमध्रुवं ॥ ३४ ॥

नि·आनीतासिइति ॥ ३० ॥ गृहेरुद्धाचासिअस्माभिरभिरक्षितारक्षितनिरोधा ॥ ३१ ॥ ३२ ॥ प्रीतिंस्नेहं·रावणोप्रहर्षमानंदंनित्यदैन्यतांनिरंतरदीनत्वं

सुंदर ॥ ३३ ॥ ३४ ॥

वतिक्रामेत् यौवनमितिशेषः उद्यानानि चरेत्युत्तरस्थेनान्वयः तेषु क्रीडेत्यर्थः ॥३५॥३६॥ उत्पाटनं स्थानादपकर्षणं ॥३७॥ यदीत्यर्धं सर्वान्वयि ॥
३८॥ ३९॥ गर्भिण्यागर्भक्षतनइच्छाविशेषो दौहृदं यकृत्· दक्षिणभागस्थः कालखंडाख्यो मांसविशेषः स्नायुः स्त्रियां कालखंडयकृती च समे

यावन्न ते व्यतिक्रामेत्तावत्सुखमवाप्नुहि ॥ उद्यानानि च रम्याणि पर्वतोपवनानि च ॥३५॥ सह राक्षसराजेन चर त्वं म
दिरेक्षणे ॥ स्त्रीसहस्राणि ते देवि वशे स्थास्यन्ति सुंदरि ॥३६॥ रावणं भज भर्तारं भर्तारं सर्वरक्षसां ॥ उत्पाट्य वा ते हृ
दयं भक्षयिष्यामि मैथिलि ॥३७॥ यदि मे व्याहृतं वाक्यं न यथावत्करिष्यसि ॥ ततश्चंडोदरी नाम राक्षसी क्रूरदर्शना
३८॥ भ्रामयंती महच्छूलमिदं वचनमब्रवीत् ॥ इमां हरिणशावाक्षीं त्रासोत्कंपपयोधरां ॥३९॥ रावणेन हृतां दृष्ट्वा
दौहृदो मे महानयं ॥ यकृत्प्लीहमहत्क्रोडं हृदयं च सबंधनं ॥४०॥ गात्राण्यपि तथा शीर्षं खादेयमिति मे मतिः ॥ त
तस्तु प्रघसा नाम राक्षसी वाक्यमब्रवीत् ॥४१॥ कंठमस्या नृशंसायाः पीडयामः किमास्यते ॥ निवेद्यतां ततो राज्ञे
मानुषी सा मृतेति च ॥४२॥ नात्र कश्चिच्च संदेहः खादतेति स वक्ष्यति ॥ ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् ॥४३॥

उभे इति कोशः प्लीहं हृदयवामभागस्थो गुल्माख्यो मांसविशेषः यद्यपि तद्वाचकः प्लीहा इत्याकारांतस्तथाप्यदंतत्वमार्षं महत् क्रोडं भुजां
तरं· अथोत्पीडमिति पाठे उत्पीडं हृदयोपरिस्थितमांससंबंधनं हृदयं नाडीबंधनसहितं मुकुलाकारं हृत्पुंडरीकाख्यं ॥४०॥४१॥ प्रघसा बा

विशसेनाम्निमथर्ष्णोकदयप्राक्षिप्तमितिकमक्कः पिंड
कान्मांसखंडान्निवादः नयास हेति शेषः ॥४२॥ भर्त्सयंती मनसा ॥४३॥

अजामुखसदृशमुखवत्याप्रघसयेसमर्थः॥ ४४ ॥ निकुंभिलानामलंकायाःपश्चिमभागवर्त्तिनी·भद्रकालीतांतत्सामःतत्समीपंगत्वा
नत्सामःसुरसुतोपमादेवकन्योपमासोदितिअरुदन्॥४५॥अर्णवमानः॥ इतिरामाभिरामेश्रीरामीयेरामायणतिलकेसुंद

विशस्येमांततःसर्वास्समान्कुरुतपिंडकान्॥विभजामततःसर्वाविवादोमेनरोचते॥४४॥पेयमा
नीयतांक्षिप्रंमाल्यंचविविधंबहु॥ततःशूर्पणखीनामराक्षसीवाक्यमब्रवीत्॥४५॥ अजामुख्या
यदुक्तंवैतदेवममरोचते॥सुराचानीयतांक्षिप्रंसर्वशोकविनाशिनीं॥४६॥मानुषंमांसमासाद्य
नृत्यामोथनिकुंभिलां॥एवंनिर्भर्त्स्यमानासासीतासुरसुतोपमा॥राक्षसीभिर्विरूपाभिर्धैर्यमुत्सृज्य
रोदिति॥४७॥इत्यार्षेश्रीमद्रामायणेसुंदरकांडेचतुर्विंशःसर्गः॥२४॥अथतासांवदंतीनांपरुषं
दारुणंबहु॥राक्षसीनामसौम्यानांरुरोदजनकात्मजा॥१॥एवमुक्तातुवैदेहीराक्षसीभिर्मनस्वि
नी॥उवाचपरमत्रस्तावाष्पगद्गदयागिरा॥२॥नमानुषीराक्षसस्यभार्याभवितुमर्हति॥कामंखा
दतमांसर्वानकरिष्यामिवोवचः॥३॥

((रकांडेचतुर्विंशःसर्गः॥ २४॥ परुषंवदंतीनांवचःश्रुत्वेतिशेषः॥१
पूर्वसर्गोक्तरीत्योक्तामनस्विनीपातिव्रत्येदृढमनाः॥२॥कामंखादतेति·अयंसर्वःसीताप्रलापोदृष्टहीनमनुष्यशरीरत्यागनष्टवद
उक्तरात्यइतिबोध्यं॥३॥

॥रा·वा·सुं॥
॥६६॥

शर्मनलेभेइवशोकार्त्तेव ॥४॥ आत्मनोगंविशंतीवभीत्साआनिसंकुचितशरीराकमठवदम्भूदित्यर्थः कोकैःवृकैः ॥५॥ अशोकस्य
अशोकवनिकासंबंधिनः शिंशपावृक्षस्यनन्तसमीपवर्त्तिनोशोकस्यैववा ॥६॥ ७ ॥ राक्षसीनांराक्षसीभ्यः ॥ ८ ॥ सीतसेति

साराक्षसीमध्यगतासीतासुरसुतोपमा ॥ नशर्मलेभेशोकार्त्तारावणेनचभर्त्सिता ॥ ४ ॥ वेपतेस्माधिकंसीता
विशंतीवांगमात्मनः ॥ वनेयूथपरिभ्रष्टामृगीकोकैरिवार्दिता ॥ ५ ॥ सात्वशोकस्यविपुलांशाखामालंब्यपुष्पि
तां ॥ चिंतयामासशोकेनभर्त्तारंभग्नमानसा ॥ ६ ॥ सास्नापयंतीविपुलौस्तनौनेत्रजलस्रवैः ॥ चिंतयंती
नशोकस्यतदंतमधिगच्छति ॥ ७ ॥ सावेपमानापतिताप्रवातेकदलीयथा ॥ राक्षसीनांभयत्रस्ताविवर्णवद
नाभवत् ॥ ८ ॥ तस्याःसादीर्घविपुलावेपंत्याःसीतयातदा ॥ ददृशेकंपितावेणीव्यालीवपरिसर्पती ॥ ९ ॥ सानि
श्वसंतीशोकार्त्ताशोकोपहतचेतना ॥ आर्त्ताव्यसृजदश्रूणिमैथिलीविललापच ॥ १० ॥ हारामेतिचदुःखार्त्ताहा
पुनर्लक्ष्मणेतिच ॥ हाश्वश्रुममकौसल्येहासुमित्रेतिभामिनी ॥ ११ ॥ लोकप्रवादःसत्योयंपंडितैःसमुदाहृतः ॥ अ
कालेदुर्लभोमृत्युःस्त्रियावापुरुषस्यवा ॥ १२ ॥ यत्राहमाभिःक्रूराभीराक्षसीभिरिहार्दिता ॥ जीवामिहीनारामेणमु
हूर्त्तमपिदुःखिता ॥ १३ ॥

पक्षार्थेत्वीया·परिसर्पतीपरितःप्रसर्पती ॥ ९ ॥ १० ॥ हासुमित्रेतीत्यत्रेकारलोपश्चार्षः ॥ ११ ॥ अकालेदैवाविहितस्वेच्छाकाले ॥ १२ ॥

यत्राहमाभिः·यस्मादहमित्यर्थः ॥ १३ ॥

॥राम·॥
॥६६॥

279

नं १

१४ तोपहतं नदीप्ररुग्णं ॥ १५ पद्मदलं विकसितं पद्मं तस्य पत्त्रमिवाक्षि यस्य तं ॥ १६ तीक्ष्णं विषं वत्सनाभादिकमास्वाद्य स्थितस्येव मे मम जीवितं दुर्लभं ॥ १७
॥ १८ जीवितं त्यक्तुमिच्छामि तदपि न शक्यमिति शेषः रामोपि नासाद्यते च ॥ १९ एवं परवशतया दुःखानुभवे हेतुमाह धिगिति मनुष्यस्य विधो बंध
नादिना देहत्यागे परमानर्थप्राप्तेः परमदुःखस्यापि सोढव्यत्वाद प्रयोजको मनुष्य इदेह इत्यर्थः राक्षस्यादिपरतंत्रतां च मनुष्यत्वप्रयुक्ताधि

एषाल्पपुण्या कृपणा विनशिष्याम्यनाथवत् ॥ समुद्रमध्ये नौः पूर्णा वायुवेगैरिवाहता ॥ १४ ॥ भर्तारं तमपश्यंती राक्षसीवशमा
गता ॥ सीदामि खलु शोकेन कूलं तोयहतं यथा ॥ १५ ॥ तं पद्मदलपत्राक्षं सिंहविक्रांतगामिनं ॥ धन्याः पश्यंति मे नाथं कृ ८
तज्ञं प्रियवादिनं ॥ १६ ॥ सर्वथा तेन हीनाया रामेण विदितात्मना ॥ तीक्ष्णं विषमिवास्वाद्य दुर्लभं मम जीवनं ॥ १७ ॥ कीदृ
शं तु महापापं मया देहांतरे कृतं ॥ येनेदं प्राप्यते घोरं महादुःखं सुदारुणं ॥ १८ ॥ जीवितं त्यक्तुमिच्छामि शोकेन महता वृ
ता ॥ राक्षसीभिश्च रक्षंत्या रामो नासाद्यते मया ॥ १९ ॥ धिगस्तु खलु मानुष्यं धिगस्तु परवश्यतां ॥ न शक्यं यत्परित्यक्तुमा
त्मछंदेन जीवितं ॥ २० ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे पंचविंशः सर्गः ॥ २५ ॥ ॥ प्रसक्ताश्रुमुखीत्येवं ब्रुवती जन
कात्मजा ॥ अधोगतमुखी बाला विलप्तुमुपचक्रमे ॥ १ ॥ उन्मत्तेव प्रमत्तेव भ्रांतचित्तेव शोचती ॥ उपावृत्ता किशोरीव वि

उ २

कृपनयत्र मनुष्यदेहे आत्मछंदेनात्मेच्छया जीवितं परित्यक्तुं न शक्यम ॥ २० ॥ नारीमानः ॥ इति रामाभिरामे श्रीरा० सुंद० पंचविंशः सर्गः २५
॥ ॥ प्रसक्तानि प्रवृत्तान्यश्रूणि मुखे यस्याः सा ॥ एवं ब्रुवती वक्ष्यमाणरीत्या ब्रुवतीति लपितुं विलपितुं ॥ १ ॥ उन्मत्ता भूताविष्टा प्रमत्तापेसोद्रेका
दिना भ्रांतचित्तेव दिङ्मोहादिना मूर्छितचित्तेव शोचंती शोचंती उपावृत्ता अश्मापनयनाय परिवर्तनशीला किशोरी वडवेव ॥ २ ॥ ६३ ६३ ६३ ६३

॥ ए० वा० सुं ॥
॥ ६७ ॥

कामरूपिणारक्षसामारीचेनप्रमत्तस्यअसावधानंप्राप्तस्यराघवस्यसंबंधिनीअहंरावणेनप्रमथ्यप्रपीड्यक्रोशंतीबलादानीतास्मि॥३॥किंचराक्ष
सीवशमापन्नाभर्त्स्यमानाराक्षसीभिःचिंतयंतीरामं॥४॥अर्थैःधनैः॥५॥६॥असतीअसतीवत्परगृहस्थांजीवामि [illegible] जीवितंरक्षामीत्य
र्थः॥पाकंपचतीतिवत्प्रयोगः ७ एतदुत्तरंचरणोनेतिमध्ये द्वौश्लोकौप्रक्षिप्तौसव्येनवामेन॥८॥प्रत्याख्यातंमयाक्रियमाणंनिराकरणं॥नजाना

राघवस्यप्रमत्तस्यरक्षसाकामरूपिणा॥रावणेनप्रमथ्याहमानीताक्रोशंतीबलात्॥३॥राक्षसीवशमापन्नाभर्त्स्यमानाचदा
रुणं॥चिंतयंतीसुदुःखार्त्तानाहंजीवितुमुत्सहे॥४॥नहिमेजीवितेनार्थोनैवार्थैर्नचभूषणैः॥वसंत्याराक्षसीमध्येविना
रामंमहारथं॥५॥अश्मसारमिदंनूनमथवाप्यजरामरं॥हृदयंममयेनेदंनदुःखेनविशीर्यते॥६॥धिङ्मामनार्यामस
तींयाहंतेनविनाकृता॥मुहूर्त्तमपिजीवामिजीवितंपापजीविका॥७॥चरणेनापिसव्येननस्पृशेयंनिशाचरं॥रा
वणंकिंपुनरहंकामयेयंनिशाचरं॥८॥प्रत्याख्यातंनजानातिनात्मानंनात्मनःकुलं॥योनृशंसस्वभावेनमांप्रार्थयि
तुमिच्छति॥९॥छिन्नाभिन्नाप्रभिन्नावादीप्तावाग्नौप्रदीपिता॥रावणंनोपतिष्ठेयंकिंप्रलापेनवश्चिरं॥१०॥ख्यातःप्रा
ज्ञःकृतज्ञश्चसानुक्रोशश्चराघवः॥सद्वृत्तोनिरनुक्रोशःशंकेमद्भाग्यसंक्षयात्॥११॥

तिकामसंमोहादितिशेषः॥नृशंसस्वभावेनक्रूरस्वभावेनमांप्रार्थयितुंराक्षसीद्वारास्वानुकूलांकर्त्तुं॥९॥छिन्नारज्जुवत्॥प्रभिन्नाघटवत्॥अ
ग्नौप्लुष्टमांसवत्॥प्रदीपिताप्रदीप्तागृहादिवत्वश्चिरंप्रलापेनकिंरावणंनोपतिष्ठेयमित्येवनिश्चयसत्वात्॥१०॥अथस्वाप
त्तेर्येकारणानिसंभावयति॥ख्यातइतिप्रसिद्धप्रशस्तगुणःईदृशोपिराघवोमद्भाग्यसंक्षयादेवमयिनिरनुक्रोशोदयाहीनःसंपन्न

ही२

इतिशेषःइतिश्लोके॥११॥

280

॥ श्री० ॥
॥ ६७ ॥

सा।२

न च तस्य मद्विमोक्षणाशक्तिरित्याह राक्षसानामिति। नाभिपद्यते न प्राप्नोति ॥ १२ ॥ एतदुत्तरं कामं मध्ये इति मध्ये श्लोकौ प्रक्षिप्तौ इति कतकः कामसन्दे
वां दुष्प्रधर्षं भवतु न तु रामबाणानां गतिरोधो भविष्यति आब्रह्मलोकं रामबाणगत्यप्रतिरोधस्य भार्गवादिविषये प्रसिद्धत्वादिति भावः एतेनाति
दुर्गस्थानस्थितत्वान्न मोक्षणमित्यपास्तं ॥ १३ ॥ १४ ॥ तस्मादत्र मत्स्थित्यज्ञानमेव मद्विमोक्षणप्रवृत्त्यभावे कारणमित्याह इहस्थामिति मर्षयिष्यतीत्य

राक्षसानां जनस्थाने सहस्राणि चतुर्दश । एकेनैव निरस्तानि स मां किं नाभिपद्यते ॥ १२ ॥ निरुद्धा रावणेनाहमल्पवीर्येण रक्ष
सा । समर्थः खलु मे भर्ता रावणं हन्तुमाहवे ॥ १३ ॥ विराधो दण्डकारण्ये येन राक्षसपुङ्गवः । रणे रामेण निहतः स मां नाभ्यवपद्य
ते ॥ १४ ॥ कामं मध्ये समुद्रस्य लङ्केयं दुःप्रधर्षणा । न तु राघवबाणानां गतिरोधो भविष्यति ॥ १५ ॥ किं तु तत्कारणं येन रामो
दृढपराक्रमः । रक्षसापहृतां भार्यामिष्टां यो नाभिपद्यते ॥ १६ ॥ इहस्थां मां न जानीते शङ्के लक्ष्मणपूर्वजः । जानन्नपि स ते
जस्वी धर्षणं मर्षयिष्यति ॥ १७ ॥ हृतेति मां याऽधिगम्य राघवाय निवेदयेत् । गृध्रराजोपि स रणे रावणेन निपातितः ॥ १६ ॥
कृतं कर्म महत्तेन मां तदाभ्यवपद्यता । तिष्ठता रावणवधे वृद्धेनापि जटायुषा ॥ १७ ॥ यदि मामिह जानीयाद्वर्तमानां हि
राघवः । अद्य बाणैरभिक्रुद्धः कुर्याल्लोकमराक्षसं ॥ १८ ॥ निर्दहेच्च पुरीं लङ्कां निर्दहेच्च महोदधिं । रावणस्य च नीचस्य की
र्तिं नाम च नाशयेत् ॥ १९ ॥

काकुः जानन्नपि चेत्तदा मर्षयिष्यति अपि तु न सहिष्यत एवेत्यर्थः ॥ १५ ॥ संभावितं ज्ञानकारणं च विहितमित्याह हृतेति । हृतेत्यधिगम्य ज्ञात्वा
यो मां राघवाय निवेदयेत् सोपि सन्नयः ॥ १६ ॥ अभ्यवपद्यता अनुगच्छतानेन रावणवधे तिष्ठता रावणवधार्थं यतता रावणेन द्वंद्वे इति पा
ठे रावणेन सह द्वंद्वयुद्धे इत्यर्थः ॥ १७ ॥ मामिह इहस्थां मां ॥ १८ ॥ १९ ॥

यथाहमिदानीमेवंरुदतीवर्त्ते त्वयोमत्तोधिकंमृतभर्तृकत्वाद्राक्षस्यो रुदंत्यो भविष्यंतीत्यत्र न संशयः इत्यर्थः ॥२०॥ ननु ज्ञाने खल्विदं संभाव्यते ज्ञान
मेव तु दुर्लभं तत्राह अन्विष्येति अचिंत्यसामर्थ्यत्वाद्देवानुग्रहाच्च लंकामप्यन्विष्य मां ज्ञात्वा रक्षसां कुर्य्यादिति विनाशमिति शेषः विनाशस्यैव स्फुटत्वमा
हन्नहीति ॥२१॥ निश्चितस्यायमर्थ इत्याह चितेति भवेत् लंकेति शेषः ॥२२॥ रक्षोऽनर्थवत्त्वमाशयोपि निश्चितस्त्वेत्याह ॥ अचिरेणेति दुष्प्राकस्य
योपि निश्चितः प्रत्याह ॥ दुष्प्रस्थानेति दुर्निमित्तप्रवृत्तिरयं विपर्ययस्तद्विपरीतज्ञानमिति भातीति ॥२३॥ तामेवाह यादृशानीति यादृशानि दृश्यं

हतो निहतनाथानां राक्षसीनां गृहे गृहे ॥ यथाहमेवं रुदती तथा भूयो न संशयः ॥२०॥ अन्विष्य रक्षसां लंकां कुर्याद्रामः सलक्ष्म
णः ॥ नहि ताभ्यां रिपुर्दृष्टो मुहूर्त्तमपि जीवति ॥२१॥ चिताधूमाकुलपथा गृध्रमंडलमंडिता ॥ अचिरेणैव कालेन श्मशा
नसदृशी भवेत् ॥२२॥ अचिरेणैव कालेन प्राप्स्याम्येनं मनोरथं ॥ दुष्प्रस्थानोयमाभाति सर्वेषां वो विपर्ययः ॥२३॥ यादृ
शानि तु दृश्यंते लंकायामशुभानि तु ॥ अचिरेणैव कालेन भविष्यति हतप्रभा ॥२४॥ नूनं लंका हते पापे रावणे राक्षस
साधिपे ॥ शोषमेष्यति दुर्धर्षा प्रमदा विधवा यथा ॥२५॥ पुण्योत्सवसमृद्धा च नष्टभर्त्री सराक्षसा ॥ भविपुरी लंका
नष्टभर्त्री यथांगना ॥२६॥ नूनं राक्षसकन्यानां रुदंतीनां गृहे गृहे ॥ श्रोष्यामि नचिरादेव दुःखार्त्तानामिवध्वनिं ॥२७॥
सांधकारा हतद्योता हतराक्षसपुंगवा ॥ भविष्यति पुरी लंका निर्दग्धा रामसायकैः ॥२८॥ यदि नाम स शूरो मां रामोर
क्तांतलोचनः ॥ जानीया
द्वर्त्तमानां मां राक्षसस्य निवेशने ॥२९॥

तेतैरेव हतप्रभा भविष्यतीति ज्ञापनं इत्यर्थः ॥२४॥ शोषमैश्वर्यादेरिति शेषः ॥२५॥ पुण्योत्सवसमृद्धा च अपीति शेषः ॥२६॥ ध्वनिं रोदनशब्दं
दुःखार्त्तानामिवेति पाठः ॥२७॥ सांधकारा अलक्ष्मीसहिता ॥२८॥ यदि राक्षसस्य निवेशने वर्त्तमानां मां रामो जानीयात्तदा लंकापुरी राम
सायकैर्निर्दग्धा भविष्यतीत्यन्वयः ॥२९॥

281

ष्यति ५

वनं १

नतु त्वं कानाशोपि मम जीवं कथं स्यादितिचेन्नयानि अनेनेति समयो द्वादशमासरूपः तस्य कालः किंचिदधिकमासद्वयावशिष्टत्वाद्दशमासत्वकाल इत्यर्थः ॥ ३० ॥ अस्मिन्काले दुष्टेन रावणेन सकालो मेत्र स्तु विहितो वर्तते इत्यर्थः ॥ नतु ननः परमापि स्त्री त्वां त्वं न हिंस्युः तत्राह कार्यमित्ये राक्षसा अकार्यमिदं कर्त्तव्यमिदमकर्त्तव्यमिति न जानंति ॥ नैर्ऋताः पापकारिणः स्युः ॥ ३१ ॥ अपि च सांप्रतं संपादितात् ॥ परदाराहरणात्स्मरणात् ॥ अधर्मात्तु अधर्मादेव घोयं महोत्पातो वर्तते तेन ॥ एते सर्वथा न भविष्यति नमो त्वानुकर्षः इति कतकः यदेवमतो नेति इति यतो

श्नेनेनतु नृशंसेन रावणेनाधमेन मे ॥ समयो यस्तु निर्दिष्टस्तस्य कालोयमागतः ॥ ३० ॥ स[illegible]मेव विहितो मन्तु रक्षिस्तु हि नवर्त्तते ॥ न कार्यमेन जानंति नैर्ऋताः पापकारिणः ॥ ३१ ॥ अधर्मात्तु महोत्पातो भविष्यति हि सांप्रतं ॥ नैर्ऋते धर्मं विजानंति राक्षसाः पिशिताशनाः ॥ ३२ ॥ ध्रुवं मां प्रातराशार्थं राक्षसः कल्पयिष्यति सा हं कथं करिष्यामि तं विना प्रियदर्शनम् ॥ ३३ ॥ रामं रक्तांतनयनमपश्यंती सुदुःखिता ॥ नाजानाज्जीवंती रामः समां भरतपूर्वजः ॥ जानंतौ तु न कुर्यातां नोर्व्यां हि परिमार्गणं ॥ ३५ ॥ नूनं ममैव शोकेन स वीरो लक्ष्मणाग्रजः देवलोकमितो यातस्त्यक्त्वा देहं महीतले ॥ ३६ ॥ धन्या देवाः सगंधर्वाः सिद्धाश्च परमर्षयः ॥ मम पश्यंति ये वी ॥ १८ ॥ रं रामं राजीवलोचनं ॥ ३७ ॥ अथवानहितस्यार्थो धर्मकामस्य धीमतः ॥ मयारामस्य राजर्षेर्भार्यया परमात्मनः

नोवेजानंति गणयंति राक्षसास्तस्माद्यं रावणोपि मां ध्रुवं प्रातराशार्थं कल्पयिष्यति. साहं कथं करिष्यामि प्राणविशासनकालात्तत्कालं इति शेषः ॥ ३२ ॥ ३३ ॥ उक्तमेवाह रामभिक्षं कथं करिष्यामिति शेषः ॥ ३४ ॥ तदेवं वीरतरस्य रामस्य स्थानत्वेषणे कारणान्युत्प्रेक्षते नाजानादिति स रामो लक्ष्मणश्च प्रायेण मां जीवंती जीवं तीं नाजानात् ॥ यदि जानीयातां तदा जानंतौ तौ कुर्यातां मोपरिमार्गणं कुर्यातामिति तत्र किं तु कुर्यातामेवातो

ति ३ स्प ११

मृतोमित्यात्मत्यसी निश्चितमिति भावः ॥ ३५ ॥ अथवा मद्वियोगे न रामो देहं त्यक्त्वान्निसाह नूनमिति ॥ ३६ ॥ एवं च देवलोकस्था धन्याइत्याह धन्याइति मम वीरमित्यन्वयः ॥ ३७ ॥ नतु तज्जीवनाभावे निश्चयमारोपलंभं विना कथं रामे

मेराहं हत्वा गइस्यतः पश्चांतरमात् ॥ अथवेति ॥ धर्मकामस्येव भार्यैवार्थ ॥ अयंतु नतथानेत्याह ॥ धीमतः आत्मनोत्मविवेकवतः अतएव परमात्मनः [illegible] परमात्मब्रह्मात्मतास्थितस्य जीवन्मुक्तस्य न स्यभयानार्थः अनेन वैराग्यादप्रवृत्तिरिति सूचितं ॥ ३८ ॥

वृं १ कृ ३

सर्वदाजीवत्सु तेनांगीकारस्य न त्यक्तः स्यात् । तादृशेन कृतेनांगीकारे तौ विधस्यागो ऽनुचित इत्यतो दूरवासात् स्नेहनाशेनाप्रतिग्रहीत्याह दृश्यमान इ
ति सोहृदं प्रीतिः । नास्त्यदृश्यतः समादृश्यत्वात् मयि तन्नास्ति न दृष्टमित्यर्थः अयमपि पक्षो संगतः ईदृग्गुणावतः सततं निर्गुणानाशयोगादित्या
रा३ ह नाशयंतीति कृतघ्ना एव प्रपन्नजनस्नेहमसन्निकर्षान्नाशयंतीत्येवं रामो ऽकृतघ्नत्वात्स्वस्य प्रकृतित्वेन प्राकृतप्रपंचसंबंधत्वेन च तस्मात्तन्न
तो नित्यसंबंधवत्यास्ता होसंगता नाद्य ॥ ३९ ॥ अतः पक्षांतरं शंकते किंवेति मयि तदुपेक्षाहेतवः केचनागुणा दोषाः सुः अयमपि पक्षो न युक्तः स्वापरित्यात

दृश्यमाने भवेत्प्रीतिः सोहृदं नास्त्यदृश्यतः ॥ नाशयंति कृतघ्नास्तु न रामो नाशयिष्यति ॥ ३९ ॥ किंवा
मय्यगुणाः केचित्किंवा भाग्यक्षयो हि मे ॥ या हि सीता वरार्हेण हीना रामेण भामिनी ॥ ४० ॥ श्रेयो मे जीवि
श्रे३ तान्मर्तुं विहीनाया महात्मनः ॥ रामादक्लिष्टचारित्राच्छूराच्छत्रुनिबर्हणात् ॥ ४१ ॥ अथवा न्यस्तशस्त्रौ तौ
वने मूलफलाशनौ ॥ भ्रातरौ हि नरश्रेष्ठौ चरंतौ वनगोचरौ ॥ ४२ ॥ अथवा राक्षसेंद्रेण रावणेन दुरा
त्मना ॥ छद्मना घातितौ शूरौ भ्रातरौ रामलक्ष्मणौ ॥ ४३ ॥

२८२

गु १ हीना २

स्वापचाराभावात् तस्मात्स्वाभवीयदुष्कर्मजो भाग्यस्य वक्षेनुरित्याह किंवेति अतोक्लिष्टचारित्र्यादिगुणाश्रमाद्यापहंत्राणां हा सीतास्या भामिनी
स्तावस्पर्यंतं सा हि यत इदानीं वरार्हेणोत्तमवस्तुयोग्येन रामेण हीनास्मि अतस्तस्या मम तेन महात्मना यामर्तुं श्रेयः मरणं ज्यायः ॥ ४० ॥ ४१ ॥ भाग्य
क्षयनिश्चयस्य कर्तुमशक्यत्वात् पक्षांतरमथवेति शस्त्रग्रहणमूलत्वात् सर्वयानर्थस्य हिंसारहितेन पुरुषेण यावज्जीवं वर्तितव्यमिति भि
यान्यस्तशस्त्रौ जातौ ॥ ४२ ॥ इदमप्यसंभावितं रक्षोभिः हननं वैरेण क्षत्रियेण तस्यागायोगादतः पक्षांतरमथवेति छद्मवंचना रक्षसा ग्रसितौ

भतिवर्तीति अतिशयेन वर्त्तमाने ॥४४॥ अथ तस्य दुःखनाशकरणं विवेकज्ञानमेवेत्याह धन्या इति सत्त्वं ब्रह्म सम्मतयात्मत्वेन येषां ते अनेन संसारतरणसामर्थ्यं दर्शितं अत एव जितात्मानो जितान्तःकरणाः अत एव महात्मानः प्राप्तमहात्म्यकाः अत एव महाभागाः पूर्वजन्मार्जितनिष्कामधर्मरूपमहाभाग्यवन्तः मुनयो ध्यानशीलास्ते धन्याः तत्र हेतुः येषां कर्मजन्ये प्रियाप्रिये न स्तः ॥४५॥ प्रियाप्रियाभावं विवृणोति प्रियादिति येषां मुक्तानां प्रियादि युज्यमानानां दुःखं न संभवेन्न भवेत् ॥ अप्रिया संयुज्यमानानां दधिकं दुःखं भवेत् ॥ अप्रियादधिकं दुःखं भवेत् ॥ अप्रियादधिकं भयमिति पाठे संयुज्य

साहमेवंविधे काले मर्त्तुमिच्छामि सर्वतः ॥ न च मे विहितो मृत्युरस्मिन्दुःखेतिवर्त्तति ॥४४॥ धन्याः खलु महात्मानो मुनयः सत्यसम्मताः ॥ जितात्मानो महाभागा येषां न स्तः प्रियाप्रिये ॥४५॥ प्रियान्न संभवेद्दुःखमप्रियादधिकं भवेत् ॥ ताभ्यां हि ते वियुज्यन्ते नमस्तेषां महात्मनां ॥४६॥ साहं त्यक्ता प्रियेणैव रामेण विदितात्मना ॥ प्राणांस्त्यक्ष्यामि पापस्य रावणस्य गता वशं ॥४७॥ ॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये सुंदरकांडे षड्विंशः सर्गः ॥२६॥ ॥

मानानां दप्रियादधिकं महद्भयमपि न भवेत् इत्यर्थः ताभ्यां प्रियवियोगजदुःखाप्रियसंयोगजदुःखभयाभ्यां ताभ्यां ये वियुज्यन्ते तेषां महात्मनां मा मय्यन्नमस्क्रियास्तु तेषां नमस्कारेण मत्तुल्यता मम मा पिस्यादित्याशयः ॥४६॥ रामेण त्यक्ता अन्विष्य न मोचितेनैव सतो शरणेव प्राणांस्त्यक्ष्यामि रामेण त्यक्तायाः प्राणत्यागस्यैव परमप्रियत्वात् ॥४७॥ ह्वविमानः इति रामाभिरामे श्रीरामायणे वाल्मीके सुंदरकांडे षड्विंशः सर्गः ॥ ॥ इत्युक्त्वा मरिष्य इत्युक्ताः तदा रक्षणार्थमरणनिश्चयं कथयितुं ॥१॥

श्रीरामायनमः

इत्युक्ताः सीतया घोरं राक्षस्यः क्रोधमूर्छिताः
काश्चिज्जग्मुस्तदाख्यातुं रावणस्य दुरात्मनः ॥१॥

॥ रा॰वा॰सुं॰॥
॥७०॥

एकार्थवाक्यमिति शेषः अनर्थार्थं स्वेषामनर्थमात्रप्रयोजनकं ॥२॥ नदेववाक्यमह्यघेदानीमिति अद्यदिने इदानीं अस्मिन्क्षणे पापविनिश्चये क
नमरणानिश्चये ऽस्मात्तु रक्षिकास्विदानीं न दसंभवान्मांसमात्रं इदमवधिकालोपलक्षणं भयातिशयायपलेवसूक्तिः यथासुखं स्थितमाया
नदनंतरं रावणाज्ञया एनत्त्वच्छरीरं राक्षस्यो भक्षयिष्यंति ॥३॥ अनार्याभिः क्रूराभिः दृष्ट्वा धर्मज्ञानयोगयोभिर्दृष्ट्वा प्रबुद्धेत्यनेनेनतावत्पर्यंतं

ततः सीतामुपागम्य राक्षस्यो भीमदर्शनाः ॥ पुनः परुषमेकार्थमनर्थार्थमथाब्रुवन् ॥२॥ अद्येदानीं तवानार्ये सीते पा
पविनिश्चये ॥ राक्षस्यो भक्षयिष्यंति मांसमेतद्यथासुखं ॥३॥ सीतां ताभिरनार्याभिर्दृष्ट्वा संतर्जितां तदा ॥ राक्षसी
त्रिजटा वृद्धा प्रबुद्धा वाक्यमब्रवीत् ॥४॥ आत्मानं खादतानार्या न सीतां भक्षयिष्यथ ॥ जनकस्य सुतामिष्टां स्नुषां
दशरथस्य च ॥५॥ स्वप्नो ह्यद्य मया दृष्टो दारुणो रोमहर्षणः ॥ राक्षसानामभावाय भर्तुरस्या भवाय च ॥६॥ एव
मुक्तास्त्रिजटया राक्षस्यः क्रोधमूर्छिताः ॥ सर्वा एवाब्रुवन्भीतास्त्रिजटां तामिदं वच ॥७॥ कथयस्व त्वया दृष्टः
स्वप्नोऽयं कीदृशो निशि ॥ तासां श्रुत्वा तु वचनं राक्षसीनां मुखोद्गतं ॥८॥ उवाच वचनं काले त्रिजटा स्वप्नसंश्रितं
॥ गजदंतमयीं दिव्यां शिबिकामंतरिक्षगां ॥९॥ युक्तां वाजिसहस्रेण स्वयमास्थाय राघवः ॥ शुक्लमाल्यांबरधरो ल
क्ष्मणेन समागतः ॥१०॥

शुभ्रवनीति गम्यते ॥४॥ आत्मानं स्वशरीरं न भक्षयिष्यथेति अथ हि कालात् परस्परमिति शेषः ॥५॥ ऊनोवगतमेननचाह ॥ स्वप्न इति दारुणः क्रू
रो राक्षसानामभावाय दृष्टः तथा रोमहर्षणः अस्य द्रुतो रोमांचकारी स्या भर्तुर्भवाय दृष्ट इत्यर्थः ॥६॥ पूर्वं क्रोधमूर्छिताः पश्चात्त्रिजटावच
नान्नभीता इत्यर्थः ॥७॥ ता॥ काले प्रातःकाले स्वप्नसंश्रितं प्रातःकाले दृष्टस्वप्नदृष्टार्थविषयकं अनेन स्वप्नस्य शीघ्रफलदत्वं सूचितं न च सीतायाः
वाञ्छानि हन्नयेन दभ्युदयस्य च ॥ स्वप्नप्रथममाह गजदंतेति
शिबिकां वाजिसहस्रयुक्तेत्यु विशेषणाद्विमानं इत्यर्थः ना॰
मास्थाय गच्छन्मया दृष्टः समागतः सहितः ॥१०॥

283

॥ श्रीः ॥
॥७०॥

सागरेणाक्षीरसागरेण परिक्षिप्तमावृतं ॥ ११ ॥ संगतानत्रैवुपवर्तिते इति शेषः एतेन लंकायामेव रामस्य सीतादर्शनं सूचितं स्वप्ने तस्मात् राघवश्चेतिप
नः स्वप्नांतरेऽस्यर्थः ॥ १२ ॥ चकास सुशुभे ॥ १३ ॥ जानकीपर्युपस्थितौ जानकीसमीपं प्राप्तौ नगस्य श्वेतपर्वतस्य दंतिनः स्कंधमाश्रिताः तदुक्तं आरोह
णं गोवृषकुंजराणां प्रासादशैलाग्रवनस्पतीनां ध्रुवमर्थलाभदमिति ॥ १४ ॥ अथ संभर्तुरंके गत्वा ततः समुत्पत्य संकूर्ध्वं भर्त्रा परिगृहीतस्य धवला

सखेव चाद्य मया दृष्टा सीता शुक्लांबरावृता । सागरेण परिक्षिप्तं श्वेतपर्वतमास्थिता ॥ ११ ॥ रामेण संगता सीता भास्करेण प्रभा
यथा ॥ राघवश्च पुनर्दृष्टश्चतुर्दंतं महागजं ॥ १२ ॥ आरूढः शैलसंकाशं चकास सहलक्ष्मणः । ततस्तु सूर्यसंकाशौ दीप्य
मानौ स्वतेजसा ॥ १३ ॥ शुक्लमाल्यांबरधरौ जानकीं पर्युपस्थितौ ॥ ततस्तस्य नगस्याग्रे ह्याकाशस्थस्य दंतिनः ॥ १४ ॥ भर्त्रा
परिगृहीतस्य जानकी स्कंधमाश्रिता ॥ भर्तुरंकात्समुत्पत्य ततः कमललोचना ॥ १५ ॥ चंद्रसूर्यौ मया दृष्टो पाणिभ्यां परि
मार्जती ॥ ततस्ताभ्यां कुमाराभ्यामास्थितः स गजोत्तमः ॥ १६ ॥ सीतया च विशालाक्ष्या लंकाया उपरिस्थितः ॥ पांडुरर्षभ
युक्तेन रथेनाष्टयुजा स्वयं ॥ १७ ॥ शुक्लमाल्यांबरधरो लक्ष्मणेन सहागतः । ततोन्यत्र मया दृष्टो रामः सत्यपराक्रमः ॥
१८ ॥ लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ॥ आरुह्य पुष्पकं दिव्यं विमानं सूर्यसन्निभं ॥ १९ ॥ उत्तरां दिशमा॰
लोच्य प्रस्थितः पुरुषोत्तमः । रावणश्च मया दृष्टो मुंडस्तैलसमुक्षितः ॥ २० ॥ ॰तस्य गजस्कंधमाश्रिता ॥ १५ ॥ सूर्याचंद्रमसौ पा
णिना परिमार्जती तदुक्तं । आदित्यमंडलं वापि चंद्रमंडलमेव वा । स्वप्ने गृह्णाति हस्ताभ्यां महद्राज्यं समाप्नुयादिति ॥ १६ ॥ पांडुरर्षभेणेति पांडुरवृष
भाष्टयुक्तेन रथेन ॥ १७ ॥ शुक्लमाल्यांबरधरो रामो लक्ष्मणेन सहेहागत इत्यन्वयः अन्यत्र स्वप्नांतरे ॥ १८ ॥ आरुह्य पुष्पकमित्येतद्वा विस्पष्टमेव दृष्टं
॥ २२ ॥ अत्र मध्ये सांडंशुवत्तमित्यादयो बहवः श्लोका रामानुजसंप्रदायपुस्तकेषु दृश्यंते ते प्रक्षिप्ता इति कतकादयोन्ये च अथ रावणानर्थसूचकं स

पिवन्तीति तैलमिश्रैः शोण॥ करवीरकृतस्रज इति विमानादित्वस्य विशेषणं करवीरेत्यारभ्यस्वप्नान्तरं॥२१॥ रथेनेत्यादिस्वप्नान्तरं॥२२॥२३॥२४॥२५॥ मल्ला
निपंकानि च यस्मिंस्तत्तिमिरं॥२६॥ अकर्दमं जलकर्दमेनापि रहितं॥२७॥२८॥२९॥ वैहायसं खेचरत्वं॥३०॥ एतदग्रे श्लोकद्वयं प्रक्षिप्तमितिव
नक॥ गीतवादित्रस्वन इति बहुव्रीहिः अयमपि विभीषणविषयो भाव्यर्थस्यैवमनुभूतः पिवतामित्यादि पिवतां रक्षसावासभूता लंका सागरे

रक्तवासाः पिवन्मत्तः करवीरकृतस्रजः॥ विमानात्पुष्पकादद्य रावणः पतितः क्षितौ॥२१॥ कृष्यमाणः स्त्रियामुंडो दृष्टः कृ
ष्णांवरः पुनः॥ रथेन खरयुक्तेन रक्तमाल्यानुलेपनः॥२२॥ पिवंस्तैलं हसन्नृत्यन्भ्रांतचित्ताकुलेंद्रियः गर्दभेन ययौ
शीघ्रं दक्षिणां दिशमास्थितः॥२३॥ पुनरेव मया दृष्टो रावणो राक्षसेश्वरः॥ पतितोवाक्भूमौ गर्दभाद्भयमोहितः॥२४॥
सहसोत्थाय संभ्रांतो भयार्तो मदविह्वलः॥ उन्मत्तरूपो दिग्वासा दुर्वाक्यं प्रलपन्बहु॥२५॥ दुर्गंधं दुःसहं घोरं तिमिरं
नरकोपमं॥ मलपंकं प्रविश्याशु मग्नस्तत्र स रावणः॥२६॥ प्रस्थितो दक्षिणामाशां प्रविष्टो कर्दमं ह्रदं॥ कंठे बध्वा दशग्री
वं प्रमदा रक्तवासिनी॥२७॥ काली कर्दमलिप्तांगी दिशं याम्यां प्रकर्षति॥ एवं तत्र मया दृष्टः कुंभकर्णो महाबलः॥२
८॥ रावणस्य सुताः सर्वे मुंडास्तैलसमुक्षिताः॥ वराहेण दशग्रीवः शिंशुमारेण चेंद्रजित्॥२९॥ उष्ट्रेण कुंभकर्णश्च
प्रयाता दक्षिणां दिशं॥ एकस्तत्र मया दृष्टः श्वेतछत्रो विभीषणः॥ चतुर्भिः सचिवैः सार्द्धं वैहायससमुपस्थितः॥३०॥
समाजश्च महानत्र गीतवादित्रनिस्वनः॥ पिवतां रक्तमाल्यानां रक्षसां रक्तवाससां॥३१॥ लंका चेयं पुरी रम्या सवा
जिरथकुंजरा॥ सागरे पतिता दृष्टा भग्नगोपुरतोरणा॥३२॥ पीत्वा तैलं प्रमत्ताश्च प्रहसंत्यो महास्वनाः॥ लंकायां भ
स्मरूक्षायां सर्वा राक्षसयोषितः॥३३॥

पतितेत्यन्वयः॥३१॥३२॥ भस्मरूक्षायां भस्मना रूक्षायां॥३३॥ निवसज्जनं न्यग्भूतं कुत्सितं यस्मिन्नित्यर्थः॥३४॥ यदेवमतोपगच्छतनतन्क्लेशाद
नं समस्तान्यतोपसरत राघवश्चसीतामाप्नोतेवपश्यध्वं अनपगमेबाधकमाह यानयेदिति पुष्पान्वीता क्लेशदात्री॥३५॥६३॥२३॥६३॥६३

कुंभकर्णादयश्चेमे सर्वे राक्षसपुंगवाः
रक्तं निवसनं गृह्य प्रविष्टा गोमयं ह्रदं॥३४॥

अपगच्छत पश्यध्वं सीतामाप्नोति राघवः
घातयेत्परमामर्षी युष्मान्सार्धं हि राक्षसैः॥३५॥

भर्त्सितांत्वय्यनुरक्तनभर्त्सनादिमंतीं नानुमंस्यते न क्षमिष्यते अनुरक्तस्त्रीर्वो घातयेदिति भावः ॥३६॥३७॥३८॥ हे राक्षस्यः किं विवक्षया कुत्सित
भर्त्सनादिवचनेच्छयाऽलमितिशेषः न च हेतुः राघवादिति ॥३९॥ नन्वेनं क्लेशितां कथमस्माकं प्रसन्ना स्यादत आह प्रणिपातेति ॥४०॥ सीताया
अभ्युदयसूचकं प्रत्यक्षनिमित्तमपि दर्शयति ॥ अपि चेति द्वितीयमपि चेति पादपूरणे विरूपं लक्षणं दुर्लक्षणं सूक्ष्ममपि किंचिन्नोपलक्ष

प्रियां बहुमतां भार्यां वनवासमनुव्रतां ॥ भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ॥३६॥ तदलं क्रूरवाक्यैर्वः सांत्व
मेवाभिधीयतां ॥ अभियाचाम वैदेहीमेतद्धि मम रोचते ॥३७॥ यस्या ह्येवंविधः स्वप्नो दुःखितायाः प्रदृश्यते ॥ सा
दुःखैर्बहुभिर्मुक्ता प्रियं प्राप्नोत्यनुत्तमं ॥३८॥ भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ॥ राघवाद्धि भयं घोरं राक्ष
सानामुपस्थितं ॥३९॥ प्रणिपातप्रसन्ना हि मैथिली जनकात्मजा ॥ अलमेषा परित्रातुं राक्षस्यो महतो भयात् ॥४०॥ अपि
चास्या विशालाक्ष्या न किंचिदुपलक्षये ॥ विरूपमपि चांगेषु सुसूक्ष्ममपि लक्षणं ॥४१॥ छायावैगुण्यमात्रं तु शंके
दुःखमुपस्थितं ॥ अदुःखार्हामिमां देवीं वैहायसमुपस्थितां ॥४२॥ अर्थसिद्धिं तु वैदेह्याः पश्याम्यहमुपस्थितां ॥
राक्षसेंद्रविनाशं च विजयं राघवस्य च ॥४३॥ निमित्तभूतमेतत्तु श्रोतुमस्या महत्प्रियं ॥ दृश्यते च स्फुरच्चक्षुः प
द्मपत्रमिवायतं ॥४४॥

पेइत्यर्थः ॥४१॥ किंत्वस्या नानुलेपनाद्यभावमूलकशोभावैगुण्यमात्रात्मकं दुःखमुपस्थितमिति उत्प्रेक्षते नतु सुखवैवर्ण्यदर्शिताक्षि
स्पंदादि दुर्निमित्तलेशोऽपीत्यर्थः वैहायसमुपस्थितां स्वप्नेनयादृष्टं ॥४२॥ अतएवास्या अर्थसिद्धिं इष्टसिद्धिमुपस्थितां पश्यामि रावणना
शं रामविजयं च पश्यामि ॥४३॥ अपि चास्या महत्प्रियं श्रोतुं निमित्तभूतं सूचकलवं प्राप्तमेतत् स्फुरच्चक्षुश्च दृश्यते वाममिति शेषः ॥४४

हृषितः पुलकितः वेत्ति वाक्यात्तं कारे अदक्षिणो वामः॥४५॥ वेपन्वेपमानः सुरश्मिस्पर्शः राघवमस्याः पुरः स्थितमिव संसूचयति॥४६॥ पक्षी काका
दिः शाखानिलयं शाखास्थनीडं प्रविष्टो वारंवारमुन्नमसांत्ववादी उन्नमशानस्वरवादी सुखादी सुखागतां शोभनस्य स्वागतं प्राप्तिर्यस्मात् नादं
शीवाचं कथयन् पुनःपुनःअभ्योदयतीव शोभनप्राप्तिं सूचयतीव शोभनसमागतं प्रसुजरेति सीतां पुनः पुनः प्रेरयतीव वा॥४७॥ ततस्त्रिजटोक्तं

इषच्च हृषितो वास्या दक्षिणाया ह्यदक्षिणः॥ अकस्मादेव वैदेह्या बाहुरेकः प्रकंपते॥४५॥ करेणुहस्तप्रतिमः सव्यश्चोरु
रनुत्तमः॥ वेपन्कथयतीवास्या राघवं पुरतः स्थितं॥४६॥ पक्षी च शाखानिलयं प्रविष्टः पुनः पुनश्चोत्तमसांत्ववादी
सुखागतां वाचमुदीरयाणः पुनः पुनश्चोदयतीव हृष्टः॥४७॥ ततः सा ह्रीमती बाला भर्तुर्विजयहर्षिता॥ अवो
चद्यदि तत्तथ्यं भवेयं शरणं हि वः॥४८॥ ॥ इत्यार्षे श्रीमद्रामायणे वा० सुंदरकांडे सप्तविंशः सर्गः॥२७॥ सा राक्ष
सेंद्रस्य वचो निशम्य तद्रावणस्याप्रियमप्रियार्त्ता॥ सीता वितत्रास यथा वनांते सिंहाभिपन्ना गजराजकन्या॥१॥
सा राक्षसीमध्यगता च भीरुर्वाग्भिर्भृशं रावणतर्जिता च॥ कांतारमध्ये विजने विसृष्टा बालेव कन्या विललाप
सीता॥२॥ सत्यं बतेदं प्रवदंति लोके नाकालमृत्युर्भवतीति संतः॥ यत्राहमेवं परिभर्त्स्यमाना जीवामि यस्मात्क्ष
णमप्यपुण्या॥३॥ सुखाद्विहीनं बहुदुःखपूर्णमिदं तु नूनं हृदयं स्थिरं मे॥ विदीर्यते यन्न सहस्रधाद्य वज्राहतं शृंगमिवाचलस्य॥४॥
पः

४८॥ आह्वयमानः॥ इति रामाभिरामे सुंदरकांडे सप्तविंशः सर्गः॥२७॥ ॥ पुनर्दुःखपारमदृष्ट्वैव सीता प्रलापं सेति॥१॥ विसृष्टा बाला कन्येव महादुर्भि
क्षक्षोभवशात्॥ बालकन्यायाः परित्यागः॥२॥ यस्मादपुण्या पुण्यरहिता॥३॥ ४॥ ६३॥ ६३॥ २३॥ ६३॥ ६३॥ ६३॥ ६३॥ ६३॥ ६३॥ ६३॥ ६३॥ २३॥ ६३॥ २३॥ ६३॥ ६३॥

285

५८

नन्वेवं प्राणत्यागे आत्महननदोषः स्यादत आह नैवेति ॥ अत्रेदृशे विषये प्राणत्यागेपि न दोषमस्ति दोषमिति ॥ क्लीवत्वमार्षं यतोहमस्य वध्यास्त्वं च दुर्मरण
जनितदोषस्य दुर्वारत्वेन दोषाभावोक्तिरिति भावः आत्मघातिब्राह्मणहननयोर्दाहादावनधिकारश्रवणस्य जल्पत्वादिति वोध्यं ॥ नन्वेवं रागवशांगीका
रस्य चिकिर्षितां अत आह ॥ भावमिति अद्विजाय शूद्राय द्विजो मंत्रमिवाहं स्वीयं भावं सांतरमस्यानुप्रदातुं अनुकूलनतया समर्पयितुं नालं न समर्थो ॥ ए
वंच पातिव्रत्यस्य प्राणत्यागे न रक्षणं सर्वदोषनिस्तार इति भावः ॥ ५ ॥ ननु तथाप्यात्मघातेः तिदोषाः सोध्युक्त इत्याशंक्यास्ये विचित्रवधादिभेमी(

नैवास्ति तत्त्वं मम दोषमंच वध्याहमस्याप्रियदर्शनस्य ॥ भावं न चास्याहमनुप्रदातुमलं द्विजो मंत्रमिवा
द्विजाय ॥ ५ ॥ तस्मिन्ननागच्छति लोकनाथे गर्भस्थजंतोरिव शल्यहंतः ॥ नूनं ममांगान्यचिरादनार्यः शरैः शितै
श्छेत्स्यति राक्षसेंद्रः ॥ ६ ॥ दुःखं वनेदं न तु दुःखितायामासौ चिरायाभिगमिष्यतो द्वौ ॥ वद्धस्य वध्यस्य यथानि
गे२ शोँराजोपरोधादिव तस्करस्य ॥ ७ ॥ हाराम हालक्ष्मण हासुमित्रे हाराममातः सह मे जनन्याः ॥ एषा विपद्याम्यह
मल्पभाग्या महार्णवे नौरिव मूढवाता ॥ ८ ॥ (त्याह ॥ तस्मिन्ननागच्छतीति तस्मिन्रामे अनागच्छति सति ॥ अत्यधिकालात्तर्वागि

तिशेषः ममांगानि जीवंत्यास्य वछेत्स्यति निरुद्धायाविशसनेदृष्टांतः गर्भेति शल्यं शस्त्रं तेन हननी ति शल्यहंतः आवश्यवैद्यः आर्षत्वात्साधुस्यथाग
मि२ र्भस्थजंतुं व्याँरूपं जीवनं हननीति न दूनत् एतत्श्लोकद्वयं कतकेनेत्थं व्याख्यातं अन्यायप्राणवधेपि मम दोषोनेत्याह नैवेति ॥ यद्यप्यस्याहं वध्याभव
मि न तथापि मम दोषो नैवं भावाऽप्रदानेन पातिव्रत्यरक्षणात्सर्वदोषनिस्तार इत्यर्थः किंच मरणप्राप्तिः पाक्षिकीत्याह तस्मिन्निति अनागच्छ
त्येव वधप्रसक्तिर्नान्यथेति भावः अनागमनपक्षे प्राणविशसने दृष्टांतः गर्भेति ॥ ६ ॥ चिराय भर्तृवियोगदुःखिताया मे इदं विशसनदुःखमपि व
नागमिष्यति ॥ यतो द्वौ मासौ विशसनावधिभूतौ कतिपयदिनावधिकावपि अभिगमिष्यतः शीघ्रं गमिष्यतः ॥ किलनच वधप्राप्तौ दृष्टांतं नवद्ध

म२

स्यांतिनस्करस्य वध इवेति ॥ ७ ॥ सह मम श्वश्र्वा सहयामे जनन्या
स्ताभ्य हासुष्मान दृष्ट्वा स्वसेवाहं विपद्यामि मूढवतो मोहास्य

स्महायाम्यादिवानवृक्षा ॥ ८ ॥

न १

॥ रा॰वा॰सुं॥
॥७३॥

मृगस्य रूपं धारयता । सखेन राक्षसरूपजीवेन मम कारणात् विश्वस्तो नूनं वैधृतेन विद्युत्संवेधिने त्रसा ॥ ९ ॥ सर्वं चेदं दुःखं स्वदत्तनोर्थसूत्रमित्याह नूनमि
ति लुलुभे विमोहयति स्म ॥ अहं विससर्ज विसृष्टवती अपरोक्षोपि चित्तविक्षेपादेना पारोक्ष्यमारोप्य [illegible] लिट् ॥ १० ॥ हा रामेत्यादौ हे राम मां हा अहंशो
चेत्यर्थः हा जीवममप्राणरूप हितः [illegible]नकरः प्रियस्येत्यस्य त्वमितिशेषः ॥ ११ ॥ धर्मो रक्षतीति सर्वविवादसिद्धमपि मां प्रति निष्फलमित्याह अनन्यदे

नराखिनो धारयता मृगस्य सखेन रूपं मनुजेंद्रपुत्रो ॥ नूनं विश्वस्तो मम कारणान्तोसि हर्षभो हा विवधे घुनेन ॥ ९ ॥ नूनं सका
लो मृगरूपधारी मामल्पभाग्यां लुलुभे नशानी ॥ यत्रार्यपुत्रौ विससर्ज मूढा रामानुजं लक्ष्मणपूर्वजं च ॥ १० ॥ हा रा
म सत्यव्रत दीर्घबाहो हा पूर्णचंद्रप्रतिमाननवक्त्र ॥ हा जीवलोकस्य हित प्रियश्च वध्यां न मां वेत्सि हि राक्षसानां ॥ ११ ॥
अनन्यदेवत्वमियं क्षमा च भूमौ च शय्या नियमश्च धर्मे ॥ पतिव्रतात्वं विफलं ममेदं कृतं कृतघ्नेष्विव मानुषाणां
॥ १२ ॥ मोघं हि धर्मश्चरितो ममायं तथैव पत्नीत्वमिदं निरर्थकं ॥ या त्वां न पश्यामि कृशा विवर्णा हीना त्वया संगमने निरा
शा ॥ १३ ॥ पितुर्निदेशं नियमेन कृत्वा वनान्निवृत्तश्चरितव्रतश्च ॥ स्त्रीभिस्तु मन्ये विपुलेक्षणाभिः संरंस्यसे वीतभयः
कृतार्थः ॥ १४ ॥ अहं तु राम त्वयि जातकामा चिरं विनाशाय निबद्धभावा ॥ मोघं चरित्वाथ तपो व्रतं च त्यक्ष्यामि धिग्जी
वितमल्पभाग्या ॥ १५ ॥ संजीवितं क्षिप्रमहं त्यजेयं विषेण शस्त्रेण शितेन वापि ॥ विषस्य दाता न तु मेस्ति कश्चिच्छस्त्रस्य वा
वेश्मनि राक्षसस्य ॥ १६ ॥

पत्वमिति ॥ प्रत्येकदेवत्वमित्यर्थः इयं क्षमा शापेन संहारशक्तावपि एवं पीडासहनरूपा परस्मिन्निरिक्ते कामाशक्तिराहित्यं पतिव्रतात्वं कृतमनुपकृते
॥ १२ ॥ उक्तमेवार्थं दुःखातिशयाद्दावर्तयति मोघं हीति त्वया हीना तव संगमने च निराशा ॥ १३ ॥ इदानीं तयोरवधमवगतिश्चिन्त्यमत्वाशात्तयोर्न
कोपि नाशोपि तु ममैवेत्याह पितुरिति वनान्निवृत्तेर्नमध्ये व्रतत्यागे नेत्याह चरितव्रतश्चेति ॥ १४ ॥ विनाशाय मरणाय न दुःखाय अल्पभाग्यां मां
धिग्जी ॥ १५ ॥ वेश्मनि राक्षसस्येति ॥ १६ ॥

286

॥श्रीः॥
॥७३॥

स्तदन्तं तरमेकस्तोकः प्रक्षिप्तः यमस्यमूलं समीपं ॥ १७ ॥ तस्याः नगस्य शाखां गृहीत्वोपस्थितायां ॥ १८ ॥ विशोकानि विशोककराणि धैर्यार्जितानि धै-
र्यस्यार्जितमर्जनं संपादनं येस्तानि ॥ लोके प्रवराणि प्रसिद्धानि पुराप्रसिद्धानि संवादीनि निमित्तानि प्रादुर्बभूवुः ॥ १९ ॥ धेयमानः ॥ इति रामाभिरा-
मे सुंद० ऽष्टाविंशः सर्गः ॥ २८ ॥ ॥ तथेति उपसेवितः सेवकास्त इव ॥ १ ॥ अरालया वक्रया पक्ष्मराज्यावृतं पक्ष्मस्याः ऽरालया वक्रो मराज्या ऽनमि

त

इतीव देवी बहुधा विलप्य सर्वात्मना राममनुस्मरंती ॥ प्रवेपमाना परिशुष्कवक्त्रा नगोत्तमं पुष्पितमाससाद ॥ शोकाभितप्ता
बहुधा विचिंत्य सीताथ वेणीग्रथनं गृहीत्वा ॥ उद्बध्य वेणुग्रथनेन शीघ्रमहं गमिष्यामि यमस्य मूलं ॥ १७ ॥ उपस्थिता
सा मृदुसर्वगात्री शाखां गृहीत्वाच नगस्य तस्य ॥ तस्यास्तु रामं प्रविचिंतयंत्या रामानुजं स्वं च कुलं शुभांग्याः ॥ १८ ॥ त-
स्या विशोकानि तदा बहूनि धैर्यार्जितानि प्रवराणि लोके ॥ प्रादुर्निमित्तानि तदा बभूवुः पुरापि सिद्धान्युपलक्षिता-
नि ॥ १९ ॥ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे ऽष्टाविंशः सर्गः ॥ ॥ तथागतां तां व्यथितामनिंदितां व्यतीतहर्षां
परिदीनमानसां ॥ शुभां निमित्तानि शुभानि भेजिरे नरं श्रिया जुष्टमिवोपसेवितः ॥ १ ॥ तस्याः शुभं वाममरालप-
क्ष्मराज्यावृतं कृष्णविशालशुक्लं ॥ प्रास्पंदतैकं नयनं सुकेश्या मीनाहतं पद्ममिवाभिताम्रं ॥ २ ॥ भुजश्च चार्वंचितवृत्त त॰
पीनः परार्ध्यकालागुरुचंदनार्हः ॥ अनुत्तमेनाध्युषितः प्रियेण चिरेण वामः समवेपताशु ॥ ३ ॥ गजेंद्रहस्तप्रतिम-
श्च पीनस्तयोर्द्वयोः संहतयोः सुजातः ॥ प्रस्पंदमानः पुनरूरुरस्या रामं पुरस्तात्स्थितमाचचक्षे ॥ ४ ॥

त्यर्थः तथागतामेक नीतिकामाचेऽन्यत्र विशालशुक्लत्वं युक्तं ॥ अभितस्ताम्रं प्रांतरक्तं एकं वामं २ ॥ अध्युषितः कृतसंपर्कः ॥ ३ ॥ संहतयोः श्लि-
ष्टयोस्तयोरूर्वोर्मध्ये वाम ऊरुरित्यर्थः ॥ ४ ॥ श्रीरामायनमः ॥ ६३ ॥

स्तं3 रं1

हेमरूपितत्वाद्धेमसमानवर्णं ईषद्रजोध्वस्तमिव ईषन्मलिनमिव ॥ चिरमपरिवर्त्तनात ॥ शिखरं दाडिमवीजं तदग्रतुल्यदंस्याश खशेलवृक्षाग्रेकाग्र
ग्रग्रहकोटिषु पक्वेदाडिमवीजेचेति विश्व: परिस्रंसत पर्यस्रंसत आसन्नादधः पपात ॥५॥ साधुसिद्धैः सम्यक्संबोधिभिः संवादिभिरिति पाठांतरं ६

सुभं पुनर्हेमसमानवर्णमीषद्रजोध्वस्तमिवातुलाक्ष्याः ॥ वासःस्थितायाः शिखराग्रदंस्याः किंचित्परिस्रंसत चारुगात्र्याः
॥५॥ एतैर्निमित्तैरपरैश्च सुभ्रूः संचोदिता प्रागपि साधुसिद्धैः ॥ वातातपक्लांतमिव प्रणष्टं वर्षेण वीजं प्रतिसंज-
हर्ष ॥६॥ तस्याः पुनर्विंवफलाधरोष्ठं स्वक्षिभ्रुकेशांतमरालपक्ष्म ॥ वक्त्रं वभासे स्मितशुक्लदंष्ट्रं राहोर्मुखाच्चंद्र इ-
व प्रमुक्तः ॥७॥ सावीतशोका व्यपनीततंद्रा शांतज्वरा हर्षविबुद्धसत्वा ॥ अशोभतार्या वदनेन शुक्ले शीतांशुना रा-
त्रिरिवोदितेन ॥८॥ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे एकोनत्रिंशः सर्गः ॥२९॥ ॥ हनुमानपि विक्रांत
न्तत्वत :सर्वंसुश्रावंतः ॥ सीतायास्त्रिजटायाश्च राक्षसानां च गर्जितं ॥१॥ अवेक्षमाणस्तां देवीं देवीमिव नंदने ॥ ततो ब ता
हुविधां चिंतां चिंतयामास वानरः ॥२॥ यां कपीनां सहस्राणि वहूनि अयुतानि च ॥ दिक्षु सर्वासु मार्गंते से-
यमासादिता मया ॥३॥

शोभनेक्षिणीभ्रुवौकेशांताअलकाश्च यत्र तत् स्मितशुक्लदंष्ट्रं स्फारिकादिसितपदार्थवत् शुक्ला दंष्ट्रा यत्र तत्तत्संबंधशुक्लदंष्ट्रावदिति ॥७॥ हर्षे-
णविबुद्धसत्त्वं चित्तं यस्यावदनेन करणेन शुक्ले शुक्लपक्षे ॥८॥ अजमानः इति रामाभिरामे सुंदर० एकोनत्रिंशः सर्गः ॥२९॥ ॥ विक्रांतः शूरः
सीतायाः त्रिजटायाः स्वप्नकथनमितिशेषः ॥१॥ चिंतां चिंतयामास चिंतां चकारेत्यर्थः ॥२॥३॥ ६ ॥

287

पि ३

चारेण चारात्मना प्रवर्त्तमानेन इदं वक्ष्यमाणं॥४॥ राक्षसानांविशेषसारतम्यमैश्वर्यादिकृतं अस्माद्रावणस्य प्रभावो बलं वा वेक्षितः॥ अप्रमेयस्य अ-
परिच्छेद्यस्वरूपस्य अपरिच्छेद्यगुणस्य च सर्वसत्वदयावतः सर्वसत्वंवत्सलंदयावपस्य सर्वसत्वेषु दयावत इति वा दयावत्वाद्देवसीतार्थे त्रै-
लोक्यानाशनं रामस्य समाश्वासयितुं युक्तमिति शेषः॥६॥ आश्वासयामि वर्त्तमानसमीपे भविष्यति लट्नहिनो॥७॥ दोषवत्कार्यहानिदोष

चारेण तु सुयुक्तेन शत्रोः शक्तिमवेक्षता॥ गूढेन चरता तावदवेक्षितमिदं मया॥४॥ राक्षसानां विशेषश्च पुरी
चेयं निरीक्षिता॥ राक्षसाधिपतेरस्य प्रभावो रावणस्य च॥५॥ यथा तस्याप्रमेयस्य सर्वसत्व दयावतः॥ स-
माश्वासयितुं भार्यां पतिदर्शनकांक्षिणीं॥६॥ अहमाश्वासयाम्येनां पूर्णचंद्रनिभाननां॥ अदृष्टदुःखां
दुःखस्य न ह्यंतमधिगच्छतीं॥७॥ यदिह्यहं सतीमेतां शोकोपहतचेतनां॥ अनाश्वास्य गमिष्यामि दोषव-
द्गमनं भवेत्॥८॥ गते हि मयि तत्रेयं राजपुत्री यशस्विनी॥ परित्राणमपश्यंती जानकी जीवितं त्यजे-
त्॥९॥ यथा च स महाबाहुः पूर्णचंद्रनिभाननः॥ समाश्वासयितुं न्याय्यः सीतादर्शनलालसः॥१०॥ नि-
शाचरीणां प्रत्यक्षमक्षमं चाभिभाषितुं॥ कथं नु खलु कर्त्तव्यमिदं कृच्छ्रगतो ह्यहं॥११॥ अनेन रात्रिशेषेण यदि
नाश्वास्यते मया॥ सर्वथा नास्ति संदेहः परित्यक्ष्यति जीवितं॥१२॥ ८ वत्॥ प नदेयाह॥ गते हीति तत्र रामसमीपे॥९॥

आश्वासयितुं सीतासंदेशकथनेन तथा इयमप्याश्वासयितुं न्याय्येति शेषः॥१०॥ सीतासमाश्वासनं च कष्टमित्याह॥ निशाचरीणामि-
ति तासां प्रत्यक्षं सीतयाऽभिभाषणमक्षममयोग्यं अत इदं कार्यं कथं कर्त्तव्यमिति एवं कृच्छ्रगतोऽहमस्मि॥११॥ कालविलंबमनाश्वास

रामासुन्दरकाण्डे॥१९॥

संभाषणं चावश्यकमित्याह रामश्चेति मामुद्दिश्य सीता किमब्रवीदिति चेत् ॥ रामो मां पृच्छेदित्यन्वयः ॥१३॥ १४ ॥ यद्येनामसंभाष्यैव भर्तारं स्वस्वा-
मिसुग्रीवं रामकारणाद्यदि वोद्योजयिष्यामि उद्योगं कारयिष्यामि तर्हि मदागमनं व्यर्थं स्यात् ॥ अनाश्वासितया सीतया ततः प्रागेव देहत्यागादि-
निभावः ॥१५॥ अंतरमवकाशं तासामनवधानसमयं ॥१६॥ तत्राश्वासनोपायं निश्चिनोति ॥ अहं हीति ॥ अतितनुः अतिसूक्ष्मवानरतनुरेवं सं-

रामस्तु यदि पृच्छेत्त्वां किं मां सीताब्रवीदिति ॥ किमहं तं प्रतिब्रूयामसंभाष्य सुमध्यमां ॥१३॥ सीतासंदेशरहितं
मामितस्त्वरया गतं ॥ निर्दहेदपि काकुत्स्थः क्रोधतीव्रेण चक्षुषा ॥१४॥ यदि वोद्योजयिष्यामि भर्त्तारं रामका-
रणात् ॥ व्यर्थमागमनं तस्य ससैन्यस्य भविष्यति ॥१५॥ अंतरं त्वहमासाद्य राक्षसीनामवस्थितः ॥ शनैराश्वा-
सयिष्यामि संतापबहुलामिमां ॥१६॥ अहं ह्यतितनुश्चैव वानरश्च विशेषतः ॥ वाचं चोदाहरिष्यामि मानुषीमिह संस्कृ-
तां ॥१७॥ यदि वाचं प्रदास्यामि द्विजातिरिव संस्कृतां ॥ रावणं मन्यमाना मां सीता भीता भविष्यति ॥१८॥ अवश्यमे-
व वक्तव्यं मानुषं वाक्यमर्थवत् ॥ मया सांत्वयितुं शक्या नान्यथेयमनिंदिता ॥१९॥ सेयमालोक्य मे रूपं जान-
कीभाषितं तथा ॥ रक्षोभिस्त्रासिता पूर्वं भूयस्त्रासमुपैष्यति ॥२० ॥

न्मानुषीं मनुष्यशरीरसाध्यां संस्कृतां व्याकरणसंस्कारवतीं ॥१७॥ संस्कृतकथने दोषमाशंक्य मनुष्यभाषयैव व्यवहर्तव्यमिति निश्चिनुते ॥ यदि-
ति ॥१८॥ तदेवाह ॥ अवश्यमेवेति ॥१९॥ अथ वृक्षांतरितेनैवेयं मया वक्तव्येति निश्चयं कुर्वन् ॥ पुरो गत्वाऽभिभाषणे दोषपरंपरा उपन्यस्यति
सेयमिति मे रूपं वानरीयं पुरतो दृष्ट्वा भाषितं च मानुषं स्वाविरुद्धव्यापारदर्शनाद्रावणोऽयमिति मत्वा त्रासं गमिष्यति ॥२० ॥ ६०॥६ ॥

मि५ 988

किंतत्रस्तत्राह॥ ततोजातेतिशब्दंआर्त्तशब्दं॥२१॥ समेत्यात्रमत्संमुखोगतैर्त्रमिलितोभवेद्वा॥२२॥ संपरिक्षिप्यसर्वतस्त्वक्षर्विक्षेपेणाञ्चाल
॥२३॥ शाखाः परिघायंते॥ मांहत्वेत्यन्वयः॥२४॥ ताभिरत्रधर्षणार्थंपरिगृहीतंमममहद्रूपंसंप्रेक्ष्यभयवित्रस्ताभयेनमदर्शनजशरीर

ततोजातपरित्रासा शब्दंकुर्यान्मनस्विनी॥ जानानामांविशालाक्षीरावणंकामरूपिणं॥२१॥ सीतयाचकृतेश
ब्देसहसाराक्षसीगणः॥ नानाप्रहरणोघोरःसमेयादंतकोपमः॥२२॥ ततोमांसंपरिक्षिप्यसर्वतोविकृताननाः
वधेचग्रहणेचैवकुर्युर्यत्नंमहाबलाः॥२३॥ तंमांशाखाप्रशाखाभिस्स्कंधांश्चोत्तमशाखिनां॥ दृष्ट्वाचपरिघा
वंतंभवेयुःपरिशंकिताः॥२४॥ ममरूपंचसंप्रेक्ष्यवनेविचरतोमहत्॥ राक्षस्योभयवित्रस्ताभवेयुर्विकृतस्व
राः॥२५॥ ततःकुर्युःसमाह्वानंराक्षस्योरक्षसामपि॥ राक्षसेंद्रनियुक्तानांराक्षसेंद्रनिवेशने॥२६॥ तेशूलशरनि
स्त्रिंशविविधायुधपाणयः॥ आपतेयुर्विमर्देस्मिंन्वेगेनोद्वेगकारणात्॥२७॥ संरुद्धस्तैस्तुपरितोविधमेराक्ष
संबलं॥ शक्नुयान्नतुसंप्राप्तुंपरंपारंमहोदधेः॥२८॥ मांवागृह्णीयुराप्लुत्यबहवःशीघ्रकारिणः॥ स्यादियंचा
गृहीतार्थाममचग्रहणंभवेत्॥२९॥ हिंसाभिरुचयोहिंस्युरिमांवाजनकात्मजां॥ विपन्नंस्यात्ततःकार्यंराम
सुग्रीवयोरिदं॥३०॥

रूपादिस्तुताःसम्यक्त्रस्तचित्ताःविकृतस्वराभवेयुः नकेवलंभयंशाखामृगोऽपितुकश्चनकामरूपीज्ञातुपस्य
इतिशंकितास्युरित्यर्थः॥२५॥ ततःकिंतत्राह॥ ततःकुर्युरितिराक्षसेंद्रनिवेशनेरक्षणायराक्षसेंद्रेणनियुक्तानामाह्वानंकुर्युः उद्वेगकार
णात्॥ आसामुद्वेगरूपान्निमित्तादस्मिंदेशेवेगेनविमर्देविमर्दायापतेयुरित्यर्थः॥२६॥२७॥ नशक्नुयांयुद्धग्गांतेतिभावः॥२८॥ अगृ
हीतार्थामत्तोऽज्ञातमदागमनप्रयोजना॥२९॥ इमांवे
ति॥ एतदर्थंकिंतोपमागतइत्याशयेनेतिशेषः॥३०॥

कार्यविपद्रमेवोपपादयति ॥ उद्देशे समुद्रस्य घनच्छायदेशे नष्टमार्गे प्रकारं न रेणौ नस्त्राप्ति संपादकमार्गरहिते ॥ ३१ ॥ विशस्ते हते ॥ ३२ ॥ ३३
न तु शक्ष्यामि युद्धश्रांत्येति भावः ॥ ३४ ॥ किंच युद्धे जयोपि संदिग्ध इत्याह ॥ असत्यानीति ॥ अनिश्चितजयानि संशयः संशयितज्ञ

उद्देशे नष्टमार्गेस्मिन्राक्षसैः परिवारिते ॥ सागरेण परिक्षिप्ते गुप्ते वसति जानकी ॥ ३१ ॥ विशस्ता वा गृहीता वा
रक्षोभिर्मयि संयुगे ॥ नान्यं पश्यामि रामस्य सहायं कार्यसाधने ॥ ३२ ॥ विमृशंश्च न पश्यामि यो हते मयि वान
रः ॥ शतयोजनविस्तीर्णं लंघयेत महोदधिं ॥ ३३ ॥ कामं हंतुं समर्थोस्मि सहस्राण्यपि रक्षसां ॥ न तु शक्ष्या
म्यहं प्राप्तुं परं पारं महोदधेः ॥ ३४ ॥ असत्यानि च युद्धानि संशयो मे न रोचते ॥ कश्च निःसंशयं कार्यं कुर्या
त्प्राज्ञः ससंशयं ॥ ३५ ॥ एष दोषो महान्हि स्यान्मम सीताभिभाषणे ॥ प्राणत्यागश्च वैदेह्या भवेदनभि-
भाषणे ॥ ३६ ॥ भूताश्चार्था विरुध्यंति देशकालविरोधिताः ॥ विक्लवं दूतमासाद्य तमः सूर्योदये यथा ॥ ३७ ॥
अर्थानर्थांतरे बुद्धिर्निश्चितापि न शोभते ॥ घातयंति हि कार्याणि दूताः पंडितमानिनः ॥ ३८ ॥ न विनश्येत्क
थं कार्यं वैक्लव्यं न कथं मम ॥ लंघनं च समुद्रस्य कथं नु न वृथा भवेत् ॥ ३९ ॥ कथं नु खलु वाक्यं मे शृणुया
जे न्नोद्वित्त च ॥ इति संचिंत्य हनुमान्चकार मतिमान्मतिं ॥ ४० ॥

यफलकयुद्धव्यापारः ॥ अरुचिहेतुः प्राज्ञत्वमेव दर्शयति कश्चेति निः संशयं निर्णीतफलकं प्राज्ञो मादृशः ससंशयं संशयितफल
कं न कोप्यर्थः ॥ ३५ ॥ सीताभिभाषणे पुरजनः स्थित इति शेषः ॥ ३६ ॥ भूताः सिद्धप्रायाः भूताइत्यादिश्लोकाः वक्तैव कांडे द्वितीयसर्गे व्याख्या

पी९

239

सुवंधुं सीताया इति शेषः सचासौ वंधुश्चेति तद्वंधुः तद्वंधौ रामे गतान्वेन तनाचित्तं यस्याः सा ॥ ४१ ॥ वचनानि समर्पयन् रामसंदेशवचनान्युच्चारयन्
॥ ४२ ॥ यथेयं श्रद्धास्यति तथा सर्वं समादधे सम्यगभिधास्ये ॥ ४३ ॥ असंभ्रमानः ॥ ॥ इति रामाभिरामे सुंदरकांडे त्रिंश· सर्गः ॥ ३० ॥ चिंतां चिंतयि

राममक्लिष्टकर्माणं सुवंधुमनुकीर्त्तयन् ॥ नैनामुद्वेजयिष्यामि तद्वंधुगतचेतनां ॥ ४१ ॥ इक्ष्वाकूणां वरिष्ठस्य रामस्य
स्य विदितात्मनः ॥ शुभानि धर्मयुक्तानि वचनानि समर्पयन् ॥ ४२ ॥ श्रावयिष्यामि सर्वाणि मधुरां प्रब्रुवन् गिरं ॥
श्रद्धास्यति यथा सीता तथा सर्वं समादधे ॥ ४३ ॥ इति स बहुविधं महानुभावो जगतिपतेः प्रमदामवेक्षमाणः ॥ म-
धुरमवितथं जगाद वाक्यं द्रुमविटपान्तरमास्थितो हनूमान् ॥ ४४ ॥ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे त्रिंश
:सर्गः ॥ ३० ॥ ॥ एवं बहुविधां चिंतां चिंतयित्वा महामतिः ॥ संश्रवे मधुरं वाक्यं वैदेह्या व्याजहार ह ॥ १ ॥ राजा द-
शरथो नाम रथकुंजरवाजिमान् ॥ पुण्यशीलो महाकीर्त्तिरिक्ष्वाकूणां महायशाः ॥ २ ॥ अहिंसारतिरक्षुद्रो घृणी
सत्यपराक्रमः ॥ मुख्यस्येक्ष्वाकुवंशस्य लक्ष्मीवान् लक्ष्मिवर्द्धनः ॥ ३ ॥ पार्थिवव्यंजनैर्युक्तः पृथुश्रीः पार्थिवर्षभः ॥ पृ-
थिव्यां चतुरंतायां विश्रुतः सुखदः सुखी ॥ ४ ॥ तस्य पुत्रः प्रियो ज्येष्ठस्ताराधिपनिभाननः ॥ रामो नाम विशेषज्ञः श्रे-
ष्ठः सर्वधनुष्मतां ॥ ५ ॥ रक्षिता स्वस्य वृत्तस्य स्वजनस्यापि रक्षिता ॥ रक्षिता जीवलोकस्य धर्मस्य च परंतपः ॥ ५ ॥

त्वा चिंतां कृत्वा कर्त्तव्यमर्थं निश्चित्येति यावत् संश्रवे सम्यक्श्रवणयोग्ये समीपदेशे ॥ यत्रोक्तं सीतैव शृणुयात्नान्यइत्यर्थः ॥ व्याजहार वृत्तांत
मिति शेषः मुख्यस्य राजवंशश्रेष्ठस्य ॥ लक्ष्मिवर्धन इति ह्रस्व आर्षः पार्थिवव्यंजनैः छत्रचामरादिभिर्वाह्यैः सामुद्रिकोक्तैः शारीरैश्च राज

चिह्नैर्युक्तः सुखदः मित्राणां ॥ ३ ॥ ४ ॥ ५ ॥ सत्याभिसंधस्य
सत्यसंकल्पस्य ॥ ६ ॥

तु३

मृगयामुद्दिश्य धावता ॥७॥ जनस्थानवधं खरदूषणौ निहतौ च श्रुत्वा रावणेनामर्षापहृता वैरेणापहृता तु ॥८॥ मायया मृगरूपेण मारी-
चेन करणेन रामं वंचयित्वेत्यर्थः ॥९॥१०॥११॥१२॥ तस्या हेतोस्त्वदन्वेषणहेतोः यथारूपां यादृग्रूपां यादृग्वर्णां ॥ यादृक्लक्ष्मीं च निश्चितां

तस्य सत्याभिसंधस्य वृद्धस्य वचनात्पितुः ॥ सभार्यः सह च भ्रात्रा वीरः प्रव्रजितो वनं ॥६॥ तेन तत्र महारण्ये मृग-
यां परिधावता ॥ राक्षसा निहताः शूरा बहवः कामरूपिणः ॥७॥ जनस्थानवधं श्रुत्वा निहतौ खरदूषणौ ॥ तत-
की।५ स्त्वमर्षापहृता जानकी रावणेन तु ॥८॥ वंचयित्वा वने रामं मृगरूपेण मायया ॥ स मार्गमाणस्तां देवीं रामः
सीतामनिंदितां ॥९॥ आससाद वने मित्रं सुग्रीवं नाम वानरं ॥ ततः स वालिनं हत्वा रामः परपुरंजयः
॥१०॥ आयच्छत्कपिराज्यं तु सुग्रीवाय महात्मने ॥ सुग्रीवेणाभिसंदिष्टा हरयः कामरूपिणः ॥११॥ दिक्षु
सर्वासु तां देवीं विचिन्वंति सहस्रशः ॥ अहं संपातिवचनाच्छतयोजनमायतं ॥१२॥ तस्या हेतोर्वि-
शालाक्ष्याः समुद्रं वेगवान्प्लुतः ॥ यथारूपां यथावर्णां यथालक्ष्मवतीं च तां ॥१३॥ अश्रौषं राघवस्या-
हं सेयमासादिता मया ॥ विररामेवमुक्त्वा स वाचं वानरपुंगवः ॥१४॥ जानकी चापि तच्छ्रुत्वा विस्मयं प-
रमं गता ॥ ततः सा वक्रकेशांता सुकेशी केशसंवृतं ॥ उन्नम्य वदनं भीरुः शिंशपामन्ववैक्षत ॥१५॥ निश-
म्य सीता वचनं कपेश्च दिशश्च सर्वाः प्रदिशश्च वीक्ष्य ॥ स्वयं प्रहर्षं परमं जगाम सर्वात्मना राममनुस्मरंती ॥३॥

सीतां ॥१३॥ राघवस्य मुखादहमश्रौषं सेयमासादिता दृष्टा इहेति शेषः ॥१४॥ केशसंवृतं असंस्कारतः प्रकीर्णत्वात् ॥१५॥१६॥१७॥ ६३

॥श्री:०॥
॥७७॥

७१०

१७॥क्षपमान॥ इतिरामाभिरामेश्रीरा०सुंद०एकत्रिंशःसर्गः॥३१॥ त्नीनंदृष्ट्वा अस्फुरंतंदृष्ट्वाचलितमानसा॥ अदृष्टरूपोपमपिमायाम्ब
गोयेतिचलितचित्ता पुनःसम्यक्तनिरीक्ष्योच्यमाने विशेषणं कपिंददर्श वेष्टितंपरिहितमर्जुनवर्णंवस्त्रंयेनतं॥१॥२॥३॥वानरस्यनि
र्याणोपक्षीजाताये कवचनं वानराणांमध्ये इदसत्वंजीवःसीमेत्राक्षनत्राणिभयावहं॥ अतएवतैर्दुरासदंदुर्निरीक्ष्यंचेतिमत्वा पुन

सातिर्यगूर्ध्वंच तथाह्यधस्तान्निरीक्षमाणा तमचिंत्यबुद्धिं॥ ददर्शपिंगाधिपतेरमात्यंवातात्मजंसूर्यमिवोदयस्थं
१७॥ इत्यार्षेश्रीमद्रामायणेसुंदरकांडेएकत्रिंशःसर्गः॥३१॥ ततःशाखांतरेलीनंदृष्ट्वाचलितमानसा
वेष्टितार्जुनवस्त्रंतंविद्युत्संघातपिंगलं॥१॥ साददर्शकपिंतत्रप्रश्रितंप्रियवादिनं॥ फुल्लाशोकोत्करा
भासंतप्तचामीकरेक्षणम्॥२॥ साथदृष्ट्वाहरिश्रेष्ठंविनीतवदवस्थितं॥ मैथिलीचिंतयामासविस्मयंप
ग॰ रमंगता॥३॥ अहोभीममिदंसत्वंवानरस्यदुरासदं॥ दुर्निरीक्ष्यमिदंमत्वापुनरेवमुमोहसा॥४॥ विललापभृ
शंसीताकरुणंभयमोहिता॥ रामरामेतिदुःखार्तालक्ष्मणेतिचभामिनी॥५॥ रुरोदसहसासीतामंदमंदस्व
रासती॥ साथदृष्ट्वाहरिवरंविनीतवदुपागतं॥६॥

रपिमायैवेयमितिभयान्मुमोह॥४॥ अथभयमोहितासतीस्वशोकरुणंदीनंविललापविलापप्रकारोरामेत्यादि॥५॥ मंदमंदस्वरा
॥ अस्यदैवगत्यावास्तवत्वेराक्षस्योमाजानंत्वितिमंदस्वररोदनं॥ विनीतवद्विनीतमतयोपस्थितंस्वप्नःजाग्रत्कल्प्यस्वप्नइत्यर्थ
:॥६॥ श्रीरामायनमः॥७॥

स्वप्नत्वचिन्तापूर्वकमेव पुनर्दर्शनमुपन्यस्यति ॥ सेति ॥ किमिदं वा कं राक्षसः कृतवत्स इति परितो वीक्षमाणा सा ॥ एवं भग्ने वज्रप्रहारादक्कं य
स्यतं ॥ शाखामृगेंद्रस्य यथोक्तकारं आज्ञाकरं ॥ यद्वा ॥ यथोक्तवेष्टितार्जुनवस्त्राद्याकारं दसोद्दस्वः पिंगप्रवरं कपिश्रेष्ठमिति निम्बये
न ददर्श ॥ ७ ॥ सा तं कपिरूपं रावणमिति संवसमीक्ष्य भृशं विसंज्ञा चिन्नक्षोभा सा ॥ गतासुकल्पेव ॥ ८ ॥ एवं चिंतयामासेत्यत्रे वंशस्थार्थः

मैथिली चिंतयामास स्वप्नोयमिति भामिनी ॥ सा वीक्षमाणा पृथुभग्नवक्त्रं शाखामृगेंद्रस्य यथोक्तकारं ॥ ददर्श
पिंगप्रवरं महार्हं वातात्मजं बुद्धिमतां वरिष्ठं ॥ ७ ॥ सा तं समीक्ष्यैव भृशं विपन्ना गतासुकल्पेव बभूव सी
ता ॥ चिरेण संज्ञां प्रतिलभ्य चैवं विचिंतयामास विशालनेत्रा ॥ ८ ॥ स्वप्नो मयायं विकृतोद्य दृष्टः शाखा
मृगः शास्त्रगणैर्निषिद्धः ॥ स्वस्त्यस्तु रामाय सलक्ष्मणाय तथा पितुर्मे जनकस्य राज्ञः ॥ ९ ॥ स्वप्नोपि नायं न
हि मेस्ति निद्रा शोकेन दुःखेन च पीडितायाः ॥ सुखं हि मे नास्ति यतोस्मि हीना तेनेंदुपूर्णप्रतिमाननेन
॥ १० ॥ रामेति रामेति सदैव बुद्ध्या विचिंत्य वाचा ब्रुवती तमेव ॥ तस्यानुरूपं च कथां तदर्थामेवं प्रपश्यामि तथा
शृणोमि ॥ ११ ॥ अहं हि तस्याद्य मनोभवेन संपीडिता तद्गतसर्वभावा ॥ विचिंतयंती सततं तमेव तथैव पश्या
मि तथा शृणोमि ॥ १२ ॥

स्वप्न इत्यादि दृश्यमानोयं स्वप्नो मया विकृत एव दृष्टः कुतस्तत्राह शाखामृग इत्यादि एवं दुःस्वप्नं मत्वा ॥ स्वस्ति प्रार्थये जनकस्य त
इयस्य ॥ ९ ॥ अथ स्वप्नहेत्वभावान्नायं स्वप्न इत्याह ॥ स्वप्नो हीति स्वप्नस्य निद्रामूलत्वात् ॥ निद्रायाश्च सुखमूलत्वात् रामवियोगेन च
मे सुखाभावादिति भावः ॥ १० ॥ सदा रामेति विचिंत्य ॥ वाचा तमेव ब्रुवंत्यहं ॥ तस्य चिंतनादेरनुरूपं यथा तथा शृणोमि ॥ शृण्यमानां च कथां
गं यथा तेन प्रकारेण तदर्थामेवं चिंतायाद्यनुरूपार्थमेव प
श्यामि ॥ ११ ॥ उक्तमेवार्थं विवृणोति अहं हीति ॥ १२ ॥

मित्र

पद्दतिबोध्यम् ॥२॥

व३

अथमनोरथमात्रमेनदितिसंभावयन्नदपिनेतिनिश्चिनोतिमनोरथइतिमनोराज्यमित्यर्थः सनेत्याह तथापीति तथैवेत्यर्थः यथामने
रथोन्नीतोर्थस्तंतथैववुद्ध्यापिनिश्चयात्मकांतःकरणवृत्त्यापिविषयीकृतंतर्कयामि मनोराज्यंसंकल्पविकल्पपरंचंचलवृत्तिरूपं बुद्धिरू
निश्चयात्मिकास्थिराचेतिविवेकमित्यर्थः ननुतर्हिमनोराज्यत्वमेवास्तु इमर्देवारोपितंतत्राह किंकारणमिति मनोराज्यत्वाभावइति
शेषः उत्तरंतस्याहि मनोराज्यं भीतार्थस्य नास्तिरूपं अनुभवार्हरूपंनास्तीतिहित्रसिद्धंप्रकृतेतुतादृशंरूपमस्तीत्याह सुव्यक्तेमे य
यं

मनोरथंस्यादितिचिंतयामितथापिवुद्ध्यापिवितर्कयामि ॥ किंकारणंतस्यहिनास्तिरूपंसुव्यक्तरूपश्चवदत्ययंमां
॥१३॥ नमोस्तुवाचस्पतयेसवज्रिणेस्वयंभुवेचैवहुताशनाय ॥ अनेनचोक्तंयदिदंममाग्रतोवनौकसातच्च
तथास्तुनान्यथा ॥१४॥ ॥इत्यार्षेश्रीमद्रामायणेवा० सुंदरकांडेद्वात्रिंशःसर्गः ॥३२॥ सोवतीर्यद्रुमात्तस्माद्वि
द्रुमप्रतिमाननः ॥ विनीतवेषःकृपणःप्रणिपत्योपसृत्यच ॥१॥ तामब्रवीन्महातेजाहनूमान्मारुतात्मज
ः ॥ शिरस्यंजलिमाधायसीतांमधुरयागिरा ॥२॥

र्थो१ नु२

पंमांवदंतिससुव्यक्तरूपोह्ययंते ॥ सुव्यक्तरूपंचवदति यतइत्यर्थः
मनोराज्यांदृष्टनष्टोवाहेंद्रियजस्थिरानुभवानर्हतोवास्तवस्वायसितिभावः ॥१३॥ एवंचहनूमद्वचसोवास्तवत्वंनिर्णीयातात्प्रणी
तत्वेनमिथ्यार्थकत्वस्यापिसंभवात्तद्व्याहृत्तयेदेवान्प्रणमति नमोस्त्वितिवाचस्पतित्वेनवाचःसत्यत्वसंपादनयोग्यतावज्रिणोपिहस्य
त्तितःसम्यग्वाग्रूपशब्दपारायणाग्रथरूपमंत्रत्वाभावात् तदुपासकत्वेनवाचःसत्यत्वसंपादनयोग्यता ॥ स्वयंभुवेसम्यादिरूपव्रह्मणोवाग
धिष्ठातृदेवतात्वाच्चाग्नयेनति ॥१४॥ वायुमानः इतिश्रीरामाभिरामेश्रीरा० सुंदरकांडेद्वात्रिंशःसर्गः ॥३२॥ सइतिअतूर्ध्वशाखातः सीतास
न्मुखशाखायामवतीर्यद्रुमशब्दस्तत्परः अतएवाग्रेद्रुमाग्रितमितिवक्ष्यति कृपणः म्लानुः सीतायाःदुःखदर्शनाद्दीनः दूरात्प्रणिपत्यतत

दवय

उपसृत्यसमीपमागत्य ॥१॥ रासस्सीतांनिशाजागरतांनिद्राजा
आनंत्रिजयास्वप्रभवेणजन्यभयेनात्मचाराणायसीमैकशरण
त्वेनोपेक्षणात्र देवानुग्रहात्साप्रसूहःसीताहनूमतोःसंला

॥रा॰वा॰सुं॰॥
॥७९॥

अथ लिंगैः सीतेति निश्चयेपि तये एव साक्षाद्वाचयितुमजानान इव पृच्छति का न्विति ॥३॥ विप्रकीर्णं भिन्नघटादिव प्रस्कन्नं ॥४॥ कान्वित्यादि श्लोकद्वयोक्तार्थस्यैव प्रपंचः सुराणामिति सुरादिजातिमध्ये त्वं का किंजातीया ॥५॥ देवता प्रतिभासि दिव्यरूपलक्षणवत्त्वादिति भावः ॥६॥ कांस्पा रोहिणी त्वाशंक्य श्रेष्ठैः सर्वैर्गुणैरधिका एतदग्रे का त्वं भवसि कल्याणि त्वमनिंदितलोचने इत्यर्थं प्रक्षिप्तं ॥७॥ कोपादिति अत्रापि किंलिति

का नु पद्मपलाशाक्षि क्लिष्टकौशेयवासिनी ॥ द्रुमस्य शाखामालंब्य तिष्ठसि त्वमनिंदिता ॥३॥ किमर्थं तव नेत्राभ्यां वारि स्रवति शोकजं ॥ पुंडरीकपलाशाभ्यां विप्रकीर्णमिवोदकं ॥४॥ सुराणामसुराणां च नागगंधर्वरक्षसां ॥ यक्षाणां किन्नराणां च का त्वं भवसि शोभने ॥५॥ का त्वं भवसि रुद्राणां मरुतां वा वरानने ॥ वसूनां वा वरारोहे देवता प्रतिभासि मे ॥६॥ किन्नु चंद्रमसा हीना पतिता विबुधालयात् ॥ रोहिणी ज्योतिषां श्रेष्ठा श्रेष्ठा सर्वगुणाधिका ॥७॥ का त्वं भवसि कल्याणि त्वमनिंदितलोचने ॥ कोपाद्वा यदि वा मोहाद्भर्तारमसितेक्षणे ॥ वसिष्ठं कोपयित्वा त्वं नासि कल्याण्यरुंधती ॥८॥ को नु पुत्रः पिता भ्राता भर्त्ता वा ते सुमध्यमे ॥ अस्माल्लोकादमुं लोकं गतं त्वमनुशोचसि ॥९॥ रोदनादतिनिश्वासाद्भूमिसंस्पर्शनादपि ॥ न त्वां देवीमहं मन्ये राज्ञः संज्ञावधारणात् ॥१०॥

संबध्यते कोपादित्या वसिष्ठं कोपयित्वा इत्यागता कल्याण्यरुंधती किन्नु वासि पतिरसादरुंधती त्वशंका ॥८॥ अथ शोककारणं पुत्रादिवियोगोन्यदेवेति पृच्छति को नु पुत्र इति । अस्माल्लोकादमुं लोकं गतं । यं त्वमनुशोचसि सः पुत्रादिः को न्विति योजना ॥९॥ इदानीं देवयोनित्वशंकां स्वयमेव निवर्तयति रोदनादिति । अत्र संबंधोन्नस्पर्शश्च देवानां नास्तीति भुवं न त्वं त्वां देवीं न मन्ये । किंच राज्ञो रामस्य संज्ञावधारण नामग्रहणात् ॥१०॥

॥श्री॰॥
॥७९॥

292

स्ता २

भूमिपालस्य रामस्य माहिषी निर्मेमाति: यतो व्यंजनानि राममहिषीत्वप्रकाशकानि मे सामुद्रिकलक्षणानि च लक्षये तो रावणेन जनस्थानाद्ब
लात्प्रमथिता प्रमथ्य हृता यदि सीता त्वं तदा पृच्छतो ममाचक्ष्व तत्त्वं ब्रूहि ते भद्रम् ॥११॥१२॥ अनुकोपनत्वरूपके नेमयोस्समासीतिप्रौ

ता ४

यजनानि हि ते यानि लक्षणानि च लक्षये ॥ महिषी भूमिपालस्य राजकन्या च मे मता ॥११॥ रावणेन जनस्थानाद्बला
त्प्रमथिता यदि ॥ सीता त्वमसि भद्रं ते तन्ममाचक्ष्व पृच्छतः ॥१२॥ यथा हि तव वै दैन्यं रूपं चाप्यतिमानुषं ॥ तपसा
चान्वितो वेषस्त्वं राममहीषी ध्रुवम् ॥१३॥ सा तस्य वचनं श्रुत्वा रामकीर्तनहर्षिता ॥ उवाच वाक्यं वैदेही हनू
मंतं द्रुमाश्रितम् ॥१४॥ पृथिव्यां राजसिंहानां मुख्यस्य विदित्मनः ॥ स्नुषा दशरथस्याहं शत्रुसैन्यप्र
णाशिनः ॥१५॥ दुहिता जनकस्याहं वैदेहस्य महात्मनः ॥ सीतेति नाम्ना चोक्ताहं भार्या रामस्य धीमतः
॥१६॥ समा द्वादश तत्राहं राघवस्य निवेशने ॥ भुंजाना मानुषान्भोगान्सर्वकामसमृद्धिनी ॥१७॥
नन्द) ततस्त्रयोदशे वर्षे राज्येणेक्ष्वाकुनं ॥ अभिषेचयितुं राजा सोपाध्यायः प्रचक्रमे ॥१८॥ तस्मिन्संभ्रिय
माणे तु राघवस्याभिषेचने ॥ कैकेयी नाम भर्तारमिदं वचनमब्रवीत् ॥१९॥ न पिबेयं न खादेयं प्र
त्यहं मम भोजनं ॥ एष मे जीवितस्यान्तो रामो यद्यभिषिच्यते ॥२०॥

आह यथा हीति ॥ अपरोक्षानुभवविषयमित्यर्थः ॥१३॥१४॥१५॥ अहं नाम्ना सीता इति नाम प्रसिद्धमित्यर्थः ॥१६॥१७॥१८॥१९॥ प्र
त्यहं यन्मम भोजनं भोज्यं वस्तु तन्न पिबेयं न खादेयमित्यन्वयः ॥२०॥

नदेवासुरेयुद्धे वरदानरूपं ॥२१॥२२ राज्यमयाचनमरमायदातुमिति शेषः ॥२३॥ अभिषेकादपि परमधिकं प्रियं यथा भवति तथा मनसा पूर्वमा
गीलसवाचाप्यंगीकृतवान् ॥२४॥ सीतारामं सौमित्रिं दद्यादिति ॥२५॥ समादिशत् बहुप्रकारं रक्षणाय निवेदितवान् ॥२६॥ तस्याग्रतः प्रस्थिता वन

यत्न दुक्तं त्वया वाक्यं प्रीत्या नृपतिसत्तम ॥ तच्चेत्त्वं वितथं कार्यं वनं गच्छतु राघवः ॥२१॥ स राजा सत्यवाक् देव्या वरदान
मनुस्मरन् ॥ मुमोह वचनं श्रुत्वा कैकेय्याः क्रूरमप्रियं ॥२२॥ ततस्तस्थविरो राजा सत्यधर्मे व्यवस्थितः ॥ ज्येष्ठं यश
स्विनं पुत्रं रुदन्राज्यमयाचत ॥ २३॥ स पितुर्वचनं श्रीमानभिषेकात्परं प्रियं ॥ मनसा पूर्वमासाद्य वाचा प्र
तिगृहीतवान् ॥२४॥ दद्यान्न प्रतिगृह्णीयात्सत्यं ब्रूयान्न चानृतं ॥ अपि जीवितहेतोर्हि रामः सत्यपराक्रमः
२५॥ स विहायोत्तरीयाणि महार्हाणि महायशाः ॥ विसृज्य मनसा राज्यं जनन्यै मां समादिशत् ॥२६॥ साहं
तस्याग्रतस्तूर्णं प्रस्थिता वनचारिणी ॥ न हि मे तेन हीनाया वासः स्वर्गेपि रोचते ॥ २७॥ प्रागेव तु महाभागः सौमि
त्रिर्मित्रनंदनः ॥ पूर्वजस्यानुयात्रार्थे कुशचीरैरलंकृतः ॥२८॥ ते वयं भर्तुरादेशं बहुमान्य दृढव्रताः ॥ प्रवि
ष्टाः स्म पुरा दृष्टं वनं गंभीरदर्शनं ॥२९॥ वसतो दंडकारण्ये तस्याहममितौजसः ॥ रक्षसापहृता भार्या रावणे
न दुरात्मना ॥३०॥ द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः ॥ ऊर्ध्वं द्वाभ्यां तु मासाभ्यां ततस्त्यक्ष्यामि जीवितं ॥३१॥

चारिणी अस्मद्वर्षमिति शेषः ॥ २७॥२८॥ भर्तुर्दशरथस्य पुराअदृष्टमगतिदुर्दः ॥२९॥३०॥ जीवितानुग्रहः जीवितानुग्रहकरः कालः कृतः
परिछिन्नः ॥ ३१॥ अपगमात् ॥ इति रामाभिरामे श्रीरा० सुंदरकांडे त्रयस्त्रिंशः सर्गः ॥३१॥

इत्यार्षे श्रीमद्रामायणे सुंदरकांडे त्र
यस्त्रिंशः सर्गः ॥३३॥

दुःखादुःखाभिभूतायाइत्यत्रतुगार्थः दुःखपरंपराखिन्नायाइत्यर्थः १ तवसमीपमितिशेषः २ ब्राह्ममस्त्रंयोवेद अनेनसर्वशास्त्रपारगत्वमुक्तं तद
स्त्रदेवतायाः ब्रह्मणःसर्वजगत्समष्टित्ववत् तदस्त्रस्यापिसर्वास्त्रसमष्टित्वात् वेदांश्चेत्यनेनसर्वकर्ममार्गपारगत्वंवेदविदांवरइत्यनेनज्ञा
नमार्गपारगत्वमुक्तं ३ ४ संहृष्टसर्वांगीपुलकितसर्वांगी ५ असंभावितमपिरामप्रसंगं जीवितधारणेनप्राप्तत्वात्तत्संवादिनींलौ

तस्यास्तद्वचनंश्रुत्वाहनूमान्हरिपुंगवः। दुःखादुःखाभिभूतायाःसांत्वमुत्तरमब्रवीत्॥१॥अहंरामस्यसंदेऽ
शाद्देविदूतस्तवागतः। वैदेहिकुशलीरामःसत्वांकौशलमब्रवीत्॥२॥योब्राह्ममस्त्रंवेदांश्चवेदवेदविदां
वरः॥सत्वांदाशरथीरामोदेविकौशलमब्रवीत्॥३॥लक्ष्मणश्चमहातेजाभर्तुस्तेऽनुचरःप्रियः॥कृत
वांछोकसंतप्तःशिरसातेभिवादनं॥४॥सातयोःकुशलंदेवीनिशम्यनरसिंहयोः। प्रीतिसंहृष्टसर्वां
गीहनूमंतमथाब्रवीत्॥५॥कल्याणीबतगाथेयंलौकिकीप्रतिभातिमा॥एतिजीवंतमानंदोनरंव
र्षशतादपि॥६॥तयोःसमागमेतस्मिन्प्रीतिरुत्पादिताऽद्भुता। परस्परेणचालापंविश्वस्तौतौप्रच

किकींगाथांलौकिकल्याणीति। गाथायाःसंवादित्वदर्शनजोहर्षोवनेत्यनेनसूच्यते। कल्याणीसत्यार्थेतिमामांप्रतिभातिमङ्गलवि
षयोभवतीत्यर्थः गाथांप ठति एतीति। जीवंतमेवैत्येवातोवहुदुःखसत्त्वेपिजीवितव्यमितिभावः ६ तस्मिन्तस्मिन्कालेराम
लक्ष्मणकुशलवचःश्रवणकाले। तयोःरामलक्ष्मणयोःसमागमकालइवसीतायास्तेनवचसाद्भुताऽचिंत्यस्वरूपाप्रीतिरुत्पादिता
किंच। तयोःसीताहनूमतोस्तस्मिन्समागमेपरस्परस्याद्भुताप्रीतिरुत्पादितादेवीदृष्टेतिहनूमतःप्रीतिःरामदूतोदृष्टइतिदेव्याः

॥ रा०वा०सुं०॥
॥ ९४ ॥

प्रीतिः अनस्तो विश्वस्तो भूत्वा परस्परेण तौ पंचक्रतुः तद्वचनं कल्याणीत्यादि सीतावचनं समीपमुपचक्रमे तच्छाखातोपि अर्वाचीनां शाखा
मवरुह्य समीपं गंतुं यत्नवान्भूदित्यर्थः ॥८॥ परिशंकते परिशंकते स्म रामकुशलकथनेन विश्वस्तापि रावणमायया वा कृत्स्नस्मरणेन विश्वा
सादिति भावः ॥९॥ पदस्य पदनेन कथितं कथनं कृत्वा त्रीहता इदं धिक् कष्टमिति भावेनिह्वा तत्र हेतुमाह रूपांतरमिति यः पूर्वमा

तस्यास्तद्वचनं श्रुत्वा हनुमान्मारुतात्मजः ॥ सीतायाः शोकतप्तायाः समीपमुपचक्रमे ॥८॥ यथा यथा समीपं
स हनूमानुपसर्पति ॥ तथा तथा रावणं सा तं सीता परिशंकते ॥९॥ अहो धिग्धिक्कृतमिदं कथितं हि यदस्य
मे ॥ रूपांतरमुपागम्य स एवायं हि रावणः ॥१०॥ तामशोकस्य शाखां तु विमुक्त्वा शोककर्षिता ॥ तस्यामेवा
नवद्यांगी धरण्यां समुपाविशत् ॥११॥ अवंदत महाबाहुस्ततस्तां जनकात्मजां ॥ सा चैनं भयसंत्रस्ता भू
यो नैनमुदैक्षत ॥१२॥ तं दृष्ट्वा वंदमानं च सीता शशिनिभानना ॥ अब्रवीद्दीर्घमुच्छ्वस्य वानरं मधुरस्वरा
॥१३॥ मायां प्रविष्टो मायावी यदि त्वं रावणः स्वयं ॥ उत्पादयसि मे भूयः संतापं तन्न शोभनं ॥१४॥ स्वं परि

त्यज्य रूपं यः परिव्राजकरूपवान् ॥ जनस्थाने
मया दृष्टस्त्वं स एव हि रावणः ॥१५॥
श्रीः ॥
॥ ९४ ॥

यथा मामपाहरत्स एव रावणो रूपांतरं प्राप्य वर्तत इत्यर्थः ॥१०॥ अशोकस्य ॥ अशोकवनस्थशिंशपावृक्षस्येत्यर्थः ॥११॥ तां धरण्युपविष्टां
अवंदत नमस्कृतवान् स एनं दृष्ट्वा भयत्रस्ता भूयः पुनरेनं नापश्यत् ॥१२॥१३॥ भूयः संतापं पुनरुत्पादयसि तन्न शोभनं ॥१४॥ नयेवंरूप
करणमपि दुःकरमेवेत्याह स्वं परित्यज्येति ॥१५॥

294

एवंरावणदौरात्म्यात् हनूमन्तं रावणमाशंक्य तद्दर्शनजनितमात्मनोमनःप्रसादमालोच्य मांशंकांनिराचष्टे ॥ अथवेति ॥ यन्मयापरिशंकि
तं रावणत्वमेतदेवं न यतस्तवदर्शनान्ममनसः प्रीतिरुत्पन्ना रावणत्वे हि सा नोत्पद्येतेति भावः ॥ तवमपि रामदूतत्वनिश्चयः कथंस्यादितिचे
त्तत्राह ॥ यदीति ॥ पृच्छामीति ॥ रामकथामिति शेषः ॥ तदेवाह ॥ प्रियारामकथाहीति ॥ ७ ॥ चित्तंहरसि चित्तंशिथिलंयसि विश्वासहेतुसंपादनात्

उपवासकृशांदीनां कामरूप निशाचर ॥ संतापयसि मां भूयः संतापं तन्न शोभनं ॥ १६ ॥ अथवा नैतदेवं हि य
न्मया परिशंकितं ॥ मनसो हि मम प्रीतिरुत्पन्ना तव दर्शनात् ॥ यदि रामस्य दूतस्त्वमागतो भद्रमस्तु ते
पृच्छामि त्वां हरिश्रेष्ठ प्रिया रामकथा हि मे ॥ ७ ॥ गुणान् रामस्य कथय प्रियस्य मम वानर ॥ चित्तं हरसि
मे सौम्य नदीकूलं यथा रयः ॥ १८ ॥ अहो स्वप्नस्य सुखता याहमेवं चिराहृता ॥ प्रेषितं नाम पश्यामि राघ
वेण वनौकसं ॥ १९ ॥ स्वप्नेपि यद्यहं वीरं राघवं सहलक्ष्मणं ॥ पश्येयं नावसीदेयं स्वप्नोपि मम मत्सरी ॥ २० ॥
॥ नाहं स्वप्नमिमं मन्ये स्वप्ने दृष्ट्वा हि वानरं ॥ न शक्योभ्युदयः प्राप्तुं प्राप्तश्चाभ्युदयो मम ॥ २१ ॥

मे २

दितिभावः ॥ रयो नदीवेगः ॥ १८ ॥ रामदूतदर्शनं नेदं तदागमनस्यात्रासंभावितत्वात्स्वाप्नएवायं स्वप्नोथापि मे असौ सुखावह इत्याह अहो इति
याचिराहृताहमेव राघवेण प्रेषितं वनौकसं पश्यामि नाम ॥ अस्वप्नत्वे त्वस्यासामपि दर्शनं स्यादित्याशयः ॥ १९ ॥ अथारामादिदर्शनस्
यस्वप्नोपि मे न जायत इति खिद्यति स्वप्नेपीति ॥ मत्सरी मत्सरेणमत्समीपं सोपि नायातीति भावः ॥ २० ॥ स्वप्नत्वमस्य नेत्याह नाहं स्वप्नमिति
प्राप्तश्चाभ्युदय इति ॥ तथा मनःसंतोषोदयात्स्वप्नप्राप्यइ
त्यर्थस्तस्मान्नस्वप्नः ॥ २१ ॥

॥ रा० वा० सुं० ॥
॥ ५२ ॥

पुनस्त्रेक्षते किंस्विदिति चित्तमोहो निरंतररामध्यानजनितं स्त्रेषितदूतदर्शनसंभाषणादिविषयो भ्रमः वातगतिः भूतावेशादिजनितो भ्रमः
उन्मादो विरहिणां पित्ताद्रेकरूपावस्थाविशेषजो भ्रमः मृगतृष्णिकानदत्रमस्थो भ्रमः ॥ २२ ॥ बोधराहित्यात् भ्रमचतुष्टयमपि निरस्यति
अथवेति मोहोप्युन्मादस्य लक्षणमिव लक्षणं यस्य सः एवं चोन्मादनिराकरणात्सोपि निरस्तः अर्थतो भूतावेशोपि निरस्तः यतो हमात्म

किन्नु स्याच्चित्तमोहोयं भवेद्वातगतिस्त्वियं ॥ उन्मादजो विकारो वा स्यादयं मृगतृष्णिका ॥ २२ ॥ अथवा नायमुन्मा
दो मोहोप्युन्मादलक्षणः ॥ संबुध्ये चाहमात्मानमिमं चापि वनौकसं ॥ २३ ॥ इत्येवं बहुधा सीता संप्रधार्य ब
लाबलं ॥ रक्षसां कामरूपत्वान्मेने तं राक्षसाधिपं ॥ २४ ॥ एतां बुद्धिं तदा कृत्वा सीता सा तनुमध्यमा ॥ न प्र
तिव्याजहाराथ वानरं जनकात्मजा ॥ २५ ॥ सीतया निश्चितं बुद्ध्वा हनूमान्मारुतात्मजः ॥ श्रोत्रानुकूलैर्व
चनैस्तदा तां संप्रहर्षयन् ॥ २६ ॥ आदित्य इव तेजस्वी लोककान्तः शशी यथा ॥ राजा सर्वस्य लोकस्य देवो
वैश्रवणो यथा ॥ २७ ॥ विक्रमेणोपपन्नश्च यथा विष्णुर्महायशाः ॥ सत्यवादी मधुरवाक् देवो वाचस्पतिर्य
था ॥ २८ ॥

नमिमं समीपस्थं वनौकसं च संबुध्ये सम्यक् जानामि ॥ निर्बाधं जानामीत्यर्थः उक्तानां सर्वेषामविवेकलक्षणत्वान्मम विवेकसत्वात्ते
संभाविताः मृगतृष्णाभ्रमोपि दूरत्वदोषात् जायते ॥ वानरश्च मम समीप एवेति सपक्षोप्युक्त इति भावः ॥ २३ ॥ बलाबलं ॥ बलं रक्षसां
कामरूपत्वं ॥ अबलं रामदूतस्य वानरस्यात्रागमनसामर्थ्याभावः ॥ २४ ॥ २५ ॥ निश्चयं रावणत्वनिश्चयं ॥ श्रोत्रानुकूलैर्वचनैः रामगु
णकथनरूपैः विश्वासार्थं गुणान् रामस्य कथयेति सीतानोक्तेरिति भावः ॥ संप्रहर्षयन् वक्ष्यमाणं वचः कथयामेति शेषः ॥ २६ ॥ राजा धनधा

न्यादिप्रधानेन सर्वलोकस्य रंजकः ॥ २७ ॥ २८ ॥

.295

॥ श्री: ० ॥
॥ ५२ ॥

स्थानक्रोधेउचितक्रोधविषयेक्रोधोचिरेप्रहर्त्तेतियाबत्॥२९॥तंराघवाश्रमादपकृष्यमृन्येआश्रमेयेनापनीतातस्यरक्षसस्तत्फलंत्वदपह

रूपवान्सुभगःश्रीमान्कंदर्पइवमूर्त्तिमान्॥स्थानक्रोधेप्रहर्त्ताचश्रेष्ठोलोकेमहारथः॥२९॥बाहुछायामवष्टब्धोय
स्यलोकोमहात्मनः॥अपकृष्याश्रमपदान्मृगरूपेणराघवं॥३०॥शून्येयेनापनीतासितस्यद्रक्ष्यसितत्फलं॥अ
चिराद्रावणंसंख्येयोवधिष्यतिवीर्यवान्॥३१॥क्रोधप्रमुक्तैरिषुभिर्ज्वलद्भिरिवपावकैः॥तेनाहंप्रेषितोदूत
स्त्वत्सकाशमिहागतः॥३२॥त्वद्वियोगेनदुःखार्त्तःसत्वांकौशलमब्रवीत्॥लक्ष्मणश्चमहातेजाःसुमित्रा
नंदवर्द्धनः॥३३॥अभिवाद्यमहाबाहुःसत्वांकौशलमब्रवीत्॥रामस्यचसखादेविसुग्रीवोनामवानरः॥
३४॥राजावानरमुख्यानांसत्वांकौशलमब्रवीत्॥नित्यंस्मरतितेरामःससुग्रीवःसलक्ष्मणः॥३५॥दिष्ट्याजीव
सिवैदेहिराक्षसीवशमागता॥नचिराद्द्रक्ष्यसेरामंलक्ष्मणंचमहारथं॥३६॥मध्येवानरकोटीनांसुग्रीवं
चामितौजसं॥अहंसुग्रीवसचिवोहनूमान्नामवानरः॥३७॥प्रविष्टोनगरींलंकांलंघयित्वामहोदधिं
॥कृत्वामूर्ध्निपदन्यासंरावणस्यदुरात्मनः॥३८॥

रपापफलंमेत्वान्तुभ्रमयमानंद्रक्ष्यसि तदेवाह अचिराद्दितिनचिरादितिपाठंतरंयोवधिष्यतितेनेत्यर्थः॥३०॥३१॥३२॥३३॥३४॥३५॥३६॥३७॥
यथामामवगच्छसिमायावीरावणइतिनतथाहमस्मि॥३८॥७॥६॥

॥ रा॰वा॰सुं॰॥
॥ ८६ ॥

अदर्शमानः॥ ॥इतिरामाभिरामेश्रीरा॰सुंदरकांडेचतुस्त्रिंशःसर्गः॥३४॥ तांत्विति॥ आदिसदृवेत्यादिको॥१॥ २ यानिरामलक्ष्मणचिह्नानि भूये
धिकंविशिष्यसमाचक्ष्व॥ येनमांशोकोनमाविशेत्॥३॥ संस्थानं॥ मूवयवसन्निवेशः रूपमाकारोनीलपीतादिवर्णश्च॥४॥५॥ जानंतीदिष्ट्यावै
स्प॰

लांद्रष्टुमुपयातोहंसमाश्रित्यपराक्रमं॥ नाहमस्मितथादेवियथामामवगच्छसि॥ ३७॥ विशंकात्यज्यतामेषाश्रद्ध
त्स्ववदतोमम॥३८॥ ॥इत्यार्षेश्रीमद्रामायणेसुंदरकांडेचतुःस्त्रिंशःसर्गः॥ ३४॥ ॥तांतुरामकथांश्रुत्वावैदे-
हीवानरर्षभात्॥ उवाचवचनंसांत्वमिदंमधुरयागिरा॥१॥ क्वतेरामेणसंसर्गःकथंजानासिलक्ष्मणं॥ वा
नराणांनराणांचकथमासीत्समागमः॥२॥ यानिरामैंचिह्नानिलक्ष्मणस्यचवानर॥ तानिभूयःसमाचक्ष्व
नमांशोकःसमाविशेत्॥३॥ कीदृशंतस्यसंस्थानंरूपंतस्यचकीदृशं॥ कथमूरूकथंबाहूलक्ष्मणस्यचशं
समे॥४॥ एवमुक्तस्तुवैदेह्याहनुमान्मारुतात्मजः॥ ततोरामंयथातत्वमाख्यातुमुपचक्रमे॥५॥ जानं
तीवतदिष्ट्यामांवैदेहिपरिपृच्छसि॥ भर्तुःकमलपत्राक्षिसंस्थानंलक्ष्मणस्यच॥६॥ यानिरामस्यचिह्ना
निलक्ष्मणाचयानिवै॥ लक्षितानिविशालाक्षिवदतःशृणुतानिमे॥ रामःकमलपत्राक्षःपूर्णचंद्रनिभा
स्य
ननः रूपदाक्षिण्यसंपन्नः
प्रसूतोजनकात्मजे॥८॥

वेनरामदूतंमांजानंतीयदिपृच्छसिरावणशंकांत्यक्त्वानदालयायानिसंस्थानादीनिपृष्टानियथाचमयालक्षितानिदृष्टानितानिसर्वाणिवदतो
मत्तःशृणु॥६॥७॥ रूपदाक्षिण्यसंपन्नःप्रसूतइतिजन्मनासहैवोक्तावक्ष्यमाणाश्चगुणाजाताइत्यर्थः॥८॥ ॐ॥ॐ॥ॐ॥ॐ॥ॐ॥ॐ॥ॐ॥९

॥ श्री:०॥
॥८६॥

296

९ ॥ १० ॥ रामो भामिनि लोकस्येति सर्वस्य कर्त्ता हर्त्ता भर्त्ता चेति शेषः अनेन सृष्टिस्थितिसंहारकर्तृत्वरूपं ब्रह्मलक्षणं रामस्योक्तं गूढं एवं ज्ञानं नस्य
र्णं भगवतैव स्वमायातिरस्करणीनिरासात् इति बोध्यं ॥ लोकस्य मर्यादानां वर्णाश्रममर्यादानां कर्त्ता भगवदवतारत्वात् कारयिता कालात्
मना अवतीर्णरूपेण चातुर्वर्ण्यपरक्षिता च ॥ ११ ॥ अतस्वर्चिष्मान् ॥ आदित्यरूपः सन् ॥ अर्चितस्तै वर्णैरिति शेषः ब्रह्मचर्यव्रते गृहस्थे

तेजसादित्यसंकाशः क्षमया पृथिवीसमः ॥ बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९ ॥ रक्षिता जीवलोकस्य
स्वजनस्य च रक्षिता ॥ रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥ १० ॥ रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता
मर्यादानां च लोकस्य कर्त्ता कारयिता च सः ॥ ११ ॥ अर्चिष्मानर्चितोत्यर्थं ब्रह्मचर्यव्रते स्थितः ॥ साधूनामु ८
पकारज्ञः प्रचारज्ञश्च कर्मणां ॥ १२ ॥ राजनीत्यां विनीतश्च ब्राह्मणानामुपासकः ॥ ज्ञानवांछीलसंपन्नो वि ८
नीतश्च परंतपः ॥ १३ ॥ यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः ॥ धनुर्वेदे च वेदे च वेदांगेषु च निष्ठितः ॥ १४ ॥
विपुलांसो महाबाहुः कंबुग्रीवः शुभाननः ॥ गूढजत्रुः सुताम्राक्षो रामो नाम जनैः श्रुतः ॥ १५ ॥ ॥

चितपर्वादिवर्जनपूर्वकमृतुगमनलक्षणे स्थितः ॥ वस्तुतस्तु गार्हस्थ्येपि अस्खलितरेताः मनःसंकल्पेनैव देव्या रतिप्रीतेः संतानस्य च सं
तानस्योत्संपादनमिति भावः साधूनामुपकारज्ञः उपकर्तव्यकालज्ञः कर्मणां स्वरूपस्यानुष्ठानस्य च तत्त्वज्ञाता ॥ १२ ॥ ब्राह्मणानां
वशिष्ठादीनां ॥ १३ ॥ यजुर्वेदविनीतश्चेत्यादस्तेषामपि संग्रहः विनीतो निरतः ॥ १४ ॥ एवमात्मगुणानुक्त्वा देहगुणानाह ॥ विपुलां
स इति ॥ १५ ॥

॥ रा॰वा॰सुं॰॥

॥ ५४ ॥

समं विस्तारायामसमम्॥१६॥ त्रिस्थिरः त्रिषु स्थानेषु स्थिरः॥ ऊरुश्च मणिबंधश्च मुष्टिश्च नृपतेः स्थिरा इत्युक्तेः त्रिषु प्रलंबः प्रलंबा पु-
स्स धनौ त्रयो भुजमुष्कबाहवः इति सामुद्रिकोक्तेः मुष्कं वृषणः त्रिषु समः समत्वं च यव इत्यर्थः केशाग्रवृषणं जानु समं यस्य स भूपति-
रित्युक्तेः त्रिषु चोन्नतः नाभ्युन्नतः कुक्षिवक्षोभिरुन्नतैः क्षितिपो भवेत्॥ त्रिताम्रः त्रिषु ताम्रः नेत्रांतनखपाणिपादतलैस्ताम्रैर्लक्ष्मीभिः सु-
खी त्रिषु स्निग्धः स्निग्धा भवंति येषां पादरेखाः शिरोरुहाः तथा लिंगमणिस्तेषां महाभाग्यं विनिर्दिशेत् त्रिषु गंभीरः स्वरे गतौ च नाभौ
च गंभीरस्त्रिषु शस्यते॥१७॥ त्रिवलीवान् उदरे कंठे उभयत्र वा वलित्रयवान् त्रिषु अवनतः निम्नः निम्नत्वं निमग्नत्वं तत्तु निमग्नपाद-

दुंदुभिस्वननिर्घोषः स्निग्धवर्णः प्रतापवान्॥ समश्च सुविभक्तांगो वर्णं श्यामं समाश्रितः॥
१६॥ त्रिस्थिरस्त्रिप्रलंबश्च त्रिसमस्त्रिषु चोन्नतः॥ त्रिताम्रस्त्रिषु च स्निग्धो गंभीर-
स्त्रिषु नित्यशः॥१७॥ त्रिवलीवांस्त्र्यवनतश्चतुर्व्यंगस्त्रिशीर्षवान्॥ चतुष्कलश्चतुर्ले-
खश्चतुष्किष्कुश्चतुःसमः॥१८॥६३॥६३॥

तलमध्यत्वं निमग्नपादरेखत्वं निमग्नस्तनचूचुकत्वं च॥ चतुर्व्यंगश्चतुर्ह्रस्वः ग्रीवा प्रजननं पृष्ठं ह्रस्वे जंघे च पूजिते॥ त्रिशीर्षवान्॥ आ-
वर्त्तत्रययुक्तशीर्षः आवर्त्तत्रययुक्तशीर्षः आवर्त्तत्रययुक्तं यस्य शिरः क्षितिभृत् नामसनाथः॥ चतुष्कलः चतस्रः कलाः चतुर्वेदग्र-
न्थिसूचकांगुष्ठमूलरेखा यस्य सः मूले यदंगुष्ठस्य रेखाश्चतस्रः स्युः स एव वा॥ एका द्वे वा यथायोग्यं वेदरेखा द्विजन्मनां॥ चतुर्लेखः॥ ल-
लाटे चतस्रो रेखा इत्युक्तेः ललाटे यस्य दृश्यंते चतस्रो वाऽथ रेखकाः शतं द्वयं शतं षष्टिस्तस्यायुर्विंशतिः क्रमात्॥ चतुष्किष्कुः॥ किष्कुश्चतु-

र्विंशत्यंगुलको हस्तः॥ चतुर्हस्तप्रमाणः षण्णवत्यंगुलो-
त्सेध इति यावत्॥ चतुःसमः बाहू जानू ऊरू जंघे च

८

समानि चेति॥ बाहूरुजानुगंडौ समावित्यर्थः॥१९॥

॥ श्री ॥

॥ ५४ ॥

097

चतुर्दशसमद्वंद्व इति । समपरिमाणचतुर्दशांगद्वंद्वः नतुन्नं । भ्रुवौ नासापुटे नेत्रे कर्णावोष्ठौ च चूचुकौ । कूर्परे मणिबंधौ च जानुनी वृषणौ
कटी । करौ पादौ स्फिजौ यस्य समौ ज्ञेयः स भूपतिः स्कंधौ गंडौ तथा दंता ऊरू ज्ञेयौ च जत्रुणी सन्मेत्र पाठः । चतुर्दंष्ट्र इति । चतस्रो दंष्ट्रा दं
तपंक्तिद्वये प्रतिपार्श्वं शास्त्रोक्तलक्षणा यस्य सः नतु स्निग्धा घनाश्च दशनाः सुतीक्ष्णा दंष्ट्राः शुभाश्चनस्त्र इति । दंष्ट्राणां तीक्ष्णत्वं नमुका

ग २

चतुर्दशसमद्वंद्वश्चतुर्दंष्ट्रश्चतुर्गतिः
महोष्ठहनुनासश्च पंचस्निग्धोष्टवंश
वान् ॥ १९ ॥

दिखंडनसमर्थत्वं । चतुर्गतिरिति । सिंहशार्दूलगजवृषभैश्चतुर्भिस्तुल्या गतिर्यस्य सः महोष्ठहनुनासश्चेति महन्त्रशस्तमोष्ठहनु
नासं यस्य शः । महौष्ठस्य प्रशस्त्वं बिंबफलादिवद्रूक्तत्वे सति मांसलत्वं हनोस्तु परिपूर्णमांसलोन्नतत्वं नासिकायास्तु दीर्घोन्नतत्व
चिरपुटत्वं । पंचस्निग्ध इति । पंच वाग्वक्त्रनखलोमत्वचं स्निग्धं यस्य सः अष्टवंशवान् । प्रशस्ताष्टवंशाख्यावयववान् वंशशब्देन

दैर्घ्यं विवक्षितं । बाहू च नलकावूरू जंघे चेत्यष्टवंशका
: नलकावंगुल्या इतिनीर्थः ॥ १९ ॥

श्रु ३ तं १ श्रु २

दशपद्मः मुखनेत्रास्यजिह्वोष्ठतालुस्तननखकरौ पादौ च दश पद्मानि पद्माकाराणि यस्य चेति ॥ आस्यमोष्ठमध्यं दशवृहत् हस्तौ नाभिर्जानु उरः शिरो ललाटं च ग्रीवा बाहू हृत्स्तनाभयः पादौ पृष्ठश्रुती चेति दश विशालास्ते सुखप्रदा इति त्रिभिः श्रीयशस्तेजोभिर्व्याप्तो उन्नतः द्विशुक्लवान् दौष्ठौ तै भौ शुक्लौ वंशौ मातुः पितुश्च ये शुद्धेः षडुन्नतः तानि च कक्षः कुक्षिश्च वक्षश्च घ्राणस्कंधललाटिकाः सर्वभूतेषु निर्दिष्टा षडुन्नता सुखप्रदा इति ॥ पूर्वं अनुन्नतत्रिस्निग्धत्वमुक्तं ॥ अत्र पंचस्निग्धत्वं चोभयमपि मतभेदादविरुद्धं ॥ एवं नानाग्रन्थप्रदर्शनेन रामस्य नानाम-

दशपद्मो दशबृहत्त्रिभिर्व्याप्तो द्विशुक्लवान् ॥ षडुन्नतो नवतनुस्त्रिभिर्व्याप्नोति राघवः ॥ २० ॥ सत्यधर्मरतः श्रीमान् संग्रहानुग्रहे रतः ॥ देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१ ॥ भ्राता चास्य च द्वैमात्रः सौमित्रिरमितप्रभः ॥ अनुरागेण रूपेण गुणैश्चापि तथाविधः ॥ २२ ॥ स सुवर्णछविः श्रीमान् रामः श्यामो महायशाः ॥ तावुभौ नरशार्दूलौ त्वद्दर्शनकृतोत्सवौ ॥ २३ ॥ विचिन्वन्तौ महीं कृत्स्नामस्माभिः सह संगतौ त्वा
ददर्शतुर्मृगपतिं पूर्वजेनावरोपितं ॥ ऋष्यमूकस्य मूले तु बहुपादपसंकुले ॥ २५ ॥

तं संमतसर्वलक्षणाद्युक्तत्वस्तनायनवतनुः नवसु सूक्ष्मः ॥ तानि च ॥ सूक्ष्माण्यंगुलिपर्वाणि केशरोमनखत्वचः शेफश्च येषां सूक्ष्माणि ते नराः दीर्घजीविन इति श्रोक्तं ॥ पदकं मृदुस्मगुलं सूक्ष्मदृष्टित्वं सूक्ष्मबुद्धित्वं चेति ॥ नवसूक्ष्मत्वो ॥ इदं हंसोक्तं ॥ रत्नपरीक्षां तु सूक्ष्मदर्शनं चानुर्यं बुद्धेः सूक्ष्मत्वं तत्त्वसाक्षात्कारसमर्थत्वं ॥ त्रिभिर्व्याप्नोति ॥ धर्मार्थकामैः कालं यथोचितं व्याप्नोति ॥ धर्मार्थकामैः कालं यथोचितं व्याप्नोति त्रिवर्गसेवीत्यर्थः ॥ २० ॥ संग्रहानुग्रहे ॥ संग्रहो धनवस्त्रादीनां ॥ अनुग्रहस्ताभ्यां प्रजारक्षणं तदुभयनिष्ठः ॥ २१ ॥ द्वैमात्रः रामस्य मात्रपेक्षया द्वितीयमातानां द्विमाता द्विमाता तस्या अपत्यमित्यर्थः भिन्नोदरभ्रातेत्यर्थः द्वैमात्र इति पाठे तं-

तं २

मेव मार्गमाणौ तौ विचरन्तौ वसुंधरां ॥ २४ ॥

सं ॥ २४ ॥ अस्माभिः सुग्रीवमंत्रिभिरित्यर्थः उक्तमेव विस्तरेण

कृत्स्नामेवेति ॥ २४ ॥ मृगपतिं शाखामृगपतिं सुग्रीवं ॥ पूर्वजेन वालिना अवरोपितं राज्याद्भ्रंशितं ॥ २५ ॥

॥ रा० वा० सुं० ॥
॥ ८५ ॥

२९४

॥ श्रीः ॥
॥ ८५ ॥

९८

२६ ॥ परिचर्यामहे तम् । उपनावार्थो परिचरामइत्यर्थः ॥ अवरोपितं राज्येन हीनं कृतं ॥ २७ ॥ पाणिनौ पाणी इतियांवत् २७ ॥ २८ ॥ अभिप्लुतः
उत्प्लुत्यारूढ ॥ २९ ॥ ३० ॥ मायापरिज्ञानतस्यार्थो मया विज्ञाताशेषवृत्तांतौ विज्ञापिताशेषवृत्तांतौ च ॥ ३१ ॥ ३२ ॥ ३३ ॥ पूर्ववृत्तयास्वीयस्वीय

भ्रातुर्भयार्त्तमासीनं सुग्रीवं प्रियदर्शनम् ॥ वयंच हरिराजं तं सुग्रीवं सत्यसंगरं ॥ २६ ॥ परिचर्यामहे राज्यात्पूर्व
जेनावरोपितं ॥ ततस्तौ चीरवसनौ धनुःप्रवरपाणिनौ ॥ २७ ॥ सतौ दृष्ट्वा नरव्याघ्रौ धन्विनौ वानरर्षभः ॥ २८ ॥ अ
भिप्लुतो गिरेरस्माच्छिखरं समुपाश्रितः ॥ ततः स शिखरे तस्मिन्वानरेंद्रो व्यवस्थितः ॥ २९ ॥ तयोः समीपं मामे
व प्रेषयामास सत्वरं ॥ तावहं पुरुषव्याघ्रौ सुग्रीववचनात्प्रभू ॥ ३० ॥ रूपलक्षणसंपन्नौ कृतांजलिरुप
स्थितः ॥ तौ परिज्ञाततत्वार्थौ मया प्रीतिसमन्वितौ ॥ ३१ ॥ पृष्ठमारोप्य तं देशं प्रापितौ पुरुषर्षभौ ॥ निवेदि
तौ च तत्वेन सुग्रीवाय महात्मने ॥ ३२ ॥ तयोरन्योन्यसंभाषाद्भृशं प्रीतिरजायत ॥ ततस्तौ कीर्त्तिसंपन्नौ ह
रीश्वरनरेश्वरौ ॥ ३३ ॥ परस्परकृताश्वासौ कथया पूर्ववृत्तया ॥ तं ततः सांत्वयामास सुग्रीवं लक्ष्मणाग्रजः ॥ ३४ ॥
स्त्रीहेतोर्वालिना भ्रात्रा निरस्तं पुरुतेजसा ॥ ततस्त्वन्नाशजं शोकं रामस्याक्लिष्टकर्मणः ॥ ३५ ॥ लक्ष्मणो वा
नरेंद्राय सुग्रीवाय न्यवेदयत् ॥ सश्रुत्वा वानरेंद्रस्तु लक्ष्मणेनेरितं वचः ॥ ३६ ॥ तदासीन्निष्प्रभोत्यर्थं ग्रहग्र
स्तइवांशुमान् ॥ ततस्त्वद्गात्रशोभीनि रक्षसा ह्रियमाणया ॥ ३७ ॥ ह्मांतगोचरया ॥ ३४ ॥ स्त्रीहेतोः सुग्रीवस्त्रीपरिग्रहा
र्थं पुरुमहत्तेजो यस्य तेन तन्नाशजं तदपहारजं ॥ ३५ ॥ ३६ ॥ निष्प्रभः खिन्नचित्तः त्वद्गात्रंशोभयितुं शीलं येषां तानि ॥ ३७ ॥ ६३ ॥ ६३

नि

३८ ॥ दर्शयामासुः सुग्रीवाज्ञयेति शेषः ॥ ३९ ॥ मयैवोपहृतानि च प्रथमम् इति शेषः । अवकीर्णं भूमौ पातमनापन्नं किंचिद्विशीर्णानि । तानि दत्तानि गृहीत्वा
शोकात् तस्मिन्विहतचेतसि प्रथमार्थे सप्तमी । विहतचेतानष्टचित्तचेतोवृत्तिरित्यर्थः ॥ ४० ॥ देवप्रकाशेन देवावतारेण त एव देवेन परिदेवितं

॥ ॥ यान्याभरणजालानि पातितानि महीतले । तानि सर्वाणि रामाय आनीय हरियूथपाः ॥ ३८ ॥
संहृष्टा दर्शयामासुर्गतिं तु न विदुस्तव । तानि रामाय दत्तानि मयैवोपहृतानि च ॥ ३९ ॥ स्वनवंत्यवकीर्णानि तस्मिन्वि-
हतचेतसि । तान्यंके दर्शनीयानि कृत्वा बहुविधं तदा ॥ ४० ॥ तेन देवप्रकाशेन देवेन परिदेवितं । प्रादीपय-
द्दाशरथेस्तदाशोकहुताशनम् ॥ ४१ ॥ शयितं च चिरं तेन दुःखार्तेन महात्मना । मयापि विविधैर्वाक्यैः कृ-
च्छ्रादुत्थापितः पुनः ॥ ४२ ॥ तानि दृष्ट्वा महार्हाणि दर्शयित्वा मुहुर्मुहुः । राघवः सहसौमित्रिः सुग्रीवे संन्यवेशयत् ॥
४३ ॥ स तवादर्शनादार्ये राघवः परितप्यते । महता ज्वलता नित्यमग्निनेवाग्निपर्वतः ॥ ४४ ॥ त्वत्कृते तमनिद्रा
च शोकश्चिंता च राघवं । तापयंति महात्मानमग्न्यागारमिवाग्नयः ॥ ४५ ॥ तवादर्शनशोकेन राघवः परिचाल्य-
ते । महता भूमिकंपेन महानिव शिलोच्चयः ॥ ४६ ॥ काननानि सुरम्याणि नदीप्रस्रवणानि च । चरन्न रतिमाप्नो-
ति त्वामपश्यन्नृपात्मजे ॥ ४७ ॥ सहितौ रामसुग्रीवावुभावकुरुतां तदा । समयं वालिनं हंतुं तव चान्वेषणं प्रति ॥ ४८ ॥

॥ ४८ ॥ [illegible]

प्रादीपयत् आभरणदर्शनमिति शेषः ॥ ४१ ॥ शयितं शोकाद्भूमौ पतितं ॥ ४२ ॥ ४३ ॥ अग्निपर्वतः संवर्ताख्यकालाग्निनिवासभूतः पर्वतोऽग्निपर्वतः
तत्रभवतः शृंगेऽस्य तेहव्यवाट् सदा तत्रासंवर्तको नाम कालाग्निर्भरतवर्षे तिमीप्य पर्वणि भारतो क्ते ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ सहितौ सख्यं प्राप्तौ समयं

४९॥५०॥५१॥५२॥५३॥ सुग्रीववचनात्तुराः सुग्रीवाज्ञाभीताः॥५४॥ त्रिभागबलसंवृतः सेनायास्त्रिषु भागेष्वेकांशसेनापरिवृत इत्यर्थः॥५५॥ विध्येविध्र

ततस्ताभ्यां कुमाराभ्यां वीराभ्यां स हरीश्वरः॥ किष्किंधां समुपागम्य वाली युद्धे निपातितः॥४९॥ ततो निहत्य तरसा रामो वा
लिनमाहवे॥ सर्वर्क्षहरिसंघानां सुग्रीवमकरोत्पतिं॥५०॥ रामसुग्रीवयोरैक्यं देव्येवं समजायत॥ हनूमंतं च संदे
विनयोर्हेतुमुपागतं॥५१॥ स्वं राज्यं प्राप्य सुग्रीवः स्वानानीय महाकपीन्॥ लदर्थं प्रेषयामास दिशो दश महाबला
न्॥५२॥ आदिष्टा वानरेंद्रेण सुग्रीवेण महौजसः॥ अद्रिराजप्रतीकाशाः सर्वतः प्रस्थिता महीं॥५३॥ ततस्ते मार्गमा
णा वै सुग्रीववचनातुराः॥ चरंति वसुधां कृत्स्नां वयमन्ये च वानराः॥५४॥ अंगदो नाम लक्ष्मीवान्वालिसूनुर्महा
बलः॥ प्रस्थितः कपिशार्दूलस्त्रिभागबलसंवृतः॥५५॥ तेषां नो विप्रनष्टानां विंध्ये पर्वतसत्तमे॥ भृशं शोकप
२८ रीतानामहोरात्रगणा गताः॥५६॥ ते वयं कार्यनैराश्यात्कालस्यातिक्रमेण च॥ भयाच्च कपिराजस्य प्राणां
स्त्यक्तुमुपस्थिताः॥५७॥ विचित्य गिरिदुर्गाणि नदीप्रस्रवणानि च॥ अनासाद्य पदं देव्याः प्राणांस्त्यक्तुं व्यवस्थि
ताः॥५८॥ ततस्तस्य गिरेर्मूर्ध्नि वयं प्रायमुपास्महे॥ दृष्ट्वा प्रायोपविष्टांश्च सर्वान्वानरपुंगवान्॥५९॥ भृशं
शोकार्णवे मग्नः पर्यदेवयदंगदः॥ तव नाशं च वैदेहि वालिनश्च तथा वधम्॥६०॥

नष्टानां विलमध्ये ऽदर्शनं प्राप्तानां गता इति समयात्सरे प्रीतिरोषः॥५६॥५७॥५८॥५९॥६०॥६१॥६२॥६३॥६४॥६५॥६६॥६७॥६८॥६९॥७०॥

॥ रा०वा०सुं० ॥
॥ ८७ ॥

निराशानां त्यक्ताभ्याशारहितानां स्वासंदेशाच्छन्नसंदिकान्तात्यपान् ॥ हेतोर्मुमूर्षतां ॥ ६१ ॥ कार्यहेतोः कार्यसिद्ध्यर्थमिवायातः दैवादिति शेषः

प्रायोपवेशमस्माकं मरणं च जटायुषः ॥ तेषां नः स्वामिसंदेशान्निराशानां मुमूर्षतां ॥ ६१ ॥ कार्यहेतोरिहायातः शकु
निर्वीर्यवान्महान् ॥ गृध्रराजस्य सोदर्यः संपातिर्नाम गृध्रराट् ॥ ६२ ॥ श्रुत्वा भ्रातृवधं कोपादिदं वचनमब्रवी
त् ॥ यवीयान्केन मे भ्राता हतः क्व च निपातितः ॥ ६३ ॥ एतदाख्यातुमिच्छामि भवद्भिर्वानरोत्तमाः ॥ अंगदो
कथयत्तस्य जनस्थाने महद्वधं ॥ ६४ ॥ रक्षसा भीमरूपेण त्वामुद्दिश्य यथार्थतः ॥ जटायोस्तु वधं श्रुत्वा दुःखितः
सोरुणात्मजः ॥ ६५ ॥ त्वामाह स वरारोहे वसंतीं रावणालये ॥ तस्य तद्वचनं श्रुत्वा संपातेः प्रीतिवर्द्धनं ॥ ६६ ॥ अंग
द प्रमुखाः सर्वे ततः प्रस्थापिता वयं ॥ विंध्यादुत्थाय संप्राप्ताः सागरस्यांतमुत्तमं ॥ ६७ ॥ त्वद्दर्शने कृतोत्साहा हृ
ष्टाः पुष्टाः प्लवंगमाः ॥ अंगद प्रमुखाः सर्वे वेलोपांतमुपागताः ॥ ६८ ॥ चिंतां जग्मुः पुनर्भीमां त्वद्दर्शनसमुत्सु
काः ॥ अथाहं हरिसैन्यस्य सागरं दृश्य सीदतः ॥ ६९ ॥ व्यवधूय भयं तीव्रं योजनानां शतं प्लुतः ॥ लंका चापि म
या रात्रौ प्रविष्टा राक्षसाकुला ॥ ७० ॥ रावणश्च मया दृष्टस्त्वं च शोकनिपीडिता ॥ एतत्ते सर्वमाख्यातं यथा वृत्तम
निंदिते ॥ ७१ ॥ अभिभाषस्व मां देवि दूतो दाशरथेरहं ॥ तन्मां रामकृतोद्योगं त्वन्निमित्तमिहागतं ॥ ७२ ॥ सुग्रीव
सचिवं देवि विद्धस्व पवनात्मजं ॥ कु
शली तव काकुत्स्थः सर्वशस्त्रभृतो वरः ॥ ७३ ॥

६२ ॥ क्व देशे इति शेषः ॥ ६३ ॥ आख्यातुमित्यस्य समानकर्तृकेपि तुमुनार्थः ॥ ६४ ॥ ६५ ॥ ६६ ॥ अनंतरं ॥ ६७ ॥ ६८ ॥ ६९ ॥ प्लुतः प्लुतवान् ॥ ७० ॥ ७१ ॥ ७२ ॥
पवनात्मजं त्वेन घनसामर्थ्य ॥ ७३ ॥

लं

300

॥ श्री० ॥
॥ ८७ ॥

५१

७४ ॥ एकः संक्रान्तोर्थोद्धेषाः समुद्रतीर एवासते कामरूपिणं अनेन एव वर्णनः उराघ्न्येषणसामर्थ्यं स्तुचितं ॥७५॥ नत्वाशं त्वद्दर्शनं ॥७६॥ अधिगमो दर्शनं ॥७७॥७८॥ तिर्यग्देहस्य न वकथं पवनात्मजत्वमिति शंकामपनयन्नाह माल्यवान्नामेति ॥७९॥ गोकर्णनगाख्यं दिष्टः शंबसादनार्थ

गुरोराराधने युक्तो लक्ष्मणः शुभलक्षणः ॥ तस्य वीर्यवतो देवि भर्तुस्तव हिते रतः ॥७४॥ अहमेकस्तु संप्राप्तः सुग्रीववचनादिह ॥ मयेयमसहायेन चरता कामरूपिणा ॥७५॥ दक्षिणा दिगनुक्रान्ता त्वन्मार्गविचयैषिणा ॥ दिष्ट्याहं हरिसैन्यानां त्वन्नाशमनुशोचतां ॥७६॥ अपनेष्यामि संतापं तवाभिगमशासनात् ॥ दिष्ट्या हि न मम व्यर्थं सागरस्येह लंघनं ॥७७॥ प्राप्स्याम्यहमिदं देवि त्वद्दर्शनकृतं यशः ॥ राघवश्च महावीर्यः क्षिप्रं त्वामभिपत्स्यते ॥७८॥ सपुत्रबान्धवं हत्वा रावणं राक्षसाधिपं ॥ माल्यवान्नाम वैदेहि गिरीणामुत्तमो गिरिः ॥७९॥ ततो गच्छति गोकर्णं पर्वतं केशरी हरिः ॥ स च देवर्षिभिर्दिष्टः पिता मम महाकपिः ॥८०॥ तीर्थे नदीपतेः पुण्ये शंबसादनमुद्धरन् ॥ यस्याहं हरिणः क्षेत्रे जातो वातेन मैथिलि ॥ हनूमानिति विख्यातो लोके स्वेनैव कर्मणा ॥८१॥ विश्वासार्थं तु वैदेहि भर्तुरुक्ता मया गुणाः ॥ अचिरात्त्वामितो देवि राघवो नयिता ध्रुवं ॥८२॥ एवं विश्वासिता सीता हेतुभिः शोककर्शिता ॥ उपपन्नैरभिज्ञानैर्दूतं तमधिगच्छति ॥८३॥

सुरवधापाशप्तः उद्धरन् उपघ्नवान् ॥ अथ धीदिस्यर्थः भर्तोपिलतः शमार्थ ॥८०॥ स्वेनैव उत्पत्तिकालप्रवृत्तेन कर्मणा पराक्रमेण ॥८१

भर्तुस्त्वद्भर्तूरामस्य नयिता नेता ॥८२॥ उपपन्नैर्योग्यैः अभिज्ञानै रामलक्ष्मणचिह्नैः अभिगच्छति अध्यगच्छत्

॥८३॥

॥ रा० था० सुं ॥
॥ ८८ ॥

७४ ॥ अन्यथा नेति ॥ मायाकपिनेत्यर्थः ॥ ७५ ॥ सर्वमुत्तरं सर्वं प्रत्युत्तरमाख्यानमित्यन्वयः ॥ अथ सीतायैचिकीर्षितं पृच्छति ॥ किं करोमी-
ति । वर्तमानसामीप्ये लटो ॥ प्रतियामि ॥ प्रतियास्ये रामसमीपं किं करोमि किं करिष्ये कथं वा रोचते चिकीर्षितं मयेति शेषः ॥ ७७ ॥ नाहं
रावण आत्मानं कथमायपुत्र इति ब्रूयादिति ज्ञापनपूर्वकं कपित्वनिश्चयाय पुनः स्वजन्मानुवादः हतेसुर इति ततः शंबसादनासुर

अतुलं च गता हर्षं प्रहर्षेण तु जानकी ॥ नेत्राभ्यां वक्रपक्ष्माभ्यां मुमोचानंदजं जलं ॥ ८४ ॥ चारु तद्वदनं
तस्यास्ताम्रशुक्लायतेक्षणं ॥ अशोभत विशालाक्ष्या राहुमुक्त इवोडुराट् ॥ ८५ ॥ हनूमंतं कपिं व्यक्तं मं-
न्यते नान्यथेति सा ॥ अथोवाच हनूमांस्तामुत्तरं प्रियदर्शनाम् ॥ ८६ ॥ एतत्ते सर्वमाख्यातं समाश्वसिहि
मैथिली ॥ किं करोमि कथं वा ते रोचते प्रतियाम्यहम् ॥ ८७ ॥ हतेसुरे संयति शंवसादने कपिप्रवीरेण
महर्षिचोदनात् ॥ ततोस्मि वायुप्रभवो हि मैथिलि प्रभावतस्तत्प्रतिमश्च वानरः ॥ ८८ ॥ ॥ इत्यार्षे
श्रीमद्रामायणे सुंदरकांडे पंचत्रिंशः सर्गः ॥ ३५ ॥ ॥ भूय एव महातेजा हनूमान्पवनात्मजः ॥ अब्र-
वीत्प्रश्रितं वाक्यं सीताप्रत्ययकारणात् ॥ १ ॥ वानरोहं महाभागे दूतो रामस्य धीमतः ॥ रामनामांकितं
चेदं पश्य देव्यंगुलीयकं ॥ २ ॥ प्रत्ययार्थं तवानीतं तेन दत्तं महात्मना ॥ समाश्वसिहि भद्रं ते क्षीणदुःख फलाह्यसि ॥ ३ ॥

वधप्रीतमहर्षेः प्रसादत इत्यर्थः तत्प्रतिमो वायुसदृश इत्यर्थः ॥ ८८ ॥ ॥ इति रामाभिरामे सुंदर० पंचत्रिंशः सर्गः ॥ ॥ अथ दृढत-
रविश्वासाय रामांगुलीयकं दातुमाह भूय इति ॥ प्रत्ययो विश्वासः ॥ १ ॥ वानरोहं नान्यः रामस्य नाम तन्नामाक्षराणि तैरंकितं चिह्नितं ॥ २

क्षीणं दुःखरूपं पापफलं यस्यास्सा ॥ असि शीघ्रमेव भवि-
ष्यसि ॥ ३ ॥

॥ श्री:० ॥
॥ ८८ ॥

301

विस्रंभितं विस्रंभपरं भर्तारं प्राप्ते वेत्यन्वयः ॥ बभूव हर्षोदग्रं चेति पाठः ॥ ५ ह्रीमती ॥ अंगुलीयस्याभिज्ञो भर्तृसान्निध्ये भर्तृसान्निध्यादिवेति
चिह्नज्ञा वनी प्रियं कृत्वा आदरं कृत्वा ॥ ६ ॥ विक्रान्तः शूरः समर्थो देशकालोचितकृत्स चतुरः प्राज्ञः धर्मार्थविषयकसंदेशसार्थज्ञ
:पदं स्थानं ॥ ७ ॥ क्रमता क्रामता ॥ ८ ॥ संत्रासः समुद्रादिनिरोधः रावणादपि संभ्रमः चित्तक्षोभः ॥ ९ ॥ यदि यस्मात्त्वेन प्रेषितोसि तस्मात्त्व

गृहीत्वा प्रेक्षमाणा सा भर्तुः करविभूषितं ॥ भर्तारमिव संप्राप्तं जानकी मुदिताभवत् ॥ ४ ॥ चारु तद्वदनं तस्या
स्ताम्रशुक्लायतेक्षणं ॥ बभूव हर्षोदग्रं च राहुमुक्त इवोडुराट् ॥ ५ ॥ ततः सा ह्रीमती बाला भर्तुः संदेशहर्षि
ता ॥ परितुष्टा प्रियं कृत्वा प्रशशंस महाकपिं ॥ ६ ॥ विक्रान्तस्त्वं समर्थस्त्वं प्राज्ञस्त्वं वानरोत्तमः ॥ येनेदं
राक्षसपदं त्वयैकेन प्रधर्षितं ॥ ७ ॥ शतयोजनविस्तीर्णः सागरो मकरालयः ॥ विक्रमश्लाघनीयेन क्र
मता गोष्पदीकृतः ॥ ८ ॥ नहि त्वां प्राकृतं मन्ये वानरं वानरर्षभ ॥ यस्य ते नास्ति संत्रासो रावणादपि संभ्र
मः ॥ ९ ॥ अर्हसे च कपिश्रेष्ठ मया समभिभाषितुं ॥ यद्यसि प्रेषितस्तेन रामेण विदितात्मना ॥ १० ॥ प्रेषयि
ष्यति दुर्धर्षो रामो नह्यपरीक्षितं ॥ पराक्रममविज्ञाय मत्सकाशं विशेषतः ॥ ११ ॥ दिष्ट्या च कुशली रामो ध
र्मात्मा सत्यसंगरः ॥ लक्ष्मणश्च महातेजाः सुमित्रानंदवर्द्धनः ॥ १२ ॥ कुशली यदि काकुत्स्थः किन्नु सागरमे

या समभिभाषितुं संभाषणं कर्तुमर्हसे अर्हसि ॥ १० ॥ ११ ॥ १२ ॥ ननु मद्दूतागमनेनैव तद्वचसा च कुशलावगमे किं पुनर्दिष्ट्येत्यादिना प्रश्नेने
तिशंकायां ॥ प्रश्नाशयं दर्शयति ॥ कुशली यदीति ॥ यदि कुशली त्वयोक्तमनेन रामस्तने सागरमेखलां महीं किन्नु दहति किन्नु दहतीत्यर्थः ॥ १३ ॥

खलां महीं दहति कोपेन
गान्ताग्निरिवोत्थितः ॥ १३ ॥

पुरुष३

हिं ९

॥रा० वा० सुं॥
॥८९॥

ननुकेवलंमह्यमेवेति किमुच्यतेइत्याशयेनपक्षांतरमप्याहेति॥ तथाशङ्केमन्येयदितत्किमितित्वंस्त्रीत्वमतआह ममैवेति॥ दुःखानांदुः॥
खहेतुपापानांविपर्ययोनाशोनाद्यापिसंवृतइत्यर्थः॥१४॥ ममदुःखक्षयईषत्करः अपितुनत्वसुखावस्थानमेवमन्यमित्याशयेनाह क
श्चिदिति॥ उत्तराणिकार्याणिमहितमोचनफलानि॥१५॥ नदीनोनसंभ्रान्तइत्यत्रउपंगंकार्याणिउरुपकारान्॥१६॥ द्विविधसौम्यासेस्यरूपत्र

अथवाशक्तिमन्तौतौसुराणामपिनिग्रहे॥ ममैवतुनदुःखानामस्तिमन्येविपर्ययः॥१४॥ कच्चिन्नव्यथतेरा
मः कच्चिन्नपरितप्यते॥ उत्तराणिचकार्याणिकुरुतेपुरुषोत्तमः॥१५॥ कच्चिन्नदीनःसंभ्रान्तःकार्येषुच
नमुह्यति॥ कच्चित्पुरुषकार्याणिकुरुतेनृपतेःसुतः॥१६॥ द्विविधंत्रिविधोपायमुपायमपिसेवते॥ वि
जिगीषुःसुहृत्कच्चिन्मित्रेषुचपरंतपः॥१७॥ कच्चिन्मित्राणिलभतेमित्रैश्चाप्यभिगम्यते॥ कच्चित्क
ल्याणमित्रश्चमित्रैश्चापिपुरस्कृतः॥१८॥ कच्चिदाशास्तिदेवानांप्रसादंपार्थिवात्मजः॥ कच्चित्पुरुष
कारंचदैवंचप्रतिपद्यते॥१९॥ कच्चिन्नविगतस्नेहोविवासान्मयिराघवः॥ कच्चिन्मांव्यसनादस्मा
न्मोक्षयिष्यतिराघवः॥२०॥

गो
कारद्वयवृत्त॥ त्रिविधोपायंधर्मार्थकामलक्षणत्रिविधपुरुषार्थानांप्राप्त्युपायस्तमुपा
यंसामाद्युपायमपिसेवतेकच्चित्तथामित्रेषुचविजिगीषुःसुहृत्कच्चित् विजिगीषुःसुहृदितिबहुव्रीहिस्तत्पुरुषश्चेतिकतकः सुहृत्परंतपोरा
मोविजिगीषुःसन्त्रिविधोपायंसामदानभेदरूपंउपायंदण्डोपायंचमित्रेषुचद्विविधंयथाभवतितथासेवतेकच्चिन्मित्रेषुसामदाने अ
मित्रेषुभेददण्डौएवंविभज्यप्रयुङ्क्तेकच्चिदित्यर्थइतितीर्थः॥१७॥ मित्राणिलभतेस्वयंतैर्मित्रैश्चस्वयंतत्रोभिगम्यते कल्याणमित्रःसौम्यः

मित्रैःपुरस्कृतोबहुमतःकच्चित्॥१८॥ आसास्ति॥ आसास्ते
प्रार्थयतइत्यर्थः॥१९॥ विवासात्दूरवासात्॥२०॥

॥श्रीः॥
॥८९॥

चे ९

302

९३

अनूचिन इति छांदसो दीर्घः॥ उत्तरं दुःखं दुःख मित्यर्थः॥२१॥२२॥ मन्त्रिमित्रैनमद्वियोगान्मित्रेन शोकेन कच्चिन्मारिनष्यत इति शेषः॥२३॥
२४॥२५॥२६॥ रौद्रेण अमोघचक्रेण॥२७॥ हेमसमानवर्णं हेमवर्णवस्पृहणीयशोभं॥२८॥ धर्मोपदेशान्॥ धर्मोद्देशान्॥ धर्ममुद्दिश्येति भाव

सुखानामुचितो नित्यमसुखानामनूचितः॥ दुःखमुत्तरमासाद्य कच्चिद्रामो न सीदति॥२१॥ कौशल्यायाः
स्तथा कच्चित्सुमित्रायास्तथैव च॥ अभीक्ष्णं श्रूयते कच्चित्कुशलं भरतस्य च॥२२॥ मन्त्रिमित्रेन मानार्हः क
च्चिच्छोकेन राघवः॥ कच्चिन्नान्यमना रामः कच्चिन्मां नारयिष्यति॥२३॥ कच्चिदक्षौहिणीं भीमां भरतो भ्रातृव
त्सलः॥ ध्वजिनीं मन्त्रिभिर्गुप्तां प्रेषयिष्यति मत्कृते॥२४॥ वानराधिपतिः श्रीमान्सुग्रीवः कच्चिदेष्यति॥ म
त्कृते हरिभिर्वीरैर्वृतो दंतनखायुधैः॥२५॥ कच्चिच्च लक्ष्मणः शूरः सुमित्रानंदवर्द्धनः॥ अस्त्रविच्छरजालेन रा
क्षसान्विधमिष्यति॥२६॥ रौद्रेण कच्चिदस्त्रेण रामेण निहतं रणे॥ द्रक्ष्याम्यल्पेन कालेन रावणं ससुहृज्जनं
॥२७॥ कच्चिन्न तद्धेमसमानवर्णं तस्याननं पद्मसमानगंधि॥ मया विना शुष्यति शोकदीनं जलक्षये पद्म
मिवातपेन॥२८॥ धर्मापदेशात्त्यजतः स्वराज्यं मां चाप्यरण्यं नयतः पदातेः॥ नासीद्यथा यस्य न भीर्न शोकः
कच्चित्स धैर्यं हृदये करोति॥२९॥ न चास्य माता न पिता न चान्यः स्नेहाद्विशिष्टोस्ति मया समो वा॥ तावत्त्वहं
दूतजिजीविषेयं यावत्प्रवृत्तिं शृ

णुयां प्रियस्य॥३०॥

त नभीर्न शोकः ममनयनान्न भीः राज्यत्यागान्न शोकः भयं च मद्रक्षानिमित्तं॥ यस्य यथा वनवासखेदस्तथा नासीत्स इदानीं धैर्यं करो
ति कच्चित्॥२९॥ धैर्यत्यागे मद्वियोग एव हेतुरित्याह॥ न चास्येति॥ मातापित्रादौ तस्य मत्समोपि स्नेहः अधिकस्तु कुतः॥ ममतु स्फूर्तिरूपत्वा
न्वक्तुमशक्योऽस्याभावाच्च हृन्मन अहमपि तावज्जीविषेयं प्रवृत्तिं यावत्तां प्रवृत्तिं मार्गे रामो ममापि कांक्षितमस्ते नादर्शनरूपो नाश एवेति भावः॥३०॥

तं

रामंवनिर्द्दिमार्ग

हंसी ८

रामार्थयुक्तं रामप्रयोजनयुक्तं रामरूपाभिधेयेनयुक्तं तद्बोधकमितिवा ॥ ३१ ॥ ३२ ॥ नजानातीतेनजानातीत्यव अनुक्रादेसनीतांपुरंदरइ
व ॥ ३३ ॥ महत्संमता ॥ ३४ ॥ विष्टंभयित्वा संस्तभ्य सेतुंबद्ध्वेतियावत् ॥ तत्रसत्कर्मप्रवृत्तौ अंतराविघ्नत्वेन यदिमृत्युप्रभृतयोपस्थास्यंतितदा

इतीवदेवीवचनंमहार्थं तंवानरेंद्रंमधुरार्थमुक्त्वा ॥ श्रोतुंपुनस्तस्यवचोभिरामंरामार्थयुक्तंविररामरामा ॥ ३१ ॥
सीतायावचनंश्रुत्वामारुतिर्भीमविक्रमः ॥ शिरस्यंजलिमाधायवाक्यमुत्तरमब्रवीत् ॥ ३२ ॥ नत्वामिहस्थां
जानीतेरामःकमललोचनः ॥ तेनत्वांनानयत्याशुशचीमिवपुरंदरः ॥ ३३ ॥ श्रुत्वैवचवचोमह्यंक्षिप्रमेष्य
तिराघवः ॥ चमूंप्रकर्षन्महतींहर्यृक्षगणसंकुलां ॥ ३४ ॥ विष्टंभयित्वाबाणौघैरक्षोभ्यंवरुणालयं ॥ करि
ष्यतिपुरींलंकांकाकुत्स्थःशांतराक्षसां ॥ ३५ ॥ तत्रयद्यंतरामृत्युर्यदिदेवामहासुराः ॥ स्थास्यंतिपथिरामस्य
सतानपिवधिष्यति ॥ ३६ ॥ तवादर्शनजेनार्येशोकेनपरिपूरितः ॥ नशर्मलभतेरामःसिंहार्दितइवद्विपः
॥ ३७ ॥ मंदरेणचतेदेविशपेमूलफलेनच ॥ मलयेनचविंध्येनमेरुणादर्दुरेणच ॥ ३८ ॥ यथासुनयनं
वल्गुबिंबोष्ठंचारुकुंडलं ॥ मुखंद्रक्ष्यसिरामस्यपूर्णचंद्रमिवोदितं ॥ ३९ ॥ क्षिप्रंद्रक्ष्यसिवैदेहिरामंप्रस्र
वणेगिरौ ॥ शतक्रतुमिवासीनंनागपृष्ठस्यमूर्धनि ॥ ४० ॥

सतानपिवधिष्यति ॥ ३६ ॥ ३७ ॥ स्वोक्तेर्थेदेव्याविश्वासार्थं स्व
वासस्थानमंदरादिभिः स्वजीवसाधनैर्मूलफलैश्च शपथंकरोति मंदरेणाचेतिदर्दुरःपर्वतविशेषः ॥ ३८ ॥ यथारामस्यमुखंद्रक्ष्यसि तथ
मंदरादिभिःशपेइत्यन्वयः ॥ ३९ ॥ प्रस्रवणगिरौविद्यमानमपीहद्रक्ष्यसीत्यर्थः नागपृष्ठस्यमूर्धनिस्वरावतोपरिस्थितमिंद्रमिवमत्प्र

गं राममं द्रक्ष्यसीत्यर्थः नाकपृष्ठस्येति पाठः स्वर्गस्योपरीत्यर्थः
इति तीर्थः ॥ ४० ॥

303

सुविहितमारण्यकशाकवोधितंभक्तं ओदनं पंचमंकालं प्राप्येतिशेषः प्रातःसंगमःध्याह्नापराह्णापंचमंसायाह्नंप्राप्येत्यर्थः यद्वाप्रातःसायं
प्रातःसायंप्रातःसायमितिकालचतुष्टयंसेत्वापंचमेप्रातःकालइत्यर्थः दिनद्वयमतिसभुंक्तेइत्यर्थः ॥ ४१ ॥ ४२ ॥ ४३ ॥ प्रायोगतिद्रुस्यक

नमांसंराघवोभुंक्तेनचैवमधुसेवते ॥ वन्यंसुविहितंनित्यंभक्तमश्नातिपंचमं ॥ ४१ ॥ नैवदंशान्नमशकान्न
कीटान्नसरीसृपान् ॥ राघवोपनयेद्गात्रात्त्वद्गतेनांतरात्मना ॥ ४२ ॥ नित्यंध्यानपरोरामोनित्यंशोकपरा
यणः ॥ नान्यंचिंतयतेकिंचित्सतुकामवशंगतः ॥ ४३ ॥ अनिद्रःसततंरामःसुप्तोपिचनरोत्तमः ॥ सीते(
तिमधुरांवाणींव्याहरन्प्रतिबुध्यते ॥ ४४ ॥ दृष्ट्वाफलंवापुष्पंवायच्चान्यत्स्त्रीमनोहरं ॥ वहुशोहाप्रियेत्येवं
श्वसंस्त्वामभिभाषते ॥ ४५ ॥ सदेविनित्यंपरितप्यमानस्त्वामेवसीतेत्यभिभाषमाणः ॥ धृतव्रतोरा
जसुतोमहात्मातवैवलाभायकृतप्रयत्नः ॥ ४६ ॥ सारामसंकीर्तनवीतशोकारामस्यशोकेनसमान
शोका ॥ शरन्मुखेनांबुदशेषचंद्रानिशेववैदेहसुताबभूव ॥ ४७ ॥ ॥ इत्यार्षेश्रीमद्रामायणेसुंदर॰षट्त्रिं
शःसर्गः ॥ ३६ ॥

(यंचित्सुप्तोपिसीतेतिवदन्नेवप्रतिबुध्यते ॥ ४४ ॥ स्त्रीमनोहरंस्त्रीसन्निधानेमनोहरंस्त्रीणांमनोहरंवा॰
श्वसन्दीर्घोच्छ्वासंत्यजन् ॥ ४५ ॥ रामसंकीर्तनेनानिद्रःसततंरामइत्यादिनावीतशोकानमांसंराघवोभुंक्तेइत्युक्तेनरामशोकेन॰
समानशोका ॥ अंबुदशेषभ्रंशायस्याःसा ॥ शरत्तुप्रषष्ठीकंशरदोनिशेवप्रकाशाप्रकाशायुक्तशरन्निशेवहर्षशोकवतीबभूवभाव
संधिरत्राभिमानः ॥ ४७ ॥ इतिरामाभिरामेश्रीरा॰सुंदर॰षट्त्रिंशःसर्गः ॥ ३६ ॥

वचनं हनूमन इत्यादि ॥१॥ यच्चानन्यमना इति वाक्यमाख्यायनेनदमृतं यच्चशोकपरायण इति वाक्यमाख्यानेन विषं ॥२॥ ऐश्वर्ये व्यसने इति
च विषयसप्तमी ॥३॥ विधिर्दैवं असंहार्यः अशक्यप्रतिक्रियः ॥ अत्र स्वीयमेव दुःखं दर्शयति ॥४॥ हतनौः पुरुषः परिश्रान्तः कृतपराक्रमः
बाहुभ्यां प्लवमानो यथा सागरे पारमेति क्लेशेनाधिगच्छति ॥ तथा राघवोपि कथं चित्तन्माधिगमिष्यति ॥५॥ सः रामः ॥७॥८॥ निर्यातनं पुनः सम

सा सीता वचनं श्रुत्वा पूर्णचंद्रनिभानना ॥ हनुमंतमुवाचेदं धर्मार्थसहितं वचः ॥१॥ अमृतं विषसं
पृक्तं त्वया वानर भाषितं ॥ यच्च नान्यमना रामो यच्च शोकपरायणः ॥२॥ ऐश्वर्ये वा सुविस्तीर्णे व्यसने वा सु
दारुणे ॥ रज्ज्वेव पुरुषं बद्ध्वा कृतांतः परिकर्षति ॥३॥ विधिर्नूनमसंहार्यः प्राणिनां प्लवगोत्तम ॥ सौमि
त्रिं मां च रामं च व्यसनैः पश्य मोहितान् ॥४॥ शोकस्यास्य कथं पारं राघवोधिगमिष्यति ॥ प्लवमानः प
रिश्रांतो हतनौः सागरे यथा ॥५॥ राक्षसानां वधं कृत्वा सूदयित्वा च रावणं ॥ लंकामुन्मथितां कृत्वा क
दा द्रक्ष्यति मां पतिः ॥६॥ स वाच्यः संत्वरस्वेति यावदेव न पूर्यते ॥ अयं संवत्सरः कालस्तावद्धि मम जी
वितं ॥७॥ वर्त्तते दशमो मासो द्वौ तु शेषौ प्लवंगम ॥ रावणेन नृशंसेन समयो यः कृतो मम ॥८॥ विभी
षणेन च भ्रात्रा मम निर्यातनं प्रति ॥ अनुनीतः प्रयत्नेन न च तत्कुरुते मतिं ॥९॥ मम प्रतिप्रदानं हि
रावणस्य न रोचते ॥ रावणं मार्गते संख्ये मृत्युः कालवशं गतं ॥१०॥ ज्येष्ठा कन्या कला नाम विभीषण

र्पणं न च तन्न तस्मिंश्चित्तस्यर्थः ॥९॥१०॥ कन्या अजातमपुत्रसंबन्धा स्तन विभीषणात्तनयं इदमेवाग्रे रामकृतं ॥ विभीषणास्यातिः शोकपीर
ग्रहाभिषेकयोर्बीजं ॥११॥ न ४

सुताकपे तयाममैतदाख्यातं मात्राप्रहि
तयास्वयं ॥११॥

306

१२ ॥ रामक्षयं रक्षसां रामात्क्षयं प्राप्तमित्यर्थः ॥ १३ ॥ पतिः प्राप्स्यत इत्यत्र हेतुः अंतरात्मेति तस्मिन्रामे ॥ १४ ॥ उत्साहः कार्येषु स्थिरप्रयत्नरूप उद्योगः
पौरुषं तज्जन्यः पुरुषव्यापारः सत्वं बलं आनृशंस्यमक्रूरता अभिजनदाक्षिण्यमिति यावत् विक्रमः शौर्यं प्रभावो दिव्यास्त्रसंपज्जन्या महिमा ॥ १५
सा॰ १

अविंध्यो नाम मेधावी विद्वान्राक्षसपुंगवः ॥ धृतिमां शीलवान्वृद्धो रावणस्य सुसंमतः ॥ १२ ॥ रामक्षयमनुप्राप्तं
रक्षसां प्रत्यचोदयत् ॥ न च तस्य स दुष्टात्मा शृणोति वचनं हितं ॥ १३ ॥ आशंसेयं हरिश्रेष्ठ क्षिप्रं मां प्राप्स्यते
पतिः ॥ अंतरात्मा हि मे शुद्धस्तस्मिंश्च बहवो गुणाः ॥ १४ ॥ उत्साहः पौरुषं सत्वमानृशंस्यं कृतज्ञता ॥ विक्रम
श्च प्रभावश्च संति वानर राघवे ॥ १५ ॥ चतुर्दश सहस्राणि राक्षसानां जघान यः ॥ जनस्थाने विना भ्रात्रा
शत्रुः कस्तस्य नोद्विजेत् ॥ १६ ॥ न स शक्यस्तुलयितुं व्यसनैः पुरुषर्षभः ॥ अहं तस्यानुभावज्ञा शक्रस्येव पु
लोमजा ॥ १७ ॥ शरजालांशुमान्शूरः कपे रामदिवाकरः ॥ शत्रुरक्षोमयं तोयमुपशोषं नयिष्यति ॥ १८ ॥ इति सं
जल्पमानां तां रामार्थे शोककर्शितां ॥ अश्रुसंपूर्णवदनामुवाच हनुमान्कपिः ॥ १९ ॥ श्रुत्वैव च वचो मह्यं क्षि
प्रमेष्यति राघवः ॥ चमूं प्रकर्षन्महतीं हर्यक्षगणसंकुलां ॥ २० ॥

गत्सत्तानुमापककार्यमाह चतुर्दशेति ॥ १६ ॥ व्यसनैः व्यसनदानशीलराक्षसैस्तुलयितुमुपयितुं तस्य न शक्यं च मम प्रत्यक्षमेवेत्याह अहं तस्येति निरूप
त्वादिति स्पष्टं ॥ १७ ॥ शरजालेत्यादि ॥ परंपरितरूपकमिदं ॥ १८ ॥ १९ ॥ मह्यं मम मत्तो वा ॥ २० ॥

दू

नवरामसंगमे रामस्येहानयनं यथैमेवं प्रकारां नरेशो वनस्पसंभ वादित्याह ॥ अपवेमि । सोहं राक्षसात् । राक्षसमलनादस्मात्दुःखान्मोचयिष्यामीत्यन्वय
:॥ २१ ॥ २२ ॥ २३ ॥ देहस्य वधे व्यवसायप्रयुक्तं विष्णुमिवास्थितं ॥ २४ ॥ नगराजस्य पृष्ठस्य तस्य वराग्रे गिरेरि स्थः ॥ २५ ॥ मां विकांक्षस्व मोपेक्षां कुर्वित्यर्थः ॥ २६
या

अथवा मोचयिष्यामि त्वामद्यैव सराक्षसात् ॥ अस्माद्दुःखादुपारोह मम पृष्ठमनिंदिते ॥ २१ ॥ त्वां तु पृष्ठगतां कृ
त्वा संतरिष्यामि सागरं ॥ शक्तिरस्ति हि मे वोढुं लंकामपि सरावणां ॥ २२ ॥ अहं प्रस्रवणस्थाय राघवायाद्य मैथि
लि ॥ प्रापयिष्यामि शक्राय हव्यं हुतमिवानलः ॥ २३ ॥ द्रक्ष्यस्यद्यैव वैदेहि राघवं सहलक्ष्मणं ॥ व्यवसाय
समायुक्तं विष्णुं दैत्यवधे यथा ॥ २४ ॥ त्वद्दर्शनकृतोत्साहमाश्रमस्थं महाबलं ॥ पुरंदरमिवासीनं नगरा
जस्य मूर्धनि ॥ २५ ॥ पृष्ठमारोह मे देवि मा विकांक्षस्व शोभने ॥ योगमन्विच्छ रामेण शशांकेनेव रोहिणी
२६ ॥ कथयंतीव शशिना संगमिष्यसि रोहिणी ॥ मत्पृष्ठमधिरोह त्वं तराकाशमहार्णवं ॥ २७ ॥ न हि मे सं
प्रयानस्य त्वामितो नयतोंगने ॥ अनुगंतुं गतिं शक्ताः सर्वे लंकानिवासिनः ॥ २८ ॥ यथैवाहमिह प्राप्त
स्तथैवाहमसंशयं ॥ यास्यामि पश्य वैदेहि त्वामुद्यम्य विहायसं ॥ २९ ॥ मैथिली तु हरिश्रेष्ठाच्छ्रुत्वा वचनमद्भु
तं ॥ हर्षविस्मितसर्वांगी हनूमंतमथाब्रवीत् ॥ ३० ॥

कथयंतीव संगं नयो रामशशिनवच्चनं कथयंतीव ॥ शशिना रोहि
णीव संगमिष्यसीत्यन्वयः एतद्वचनसमकालमेव रामसमीपं प्रापयिष्यामीत्यर्थः यथागतवच्चनेन प्रयासएवमनायासामीत्यर्थो वा
काशेनन्मार्गमयत्नं व्यमहार्णवं नरेत्यन्वयः ॥ २७ ॥ २८ ॥ त्वामुद्यम्य पृष्ठे कृत्वा विहायसं यास्यामि पश्य ॥ २९ ॥ हर्षविस्मितसर्वांगी हर्षपुलकितम

सेनत्वीनर

305

॥ श्री० ॥
॥ ९२ ॥

तदेव दृश्यमानमेव ॥ ३१ ॥ ३२ ॥ नवं परिभवं ॥ अल्पशरीरो शक्त इत्येवं ॥ ३३ ॥ कामतं इच्छाकृतं ॥ ३४ ॥ तस्मात्पादपात् ॥ शिंशपातः शरीरवृद्धोत
द्वारजातशाखाभंगध्वनिना राक्षस्यो ज्ञास्यंतीति तत्रगमनाशक्तिः ॥ ३५ ॥ अग्रतो अवतस्थिवो योग्रपुरो देशोस्थित ॥ ३६ ॥ ३७ ॥ सनाथां सरावणं नयि

हनूमन्दूरमध्वानं कथं मां नेतुमिच्छसि ॥ तदेव खलु ते मन्ये कपित्वं हरियूथप ॥ ३१ ॥ कथं चाल्पशरीरस्त्वं मा
मितो नेतुमिच्छसि ॥ सकाशं मानवेंद्रस्य भर्तुर्मे प्लवगर्षभ ॥ ३२ ॥ सीतायास्तु वचः श्रुत्वा हनूमान्मारुतात्मजः
चिंतयामास लक्ष्मीवान्नवं परिभवं कृतं ॥ ३३ ॥ न मे जानाति सत्वं वा प्रभावं वासितेक्षणा ॥ तस्मात्पश्य
तु वैदेही यद्रूपं मम कामतः ॥ ३४ ॥ इति संचिंत्य हनूमांस्तदा प्लवगसत्तमः ॥ दर्शयामास सीतायाः स्वरूप
मरिमर्दनः ॥ स तस्मात्पादपाद्धीमानाप्लुत्य प्लवगर्षभः ॥ ३५ ॥ ततो वर्द्धितुमारेभे सीताप्रत्ययकारणात् ॥ भे
मेरुमंदरसंकाशो बभौ दीप्तानलप्रभः ॥ अग्रतो व्यवतस्थे च सीताया वानरर्षभः ॥ ३६ ॥ हरिः पर्वतसंका
शस्ताम्रवक्त्रो महाबलः ॥ वज्रदंष्ट्रनखो भीमो वैदेहीमिदमब्रवीत् ॥ ३७ ॥ सपर्वतवनोद्देशां साट्टप्राकार
तोरणां ॥ लंकामिमां सनाथां वा नयितुं शक्तिरस्ति मे ॥ ३८ ॥ तदवस्थाप्यतां बुद्धिरलं देवि विकांक्षया ॥ वि
शोकं कुरु वैदेहि राघवं सहलक्ष्मणं ॥ ३९ ॥ तं दृष्ट्वाचलसंकाशमुवाच जनकात्मजा ॥ पद्मपत्रविशालाक्षी
मारुतस्यौरसं सुतम् ॥ ४० ॥ तुं नेतुं ॥ ३८ ॥ अवस्थाप्यतां समर्थी बुद्धिर्निश्चीयतां ॥ विकांक्षया संदेहेन विशोकं कुरु मत्पृष्ठे
तत्र गत्वेति शेषः ॥ ३९ ॥ ४० ॥

विजानामिएवंविधत्वद्रूपदर्शनात् ॥ आगम्यत्तुमानादितिभावः ॥४१॥ मदेवानुमानंदर्शयतिप्राकृतइति ॥४२॥ नमेवसमाप्यात्मनःकार्य
सिद्धिस्वरूपंसंप्रधार्यत्वेयानुरूपवलवैभवेनविचार्यत्वयानुरूपवलवैभवेनविचारितत्वाकार्यसिद्धिः ॥४३॥ भवतामार्हःकोविचारस्तत्रा

नवसत्वंबलंचैवविजानामिमहाकपे ॥ वायोरिवगतिश्चापितेजसाग्नेरिवाद्भुतं ॥४१॥ प्राकृतोन्यःकथंचेमांभूमि
मागंतुमर्हति ॥ उदधेरप्रमेयस्यपारंवानरपुंगव ॥४२॥ जानामिगमनेशक्तिंनयनेचापितेमम ॥ अवश्यं
संप्रधार्याशुकार्यसिद्धिरिवात्मनः ॥४३॥ अयुक्तंतुकपिश्रेष्ठमयागंतुंत्वयासह ॥ वायुवेगसवेगस्यवेगोमां
मोहयेत्तव ॥४४॥ अहमाकाशमासक्ताउपर्युपरिसागरं ॥ प्रपतेयंहितेपृष्ठाद्भूयोवेगेनगच्छतः ॥४५॥ पतितासा
गरेचाहंतिमिनक्रझषाकुले ॥ भवेयमाशुविवशायादसामन्नमुत्तमं ॥४६॥ नचशक्ष्येत्वयासार्धंगंतुंश
त्रुविनाशन ॥ कलत्रवतिसंदेहस्त्वय्यपिस्यादसंशयं ॥४७॥ ह्रियमाणांतुमांदृष्ट्वाराक्षसाभीमविक्रमाः ॥
अनुगच्छेयुरादिष्टारावणेनदुरात्मना ॥४८॥ तैस्त्वंपरिवृतःशूरैःशूलमुद्गरपाणिभिः ॥ भवेस्त्वंसंशयंप्रा
प्तोमयावीरकलत्रवान् ॥४९॥ सायुधाबहवोव्योम्निराक्षसास्त्वंनिरायुधः ॥ कथंशक्ष्यसिसंयातुंमांचैव
परिरक्षितुं ॥५०॥

ह अयुक्तंत्विति ॥४४॥ उपर्युपरिसागरंसागरस्योपरीत्यर्थः ॥४५॥४६॥ इतोपिगमनमयुक्तंत्वयासहेतिइत्याहनचेति कलत्रव
तिस्त्रियासहगंतरिसंदेहःराक्षसानामितिशेषः ॥४७॥४८॥ संशयंप्राणसंशयंतैस्त्वंपरिवृतोभवेन्नत्वंसंशयंप्राप्तोभवेरितित्व
शंद्वयपिनिर्वाह ॥४९॥ तत्रहनूमानाहसायुधाइतिव्यो
म्निनिरालंबप्रदेशाइत्यर्थः ॥५०॥

कथंचिन्महता यत्नेन सांपराये युद्धे जयेयुः तस्माव्यवस्थितत्वादिति भावः ॥ ५२ ॥ अथ त्वं जेष्यसि एवमापिपन्नेन महाननर्थस्तस्मात् अथवे-
ति ॥ पन्नेयं न वध्यत्वादिति शेषः तत्र हेतुर्विमुखस्येति युद्धपारवश्यास्मद्रक्षणाविमुखस्येत्यर्थः ॥ ५३ ॥ विज्ञास्येयुः रामविषयकद्वेषयज्ञान् नस्तो-
पनाशार्थमित्यर्थः ॥ ५४ ॥ ५५ ॥ यशो हीयेत स्वयं तस्माद्धर्तुमशक्तस्य यशो हानिः स्यादिति भावः शस्तैः हिंसितैः ॥ ५६ ॥ राक्षसैः स्वग्रहणे

युध्यमानस्य रक्षोभिस्तनस्तैः क्रूरकर्मभिः ॥ प्रपन्ने यं हि नेपद्राद्भयान्नोकपिसत्तम ॥ ५१ ॥ अथ रक्षांसि भीमानि महान्ति
बलवन्ति च ॥ कथंचित्सांपराये त्वां जयेयुः कपिसत्तम ॥ ५२ ॥ अथवा युध्यमानस्य पनेयं विमुखस्य ते ॥ पतितां चगृ-
हीत्वा मां नयेयुः पापराक्षसाः ॥ ५३ ॥ मां वा हरेयुस्त्वद्धस्ताद्विशसेयुरथापि वा ॥ अनवस्थौ हि दृश्येते युद्धे जयपराज-
यौ ॥ ५४ ॥ अहं चापि विपद्येयं रक्षोभिरभितर्जिता ॥ त्वत्प्रयत्नो हरिश्रेष्ठ भवेन्निष्फल एव तु ॥ ५५ ॥ कामं त्वमपि पर्या-
प्तो निहन्तुं सर्वराक्षसान् ॥ राघवस्य यशो हीयेत्त्वया शस्तैस्तु राक्षसैः ॥ ५६ ॥ अथवादाय रक्षांसि न्यसेयुः संवृते हि
मां ॥ यत्र ते नाभिजानीयुर्हरयो नापि राघवः ॥ ५७ ॥ आरंभस्तु मदर्थोयं ततस्तव निरर्थकः ॥ त्वया हि सह रामस्य महा-
नागमने गुणः ॥ ५८ ॥ मयि जीवितमायत्तं राघवस्यामितौजसः ॥ भ्रातॄणां च महाबाहो तव राजकुलस्य च ॥ ५९ ॥

यत्र २

पक्षे दोषान्तरमाह ॥ अथवेति संवृते गुप्ते ॥ ५७ ॥ आरंभः समुद्रतरणादिरूपः ॥ एवं स्वगमनपक्षे दोषमुक्त्वा राघवानयनपक्षस्य गुणवानित्याह
त्वया हीति ॥ ५८ ॥ रामे रामदष्ट्रा ष्टो सर्वनाशप्रसंग इत्याह ॥ मयि जीवितमिति ॥ भ्रातॄणां लक्ष्मणादीनां ॥ राजकुलस्य सुग्रीवकुलस्य ॥ ५९ ॥

॥रा० वा० सु॥
॥९४॥

प्राणसंग्रहं प्राणसंबंधं ॥६०॥ हन्तुमनाः सहगमनाभावे कारणांतरमाह ॥ भर्तुरिति रावणगात्रस्पर्शस्तु न स्वमइत्याह ॥ यदहमिति अनीशा स्त्री
त्वात्स्वयमसमर्था विवशा विचेष्टा विनाथा ॥ असन्निहितरामलक्ष्मणा ॥ हा सीते लक्ष्मणेति मारीचवाक्यं श्रुत्वा रामानर्थशंकया लक्ष्मणस्यापि
प्रस्थापनादितिभावः ॥६२॥ न तत्तस्य सदृशं स्वमाहात्म्यासगणं हन्तुं हत्वा मन्त्रयत्नं ॥ सगणरावणवधार्थमेवावतारात् ॥ नत्स्य च मद्गमनेऽसंभ

तौ निराशौ मदर्थं च शोकसंतापकर्षितौ ॥ सह सर्वर्क्षहरिभिस्त्यक्ष्यतः प्राण संग्रहं ॥६०॥ भर्तुर्भक्तिं पुरस्कृ
त्य रामादन्यस्य वानर ॥ नाहं स्प्रष्टुं स्वतो गात्रमिच्छेयं वानरोत्तम ॥६१॥ यदहं गात्रसंस्पर्शं रावणस्य ग
ता बलात् ॥ अनीशा किं करिष्यामि विनाथा विवशा सती ॥६२॥ यदि रामो दशग्रीवमिह हत्वा सराक्षसं ॥
मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥६३॥ श्रुता ह्यदृष्टा हि मया पराक्रमा महात्मनस्तस्य रणावमर्दिन
:॥ न देवगंधर्वभुजंगराक्षसा भवंति रामेण समा हि संयुगे ॥६४॥ समीक्ष्य तं संयति चित्रकार्मुकं महाब
लं वासवतुल्यविक्रमम् ॥ सलक्ष्मणं को विषहेत राघवं हुताशनं दीप्तमिवानलेरितं ॥६५॥ सलक्ष्मणं
राघवमाजिमर्दनं दिशागजं मत्तमिव व्यवस्थितं ॥ सहेत को वानरमुख्य संयुगे युगांतसूर्यप्रतिमं शरार्चि
षं ॥६६॥

वात् एवं च स्वकार्यनिष्पत्त्यागमनाय्यामपि कुर्य्येदिति गूढं ॥६३॥ तादृशबलं च तस्य मया तु विदितमित्याह ॥ श्रुता इति ॥ विश्वामित्रश्रौ
ये रोहताः वालिवधादयश्च श्रुता अन्ये दृष्टाः ॥६४॥ ६५॥ ६६॥

307

॥श्री:०॥
॥९४॥

स्वयनिश्चितं कर्त्तव्यमाह समेइति ॥ सयूथपं ससुग्रीवं उपपादय आनय चिराय चिरकालं शोककर्षितां ॥ रामस्यागमनेन हर्षितां कुरुष्व सम्ल्ल
सकलत्राशेनेति भावः ॥ ६७ ॥ शंचमानः इति रामायणाभिरामे सुंदर० सप्तत्रिंशः सर्गः ॥ ३७ ॥ ॥ तेन वाक्येन सीतयोक्तेन वाक्येन ॥ १ ॥ स्त्रीस्वभा
वस्य भीरुत्वादेः ॥ साध्वीनां पतिव्रतानां । विनयस्य दृनस्य ॥ सदृशं युक्तरूपं ॥ अतिशयेन युक्तं ॥ २ ॥ वचनस्य युक्तरूपतां प्रशंसन्दर्शयति स्त्री ॥

समेकपिश्रेष्ठ सलक्ष्मणं प्रियं सयूथपं क्षिप्रमिहोपपादय ॥ चिराय रामं प्रतिशोककर्षितां कुरुष्व मां वानर हर्षितां
६७ ॥ ॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे सप्तत्रिंशः सर्गः ॥ ३७ ॥ ॥ ततः स कपिशार्दूलस्तेन वाक्येन तोषितः
सीतामुवाच तच्छ्रुत्वा वाक्यं वाक्यविशारदः ॥ १ ॥ युक्तरूपं त्वया देवि भाषितं शुभदर्शने ॥ सदृशं स्त्रीस्वभाव
स्य साध्वीनां विनयस्य च ॥ २ ॥ स्त्रीत्वान्न त्वं समर्थासि सागरं व्यतिवर्त्तितुं ॥ मामधिष्ठाय विस्तीर्णं शतयोजन
मायतं ॥ ३ ॥ द्वितीयं कारणं यच्च ब्रवीषि विनयान्विते ॥ रामादन्यस्य नार्हामि संसर्गमिति जानकि ॥ ४ ॥ एतत्ते देवि
सदृशं पत्न्यास्तस्य महात्मनः ॥ का ह्यन्या त्वामृते देवि ब्रूयाद्वचनमीदृशं ॥ ५ ॥ श्रोष्यते चैव काकुत्स्थः सर्वं निर
वशेषतः ॥ चेष्टितं यत्त्वया देवि भाषितं च ममाग्रतः ॥ ६ ॥ कारणैर्बहुभिर्देवि रामप्रियचिकीर्षया ॥ स्नेहप्रस्कन्न
मनसा मयैतत्समुदीरितं ॥ ७ ॥ लंकाया दुष्प्रवेशत्वाद्दुस्तरत्वान्महोदधेः ॥ सामर्थ्यादात्मनश्चैव मयैतत्समुदी
रितं ॥ ८ ॥

त्वादिति शतयोजनं सागरं व्यतिवर्त्तितुं विस्तीर्णं आनिहत्य करी स्मेपि माम अधिष्ठायेत्यन्वयः स्त्रीत्वं न तु समर्थं हीति पाठे त्वं
स्त्री मर्त्तुं न समर्थं न समर्थेत्यर्थः लिंगव्यत्यय आर्ष इति तीर्थः स्त्रीणां भीरुस्वभावत्वादिति भावः ॥ ३ ॥ ४ ॥ ईदृशं वचनं त्वया सह नयास्वामीत्येत
द्वचनं त्वदितिरेत्वे दृश्यामापदि ईदृशं वचः का ब्रूयात् ॥ ५ ॥ चेष्टितं व्यापारो विलापादिरूपः ॥ ६ ॥ कारणैर्बहुभिरुपपन्नं यत्त्वया मदग्रतो भाषितं
तद्रामाग्रे उपमानगणाकेन मयाईरितं काकुत्स्थो निरवशेषतः श्रोष्यत इत्यन्वयः इति कनक ॥ ७ ॥ रामसमीपे नयनोक्तौ हेतुमाह लंकाया इ

ति रामेण पतिना लंकाया दुष्प्रवेशत्वात् महोदधेर्दुस्तरत्वा
च्चात्मनः सामर्थ्यसत्वाच्च ॥ ८ ॥

॥रा॰ या॰ सुं॰॥
॥९५॥

नु

रक्षा भीमादिसमुद्दीरितेनमयापिशेषः रघुनंदिना रघूंनंदयतीतिनेनरामेणसमानेतुमित्यन्वयः नदपितुरोरामस्यस्नेहेन त्वयिभक्त्या चोक्तं न
तुनिजबलगर्वादित्यर्थः॥८॥यदीति उक्तरीत्याऽयुक्तं त्वमपर्यालोचनयेत्यर्थः॥१०॥एवमुक्ता प्रत्यभिज्ञादेहीत्युक्ता मंदमनुपांशुस्वांतरंतीतं नस्वर

इत्याशिषंसमानेतुमय्येवरघुनंदिना॥गुरुस्नेहेनभक्त्याचनान्यथानतुदारुणम्॥९॥यदिनोत्सहसेयातुंम
यासार्द्धमनिंदिते॥अभिज्ञानंप्रयच्छत्वंजानीयाद्राघवोहियत्॥१०॥एवमुक्ताहनुमतासीतासुरसुतोप
मा॥उवाचवचनंमंदंबाष्पप्रग्रथिताक्षरं॥११॥इदंश्रेष्ठमभिज्ञानंब्रूयास्त्वंतुममप्रियं॥शैलस्यचित्रकूटस्य
पादेपूर्वोत्तरेपदे॥१२॥तापसाश्रमवासिन्याःप्राज्यमूलफलोदके॥तस्मिन्सिद्धाश्रितेदेशेमंदाकिन्याह्यदूरतः
॥१३॥तस्योपवनखंडेषुनानापुष्पसुगंधिषु॥विहृत्यसलिलक्लिन्नाममांकेसमुपाविशः॥१४॥ततोमांस
ससमायुक्तोवायसःपर्यतुंडयत्॥तमहंलोष्टमुद्यम्यवारयामिस्मवायसं॥१५॥श्रीकृष्णनमः॥गोविंदायन
मः॥श्रीहरयेनमः

श्रा

शाजोत्ताष्य॥११॥इदंरहस्यवृत्तांतकथनरूपरहस्यवृत्तांतत्वादेवान्याज्ञातत्वेनश्रेष्ठंतदेवाह॥शैलस्येति॥पूर्वोत्तरेईशानदिक्स्थपादे
प्रत्यंतपर्वतरूपेपदेस्थाने॥१२॥मंदाकिन्याविदूरतः मंदाकिनीसमीपेसिद्धाश्रितेबहुमूलादिमतिदेशेतापसाश्रमवासिन्याममयद्वृ
त्तंतदेवश्रेष्ठमभिज्ञानंत्वंब्रूयाइतिसंबंधः॥१३॥समुपाविशःसमुपविष्टास्मि॥१४॥ततोनंतरंसः त्वदनुभवासिद्धः समायुक्तः विकालाभि
युक्तः सन्पर्यतुंडयन्मांतुंडेनविशेषः यस्ता मांससमायुक्तः मांसलिप्सायुक्तइत्यर्थः॥१५॥श्रीकृष्णायनमः॥श्रीगोविंदायनम
श्रीरामायनमः

308

॥श्री:०॥
॥९५॥

तत्रैव परिलीयते वायसमारेणापि न देशान्तरं गच्छति स्मन च मांसान्मांसविदारणात् भक्षार्थं उपरमत्ययं घयं वस्तुतो न मांसार्थी स्वच्यते तदेवं योज्यं सवाय
सो मांसाद्भक्षार्थी विद्वद्व्याहारः ल्पप्रलोपे पुनः मांसमुपरमत्यम भक्षार्थी वयद्धांसस भोजनेभक्षार्थी च पुनः पुनर्विलेखनान्न विरराम ॥ १६ ॥ अथ पक्षि
रो कुक्षयां मयि रशनां वासोदधुर्यायोत्कर्षयां तदा नीवसनेत्त्वं समानेसति त्वयाहं स्वस्तवसनादृष्टा ततस्त्वया विहसिता तदा तत्परिहासकाले क्रुद्धा
सम्यक् लज्जिता च भक्ष्यगृध्रेण भक्ष्यलुब्धेनैव काकेन दारिता सती त्वामुपागता ॥ १७ ॥ १८ ॥ तदनन्तरं वायसमापसार्य रोगात् श्रान्ताहमासीनस्य ते उत्सं

दारयन्सच मां काकस्तत्रैव परिलीयते ॥ नचाप्युपरमं मांसाद्भक्षार्थी बलिभोजन ॥ १६ ॥ उत्कर्षन्त्यां च रशनां क्रुद्धायां मयि पक्षिणो ॥ त्वं समानेन च व
सनेनत्तो दृष्टा त्वया ह्यहम् ॥ १७ ॥ त्वया विहसिता चाहं क्रुद्धा संलज्जिता तदा ॥ भक्ष्यगृध्रेण काकेन दारिता त्वामुपागता ॥ १८ ॥ ततः श्रान्ताहमुत्संग
मासीनस्य तवाविशं ॥ क्रुध्यन्तीव प्रहृष्टेन त्वयाहं परिसांत्विता ॥ १९ ॥ बाष्पपूर्णमुखी मंदं चक्षुषी परिमार्जती ॥ लक्षिताहं त्वया नाथ वायसेन प्रको
पिता ॥ २० ॥ परिश्रमाच्च सुप्ता हे राघवांकेऽप्यहं चिरं ॥ पर्यायेण प्रसुप्तश्च ममांके भरताग्रज ॥ २१ ॥ स तत्र पुनरेवाथ वायसः समुपागमत् ॥ ततः
सुप्तप्रबुद्धां मां राघवांकात्समुत्थितां ॥ वायसः सहसागम्य विरराद स्तनान्तरे ॥ २२ ॥

॥ गंमाविशं ततः परिहासमात्रं कृत्वा तूष्णीं स्थितेन भवता क्रुध्यं
ती अहं प्रहृष्टेन त्वया परिसांत्विता ॥ १९ ॥ अतएव बाष्पपरिपूर्णमुखी चक्षुषी मंदं परिमार्जती हे नाथ वायसेन प्रकोपितेति त्वया लक्षितास्मि ॥ २० ॥
अथ राघव अहं तवांके परिश्रमात्सुप्तास्मि हे भरताग्रज त्वं च पर्यायेण ममांके सुप्तः ॥ २१ ॥ स तत्रेति त्वयि स्वपति मयि जाग्रत्यामित्यर्थः सुप्तप्रबुद्धां रा
घवांके सुप्त्वा ततः प्रबुद्धां मत एव राघवांकादुत्थितां वायसः पुनरागम्य स्तनान्तरे विरराद व्यलिखत् ॥ २२ ॥ ॥ छ ॥ ॥ छ ॥ ॥

म १

॥रा॰वा॰सु॰॥
॥२६॥

स्तनदंतमभिसानवचनाज्जवादःअथहन्तंतेशेषवृत्तांतकथनंततइति॥२३॥ततःपुनःपुनर्विलेखनात्क्रेतोमुक्तैःशोणितविंदुभिःरामंसमुत्थितेत्यन्तसु
खसुप्तापीतिशेषःतदास्तनयोर्वितुन्नांमांदृष्ट्वाक्रुद्ध॥२४॥अनेनपूर्वपर्यायेकेवलंरामःकाकस्यछायापरिहासमेवकृतवानितिसूचितं॥२५॥वी
क्षमाणइतस्ततःप्रांतदेशमित्यर्थः॥देविकोसावेवंविधोवायसइतिहनूमतःशंकायामाह पुत्रइति॥शक्रपुत्रोजयंतःसतुवायसोवायसरू

६१९

पुनःपुनरथोत्पत्यविदरादसमांभृशं॥ततःसमुत्थितोरामोमुक्तैःशोणितविंदुभिः॥२३॥समांदृष्ट्वामहाबाहुर्वितुन्नांस्तनयोस्तदा॥आ
शीविषइवक्रुद्धश्वसन्वाक्यमभाषत॥२४॥केनतेनागनासोरुविक्षतंवैस्तनांतरं॥कःक्रीडतिसरोषेणपंचवक्त्रेणभोगिना॥वीक्षमाणः
ततस्तंवैवायसंसमवैक्षत॥नखैःसरुधिरैस्तीक्ष्णैर्मामेवाभिमुखंस्थितं॥२६॥पुत्रःकिलसशक्रस्यवायसःपततांवरः॥धरांतरगतः
शीघ्रंपवनस्यगतौसमः॥२७॥ततस्तस्मिन्महाबाहुःकोपसंवर्तितेक्षणः॥वायसेकृतवान्क्रूरांमतिंमतिमतांवरः॥२८॥सदर्भंसंस्तरा
द्गृह्यब्रह्मणोस्त्रेणयोजयेत्॥सदीप्तइवकालाग्निर्जज्वालाभिमुखोद्विजं॥२९॥सतंप्रदीप्तंचिक्षेपदर्भंतंवायसंप्रति॥ततस्तुवायसंद
र्भःसोंबरेनुजगामह॥३०॥अनुसृष्टस्तदाकाकोजगामविविधांगतिं॥त्राणकामइमंलोकंसर्वंवैविचचारह॥३१॥ ॥छ॥ ॥

309

॥राम॰॥
॥२६॥

पवारीत्यर्थःधरांतरगतःभूमिविलंप्राप्तःशीघ्रगतौपवनस्यसमःधरांतरचारित्वंतुपवनादस्यविशेषः॥नहिवायुरन्तःसंचारीतिकतकः॥२७॥
कोपेनसंवर्तितेविवर्तितेईक्षणेयेनसः॥२८॥दर्भंसंस्तरात्संस्तरणार्थंगृहीतदर्भमुष्टेरेकमितिशेषःयोजयत्ब्रह्मास्त्रदेवतामंत्रेणायोजय
दित्यर्थः॥२९॥३०॥विविधांगतिंजगामेत्येतद्विवृणोति॥त्राणेति॥इमंलोकंभूलोकात्सत्यलोकांतंपित्रापरित्यक्तः॥ ॥छ॥ ॥

व २

स्वर्गेणेति शेषः पित्रेत्युपलक्षणं ब्रह्मादीनां ॥ ३२ ॥ पर्यपालयत् ॥ त्राणरक्षणेनेति शेषः ॥ ३३ ॥ परिद्यूनं क्षीणशक्तिं ॥ ब्राह्ममस्त्रं मोघं कर्तुं
न शक्यम् अतस्तदुच्यतां तत्संहार्यं वस्तु भार्गववदुच्यतामित्यर्थः ॥ ३४ ॥ स दक्षिणं अस्य संहार्यं भवत्वित्युक्तः परिरक्षितः परिरक्षितवान्ना
त्मानमिति शेषः ॥ ३५ ॥ सः जयन्तः ॥ ३६ ॥ एवं हनूमते रामैकसंवेद्यमभिज्ञानमुक्त्वा संदेशं तस्माहमत्कृते इति कस्मात्क्षमसे इत्यवांतर

स पित्रा च परित्यक्तः सर्वैश्च परमर्षिभिः ॥ त्रींल्लोकान्संपरिक्रम्य तमेव शरणं गतः ॥ ३२ ॥ स तं निपतितं भू
मौ शरण्यः शरणागतं ॥ वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥ ३३ ॥ परिद्यूनं विवर्णं च पतमानं तम
ब्रवीत् ॥ मोघमस्त्रं न शक्यं तु ब्राह्मं कर्तुं तदुच्यतां ॥ ३४ ॥ ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणं ॥ दत्वा तु
दक्षिणं नेत्रं प्राणेभ्यः परिरक्षितः ॥ ३५ ॥ स रामाय नमस्कृत्वा राज्ञे दशरथाय च ॥ विसृष्टस्तेन वीरेण प्र
तिपेदे स्वमालयं ॥ ३६ ॥ मत्कृते काकमात्रेपि ब्रह्मास्त्रं समुदीरितं ॥ कस्माद्यो माहरत्त्वत्तः क्षमसे तं महीप
ते ॥ ३७ ॥ स कुरुष्व महोत्साहां कृपां मयि नरर्षभ ॥ त्वया नाथवती नाथ अनाथा इव दृश्यते ॥ ३८ ॥ आनृशं व३
स्यं परो धर्मस्त्वत्त एव मया श्रुतं ॥ जानामि त्वां महावीर्यं महोत्साहं महाबलं ॥ ३९ ॥ अपारपारमक्षोभ्यं
गांभीर्यात्सागरोपमं ॥ भर्त्तारं ससमुद्राया धरण्या वासवोपमं ॥ ४० ॥

ध्यावयांते इत्युक्तवतीति ॥ ब्रूहीति वाक्यशेषाद्
ष्टव्य इति केनकः बुद्धिस्थं राममेव सोपालंभं संबोध्य प्रार्थयते इति नीर्थः ॥ त्वत्तस्त्वत्सकाशाद्यो मामाहरत् हृतवान् ॥ ३७ ॥ मम महोत्साह
रूपां मयि कृपां कुरु त्वया नाथवत्या पतिमत्त्वलक्षणा नारी अनाथेव दृश्यते इत्यर्थः ॥ ३८ ॥ आनृशंस्यं दयान्वशक्योयमर्थ इति चेत्तत्राह ॥

जानामीति ॥ ३९ ॥ अपारपारं मर्यादारहितं देशकालादि
परिच्छेदहीनमित्यर्थः जानामीत्यनुषंगः ॥ ४० ॥

॥ रा॰ बा॰ सुं ॥
॥ ९७ ॥

४१ ॥ अथहनूमंतंसामान्यतोरामवैभवमाह ॥ ननागाइति ॥ अतिसमीहितुंअतिभटतनयाप्यस्थित्वानिरोद्धुमित्यर्थः अतिसमाधितुमितिपाठांतरं
नत्रार्षत्वंशरणंउक्तस्यार्थः ॥ ४२ ॥ ममसंभ्रमइतिपाठेमम ॥ ध्याप्रयेसंभ्रमइत्यर्थः ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ कस्माद्राक्षसभयंनकरोतीत्यस्यो

मरे २

एवमस्त्रविदांश्रेष्ठोबलवान्सत्ववानपि ॥ किमर्थमस्त्रंरक्षस्सुनयोजयसिराघव ॥ ४१ ॥ ननागानापिगंधर्वाना
सुरानोमरुद्गणाः ॥ रामस्यसंवेगंशक्ताः अतिसमीहितुम् ॥ ४२ ॥ तस्यवीर्यवतः कच्चिद्यद्यस्तिमयिसंभ्रमः ॥ कि
मर्थंनशरैस्तीक्ष्णैः क्षयंनयतिराक्षसान् ॥ ४३ ॥ भ्रातुरादेशमादायलक्ष्मणोवापरंतपः ॥ कस्यहेतोर्नमांवीर
:परित्रातिमहाबलः ॥ ४४ ॥ यदितौपुरुषव्याघ्रौवाय्विंद्रसमतेजसौ ॥ सुराणामपिदुर्धर्षौकिमर्थंमामुपेक्षत
: ॥ ४५ ॥ ममैवदुष्कृतंकिंचिन्महदस्तिनसंशयः ॥ समर्थावपितौयन्मांनावेक्षेतेपरंतपौ ॥ ४६ ॥ वैदेह्यावचनं
श्रुत्वाकरुणंसाश्रुभाषितं ॥ अथाब्रवीन्महातेजाहनूमान्हरियूथपः ॥ ४७ ॥ त्वच्छोकविमुखोरामोदेविसत्येनते
शपे ॥ रामेदुःखाभिपन्नेतुलक्ष्मणःपरितप्यते ॥ ४८ ॥ कथंचिद्भवतीदृष्टानकालःपरिशोचितुं ॥ इहूर्तंदुःखा
नामंतंद्रक्ष्यसिशोभने ॥ ४९ ॥ तावुभौपुरुषव्याघ्रौराजपुत्रौमहाबलौ ॥ त्वद्दर्शनकृतोत्साहौलोकान्भस्मीकरिष्यतः ॥ ५० ॥

मंमु

त्तरंत्वच्छोकेति ॥ त्वद्वियोगजशोकेनसर्वकार्यविमुखइत्यर्थः ॥ ४८ ॥ यतःकथंचिद्भवतीदृष्टानइमंमुहूर्तमारभ्यतेपरिदेवितुंकालो
नतदुचितकालोनउतनस्तत्राह ॥ यतोदुःखानांअंतंद्रक्ष्यसि ॥ ४९ ॥ ५० ॥ श्रीरामायनमः ॥

310

॥ श्री॰ ॥
॥ ९७ ॥

५१॥नियोगसारं ब्रूहीत्याद ब्रूहीति॥५२॥५३॥ममार्थमन्त्रजितनिधित्वेनेत्यर्थः लक्ष्मणः पूर्वं मारीचवधाय गते रामे नन्दहृगमनाय सम्यक्त
न पारुष्यइति ज्ञात्वा तस्य विमोचनप्रवृत्तुपेक्षामाह्वद्दि जितिविशिष्यकुशलप्रश्नं ब्रूहीत्याह स्वजन्येति दुर्लभमित्यत्रन्यस्केन्यनुकर्षः॥५४॥

हत्वा च समरे क्रूरं रावणं सहबांधवं॥ राघवस्त्वां विशालाक्षि स्वां पुरीं प्रापयिष्यति॥५१॥ ब्रूहि यद्राघवो वाच्यो लक्ष्म
णश्च महाबलः॥ सुग्रीवो वापि तेजस्वी हरयो वा समागताः॥५२॥ इत्युक्तवति तस्मिंश्च सीता पुनरथाब्रवीत्॥ कौ
क३ शल्या लोकभर्त्तारं सुषुवे यं मनस्विनी॥५३॥ तं ममार्थे सुखं पृच्छ शिरसा चाभिवादय॥ स्रजश्च सर्वरत्नानि प्रिया
याश्च वरांगनाः॥५४॥ ऐश्वर्यं च विशालायां पृथिव्यामपि दुर्लभं॥ पितरं मातरं चैव संमान्याभिप्रसाद्य च॥५५॥
अनुप्रव्रजितो रामं सुमित्रा येन सुप्रजा॥ आनुकूल्येन धर्मात्मा त्यक्त्वा सुखमनुत्तमं॥५६॥ अनुगच्छति का
कुत्स्थं भ्रातरं पालयन्वने॥ सिंहस्कंधो महाबाहुर्मनस्वी प्रियदर्शनः॥५७॥ पितृवद्वर्त्तते रामे मातृवन्मां स
माचरत्॥ ह्रीयमाणां तदा वीरो न तु मां वेद लक्ष्मणः॥५८॥ वृद्धोपसेवी लक्ष्मीवान् शक्तो न बहुभाषिता॥ राज

पुत्रः प्रियश्रेष्ठः सदृशः श्वशुरस्य मे॥५९॥

५५॥५६॥५७॥समाचरन्नुपचरन्॥ दुर्वाक्यैरतिपीडां प्राप्यतो वीरो मां क्रियमाणां केनचिद्धरिष्यमाणां वर्त्तमानसामीप्येलट्॥ न वेद यदि
वेदमयि तथा प्रलपंत्यामपि निकटे एव तिष्ठेदतो मृदुरदृष्टवशात्मा वेदीदित्यर्थः॥५८॥ शक्तः समर्थः॥ न बहुभाषिता मितभाषीत्यर्थ
:॥ ६३॥६३॥६३॥ :राजपुत्रस्य रामस्य प्रियेषु श्रेष्ठः अतिप्रिय इत्यर्थः॥५९॥

दू २ यै ०

॥रा०रा०सुं०॥
॥९८॥

तदेवाह॥मत्त इति॥मत्तो पीत्यर्थः॥यस्यां धुरि यत्र कार्ये॥६०॥दृष्टं प्रतीतं पितृवद्दशरथवत्स्मरणाभावः अनुस्मरन् अन्वसरन्॥समाप्यम
स्वयोजनोऽत्यासम्मवचनाद्धक्तव्यः सीतां त्वां कुशलं पृच्छतीति वक्तव्य इत्यर्थः॥६१॥हि निश्चये यथा दुःखक्षयकरो भवेत्॥दुःख
क्षयहेतुप्रयत्नपरो भवेत् तथा वाच्य इत्यनुकर्षः॥६२॥किं बहुनाऽस्य कार्यस्य निर्वाहे त्वं प्रमाणं॥यथा कार्यनिर्वाहो भवति तथा कुर्वि

मत्तः प्रियतरो नित्यं भ्राता रामस्य लक्ष्मणः॥नियुक्तो धुरि यस्यां तु तामुद्वहति वीर्यवान्॥६०॥यं दृष्ट्वा राघवो नैव
वृत्तमार्यमनुस्मरेत्॥स ममार्थाय कुशलं वक्तव्यो वचनान्मम॥६१॥मृदुर्नित्यं शुचिर्दक्षः प्रियो रामस्य लक्ष्मण
ः यथा हि वानरश्रेष्ठ दुःखक्षयकरो भवेत्॥६२॥त्वमस्मिन्कार्यनिर्वाहे प्रमाणं हरियूथप॥राघवस्त्वत्समारं
भान्मयि यत्नपरो भवेत्॥६३॥इदं ब्रूयाश्च मे नाथं शूरं रामं पुनः पुनः॥जीवितं धारयिष्यामि मासं दशर
थात्मज॥६४॥ऊर्ध्वं मासान्न जीवेयं सत्येनाहं ब्रवीमि ते॥रावणेनोपरुद्धां मां निकृत्या पापकर्मणा॥त्रातुम
र्हसि वीर त्वं पातालादिव कौशिकीं॥६५॥

स्यर्थः यत एवं अतो नो राघव इति॥६३॥६४॥ऊर्ध्वं मासादिति॥रावणादन्ताऽवध्य
वशिष्टं किंचिदधिकं मासद्वयमपि न सहिष्य इति भावः न स मासोऽखंडनागमनेऽनार्यो नार्यमेवाचरेदतोऽर्वागेव मरणं ज्यायः
इति शीघ्रमागमनाये व मुक्तिरिति बोध्यं निकृत्या राक्षसीकर्तृकनिग्रहेणोपरुद्धां॥पातालादिव कौशिकी॥पातालसमन्ताभगवा
निव त्रातुमर्हसि। गाङ्गाः सांख्यायनगोत्रवत्॥स्तुः कौशिकीदृष्टान्तः पुरा किल त्वष्टृवधाभिभूतस्येंद्रस्य लक्ष्मीं पातालं प्रविष्टां देवप्रा
र्थितो नारायण उद्धृत्य पुनरिंद्राय प्रायच्छदिति पुराणगाथेति तीर्थः॥६५॥

तिकतकः। कौशिकी २

311

॥श्रीः॥
॥९८॥

चूडामणिंशिरोरत्नं अंगुल्यां योजयामास दधार। चूडामणेरपिधिस्थानहेमगुच्छस्य केशबंधेशार्थं यद्रंध्रं तत्रांगुलिं प्रवेशं मासेत्यर्थः ॥ ६६ ॥ ननु
तदा हनूमतः सूक्ष्मरूपत्वात्तत्र भुजासंजनमेके चित्तमतमाह नेहीति ॥ अस्य भुजः स्वल्पोपि न प्राभवत् ॥ तद्रंध्रेन प्राविशदित्यर्थः ॥
निषेधस्य प्रशक्तिः सूक्ष्मत्वकृत्वाशंके स्थूल [illegible] रूपस्य संभवात् ॥ पूर्वं देव्यै प्रदर्शितं महद्रूपं विहाय सूक्ष्मरूपेणैव स्थित इति गम्यत इ
तीर्थः कनकस्तु अंगुल्यां योजयामास सूक्ष्मवासो बद्धमंगुल्यां दृढं बबंधेत्यर्थः ॥ अस्य बंधने भुजो न प्राभवत् यत्क्तयासर्वानुभवप्रसं
वीरो.

ततो वस्त्रगतं मुक्त्वा दिव्यं चूडामणिं शुभं ॥ प्रदेयो राघवायेति सीता हनुमते ददौ ॥ ६६ ॥ प्रतिगृह्य ततोँ मणिरत्न
मनुत्तमं ॥ अंगुल्या योजयामास नह्यस्य प्राभवद्भुजः ॥ ६७ ॥ मणिरत्नं कपिवरः प्रतिगृह्याभिवाद्य च ॥ सीतां
प्रदक्षिणं कृत्वा प्रणतः पार्श्वतः स्थितः ॥ ६८ ॥ हर्षेण महता युक्तः सीतादर्शनजेन सः ॥ हृदयेन गतो रामं लक्ष्म
णं च सलक्षणं ॥ ६९ ॥ मणिवरमुपगृह्य तं महार्हं जनकनृपात्मजया धृतं प्रभावात् ॥ गिरिरिव पवनावधूत
मुक्तः सुखितमनाः प्रतिसंक्रमं प्रपेदे ॥ ७० ॥ ॥ इत्यार्षे श्रीमद्रामायणे वा० सुंदरकांडे ऽष्टत्रिंशः सर्गः ॥ ३८ ॥

गात् ॥ गोपनीयत्वाच्च ॥ भुजो नोचितोऽभूदित्यर्थ इत्याह ॥ ६७ ॥ पार्श्वतः स्थितः सीतासमीपे स्थितः ॥ ६८ ॥ ६९ ॥ महार्हं बहुमूल्यं प्रभावात् यत्न
तया विशेषात् राक्षसीभिर्यथा न ज्ञायते तथा धृतं गिरिवरपवनावधूतमुक्तः पर्वतश्रेष्ठोर्ध्वभागीयपवनकंपितः पश्चात्तेन कंपेन मुक्तः स
इव सुखितमनाः [illegible] मपि पूर्वं सीतायाः अदर्शनेन दुःखवशात्कंपितस्तद्दर्शनेन ततः कंपान्मुक्तोतः सुखितमनाः प्रतिसंक्रमं तेनैकादुर्गप्र
कारं प्रान्तं प्रपेदे यत्नमारभतेत्यर्थः ॥ ७० ॥ नाकमानः ॥ इति रामाभिरामे श्रीरा० सुं० अष्टत्रिं
शः सर्गः ॥ ३८

॥ रा॰ वा॰ सुं॰ ॥
॥ ९९ ॥

रामस्याभिज्ञानं रामेणाभिज्ञानमित्यर्थः ॥ त्रयाणां संस्मरिष्यति कर्मणि षष्ठी ॥ सीताह । जनन्या इति ॥ अयं मणिर्विवाहकाले मज्जनन्या हस्ता
न्मम पित्रा दायदशरथहस्ते मम शिरोभूषणतया दत्त इति मम जनन्याश्च मम पितुर्दशरथस्य चेति त्रयाणां स्मारक इति भावः ॥ स त्वमस्मि
न्समुत्साहे भूयः प्रश्नोदितो भविष्यसि तदत्र कार्यसमुत्साहे प्रचोदितः सन्नयदुत्तरं उत्तरकर्तव्यं तच्चिंतय ॥ मम काचिंतनेशान्किं रतिचेत्तत्रा

मणिं दत्वा ततः सीता हनूमंतमथाब्रवीत् ॥ अभिज्ञानमभिज्ञानमेतद्रामस्य तत्वतः ॥ १ ॥ मणिं दृष्ट्वा तु रामो वै त्र-
याणां संस्मरिष्यति ॥ वीरो जनन्या मम च राज्ञो दशरथस्य च ॥ २ ॥ स भूयस्त्वं समुत्साहे चोदितो हरिसत्तम ॥ अ-
म३ स्मिन्कार्यसमुत्साहे प्रचिंतय यदुत्तरं ॥ ३ ॥ त्वमस्मिन्कार्यनिर्योगे प्रमाणं हरिसत्तम ॥ तस्य चिंतयतो यत्नो
दुःखक्षयकरो भवेत् ॥ ४ ॥ हनूमन्यत्नमास्थाय दुःखक्षयकरो भव ॥ स तथेति प्रतिज्ञाय मारुतिर्भीमवि-
क्रमः ॥ ५ ॥ शिरसा वंद्य वैदेहीं गमनायोपचक्रमे ॥ ज्ञात्वा संप्रस्थितं देवी वानरं पवनात्मजं ॥ ६ ॥ बाष्पग-
द्गदया वाचा मैथिली वाक्यमब्रवीत् ॥ हनुमन्कुशलं ब्रूयाः सहितौ रामलक्ष्मणौ ॥ ७ ॥ सुग्रीवं च सहामात्यं
सर्वान्वृद्धांश्च वानरान् ॥ ब्रूयास्त्वं वानरश्रेष्ठ कुशलं धर्मसंहितं ॥ ८ ॥ यथा च स महाबाहुर्मां तारयति राघवः
अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि ॥ ९ ॥ जीवंती मां यथा रामः संभावयति कीर्तिमान् ॥ तत्त्वया ह-
नुमन्वाच्यं वाचा धर्ममवाप्नुहि ॥ १० ॥ नित्यमुत्साहयुक्तस्य वाचः श्रुत्वा मयेरिताः ॥ वर्धिष्यते दाशरथेः पौरुषं मद-

हत्वमिति ॥ निर्योगो निर्वाहः यत्नस्य रामस्य यत्नो दुःखक्षयकरो भवेत्तं चिंतय ॥ ४ ॥ यत्नमास्थायेति ॥ यत्नं रामप्रवर्तनमित्यर्थः ॥ ५ ॥ ६ ॥
७ ॥ ८ ॥ अंबूनि संरुध्यंते यस्मिन्निति संबुसंरोधः समुद्रः दुःखरूपात्समुद्रादित्यर्थः यथा तारयति ॥ तथा समाधातुं यत्नं कर्तुं ॥ ९ ॥ वाचा वाक्

312

॥ श्री॰ ॥
॥ ९९ ॥

मु १

उक्तमेवआदरायपुनराह मत्संदेशयुताइति ॥ १२ ॥ १३ ॥ १४ ॥ बमतोबाणान्विसृजत इत्यर्थ ॥ १५ ॥ पर्जन्यइंद्रः ॥ १६ ॥ महींसाधितुमर्हति जेतुंशक्त इत्यर्थः किमर्थंत
त्राह त्वन्निमित्तइतित्वत्प्राप्तिप्रयोजनइत्यर्थ ॥ १७ ॥ १८ ॥ भर्तृस्नेहान्वितंरामस्नेहान्वितंवाक्यंहनूमद्वाक्यंसौहार्दार्द्रमप्रेम्णाअनुमानयत्अपूजयत् ॥ १९ ॥

मत्संदेशयुतावाचस्त्वत्तःश्रुत्वैवराघवः ॥ पराक्रमेमतिंवीरोविधिवत्संविधास्यति ॥ १२ ॥ सीतायास्तद्वचःश्रुत्वाहनूमान्मारुतात्मजः ॥ शिरस्यं
जलिमाधायवाक्यमुत्तरमब्रवीत् ॥ १३ ॥ क्षिप्रमेष्यतिकाकुत्स्थोहर्यृक्षप्रवरैर्वृतः ॥ यस्तेयुधिविजित्यारीन्शोकंव्यपनयिष्यति ॥ १४ ॥ नहि
पश्यामिमर्त्येषुनासुरेषुसुरेषुवा ॥ यस्तस्यवमतोबाणान्स्थातुमुत्सहतेयतः ॥ १५ ॥ अप्यर्कमपिपर्जन्यमपिवैवस्वतंयमं ॥ सहिसोढुंरणे
शक्तस्तवहेतोर्विशेषतः ॥ १६ ॥ सहिसागरपर्यंतांमहींसाधितुमर्हति ॥ त्वन्निमित्तोहिरामस्यजयोजनकनंदिनि ॥ १७ ॥ तस्यतद्वचनंश्रुत्वास
म्यक्सत्यंसुभाषितं ॥ जानकीबहुमेनेतंवचनंचेदमब्रवीत् ॥ १८ ॥ ततस्तंप्रस्थितंसीतावीक्षमाणापुनःपुनः ॥ भर्तृस्नेहान्वितंवाक्यंसौहार्दनु दृ ५
मानयत् ॥ १९ ॥ यदिवामन्यसेवीरवसैकाहमरिंदम ॥ कस्मिंश्चित्संवृतेदेशेविश्रांतःश्वोगमिष्यसि ॥ २० ॥ ममचैवाल्पभाग्यायाःसान्निध्यात्तव
वानर ॥ अस्यशोकस्यमहतोमुहूर्तंमोक्षणंभवेत् ॥ २१ ॥ ततोहिहरिशार्दूलपुनरागमनायतु ॥ प्राणानामपिसंदेहोममस्यान्नात्रसंशयः ॥ २२ ॥
तवादर्शनजःशोकोभूयोमांपरितापयेत् ॥ दुःखाद्दुःखपराम्रष्टांदीपयवृवानर ॥ २३ ॥

॥ २० ॥ मोक्षणंभवेत् अद्यस्थित्वाश्वोगमनेइतिशेषः ॥
न्नि
२१ ॥ ततोहीति ॥ ततोपीत्यर्थःएकाहवासोत्तरंगमनेपिपुनरागमनायतुसंदेहएव तत्संदेहेसतिममप्राणानामपिसंदेहएव ॥ २२ ॥ तदाहतवेति ॥ त
थाचमज्जीवनमसंभावितमेवपुनरनागमनेइतिभावःदुःखाद्दुःखपराम्रष्टाअतिदुःखप्राप्तांदीपनेकर्त्रीशोकः ॥ २३ ॥ ॥ श्री ॥ ॥

सैन्यानिकथंतरिष्यंतीति २

त २

अयंसंदेहोममाग्रतः पुरस्तादिवतिष्ठति कोयंतत्राह त्वत्सहायेष्विति साक्षात्साधकस्यतवसहायभूते अभिमिलिते प्रहर्यक्षे प्रहरीश्वरःसुग्रीवः॥२४॥ कथंनु
दधिंतरिष्यंतिसैन्यावाकथंतरिष्यंतीत्यर्थः॥२५॥ एवंसंदेहेवीजमाहत्वयाराममेवेति॥२६॥ किंसमाधानंपश्यसिकंकार्यसिद्ध्युपायंपश्यसि॥२७॥ ननुकिंतेराग

म ३

अयंचवीरसंदेहस्तिष्ठतीवममाग्रतः॥ सुमहांस्त्वत्सहायेषुहर्यक्षेषुहरीश्वर॥२४॥ कथंनुखलुदुष्पारंतरिष्यंतिमहोदधिं॥ तानिहर्यक्षसैन्यानितौ
वानरवरात्मजौ॥२५॥ त्वयारामेवभूतानांसागरस्येहलंघने॥ शक्तिःस्याद्वैनतेयस्यतववामारुतस्यवा॥२६॥ तदस्मिन्कार्यनिर्योगेवीरैवंदुर
तिक्रमे॥ किंपश्यसेसमाधानंत्वंहिकार्यविदांवरः॥२७॥ कामस्यत्वमेवैकःकार्यस्यपरिसाधने॥ पर्याप्तःपरवीरघ्नयशस्यस्तेफलोदयः॥२८॥ वलैः
समग्रैर्यदिमांरावणंजित्वासंयुगे॥ विजयीस्वपुरंयायात्तत्तस्यसदृशंभवेत्॥२९॥ वलैस्तुसंकुलांकृत्वालंकांपरवलार्दनः॥ मांनयेद्यदिकाकुत्स्थस्तः
त्तस्यसदृशंभवेत्॥३०॥ तद्यथातस्यविक्रांतमनुरूपंमहात्मनः॥ भवेदाहवशूरस्यतथात्वमुपपादय॥३१॥ तदर्थोपहितंवाक्यंप्रश्रितंहेतुसंहितं
निशम्यहनूमान्शेषंवाक्यमुत्तरमब्रवीत्॥३२॥ देविहर्यक्षसैन्यानामीश्वरःप्लवतांवरः॥ सुग्रीवःसत्त्वसंपन्नस्तवार्थेकृतनिश्चयः॥३३॥ सवानरसह
स्राणांकोटीभिरभिसंवृतः॥ क्षिप्रमेष्यतिवैदेहीराक्षसानांनिवर्हणः॥३४॥ तस्यविक्रमसंपन्नाःसत्त्ववंतोमहावलाः॥ मनःसंकल्पसंपातानिदेशेहरयः

क्रमेतिमनःसंकल्पवदतिद्रुतपतनशीला॥३५॥

तैरहमेवपर्याप्तोस्यकार्यस्येत्यत्राह काममिति॥ त्वयाकार्यसाधनेनतवयशस्योयशस्करःफलोदयोजयरूपफलप्राप्तिर्भवतितत्तुरामस्येत्यर्थः॥२८॥ किंत
दुचितंतत्राह॥ वलैरिति समग्रैःवलैःसहागत्यरावणंसंयुगेजित्वाविजयीसन्मांगृहीत्वायायात्तत्तस्यरामस्यसदृशंभवेत्॥२९॥ आदरात्पुनराह॥ वलैस्त्वितिविक्रां
तंपराक्रमः॥३१॥ तदुक्तंसीतावाक्यंप्रश्रयःस्नेहः॥ पंक्तिश्लिष्टप्रकृतिरुत्तरवाक्यमब्रवीत्॥३२॥ तदेववाक्यमाहदेवीति॥३३॥३४॥ कथमेष्यतीत्यत्राहतस्यवि

शं २

तदेवस्पष्टमाह· येषामिति· नसज्जते नप्रतिबद्धाभवति ॥३६॥ सागरैर्धराधरैश्चसहितैं ॥३७॥ प्रत्यवरोहीनवलपराक्रमः ॥३८॥ अहंतदपेक्षयान्यूनवलोपीत्यर्थः तेषांस्वाधिकवलत्वंलोकन्यायेनदृढंवोधयतिनहीति ॥३९॥ एकोत्पातेन·एकोत्प्लवनेन ॥४०॥ ननुभवत्वेवंहरीणामागमनंराघव

येषांनोपरिनाधस्तान्नतिर्यक्सज्जतेगतिः ॥ नचकर्मसुसीदंतिमहत्स्वमिततेजसः ॥३६॥ असकृत्तैर्महोत्साहैः ससागरधराधरा ॥ प्रदक्षिणी
कृताभूमिर्वायुमार्गानुसारिभिः ॥३७॥ मद्विशिष्टाश्चतुल्याश्चसंतितत्रवलोकसः ॥ मत्तःप्रत्यवरःकश्चिन्नास्तिसुग्रीवसन्निधौ ॥३८॥ अहं
तावदिहप्राप्तः किंपुनस्तेमहावलाः ॥ नहिप्रकृष्टाःप्रेष्यंतेप्रेष्यंतेहीतरेजनाः ॥३९॥ तदलंपरितापेनदेविशोकोव्यपैतुते ॥ एकोत्पातेनतेलंकामेष्यं
तिहरियूथपाः ॥४०॥ ममपृष्ठगतौतौचचंद्रसूर्याविवोदितौ ॥ त्वत्सकाशंमहासंघौनृसिंहावागमिष्यतः ॥४१॥ तौहिवीरौनरवरौसहितौरामल
क्ष्मणौ ॥ आगम्यनगरींलंकांसायकैर्विधमिष्यतः ॥४२॥ सगणंरावणंहत्वाराघवोरघुनंदनः ॥ त्वामादायवरारोहेस्वपुरींप्रतियास्यति ॥४३॥
तदाश्वसिहिभद्रंतेभवत्वंकालकांक्षिणी ॥ नचिराद्रक्ष्यसेरामंप्रज्वलंतमिवानलं ॥४४॥ निहतेराक्षसेंद्रेचसपुत्रामात्यवांधवे ॥ त्वंसमेष्य
सिरामेणशशांकेनवरोहिणी ॥४५॥ क्षिप्रंत्वंदेविशोकस्यपारंद्रक्ष्यसिमैथिली ॥ रावणंचैवरामेणद्रक्ष्यसेनिहतंवलात् ॥४६॥ एवमाश्वास्य
वैदेहीहनूमान्मारुतात्मजः ॥ गमनायमतिंकृत्वावैदेहींपुनरब्रवीत् ॥४७॥ तमरिघ्नंकृतात्मानंक्षिप्रंद्रक्ष्यसिराघवं ॥ लक्ष्मणंचधनुष्पाणिंलं
काद्वारमुपागतं ॥४८॥ नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान् ॥ वानरान्वानरेंद्राभान्क्षिप्रंद्रक्ष्यसिसंगतान् ॥४९॥

॥योः कथंतत्राह मसेति·
महासंघौमहासमुदाययुक्तौ ॥४१॥ ४२ ॥ रघूणामानंदजनकमपत्यं ॥४३॥ कालकांक्षिणी ॥ दिवसगणनतत्परा ॥४४॥४५॥४६॥४७॥४८॥४९॥

यूथान्यनेकशः द्रक्ष्यसीतिशेषः॥५०॥रामस्यसर्वथान्वग्ताप्तिर्विनैवास्तेइत्याह सन्निति॥५१॥५२॥सौमित्रिरामसमःकश्चित्कोपिनास्तीतिशेषः॥५३॥मत्सं
गमकालमात्रं॥मयारामस्ययःसंगमस्तत्कालमात्रंप्रतीक्षस्वेत्यर्थः॥५४॥इतिरामाभिरामेश्रीरा॰सुंद॰एकोनच॰॥ ३९॥आत्महितः आत्मदुः
खोद्धारप्रयोजनं॥१॥अर्धसंजातानिअर्धवयःप्राप्तानिततःपरंजलाभावादासतत्रशोषाणिसस्यानियस्याःसायथादैवात्संपन्नसस्याभवतितथाह

शैलांबुदनिकाशानांलंकामलयसानुषु॥नर्दतांकपिमुख्यानामार्येयूथान्यनेकशः॥५०॥सतुमर्मणिघोरेणताडितोमन्मथेषुणा॥नश
र्मलभतेरामःसिंहार्दितइवद्विपः॥५१॥रुदमादेविशोकेनमाभूत्तेमनसोभयं॥शचीवभर्त्राशक्रेणसंगमिष्यसिशोभने॥५२॥रामाद्वि
शिष्टःकोन्योस्तिकश्चित्सौमित्रिणासमः॥अग्निमारुतकल्पौतौभ्रातरौतवसंश्रयौ॥५३॥नास्मिंश्चिरंवत्स्यसिदेविदेशेरक्षोगणैरध्यु
षितेतिरौद्रे॥नतेचिरादागमनंप्रियस्यक्षमस्वमत्संगमकालमात्रं॥५४॥इत्यार्षेश्रीमद्रामायणेवा॰सुंदरकांडेएकोनचत्वारिं
शःसर्गः॥३९॥श्रुत्वातुवचनंतस्यवायुसूनोर्महात्मनः॥उवाचात्महितंवाक्यंसीतासुरसुतोपमा॥१॥तांदृष्ट्वाप्रियवक्तारंसंप्रहृ
ष्टामिवानरं॥अर्धसंजातसस्येववृष्टिंप्राप्यवसुंधरा॥२॥यथातंपुरुषव्याघ्रंगात्रैःशोकाभिकर्षितैः॥संस्पृशेयंसकामाहंतथा
कुरुदयांमयि॥३॥अभिज्ञानंचरामस्यदद्याहरिगणोत्तम॥क्षिप्तामिषीकांकाकस्यकोपादेकाक्षिनाशिनीं॥४॥ छ॥

मपिप्राप्तजीवितनाशाऽमृतोपमात्वद्दर्शनाद्धृतजीवितेतिभावः॥२॥सकामातत्स्पर्शेच्छावती॥३॥अभिज्ञानंचूडामण्यात्मकंदद्याःदेहि
तथाकोपात्काकस्यैकाक्षिशातनीमिषीकांक्षिप्त्वाकाकोरक्षितइत्यपरमभिज्ञानंदद्याःश्रावयेत्यर्थः॥४॥ छ॥ छ॥

पे २

अथाभिज्ञानानंतरमाह· संदेशरूपं मनःशिलाया इति· पूर्वंनेत्रतिलकेनष्टेसतित्वयारामेणममगंडुपार्श्वेमनःशिलातिलकोनिवेशितः तंकिलस्वकृत
तिलकमित्यर्थःस्मर्तुमर्हसि· इतिमयोक्तमितिब्रूहीतिशेषः॥५॥ अथकेवलसंदेशांतरमाह· सवीर्यवानिति· अनुमन्यसेमहसेइत्यर्थः॥६॥ दिव्य
एषचूडामणिरेतावत्कालमुपरिरक्षितः एतंव्यसनेत्वामिवदृष्ट्वाप्रहृष्यामि एतत्संनिधानेरक्षोभिभवासंभवादितिभावः॥७॥ सएषनिर्यातितो

मनःशिलायास्तिलकोगंडुपार्श्वेनिवेशितः।त्वयाप्रनष्टेतिलकेतंकिलस्मर्तुमर्हसि॥५॥ सवीर्यवान्कथंसीतांहृतांसमनुमन्यसे।वसंतींरक्षसांम
ध्येमहेंद्रवरुणोपम॥६॥ एषचूडामणिर्दिव्योमयासंपरिरक्षितः॥ एतंदृष्ट्वाप्रहृष्यामिव्यसनेत्वामिवानघ॥७॥ एषनिर्यातितःश्रीमान्मया
तेवारिसंभवः। अतःपरंनशक्ष्यामिजीवितुंशोकलालसा॥८॥ असह्यानिचदुःखानिवाचश्चहृदयच्छिदः।राक्षसैःसहसंवासंत्वत्कृतेमर्षया
म्यहं॥९॥ धारयिष्यामिमासंतुजीवितंशत्रुसूदन।मासादूर्ध्वंनजीविष्येत्वयाहीनानृपात्मज॥१०॥ घोरोराक्षसराजोयंदृष्टिश्चनसुखाम
यि।त्वांचश्रुत्वाविषज्जंतंनजीवेयमपिक्षणं॥११॥ वैदेह्यावचनंश्रुत्वाकरुणंसाश्रुभाषितं।अथाब्रवीन्महातेजाहनूमान्मारुतात्मजः॥१२॥
त्वच्छोकविमुखोरामोदेविसत्येनतेशपे। रामेशोकाभिभूतेतुलक्ष्मणःपरितप्यते॥१३॥ ((दत्तस्त्वन्मयाभिज्ञानार्थमितिशेषः अतःशीघ्रागमनेए

वकुशलमन्यथापरमंदुःखमितिभावः॥८॥ त्वत्कृतेत्वत्प्राप्तिप्रत्याशयामर्षयामिसहामि॥९॥१०॥ यतोयंघोरस्तस्यदृष्टिश्चवाग्दृष्टिश्चनसुखाअवधि
कालादूर्ध्वंत्वत्कृतविनाशश्रद्धयाअतस्तत्पूर्वमेवमरणोचितत्वादवधिकालस्याधिकत्वेपिमासादूर्ध्वमेवनजीविष्यामि॥ किंचत्वांविषज्जंतंविलंबंकुर्वंतंयदिशृ
णुयांतदातथाश्रुत्वामासादर्वागेवक्षणमपिनजीवेयमित्युक्तमितिब्रूहीतिशेषः॥११॥ वचनमुक्तसंदेशरूपं॥१२॥ त्वच्छोकविमुखःत्वत्स्थितस्थानपरिज्ञान

जशोकेनत्वदुद्धारप्रवृत्तिविमुखःनतुज्ञात्वेतिसत्येनतेशपे॥१३॥

॥रा॰वा॰सुं॰॥
॥१०२॥

कथंचिद्भवतीदृष्टाअनःपरंशोचितुंनकालःइमंमुहूर्तंअस्मिन्चिरकालेइत्यर्थः॥१४॥१५॥यदि॥यत्तेभिज्ञानंरामस्यैवविशिष्यजानीयाइत्यत्रतस्यप्रीतिसंजननं
नभूयःपुनरधिकंचदातुमर्हसि॥१७॥१८॥श्रद्धेयंविश्वसनीयं॥१९॥उमातेउत्प्लवनेकृतोत्साहः॥२०॥२१॥अनामयमारोग्यं॥२२॥त्वंसमाधातुमित्यः

दृष्टाकथंचिद्भवतीनकालःपरिदेवितुं॥इमंमुहूर्तंदुःखानामंतंद्रक्ष्यसिभामिनि॥१४॥तावुभौपुरुषव्याघ्रौराजपुत्रावनिंदितौ॥त्वद्दर्शनकृतो
त्साहौलंकांभस्मीकरिष्यतः॥१५॥हत्वातुसमरेरक्षोरावणंसहबांधवैः॥राघवस्त्वांविशालाक्षिस्वांपुरींप्रापयिष्यतः॥१६॥यत्तुरामोविजानी
यादभिज्ञानमनिंदिते॥प्रीतिसंजननंभूयस्तस्यत्वंदातुमर्हसि॥१७॥साब्रवीद्दत्तमेवाहंमयाभिज्ञानमुत्तमं॥एतदेवहिरामस्यदृष्ट्वायत्ने
नभूषणं॥१८॥श्रद्धेयंहनुमन्वाक्यंतववीरभविष्यति॥सतंमणिवरंगृह्यश्रीमान्प्लवगसत्तमः॥१९॥प्रणम्यशिरसादेवींगमना
योपचक्रमे॥तमुत्पातकृतोत्साहमवेक्ष्यहरियूथपं॥२०॥वर्धमानंमहावेगमुवाचजनकात्मजा॥अश्रुपूर्णमुखीदीनाबाष्पगद्गदयागिरा॥२१॥
हनूमन्सिंहसंकाशौभ्रातरौरामलक्ष्मणौ॥सुग्रीवंचसहामात्यंसर्वान्ब्रूयाअनामयम॥२२॥यथाचसमहाबाहुर्मांतारयतिराघवः॥अस्मान्दुःखांबुसं
रोधात्त्वंसमाधातुमर्हसि॥२३॥इदंचतीव्रंममशोकवेगंरक्षोभिरेभिःपरिभर्त्सनंच॥ब्रूयास्तुरामस्यगतःसमीपंशिवश्चतेध्वास्तुहरिप्रवीर॥२४॥
सराजपुत्र्याप्रतिवेदितार्थःकपिःकृतार्थःपरिहृष्टचेताः॥तदल्पशेषंप्रसमीक्ष्यकार्यंदिशंह्युदीचींमनसाजगाम॥२५॥ ॥ छ ॥ ॥

स्मनथेत्यादिःसमाधानंसंविधानं॥अथापिसमहाबाहुरितिपाठेयद्यन्यापिसुग्रीवसेनाद्यपिपुनस्त्वांमःस्वयमेवयनिष्यति अथापितथापित्वम
पियथामांशीघ्रंतारयतितथासंविधानंकर्तव्यमित्यर्थः॥२३॥२४॥तत्कार्यंतत्कालगमनप्रयोजनं॥अल्पशेषंदेवीदर्शनरूपस्यमहतःप्रधानकृत्यस्यनिष्पन्नत्वा
त्तं

न्यत्सकलदर्शनरूपस्यानुषंगिकत्वादल्पशेषत्वमित्याशयः॥२५॥

॥राम॰॥
॥१०२॥

315

६१

मित्रमानः इति रामाभिरामे सुंद० चत्वारिं० ॥४०॥ तस्माद्देशादपाक्रम्य सनीतासमीपात्किंचिद्दूरं गत्वा चिंतयामासेत्युक्तां चिंतां दर्शयति अल्पशेषमिति इयं सीताद
ष्टेति इदं प्रधानकार्यं निष्पन्नमिति आनुषंगिकं परबलदर्शनमवशिष्टमित्यल्पशेषत्वं इह कार्ये परबलज्ञानलक्षणे त्रीनुपायान् सामादीनतिक्रम्य चतुर्थो
दंड एव साधनत्वेन दृश्यते ॥१।२॥ तत्र युक्तिमाह नेति क्षुद्रेषु सामफलायन भूरेषु तदाह रक्षःस्विति बलदर्पिता भेदसाध्या न भेद उपजायः बलवंतो हि कृतो
प्यनिष्टं नगणयंतीत्यर्थः ॥३॥ अस्य कार्यस्य परबलाशयपरिज्ञानरूपस्य सर्वातिशायिपराक्रमवतो मम पराजय एव नास्तीत्याशयेनाह पराक्रमादृते

इत्यार्षे श्रीमद्रामायणे सुंद० चत्वारिंशः सर्गः ॥४०॥ स च वाग्भिः प्रशस्ताभिर्गमिष्यन्पूजितस्तया ॥ तस्माद्देशादपाक्रम्य चिंतयामास वानरः ॥१॥
अल्पशेषमिदं कार्यं दृष्टेयमसितेक्षणा ॥ त्रीनुपायानतिक्रम्य चतुर्थ इह दृश्यते ॥२॥ न साम रक्षःसु गुणाय कल्पते न दानमर्थोपचितेषु युज्यते ॥ न
भेदसाध्या बलदर्पिता जनाः पराक्रमस्त्वेष ममेह रोचते ॥३॥ न चास्य कार्यस्य पराक्रमादृते विनिश्चयः कश्चिदिहोपपद्यते ॥ हतप्रवीराश्चरणो
नु राक्षसाः कथंचिदीयुर्यदिहाद्य मार्दवं ॥४॥ कार्ये कर्मणि निर्दिष्टे यो बहून्यपि साधयेत् ॥ पूर्वकार्याविरोधेन स कार्यं कर्तुमर्हति ॥५॥ छ

इति विनिश्चयः निश्चितोपायः स्वबलप्रकाशने प्रयोजनांतरमप्यस्तीत्याह हतेति आद्य हताः प्रवीराः श्रेष्ठाः येषां ते राक्षसाः यस्मात् इह भावि निरसो
मार्दवं एकेनैवैवं पराक्रमः कृतस्मादृशैरनेकैः कथमस्माकं जयाशेति रणप्रवृत्तिराहित्यं प्राप्नुयुः अतः पराक्रमात्परबलस्य मनोभंगरूपं कार्यं सिध्यतीत्या
शयः ॥४॥ ननु स्वामिसंदिष्टकार्यातिरिक्तकार्यकरणे दोषः स्वामिना हि अभिगम्य तु वैदेहीं निलयं रावणस्य मे तावदेव संदिष्टमित्याशंक्य संदिष्टकार्या
विरोधेन स्वामिहितकार्यांतरसाधनं हि तस्यालंकार इत्याह कार्येति कार्ये प्रधानकार्ये निर्दिष्टे स कार्यं कर्तुमर्हति ॥ ननु संदिष्टमात्रस्य कथंचित्साधक इत्याशयः ॥५॥

उक्तमेवविवृणोति·नहीति·यस्तुस्वल्पस्यापिकर्मणाअतिशयितयत्नेनसिद्धिहेतुर्भवति असावेकोऽसुरकः·साधकोहेतुर्नभवति·अपितुयोऽस्यार्थंप्रयोजनमत्यंतय
त्नेनबहुधाकर्तुंवेदसएवार्थसाधनेसमर्थः ॥६॥ तस्मादन्यदपिस्वाम्यभीष्टंकृत्वैवगंतव्यमित्याह· यद्यप्यहंइहैवसीतान्वेषणाएवतावत्प्रथमंकृतनिश्च
यस्तथापियदिपरात्मसंमर्दविशेषतत्त्ववित्·परस्यात्मनःस्वस्यचसंमर्देयुद्धेयोविशेषस्तत्तत्त्ववित्भूत्वायदिप्लवगेश्वरालयंसुग्रीवालयंव्रजेयंततस्तदाभ
र्तृशासनंसम्यक्कृतंस्यात्·अन्यथाराक्षसबलंकीदृशमितिपृष्टेनिरुत्तरःस्यामितिभावः ॥७॥ एवंनिश्चितार्थोयुद्धप्रवृत्तिप्रकारंचिंतयति·कथंन्विति

नह्येकःसाधकोहेतुःस्वल्पस्यापीहकर्मणः। योह्यर्थंबहुधावेदससमर्थोऽर्थसाधने ॥६॥ इहैवतावत्कृतनिश्चयोह्यहंव्रजेयमद्यप्लवगेश्वरालयं ॥ प
रात्मसंमर्दविशेषतत्त्ववित्ततःकृतंस्यान्ममभर्तृशासनं ॥७॥ कथंनुखल्वद्यभवेत्सुखागतंप्रसह्ययुद्धंममराक्षसैःसह। तथैवखल्वात्मब
लंचसारवत्संमानयेन्मांचरणेदशाननः ॥८॥ ततःसमासाद्यरणेदशाननंसमंत्रिवर्गंसबलंसयायिनं। हृदिस्थितंतस्यमतंबलंचसुखेनम
त्वाहमितःपुनर्व्रजे ॥९॥ इदमस्यनृशंसस्यनंदनोपममुत्तमं। वनंनेत्रमनःकांतंनानाद्रुमलतायुतं ॥१०॥

॥अद्यखलुमेइहागतमागमनंसुखागतंसु
खफलकमागमनंकथंभवेत्·तथाराक्षसैःसहप्रसह्यस्वयमेवबलात्कृत्ययुद्धंचकथंममभवेत्तथातथैवकरणोसतिसारवदूर्जितंस्वबलंमांचसदशानन
ःकथंमानयेत्श्लाघयेत्·यद्वातथैवखलुयुद्धकरणोखलुदशाननःआत्मबलंमांचसारवत्संमानयेत्सम्यक्परिछिद्यादित्यर्थेनयुद्धफलमुक्तं ॥८॥ त
तोमद्बलवशादेवमांरणोसमासाद्यवर्तमानंसबलंसयायिनंससारथिंअनभीवितरामथ्याघातेशिनैर्यायायिनायासीतासारथिस्तेनसहितंरावणंज्ञात्वा
हृदिस्थितंतस्यमतमभीष्टंबलंचसुखेनअक्लेशेनमत्वापुनरितोव्रजेव्रजिष्येसबलंसयायिनमितिपाठःसबलप्रयायिनमित्याधुनिककल्पितःपाठः ॥९॥ अथ
प्रसह्यरणप्रवृत्तेनोपायंविरुन्ध्यति·इदमिति·अस्येदंवनंनेत्रमनःकां
तंभवतिअतइदंविध्वंसयामि ॥१०॥

316

११ समानेष्यतिमांप्रतियुद्धायप्रापयिष्यतिमहद्युद्धंमन्मनस्तोषकृत् ॥ १२ ॥ ततोहरीश्वरालयंगमिष्यामीतिचिंतयामासेत्यन्वयः ॥ १३ ॥ ततः एवंनिश्चयानंतरं ॥
१४ ॥ १५ ॥ पर्वताग्रैःक्रीडापर्वताग्रैःउपलक्षितामितिशेषः ॥ १६ ॥ १७ ॥ व्याकुलंत्रस्तमावरणंयासांताअतएवविह्वलास्त्रियइवतालतारेजुः ॥ १८ ॥ सादितैर्विशीर्णै

इदंविध्वंसयिष्यामिशुष्कंवनमिवानलः ॥ अस्मिन्भग्नेततःकोपंकरिष्यतिसरावणः ॥ ११ ॥ ततोमहत्साश्वमहारथद्विपंबलंसमानेष्यतिराक्षसा
धिपः ॥ त्रिशूलकालायसपट्टिशायुधंततोमहद्युद्धमिदंभविष्यति ॥ १२ ॥ अहंचतैःसंयतिचंडविक्रमैःसमेत्यरक्षोभिरभंगविक्रमः ॥ निहत्यतद्राव
णचोदितंबलंसुखंगमिष्यामिहरीश्वरालयं ॥ १३ ॥ ततोमारुतवत्क्रुद्धोमारुतिर्भीमविक्रमः ॥ ऊरुवेगेनमहताद्रुमान्क्षेप्तुमथारभत् ॥ १४ ॥ ततस्तु
हनुमान्वीरोवभंजप्रमदावनं ॥ मत्तद्विजसमाघुष्टंनानाद्रुमलतायुतं ॥ १५ ॥ तद्वनंमथितैर्वृक्षैर्भिन्नैश्चसलिलाशयैः ॥ चूर्णितैःपर्वताग्रैश्चवभूवा
प्रियदर्शनं ॥ १६ ॥ नानाशकुंतविरुतैःप्रभिन्नैःसलिलाशयैः ॥ ताम्रैःकिसलयैःक्लांतैःक्लांतद्रुमलतायुतं ॥ १७ ॥ नबभौतद्वनंतत्रदावानलहतंयथा ॥
व्याकुलावरणारेजुर्विह्वलाइवतालताः ॥ १८ ॥ लतागृहैश्चित्रगृहैश्चसादितैर्व्यालैर्मृगैरार्त्तरवैश्चपक्षिभिः ॥ शिलागृहैरुन्मथितैस्तथागृहैःप्रनष्ट
रूपंतदभून्महद्वनं ॥ १९ ॥ साविह्वलाशोकलताप्रतानावनस्थलीशोकलताप्रताना ॥ जातादशास्यप्रमदावनस्यकपेर्बलाद्धिप्रमदावनस्य ॥ २० ॥

ःव्यालैःशार्दूलैः ॥ १९ ॥ प्रमदावनस्यअंतःपुरविहारोचितवनस्यस्यादेतदेवप्रमदवनमंतःपुरोचितमित्यमरः दशास्यप्रमदानांस्त्रीणांकामसंव
र्धनद्वाराः वनस्यरक्षकस्यास्यवनस्यसाविह्वलाशोकलताप्रतानाचंचलाशोकलतासमूहवतीवनस्थली तरुगुल्मलता जलाशयादियुक्ताभू
मिः कपेर्बलात्शोच्यतइतिशोकः शोच्यलताप्रतानाजातादुष्टचित्तजनिकाजातेत्यर्थः ॥ २० ॥ ॥ छ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ छ ॥

॥ रा·वा·सु·॥
॥१०४॥

जगतीपतेः राज्ञो रावणस्य व्यलीकमप्रियं ॥२१॥ आतार्यमानः ॥ इति श्रीरामाभिरामे श्रीरा० सुंद० एकच० ॥४१॥ ततइति ॥१॥ प्रतिपेदिरे प्राप्तानि ॥२॥ गतायांनिद्रा
यां वनभंगध्वनिनेत्यर्थः ॥३॥४॥ जनकात्मजां पप्रच्छुः तस्यानितिनिर्निद्रतयावस्थानं सत्वेतिभाव ॥५॥ त्वयाऽनेन कथं संवादः कृत इति च पप्रच्छुः यद्यपि तानि
द्रितावनभंगध्वनिना जागरिता इति संवाददर्शनस्यैवाभावात् तत्कथं प्रश्नोनिरवसरस्तथापि निद्रामध्ये किंचिज्जागरे राक्षसेण संवादश्चेवर्योपि दैवमाय

ततः स कृत्वा जगतीपतेर्महान्महद्व्यलीकं मनसो महात्मनः ॥ प्रयुक्तुरेको वज्रभिर्महाबलो श्रियाज्वलंस्तोरणमाश्रितः कपिः ॥२१॥ इत्यार्षे श्रीमद्रामाय
णे सुंदरकांडे एकचत्वारिंशः सर्गः ॥४१॥ ततः पक्षिनिनादेन वृक्षभंगस्वनेन च ॥ बभूवुस्त्राससंभ्रान्ताः सर्वे लंकानिवासिनः ॥१॥ विद्रुताश्च भ
यत्रस्ता निपेतुर्मृगपक्षिणः ॥ रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥२॥ ततो गतायां निद्रायां राक्षस्यो विकृताननाः ॥ तद्वनं ददृशुर्भग्नं तं च वी
रं महाकपिं ॥३॥ स ता दृष्ट्वा महाबाहुर्महासत्वो महाबलः ॥ चकार सुमहद्रूपं राक्षसीनां भयावहं ॥४॥ ततस्तु गिरिसंकाशमतिकायं महाबलं ॥
राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजां ॥५॥ कोयं कस्य कुतो वायं किन्निमित्तमिहागतः ॥ कथं त्वया सहानेन संवादः कृत इत्युत ॥६॥ आचक्ष्व नो
विशालाक्षि मा भूत्ते सुभगे भयं ॥ संवादमसितापांगि त्वया किं कृतवानयम् ॥७॥ अथाब्रवीत्तदा साध्वी सीता सर्वांगशोभना ॥ रक्षसां काम
रूपाणां विज्ञाने का गतिर्मम ॥८॥ यूयमेवास्य जानीत योयं यद्वा करिष्यति ॥ अहिरेव ह्यहेः पादान्विजानाति न संशयः ॥९॥ ॥छ॥

या पुनर्निद्रेति तत्प्रश्नोपपत्तिरित्याहुः ॥ सीतायास्तद्दर्शनेपि निर्भयप्रसन्नमुखतयावस्थानदर्शनादयं कश्चिदेतत्परिचितस्तत्कृतांतज्ञानार्थमेवप्राये
णागत इति संभाव्यानया संवादकरणं च संभाव्य तत्प्रश्ननिर्वाह इति कतकः अथ विशिष्य संवादं पृच्छन्ति संवादमिति ॥६॥७॥ कागतिः उपायः ॥८॥ यु
ध्माकंमेवैतत्त्वरूपज्ञानमुचितमित्यत्र न्यायमाहः अहिरेवेति ॥९॥

॥ राम ॥
॥१०४॥

317

प्ररव्यानुमुपवक्रमः २

१०॥ वैदेह्या वचनं अज्ञानप्रतिपादकं अनेनात्मत्राणादौ मृषावादो न दोषायेति ध्वनितं काश्चिद्विद्रुताः काश्चिद्दृढं स्थिता एव काश्चिद्रावणाय निवेदितुं गताः ११
१२॥ सीतया कृतसंवादत्वज्ञानं यथातयोक्तं॥ १३॥ न निवेदयितुमिच्छति॥ प्रायेणायं तं जानातीति तासामाशयः॥ १४॥ १५॥ प्रमृष्टं नाशितं॥ १६॥ उद्देशः प्रदेशः

अहमप्यतिभीतास्मि नैव जानामि कोह्ययं॥ वेद्मि राक्षसमेवैनं कामरूपिणमागतं॥ १०॥ वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता द्रुतं॥ स्थिताः काश्चिद्गताः का
श्चिद्रावणाय निवेदितुं॥ ११॥ रावणस्य समीपे तु राक्षस्यो विकृताननाः॥ विरूपं वानरं भीमं रावणाय न्यवेदिषुः॥ १२॥ अशोकवनिकामध्ये राजन्भीम
वपुः कपिः॥ सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः॥ १३॥ न च तं जानकी सीता हरिं हरिणलोचना॥ अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति
१४॥ वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा॥ प्रेषितो वापि रामेण सीतान्वेषणकांक्षया॥ १५॥ तेनैवाद्भुतरूपेण यत्तत्तव मनोहरम्॥ नानामृग
गणाकीर्णं प्रमृष्टं प्रमदावनम्॥ १६॥ न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः॥ यत्र सा जानकी देवी स तेन न विनाशितः॥ जानकीरक्षणार्थं
वा श्रमाद्वा नोपलक्ष्यते॥ अथवा कः श्रमस्तस्य सैव तेनाभिरक्षिता॥ १८॥ चारुपल्लवपत्राढ्यं यं सीता स्वयमास्थिता॥ प्रवृद्धः शिंशुपावृक्षः स
च तेनाभिरक्षितः॥ १९॥ तस्योग्ररूपस्योग्रं त्वं दंडमाज्ञातुमर्हसि सीता संभाषिता येन वनं तेन विनाशितं॥ २०॥ मनःपरिगृहीतां तां तव रक्षोगणेश्व
र॥ कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः॥ २१॥

॥ १७॥ कः श्रम इति महावनं भञ्जयतस्तस्य श्रमोऽसंभावित इत्यर्थः अतः सा जानक्येव तेनाभिरक्षिता न तदाश्रयवृक्षोऽपि भंगे नेति शेषः॥ १८॥ तस्यैवार्थस्य स्थिरीकरणाय पुनः प्रतिपादनं चार्विति तेनाभिरक्षितः सीतारक्षणार्थमिति शेषः॥ १९॥ आज्ञातुमाज्ञापयितुं सीता संभाषिता येनेत्यनेन सापराधग्रहणं त्वं बोधितं॥ २०॥ तद्भाषणस्यापराधत्वमुपपादयति मन इति त्यक्तजीवितस्त्यक्तजीविताशः राजपरिग्रहभाषणे प्रसक्तोऽपराध इति भावः॥ २१॥

संवर्त्तिते विवर्त्तिते ईक्षणे नेत्रे येन सः ॥२२॥२३॥२४॥ अशीतेः साहस्रं स्वार्थे रा कूटअयस्कारः कूटसदृशाग्र आयुधविशेषः ॥२५॥२६॥ अवस्थितं उपायसन्नद्धं ॥२७॥

राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः ॥ चितानाग्निरिव जज्वाल कोपसंवर्त्तितेक्षणः ॥२२॥ तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नश्रुबिंदवः ॥ दीप्ताभ्यामिव दीपाभ्यां
सार्च्चिषः स्नेहबिंदवः ॥२३॥ आत्मनः सदृशान्वीरान्किंकरान्नाम राक्षसान् ॥ व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥२४॥ तेषामशीतिसाहस्रं किंकरा
णां तरस्विनां ॥ निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः ॥२५॥ महोदरा महादंष्ट्रा घोररूपा महाबलाः ॥ युद्धाभिमनसः सर्वे हनूमद्ग्रहणोत्सुकाः ॥२६॥
ते कपिं तं समासाद्य तोरणस्थमवस्थितं ॥ अभिपेतुर्महाभागाः पतंगा इव पावकं ॥२७॥ ते गदाभिर्विचित्राभिः परिघैः कांचनांगदैः आजघ्नुर्वानरश्रे
ष्ठं शरैश्चादित्यसन्निभैः ॥२८॥ मुद्गरैः पट्टिशैः शूलैः प्रासतोमरपाणयः ॥ परिवार्य हनूमंतं सहसा तस्थुरग्रतः ॥२९॥ हनूमानपि तेजस्वी श्रीमान्पर्व
तसन्निभः ॥ क्षितावाविध्य लांगूलं ननाद च महाध्वनिं ॥३०॥ स भूत्वा तु महाकायो हनूमान्मारुतात्मजः ॥ पुच्छमास्फोटयामास लंकां शब्देन पूरय
न् ॥३१॥ तस्यास्फोटितशब्देन महता चानुनादिना ॥ पेतुर्विहंगा गगनादुच्चैश्चेदमघोषयत् ॥३२॥ जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जय
ति सुग्रीवो राघवेणाभिपालितः ॥३३॥ दासोहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः ॥ हनूमांछत्रुसैन्यानां निहंता मारुतात्मजः ॥३४॥ न रावणसहस्रं मे यु
द्धे प्रतिबलं भवेत् ॥ शिलाभिश्च प्रहरतः पादपैश्च सहस्रशः ॥३५॥ अर्दयित्वा पुरीं लंकामभिवाद्य च मैथिलीं ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसां ॥

कांचनांगदैः कांचनपट्टबंधैः ॥२८॥ २९॥ क्षितावाविध्य लांगूलमिति स्वभावोक्तिरलंकारः ॥३०॥ ३१॥ अनुनादिना प्रतिध्वनिमता ॥३२॥ जयति सर्वोत्
कर्षेणावर्त्तते ॥३३॥३४॥ प्रतिबलं प्रतिस्पर्द्धार्हं बलवत् ॥३५॥ मिषतां मिषत्स्वनादरे षष्ठी ॥३६॥ ॥ ६ ॥ ॥ श्रीरामायनमः ॥ ॥ छ ॥ ॥

॥ राम ॥
॥ १०५ ॥

318

सन्नादशब्देनआस्फोटशब्दजप्रतिध्वनिनासिंहनादेनच ॥३७॥ स्वामिनोरामस्यसंदेशेननामयहरोनकस्यायंभटइतिसंदेहरहिता । किंचस्वामिसंदेशेनरावणा
त्ययाऽतिघोरेणाप्यनेनयोद्धव्यमेवेतिनिश्चयात् ॥ पक्षांतरशंकारहिताः प्रहरणैरायुधैरभिपेतुःप्राहरन्नित्यर्थः ॥३८॥ तोरणाश्रितंतोरणसमीपस्थापि

तस्यसन्नादशब्देनतेभवन्भयशंकिताः । ददृशुश्चहनूमंतंसंध्यामेघमिवोन्नतं ॥३७॥ स्वामिसंदेशनिःशंकास्ततस्तेराक्षसाःकपिं चित्रैःप्रहरणै
र्भीमैरभिपेतुस्ततस्ततः ॥३८॥ सतैःपरिवृतःशूरैःसर्वतःसमहावलः । आससादायसंभीमंपरिघंतोरणाश्रितं ॥३९॥ सतंपरिघमादायजघानरज
नीचरान् । सपन्नगमिवादायस्फुरंतंविनतासुतः ॥४०॥ विचचारांवरेवीरःपरिगृह्यचमारुतिः । सूदयामासवज्रेणदैत्यानिवसहस्रदृक् ४१
सहत्वाराक्षसान्वीरःकिंकरान्मारुतात्मजः । युद्धाकांक्षीमहावीरस्तोरणंसमवस्थितः ॥४२ ततस्तस्माद्भयान्मुक्ताःकतिचित्तत्रराक्षसाः निह
तान्किंकरान्सर्वान्रावणायन्यवेदयन् ॥४२ ॥ सराक्षसानांनिहतंमहावलंनिशम्यराजापरिवृत्तलोचनः समादिदेशाप्रतिमंपराक्रमेप्रहस्त
पुत्रंसमरेषुदुर्जयं ॥४३॥ इत्यार्षेश्रीमद्रामायणेवा०सुंद०द्विचत्वारिंशः सर्गः ॥४२॥ ततःसकिंकरान्हत्वाहनूमान्ध्यानमास्थितः वनंभग्नंमया
चैत्यप्रासादोनविनाशितः ॥१॥ तस्मात्प्रासादमप्येवमिमंविध्वंसयाम्यहं ॥ इतिसंचिंत्यहनुमान्मनसादर्शयन्वलं २ चैत्यप्रासादमुत्प्लुत्यमेरुशृं
गमिवोन्नतं ॥ आरुरोहहरिश्रेष्ठोहनूमान्मारुतात्मजः ॥३॥ ॥तं ॥३९॥ सप्रसिद्धोविनतासुतःपन्नगमादायेवसहनुमान्परिघमादायेतियोजना ४०
परिगृह्यपरिघमितिशेषः ॥४१॥ कतिचित् हताऽवशेषाःद्वित्राः ॥४२॥ प्रहस्तपुत्रोजंवुमाली ४३ आलभमानः इतिरामा०सुंद०द्विचत्वारिंशःसर्गः ४२
अथरावणासंदिष्टसेनांतरा गमनात्पूर्वंतूष्णींस्थित्वानकिंचित्प्रयोजनमितिविचार्यप्रासादभंगादिविकीर्षितमतइतिध्यानंविचारःचैत्यप्रासादःर

क्षः कुलदेवताप्रासादः १ स्तंभ्रमदन्नवत् २ प्रासादमुत्प्लुत्यारुरोह ३
वं९

४॥ संप्रधृष्य भंक्त्वा पारियात्रः पर्वतविशेषः औन्नत्यसाधारणो धर्मः ॥५॥ धृष्टं निर्भयं ॥६॥ विहंगाश्चैत्यपालाश्च मोहिताः पेतुः ॥७॥८॥९॥१०॥११॥१२॥ शतंययुःअन्ये

आरुह्य गिरिसंकाशं प्रासादं हरियूथपः ॥ बभौ स सुमहातेजाः प्रतिसूर्य इवोदितः ॥४॥ संप्रधृष्य तु दुर्धर्षं चैत्यप्रासादमुत्तमं ॥ हनुमान्प्रज्वलँल्लक्ष्म्या
पारियात्रोपमो भवेत् ॥५॥ स भूत्वा सुमहाकायः प्रभावान्मारुतात्मज ॥ धृष्टमास्फोटयामास लंकां शब्देन पूरयन् ॥६॥ तस्यास्फोटितशब्देन
महता श्रोत्रघातिना ॥ पेतुर्विहंगमास्तत्र चैत्यपालाश्च मोहिताः ॥७॥ अस्त्रविज्जयतां रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवे-
णाभिपालितः ॥८॥ दासोहं कोसलेंद्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमाञ्छत्रुसैन्यानां निहंता मारुतात्मजः ॥९॥ न रावणसहस्रं मे युद्धे प्रतिबलं
भवेत् ॥ शिलाभिश्च प्रहरतः पादपैश्च सहस्रशः ॥१०॥ अर्दयित्वा पुरीं लंकामभिवाद्य च मैथिलीं ॥ समृद्धार्थो गमिष्यामि मिषतां सर्वरक्षसां
॥११॥ एवमुक्त्वा महाकायश्चैत्यस्थो हरियूथपः ॥ ननाद भीमनिर्ह्रादो रक्षसां जनयन्भयं ॥१२॥ तेन नादेन महता चैत्यपालाः शतं ययुः ॥ गृहीत्वा
विविधानस्त्रान्प्रासान्खड्गान्परश्वधान् ॥१३॥ विसृजंतो महाकाया मारुतिं पर्यवारयन् ॥ ते गदाभिर्विचित्राभिः परिघैः कांचनांगदैः ॥१४॥ आज-
घ्नुर्वानरश्रेष्ठं बाणैश्चादित्यसन्निभैः ॥ आवर्त्त इव गंगायास्तोयस्य विपुलो महान् ॥१५॥ परिक्षिप्य हरिश्रेष्ठं स बभौ रक्षसां गणः ॥ ततो वातात्मजः
क्रुद्धो भीमरूपं समास्थितः ॥१६॥ प्रासादस्य महांतस्य स्तंभं हेमपरिष्कृतं ॥ उत्पाटयित्वा वेगेन हनूमान्मारुतात्मजः ॥१७॥ ततस्तं भ्रामयामास शत-
धारं महाबलः ॥ तत्र चाग्निः समभवत्प्रासादश्चाप्यदह्यत ॥१८॥

॥केइत्यर्थः॥१३॥१४॥१५॥ परिक्षिप्यापंशतोयस्यावर्त्तइवेतिदृष्टांतः ॥१६॥ महान्मारु-
तात्मजइत्यन्वयः ॥१७॥ उत्पाटयित्वा तं शतधारं स्तंभं भ्रामयामास तत्र च भ्राम्यमाणे स्तंभे अंतरे शाघट्टनवशादग्निः समभवत्तेन प्रासादश्चाप्यदह्यत ॥१८

319

१९ ॥ ततः सराक्षसशतं हत्वा दह्यमानं प्रासादं दृष्ट्वा चांतरिक्षे स्थित इदं वचोब्रवीत् ॥ २० ॥ एतदुक्तिप्रयोजनं च राक्षसहृदयपीडा ॥ २१ ॥ २२ ॥ ओघबला ओघसंख्या
नगजबलाः ॥ २३ ॥ २४ ॥ २५ ॥ अमरमानः ॥ इति श्रीरामाभिरामे सुंद० त्रिचत्वारिंशः सर्गः ॥ ४३ ॥ अथ जंबूमाल्यागमनं तद्वधश्च संदिश्यइति ॥ १ ॥ २ ॥ धनुर्विस्फारयानः

दह्यमानं ततो दृष्ट्वा प्रासादं हरियूथपः ॥ स राक्षसशतं हत्वा वज्रेणेंद्र इवासुरान् ॥ १९ ॥ अंतरिक्षस्थितः श्रीमानिदं वचनमब्रवीत् ॥ मादृशानां सह
स्राणि विसृष्टानि महात्मनां ॥ २० ॥ बलिनां वानरेंद्राणां सुग्रीववशवर्तिनां ॥ अटंति वसुधां कृत्स्नां वयमन्ये च वानराः ॥ २१ ॥ दशनागबलाः केचित्केचिद्दशगु
णोत्तराः ॥ केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ २२ ॥ संति चौघबलाः केचित्केचिद्वायुबलोपमाः ॥ अप्रमेयबलाः केचित्तत्रासन्हरियूथपाः ॥ २३ ॥
ईदृग्विधैस्तु हरिभिर्वृतो दंतनखायुधैः ॥ शतैः शतसहस्रैश्चायुतैरपि ॥ २४ ॥ आगमिष्यति सुग्रीवः सर्वेषां वो निषूदनः ॥ नेयमस्ति पुरी लंका न यूयं न च
रावणः ॥ यस[illegible]क्ष्वाकुवीरेण बद्धवैरं महात्मना ॥ २५ ॥ इत्यार्षे श्रीमद्रामायणे वा० सुंद० त्रिचत्वारिंशः सर्गः ॥ ४३ ॥ संदिष्टो राक्षसेंद्रेण प्रहस्तस्य सु
तो बली ॥ जंबुमाली महादंष्ट्रो निर्जगाम धनुर्धरः ॥ १ ॥ रक्तमाल्यांबरधरः स्रग्वी रुचिरकुंडलः ॥ महान्विवृत्तनयनश्चंडः समरदुर्जयः ॥ २ ॥ धनुः शक्रधनुः
प्रख्यं महद्रुचिरसायकं ॥ विस्फारयानो वेगेन वज्राशनिसमस्वनं ॥ ३ ॥ तस्य विस्फारघोषेण धनुषो महता दिशः ॥ प्रदिशश्च दिशश्चैव सहसा समपू
र्यत ॥ ४ ॥ रथेन खरयुक्तेन तमागतमुदीक्ष्य सः ॥ हनूमान्वेगसंपन्नो जहर्ष च ननाद च ॥ ५ ॥ तं तोरणविटंकस्थं हनूमंतं महाकपिं ॥ जंबूमाली म
हाबाहुराविव्याध निशितैः शरैः ॥ ६ ॥ अर्धचंद्रेण वदने शिरस्येकेन कर्णिना ॥ बाह्वोर्विव्याध नाराचैर्दशभिस्तु कपीश्वरं ॥ ७ ॥ ॥ विस्फारयमानः विस्फारो ज्याघो

षः ॥ ३ ॥ समपूर्यंत दिगादिसमुदायविषयमेकवचनं ॥ ४ ॥ जहर्ष स्वबलानुरूपशत्रुप्राप्त्या ॥ ५ ॥ तोरणविटंकः तोरणस्तंभयोरुपरि तिर्यक्प्रतिष्ठापित
कपोतपालिकादारु ॥ ६ ॥ कर्णी अंकुशाकाराग्रशरविशेषः ॥ ७ ॥

श्च कोटिभि ६
लि ५

६२

॥ रा॰ वा॰ सु ॥
॥ १०७ ॥

अंबुजं रक्तांबुजं ॥ ८ ॥ तत्र स्वरक्तं स्वतः इति शेषः रक्तेन क्षतजेन रंजितं शुभ्रमाकाशे दृश्यमानमाकाशे कांचनविंदुभिः रक्ताशोकपुष्पसमविंदुभिः सिक्तं महाप
द्मं महत्तरं रक्तपद्ममिवेत्यर्थः स्तुतोपमेयं अशोकः कांचनाक्तयः ॥ ९ ॥ १० ॥ ताडयामास विभेद ॥ ११ ॥ विपन्नं व्यर्थीकृतं ॥ १२ ॥ १३ ॥ नाश्वाः रथेन खरयुक्तेन युक्ते

तस्य तच्छुशुभे ताम्रं शरेणाभिहतं मुखं ॥ शारदीवांबुजं फुल्लं विद्धं भास्कररश्मिना ॥ ८ ॥ तत्तस्य रक्तं रक्तेन रंजितं शुशुभे मुखं ॥ यथाकाशे महाप
द्मं सिक्तं कांचनविंदुभिः ॥ ९ ॥ चुकोप वाणाभिहतो राक्षसस्य महाकपिः ॥ ततः पार्श्वेतिविपुलां ददर्श महतीं शिलां ॥ १० ॥ तरसा तां समुत्पाट्य चि
क्षेप जववद्बली ॥ तां शरैर्दशभिः क्रुद्धस्ताडयामास राक्षसः ॥ ११ ॥ विपन्नं कर्म तद् दृष्ट्वा हनूमांश्चंडविक्रमः ॥ सालं विपुलमुत्पाट्य भ्रामयामास वी
र्यवान् ॥ १२ ॥ भ्रामयंतं कपिं दृष्ट्वा सालवृक्षं महावलं ॥ चिक्षेप सुवहून् वाणान् जंबुमाली महावलः ॥ सालं चतुर्भिश्चिच्छेद वानरं पंचभिर्भुजे
उरस्येकेन वाणेन दशभिस्तु स्तनांतरे ॥ स शरैः पूरिततनुः क्रोधेन महता वृतः ॥ तमेव परिघं गृह्य भ्रामयामास वेगितः ॥ १२ ॥ अतिवेगोतिवेगेन
भ्रामयित्वा मदोत्कटः ॥ परिघं पातयामास जंबुमालेर्महोरसि ॥ १३ ॥ तस्य चैव शिरो नास्ति न वाहू जानुनी न च ॥ न धनुर्न रथो नाश्वास्तत्रादृश्यंत
नेषवः ॥ १४ ॥ स हतस्तरसा तेन जंबुमाली महारथः ॥ पपात निहतो भूमौ चूर्णितांग इव द्रुमः ॥ १५ ॥ जंबुमालिं सुनिहतं किंकरांश्च महावलान् चु
क्रोध रावणः श्रुत्वा क्रोधसंरक्तलोचनः ॥ १६ ॥ स रोषसंवर्तितताम्रलोचनः प्रहस्तपुत्रे निहते महावले ॥ अमात्यपुत्रानतिवीर्यविक्रमान् समादिदेशा
शु निशाचरेश्वरः ॥ १७ ॥ इत्यार्षे रा॰ वा॰ सुं॰ चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ ततस्ते राक्षसेंद्रेण चोदिता मंत्रिणः सुताः ॥ निर्ययुर्भवनात्तस्मात्सप्त सप्तार्चिवर्चसः ॥ १ ॥

रश्वशब्देनात्र खरा उच्यंते ॥ १४ ॥ १७ ॥ अस्तूयमानः ॥ इति रामा॰ श्री॰ सुंद॰ चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥ सप्तार्चिर्वर्चसः अग्नितुल्यतेजसः आर्षो रेफलोपः ॥ १ ॥

320

॥ राम ॥
॥ १०७ ॥

महद्दलंमहतीसेनापरिवारोयेषांकृतास्त्रास्त्रेतिआर्षःसंधिःकृतास्त्राःशिक्षितास्त्राः अस्त्रविदांश्रेष्ठाःपरस्परजयैषिणःअहमहमिकयास्वस्वोत्कर्षापेक्षिणः
॥२॥ध्वजवद्भिर्विशिष्टध्वजदंडयुक्तैःपताकाभिःप्रशस्तपताकावद्भिर्महारथैर्निर्ययुरितिसंबंधः॥३॥४॥शोकसंभ्रांताःनिश्चितमरणाबुध्येतिशेषः॥५॥प

महद्बलपरीवाराधनुष्मंतोमहाबलाः॥कृतास्त्रास्त्रविदांश्रेष्ठाःपरस्परजयैषिणः॥२॥हेमजालपरिक्षिप्तैर्ध्वजवद्भिःपताकिभिः॥तोयदस्वननि
र्घोषैर्वाजियुक्तैर्महारथैः॥३॥तप्तकांचनचित्राणिचापान्यमितविक्रमाः॥विस्फारयंतःसंहृष्टास्तडित्वंतइवांबुदाः॥४॥जनन्यस्तास्ततस्तेषांवि
दित्वाकिंकरान्हतान्॥बभूवुःशोकसंभ्रांताःसबांधवसुहृज्जनाः॥५॥तेपरस्परसंघर्षास्तप्तकांचनभूषणाः॥अभिपेतुर्हनूमंतंतोरणस्थमव
स्थितं॥सृजंतोबाणवृष्टिंतेरथगर्जितनिस्वनाः॥प्रावृट्कालइवांभोदाविचेरुर्नैरृतांबुदाः॥७॥अवकीर्णस्ततस्ताभिर्हनूमांछरवृष्टिभिः॥अभ
वत्संवृताकारःशैलराडिववृष्टिभिः॥८॥सशरान्वंचयामासतेषामाशुचरःकपिः॥रथवेगांश्चवीराणांविचरन्विमलेंबरे॥९॥सतैःक्रीडन्धनु
ष्मद्भिर्व्योम्निवीरःप्रकाशते॥धनुष्मद्भिर्यथामेघैर्मारुतःप्रभुरंबरे॥१०॥सकृत्वानिनदंघोरंत्रासयंस्तांमहाचमूं॥चकारहनुमान्वेगंतेषुरक्षः
सुवीर्यवान्॥११॥तलेनाभिहनत्कांश्चित्पादैःकांश्चित्परंतपः॥मुष्टिभिश्चाहनत्कांश्चिन्नखैःकांश्चिद्व्यदारयत्॥१२॥प्रममाथोरसाकांश्चिदूरुभ्यामप
रानपि॥केचित्तस्यैवनादेनतत्रैवपतिताभुवि॥१३॥ततस्तेष्ववपन्नेषुभूमौनिपतितेषुच॥तत्सैन्यमगमत्सर्वंदिशोदशभयार्दितम्॥१४॥

रस्परसंघर्षाःअहमेवाग्रेइतिपरस्परमभिमानात्तोरणस्थमवस्थितंतत्रस्थितंनिश्चलमित्यर्थः॥६॥सृजंतोविसृजंतः॥७॥संवृताकारःअदृश्यइति
यावत्॥८॥वंचयामासस्वस्पर्शरहितांश्चकारतत्रोपायःआशुचरइतिस्थिरलक्ष्यंहिसुवेधंभवतिरथवेगांश्चवंचयामास॥९॥धनुष्मद्भिरितिपाठआर्षेरु

त्वेमधनुष्मद्भिरैर्धनुर्युक्तैः॥१०॥११॥१२॥१३॥भयार्दितंसमंतादिशोद
शःउद्रावेतिशेषः॥१४॥

नीडं रथस्थं रथ्यधिष्ठानस्थानं ॥१५॥ स्ववंशेन घः ननाद्प्रतिध्वनिना रक्षोराक्षसीध्वनिनाद ॥१६॥१७॥ अस्तूयमान ॥ इतिश्रीरामाभि० श्री० सुंद० पंचचत्वारिंशः
सर्गः ॥४५॥ संवृताकारः निगृहीतांतर्गतभयः उत्तमां मतिं धैर्यविषयां ॥१॥२॥ हनुमद्ग्रहणे संदिदेश व्यग्रान्सर्वेत्र कार्येत्वरावतः ॥३॥ यातनगद्धत ॥४॥

विनेदुर्विस्वरंनागानिपेतुर्भुविवाजिनः ॥ भग्ननीडध्वजच्छत्रैर्भूश्चकीर्णाभवद्रथैः ॥१५॥ स्रवतारुधिरेणाथस्रवंत्योदर्शिताःपथि ॥ विविधैश्च
स्वनैर्लंकाननादविकृतंतदा ॥१६॥ सतान्प्रवृद्धान्विनिहत्यराक्षसान्महावलश्चंडपराक्रमःकपि ॥ युयुत्सुरन्यैःपुनरेवराक्षसैस्तदेववीरोभिज
गामतोरणं ॥१७॥ इत्यार्षे श्रीमद्रामायणे वा० सुंद० पंचचत्वारिंशः सर्गः ॥४५॥ हतान्मंत्रिसुतान्बुद्ध्वावानरेणमहात्मना ॥ रावणःसंवृताका
रश्चकारमतिमुत्तमां ॥१॥ सविरूपाक्षयूपाक्षौदुर्धर्षंचैवराक्षसं ॥ प्रघसंभासकर्णंचपंचसेनाग्रनायकान् ॥२॥ संदिदेशदशग्रीवोवीरान्न
यविशारदान् ॥ हनूमद्ग्रहणेव्यग्रान्वायुवेगसमान्युधि ॥३॥ यातसेनाग्रगाःसर्वेमहावलपरिग्रहाः ॥ सवाजिरथमातंगाःसकपिःशास्यतामिति
॥४॥ यत्तैश्चखलुभाव्यंस्यात्तमासाद्यवनालयं ॥ कर्मचापिसमाधेयंदेशकालाविरोधितं ॥५॥ नह्यहंतंकपिंमन्येकर्मणाप्रतितर्कयन् ॥ स
र्वथातन्महद्भूतंमहावलपरिग्रहं ॥६॥ वानरोयमितिज्ञात्वानहिशुध्यतिमेमनः ॥ नैवाहंतंकपिंमन्येयथेयंप्रस्तुताकथा ॥७॥ भवेदिंद्रेणवासृ
ष्टमस्मदर्थंतपोवलात् ॥ सनागयक्षगंधर्वदेवासुरमहर्षयः ॥८॥

॥ यत्तैः सावधानैः किंचात्र देशकालविरोधिकर्मनकार्यमित्याह देशकालाविरोधि
तंतदविरुद्धंतदुचितमिति यावत् समाधेयंकार्यं ॥५॥ यत्तैर्भाव्यमित्यत्र हेतुमाह नहीति तस्यकर्मणातंप्रतितर्कयन् तंकपिंनमन्ये किंतर्हिमन्यसेतत्रा
ह सर्वथेति ॥६॥ ७॥ महतोभूतस्येहकः प्रसंगस्तत्राह भवेदिति सनागेति नागादिसहितादेवादयस्त्वयैः प्रहितैः सर्वैर्युष्माभिः सहमयाविनिर्जिताअतस्ते

रवइंपनोस्माकंकिंचिद्व्यलीकंअप्रियंविधातव्यंविधातुंप्राप्तकालंतस्मा
त्देवतत्सृष्टभूतमेवपरिग्रहेतावद्वा ॥८॥

सु ७

॥२॥१०॥सवाजिरथेत्यादिषु नर्वचनं स्थैर्यार्थं ॥११॥सर्वथा महद्भूतमित्यत्र हेतुं निश्चायकमाह दृष्टाहीति ॥१२॥ननु त्वद्दृष्टान्यनमस्यवायं नेत्याह नैवेति ॥यथा
स्य भीमा गतिः समुद्रप्लवनरूपा तथा तेषां नैव यथा चास्य तेज आदि तथा तेषां न रूपपरिकल्पने यथेप्सितरूपपरिग्रह ॥१३॥१४॥प्रयत्नमित्यार्धेक्ती

युष्माभिः प्रहितैः सर्वैर्मया सह विनिर्जिताः ॥ नैरवश्पविधातव्यं व्यलीकं किंचिदेव नः ॥९॥ न देवनात्र संदेहः प्रसह्य परिगृह्यतां ॥ यानसेना
ग्रगाः सर्वे महाबलपरिग्रहाः ॥१०॥ सवाजिरथमातंगाः स कपिः शास्यतामिति ॥ नावमन्तो भवद्भिश्च कपिर्धीरपराक्रमः ॥११॥ दृष्टा हि हरयः
शीघ्रं मया विपुलविक्रमाः ॥ वाली च सह सुग्रीवो जांबवांश्च महाबलः ॥१२॥ नीलः सेनापतिश्चैव ये चान्ये द्विविदादयः ॥ नैव तेषां गतिर्भीमा
न तेजो न पराक्रमः ॥१३॥ न मतिर्न बलोत्साहो न रूपपरिकल्पनं ॥ महत्सत्त्वमिदं ज्ञेयं कपिरूपं व्यवस्थितं ॥१४॥ प्रयत्नं महदास्थाय क्रिय
तामस्य निग्रहः ॥ कामं लोकास्त्रयः सेन्द्राः ससुरासुरमानवाः ॥ भवतामग्रतः स्थातुं न पर्याप्ता रणाजिरे ॥ तथापि तु नयज्ञेन जयमाकांक्षता रणे
१६॥ आत्मा रक्ष्यः प्रयत्नेन युद्धसिद्धिर्हि चंचला ॥ ते स्वामिवचनं सर्वे प्रतिगृह्य महौजसः ॥१७॥ समुत्पेतुर्महावेगा हुताशसमतेजसः ॥ रथैश्च म
त्तैर्नागैश्च वाजिभिश्च महाजवैः ॥१८॥ शस्त्रैश्च विविधैस्तीक्ष्णैः सर्वैश्चोपचिता बलैः ॥ ततस्तु ददृशुर्वीरा दीप्यमानं महाकपिं ॥१९॥ रश्मिमन्तमिवो
द्यन्तं स्वतेजोरश्मिमालिनं ॥ तोरणस्थं महावेगं महासत्त्वं महाबलं ॥२०॥ महामतिं महोत्साहं महाकायं महाभुजं ॥ तं समीक्ष्यैव ते सर्वे दिक्षु
सर्वास्ववस्थिताः ॥२१॥ तैस्तैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ तस्य पंचायसास्तीक्ष्णाः सिताः पीतमुखाः शराः ॥२२॥ (वत्वकामं यद्यपीत्यर्थः ॥१५॥ नय

ज्ञेन नीतिज्ञेन आत्मा तद्देहः युद्धसिद्धिर्विजयः ॥१६॥१८॥ सत्त्ववितं ॥२०॥ दिक्षु सर्वास्ववस्थिता ऊकतत्समीपमागन्तुं चकिता इति भावः ॥२१॥ तीक्ष्णा मर्मच्छिदः पीत

मुखाः फलभागे स्वर्णरूपिताः उत्पलपत्राभा स्कन्दनुनखीडाहा इत्यर्थः ॥२२॥

॥रा·बा·सु॥
॥१०९॥

स्वयंनदन्तेननादेनदिशोनादयन्निसर्वः उत्पपाततोरणादितिशेषः अभिपेदेप्राप्तः॥२१॥ कपिर्व्योम्निस्थितानंस्वनादेनऊँकारादिरूपेणावारयामासः पयोदांतेजलम्

शिरस्युत्पलपत्राभादुर्धरेणानिपातिताः॥ सतैःपंचभिराविद्धःशरैःशिरसिवानरः॥२२॥उत्पपातनदन्व्योम्निदिशोदशविनादयन्॥२३॥ततस्तुदुर्धरोवी
रःसरथःसज्यकार्मुकः॥ किरन्शरशतैर्नैकैरभिपेदेमहाबलः॥२४॥सकपिर्वारयामासतंव्योम्निशरवर्षिणं॥वृष्टिमंतंपयोदांतेपयोदमिवमारुतः
!॥२५॥अर्द्यमानस्ततस्तेनदुर्धरेणानिलात्मजः॥ चकारनिनदंभूयोव्यवर्धतचवीर्यवान्॥२६॥सदूरंसहसोत्पत्यदुर्धरस्यरथेहरिः॥निपपातमहा
वेगोविद्युद्राशिर्गिराविव॥२७॥ततःसमथितनाष्टाश्वंरथंभग्नाक्षकूबरं॥ विहायन्यपतद्भूमौदुर्धरस्त्यक्तजीवितः॥२८॥तंविरूपाक्षयूपाक्षौदृष्ट्वाः
निपतितंभुवि॥तौजाततरोषौदुर्धर्षौउत्पेततुररिंदमौ॥२९॥सताभ्यांसहसोत्प्लुत्यविष्टितोविमलेंबरे॥मुद्गराभ्यांमहाबाहुर्वक्षस्यभिहतःकपिः
३०॥तयोर्वेगवतोर्वेगंनिहत्यसमहाबलः॥निपपातपुनर्भूमौसुपर्णइववेगितः॥३१॥ससालवृक्षमासाद्यसमुत्पाट्यचवानरः॥तावुभौराक्ष
सौवीरौजघानपवनात्मजः॥३२॥ततस्तांस्त्रीन्हतान्ज्ञात्वावानरेणतरस्विना॥अभिगम्यमहावेगःप्रहस्यप्रघसोबली॥३३॥भासकर्णश्चसंक्रुद्ध
ःशूलमादायवीर्यवान्॥एकतःकपिशार्दूलंयशस्विनमवस्थितौ॥३४॥पट्टिशेनशिताग्रेणप्रघसःप्रत्यपोथयत्॥भासकर्णश्चशूलेनराक्ष
सःकपिकुंजरं॥३५॥सताभ्यांविक्षितैर्गात्रैरसृग्दिग्धतनूरुहः॥अभवद्वानरःक्रुद्धोबालसूर्यसमप्रभः॥३६॥समुत्पाट्यगिरेःशृंगंसमृगव्यालपा
दपं॥जघानहनुमान्वीरोराक्षसौकपिकुंजरः॥गिरिशृंगस्तनिष्पिष्टौतिलशस्तौबभूवतुः॥३७॥ ॥दान्तवर्षाकालांते॥२५॥रथेनिपपातेत्यन्वयः॥२६॥२९॥
ताभ्यांकर्तृभ्यांमुद्गराभ्यांकरणाभ्यामभिहतः॥३०॥निहत्यवज्रहस्ताच्चार्थःकिंत्य॥३१॥३३॥एकतोवस्थिताविन्यन्वयःपरस्परसाहाय्यार्थमेकदेशेस्थिता
विन्यर्थः॥३४॥३५॥विक्षितैर्गात्रैरुपलक्षितः॥३६॥३७॥

॥राम॥
॥१०९॥

322

॥३५॥४०॥ ध्वजिनीपतीन् सेनापतीन् परिगृह्याश्रित्य स्थित इति शेषः कृतक्षणो लब्धावसरः ॥४१॥ एवमानः ॥ इति रामा० सुंद० षट्चत्वारिंशः सर्गः ॥४६॥ प्रमा
पितान् मारितान् समरोद्धतोन्मुखं समरोद्धतश्चासौ समरायोन्मुखश्चेति अक्षं समक्षमवस्थितं अक्षाख्यकुमारं निशम्य दृष्ट्वा प्रसमैक्षत दृष्ट्वा युद्धार्थमाताप

ततस्तेष्ववसन्नेषु सेनापतिषु पंचसु । बलं तदवशेषं तु नाशयामास वानरः ॥३८॥ अश्वैरश्वान् गजैर्नागान् योधैर्योधान् रथै रथान् । स कपिर्नाशयामास
सहस्राक्ष इवासुरान् ॥३९॥ हयैर्नागैस्तुरंगैश्च भग्नाक्षैश्च महारथैः । हतैश्च राक्षसैर्भूमी रुद्धमार्गा समंततः ॥४०॥ ततः कपिस्तान् ध्वजिनीपतीन् रणे निह
त्य वीरान् सबलान् सवाहनान् । तथैव वीरः परिगृह्य तोरणं कृतक्षणः काल इव प्रजाक्षये ॥४१॥ इत्यार्षे श्रीरामा० वा० सुंद० षट्चत्वारिंशः सर्गः ४६
सेनापतीन् पंच स तु प्रमापितान् हनूमता सानुचरान् सवाहनान् । निशम्य राजा समरोद्धतोन्मुखं कुमारमक्षं प्रसमैक्षताक्षम् ॥१॥ स तस्य दृष्ट्यर्पणसंप्र
चोदितः प्रतापवान् कांचनचित्रकार्मुकः । समुत्पपाताथ सदस्युदीरितो द्विजातिमुख्यैर्हविषेव पावकः ॥२॥ ततो महान् बालदिवाकरप्रभं प्रतप्तजांबूनदजा
लसंततं । रथं समास्थाय ययौ स वीर्यवान् महाहरिं तं प्रति नैरृतर्षभः ॥३॥ ततस्तपःसंग्रहसंचयार्जितं प्रतप्तजांबूनदजालचित्रितं । पताकिनं रत्नविभू हैम
षितध्वजं मनोजवाष्टाश्ववरैः सुयोजितं ॥४॥ सुरासुराधृष्यमसंगचारिणं तडित्प्रभं व्योमचरं समाहितं । सतूणमष्टासिनिबद्धबंधुरं यथाक्रमावेशितशक्ति

यामासेत्यर्थः ॥१॥ सदेवाह स इति सदसि यज्ञशालायां द्विजातिमुख्यैर्हविषोदीरितः प्रेरितः पावक इव समुत्पपात ॥२॥ महान्त इत्यन्वयः जांबूनदजालेन त
त्सम्बद्धेन संततं व्याप्तं ॥३॥ उक्तमेवार्थं विशिष्याह तत इति तपःसंग्रहस्य तपोनुष्ठानस्य संचयेन समृध्यार्जितं ॥४॥ अत एव व्योमचरं असंगचारिणां पर्वता
दिष्वप्रतीतिभावः समाहितं सज्जं तूणाः इषुधिः अष्टसु दिक्षु असिभिः सह निबद्धा बंधुराः रथफलाका यस्मिन् तं यथाक्रमं यथास्थानमावेशितं शक्तितोमरं यस्मिन् तं ॥ ॥५॥

प्रतिपूर्णवस्तुना·पुष्पपरिकरवस्तुना शशिसूर्यवर्च्चसा नउज्झिम वर्च्चसा हेमदामसहितेन वस्तुना विराजमानं ॥६॥ तोरणास्थितं तोरणाग्रयं आसीनमुपविष्टं ॥७॥
हरीक्षणाः सिंहवत् क्रूरदृष्टिः युगान्तकालाग्निवत्प्रजाक्षयेव स्थितं हरिं समासाद्य तमेवैक्षत· विस्मितं च तं जातसंभ्रमं चवालोयं मायोऽपि सिद्धतीति विस्मयः रावण

विराजमानं प्रतिपूर्णवस्तुना सहेमदाम्ना शशिसूर्यवर्च्चसा ॥ दिवाकराभं रथमास्थितस्ततः स निर्जगामामरतुल्यविक्रमः ॥६॥ सपूरयन्खं च महीं च सा
चलां तुरंगमत्तंगमहारथस्वनैः ॥ बलैः समेतैः सह तोरणास्थितं समर्थमासीनमुपागमत्कपिं ॥७॥ स तं समासाद्य हरिं हरीक्षणो युगान्तकालाग्निमि
व प्रजाक्षये ॥ अवस्थितं विस्मितजातसंभ्रमं समैक्षताक्षो बहुमानचक्षुषा ॥८॥ स तस्य वेगं च कपेर्महात्मनः पराक्रमं चारिषु रावणात्मजः ॥ वि
चारयन्खं च बलं महाबलो युगक्षये सूर्य इवाभिवर्धितः ॥९॥ स जातमन्युः प्रसमीक्ष्य विक्रमं स्थितः स्थिरः संयति दुर्निवारणं ॥ समाहितात्मा हनुमंतमा
हवे प्रचोदयामास शितैः शरैस्त्रिभिः ॥१०॥ ततः कपिं तं प्रसमीक्ष्य गर्वितं जितश्रमं शत्रुपराजयोचितं ॥ अवैक्षताक्षः समुदीर्णमानसं सबाणपा
णिः प्रगृहीतकार्मुकः ॥११॥ स हेमनिष्कांगदचारुकुंडलः समाससादाशुपराक्रमः कपिं ॥ तयोर्बभूवाप्रतिमः समागमः सुरासुराणामपि संभ्रमप्रदः
१२॥ ररास भूमिर्न ततापभानुमान्ववौ न वायुः प्रचचाल चाचलः ॥ कपेः कुमारस्य च वीर्यसंयुगं ननाद च द्यौरुदधिश्च चुक्षुभे ॥१३॥ स तस्य वीरः सुमुखान्पत
त्रिणः सुवर्णपुंखान्सविषानिवोरगान् ॥ समाधिसंयोगविमोक्षतत्त्ववित्शरानथ त्रीन्कपिमूर्ध्न्यताडयत् ॥१४॥

((उत्पन्नत्वाच्चतत्रजातादरं ॥८॥ अभिवर्धनतेज(
साअभ्युवर्षतेत्यर्थ ॥९॥ स्थिरं स्थितः सः प्रसमीक्ष्य विक्रमं संदर्शनीयपराक्रमं संयति रणे दुःखेन निरसनीयस्य तं हनूमंतं त्रिभिः शरैः प्रचोदयामास युद्धाय प्रेरयामास ॥१०॥
११॥ निष्कसुरोभूषणं आशुपराक्रमः तीक्ष्णपौरुष इति यावत् समागमो युद्धं संभ्रमप्रदः भयदः ॥१२॥ भूमिर्भूमिस्थप्राणिजातं ररास वीर्यसंयुगं वीर्यप्रवृत्तं सं

युगं वीक्ष्येति शेषः ॥१३॥ समाधिर्लक्ष्यदर्शनं संयोगः शरसंधानं विमोक्षः
सहितस्य त्यागस्तेषां तत्त्ववित् अताडयत् अपातयत् ॥१४॥

303

असृग्दिग्धश्चासौ विवृत्तनेत्रश्च विवृत्तलोचन इति पाठे अवसरो विनचक्षुरित्यर्थः नवोदितादित्यनिभः रक्तवर्णो इत्यर्थः शरांशुमान् स्वमस्तकस्य शरस्यांशुमान्
अंशुमालाधृक् सूर्य इव व्यराजत ॥१५॥ आपूर्यत व्यवर्धत ॥१६॥ मंदराग्रस्थत्वेन मध्यंदिनस्थत्वं लक्ष्यते ॥१७॥ वारणासनमेव शक्रकार्मुकं यस्य सः ॥१८॥ तेज आदिता

स तैः शरैर्मूर्ध्नि समं निपातितैः क्षरन्नसृग्दिग्धविवृत्तलोचनः ॥ नवोदितादित्यनिभः शरांशुमान्व्यराजतादित्य इवांशुमालिकः ॥१५॥ ततः प्ल
वंगाधिपमंत्रिसत्तमः समीक्ष्य तं राजवरात्मजं रणे ॥ उदग्रचित्रायुधचित्रकार्मुकं जहर्ष चापूर्यत चाहवोन्मुखः ॥१६॥ स मंदराग्रस्थ इ
वांशुमाली विवृद्धकोपो बलवीर्यसंवृतः ॥ कुमारमक्षं सबलं सवाहनं ददाह नेत्राग्निमरीचिभिस्तदा ॥१७॥ ततः स वारणासनशक्रकार्मुकः
शरप्रवर्षो युधि राक्षसांबुदः ॥ शरान्मुमोचाशु हरीश्वराचले वलाहको वृष्टिमिवाचलोत्तमे ॥१८॥ कपिस्ततस्तं रणचंडविक्रमं प्रवृद्धते
जोबलवीर्यसायकं ॥ कुमारमक्षं प्रसमीक्ष्य संयुगे ननाद हर्षाद्घनतुल्यनिस्वनः ॥१९॥ स बालभावाद्युधि वीर्यदर्पितः प्रवृद्धमन्युः क्षतजो
पमेक्षणः ॥ समाससादाप्रतिमं रणे कपिं गजो महाकूपमिवावृतं तृणैः ॥२०॥ स तेन बाणैः प्रसभं निपातितैश्चकार नादं घननादनिस्वनः समुत्सहे
नाशु नभः समारुजन्भुजोरुविक्षेपणघोरदर्शनः ॥२०॥ ततः समंतं समभिद्रवद्बली स राक्षसानां प्रवरः प्रतापवान् ॥ रथी रथिश्रेष्ठतरः किरञ्छरैः पयो
धरः शैलमिवाश्मवृष्टिभिः ॥२२॥ स तांश्शरांस्तस्य हरिर्विमोक्षयन्चचार वीरः पथि वायुसेविते ॥ शरांतरे मारुतवद्विनिष्पतन्मनोजवः संयति भीमविक्रमः ॥२३॥

यकांताः प्रवृद्धा यस्य ॥१९॥ तृणैरावृतं महाकूपं गजपातनार्थं कृतगर्त्तं ॥२०॥ घननादनिस्वनः मेघशब्दसदृशशब्दः समुत्सहेन समुत्साहेन नभस्वआ
र्षः भुजयोरूर्वोर्विक्षेपणेन घोरं दर्शनं यस्य सः ॥२१॥ समभिद्रवत् अभ्यद्रवत् ॥२२॥ शरान्विमोक्षयन् व्यर्थीकुर्वन् तदुपायः शरांतर इति ॥२३॥

स्वंशरान्व्यर्थीकुर्वतोपिभुजांतरभेदरूपकर्मविशेषतत्त्वज्ञः पराक्रमविशेषेणाचिंतयामास॥२४॥ चिंताप्रकारः अबालवदिति सर्वोहवैकर्मशालिनः स
र्वप्रकाराहवकर्मशालिनः अत्रास्मिन्कालेऽस्यप्रमापणेमेमतिर्नजायते॥ प्रमापणेमारुतिरत्रजायतेइतिपाठेऽयंजनइतिवक्त्वस्यैवहनुमतामारुतिरि

तमात्तवाणासनमाहवोन्मुखंखमास्तृणांतंविविधैःशरोत्तमैः॥ अवेक्षताक्षंवहुमानचक्षुषाजगामचिंतांसचमारुतात्मजः॥२४॥ ततःशरैर्भिन्नभु
जांतरः कपिः कुमारवर्येणमहात्मनानदन्॥ महाभुजः कर्मविशेषतत्त्ववित् विचिंतयामासरणेपराक्रमं॥२४॥ अबालवद्बालदिवाकरप्रभः करो
त्ययंकर्ममहान्महाबलः॥ नचास्यसर्वाहवकर्मशालिनः प्रमापणेमेमतिरत्रजायते॥२५॥ अयंमहात्माचमहांश्चवीर्यतः समाहितश्चातिसहश्च
संयुगे॥ असंशयंकर्मगुणोदयादयंसनागयक्षैर्मुनिभिश्चपूजितः॥२६॥ पराक्रमोत्साहविवृद्धमानसः समीक्षतेमांप्रमुखागतः स्थितः॥ परा
क्रमोह्यस्यमनांसिकंपयेत्सुरासुराणामपिशीघ्रकारिणः॥२७॥ नखल्वयंनाभिभवेदुपेक्षितः पराक्रमोह्यस्यरणेविवर्धते॥ प्रमापणंत्वस्यम
माद्यरोचते नवर्धमानोग्निरुपेक्षितुंक्षमः॥२८॥ इतिप्रवेगंतुपरस्यतर्कयन्स्वकर्मयोगंचविधायवीर्यवान्॥ चकारवेगंतुमहाबलस्तदामतिं
चक्रेस्यवधेतदानीं॥२९॥ सतस्यतानष्टवरान्महाहयान्समाहितान्भारसहान्विवर्तने॥ जघानवीरः पथिवायुसेवितेतलप्रहारैः पवनात्मजः
कपिः॥३०॥

तिनिर्देशः॥२५॥ समाहितोऽवहितः अतिसहोऽतिरणक्लेशसहः कर्मगुणोदयात् रणकर्मणांगुणोदयात्कर्षस्यदर्शनाद्धेतोः पूजितइत्यर्थः॥२६॥ परा
क्रमविषयोत्साहेनविवृद्धमानसंयस्यतादृशः सन्मांसमीक्षतेनतुकातर्येणेत्यर्थः प्रमुखः वीरमुखः॥२७॥ उपेक्षितोयंननाभिभवेत् अभिभवेदेवे
त्यर्थः॥२८॥ स्वकर्मयोगं स्वस्यकर्मणियोगंज्ञानं बलविशेषावस्थानलक्षणमुपायं॥२९॥ निवर्तनेनानाविधमंडलगमनेसमाहितान्शिक्षितानवा
युसेवितेपथिस्थितःस्थितांश्च॥३०॥

नीडंरथ्यधिष्ठानस्थानं॥३१॥मरुतामालयंस्वर्गसुप्तनष्टर्षिरिव॥२४॥पतत्रीतिगरुडवाडसिद्धसेवितेतंसमयेसंतंपादयोर्जग्राहतस्तनय॥३३॥समा
विध्यभ्रामयित्वागरुत्सुइवअसंधिरल्पयावबौंगहीत्वेवेमर्थ॥२४॥३५॥चक्रचरैर्जोमिश्चक्रचरैर्यहादिभिःसमेत्यसमागतैःजातविस्मयैर्निरीक्षितइत्यव

ततस्तलेनाभिहतोमहारथःसतस्यपिंगाधिपमंत्रिनिर्जितः सभग्ननीडःपरिवृत्तकूबरःपपातभूमौहतवाजिरंबरात्॥३१॥सतंपरित्यज्यमहा
रथोरथंसकार्मुकःखड्गधरःखमुत्पतन्॥ततोभियोगादृषिरुग्रवीर्यवान्विहायदेहंमरुतामिवालयं॥३२॥कपिस्ततस्तंविचरंतमंबरेपतत्रिराजानिल
सिद्धसेविते॥समेत्यतंमारुतवेगविक्रमःक्रमेणजग्राहचपादयोर्दृढं॥३३॥सतंसमाविध्यसहस्रशःकपिर्महोरगंगृह्यइवांडजेश्वरः॥मुमोचवे
गात्पितृतुल्यविक्रमोमहीतलेसंयतिवानरोत्तमः॥३४॥सभग्नबाहूरुकटीपयोधरःक्षरन्नसृक्निर्मथितास्थिलोचनः॥संभिन्नसंधिःप्रविकीर्णबं
धनोहतःक्षितौवायुसुतेनराक्षसः॥३५॥महाकपिर्भूमितलेनपीड्यतंचकाररक्षोधिपतेर्महद्भयं॥महर्षिभिश्चक्रचरैःसमागतैःसमेत्यभूतैश्च
सयक्षपन्नगैः॥सुरैश्चसेंद्रैर्भृशजातविस्मयैर्हतेकुमारेसकपिर्निरीक्षितः॥३६॥निहत्यतंवज्रिसुतोपमंरणेकुमारमक्षंक्षतजोपमेक्षणं॥त
देववीरोभिजगामतोरणंकृतक्षणःकालइवप्रजाक्षये॥३७॥इत्यार्षेश्रीरामा०सुंद०सप्तचत्वारिंशःसर्गः॥४७॥ततस्तुरक्षोधिपतिर्महात्माहनूम
ताक्षेनिहतेकुमारे॥मनःसमाधायसदेवकल्पंसमादिदेशेंद्रजितंसरोषः॥१॥त्वमस्त्रविच्छस्त्रभृतांवरिष्ठःसुरासुराणामपिशोकदाता॥सुरेषुसेंद्रेषु
चदृष्टकर्मापितामहाराधनसंचितास्त्रः॥२॥

॥यः॥३६॥वज्रिसुतोपमंजयंततुल्यं॥कृतक्षणाःपुनर्युद्धेकृतोत्साहः॥३७॥असंगमानः॥इतिश्रा०सुं०सप्तच
त्वारिंशःसर्गः॥४७॥मनःसमाधायपुत्रनाशखिन्नमपिचेतोधीरतयाप्रकाशितभयंप्रतिष्ठाप्य॥१॥पितामहाराधनेनसंचितास्त्रःप्राप्तब्रह्मास्त्रोसीत्य

४

सुरेश्वरसमाश्रिताअपिरणेस्थातुंनशेकुः॥३॥कश्चित्वदन्योगतश्रमोनसर्वेप्राप्तश्रमाइत्यर्थः भुजवीर्याभिगुप्तः तपसाभिरक्षितदेशकालप्रधानश्चमत्ता
सत्तमः प्रशस्ततरश्चत्वमेवेत्यन्वयः॥४॥समरेषुकर्त्तव्यानांकर्मणांमध्येऽशक्यंनास्तिकर्मणामित्येवपाठः सांप्रदायिकइतिकतकः मतिपूर्वंमंत्रोशास्त्रानु
रूपवुद्धिपूर्वकर्त्तव्यराजकार्यविचारेतेऽकार्यंनास्तिकार्यासाधकविचारोनास्तीत्यर्थः त्रिषुसंयद्देष्वत्रिष्वपिलोकेषुभोक्तृभिःकर्मणांसंगृह्यतइतिसंग्र

त्वदस्त्रवलमासाद्यससुराःसमरुद्गणाः नशेकुःसमरेस्थातुंसुरेश्वरसमाश्रिताः॥३॥नकश्चित्त्रिषुलोकेषुसंयुगेनगतश्रमः॥भुजवीर्या
भिगुप्तश्चतपसाचाभिरक्षितः॥देशकालप्रधानश्चत्वमेवमतिसत्तमः॥४॥नतेस्त्यशक्यंसमरेषुकर्मणांनतेस्त्यकार्यंमतिरूपमंत्रणे॥
नसोस्तिकश्चित्त्रिषुसंयुगेषुवैनवेदयस्तेस्त्रवलंवलंचते॥५॥ममानुरूपंतपसोवलंचतेपराक्रमश्चास्त्रवलंचसंयुगे॥नत्वांसमासाद्यर
णावमर्देमनःश्रमंगच्छतिनिश्चितार्थ॥६॥निहताःकिंकराःसर्वेजंबूमालीचराक्षसः॥अमात्यपुत्रावीराश्चपंचसेनाग्रगामिनः॥७॥वलानि
सुसमृद्धानिसाश्वनागरथानिच॥महोदरस्थशायितःकुमारोक्षश्चसूदितः॥नतुतेष्वेवमेसारोयस्त्वय्यरिनिषूदन॥८॥इदंचदृष्ट्वानिहतं
महद्वलंकपेःप्रभावंचपराक्रमंच॥त्वमात्मनश्चापिनिरीक्ष्यसारंकुरुष्ववेगंस्ववलानुरूपं॥९॥

॥ह्लोकाः तेषुतेऽस्त्रवलंसहजंचवलंयोनवेद
सकश्चिदपिनास्तिसर्वप्रसिद्धवलद्वयवलवानित्यर्थः॥५॥ममानुरूपंमत्सदृशंरणावमर्देयुद्धसंघर्षेत्वांसमासाद्यप्राप्यमेमनोजयविषयेनि
श्चितार्थंसत्श्रमंविषादंनगच्छतित्वद्वलंसर्वत्राश्वसिमीत्यर्थः॥६॥प्रकृतमाह॥निहताइति॥७॥हेअरिनिषूदनत्वयिमेयःसारःउत्कर्षवुद्धिःस
तेषुनत्वेवेत्यन्वयः यद्वामेसारःसर्वजगज्जयसामर्थ्यंसत्वय्येवत्वत्साहाय्यनिमित्तकस्त्वनतुतेषु नतुमत्साहाय्यनिमित्तकइत्यर्थः॥८॥९॥

गतेउद्धायनिर्गतेत्वयिसन्निकृष्टेसतिवलावमर्दैःअनेकवलप्रमथनैर्हेतुभिःशांतशत्रुःउपशांतवलःशत्रुःयथाशाम्यतिक्षीणोभवतितथात्मवलंपरवलंचसमीक्ष्यारभस्ववलावमर्दैरितिशांतशत्रुरितिपाठेइतिकतकः वलावमर्दैइतिशांतशत्रोइत्यपिपठित्वाहेःस्त्वन्मतांवरिष्ठत्वयियुद्धायगतेसन्निकृष्टेहनूमन्समीपप्राप्तेवलावमर्दैःसेनानाशेयथाशाम्यतिनभवतितथारभस्वेत्यर्थइतितीर्थः॥१०॥अथतत्रसेनादिपरिग्रहोव्यर्थइत्याह· नवीरेति हेवीरसेनाननयाह्वायतस्तागणाशाःसंघशश्च्यवंतिपलायंतेनश्यंतिच॥तथाविशालसारंअतितैक्ष्ण्यकाठिन्यवत्अनस्पवद्वज्रंतत्तुल्यंआयुधजालमादायापिनप्रयोजनं·गणाशःप्रयुक्तस्यतस्यापिप्रच्यवादेवगणाशोच्यवंतीत्यत्रोक्तमार्येऽकतस्तत्राहनेतिमारुतापत्यस्यमारुतस्यगतेःसामर्थ्यस्यप्र

वलावमर्दैस्त्वयिसन्निकृष्टेयथागतेशाम्यतिशांतशत्रुः॥तथासमीक्ष्यात्मवलंपरंचसमारभस्वास्त्वन्मतांवरिष्ठ॥१०॥नवीरसेनागणाशो
च्यवंतिनवज्रमादायविशालसारम्॥नमारुतस्यास्तिगतिप्रमाणंनचाग्निकल्पःकरणोनहंतुः॥११॥

॥माणंपरिच्छेदःएतावद्वलंनिग्रहीतुंशक्तमितिपरिच्छेदोनास्ति अतोलोकंनिखिलमपिवलंतस्याकिंचित्करमित्यर्थः॥ किंचाग्निकल्पोऽग्नितुल्योऽसौकरणोनशस्त्रादिरूपेणहंतुंनशक्यंजयत्यतिवलोरामइत्येतत्घोषणासमयेहनूमान्शत्रुसैन्यानांनिहंतामारुतात्मजइत्युक्तेरिहरावणस्यमारुतस्यतुक्तिर्नोसमंजसा·पराक्रमातिशयदर्शनाऽपेक्षामात्रेणात्तुकिंचित्कृतमितिप्रागुक्तेकेचित्तुगणान्शोवयंतीतिगणाशोकहनूमान्तस्मिन्सेनाःनावंतिनतानरक्षंतीत्यर्थइतिवदंति·तत्रावनेत्रायतिसमानार्थत्वात्पंचमीप्राप्तौसत्यांषष्ठीतवोत्ववत्·एवंविशालसारमित्यत्रविषअलसारमितिच्छेदंकुर्वंतिअलसारंकंठसारंवज्रंतत्तुल्यमप्यायुधमादायनविशरणंनप्रविशंतिचव्याचक्षते॥अलतेर्धातोःपर्याप्त्यर्थत्वेनपर्याप्तसारमितिव्याख्यातुंयोग्यंकंठेत्यर्थस्यततोऽलाभात्॥११॥ ॥छ॥ ॥

ति १

किंवलावष्टंभे नगंतव्यमितिशंकायांतत्त्वविशेषमुपदिशति·तमिति·तंमदुक्तमर्थंएवमेवप्रसमीक्ष्यएवमेवतत्त्वमितिनिश्चित्यस्वकर्मसाम्यात्स्वैनै
वकर्मणाःप्रकृतकार्यस्यसाम्यात्सिद्धेःसंपादनीयत्वात्त्वंसमाहितात्मासमाहितचित्तोभूत्वास्याविजयेदिव्यधनुषोवीर्यंदिव्यास्त्रमोक्षसामर्थ्यंस्मर
नेनिश्चित्वत्त्व्रजगत्वाचाक्षतंपरकीयप्रहाररहीनंयथाभवतितथाशत्रुपराभवकर्मारभस्व॥१२॥हेमतिमश्रेष्ठप्रशस्तबुद्धेअहंत्वांअतिप्रियंईदृ
शेसंकटेप्रेषयामि·इयंप्रेषणानोचितास्वलुअथापिइयंमतिःराजधर्माणामस्माकंतथाक्षत्रस्यक्षत्रियस्यचमतेव·शाश्वतःसंमतैव॥१३॥

तमेवमर्थंप्रसमीक्ष्यसम्यक्स्वकर्मसाम्याद्धिसमाहितात्मा॥स्मरंश्चदिव्यंधनुषोस्यवीर्यंव्रजाक्षतंकर्मसमारभस्व॥१२॥नखल्वियंमति
श्रेष्ठयंत्वांसंप्रेषयाम्यहं॥इयंचराजधर्माणांक्षत्रस्यचमतिर्मता॥१३॥नानाशास्त्रेषुसंग्रामेवैशारद्यमरिंदम॥अवश्यमेववोद्धव्यंकाम्यश्चवि
जयोरणो॥१४॥ततःपितुस्तद्वचनंनिशम्यप्रदक्षिणंदक्षसुतप्रभावः॥चकारभर्त्तारमनित्वरेणरणायवीरःप्रतिपन्नबुद्धिः॥१५॥ततस्तैःस्वगणैरि
ष्टैरिंद्रजित्प्रतिपूजितः॥उत्साहोद्धतहृत्तोत्साहःसंग्रामंसंप्रपद्यत॥१६॥

॥अथराज्ञःक्षत्रियस्यचकृत्यमाह·नानेति·नानाशास्त्रेषु·धर्मार्थनीत्यादिशा
स्त्रेषुसंग्रामेचवैशारद्यंसंप्राप्तमितिशेषः·यस्यरणेविजयःकाम्योभवति॥तेनोक्तंनानाशास्त्रमवश्यंवोद्धव्यमेवेत्यर्थः·यद्वापरस्यनानाशास्त्रेषुय
द्वैशारद्यमस्तितद्योद्धाअवश्यमेवोद्धव्यंतुच्छापिरणेस्वस्यविजयःप्रार्थ्यस्तदअहंजेष्यामीतिबुद्ध्यायुद्धमारभ्यमेवनतुतादृशशत्रोरपिनिवर्ति
तव्यमित्यर्थः·केचित्तुनानाशास्त्रैरिति·योद्धव्यमितिपठित्वा नानाशास्त्रकरणकसंग्रामेवैशारद्येसामर्थ्येनवास्तिअतस्त्वयाऽवश्यंयोद्धव्यमेवरणेज
यश्चप्रार्थनीयएवेतिव्याचक्षते॥१४॥दक्षसुताःदेवाःप्रदक्षिणांचकारभर्त्तारंराजानंरावणंरणायअनित्वरेणानित्वरयागंतुंकृतबुद्धिः॥१५॥स्वगणैः

अन्यैःसभास्थैःराक्षसैःप्रद्धेउद्धतश्चासौहृतोत्साहश्चसंप्रपद्यतस
प्रापद्यत॥१६॥

पर्वणीतिवर्धमानइतिशेषः॥१७॥ पक्षिराजोपमैरन्योन्यतुल्यवेगैरश्वबालैःसर्पैः॥१८॥१९॥२०॥ शितशल्यान्तीक्ष्णाग्रान्॥२१॥ संयतितद्विषयेजातहर्षो दि

श्रीमान्पृथुविशालाक्षोराक्षसाधिपतेःसुतः॥ निर्जगाममहातेजाःसमुद्रइवपर्वणि॥१७॥ सपक्षिराजोपमतुल्यवेगैर्व्यालैश्चतुर्भिःसतुतीक्ष्णदंष्ट्रैः
रथंसमायुक्तमसह्यवेगःसमारुरोहेंद्रजिदिंद्रकल्पः॥१८॥ सरथीधन्विनांश्रेष्ठःशस्त्रज्ञोस्त्रविदांवरः॥ रथेनाभिययौक्षिप्रंहनूमान्यत्रसोभवत्॥१९॥
सतस्यरथनिर्घोषंज्यास्वनंकार्मुकस्यच॥ निशम्यहरिवीरोसौसंप्रहृष्टतरोभवत्॥२०॥ इंद्रजिच्चापमादायशितशल्यांश्चसायकान्॥ हनूमंतमम
भिप्रेत्यजगामरणपंडितः॥२१॥ तस्मिंस्ततःसंयतिजातहर्षेरणायनिर्गच्छतिबाणपाणौ॥ दिशश्चसर्वाःकलुषाबभूवुर्मृगाश्चरौद्राबहुधाविने
दुः॥२२॥ समागतास्तत्रतुनागयक्षामहर्षयश्चक्रचराश्चसिद्धाः॥ नभःसमावृत्यचपक्षिसंघाविनेदुरुच्चैःपरमप्रहृष्टाः॥२३॥ आयांतंसरथंदृष्ट्वा
तूर्णमिंद्रध्वजंकपिः॥ ननादचमहानादंव्यवर्धतचवेगवान्॥२४॥ इंद्रजित्तुरथंदिव्यमाश्रितश्चित्रकार्मुकः॥ धनुर्विस्फारयामासतडिदूर्जितनिस्व
नं॥२५॥ ततःसमेतावतितीक्ष्णवेगौमहाबलौतौरणनिर्विशंकौ॥ कपिश्चरक्षोधिपतेस्तनूजःसुरासुरेंद्राविवबद्धवैरौ॥२६॥ सतस्यवीरस्यमहारथ
स्यधनुष्मतःसंयतिसंमतस्य॥ शरप्रवेगंव्यहनत्प्रवृद्धश्चचारमार्गेपितुरप्रमेयः॥२७॥ ततःशरानायततीक्ष्णशल्यान्सुपत्रिणःकांचनचित्रपुंखान्
मुमोचवीरःपरवीरहंतासुसंततान्वज्रसमानवेगान्॥२८॥ ततःसतत्स्यंदननिःस्वनंचमृदंगभेरीपटहस्वनंच॥ विकृष्यमाणस्यचकार्मुकस्य
निशम्यघोरंपुनरुत्पपात॥२९॥

॥शब्दैस्सुस्यातवर्णानंरौद्रामृगाःक्रोष्टुप्रभृतयः॥२२॥ चक्रचराग्रहाःपरमंप्रहृष्टाविनेदुरितिशुभनिमित्तं॥२३॥
इंद्रध्वजंइंद्राकारचिह्नवत्ध्वजं॥२४॥ तडिदूर्जितनिस्वनंतडिन्निभमूर्जितस्वनंच॥२५॥२६॥ व्याहनत्वंचितवान्॥२७॥ सुपत्रिणःकंकादिपक्षयुक्ताः

सुसंततान्अविरतान्॥२८॥२९॥

अभिलक्ष्यस्य अभिमतलक्ष्यस्य लक्ष्यसंग्रहं लक्ष्यत्वेन संग्रहणं मोक्षयन् मोघीकुर्वन् व्यर्थीकुर्वन् इति यावत् । शराणामंतरेषु रंध्रेषु व्यवर्तत परिवर्तते स्म
इत्यर्थः ॥ ३० ॥ अभिवर्तत अभ्यवर्तत ततः शरमोक्षसमये पुनरुत्पपात ॥ ३१ ॥ ३२ ॥ निर्विषहौ दुःसहवेगौ ॥ ३३ ॥ अमोघेषु शरेषु संपतत्स्वपि लक्ष्ये लक्ष
भूते हनूमति विहन्यमाने शरेभ्यः स्वयमेव मुच्यमाने शरैरभिद्यमाने सतीत्यर्थः । हंतेर्गत्यर्थात् कर्मकर्तरि शानच् समाधिसंयोगेन ध्यानकरणेन तत्त्वरू

शराणामंतरेष्वाशु व्यावर्तत महाकपिः ॥ हरिस्तस्याभिलक्ष्यस्य मोक्षयन् लक्ष्यसंग्रहं ॥ ३० ॥ शराणामग्रतस्तस्य पुनः समभिवर्तत ॥ प्रसार्य हस्तौ
हनुमानुत्पपातानिलात्मजः ॥ ३१ ॥ तावुभौ वेगसंपन्नौ रणकर्मविशारदौ सर्वभूतमनोग्राहि चक्रतुर्युद्धमुत्तमं ॥ ३२ ॥ हनूमतो वेद न राक्षसोंत
रं न मारुतिस्तस्य महात्मनोंतरं ॥ परस्परं निर्विषहौ बभूवतुः समेत्य तौ देवसमानविक्रमौ ॥ ३३ ॥ ततस्तु लक्ष्ये स विहन्यमाने शरेष्वमोघेषु च सं
पतत्सु ॥ जगाम चिंतां महतीं महात्मा समाधिसंयोगसमाहितात्मा ॥ ३४ ॥ ततो मतिं राक्षसराजसूनुश्चकार तस्मिन् हरिवीरमुख्ये ॥ अवध्यतां त
स्य कपेः समीक्ष्य कथं निगच्छेदिति निग्रहार्थं ॥ ३५ ॥ ततः पैतामहं वीरः सोऽस्त्रमस्त्रविदां वरः ॥ संदधे सुमहातेजास्तं हरिप्रवरं प्रति ॥ ३६ ॥ अवध्योय
मिति ज्ञात्वा तमस्त्रेणास्त्रतत्त्ववित् ॥ निजग्राह महाबाहुं मारुतात्मजमिंद्रजित् ॥ ३७ ॥ तेन बद्धस्ततोऽस्त्रेण राक्षसेन स वानरः ॥ अभवन्निर्विचेष्टश्च
पपात च महीतले ॥ ३८ ॥ ततोऽथ बुध्वा स तदास्त्रबंधं प्रभोः प्रभावाद्विगतात्मवेगः ॥ पितामहानुग्रहमात्मनश्च विचिंतयामास हरिप्रवीरः ॥ ३९ ॥

पतानाय समाहितात्मा एकाग्रचित्तः ॥ ३४ ॥ ततो ध्यानानंतरं अवध्योयमिति ध्यानेन ज्ञात्वा ॥ निग्रहार्थं बंधनार्थं बंधनमुद्दिश्य कथं निर्गच्छेत् कथं निश्चे
ष्टो भवेदिति मतिं विचारं चकार ॥ ३५ ॥ ३६ ॥ ब्रह्मास्त्रेणाप्यवध्यतां ज्ञात्वा तदस्त्रेण तं निजग्राह बबंध ॥ ३७ ॥ ३८ ॥ स हनुमांस्तस्य तदस्त्रबंधं ब्रह्मास्त्रबंधं कृतं

बुध्वापि प्रभोर्ब्रह्मणः प्रभावाद्वरदानात् विगतात्मवेगः विगतो अपगत आत्मनोऽपि वेगः पीडा येन तादृशः अभीतचित्त इति यावत् आत्मनः पितामहानुग्रहं मुहूर्त्तमा
त्रेणास्त्रनिरोधमुक्तिरित्येवं रूपं ॥ ३९ ॥

327

उक्तमेवार्थं स्पष्टयति तत इति स्वायंभुवैः स्वयंभूदेवस्यैरनेकविधैर्मंत्रैरभिमंत्रितस्तत्सिद्धं भवति तादृशं ब्रह्मास्त्रं ततः कृतनिरोधं बुद्ध्वा पितामहात्तद्वरं वररूपं दानं
प्रागुक्तरूपं चिंतयामास ॥ ४० ॥ लोकगुरोः प्रभावान्मे हनूमतोऽस्यास्त्रबंधस्य विमोक्षणे शक्तिर्नास्तीत्येवं ध्यानेन ज्ञात्वा एवमनुभूयमानप्रकारेणासमानेन वि
हितआत्मयोनेरस्त्रबंधो मयानुवर्त्तितव्य एवं मुहूर्त्तमात्रं सोढव्य एव ॥ ४१ ॥ विमोक्षशक्तिं मुहूर्त्तमात्रं पितामहाज्ञामनुवर्त्तते स्म ॥ ४२ ॥ भयं न जायते तत्र हे

ततः स्वायंभुवैर्मंत्रैर्ब्रह्मास्त्रं चाभिमंत्रितं ॥ हनुमांश्चिंतयामास वरदानं पितामहात् ॥ ४० ॥ न मेऽस्य बंधस्य च शक्तिरस्ति विमोक्षणे लोकगुरोः प्रभा
वात् ॥ इत्येवमेवं विहितोऽस्त्रबंधो मयात्मयोनेरनुवर्त्तितव्यः ॥ ४१ ॥ स्ववीर्य्यमस्त्रस्य कपिर्विचार्य पितामहानुग्रहमात्मनश्च ॥ विमोक्षश
क्तिं परिचिंतयित्वा पितामहाज्ञामनुवर्त्तते स्म ॥ ४२ ॥ अस्त्रेणापि हि बद्धस्य भयं मम न जायते ॥ पितामहमहेंद्राभ्यां रक्षितस्यानिलेन च ॥ ४३ ॥
ग्रहणे चापि रक्षोभिर्महन्मे गुणदर्शनं ॥ राक्षसेंद्रेण संवादस्तस्माद्गृह्णंतु मां परे ॥ ४४ ॥ स निश्चितार्थः परवीरहंता समीक्ष्यकारी विनिवृत्त
चेष्टः ॥ परैः प्रसह्याभिगतैर्निगृह्य ननाद तैस्तैः परिभर्त्स्यमानः ॥ ४५ ॥ ततस्ते राक्षसा दृष्ट्वा विनिश्चेष्टमरिंदमं ॥ बबंधुः शणवल्कैश्च द्रुमची
रैश्च संहितैः ॥ ४७ ॥ स रोचयामास परैश्च बंधं प्रसह्य वीरैरभिगर्हणं च ॥ कौतूहलान्मां यदि राक्षसेंद्रो द्रष्टुं व्यवस्येदिति निश्चितार्थः ॥ ४७ ॥

तुः पितामहेत्यादि आदिमया सप्रवृत्तिसमये एव त्रयानुग्रहः प्रागुक्तः ॥ ४३ ॥ मे महद्गुणदर्शनमस्तीति शेषः राक्षसेंद्रेण संवाद इति ॥ ४४ ॥ निश्चितार्थः
उक्तरीत्येति भावः समीक्ष्यकारी विचारपूर्वकं कार्यकर्त्ता अभिगतैरभिसृत्य गतैः परैः प्रसह्य निगृह्य बलाद्गृहीत्वा परिभर्त्स्यमानः सन्ननाद पीडित इवेति
भावः ॥ ४५ ॥ शणवल्कैः तज्जनरज्जुभिः संहितैः रज्जुरूपेण कृतैर्द्रुमचीरैः द्रुमवल्कलैः ॥ ४६ ॥ कौतूहलान्मां द्रष्टुं व्यवस्येदिति निश्चितार्थः निश्चितकार्यतत्वः
सन्स्वस्य तत्संभाषणापेक्षितत्वात् बंधादिकं रोचयामास ॥ ४७ ॥

अस्त्रबंधमोक्षोपिन दैवजायतइत्याह स इति वल्कलेन ततजन्यरज्ज्वैव बद्धः अस्त्रेणातु विमुक्तः ज्ञातस्तचाह अस्त्रबंधो मंत्रबंधोन्यबंधनात्तु वर्ततेइतरबंधेनसहनति
ष्ठतितस्मिन्सतिमंत्रबंधोनश्यतीत्यर्थः॥४८॥ इममर्थमिंद्रजिदपिज्ञातवानित्याह अथेति अस्त्रेणाविमुक्तं विचार्यतत्वा अन्येनबद्धोपि हनुमानस्त्रमनुवर्तते
अस्त्रेणाबद्धँ वर्ततइत्यपि विचार्य चिंतां जगामेति संबंधः नान्येन बंधेस्यत्तु वर्तते नेत्त्रमिति पाठे चिंतास्वरूपमिदं राक्षसैः स्वकृतबंधनाशात्खेदं जगामेत्यर्थः॥४९॥
चिंतामाह अहो इति पाठांतरे चिंतांतरमिदं मया कृतं महत्कर्म निरर्थं कृतं राक्षसैः यतस्तैर्मंत्रगतिर्न विमृष्टा न विचारिता अन्यबंधे मंत्रबंधो नश्यतीति न ज्ञात

स बद्धस्तेन वल्केन विमुक्तोस्त्रेण वीर्यवान्॥ अस्त्रबंधः स चान्यं हि न बंधमनुवर्तते॥४८॥ अथेंद्रजित्तं द्रुमचीरबद्धं विचार्य वीरः कपिसत्तमं तं॥ वि
मुक्तमस्त्रेण जगाम चिंतामन्येन बद्धोप्यनुवर्ततेस्त्रं॥४९॥ अहो महत्कर्मकृतं निरर्थं न राक्षसैर्मंत्रगतिर्विमृष्टा॥ पुनश्च नास्त्रे विहतेस्त्रमन्यत्प्रवर्त
ते संशयिताः स्म सर्वे॥५०॥ अस्त्रेण हनुमान्मुक्तो नात्मानमवबुध्यत॥ कृष्यमाणस्तु रक्षोभिस्तैश्च बंधैर्निपीडितः॥५१॥ हन्यमानस्ततः क्रूरै राक्ष
सैः कालमुष्टिभिः समीपं राक्षसेंद्रस्य प्राकृष्यत स वानरः॥५२॥ अथेंद्रजित्तं प्रसमीक्ष्य मुक्तमस्त्रेण बद्धं द्रुमचीरसूत्रैः॥ व्यदर्शयत्तत्र महाबलं तं
हरिप्रवीरं सगणाय राज्ञे॥४३॥ तं मत्तमिव मातंगं बद्धं कपिवरोत्तमं॥ राक्षसा राक्षसेंद्राय रावणाय न्यवेदयन्॥५४॥

॥मित्यर्थः पुनरस्त्रं तदेव प्रयोज्यं
नत्राह अस्त्रे ब्राह्मे विहते पुनरन्यदस्त्रं तदस्त्रप्रयोगांतरं न प्रवर्तते अतः॥ सर्वे वयं संशयिताः संशयितजयाः एवं मुक्तोयं सर्वानपि हन्यादिति भावः॥५०॥
अस्त्रविमोक्षं राक्षमोक्षवदपरीक्षनया ज्ञातवानपि हनूमानात्मनस्तथात्वापयन्नित्याह अस्त्रेणेति अवबुध्यत अंतर्भावितण्यर्थः अयात्मनावबोधयतिस्म अस्त्रमो
क्षं न प्रकाशयतिस्मेत्यर्थः तैर्बंधैः लौकिकबंधैः अनस्त्रबंधैः कृष्यमाणात्यादिगुराकः राक्षसेंद्रसमीपं प्राकृष्यत॥५१॥५२॥५३॥ कस्यस्तु म इति शेषः कोऽस्य पात्र

यः अस्येति शेषः कस्याश्रयेणैवं निर्भय इत्यर्थः॥५४॥

328

यत्र रावणः स्थितस्तत्रत्या राक्षसा एवमब्रुवन्नित्यर्थः ॥५५॥ परिचारवृद्धान् वृद्धान् परिचारकान् इत्यर्थः ॥५६॥५७॥५८॥ वक्ष्यमाणसंक्षेपोऽर्थेति मंत्रीन्मंत्रिणा
इत्यर्थः ॥५९॥ कार्यार्थं कर्तव्यमर्थस्तत्प्रयोजनं च समाहारद्वंद्वः अर्थस्य मूलमुक्तप्रयोजनप्रवर्तकं उत्तराशयस्तु दूतं कृत्यप्रेरकः सुग्रीव इति ॥६०॥ नतिमा

कोऽयं कस्य कुतो वापि किं कार्यं कोऽभ्युपाश्रयः । इति राक्षसवीराणां दृष्ट्वा संजज्ञिरे कथाः ॥५५॥ हन्यतां दह्यतां वापि भक्ष्यतामिति चापरे ॥ राक्षसा
स्तत्र संक्रुद्धाः परस्परमथाब्रुवन् ॥५६॥ अतीत्य मार्गं सहसा महात्मा स तत्र रक्षोधिपपादमूले । ददर्श राज्ञः परिचारवृद्धान् गृहं महारत्नविभूषितं च ॥५६॥
स ददर्श महातेजा रावणः कपिसत्तमः ॥ रक्षोभिर्विकृताकारैः कृष्यमाणमितस्ततः ॥५७॥ राक्षसाधिपतिं चापि ददर्श कपिसत्तमः ॥ तेजोबलसमायुक्तं
तपन्तमिव भास्करं ॥५८॥ स रोषसंवर्तितताम्रदृष्टिर्दशाननस्तं कपिमन्ववेक्ष्य । अथोपविष्टान्कुलशीलवृद्धान्समादिशत्तं प्रति मुख्यमंत्रीन् ॥५९॥
यथाक्रमं तैः स कपिश्च पृष्टः कार्यार्थमर्थस्य च मूलमादौ ॥ निवेदयामास हरीश्वरस्य दूतः सकाशादहमागतोऽस्मि ॥६०॥ इत्यार्षे श्रीमद्रामायणे वा॰
सुंदरकांडेऽष्टचत्वारिंशः सर्गः ॥४८॥ ततः स कर्मणा तस्य विस्मितो भीमविक्रमः । हनूमान्क्रोधताम्राक्षो रक्षोधिपमवैक्षत ॥१॥ भ्राजमानं म
हार्हेण कांचनेन विराजता ॥ मुक्ताजालवृतेनाथ मुकुटेन महाद्युतिं ॥२॥ वज्रसंयोगसंयुक्तैर्महार्हमणिविग्रहैः ॥ हैमैराभरणैश्चित्रैर्मनसेव प्रक
ल्पितैः ॥३॥ महार्हक्षौमसंवीतं रक्तचंदनरूषितं ॥ स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥४॥

॥न॥ इति श्रीरामाभिरामे सुंदरकांडेऽ
ष्टचत्वारिंशः सर्गः ॥४८॥ तस्येंद्रजितः यत्तु रावणस्येति तत्रैतेन हनूमति कस्यापि कर्मणोऽकृतत्वादिति कतकः एतद्द्वारा स्वबंधनकर्मणेत्यर्थ इति ती
र्थः ॥१॥२॥ वज्रसंयोगेन तत्तद्घटनेन संयुक्तैर्घटितैर्महार्हमणिविग्रहैः वज्रमूल्यमणिप्रधानस्वरूपैः ॥३॥ भक्तिभिः शैवत्रिपुंड्रवत्रचनाविशेषैः ॥४॥

विचित्रमाश्चर्यमन्तर्मे दशनच्छदे प्रलंबवलंवदशनच्छदवंतं ॥५॥ शिरोभिर्दशभिरिति हनूमतो दर्शनकाले रणइव भीषणारूपकरणादिति बोध्यं ॥६॥ हारेणो
पलक्षितं ॥७॥ केयूरांगदयोरवांतरविशेषः ॥८॥९॥१०॥११॥ चतुर्भिरिवसागरैः परिवृतं तंकृत्स्नंलोकंभूमंडलमिवेत्यर्थः ॥१२॥ मंत्रीतु हितसहायः सचिवः कार्य

विचित्रंदर्शनीयैश्च रक्ताक्षंभीमदर्शनं ॥ दीप्ततीक्ष्णमहादंष्ट्रंप्रलंवंदशनच्छदं ॥५॥ शिरोभिर्दशभिर्वीरं भ्राजमानंमहौजसं ॥ नानाव्यालसमाकी
र्णैः शिखरैरिवमंदरं ॥६॥ नीलांजनचयप्रख्यंहारेणोरसिराजता ॥ पूर्णचंद्राभवक्त्रेणसवालार्कमिवांवुदं ॥७॥ वाहुभिर्वद्धकेयूरैश्चंदनोत्त
मरूषितैः ॥ भ्राजमानांगदैर्भीमैः पंचशीर्षैरिवोरगैः ॥८॥ महतिस्फाटिकेचित्रे रत्नसंयोगचित्रिते ॥ उत्तमास्तरणास्तीर्णे सूपविष्टंवरासने
॥९॥ अलंकृताभिरत्यर्थंप्रमदाभिःसमंततः ॥ वालव्यजनहस्ताभिरारात्समुपसेवितं ॥१०॥ दुर्धरेणप्रहस्तेनमहापार्श्वेनरक्षसा ॥ मंत्रिभिर्मंत्र
तत्त्वज्ञैर्निकुंभेनचमंत्रिणा ॥११॥ उपोपविष्टंरक्षोभिश्चतुर्भिर्वलदर्पितं ॥ कृत्स्नंपरिवृतंलोकंचतुर्भिरिवसागरैः ॥१२॥ मंत्रिभिर्मंत्रतत्त्वज्ञैरन्यैश्च
शुभदर्शिभिः ॥ आश्वास्यमानंसचिवैःसुरैरिवसुरेश्वरं ॥१३॥ अपश्यद्राक्षसपतिंहनूमानतितेजसं ॥ विष्ठितंमेरुशिखरेसतोयमिवतोयदं
॥१४॥ सतैःसंपीड्यमानोपिरक्षोभिर्भीमविक्रमैः ॥ विस्मयंपरमंगत्वारक्षोधिपमवैक्षत ॥१५॥ भ्राजमानंततोदृष्ट्वाहनूमान्राक्षसेश्वरं ॥ मनसाचिं
तयामासतेजसातस्यमोहितः ॥१६॥ अहोरूपमहोधैर्यमहोसत्त्वमहोद्युतिः ॥ अहोराक्षसराजस्यसर्वलक्षणयुक्तता ॥१७॥ यद्यधर्मोनवलवान्स्यादयं
राक्षसेश्वरः ॥ स्यादयंसुरलोकस्यसशक्रस्यापिरक्षिता ॥१८॥

॥महाय॥१३॥१४॥ रक्षोधिपमवैक्षत ननु रक्षःपीडाक्रांतमित्यर्थः ॥१५॥१६॥१७॥ सर्वसंपन्नमतोप्यध
र्मवत्ता महान्दोष इत्याह यदीति बलवान्स्वं विघ्नसंहरणपुन्मूलनक्षमोऽधर्मो यद्यस्मिन्नस्यात्तदायंराक्षसेश्वरः शक्रस्य सुरलोकस्यापि विषुवद्रक्षितास्यात्

स१

पक्षाऽधर्मेइस्यशेआद्यजंतेअयंबलवान्राक्षसेश्वरोयद्यधर्मेवान्नस्यात्तदासशक्र
स्यस्यादिप्राग्वत् अधर्महतत्वात्तुस्तत्प्रजानामपिनाशकत्वेनभावः ॥१८॥

329

केनविभ्यतीतिपाठेकेन इतिपदच्छेदः ॥१८॥२० नरमानः ॥ इतिरामाभिरामे श्रीरा॰सुंदरकांडेएकोनपंचाशः सर्गः ॥४९॥ आविष्टः आसीदितिशेषः ॥१॥ तेज
साहृतं दृष्ट्वेतिशेषः शंकाहतात्मेत्यत्र कांशंकामेवाह नंदीवानरमुखोरोषप्रथमेगणाधिपः ॥२॥ शप्तः मन्मुखसदृशमुखैः नवनाशो भविष्यतीतिशापः वलि

अस्यक्रूरैर्नृशंसैश्चकर्मभिर्लोककुत्सितैः ॥ सर्वेविभ्यतिखल्वस्माल्लोकाः सामरदानवाः ॥१९॥ अयंह्युत्सहतेक्रुद्धः कर्तुमेकार्णवंजगत् ॥ इतिचिं
तांबहुविधामकरोन्मतिमान्कपिः ॥ दृष्ट्वाराक्षसराजस्यप्रभावममितौजसः ॥२०॥ इत्यार्षेश्रीमद्रामायणेवा॰सुंदरकांडेएकोनपंचाशः सर्गः ॥४९॥
तमुद्वीक्ष्यमहाबाहुः पिंगाक्षंपुरतः स्थितं ॥ रोषेणमहताविष्टोरावणोलोकरावणः ॥१॥ शंकाहतात्मादध्यौसकपींद्रंतेजसावृतं ॥ किमेषभग
वान्नंदीभवेत्साक्षादिहागतः ॥२॥ येनशप्तोस्मिकैलासेमयाप्रहसितेपुरा ॥ सोयंवानरमूर्तिःस्यात्किंस्विद्बाणोपिवासुरः ॥३॥ सराजारोषता
म्राक्षः प्रहस्तंमंत्रिसत्तमं ॥ कालयुक्तमुवाचेदंवचोविपुलमर्थवित् ॥४॥ दुरात्मापृच्छ्यतामेषकुतः किंवास्यकारणं ॥ वनभंगेचकोस्यार्थोराक्षसा
नांचतर्जने ॥५॥ मत्पुरीमप्रधृष्यांवैगमनेकिंप्रयोजनं ॥ आयोधनेवाकिंकार्यंपृच्छ्यतामेषदुर्मतिः ॥६॥ रावणस्यवचःश्रुत्वाप्रहस्तोवाक्यमब्रवीत्
समाश्वसिहिभद्रंतेनभीःकार्यात्वयाकपे ॥७॥ यदितावत्त्वमिंद्रेणप्रेषितोरावणालयं ॥ तत्त्वमाख्याहिमातेभूद्भयंवानरमोक्ष्यसे ॥८॥ यदिवैश्र
वणस्यत्वंयमस्यवरुणस्यच ॥ चाररूपमिदंकृत्वाप्रविष्टोनःपुरीमिमां ॥९॥

॥ सुतोवाणोवामहेश्वरभक्तत्वान्नंदिनाप्रेषितइतिशंका ॥३॥ कालयुक्तं
कालोचितं ॥४॥ कुतआगतइतिशेषः किंवाकारणंकोवास्यप्रेषकइत्यर्थः ॥५॥ मत्पुरींप्रविष्टस्येतिशेषः अयोधनेकिंकरादिभिर्युद्धे यद्वा मत्पुरीग
मनेमत्पुरीप्राप्तावितिशेषः आर्षः षष्ठ्यभावः ॥६॥७॥ मोक्ष्यसेबंधनादितिशेषः ॥८॥ चाररूपंचाराणांप्रच्छन्नवेषत्वात्प्रच्छन्नवानररूपं ॥९॥

कुत एवं चिंतानत्राह नहीति वानरमितीदमर्थात्संपन्नं ॥१०॥१२॥ अथवेति अथवेत्यर्थः यन्निमित्तः यत्प्रयोजनः तत्कथयस्वेति संबंधः एवमुक्तः प्रहस्तेनेति
शेषः रक्षोगणेश्वरं प्रहस्तमलक्षीकृत्य रावणमेव तथा कृत्वाब्रवीदित्युत्तरेणान्वयः ॥१२॥ वरुणस्य वा दूतः इति शेषः धनदेन विष्णुना च न मे सख्यमत

विष्णुना प्रेषितो वापि दूतो विजयकांक्षिणा ॥ न हि ते वानरं तेजो रूपमात्रं तु वानरं ॥१०॥ तत्त्वतः कथयस्वाद्य ततो वानर मोक्ष्यसे ॥ अनृतं वदत
श्चापि दुर्लभं तव जीवितं ॥११॥ अथ वा यन्निमित्तस्ते प्रवेशो रावणालये ॥ एवमुक्तो हरिवरस्तदा रक्षोगणेश्वरं ॥१२॥ अब्रवीन्नास्मि शक्रस्य यमस्य
वरुणस्य वा धनदेन न मे सख्यं विष्णुना नास्मि चोदितः ॥१३॥ जातिरेव मम त्वेषा वानरोऽहमिहागतः ॥ दर्शने राक्षसेंद्रस्य तदिदं दुर्लभं मया ॥१४॥
वनं राक्षसराजस्य दर्शनार्थे विनाशितं ॥ ततस्ते राक्षसाः प्राप्ता बलिनो युद्धकांक्षिणः ॥१५॥ रक्षणार्थं च देहस्य प्रतियुद्धा मया रणे ॥ अस्त्रपा
शैर्न शक्योहं बद्धुं देवासुरैरपि ॥१६॥ पितामहादेष वरो ममापि हि समागतः ॥ राजानं द्रष्टुकामेन मयास्त्रमनुवर्तितं ॥१७॥

॥स्ताभ्यां चोदितो नास्मि ॥१३॥

एष वानराकृतिर्मम जातिरेव जन्म कृतैव अतो वानर एवाहमिहागतः ॥ वानरस्यात्रागमने किं प्रयोजनं तत्राह दर्शने इति राक्षसेंद्रस्य तव दर्शने दर्श
ननिमित्तमिहागतमित्यर्थः तर्हि वानरस्यात्रागमने किं प्रयोजनं तत्राह दर्शने इति राक्षसेंद्रस्य तव दर्शने दर्शननिमित्तमिहागतमित्यर्थो तदिदं तव द
र्शनं दुर्लभं प्रकारांतरेणाशक्यलाभमिति ज्ञात्वा तव दर्शनार्थे वनं विनाशितं अयं दर्शनोपायो भवत्येवेत्याह ततः वनभंगाद्धेतोरित्यर्थः ॥१४॥१५॥ इदा
नीं युद्धप्रयोजनमाह रक्षणार्थमिति प्रतियुद्धा मया प्रतिभटतया स्थिताः कृतयुद्धाः नन्वेवं मा विवंधाद्युपर्यालोच्य कथं युद्धं कृतं तत्राहास्त्रेति अस्त्रैर्ब्रह्मा
स्त्रांतैः पाशैर्यमपाशांतैः एवं चेतरपाशकथामपि दूरोपास्तमुक्तं देवासुरैर्मिलितैरपीत्यर्थः ॥१६॥ कुतस्तवैवं बलं तत्राह पितामहादिति तदनुग्रहादित्यर्थः

:ममापि न तु केवलं तवैवेत्यर्थः एष वरः इति बलविशेषरूप इत्यर्थः नहि कथं बंध
नमुपगतं तत्राह राजानमिति अस्त्रं ब्रह्मास्त्रं अनुवर्तितं निवृत्तमप्यनुवर्तितमिव ॥१७॥

330

तदेवाह विसृक्त इति विसृक्तोपि सान्त्व इव अभिवेदितः अनीयत वक्तापितः एवं पीडामनुभूय मम दर्शने किं प्रयोजनं तत्राह केनचिदिति रामकार्येणेति पाठः
पाकः ॥१८॥ रामस्य तव च कः संबंधस्तत्राह दूत इति ॥ ननु रामदूतेनापि सीतान्वेषणमेव कार्यं एवं प्रयासेन मद्दर्शनेन किं फलं तत्राह श्रूयतामिति वचनेन सं
देशवचनं तत्कथनार्थमयं प्रयास इति भावः ॥१९॥ धयमानः ॥ इति रामाभिरामे श्रीरा० सुंदरकांडे पंचाशः सर्गः ॥५०॥ अथ सुग्रीवसंदेशकथनव्याजेन साम

विसृक्तोप्यहमस्तेन राक्षसैस्त्वभिवेदितः ॥ केनचिद्रामकार्येण आगतोस्मि तवांतिकं ॥१८॥ दूतोहमिति विज्ञाय राघवस्यामितौजसः ॥ श्रूयतामेव वचनं
मम पथ्यमिदं प्रभो ॥१९॥ इत्यार्षे श्रीमद्रामायणे वा० सुंदरकांडे पंचाशः सर्गः ॥५०॥ तं समीक्ष्य महासत्वं सत्ववान्हरिसत्तमः ॥ वाक्यमर्थवदव्यग्र
मुवाच दशाननं ॥१॥ अहं सुग्रीवसंदेशादिह प्राप्तस्तवांतिकं । राक्षसेश हरीशस्त्वां भ्राता कुशलमब्रवीत् ॥२॥ भ्रातुः शृणु समादेशं सुग्रीवस्य म
हात्मनः ॥ धर्मार्थसहितं वाक्यमिह चामुत्र च क्षमं ॥३॥ राजा दशरथो नाम रथकुंजरवाजिमान् ॥ पितेव बंधुर्लोकस्य सुरेश्वरसमद्युतिः ॥४॥ ज्येष्ठस्त
स्य महाबाहुः पुत्रः प्रियतरः प्रभुः ॥ पितुर्निदेशान्निष्क्रांतः प्रविष्टो दंडकावनं ॥५॥ लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥ रामो नाम महातेजा धर्म्यं पं
थानमाश्रितः ॥६॥ तस्य भार्या जनस्थाने भ्रष्टा सीतेति विश्रुता ॥ वैदेहस्य सुता राज्ञो जनकस्य महात्मनः ॥७॥ मार्गमाणस्तु तां देवीं राजपुत्रः सहानुजः
ऋश्यमूकमनुप्राप्तः सुग्रीवेण च संगतः ॥८॥ तस्य तेन प्रतिज्ञातं सीतायाः परिमार्गणं ॥ सुग्रीवस्यापि रामेण हरिराज्यं निवेदितं ॥९॥ छ ॥

दंडान्यतरविषयतन्निश्चयाय तन्मायानुसारानवेति जिज्ञासते तमित्यादि ॥१॥ भ्राता हरीश इति स्नेहप्रकाशिका लोकोक्तिः कुशलमब्रवीत् अप्राक्षीदित्यर्थः ॥२॥
क्षमं सुखसंपादकम् ॥३॥ अथ संदेशं वक्तुमुपोद्घातो राजेति पितेव बंधुः रक्षक इत्यर्थः ॥४॥ ६॥ भ्रष्टास्तनाऽपहृतावेति विशिष्य न ज्ञातमित्यर्थः ॥७॥ तां मार्गमाणः स

रामः ऋष्यमूकं प्राप्तः सुग्रीवेण च संगतश्च अनेनैव वृत्तांतेनेदं सुग्रीवसंदेश
वाक्यं न ताहि मयाप्येवं वस्तुसंगत इत्येव वदेत ॥८॥ निवेदितं प्रतिज्ञातमित्युत्कर्षः ॥९॥

॥ रा॰वा॰सुं॰ ॥
॥११८॥

॥१०॥ त्वयाविज्ञातपूर्वो वालीति रावणं प्रति ममोक्तिः तेन रामबलातिशयबोधनं ॥११॥१२॥१३॥१४॥१५॥ त्वां दिदृक्षुरिहागत इति पाठः त्वां सुग्रीवध्वानतरं रावणं
न स्मिन्दृष्टे सर्वलोकवृत्तांतज्ञः स सीतागतिं वक्ष्यतीति सुग्रीवेणोक्तत्वात्त्वां दिदृक्षुरिहागतः दैवात्पम्पापरिगंगापालवनं तवने भ्रमता मया जानकी दृष्टा
१६॥ अतः परं यत्कर्तव्यं मित्रपक्षस्य तद्वदामीत्याह तद्भवानिति दृष्टधर्मार्थः धर्मार्थतत्वसाक्षात्कारवान् तपःकृतपरिग्रहः तपोबलज्ञानधनधान्यादिप

ततस्तेन मृधे हत्वा राजपुत्रेण वालिनं ॥ सुग्रीवः स्थापितो राज्ये हर्यृक्षाणां गणेश्वरः ॥१०॥ त्वयाविज्ञातपूर्वश्च वाली वानरपुंगवः ॥ स तेन निह
तः संख्ये शरेणैकेन वानरः ॥११॥ स सीतामार्गणे व्यग्रः सुग्रीवः सत्यसंगरः ॥ हरीन्संप्रेषयामास दिशः सर्वा हरीश्वरः ॥१२॥ तां हरीणां सहस्राणि
शतानि नियुतानि च ॥ दिक्षु सर्वासु मार्गन्ते ह्यधश्चोपरि चांबरे ॥१३॥ वैनतेयसमाः केचित्केचित्तत्रानिलोपमाः ॥ असंगगतयः शीघ्रा हरिवीरा महा
बलाः ॥१४॥ अहं तु हनुमान्नाम मारुतस्यौरसः सुतः ॥ सीतायास्तु कृते तूर्णं शतयोजनमायतं ॥१५॥ समुद्रं लंघयित्वैव तां दिदृक्षुरिहागतः ॥ भ्रमता च
मया दृष्टा गृहे ते जनकात्मजा ॥१६॥ तद्भवान्दृष्टधर्मार्थस्तपःकृतपरिग्रहः ॥ परदारान्महाप्राज्ञ नोपरोद्धुं त्वमर्हसि ॥१७॥ नहि धर्मविरुद्धेषु बह्व
पायेषु कर्मसु ॥ मूलघातिषु सज्जन्ते बुद्धिमंतो भवद्विधाः ॥१८॥ कश्च लक्ष्मणमुक्तानां रामकोपानुवर्तिनां ॥ शराणामग्रतः स्थातुं शक्तो देवासुरे
ष्वपि ॥१९॥ न चापि त्रिषु लोकेषु राजन्विद्येत कश्चन ॥ राघवस्य व्यलीकं यः कृत्वा सुखमवाप्नुयात् ॥२०॥

॥रिग्रहः यस्य तादृशस्त्वमतः परदारानुप
रोद्धुं नार्हसि दृष्टधर्मार्थतत्वत्वादेव महाप्राज्ञत्वं ॥१७॥ नन्वनेन मम का हानिस्तत्राह नहीति धर्मविरुद्धत्वादेव बह्वपायेषु बह्वनर्थकारणेष्वत एव सर्वापा
यप्रतीकारसमर्थस्य किमनया विभीषिकयेत्यत आह मूलघातिषु समूलनष्टस्य कथं प्रतीकारसामर्थ्यमिति भावः ॥१८॥ मूलघातित्वमेव प्रपंचयति कश्चे

ति ॥१९॥ विद्येत विद्यते व्यलीकमपराधः ॥२०॥

॥ राम ॥
॥११८॥

331

तत्तस्मात्त्रिकालहितं सीतादानेन पूर्वापरनाशात् वर्त्तमानैश्वर्याविरोधात् भाविशुभहेतुत्वाच्च त्रिकालहितत्वं अर्थानुपायिनीति शास्त्रानुगतं वाक्यं मयोच्यमानं नरशार्दूलेति पांक्तः पाठ इति कतकः पुरुषश्रेष्ठेत्यर्थः तदेव वाक्यमाह जानकी प्रतिदीयतामिति ॥ २१ ॥ अत्र सीता नास्तीत्यपह्नवस्त्वशक्य इत्याह दृष्टाहीति यतस्त्वं हे मया दृष्टाऽतोऽपलापोऽशक्य इति भावः किं च यत् वानरकोटिभिरपि दुर्लभं सीतादर्शनं तन्मया लब्धं अतः शेषाशिष्टयुत्तरं कर्म सीतानयनरूपं तत्र तत्साधने राघवः सख्यनिमित्तकारणमात्कस्य अन्विष्यनिवेदनमात्रमिति भावः ॥ २२ ॥ पुनः रावणाहितमाह लक्षितेति पन्नगीमिव स्वनासिकायां न जानासि

तत्त्रिकालहितं वाक्यं धर्म्यमर्थानुयायि च ॥ मन्यस्व नरशार्दूल जानकी प्रतिदीयतां ॥ २१ ॥ दृष्टा हीयं मया देवी लब्धं यदिह दुर्लभं ॥ उत्तरं कर्म यच्छेषं निमित्तं तत्र राघवः ॥ २२ ॥ लक्षितेयं मया सीता तथा शोकपरायणा ॥ गृहे यां नाभिजानासि पञ्चास्यामिव पन्नगीं ॥ २३ ॥ नेयं जरयितुं शक्या सासुरैरमरैरपि ॥ विषसंसृष्टमत्यर्थं भुक्तमन्नमिवौजसा ॥ २४ ॥ तपःसंतापलब्धस्ते सोयं धर्मपरिग्रहः ॥ न स नाशयितुं न्याय्य आत्मप्राणपरिग्रहः ॥ २५ ॥ अवध्यतां तपोभिर्यां भवान्समनुपश्यति ॥ आत्मनः सासुरैर्देवैर्हेतुस्तत्राप्ययं महान् ॥ २६ ॥ सुग्रीवो न च देवोयं न यक्षो न च राक्षसः ॥ मानुषो राघवो राजन्सुग्रीवश्च हरीश्वरः ॥ तस्मात्प्राणपरित्राणं कथं राजन्करिष्यसि ॥ २७ ॥

कायां न जानासि सा मया शोकपरायणा लक्षिता तदैव शोकाग्निनेव पन्नगीविषाग्निनेव त्वन्नगरं दग्धं भविष्यतीति भावः ॥ २३ ॥ ओजसा आहारशक्तिबलेन ॥ २४ ॥ तपःसंतापेन तपःकरणेन यो लब्धो धर्मपरिग्रहो धर्मसाध्यः परिग्रह ऐश्वर्यं आत्मप्राणपरिग्रहश्च आत्मप्राणानां चिरकालं परिग्रह आयुर्वृद्धिश्च स परदारपरिग्रहरूपपरमाऽधर्मेण नाशयितुं न न्याय्यः ॥ २५ ॥ अपि च यां देवाद्यवध्यतां मन्यसे तामपि तपोजन्यमुक्तमेव कारणमतो धर्महानिर्नैकार्ये निवदति अवध्यतामिति तत्रापि अहं महानयमेव तपोमयधर्मस्कंधएव हेतुरित्यर्थः ॥ २६ ॥ किं च देवाद्यवध्य

स्यादिप्राणत्राणाइ करिष्यसि हसुग्रीव इति यस्मात्तद्ग्रहणावेलायां त्वं कुकितः हं तम्भोत्य एवायाराम श्वातत्तस्मात्सुग्रीवात्तवप्राणत्राणसामर्थ्यं नास्तीति भावः ॥ २७ ॥

ननुतपोबलान्मेसर्वतोजयोभविष्यतीत्यतआह नत्विति यत्तुमानधर्मफलसंहितःबलवत्तयाफलेनानुरवाधर्मसंबद्धस्तत्पुरुषंधर्मोपसंहारमपिधर्मो
पसंहृत्वंतमपिनत्वन्वेति धर्मफलमितिशेषः किंतुतदेवफलंफलेनानुरवाधर्मफलमेवान्वेतिननुधर्मबलादधर्मनाशोभविष्यतीत्यत्राह धर्मश्चेति उक्त
रोऽधर्मोत्तरभावीधर्मः अधर्मस्यनाशनःचाउक्तराधर्मोधर्मनाशकः एवंचास्याधर्मस्यप्राक्तनसकलधर्मापेक्षयोत्कटत्वाउत्तरकालत्वाच्चायमेवत्वयाप्राक्
चितनस्यसकलधर्मस्यनाशकइतिभावः केचित्तुधर्मोपसंहारमधर्मफलसंहितंइतिपाठः धर्मोपसंहारंधर्मस्समुपसंक्रियतेनेनेतिधर्मफलंसुखंतदध
र्मफलसंहितंनसंभवति अधर्मफलेनदुःखेनसहानुभवंनभवति तत्तस्मादेवफलमन्वेतिधर्मोधर्मफलंसुखमेवान्वेति एवंधर्मोदुःखदुःखरूपंफल

नतुधर्मोपसंहारमधर्मफलसंहितं॥ तदेवफलमन्वेतिधर्मश्चाधर्मनाशनः॥२८॥ प्राप्तंधर्मफलंतावद्भवतानात्रसंशयः॥ फलमस्याप्य
धर्मस्यक्षिप्रमेवप्रपत्स्यसे॥२९॥ जनस्थानवधंबुद्ध्वावालिनश्चवधंतथा॥ रामसुग्रीवसख्यंचबुध्यस्वहितमात्मनः॥३०॥ कामंखल्वह
मप्येकःसवाजिरथकुंजरां॥ लंकांनाशयितुंशक्तस्तस्यैषतुननिश्चयः॥३१॥

॥मेवान्वेति अथेधर्मोनाधर्मनाशन इतिपाठः पूर्वकृतोधर्मोऽ
धर्मस्येदानींकृतस्यतन्नाशनश्चाद्धर्मोऽपिधर्मनाशनोनेत्यर्थः इतिवदंति तत्रार्थसामंजस्यंबुध्यैर्विभाव्यं॥२८॥ ननुकिंमेधर्मोव्यर्थएवेत्यत्राह
प्राप्तमितितावत्तुधर्मंकृतः पूर्वमितियावत् अस्यपरदारहरणरूपस्यक्षिप्रमेवप्रपत्स्यसे अत्युत्कटैः पुण्यपापैरितिन्यायादितिभाव॥२९॥ अतःस्व
हितंचिंतयेत्याह जनस्थानेति सख्यंचबुध्वा आत्मनोहितंबुध्यस्वेत्यन्वयः॥३०॥ नन्वेवंकटुवादिनस्तवकोरक्षकइतिचेत्तत्राह काममिति यथेष्टमित्यर्थः
नहिकृतस्तन्नाशनकरोमीत्यत्राह तस्ययस्याहंदूतस्तस्यरामस्य एषः मत्कर्तृकलंकानाशविषयोनिश्चयोनस्वाम्याज्ञांविनानदत्तुमानमशक्यमितिभा

तदीयनिश्चयाभावं स्पष्टयति· रामेणेति स्वामिनास्वकर्त्तव्यत्वेन प्रतिज्ञा तस्यार्थस्य सेवकेनानुष्ठानमयुक्तं कर्तुमिति भावः ॥ ३२ ॥ उक्तमेवार्थं दार्ढ्याय पुन
रप्याह अपकुर्वन्निति ॥ ३३ ॥ कालरात्री महाप्रलयकर्त्री भगवतः शक्तिः ॥ ३४ ॥ विग्रहः शरीरं स्कन्धावसक्तेन स्कन्धसंबद्धकरणेन आत्मनि आत्मत्राणे ॥ ३५ ॥ दह्यमा

रामेणाहि प्रतिज्ञातं हर्यृक्षगणसन्निधौ । उत्सादनममित्राणां सीता यैस्तु प्रधर्षिता ॥ ३२ ॥ अपकुर्वन्हि रामस्य साक्षादपि पुरंदरः । न सुखं प्राप्नुयादन्यः
किं पुनस्त्वद्विधोजनः ॥ ३३ ॥ यां सीतेत्यभिजानासि येयं तिष्ठति ते गृहे । कालरात्रीति तां विद्धि सर्वलंकाविनाशिनीं ॥ ३४ ॥ तदलं कालपाशेन सीता
विग्रहरूपिणा । स्वयं स्कन्धावसक्तेन क्षेममात्मनि चिन्त्यतां ॥ ३५ ॥ सीतायास्तेजसा दग्धां रामकोपप्रदीपितां । दह्यमानामिमां पश्य पुरीं साट्टप्रतो
लिकां ॥ ३६ ॥ स्वानि मित्राणि मंत्रींश्च ज्ञातीन्भ्रातॄन्सुतान्हितान् । भोगान्दारांश्च लंकां च मा विनाशमुपानय ॥ ३७ ॥ सत्यं राक्षसराजेन्द्र शृणुष्व वचनं
मम । रामदासस्य दूतस्य वानरस्य विशेषतः ॥ ३८ ॥ सर्वांल्लोकान्सुसंहृत्य सभूतान्सचराचरान् । पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ ३९ ॥ देवा
सुरनरेंद्रेषु यक्षरक्षोरगेषु च । विद्याधरेषु नागेषु गंधर्वेषु मृगेषु च ॥ ४० ॥ सिद्धेषु किंनरेंद्रेषु पतत्रिषु च सर्वतः । सर्वत्र सर्वभूतेषु सर्वकालेषु
नास्ति स ॥ ४१ ॥ यो रामं प्रतियुध्येत विष्णुतुल्यपराक्रमं । सर्वलोकेश्वरस्येह कृत्वा विप्रियमीदृशं । रामस्य राजसिंहस्य दुर्लभं तव जीवितं ॥ ४१ ॥ देवाश्च दैत्या
श्च निशाचरेंद्र गंधर्वविद्याधरनागयक्षाः । रामस्य लोकत्रयनायकस्य स्थातुं न शक्ताः समरेषु सर्वे ॥ ४२ ॥

॥ नां वर्तमानसमीपे लट् प्रतोलिका वीथिः ॥ ३६ ॥ वि
शेषतः निष्कृष्योच्यमानं वचनमित्यर्थः रामदासस्येत्यादिविशेषणत्रयेण राममहिमवेत्तृत्वं स्वस्य परोक्तवाक्यानुवादपूर्वं हितोपदेशाधिकारं नररक्षोतिरिक्तजा
त्यंतरत्वेनापक्षपाततो न्याय्यवक्तृत्वं च सूचितं ॥ ३७ ॥ सभूतान्सर्वजातीयप्राणिसहितान् अनेन जगत्स्थित्युत्पत्तिसंहारकर्तृत्वं बोधितं ॥ ३८ ॥ ३९ ॥ सर्वत्र दे

शे ॥ ४० ॥ ४१ ॥ उक्तमेवार्थं दार्ढ्याय पुनराह देवाश्चेति ॥ ४२ ॥

रामरुद्रो देवताभिरपि नत्राणामित्याह ब्रह्मेत्यादि ब्रह्मस्वयंभूरित्यनेन हिरण्यगर्भः सर्वादिसृष्टः चतुराननस्ततः प्राप्तसृष्ट्यधिकारः त्रिनेत्रस्त्रिपुरान्तको रुद्रो
वेत्यनेन संहाराधिकारी सुरनायको महेन्द्रो महैश्वर्यवान् ॥ इन्द्र उपेन्द्रो विष्णुः पालनाधिकारी एवं त्रिमूर्त्तिभिरपि रक्षा न सिध्यति रामस्यैव त्रिमूर्त्तित्वात्
४४ ४३ ॥ ४५ ॥ भद्यमानः ॥ इति श्रीरामाभिरामे सुंद० एकपंचाशः सर्गः ॥ ५१ ॥ स इति ॥ १ ॥ दौत्यं स्वीयदूतकर्म यथावन्निवेदितवतो हनूमतो अवध्यत्वं मत्वा रावणः

ब्रह्मा स्वयंभूश्चतुराननो वा रुद्रस्त्रिनेत्रस्त्रिपुरांतको वा ॥ इंद्रो महेंद्रः सुरनायको वा स्थातुं न शक्ता युधि राघवस्य ॥ ४३ ॥ स सौष्ठवोपेतमदीनवा
दिनः कपेर्निशम्याप्रतिमोऽप्रियं वचः ॥ दशाननः कोपविवृत्तलोचनः समादिशत्तस्य वधं महाकपेः ॥ ४४ ॥ इत्यार्षे श्रीमद्रामायणे वा० सुंदरकांडे एकपं
चाशः सर्गः ॥ ५१ ॥ स तस्य वचनं श्रुत्वा वानरस्य महात्मनः ॥ आज्ञापयत्वधं तस्य रावणः क्रोधमूर्छितः ॥ १ ॥ वधे तस्य समाज्ञप्ते रावणेन दुरात्मना
निवेदितवतो दौत्यं नानुमेने विभीषणः ॥ २ ॥ तं रक्षोधिपतिं क्रुद्धं तच्च कार्यमुपस्थितं ॥ विदित्वा चिंतयामास कार्यं कार्यविधौ स्थितः ॥ ३ ॥ निश्चितार्थ
स्ततः साम्ना पूज्यं शत्रुजिदग्रजं ॥ उवाच हितमत्यर्थं वाक्यं वाक्यविशारदः ॥ ४ ॥ क्षमस्व रोषं त्यज राक्षसेंद्र प्रसीद मे वाक्यमिदं शृणुष्व ॥ वधं न कुर्वंति
परावरज्ञा दूतस्य संतो वसुधाधिपेंद्राः ॥ ५ ॥ राजधर्मविरुद्धं च लोकवृत्तेश्च गर्हितं ॥ तव चासदृशं वीर कपेरस्य प्रमापणं ॥ ६ ॥ धर्मज्ञश्च कृतज्ञ
श्च राजधर्मविशारदः ॥ परावरज्ञो भूतानां त्वमेव परमार्थवित् ॥ ७ ॥ गृह्यंते यदि रोषेण त्वादृशोऽपि विचक्षणाः ॥ ततः शास्त्रविपश्चित्त्वं श्रम एव हि केवलं ॥ ८ ॥

तत्तद्वधं नानुमेने ॥ २ ॥ तच्च कार्यं दूतवधरूपं कार्यविधौ अधिकृतकृत्यसंपादने स्थितः निश्चितबुद्धिरित्यर्थः ॥ ३ ॥ शत्रुजितं च तन्मध्यजं च ॥ ४ ॥ प्रतिज्ञां त्यज रोषं
क्षमस्वेत्यन्वयः परावरज्ञाः सर्वकार्यविधयकोत्कर्षापकर्षज्ञाः संतो दूतस्य वधं न कुर्वंति ॥ ५ ॥ लोकवृत्तेर्लोकव्यवहारस्य प्रमापणं वधः ॥ ६ ॥ कृतज्ञत्वे
नापकारिण्यपि वधयोग्यायो नानादृशेऽस्मिन् ॥ ७ ॥ त्वादृश इति किंतु नैव ऊह्य
नेः शास्त्रविपश्चित्त्वं शास्त्रपाण्डित्यसंपादनश्रमः केवलं श्रम एव व्यर्थप्रयास एवे
त्यर्थः ॥ ८ ॥

हतंदंडः हतेविहितोदंडः ॥९॥१०॥ पापकारिणांराजद्रोहिणां ॥११॥ अधर्मस्यमूलंअधर्ममूलंदोषोपकीर्त्तिरूपः ॥१२॥ समयेषुस्वस्वामिनियोगानुष्ठानकालेषु ॥१३॥
॥१४॥ मौंड्यंमुंडनंलक्षणसन्निपातः हतयोग्यांकनसंभूत इतितीर्थः वैरूप्यादीनामेकैकंवातथालक्षणानांसन्निपातः सर्वानुष्ठानंवेत्यर्थः इत्यस्मेनोस्माकंश्रुतोपि

तस्मात्प्रसीदशत्रुघ्नराक्षसेंद्रदुरासद ॥ युक्तायुक्तंविनिश्चित्यदूतेदंडोविधीयतां ॥९॥ विभीषणवचः श्रुत्वारावणोराक्षसेश्वरः ॥ कोपेनमहताविष्टो
वाक्यमुत्तरमब्रवीत् ॥१०॥ नपापानांवधेपापंविद्यतेशत्रुसूदन ॥ तस्मादिमंवधिष्यामिवानरंपापकारिणं ॥११॥ अधर्ममूलंबहुदोषयुक्तमनार्यजु
ष्टंवचनंनिशम्य ॥ उवाचवाक्यंपरमार्थतत्त्वंविभीषणोबुद्धिमतांवरिष्ठः ॥१२॥ प्रसीदलंकेश्वरराक्षसेंद्रधर्मार्थतत्त्ववचनंशृणुष्व ॥ दूतानवध्याः स
मयेषुराजन्सर्वेषुसर्वत्रवदंतिसंतः ॥१३॥ असंशयंशत्रुरयंप्रवृद्धः कृतंह्यनेनाप्रियमप्रमेयं ॥ नदूतवध्यांप्रवदंतिसंतोदूतस्यदृष्टाबहवोहिदंडाः
॥१४॥ वैरूप्यमंगेषुकशाभिघातोमौंड्यंतथालक्षणसन्निपातः ॥ एतान्हिदूतेप्रवदंतिदंडान्वधस्तुदूतस्यननःश्रुतोस्ति ॥१५॥ कथंचधर्मार्थविनीत
बुद्धिः परावरप्रत्ययनिश्चितार्थः ॥ भवद्विधःकोपवशेहितिष्ठेत्कोपंनगच्छंतिहिसत्ववंतः ॥१६॥ नधर्मवादेनचलोकवृत्तेनशास्त्रबुद्धिग्रहणेषुचापि
विद्येतकश्चित्तववीरतुल्यस्त्वंह्युत्तमःसर्वसुरासुराणां ॥१७॥ पराक्रमोत्साहमनस्विनांचसुरासुराणामपिदुर्जयेन ॥ त्वयाप्रमेयेणसुरेंद्रसंघा
जिताश्चयुद्धेष्वसकृन्नरेंद्राः ॥ इत्थंविधस्यामरदैत्यशत्रोःशूरस्यवीरस्यतवाजितस्य ॥ कुर्वंतिवीरामनसाप्यलीकंप्राणैर्विमुक्तानतुभोःपुराते ॥१८॥
नचाप्यस्यकपेर्घातेकंचित्पश्याम्यहंगुणं ॥ तेष्वयंपात्यतांदंडोयैरयंप्रेषितःकपिः ॥१८॥

(।नास्तिदर्शनंतुदूतोपात्तमितिभावः ॥१५॥ परावरप्रत्ययनिश्चिता
र्थः उत्कर्षापकर्षज्ञानेननिश्चितकार्यः ॥१६॥ किंचत्वन्नोपदेश्योस्माकमित्याह नेति शास्त्राणांबुद्ध्यानिश्चयात्मिकयाग्रहणेषुइत्यर्थः ॥१७॥ एतदुत्तरंश्लोकद्वयप

(क्षिप्तमितिकतकः नचाप्यस्यकपेरिति ॥१८॥ समर्पितःप्रेषितः ॥१९॥

नान्यंपश्यामियोत्वागकुदित्यर्थः॥२०।२१॥नन्वस्मिन्हतेऽन्यस्यानागमनेन्वकाममक्षतिःविपरीतमिष्टमेवेदंतत्राह अस्मिन्विनष्टइति तौराजपुत्रौयोयुद्धायोज
येत्तंनपश्यामि॥ननुतदुद्योगाभावेपिमसेष्टमेवनेत्याहयुद्धप्रियेतिसंबोधनेनरणपराक्रमविजयीकीर्त्तीनिवेष्टेकिलतेऽभेऽप्यनतद्विनाशेनश्यतइत्याशयः
रावणास्यरजःप्रकृतित्वात्प्रकृतमनुसारेणायुद्धादिव्यापारेणप्रलोभनं तत्त्रीत्यर्थमेवदुर्विनीताविद्यायुक्तौ॥२२॥हेनैर्ऋतानांमनोनंदन॥सुरासुराणामपि

साधुर्वायदिवासाधुःपरैरेषसमर्पितः॥ब्रुवन्परार्थंपरवान्नदूतोवधमर्हति॥२०॥अपिचास्मिन्हतेनान्यंराजन्पश्यामिखेचरं॥तस्मान्नास्यवधेयत्नःका
र्यःपरपुरंजय॥भवान्सेन्द्रेषुदेवेषुयत्नमास्थातुमर्हति॥२१॥अस्मिन्विनष्टेनहिदूतमन्यंपश्यामियस्तौनरराजपुत्रौ॥युद्धाययुद्धप्रियदुर्विनीताबु
द्योजयेद्वैभवताविरुद्धौ॥२२॥पराक्रमोत्साहमनस्विनांचसुरासुराणामपिदुर्जयेन॥त्वयामनोनंदननैर्ऋतानांयुद्धायनिर्नाशयितुंनयुक्तं॥२३॥

ता

हिताश्चभूराश्चसमाहिताश्चकुलेषुजाताश्चमहागुणेषु॥मनस्विनःशस्त्रभृतांवरिष्ठाःकोट्यग्रशस्तेसुभृताश्चयोधाः॥२४॥तदेकदेशेनबलस्यता
वत्केचित्तवादेशकृतोऽपयांतु॥तौराजपुत्रावपस्टस्यमूढौपरेषुतेभावयितुंप्रभावं॥२५॥निशाचराणामधिपोऽनुजस्यविभीषणस्योत्तमवाक्य
मिष्टं जग्राहबुद्ध्यासुरलोकशत्रुर्महाबलोराक्षसराजमुख्यः॥२६॥

॥दुर्जयेनत्वयापराक्रमेयउत्साहस्तत्रप्रशस्तमनोवतांनैर्ऋतानांमनःयुद्धायप्र
वृत्तंनिर्नाशयितुं॥नयुक्तंनैर्ऋतानामितरत्रमनस्त्वत्त्वंतत्रयद्धातादृशानांनैर्ऋतानांमनोनंदनतादृशेनत्वयायुद्धायनिर्युद्धागमोनाशयितुंनयुक्त
मित्यर्थः॥२३॥ननुयुद्धैकदशिद्विपरीतमपिसंभाव्यततत्राहहिताश्चेतिसमाहिताःदानादिभिर्वशीकृताःसुभृताःसम्यक्पालिताःतादृशभृत्यवतोजयस्त्व
भावीतिभाव॥२४॥नन्वस्मात्तदुपस्थस्यआयान्विनिशेषःपरेषुतेप्रभावंभावयितुंप्रकाशयितुंशक्तामितिशेषः॥२५॥उत्तमवाक्यमिष्टंतत्प्रतिपाद्यमर्थंतत्रंजग्राह॥२६॥

334

न्तरीमानः ॥ इति रामाभिरामे श्रीरा॰ सुं॰ द्विपंचाशः सर्गः ॥५२॥ तस्य विभीषणस्य ॥१॥ दूतवध्या दूतवधः आर्षमिदं साधु ॥२॥ दृष्टेन दाहकृतेनोपलक्षितो गच्छतु त्वत्स्वामि-
समीपमिति शेषः ॥३॥ ततः स्वीयसमीपगमनानन्तरं सुमित्राणि समसुखदुःखाः ज्ञातयो भ्रात्रादयः बांधवाः संबंधिनः सुहृज्जनाः स्निग्धजनास्तत्सहिता बांधवः इत्य-
र्थः ॥४॥ अथ रावणः स्वपुरदुर्गमहाबलमहैश्वर्याणि परेभ्यः प्रकाशयितुं सर्वपुरपरावर्त्तनं दीप्तपुच्छस्यात्तापयदित्याह आत्तापयदिति परिणीय भ्रामयित्वाता

इति आर्षे श्रीमद्रामायणे वा॰ सुंदरकांडे द्विपंचाशः सर्गः ॥५२॥ तस्य तद्वचनं श्रुत्वा दशग्रीवो महात्मनः ॥ देशकालहितं वाक्यं भ्रातुरुत्तरमब्रवीत् ॥१॥ स-
म्यगुक्तं हि भवता दूतवध्या विगर्हिता ॥ अवश्यं तु वधादन्यः क्रियतामस्य निग्रहः ॥२॥ कपीनां किल लांगूलमिष्टं भवति भूषणं ॥ तदस्य दीप्यतां शीघ्रं ते-
न दग्धेन गच्छतु ॥३॥ ततः पश्यन्त्वमुं दीनमंगवैरूप्यकर्षितं ॥ सुमित्रज्ञातयः सर्वे बांधवाः ससुहृज्जनाः ॥४॥ आज्ञापयद्राक्षसेंद्रः पुरं सर्वं सचत्वरं ॥ लां-
गूलेन प्रदीप्तेन रक्षोभिः परिणीयतां ॥५॥ तस्य तद्वचनं श्रुत्वा राक्षसाः कोपकर्कशाः ॥ वेष्टंते तस्य लांगूलं जीर्णैः कार्पासिकैः पटैः ॥६॥ संवेष्ट्यमाने लां-
गूले व्यवर्धत महाकपिः ॥ शुष्कमिंधनमासाद्य वनेष्विव हुताशनः ॥७॥ तैलेन परिषिच्याथ तेऽग्निं तत्रोपपादयन् ॥ लांगूलेन प्रदीप्तेन राक्षसांस्तानता-
डयत् ॥८॥ रोषामर्षपरीतात्मा बालसूर्यसमाननः ॥ सम्भूय संगतैः क्रूरैः राक्षसैर्हरिपुंगवः ॥९॥ सहस्त्रीबालवृद्धाश्च जग्मुः प्रीतिं निशाचराः ॥ निबद्धः
कृतवान्वीरस्तत्कालसदृशीं मतिं ॥१०॥ कामं खलु न मे शक्ता निबद्धस्यापि राक्षसाः ॥ छित्वा पाशान्समुत्पत्य हन्यामहमिमान्पुनः ॥११॥

॥ पयदिति योजना
५ वेष्टंते अवेष्टयंतेत्यर्थः ॥६॥ शुष्कमिति आरण्यका यथा शुष्कमिंधनमासाद्य हुताशनं समुत्पादयंति तथा जीर्णपटवेष्टितलांगूलं तैलेन परिषिच्य अनंतरं तेऽग्निमुपपा-
दयन् उदपादयन् इत्यर्थः इति कतकः हुताशन इति पाठे वृद्धो हुताशनोऽयं ॥७॥ उपपादयन्नितास्यसमयोजयन्नित्यर्थः इत्यन्येनानवधानेन्दृन् ॥८॥ संगतैर्मिलितैः राक्षसैः स-

म्भूयो निबद्ध इति शेषः ॥९॥ अथ वधसंहारशक्तावपि मनोचितं इत्याचिंतयदि-
त्याह कृतवानिति तां मतिमभिनयति काममिति निबद्धस्यापि निबद्धवदवस्थि-

तस्यापि मे न शक्ताः सर्वथा बंधनादा विनिग्रहेषः तदेव समर्थयति छित्वेति ॥११॥

नर्हि कुतो हन्यंनेनत्राह॰ यदीति भर्तू रामस्य हितार्थाय हितनिमित्तं चरंतं मां भर्तू रावणस्य शासनाद्यदि एते मां निबध्नंते निबध्नंतु केवलं नतु मे निष्कृतिः कृता मया कृतस्य प्रतिक्रिया नु न कृता ॥१२॥ यदि तावद्बन्धरूपाश्चिकीर्षेयुस्तदा सर्वान् हनिष्याम्येवेत्याह सर्वेषामिति यदि पर्याप्तस्तर्हि क्रियमाणशत्रुवधस्तत्राह रामस्येप्सितप्रीत्यर्थं सर्वराक्षसवधजयप्रीत्यविघ्नार्थं ईदृशं वधनादिकं ॥१३॥ फलांतरार्थमपि सोढव्यमेवेत्याह लंकेति ॥ एतै रावणानुयायिनरैरेव सकला लंका चारयितव्या वा रोगेन दर्शयितव्या। तो विषाहितव्येनतु दृष्टायाः किंपुनर्दर्शनेनेत्यत्राह॰ रात्राविति॰ दुर्गकर्मविधानतः दुर्गस्य दुर्गमत्वरूपकर्मविधानात् हेतोर्दुर्गांशे इति शेषः ॥१४॥ निशाक्षये इत्यनेन सीतासमाधानार्थकतिपयदिनवासो गम्यते तथाहि फाल्गुने रावणेन सीतापहारः आश्वि

यदि भर्तुर्हितार्थाय चरंतं भर्तृशासनात् ॥ निबध्नंते दुरात्मानो नतु मे निष्कृतिः कृता ॥१२॥ सर्वेषामेव पर्याप्तो राक्षसानामहं युधि ॥ किंतु रामस्य प्रीत्यर्थं विषहिष्येऽहमीदृशम् ॥१३॥ लंका चारयितव्या मे पुनरेव भवेदिति ॥ रात्रौ नहि सुदृष्टा मे दुर्गकर्मविधानतः ॥१४॥ अवश्यमेव द्रष्टव्या मया लंका निशाक्षये ॥ कामं बध्नंतु मे भूयः पुच्छस्योद्दीपनेन च ॥१५॥

॥ननूक्तसमाप्तौ हनुमत्प्रेरणाया पक्षावधिदानेन वानरान् प्रति हनुमत्प्रेषणां ततः कार्तिकशुक्लप्रतिपदि अन्वेषणार्थं वानरप्रस्थानं मार्गशुक्लदशम्यां संपातिदर्शनं तदा सुग्रीवदत्तमासावधेर्गतत्वस्य वानरैरुक्तेः अग्रे एकादश्यां हनूमता लंकागमनं तद्रात्रिशेषे सीतादर्शनं ततो द्वादश्यां दिने स्थित्वा रात्रौ सीतायाः सम्यक्दर्शनं तद्रात्रिशेषे तत्र रावणागमनं तत्र रावणेन मासान् द्वादश भामिनीति स्वदत्तावधौ मासद्वयावशेषवचने कतिपयदिनाधिकं तु मासत्वानवक्लृप्तत्वेनाल्पांतरत्वात्तद्विवक्षितं ॥ ततस्त्रयोदश्यां प्रातः सीतया सह कथालापः तद्दिने स्वाशोकवनिकाभंगादि चतुर्दश्यामक्षांतवधो लंकादाहश्च पूर्णिमायां वा ॥ पूर्वेद्युः संनिकर्षे क्षणांडपि न ततो किंतु तद्वैषेक्ष्य मासेनोपपादिता ॥ उत्पातेन च लक्ष्मणस्य सुग्रीवनिकटे प्रेषणसमये रामेण मासचतुष्टयरूपकालावधेरपगमोक्तिस्तु प्रागुपपादितरहस्येति दिक्॰ पुच्छस्योद्दीपनेन चेत्यस्याग्रश्लोकेनान्वयः ॥१५॥

335

मनसः श्रमो मनःखेदो न मेस्ति इति चिंतयामासेत्यन्वयः ततस्तं वंतस्य चिंतानंतरमित्यर्थः ॥१६॥ स्वकर्मभिः राजद्रोहिणोदृष्टस्यैवं दंड इत्येवमादिभिर्घोषवंतः पूर्व
वृत्तांतस्य सर्वान्प्रति प्रकटं प्रतिपादनं घोषणं ॥१७॥१८॥ चारयामास स्वार्थे णिच् चरतो न ददर्शेत्यर्थः ॥१९॥ चत्वरान् द्वारसमीपवहिर्वेदिकान् गृहैः संवाधाः
निविडाः शृंगाटकानि चतुष्पथान् ॥२०॥ उपरथ्याः स्वल्पवीथ्यः गृहांतरान् गृहद्वयमध्यभागान् चतुष्केषु चतुष्पथेषु ॥२१॥ चारीक इति पाठेपि चार इत्येवार्थः

पीडां कुर्वंति रक्षांसि न मेस्ति मनसः श्रमः ॥ ततस्ते संवृताकारं सत्ववंतं महाकपिं ॥१६॥ परिगृह्य ययुर्हृष्टा राक्षसाः कपिकुंजरं ॥ शंखभेरीनि
नादैश्च घोषयंतः स्वकर्मभिः ॥१७॥ राक्षसाः क्रूरकर्माणश्चारयंति स्म तां पुरीं ॥ अन्वीयमानो रक्षोभिर्ययौ सुखमरिंदमः ॥१८॥ हनूमांश्चा
रयामास राक्षसानां महापुरीं ॥ अथापश्यद्विमानानि विचित्राणि महाकपिः ॥१९॥ संवृतान्भूमिभागांश्च सुविभक्तांश्च चत्वरान् ॥ रथ्याश्च गृ
हसंवाधाः कपिः शृंगाटकानि च ॥२०॥ तथा रथ्योपरथ्याश्च तथैव च गृहांतरान् ॥ चत्वरेषु चतुष्केषु राजमार्गे तथैव च ॥२१॥ घोषयंति कपिं स
र्वे चार इत्येव राक्षसाः ॥ दीप्यमानेन तत्तस्य लांगूलाग्रे हनूमतः ॥२२॥ राक्षस्यस्ता विरूपाक्ष्यः शंसुर्देव्यास्तदप्रियं ॥ यस्त्वया कृतसंवादः सी
ते ताम्रमुखः कपिः ॥२३॥ लांगूलेन प्रदीप्तेन स एष परिणीयते ॥ श्रुत्वा तद्वचनं क्रूरमात्मापहरणोपमं ॥ वैदेही शोकसंतप्ता हुताशनमुपाग
मत् ॥ मंगलाभिमुखी तस्य सा तदासीन्महाकपेः ॥२५॥ उपतस्थे विशालाक्षी प्रयता हव्यवाहनम् ॥ यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः ॥२६॥

:आर्षं सत्वं ॥ चारशब्दात्स्वार्थे आर्ष ईकः ॥२२॥ तस्य हनूमतो लांगूलाग्रे दीप्यमाने तदप्रियं देव्याः शशंसुः परिणीयते परितो नीयते आत्मापहरणो
पमं ताहक् दुःखजनकं ॥२४॥ उपागमत् ध्यानेनोपासितवती यद्वा तत्र समीपे ज्वलमानमग्निमुपासितवती ॥२५॥ प्रयता शुद्धमती ॥२६॥

एकपत्नीत्वं पातिव्रत्यं शीतोभवऊनाशनेति शेषः अस्याः सीताछायात्वेपि स्वस्मिन्नदभेदबुद्धिसत्त्वान्नेमदुक्तासंगतिः ततः सीतोपासनानंतरं तीक्ष्णा-
र्चिरप्यनलः प्रदक्षिणशिखोजज्वाल ॥२७॥ तथा सीतायाः कपेः शिवं स्वकृतं शंसन्निवाभूत् ॥ किंच हनूमज्जनकोनिलो वायुः प्रह्वानलङ्गतोपि देव्या-
ः सन्मुखे स्वास्थ्यकरः कपेः स्वास्थ्यसूचकः सन्प्रालेयानिलशीतलो ववौ ॥२८॥ ॥२९॥ सर्वतः प्रदीप्तोग्निरित्यन्वयः ॥३०॥ लांगूलाग्रे शिशिरस्पर्शहिम

यदिवास्त्येकपत्नीत्वं शीतोभव हनूमतः ॥ ततस्तीक्ष्णार्चिरव्यग्रः प्रदक्षिणशिखोनलः ॥२७॥ जज्वाल मृगशावाक्ष्याः शंसन्निव शुभं कपेः ॥ ह-
नूमज्जनकश्चैव पुच्छानलयुतोनिलः ॥२८॥ ववौ स्वास्थ्यकरो देव्याः प्रालेयानिलशीतलः ॥ दह्यमाने च लांगूले चिंतयामास वानरः ॥२९॥
प्रदीप्तोग्निरयं कस्मान्न मां दहति सर्वतः ॥ दृश्यते च महाज्वालः करोति च न मे रुजं ॥३०॥ शिशिरस्येव संपातो लांगूलाग्रे प्रतिष्ठितः ॥ अ-
थवा तदिदं व्यक्तं यद्दृष्टं प्लवता मया ॥ रामप्रभावादाश्चर्यं पर्वतः सरितां पतौ ॥३१॥ यदि तावत्समुद्रस्य मैनाकस्य च धीमतः ॥ रामार्थं सं-
भ्रमस्तादृक् किमग्निर्न करिष्यति ॥३२॥ सीतायाश्चानृशंस्येन तेजसा राघवस्य च ॥ पितुश्च मम सख्येन न मां दहति पावकः ॥३३॥
भूयः संचिंतयामास मुहूर्तं कपिकुंजरः ॥ कथमस्मद्विधस्येह बंधनं राक्षसाधमैः ॥३४॥

॥स्य संपातः पिंड इव प्रतिष्ठित इत्यन्वयः तत्रोप-
पत्तिं चिंतयति अथवेति ॥ यद्यस्मात्प्लवता मया सरितां पतौ रामप्रभावात् समुद्रे पर्वतरूपमाश्चर्यं दृष्टं ततो रामप्रभावादेवेदमपीत्यर्थः ॥
३१ ॥ ननु समुद्रप्रेरणेन मैनाकोस्थानं प्रयुज्यतेऽग्नेस्तु स्वभाववैपरीत्यं कृतं तत्राह यदीति तावदिति वाक्यालंकारे रामार्थं रामोपकारार्थं तादृ-
क्संभ्रमो यदि आदरपूर्वकत्वरा यदि तदा रामेणानिमंत्रणापि सीतोग्निः रामोपकारार्थं कथमपि शैत्यं न करिष्यतीत्यर्थः ॥३२॥ अनृशंस्यमाश्रितज-
नदया ॥३३॥ चिंतयामास अनंतरकर्तव्यमिति शेषः ॥३४॥

प्रतिक्रियां लंकादहनरूपामहं मम उत्पपात प्रज्ञाग्निना बंधनेन च सहैवेति शेषः ॥३६॥ विभक्तरक्षःसंबाधं रक्षःसंमर्दरहितं ॥३७॥ शैलसंकाशो महानभू
त्वा ह्रस्वतां प्राप्त इत्यनेन देहसौक्ष्म्यात्स्वयमेव बंधगलनमुक्तं स्वरीत्या बंधनान्यवशातयत् दूरीकृतवान् ॥३८॥ विमुक्तत्वेन ततः पुनः पर्वताकारोऽभवत्

प्रतिक्रियास्य युक्ता स्यात्सति मह्यं पराक्रमे ॥ ततश्छित्वा च तान्पाशान्वेगवान्वै महाकपिः ॥३५॥ उत्पपाताथ वेगेन ननाद च महाकपिः ॥ पुरद्वारं त
तः श्रीमांछैलशृंगमिवोन्नतं ॥३६॥ विभक्तरक्षःसंबाधमाससादानिलात्मजः ॥ सम्भूत्वा शैलसंकाशः क्षणेन पुनरात्मवान् ॥३७॥ ह्रस्वतां परमां
प्राप्तो बंधनान्यवशातयत् ॥ विमुक्तश्चाभवच्छ्रीमान्पुनः पर्वतसन्निभः ॥३८॥ वीक्षमाणश्च ददृशे परिघं तोरणाश्रितं ॥ स तं गृह्य महाबाहुः का
लायसपरिष्कृतं ॥ रक्षिणस्तान्पुनः सर्वान्सूदयामास मारुतिः ॥३९॥ स तान्निहत्वा रणचंडविक्रमः समीक्षमाणः पुनरेव लंकां ॥ प्रदीप्तलांगूलकृ
तार्चिमाली प्रकाशतादित्य इवार्चिमाली ॥४०॥ इत्यार्षे श्रीमद्रामायणे सुंदर० त्रिपंचाशः सर्गः ॥५२॥ वीक्षमाणस्ततो लंकां कपिः कृतमनोर
थः ॥ वर्धमानसमुत्साहः कार्यशेषमचिंतयत् ॥१॥ किं नु खल्ववशिष्टं मे कर्तव्यमिह सांप्रतं ॥ यदेषां रक्षसां भूयः संतापजननं भवेत् ॥२॥
वनं तावत्प्रमथितं प्रकृष्टा राक्षसा हताः ॥ बलैकदेशः क्षपितः शेषं दुर्गविनाशनं ॥३॥ दुर्गे विनाशिते कर्म भवेत्सुखपरिश्रमं ॥ अल्पयत्नेन
कार्येऽस्मिन्मम स्यात्सफलः श्रमः ॥४॥

॥३९॥ अर्चिमालीत्यत्र नीरेफमार्षं ॥४१॥ अनवमानः ॥ इति रामा० सुं० त्रिपंचाशः सर्गः ॥५३॥ वीक्षमाने इति ॥१॥ य
देषां भूयः संतापजननं भवेत् तादृशमवशिष्टं सांप्रतं कर्तव्यं किमिति कार्यशेषमचिंतयदित्यर्थः ॥२॥ तदेव निश्चिनोति शेषं दुर्गविनाशनमिति ॥३॥ कर्मस
मुल्लंघनादि ॥ सुखपरिश्रमं सफलप्रयासं तपश्चर्यादिवदित्यर्थः उक्तमेव विवृणोति अल्पेति अस्मिन्सीतान्वेषणप्रवृत्तिरूपे कार्ये यो मया कृतः श्रमः स त्व

ल्पेन यत्नेन स्वल्पयत्नसाध्येन करिष्यमाणलंकादाहेन सफलो भविष्यति ॥४॥

तदेवाह योहीति स्वाप्यं स्वस्य पीडया अकरणादिति भावः ॥५॥ तोयदः संध्यातोयदः हनूमतो रक्तवर्णत्वात् ॥६॥ उद्यानानि गृहारामाः ॥७॥ प्रहस्तस्य प्रधानमंत्रित्वादा

योऽयं मम लांगूले दीप्यते हव्यवाहनः ॥ अस्य संतर्पणं न्याय्यं कर्तुमेभिर्गृहोत्तमैः ॥५॥ ततः प्रदीप्तलांगूलः सविद्युदिव तोयदः ॥ भवनाग्रेषु लंकाया
विचचार महाकपिः ॥६॥ गृहाद्गृहं राक्षसानामुद्यानानि च वानरः ॥ वीक्षमाणो ह्यसंत्रस्तः प्रासादांश्च चचार सः ॥७॥ अवप्लुत्य महावेगः प्रहस्त
स्य निवेशने ॥ अग्निं तत्र विनिक्षिप्य श्वसनेन महाबली ॥८॥ ततोऽन्यत्पुप्लुवे वेश्म महापार्श्वस्य वीर्यवान् ॥ मुमोच हनुमानग्निं कालानलशिखोपमं
॥९॥ वज्रदंष्ट्रस्य च तथा पुप्लुवे स महाकपिः ॥ शुकस्य च महातेजाः सारणस्य च धीमतः ॥१०॥ तथा चेंद्रजितो वेश्म ददाह हरियूथपः ॥ जंबुमालेः सुमा
लेश्च ददाह भवनं ततः ॥११॥ रश्मिकेतोश्च भवनं सूर्यशत्रोस्तथैव च ॥ ह्रस्वकर्णस्य दंष्ट्रस्य रोमशस्य च रक्षसः ॥१२॥ युद्धोन्मत्तस्य मत्तस्य ध्वजग्री
वस्य रक्षसः ॥ विद्युज्जिह्वस्य घोरस्य तथा हस्तिमुखस्य च ॥१३॥ करालस्य विशालस्य शोणिताक्षस्य चैव हि ॥ कुंभकर्णस्य भवनं मकराक्षस्य चैव हि
॥१४॥ नरांतकस्य कुंभस्य निकुंभस्य महात्मनः ॥ यज्ञशत्रोश्च भवनं ब्रह्मशत्रोस्तथैव च ॥१५॥ वर्जयित्वा महातेजा विभीषणगृहं प्रति ॥ क्रममाणः क्र
मेणैव ददाह हरिपुंगवः ॥१६॥ तेषु तेषु महार्हेषु भवनेषु महायशाः ॥ गृहेष्वृद्धिमतामृद्धिं ददाह कपिकुंजरः ॥१७॥ सर्वेषां समतिक्रम्य राक्षसें
द्रस्य वीर्यवान् ॥ आससादाथ लक्ष्मीवान् रावणस्य निवेशनं ॥१८॥ ततस्तस्मिन्गृहे मुख्ये नानारत्नविभूषिते ॥ मेरुमंदरसंकाशे नानामंगलशोभिते

दौ तद्गृहेऽग्निप्रक्षेपः प्रथमं तत्संभावनस्योचित्यात् ॥८॥९॥१०॥११॥१२॥१३॥ भवनं ददाहेत्यनुकर्षः ॥१४॥१५॥ विभीषणेन स्वस्य वधतो रक्षणात् वि
भीषणगृहं वर्जयित्वा प्रतिगृहं क्रममाण इत्यन्वयः ॥१६॥ पूर्वं रावणाद्भीतोऽप्यग्निः सीतातेजःसंबंधेन निःशंकं ददाहेत्युक्तं प्राक् ॥१७॥१८॥१९॥

जु २

२० ॥ श्वसनेन संयोगात् सीताश्वासमिश्रितवायुसंयोगात् अनलवायोरपि निर्भयता ॥ २१ ॥ चारयन्निति हेतौ शता यन्तश्चारयति स्म ततश्चारणाद्धेतोस्तानि व्य
शीर्यन्ते इत्यन्वयः ॥ २२ ॥ भग्नविमानानि भग्नप्रासादानि ॥ २३ ॥ २४ ॥ भग्नोत्साहाश्च ते उज्झितश्रियश्चेत्यर्थः हा इति तुमुलः शब्दः संजज्ञे इत्यन्वयः ॥ २५ ॥ पेतुरग्नाविति शे

जु ९

प्रदीप्तमग्निमुत्सृज्य लांगूलाग्रे प्रतिष्ठितं ॥ ननाद हनूमान्वीरो युगांतजलदो यथा ॥ २० ॥ श्वसनेन च संयोगादतिवेगो महाबलः ॥ कालाग्निरिव जज्वाल
प्रावर्धत हुताशनः ॥ २१ ॥ प्रदीप्तमग्निं पवनस्तेषु वेश्मसु चारयन् ॥ तानि कांचनजालानि मुक्तामणिमयानि च ॥ २२ ॥ भवनानि व्यशीर्यंत रत्नवंति म
हांति च ॥ तानि भग्नविमानानि निपेतुर्वसुधातले ॥ २३ ॥ भवनानीव सिद्धानामंबरात्पुण्यसंक्षये ॥ संजज्ञे तुमुलः शब्दो राक्षसानां प्रधावतां ॥ २४ ॥ स्वे
स्वगृहपरित्राणे भग्नोत्साहोज्झितश्रियां ॥ नूनमेषोग्निरायातः कपिरूपेण हा इति ॥ २५ ॥ कंदंत्यः सहसा पेतुः स्तनंधयधराः स्त्रियः ॥ काश्चिदग्निपरीतां
गा हर्म्येभ्यो मुक्तमूर्धजाः ॥ २६ ॥ पतंत्यो रेजिरेऽभ्रेभ्यः सौदामिन्य इवांबरात् ॥ वज्रविद्रुमवैदूर्यमुक्तारजतसंहतान् ॥ २७ ॥ विचित्रान्भवनाद्धा
तून्स्यंदमानान्ददर्श सः ॥ नाग्निस्तृप्यति काष्ठानां तृणानां च यथा तथा ॥ २८ ॥ हनूमान्राक्षसेंद्राणां वधे किंचिन्न तृप्यति ॥ न हनूमद्विशस्तानां
राक्षसानां वसुंधरा ॥ २९ ॥ हनूमता वेगवता वानरेण महात्मना ॥ लंकापुरं प्रदग्धं तद्रुद्रेण त्रिपुरं यथा ॥ ३० ॥ ततः स लंकापुरपर्वताग्रे समुत्थि
तो भीमपराक्रमोग्निः ॥ प्रसार्य चूडावलयं प्रदीप्तो हनूमता वेगवता पसृष्टः ॥ ३१ ॥ ॥ पः अभ्रेभ्यो मेघेभ्यः ॥ २७ ॥ अग्निसंबंधाद्भवनाद्धेमरजतादिधा
तून्स्यंदमानान्ददर्श यथा काष्ठतृणादिदाहादग्निर्न तृप्यति ॥ तथा राक्षसवधे क्रियमाणे हनूमान्किंचिदीषदपि न तृप्यति ॥ २८ ॥ वसुंधराऽनेति मृतरा
क्षसानां शयनाय लंकाभूमिर्न पर्याप्ताऽभूदिति शेषः ॥ २९ ॥ ३० ॥ लंकापुरपर्वताग्रे लंकापुराधारभूतत्रिकूटाचलशिखरे चूडावलयं शिखासमूहं प्राप्तोऽभू
दितिशेषः ॥ ३१ ॥

विधूमरश्मिः विधूमज्वालः रक्षःशरीररूपाज्येन समर्पिता संपादिता अर्चिर्ज्वालाविशेषो यस्य सः ॥ ३२ ॥ निष्टनन्नभूदितिशेषः अशनिवत्स्वगर्जनैः महाग्निः
प्रलयाग्निः ॥ ३४ ॥ अंबरात् अंबरपर्यंतं रूक्षप्रभः क्रूरकान्तिः किंशुकपुष्पवत् चूडा शिखा यस्य सः निर्वाणानामधो विच्छिन्नानां खे एव वर्त्मानां धूमा

युगांतकालानलतुल्यरूपः समारुतोग्निर्ववृधे दिविस्पृक् ॥ विधूमरश्मिर्भवनेषु सक्तो रक्षःशरीराज्यसमर्पितार्चिः ॥ ३२ ॥ आदित्यकोटी
सदृशः सुतेजा लंकां समस्तां परिवार्य तिष्ठन् ॥ शब्दैरनेकैरशनिप्ररूढैर्भिंदन्निवांडं प्रबभौ महाग्निः ॥ ३३ ॥ तत्रांबरादग्निरतिप्रवृद्धो रू
क्षप्रभः किंशुकपुष्पचूडः ॥ निर्वाणाधूमाकुलराजयश्च नीलोत्पलाभाः प्रचकाशिरेभ्राः ॥ ३४ ॥ वज्री महेंद्रस्त्रिदशेश्वरो वा साक्षाद्यमो
वा वरुणोनिलो वा ॥ रौद्रोग्निरर्को धनदश्च सोमो न वानरोयं स्वयमेव कालः ॥ ३५ ॥ किं ब्रह्मणः सर्वपितामहस्य लोकस्य धातुश्चतुरानन
स्य ॥ इहागतो वानररूपधारी रक्षोपसंहारकरः प्रकोपः ॥ ३६ ॥ किं वैष्णवं वा कपिरूपमेत्य रक्षोविनाशाय परं सुतेजः ॥ अचिंत्यमव्यक्त
मनंतमेकं स्वमायया सांप्रतमागतं वा ॥ ३७ ॥ इत्येवमूचुर्बहवो विशिष्टा रक्षोगणास्तत्र समेत्य सर्वे ॥ सप्राणिसंघां सगृहां सवृक्षां दग्धां
पुरीं तां सहसा समीक्ष्य ॥ ३८ ॥ ततस्तु लंका सहसा प्रदग्धा सराक्षसा साश्वरथा सनागा ॥ सपक्षिसंघा समृगा सवृक्षा रुरोद दीना तुमु
लं सशब्दं ॥ ३९ ॥ हा तात हा पुत्रक कांत मित्र हा जीवितेशांग हतं सुपुण्यं ॥ रक्षोभिरेवं बहुधा ब्रुवद्भिः शब्दः कृतो घोरतरः सुभीमः ॥ ४० ॥

नामाकुला राजयो नीलोत्पलाभा अभ्राकाराः संतः प्रचकाशिरे ॥ ३४ ॥ वज्रित्वत्रिदशेश्वरत्वविशिष्टो महेंद्र इत्यर्थः रौद्रोग्निः रुद्रतृतीयन
यनसंबध्यग्निः ॥ ३५ ॥ ३६ ॥ ३७ ॥ विशिष्टा महाबलाः प्रहस्तादय इत्यर्थः समीक्ष्य इत्येवमूचुरित्यन्वयः ॥ ३८ ॥ ३९ ॥ सुपुण्यं अतिशयितमर्जितं पु

परिवृत्तयोधापर्यस्तयोधा ॥ ४१ ॥ स्वयंभूरोषोपहतांस्वदिनांनइतिशेषः ॥ ४२ ॥ ४३ ॥ ४४ ॥ ४५ ॥ ४६ ॥ ४७ ॥ गृहाग्र्याणांगृहश्रेष्ठानांशृंगाग्रतलेप्रासादाग्रभूमौ

हुताशनज्वालसमावृतासाहतप्रवीरापरिवृत्तयोधा । हनूमतःक्रोधबलाभिभूताबभूवशापोपहतेवलंका ॥ ४१ ॥ ससंभ्रमंत्रस्तविषस्सरक्षसांस
मुज्वलज्ज्वालहुताशनांकितांददर्शलंकांहनुमान्महामनाःस्वयंभुरोषोपहतामिवावनिं ॥ ४२ ॥ भंक्त्वावनंपादपरत्नसंकुलंहत्वातुरक्षांसिमहांति
संयुगे । दग्ध्वापुरींतांगृहरत्नमालिनींतस्थौहनूमान्पवनात्मजःकपि ॥ ४३ ॥ सराक्षसांस्तान्सुबहूंश्चहत्वावनंचभंक्त्वाबहुपादपंतत् । विसृ
ज्यरक्षोभवनेषुचाग्निंजगामरामंमनसामहात्मा ॥ ४४ ॥ ततस्तुतंवानरवीरमुख्यंमहाबलंमारुततुल्यवेगं । महामतिंवायुसुतंवरिष्ठंप्रतु
ष्टुवुर्देवगणाश्चसर्वे ॥ ४५ ॥ देवाश्चसर्वेमुनिपुंगवाश्चगंधर्वविद्याधरपन्नगाश्च । भूतानिसर्वाणिमहांतितत्रजग्मुःपरांप्रीतिमतुल्यरूपां
॥ ४६ ॥ भंक्त्वावनंमहातेजाहत्वारक्षांसिसंयुगे । दग्ध्वालंकापुरींभीमांरराजसमहाकपिः ॥ ४७ ॥ गृहाग्र्यशृंगाग्रतलेविचित्रेप्रतिष्ठितोवानररा
जसिंहः । प्रदीप्तलांगूलकृतार्चिमालीव्यराजतादित्यइवार्चिमाली ॥ ४८ ॥ लंकांसमस्तांसंपीड्यलांगूलाग्निंमहाकपिः । निर्वापयामासतदा
समुद्रेहरिपुंगवः ॥ ४९ ॥ ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः । दृष्ट्वालंकांप्रदग्धांतांविस्मयंपरमंगताः ॥ ५० ॥ इत्यार्षेश्रीमद्रामायणेसुंद
रकांडेचतुःपंचाशःसर्गः ॥ ५४ ॥ संदीप्यमानांविध्वस्तांत्रस्तरक्षोगणांपुरीं । अवेक्ष्यहनुमान्लंकांचिंतयामासवानरः ॥ १ ॥ तस्याभूत्सुमहांस्त्रासः
कुत्साचात्मन्यजायत । लंकांप्रदहताकर्मकिंस्वित्कृतमिदंमया ॥ २ ॥ प्रदीप्तलांगूलेनकृतार्चिर्मालायस्यास्तिसः ॥ ४८ ॥ समुद्रेनिर्वापयामास
लांगूलप्रक्षेपणेनेतिशेषः ॥ ४९ ॥ ५० ॥ नमस्मानः इतिश्रीरामाभिरामेश्रीरा॰सुंद॰चतुःपंचाशःसर्गः ॥ ५४ ॥ संदीप्यमानामिति ॥ १ ॥ कुत्साचात्मन्यजाय

नेमुक्तंकृत्स्नामाह॰ लंकामितिकिंस्वित्कर्मकृतंकृतमितितमेवकृतमित्यर्थः ॥ २ ॥

उक्तकृत्स्नितकार्यमूलं कोप इति निश्चिन्वन् तद्दहितान् क्रोधानिति धन्या इति दुःखातिशयादेव महात्मपदप्रयोगेन सूक्तं न दोषाय ॥३॥ क्रुद्धः पापं न कुर्यात् इति पाठे क्रुद्धो यः कश्चित्पापं कुर्यान्नन्निकाकुः अपितु कुर्यादेव अकरणाशंकामेवेत्यर्थं तदेव दर्शयति क्रुद्धो हन्यादिति ॥४॥ नजानातीत्यनेतदेवस्पष्टयति नकार्यमिति क्रुद्धस्याकार्यमनुक्तवध्यास्करणीयं न किंचिदप्यस्ति अतो गुरुहननाद्यपि करोत्येवेत्यर्थः ॥५॥६॥७॥ धिगस्तु मामित्यनेनोक्तस्वधिक्कारं यदी

धन्याः खलु महात्मानो ये बुद्ध्या कोपमुत्थितं ॥ निरुंधंति महात्मानो दीप्तमग्निमिवांभसा ॥३॥ क्रुद्धः पापं न कुर्यात्कः क्रुद्धो हन्याद्गुरूनपि ॥ क्रुद्धः परुषया वाचा नरः साधूनधिक्षिपेत् ॥४॥ वाच्यावाच्यं प्रकुपितो न विजानाति कर्हिचित् ॥ नाकार्यमस्ति क्रुद्धस्य नवाच्यं विद्यते क्वचित् ॥५॥ यः समुत्पतितं क्रोधं क्षमयैव निरस्यति ॥ यथोरगस्त्वचं जीर्णां स वै पुरुष उच्यते ॥६॥ धिगस्तु मां सुदुर्बुद्धिं निर्लज्जं पापकृत्तमं ॥ अचिंतयित्वा तां सीतामग्निदं स्वामिघातकं ॥७॥ यदि दग्धास्त्वियं सर्वा नूनमार्यापि जानकी ॥ दग्धा तेन मया भर्तुर्हतं कार्यमजानता ॥८॥ यदर्थमयमारंभस्तत्कार्यमवसादितं ॥ मया हि दहता लंकां न सीता परिरक्षिता ॥९॥ ईषत्कार्यमिदं कार्यं कृतमासीन्न संशयः ॥ तस्य क्रोधाभिभूतेन मया मूलक्षयः कृतः ॥१०॥ विनष्टा जानकी व्यक्तं नह्यदग्धः प्रदृश्यते ॥ लंकायाः कश्चिदुद्देशः सर्वा भस्मीकृता पुरी ॥११॥ यदि तद्विहितं कार्यं मया प्रज्ञाविपर्ययात् ॥ इहैव प्राणसंन्यासो ममापि ह्यद्य रोचते ॥१२॥

यदि इयं लंका सर्वापि नूनं दग्धैव यदि जानक्यप्यत्र तया दग्धा स्यात्तदा तेन अजानता मया भर्तुः कार्यं हतं भवेत् ॥८॥ एतदेव विवृणोति यदर्थमिति ॥९॥ एतत्कार्यं लंकादाहरूपं ईषत्कार्यमिव अप्रयाससाध्यकार्यमेव कृतमनुष्ठितमासीत् अत्र न संशयः भर्तुः कार्यं तु मया सर्वथा नाशितमेवेत्याह तस्येति क्रोधाभिभूतेन मया सीतामपरिरक्षता कृतमस्य सीतादर्शनरूपस्य कार्यस्य मूलक्षयः कृतः ॥१०॥ नहु

सीताविनाशनिश्चयस्तु कथं तत्राह विनष्टेति ॥११॥१२॥

वडवामुखे श्चाविन्यन्वयः दद्मि ददामि ॥ १३ ॥ १४ ॥ तदेवेदं कापित्वं अनवस्थितं अव्यवस्थितकार्यकारीति त्रिषु लोकेषु प्रसिद्धं दर्शितं रोषदोषात् रक्षोविषय क्रोधदोषात् ॥ १५ ॥ राजसं रजोगुणमूलं भावं चेष्टाविशेषं अनीशं कार्यासमर्थं अतएवाऽनवस्थितं अव्यवस्थितफलजनकं धिक् यद्यस्मात् ॥ ईश्वरेणापि स

किमग्नौ निपताम्यद्य अहोस्विद्वडवामुखे ॥ शरीरमाहो सत्वानां दद्मि सागरवासिनां ॥ १३ ॥ कथं नु जीवता शक्यो मया द्रष्टुं हरीश्वरः ॥ तौ वा पुरुषशार्दूलौ कार्यसर्वस्वघातिना ॥ १४ ॥ मया खलु तदेवेदं रोषदोषात्प्रदर्शितं ॥ प्रथितं त्रिषु लोकेषु कपित्वमनवस्थितं ॥ १४ ॥ धिगस्तु राजसं भावमनीशमनवस्थितं ॥ ईश्वरेणापि यद्रागान्मया सीता न रक्षिता ॥ १६ ॥ विनष्टायां तु सीतायां तावुभौ विनशिष्यतः ॥ तयोर्विनाशे सुग्रीवः सबन्धुर्विनशिष्यति ॥ १७ ॥ एतदेव वचः श्रुत्वा भरतो भ्रातृवत्सलः ॥ धर्मात्मा सहशत्रुघ्नः कथं शक्ष्यति जीवितुं ॥ १८ ॥ इक्ष्वाकुवंशे धर्मिष्ठे गते नाशमसंशयः ॥ भविष्यन्ति प्रजाः सर्वाः शोकसंतापपीडिताः ॥ १९ ॥ तदहं भाग्यरहितो लुप्तधर्मार्थसंग्रहः ॥ रोषदोषपरीतात्मा व्यक्तं लोकविनाशनः ॥ २० ॥ इति चिन्तयतस्तस्य निमित्तान्युपपेदिरे ॥ पूर्वमप्युपलब्धानि साक्षात्पुनरचिन्तयत् ॥ २१ ॥ अथवा चारुसर्वाङ्गी रक्षिता स्वेन तेजसा ॥ न नशिष्यति कल्याणी नाग्निरग्नौ प्रवर्तते ॥ २२ ॥ न हि धर्मात्मनस्तस्य भार्याममिततेजसः ॥ स्वचारित्राभिगुप्तां तां स्प्रष्टुमर्हति पावकः ॥ नूनं रामप्रभावेण वैदेह्याः सुकृतेन च ॥ यन्मां दहनकर्मायं नादहद्धव्यवाहनः ॥ २४ ॥

॥ समर्थेनापि मया रागात् रजोगुणमूलक्रोधवशात् सीता न रक्षिता अतो धिक् ॥ १६ ॥ उभौ रामलक्ष्मणौ ॥ १७ ॥ १८ ॥ १९ ॥ २० ॥ साक्षादुपलब्धानि अपरोक्षमनुभूतशुभफलानि उपपेदिरे जातानि दृष्ट्वा पुनरचिन्तयदित्यर्थः ॥ २१ ॥ चिन्तामेव दर्शयति अथवेति नाग्निरग्नौ प्रवर्तते इति अग्निरग्निं न दहतीत्यर्थः ॥ २२ ॥ २३ ॥ दहनकर्मा भस्मीकरणसहजस्वभावः यत् यतस्तत्स्वभावान्मां तत्सेवकं

नादहत् न तस्यैव तां स्प्रष्टुमपि नार्हतीत्यर्थः ॥ २४ ॥

त्रयाणां भरतलक्ष्मणशत्रुघ्नानां देवतात्वात्तस्या मय्यप्रहृत्ते राममयाद्वेति भावः ॥२५॥ सर्वत्रप्रभुरपि यत्सेवकत्वान्मे लांगूलं न दहति तत्र त्वां कथं धक्ष्यति ॥२६
देवीप्रभावान्सिंधौ मद्विश्रांतिनिमित्तं गिरिदर्शनहेतुना ऽतिप्रभाववतीं तां न दहतीत्याह पुनश्चेति ॥२७॥ निर्दहेन्न दाहविषयवाक्यप्रयोगे रोगातिशेषः ॥२८

त्रयाणां भरतादीनां भ्रातॄणां देवता च या ॥ रामस्य च मनःकांता सा कथं विनशिष्यति ॥२५॥ यद्वा दहनकर्मायं सर्वत्र प्रभुरव्ययः ॥ न मे दहति
लांगूलं कथमार्यां प्रधक्ष्यति ॥२६॥ पुनश्चाचिंतयत्तत्र हनूमान्विस्मितस्तदा ॥ हिरण्यनाभस्य गिरेर्जलमध्ये प्रदर्शनं ॥२७॥ तपसा सत्यवाक्ये
न अनन्यत्वाच्च भर्त्तरि ॥ असौ विनिर्दहेदग्निं न तामग्निः प्रधक्ष्यति ॥२८॥ स तथा चिंतयंस्तत्र देव्या धर्मपरिग्रहं ॥ शुश्राव हनुमांस्तत्र चारणानां महा
त्मनां ॥२९॥ अहो खलु कृतं कर्म दुर्विगाहं हनूमता ॥ अग्निं विसृजता तीक्ष्णं भीमं राक्षससद्मनि ॥३०॥ प्रपलायितरक्षःस्त्रीबालवृद्धसमाकु
ला ॥ जनकोलाहलाध्माता क्रंदन्तीवाद्रिकंदरैः ॥३१॥ दग्धेयं नगरी लंका साट्टप्राकारतोरणा ॥ जानकी न च दग्धेति विस्मयोऽद्भुत एव नः ॥३२॥
॥ इति शुश्राव हनुमान्वाचं ताममृतोपमां ॥ बभूव चास्य मनसो हर्षस्तत्कालसंभवः ॥३३॥ स निमित्तैश्च दृष्टार्थैः कारणैश्च महागुणैः ॥
ऋषिवाक्यैश्च हनुमानभवत्प्रीतिमानसः ॥३४॥ ततः कपिः प्राप्तमनोरथार्थस्तामक्षतां राजसुतां विदित्वा ॥ प्रत्यक्षतस्तां पुनरेव दृष्ट्वा प्रतिप्र
याणाय मतिं चकार ॥३५॥

॥ तथा चिंतयन् चारणानां वाक्यं शुश्रावेति योजना ॥२९॥ दुर्विगाहं केनाप्यसत्यमित्यर्थः ॥३०॥३१॥ विस्मय आश्चर्यं अ
द्भुतः अभूतपूर्वः ॥३२॥ तत्कालसंभवः तत्कालजातचारणवाक्यजः ॥३३॥ दृष्टार्थैः दृष्टप्रत्ययैर्निमित्तैर्दक्षिणाक्षिस्पंदनादिभिः कारणैः सीताराम
प्रभावप्राप्त्यादिरूपैः ऋषिवाक्यैश्चारणवाक्यैः ॥३४॥ विदित्वा चारणादिवाक्यैः पुनरेव पुनरपि प्रत्यक्षतो दृष्ट्वा प्रतिप्रयाणाय किष्किंधां प्रति
गंतुमिति ॥५५॥

गमभान॥ इतिरामाभिरामेश्रीरा०सुं०पंचपंचाशः सर्गः॥५५॥ ततइति॥१॥ इतआरभ्यपुनर्मध्येनसागरमित्यंताश्चतुर्विंशतिश्लोकाः प्राग्व्याख्यातप्रायाएव॥२३॥

इत्यार्षेश्रीमद्रामायणेवा०सुंदरकांडेपंचपंचाशः सर्गः॥५५॥ ततस्तुशिंशुपामूलेजानकींपर्यवस्थितां॥ अभिवाद्याब्रवीद्दिष्ट्यापश्यामित्वामि
हाक्षताम्॥१॥ ततस्तंप्रस्थितंसीतावीक्षमाणापुनःपुनः॥ भर्तुःस्नेहान्वितावाक्यंहनूमंतमभाषत॥२॥ यदित्वंमन्यसेतातवसैकाहमिहा
नघ॥ क्वचित्सुसंवृतेदेशेविश्रांतःश्वोगमिष्यसि॥३॥ ममचैवाल्पभाग्यायाःसान्निध्यात्तववानर॥ शोकस्यास्याप्रमेयस्यमुहूर्तंस्यादपिक्षयः॥४॥
गतेहिहरिशार्दूलपुनःसंप्राप्तयेत्वयि॥ प्राणेष्वपिनविश्वासोममवानरपुंगव॥५॥ अदर्शनंचमेवीरभूयोमांदारयिष्यति॥ दुःखाद्दुःखत
रंप्राप्तांदुर्मनःशोककर्शितां॥६॥ अयंचवीरसंदेहस्तिष्ठतीवममाग्रतः॥ सुमहत्स्वसहायेषुहर्यृक्षेषुमहाबलः॥७॥ कथन्नुखलुदुष्पारंसंतरि
ष्यंतिसागरं॥ तानिहर्यृक्षसैन्यानितौवानरवरात्मजौ॥८॥ त्रयाणामेवभूतानांसागरस्यास्यलंघने॥ शक्तिःस्याद्वैनतेयस्यतववामारुतस्य
वा॥९॥ तदत्रकार्यनिर्बंधेसमुत्पन्नेदुरासदे॥ किंपश्यसिसमाधानंत्वंहिकार्यविशारदः॥१०॥ काममस्यत्वमेवैकःकार्यस्यपरिसाधने॥ प
र्याप्तःपरवीरघ्नयशस्यस्तेबलोदयः॥११॥ बलैस्तुसंकुलांकृत्वालंकांपरबलार्दनः॥ मांनयेद्यदिकाकुत्स्थस्तत्तस्यसदृशंभवेत्॥१२॥ तद्य
थातस्यविक्रांतमनुरूपंमहात्मनः॥ भवत्याहवशूरस्यतथात्वमुपपादय॥१३॥ तदर्थोपहितंवाक्यंप्रश्रितंहेतुसंहितं॥ निशम्यहनुमान्वीरोवा
क्यमुत्तरमब्रवीत्॥ देवि हर्यृक्षसैन्यानामीश्वरःप्लवतांवरः॥ सुग्रीवःसत्वसंपन्नस्तवार्थेकृतनिश्चयः॥१५॥ सवानरसहस्राणांकोटीभिरभि
संवृतः॥ क्षिप्रमेष्यतिवैदेहिसुग्रीवःप्लवगाधिपः॥१६॥ तौचवीरौनरवरौसहितौरामलक्ष्मणौ आगम्यनगरींलंकांसायकैर्विधमिष्यतः॥१७॥

॥४॥५॥६॥७॥८॥९॥१० ॥११॥१२॥१३ ॥१४॥१५॥१६॥१७॥

१८ ॥ १९ ॥ २५ ॥ अरिष्टं नखारवं नीलाभिर्वनराजिभिः सपरिधानमिवेति शेषः ॥ २६ ॥ सोत्तरीयमिव कंठासक्तोत्तरीयधारिणमिव बोध्यमानमिव रविकिरणास्प
र्शेन सर्वेषां तत्रत्य वस्तूनां विकासादिति भावः ॥ २७ ॥ उद्धूतैरुद्भतैर्लोध्रसदृशैर्धातुभिरुन्मिषंतमिवेत्युत्प्रेक्षा प्राधीतमिव ॥ उच्चैः प्रारब्धाध्ययनमिव

सगणं राक्षसं हत्वा न चिराद्रघुनंदनः ॥ त्वामादाय वरारोहे स्वां पुरीं प्रतियास्यति ॥ १८ ॥ समाश्वसिहि भद्रं ते भव त्वं कालकांक्षिणी ॥ क्षिप्रं द्रक्ष्य
सि रामेण निहतं रावणं रणे ॥ १९ ॥ निहते राक्षसेंद्रे च सपुत्रामात्यबांधवे ॥ त्वं समेष्यसि रामेण शशांकेनेव रोहिणी ॥ २० ॥ क्षिप्रमेष्यति काकु
त्स्थो हर्यृक्षप्रवरैर्युतः ॥ यस्ते युधि विनिर्जित्य शोकं व्यपनयिष्यति ॥ २१ ॥ एवमाश्वास्य वैदेहीं हनूमान्मारुतात्मजः ॥ गमनाय मतिं कृत्वा वै:
देहीमभ्यवादयत् ॥ २२ ॥ राक्षसान्प्रवरान्हत्वा नाम विश्राव्य चात्मनः ॥ समाश्वास्य च वैदेहीं दर्शयित्वा परं बलं ॥ २३ ॥ नगरीमाकुलां कृत्वा वं
चयित्वा च रावणं ॥ दर्शयित्वा बलं घोरं वैदेहीमभिवाद्य च ॥ २४ ॥ प्रतिगंतुं मनश्चक्रे पुनर्मध्येन सागरं ॥ ततः स कपिशार्दूलः स्वामिसंदर्शनो
त्सुकः ॥ २५ ॥ आरुरोह गिरिश्रेष्ठमरिष्टमरिमर्दनः ॥ तुंगपद्मकजुष्टाभिर्नीलाभिर्वनराजिभिः ॥ २६ ॥ सोत्तरीयमिवांभोदैः शृंगांतरविलंबि
भिः ॥ बोध्यमानमिव प्रीत्या दिवाकरकरैः शुभैः ॥ २७ ॥ उन्मिषंतमिवोद्धूतैर्लोचनैरिव धातुभिः ॥ तोयौघनिःस्वनैर्मंद्रैः प्राधीतमिव सर्वतः ॥
॥ २८ ॥ प्रगीतमिव विस्पष्टं नानाप्रस्रवणस्वनैः ॥ देवदारुभिरुद्धूतैरूर्ध्वबाहुमिव स्थितं ॥ २९ ॥ प्रपातजलनिर्घोषैः प्राकृष्टमिव सर्वतः ॥ वेप
मानमिव श्यामैः कंपमानैः शरद्घनैः ॥ ३० ॥ वेणुभिर्मारुतोद्धूतैः कूजंतमिव कीचकैः ॥ निश्वसंतमिवामर्षात् घोरैराशीविषोत्तमैः ॥ ३१ ॥

२८ ॥ तत्स्वनानां महत्त्वात्प्रगीतमिव प्रारब्धगानमिव तत्स्वनानां मंदत्वात् ॥ २८ ॥ २९ ॥ प्रपातजलनिर्घोषैः प्रपातेभ्यः भृगुदेशेभ्यः पतज्जलशब्दैः प्राकु
ष्टमिवारब्धाक्रोशमिव सर्वत्रादिकर्मणि क्तोरिक्तः इत्याकुः शरद्घ
नैः सप्तपर्णादिशारदवृक्षसंघैः ॥ ३० ॥ ३१ ॥

341

नीहारकृतगंभीरैः नीहारवशेन तद्दर्शनात्तत्कृतगंभीरत्वं गह्वराणां ॥ ध्यायंतमिव तदितेंद्रियद्वारं ध्यानारूढमिव स्थितमित्यर्थः ॥ मेघपादाः मेघप्ररोहास्तन्नि
भैः पादैः प्रत्यंतपर्वतैः प्रक्रांतमिवारब्धगमनमिव ॥ ३२ ॥ अभ्रमालाभिः शिखरैः जृंभमाणमिव गात्रमोटनं कुर्वाणमिव कूटैः शृंगैः ॥ ३३ ॥ लतारूपैर्वि

नीहारकृतगंभीरैर्ध्यायंतमिव गह्वरैः ॥ मेघपादनिभैः पादैः प्रक्रांतमिव सर्वतः ॥ ३२ ॥ जृंभमाणमिवाकाशे शिखरैरभ्रमालिभिः ॥ कूटैश्च वहुधा
कीर्णं शोभितं वहुकंदरैः ॥ ३३ ॥ सालतालाश्वकर्णैश्च वंशैश्च वहुभिर्वृतं ॥ लतावितानैर्विततैः पुष्पवद्भिरलंकृतं ॥ ३४ ॥ नानामृगगणैः कीर्णं
धातुनिष्यंदभूषितं ॥ वहुप्रस्रवणोपेतं शिलासंचयसंकटं ॥ ३५ ॥ महर्षियक्षगंधर्वकिन्नरोरगसेवितं ॥ लतापादपसंवाधं सिंहाधिष्ठितकं
दरं ॥ ३६ ॥ व्याघ्रादिभिः समाकीर्णं स्वादुमूलफलद्रुमं ॥ आरुरोहानिलसुतः पर्वतं प्लवगोत्तमः ॥ ३७ ॥ रामदर्शनशीघ्रेण प्रहर्षेणाभिचोदित
॥ तेन पादतलाक्रांता रम्येषु गिरिसानुषु ॥ ३८ ॥ सघोषाः समशीर्यंत शिलाश्चूर्णीकृतास्ततः ॥ स तमारुह्य शैलेंद्रं व्यवर्धत महाकपिः ॥ ३९ ॥ द
क्षिणाउत्तरं पारं प्रार्थयन् लवणांभसः ॥ अधिरुह्य ततो वीरः पर्वतं पवनात्मजः ॥ ४० ॥ ददर्श सागरं भीमं भीमोरगनिषेवितं ॥ स मारुत इवाका
शं मारुतस्यात्मसंभवः ॥ ४१ ॥ प्रपेदे हरिशार्दूलो दक्षिणाउत्तरां दिशं ॥ स तदा पीडितस्तेन कपिना पर्वतोत्तमः ॥ ४२ ॥ ररास विविधैर्भूतैः
प्राविशद्वसुधातलं ॥ कंपमानैश्च शिखरैः पतद्भिरपि च द्रुमैः ॥ ४३ ॥

॥ लतैर्वितानैः ॥ ३४ ॥ धातुनिस्यंदैर्धातुनिर्गमैर्भूषितं शिलासंचयेन शिलास
मूहेन संकटं नीरंध्रं ॥ ३५ ॥ लताभिः पादपैश्च संबाधं व्याप्तं ॥ ३६ ॥ ३७ ॥ रामदर्शनेशीघ्रेणातिवेगवतोत्कटेनेति यावत् तेन हनूमता ॥ ३८ ॥ ३९ ॥ प्रार्थ
यन् गमनप्राप्यत्वेनेच्छन् अधिरुह्य ततोप्यूर्ध्वं गत्वा ॥ ४० ॥ ४१ ॥ स हनुमान् मारुत आकाशमिवोत्तरां दिशं प्रपेदे मनसा प्राप ॥ ४२ ॥ कंपविशिष्टशिखर
द्रुमोपलक्षितो वसुधां प्राविशदित्यन्वयः ॥ ४३ ॥

८
८८

य २

शक्रायुधं वक्त्रं ॥४४॥४५॥ त्रस्ता अत एव व्याविद्धानि व्यस्तानि वसनानि यासां ताः ॥४६॥ व्यवेष्टन्त कुंडलीकृतशरीरा अजायंत व्यचेष्टन्तेति पाठे पीडयाऽलु
ठन्नित्यर्थः ॥४७॥४८॥ सवृक्षशिखरैरुदग्र उन्नतः रसातलं प्रविवेश अंशेन भूसमशिखराग्रवृक्षो जात इत्यर्थः ॥४९॥ न देवदर्शीति दर्शेति ॥५०॥ कल्लो

तस्योरुवेगोन्मथिताः पादपाः पुष्पशालिनः ॥ निपेतुर्भूतले रम्याः शक्रायुधहता इव ॥४४॥ कंदरोदरसंस्थानां पीडितानां महौजसां । सिंहा
नां निनदो भीमो नभो भिंदन् हि सुश्रुवे ॥४५॥ त्रस्तव्याविद्धवसना व्याकुलीकृतभूषणाः ॥ विद्याधर्यः समुत्पेतुः सहसा धरणीधरात् ॥४६॥ अ
तिप्रमाणा वलिनो दीप्तजिह्वा महाविषाः ॥ निपीडितशिरोग्रीवा व्यचेष्टन्त महाहयः ॥४७॥ किन्नरोरगगंधर्वयक्षविद्याधरास्तथा ॥ पीडितं तं
नगवरं त्यक्त्वा गगनमास्थिताः ॥४८॥ स च भूमिधरः श्रीमान् वलिना तेन पीडितः ॥ सवृक्षशिखरोदग्रः प्रविवेश रसातलम् ॥४९॥ दशयोजन
विस्तारस्त्रिंशद्योजनमुच्छ्रितः ॥ धरण्यां समतां यातः स वभूव धराधरः ॥५०॥ सलिलंघयिषुर्भीमं सलिलं लवणार्णवम् ॥ कल्लोलास्फालवेलां
तमुत्पपात नभो हरिः ॥५१॥ इत्यार्षे श्रीरामायणे सुंदरकांडे षट्पंचाशत्सर्गः ॥५६॥ आप्लुत्य च महावेगः पक्षवानिव पर्वतः ॥ भुजंगयक्षगंधर्व
प्रबुद्धकमलोत्पलम् ॥१॥ सचंद्रकुमुदं रम्यं सार्ककारंडवं शुभं ॥ तिष्यश्रवणकादंबमभ्रशैवलशाद्वलं ॥२॥ पुनर्वसुमहामीनं लोहितांगमहा
ग्रहं ॥ ऐरावतमहाद्वीपं स्वातीहंसविलासितं ॥३॥ ॥लैरास्फालनेन स्पृश्यते नादृशो वेलांतस्तीरप्रांतो यस्य तं सागरं लिलंघयिषुर्नभ उत्पपातेति
संबंधः ॥५१॥ इति रामाभिरामे सुं॰ षट्पं॰ ॥५६॥ आप्लुत्य उत्प्लुत्याधारं गगनं सरोवरत्वेन वर्णयति भुजंगेत्यादि भुजंगादय एव विकसितानि कमला
दीनि यस्मिन् ॥१॥ चंद्ररूपेण कुमुदेन श्वेतोत्पलेन सहितं अर्करूपकारंडवाख्यजलपक्षिसहितं अभ्राणि मेघा एव शैवलानि शाड्वलानि च यत्र तं ॥२॥ लो

ऐरावत इत्यु लंघनीयं गगनं सरोवरत्वेन वर्णयति आप्लुत्येत्यादिचतुर्भिः आप्लुत्य उत्प्लुत्य भुजंगयक्षगंधर्वा एव विकसितानि कमलोत्पलानि
गजरव महाद्वी यस्मिन् तं ॥१॥ चंद्ररूपकुमुदं श्वेतोत्पलं तेन सहितं अर्करूपकारंडवाख्यजलपक्षिसहितं पुष्यश्रवणा[illegible]वेव कादंबाः कलहंसा
पो यस्मिन् २ यस्मिन् तं अभ्राण्येव शैवलानि शाद्वलानि यस्मिन् ॥२॥ २

हितांगो भौमः महाग्रहं महाग्राहः स्वातीरूपो हंसो विलासितः हंस
विलासो यत्र तं ॥३॥

॥राम॥
॥१२९॥

पुनर्वसुरेव महामीनो यस्मिन् २

342

वातसंघातोवात्यातज्जालंतत्समूहस्यवोर्मयोयत्रतत् चंद्रकिरणरूपशीतलजलयुक्तं मतुबर्थः अत्रसावयवरूपकंगगनस्यार्णवत्वेनचंद्रादीनांकुमु
दादित्वेनचरूपणात् ॥४॥ताराधिपमुल्लिखन्निव नखैरितिशेषः हरन्निवग्रसन्निव ॥५॥६॥महाभ्राणीत्यस्यकपिनाकृष्यमाणानीतिशेषः ॥७॥८॥प्रविश

वातसंघातजालोर्मिंचंद्रांशुशिशिरांबुमत् ॥ हनूमानपरिश्रांतःपुप्लुवेगगनार्णवम् ॥४॥ ग्रसमानइवाकाशंताराधिपमिवोल्लिखन् ॥ हरन्नि
वसनक्षत्रंगगनंसार्कमंडलं ॥५॥ अपारमपरिश्रांतश्चांबुधिंसमगाहत ॥ हनूमान्मेघजालानिविकर्षन्निवगच्छति ॥६॥ पांडुरारुणवर्णा
निनीलमांजिष्ठकानिच ॥ हरितारुणवर्णानिमहाभ्राणिचकाशिरे ॥७॥ प्रविशन्नभ्रजालानिनिष्क्रामंश्चपुनःपुनः ॥ प्रकाशश्चाप्रकाशश्च
चंद्रमाइवदृश्यते ॥८॥ विविधाभ्रघनापन्नगोचरोधवलांबरः ॥ दृश्यादृश्यतनुर्वीरस्तथाचंद्रायतेंबरे ॥९॥ तार्क्ष्यायमाणोगगनेसबभौ
वायुनंदनः ॥ दारयन्मेघवृंदानिनिष्पतंश्चपुनःपुनः ॥१०॥ नदन्नादेनमहतामेघस्वनमहास्वनः ॥ प्रवरान्राक्षसान्हत्वानामविश्राव्यचात्म
नः ॥११॥ आकुलांनगरींकृत्वाव्यथयित्वाचरावणं ॥ अर्दयित्वामहावीरान्वैदेहीमभिवाद्यच ॥१२॥ आजगाममहातेजाःपुनर्मध्येनसा
गरं ॥ पर्वतेंद्रंसुनाभंचसमुपस्पृश्यवीर्यवान् ॥१३॥ ज्यामुक्तइवनाराचोमहावेगोभ्युपागमत् ॥ सकिंचिदारात्संप्राप्तःसमालोक्यमहागिरिं ॥
१४॥ महेंद्रंमेघसंकाशंननादसमहाकपिः ॥ सपूरयामासकपिर्दिशोदशसमंततः ॥१५॥ नदन्नादेनमहतामेघस्वनमहास्वनः ॥ सतंदे
शमनुप्राप्तःसुहृद्दर्शनलालसः ॥१६॥

॥उक्तमेवार्थंभंग्यंतरेणाह विविधेति विविधेष्वभ्रघनेषुआपन्नः गोचरोमार्गोयेनसः प्रवेश
निष्क्रमाभ्यांदृश्यादृश्यतनुः अयंश्लोकःप्रक्षिप्तइतिभाति ॥९॥१०॥ मेघस्वनवन्महान्स्वनोयस्यसः ॥११॥१२॥ सुनाभंमैनाकं ॥१३॥१४॥१५॥१६॥

लांगूलंचाप्यकंपयदितिस्वभावोक्तिः ॥१७॥ फलतीव । विसर्पतीव ॥१८॥ येपूर्वंसंविष्ठितास्तेतोयदनिस्वनमिवऊरुवेगंतज्जंस्वंघोषंशुश्रुवुरित्यन्वयः ॥१९॥ वानरेंद्रस्यनिर्घोषंतदीयसिंहनादं ॥२०॥ उत्सुहृद्दर्शनकांक्षिणः तेनशब्देनहनूमानेवैतीतिनिश्चित्यतद्दर्शनलालसा ॥२१॥२२॥२३॥ वाहु

ननादसमहानादंलांगूलंचाप्यकंपयत् ॥ तस्यनानद्यमानस्यसुपर्णाचरितेपथि ॥१७॥ फलतीवास्यघोषेणगगनंसार्कमंडलं ॥ येतुत
त्रोत्तरेकूलेसमुद्रस्यमहाबलाः ॥१८॥ पूर्वंसंविष्ठिताःशूरावायुपुत्रदिदृक्षवः ॥ महतोवायुनुन्नस्यतोयदस्येवनिस्वनं ॥ शुश्रुवुस्तेत
दाघोषमूरुवेगंहनूमतः ॥१९॥ तेदीनमनसःसर्वेशुश्रुवुःकाननौकसः ॥ वानरेंद्रस्यनिर्घोषंपर्जन्यनिनदोपमं ॥२०॥ निशम्यन
दतोनादंवानरास्तेसमंततः ॥ बभूवुरुत्सुकाःसर्वेसुहृद्दर्शनकांक्षिणः ॥२१॥ जांबवान्सहरिश्रेष्ठःप्रीतिसंहृष्टमानसः ॥ उपामंत्र्यह
रीन्सर्वानिदंवचनमब्रवीत् ॥२२॥ सर्वथाकृतकार्योसौहनूमान्नात्रसंशयः ॥ नह्यस्याकृतकार्यस्यनादएवंविधोभवेत् ॥२३॥ तस्यबा
हूरुवेगंचनिनादंचमहात्मनः ॥ निशम्यहरयोहृष्टाःसमुत्पेतुर्यतस्ततः ॥२४॥ तेनगाग्रान्नगाग्राणिशिखराच्छिखराणिच ॥ प्रहृष्टाः
समपद्यंतहनूमंतंदिदृक्षवः ॥२५॥ तेप्रीताःपादपाग्रेषुगृह्यशाखामवस्थिताः ॥ वासांसिवप्रकाशानिसमाविध्यंतवानराः ॥२६॥
गिरिगह्वरसंलीनोयथागर्जतिमारुतः ॥ एवंजगर्जबलवान्हनूमान्मारुतात्मजः ॥२७॥

॥ऊरुवेगंतज्जन्यशब्दंनिनादंचकंठशब्दं
च ॥२४॥ नगाग्रात्त्वाश्रयाद्वृक्षदेशस्थानिनगाग्राणीत्यर्थः ॥२५॥ तेशाखांगृह्यगृहीत्वाऊर्ध्वदेशाहनूमन्निरीक्षणोपतनभियाशाखांगृहीत्वाव
त्वापादपाग्रेषुतदग्रशाखासुस्थिताःवासांसिसमाविध्यंतप्राकंपयंतत्र्यंस्यन इवेतिभावः प्रकाशानिनिर्मलतयाप्रकर्षेणशोभमानानिदृशानिवा

गा२

अभ्रं मेघस्तु पतियो मेघस्तत्संकाशं ॥ असुच्च तं मेघसमूहं सदृशमित्यर्थमन्ये स्वजीवनदानत्वेन स्वपूज्यत्वात् प्रांजलयः स्थिता ॥ २५ ॥ ततो गिरेः अरिष्टारव्यात्
गिरेः सुतः कपिः तस्य महेंद्रस्य गिरेः शिखरे निपपात ॥ अनेनाविश्रममागमनं ध्वनितं ॥ २९ ॥ छिन्नपक्षो धराधर इवाकाशात्पपात ॥ हर्षेणापूर्यमाणाः पूर्णा

तमभ्रघनसंकाशमापतंतं महाकपिं ॥ दृष्ट्वा ते वानराः सर्वे तस्थुः प्रांजलयस्तदा ॥ २८ ॥ ततस्तु वेगवान्वीरो गिरेर्गिरिनिभः कपिः ॥ निपपात गिरेस्तस्य
शिखरे पादपाकुले ॥ २९ ॥ हर्षेणापूर्यमाणोसौ रम्ये पर्वतनिर्झरे ॥ छिन्नपक्ष इवाकाशात्पपात धरणीधरः ॥ ३० ॥ ततस्ते प्रीतमनसः सर्वे वानरपुं
गवाः ॥ हनूमंतं महात्मानं परिवार्योपतस्थिरे ॥ ३१ ॥ परिवार्य च ते सर्वे परां प्रीतिमुपागताः ॥ प्रहृष्टवदनाः सर्वे तमागतमुपागमन् ॥ ३२ ॥ उपा
यनानि चादाय मूलानि च फलानि च ॥ प्रत्यर्चयन् हरिश्रेष्ठं हरयो मारुतात्मजं ॥ ३३ ॥ विनेदुर्मुदिताः केचित्केचित् किलकिलां तथा ॥ हृष्टाः
पादपशाखाश्च आनिन्युर्वानरर्षभाः ॥ ३४ ॥ हनुमांस्तु गुरून् वृद्धान् जांबवत्प्रमुखांस्तदा ॥ कुमारमंगदं चैव सोवंदत महाकपिः ॥ स ताभ्यां पूजितः
पूज्यः कपिभिश्च प्रसादितः ॥ दृष्टा देवीति विक्रांतः संक्षेपेणान्यवेदयत् ॥ २६ ॥ निषसाद च हस्तेन गृहीत्वा वालिनः सुतं ॥ रमणीये वनोद्देशे महें
द्रस्य गिरेस्तदा ॥ २७ ॥ हनूमानब्रवीत्पृष्टस्तदा तान्वानरर्षभान् ॥ अशोकवनिकासंस्था दृष्टा सा जनकात्मजा ॥ रक्ष्यमाणा सुघोराभी राक्षसी
भिरनिंदिता ॥ एकवेणीधरा बाला रामदर्शनलालसा ॥ ३९ ॥ उपवासपरिश्रांता मलिना जटिला कृशा ॥ ततो दृष्टेति वचनं महार्थममृतोपमं ॥ ४० ॥
निशम्य मारुतेः सर्वे मुदिता वानराभवन् ॥ क्ष्वेडंत्यन्ये नदंत्यन्ये गर्जंत्यन्ये महाबलाः ॥ ४१ ॥
॥ माराणाहृदयः पर्वतनिर्झरे निर्झरप्रवर्त्तके शिखरे इत्यर्थः को
श्रमनिवृत्तये जलस्वपानितइत्यन्ये ॥ ३० ॥ ३३ ॥ शाखानयनं ॥ हनूमत आसनार्थं ॥ ३४ ॥ ३५ ॥ ताभ्यां जांबवदंगदाभ्यां प्रसादितः प्रसन्नदृष्ट्याकारितात्मनिरी

क्षा ॥ २६ ॥ ३९ ॥ ४१ ॥

मे ९

४२॥आयतांचितदीर्घाणि आयामोविस्तारः स्यैत्स्यमित्यन्ये॥४३॥गिरिशृंगेषुआप्लुत्यतेष्वआप्लुत्येत्यर्थः॥४४॥४६॥ समेष्यामः संगताभविष्यामः अ

वक्रुः किलकिलामन्येप्रतिगर्जंतिचापरे॥केचिदुच्छ्रितलांगूलाः प्रहृष्टाः कपिकुंजराः॥४२॥आयतांचितदीर्घाणिलांगूलानिप्रविव्यधुः॥अपरे
तुहनूमंतंश्रीमंतंवानरोत्तमं॥४३॥आप्लुत्यगिरिशृंगेषुसंस्पृशंतिस्महर्षिताः॥उक्तवाक्यंहनूमंतमंगदस्तुतदाब्रवीत्॥४४॥सर्वेषांहरिवी
राणांमध्येवाचमनुत्तमां॥सत्ववीर्येनतेकश्चित्समोवानरविद्यते॥४५॥यदवप्लुत्यविस्तीर्णंसागरंपुनरागतः॥जीवितस्यप्रदातानस्त्वमे
कोवानरोत्तम॥४६॥त्वत्प्रसादात्समेष्यामःसिद्धार्थाराघवेणह॥अहोस्वामिनितेभक्तिरहोवीर्यमहोधृतिः॥४७॥दिष्ट्यादृष्टात्वयादेवीराम
पत्नीयशस्विनी॥दिष्ट्यात्यक्ष्यतिकाकुत्स्थःशोकंसीतावियोगजं॥४८॥ततोंगदंहनूमंतंजांबवंतंचवानराः॥परिवार्यप्रमुदिताभेजिरेविपु
लाःशिला॥४९॥उपविष्टागिरेस्तस्यशिलासुविपुलासुते॥श्रोतुकामाःसमुद्रस्यलंघनंवानरोत्तमाः॥५०॥दर्शनंचापिलंकायाःसीतायाः
रावणस्यच॥तस्थुःप्रांजलयःसर्वेहनुमद्वदनोन्मुखाः॥५१॥तस्थौतत्रांगदःश्रीमान्वानरैर्वहुभिर्वृतः॥उपास्यमानोविविधैर्दिविदेवपति
र्यथा॥५२॥हनूमताकीर्तिमतायशस्विनातथांगदेनांगदनद्धबाहुना॥मुदातदाध्यासितमुन्नतंमहन्महीधराग्रंज्वलितंश्रियाभवत्
५३॥इत्यार्षेश्रीरामायणेवा॰सुंदरकांडेसप्तपंचाशःसर्गः॥५७॥ततस्तस्यगिरेःशृंगेमहेंद्रस्यमहाबलाः॥हनूमत्प्रमुखाःप्रीतिंहरयोज
ग्मुरुत्तमां॥१॥

((हो इतितवस्वामिभक्त्यादिकमाश्चर्यमित्यर्थः॥४७॥४९॥५१॥विविधैर्दैवैरुपास्यमानइत्यर्थः॥५२॥कीर्तिमताहनूमतायशस्विनांगदेनेत्यर्थःज्वलितमुक्तं॥५३॥गममानः॥इतिरा॰श्री॰सुंद॰सप्तपंचाशःसर्गः॥५७॥हनूमत्प्रमुखाःपरस्परंमिलिताइतिशेषः॥१॥

344

कार्यविषयं वृत्तांतं ३ ॥ कथं वृत्तः कीदृग्व्यापारः ॥ ४ ॥ ५ ॥ चिंतनीयनिश्चयमेवाह यश्चेति रक्षितव्यं रामसन्निधौ गोपनीयं अवक्तव्यमिति यावत् अवक्तव्यं च यत्र

प्रीतिमत्सु प्रविष्टेषु वानरेषु महात्मसु ॥ तं ततः प्रतिसंहृष्टः प्रीतियुक्तं महाकपिं ॥ २ ॥ जांववान्कार्यवृत्तांतमपृच्छदनिलात्मजं ॥ कथं दृष्टा त्वया देवी कथं वा तत्र वर्त्तते ॥ ३ ॥ तस्यां चापि कथं वृत्तः क्रूरकर्मा दशाननः ॥ तत्त्वतः सर्वमेतन्नः प्रब्रूहि त्वं महाकपे ॥ ४ ॥ संमार्गिता कथं देवी किं च सा प्रत्यभाषत ॥ श्रुतार्थाश्चिंतयिष्यामो भूयः कार्यविनिश्चयं ॥ ५ ॥ यश्चार्थस्तत्र वक्तव्यो गतैरस्माभिरात्मवान् ॥ रक्षितव्यं च यत्तत्र तद्भवान्व्याकरोतु नः ॥ ६ ॥ स नियुक्तस्ततस्तेन संप्रहृष्टतनूरुहः ॥ नमस्यन् शिरसा देव्यै सीतायै प्रत्यभाषत ॥ ७ ॥ प्रत्यक्षमेव भवतां महेन्द्राग्रात्खमाप्लुतः ॥ उदधेर्दक्षिणं पारं कांक्षमाणः समाहितः ॥ ८ ॥ गच्छतश्च हि मे घोरं विघ्नरूपमिवाभवत् ॥ कांचनं शिखरं दिव्यं पश्यामि सुमनोहरं ॥ ९ ॥ स्थितं पंथानमावृत्य मेने विघ्नं च तं नगं ॥ उपसंगम्य तं दिव्यं कांचनं नगमुत्तमं ॥ १० ॥ कृता मे मनसा बुद्धिर्भेत्तव्योयं मयेति च ॥ प्रहतस्य मया तस्य लांगूलेन महागिरेः ॥ ११ ॥ शिखरं सूर्यसंकाशं व्यशीर्यत सहस्रधा ॥ व्यवसायं च तं बुद्ध्वा स होवाच महागिरिः ॥ १२ ॥ पुत्रेति मधुरां वाणीं मनः प्रल्हादयन्निव ॥ पितृव्यं चापि मां विद्धि सखायं मातरिश्वनः ॥ १३ ॥ मैनाकमिति विख्यातं निवसंतं महोदधौ ॥ पक्षवंतः पुरा तत्र बभूवुः पर्वतोत्तमाः ॥ १४ ॥ छंदतः पृथिवीं चेरुर्बाधमानाः समंततः ॥ श्रुत्वा नगानां चरितं महेन्द्रः पाकशासनः ॥ २५ ॥ वज्रेण भगवान्पक्षौ चिच्छेदैषां सहस्रशः ॥ अहं तु मोचितस्तस्मात्तव पित्रा महात्मना ॥ १६ ॥

॥ चिंतयिष्यामोतस्तत्पृष्टं सर्वमात्मवान् भवान्व्याकरोतु ॥ ६ ॥ ८ ॥ विघ्नरूपमिवेत्युक्तं तदेवाह कांचनमिति पश्यामि दृष्टमित्यर्थः तदाश्चर्यत्वादद्यापि पश्यामीत्यर्थः ॥ ९ ॥ मेने लिङुत्तमपुरुषैकवचनं उपसंगम्य प्राप्य १० ॥ ११ ॥ व्यवसायस्त्वभेदनरूपः ॥ १२ ॥

॥ १४ ॥ छंदतः स्वेच्छयेत्यर्थः चरितं प्रजाबाधनरूपं ॥ १५ ॥ १६ ॥

मोचमानप्रकारमाह मारुतेनेति साह्येसाहाय्ये ॥१७॥ तत्र हेतुर्धर्मभृतां श्रेष्ठत्वादि ॥१८॥ उद्धतंअग्रेचलितं ॥१९॥ सशैलोमानुषेणा वपुष्मता प्रशस्तेन श
रीरेण महाशैलोंतर्हितः शैलेन शिलारूपेणाच महोदधावंतर्हित इत्यन्वयः ॥२०॥२१॥२२॥ प्रदिष्टो विहित इत्यर्थः विहितःप्रापित इत्यर्थः ॥२३॥२४॥२५॥ स

मारुतेनतदावत्सप्रक्षिप्तोवरुणालये ॥ राघवस्यमयासाह्येवर्तितव्यमरिंदम ॥१७॥ रामोधर्मभृतांश्रेष्ठोमहेंद्रसमविक्रमः ॥ एतच्छ्रुत्वा
मयातस्यमैनाकस्यमहात्मनः ॥१८॥ कार्यमावेद्यचगिरेरुद्धतंवैमनोमम ॥ तेनचाहमनुज्ञातोमैनाकेनमहात्मना ॥१९॥ सचाप्यंतर्हितःशैलोमा
नुषेणावपुष्मता ॥ शरीरेणमहाशैलः शैलेनचमहोदधौ ॥२०॥ उत्तमंजवमास्थायशेषमध्वानमास्थितः ॥ ततोहंसुचिरंकालंजवेनाभ्यागमंप
थि ॥२१॥ ततःपश्याम्यहंदेवींसुरसांनागमातरं ॥ समुद्रमध्येसादेवीवचनंचेदमब्रवीत् ॥२२॥ ममभक्षःप्रदिष्टस्त्वममरैर्हरिसत्तम ॥ तत
स्त्वांभक्षयिष्यामिविहितस्त्वंहिमेसुरैः ॥२३॥ एवमुक्तःसुरसयाप्रांजलिःप्रणतःस्थितः ॥ विवर्णोवदनोभूत्वावाक्यंचेदमुदीरयं ॥२४॥ रा
मोदाशरथिःश्रीमान्प्रविष्टोदंडकावनं ॥ लक्ष्मणेनसहभ्रात्रासीतयाचपरंतपः ॥२५॥ तस्यसीताहृताभार्यारावणेनदुरात्मना ॥ तस्याः
सकाशंदूतोहंगमिष्येरामशासनात् ॥२६॥ कर्तुमर्हसिरामस्यसाहाय्यंविषयेसति ॥ अथवामैथिलींदृष्ट्वारामंचाक्लिष्टकारिणं ॥२७॥
आगमिष्यामितेवक्त्रंसत्यंप्रतिशृणोमिते ॥ एवमुक्तामयासातुसुरसाकामरूपिणी ॥२८॥ अब्रवीन्नातिवर्तेतकश्चिदेषवरोमम ॥
एवमुक्तःसुरसयादशयोजनमायतः ॥२९॥

((काशंसमीपं ॥२६॥ विषयेसतितदीयदेशेसतिविद्यमानेमैथिलीदर्शनंनिवेदनार्थंरा
मंचदृष्ट्वा ॥२७॥२८॥ नातिवर्तेतनातिक्रमेतमांप्राप्तोमदाहारतांप्राप्तोनगच्छेदित्यर्थः ॥२९॥ ॥ छ ॥ ॥श्रीरामायनमः ॥ छ ॥

अर्धगुणाविस्तारः अर्धस्य दशयोजनार्धस्य पंचयोजनस्य गुणा आवृत्तिस्तद्विस्तारः दशयोजनविस्तार इति यावत् ॥ पूर्वं दशयोजनविस्तारोक्त्या तद्गुणोपपन्नैवं
व्याख्यातं ॥ ३० ॥ ह्रस्वं स्वशरीरमिति शेषः तदेवाहं गुष्ठसंमित इति शेषः ॥ ३१ ॥ ३२ ॥ समानय मेलय ॥ ३३ ॥ साधु साध्विति अत्र दीर्घ आर्षः ॥ ३४ ॥ ३५ ॥ येन ग

ततोर्धगुणाविस्तारो बभूवाहं क्षणेन तु ॥ मत्प्रमाणाधिकं चैव व्यादितं तु मुखं तया ॥ ३० ॥ तं दृष्ट्वा व्यादितं त्वास्यं ह्रस्वं ह्यकरवं पुनः ॥ तस्मिन्मु
हूर्ते च पुनर्बभूवाङ्गुष्ठसंमितः ॥ ३१ ॥ अभिपत्याशु तद्वक्त्रं निर्गतोहं ततः क्षणात् ॥ अब्रवीत्सुरसा देवी स्वेन रूपेण मां पुनः ॥ ३२ ॥ अथ
सोव्याहरद्देवी गच्छ सौम्य यथासुखं ॥ समानय च वैदेहीं राघवेण महात्मना ॥ ३३ ॥ सुखी भव महाबाहो प्रीतास्मि तव वानर ॥ ततोहं सा
धु साध्विति सर्वभूतैः प्रशंसितः ॥ ३४ ॥ ततोन्तरिक्षं विपुलं प्लुतोहं गरुडो यथा ॥ छाया मे निगृहीता च न च पश्यामि किंचन ॥ ३४ ॥ सोहं वि
गतवेगस्तु दिशो दश विलोकयन् ॥ न किंचित्तत्र पश्यामि येन मे विहता गतिः ॥ ३६ ॥ अथ मे बुद्धिरुत्पन्ना किं नाम गमने मम ॥ ईदृशो विघ्न
उत्पन्नो रूपमत्र न दृश्यते ॥ ३७ ॥ अधोभागे तु मे दृष्टिः शोचतः पतिता तदा ॥ तत्राद्राक्षमहं भीमां राक्षसीं सलिलेशयां ॥ ३८ ॥ प्रहस्य च म
हानादमुक्तोहं भीमया तया ॥ अवस्थितमसंभ्रान्तमिदं वाक्यमशोभनं ॥ ३९ ॥ क्वासि गन्ता महाकाय क्षुधिताया ममेप्सितः ॥ भक्षः प्री
णय मे देहं चिरमाहारवर्जितं ॥ ४० ॥ बाढमित्येव तां वाणीं प्रत्यगृह्णामहं ततः ॥ आस्यप्रमाणादधिकं तस्याः कायमपूरयं ॥ ४१ ॥

तिर्विहता तत्किंचित्तत्र पश्यामि न पश्यामीत्यन्वयः ॥ ३६ ॥ ३७ ॥ ३८ ॥ अवस्थितं निश्चेष्टं तथाप्यसंभ्रान्तं भयहीनं मां लक्षीकृत्येदं वाक्यमहमुक्त इत्यन्व
यः ॥ ३९ ॥ ममेप्सितो भक्षस्त्वमतो मे देहं प्रीणयेत्यन्वयः ॥ ४० ॥ प्रत्यगृह्णामङ्गीकृतवान् तस्या आस्यप्रमाणादधिकं भवति यथा तथा आत्मनः कायमपूरयं अ

९४
ठि
टि

मांसानवुवुधे ।। अयं कामरूपी सर्वविघ्ननिर्दलन इति मां नज्ञातवतीत्यर्थः ।। समहत्तं विकृतं मया कृतं विकृतं विकारस्त्वरूपं वक्ष्यमाणसूक्ष्मरूपत्वं च नवुवुधे ।। ४२ ।। ततदेवाह तत इति आदाय कर्तित्वा प्रपतामि प्रापतं ।। ४३ ।। विसृष्टभुजा विप्रकीर्णभुजा ।। ४४ ।। सिंहिकाहं हनूमता हतेति द्युगतानां वाचः श्रुत्वा

तस्याश्चास्यं महद्भीमं वर्धते मम भक्षणे ।। नतु मांसान्वुवुधे मम वा विकृतं कृतं ।। ४२ ।। ततोहं विपुलं रूपं संक्षिप्य निमिषान्तरात् ।। तस्या हृद
यमादाय प्रपतामि नभस्थलं ।। ४३ ।। सा विसृष्टभुजा भीमा पपात लवणांभसि ।। मया पर्वतसंकाशा निकृत्तहृदया सती ।। ४४ ।। शृणोमि
खगतानां च वाचः सौम्या महात्मनां ।। राक्षसी सिंहिका भीमा क्षिप्रं हनुमता हता ।। ४५ ।। तां हत्वा पुनरेवाहं कृत्यमात्ययिकं स्मरन् ।। गत्वा च मह
दध्वानं पश्यामि नगमंडितं ।। ४६ ।। दक्षिणं तीरमुदधेर्लंका यत्र गता पुरी ।। अस्तं दिनकरे याते रक्षसां निलयां पुरीं ।। ४७ ।। प्रविष्टोहमविज्ञा
तो रक्षोभिर्भीमविक्रमैः ।। तत्र प्रविशतश्चापि कल्पांतघनसप्रभा ।। ४८ ।। अट्टहासं विमुंचती नारी काप्युत्थिता पुरः ।। जिघांसंतीं ततस्तां तु
ज्वलदग्निशिरोरुहां ।। ४९ ।। सव्यमुष्टिप्रहारेण पराजित्य सुभैरवां ।। प्रदोषकाले प्रविशं भीतया हं तयोदितः ।। ५० ।। अहं लंकापुरी वीर निर्जि
ता विक्रमेण ते ।। यस्मात्तस्माद्विजेतासि सर्वरक्षांस्यशेषतः ।। ५१ ।। तत्राहं सर्वरात्रं तु विचरन् जनकात्मजां ।। रावणांतःपुरगतो न चापश्यं सु
मध्यमां ।। ५२ ।। ततः सीतामपश्यंस्तु रावणस्य निवेशने ।। शोकसागरमासाद्य न पारमुपलक्षये ।। ५३ ।।

।।मिष्टुना ।। ४५ ।। आत्ययिकं जानकालवि
लंबं कृत्यं सीतादर्शनं स्मरन्नेव महदध्वानं गत्वा उदधेर्दक्षिणं तीरं पश्यामि दृष्टवान् ।। ४६ ।। ४७ ।। ४८ ।। मां जिघांसंतीं ज्वलदग्नितुल्यकेशपाशां ।। ४९ ।। सु
भैरवां अतिशयेन भयंकररूपां प्रविशं प्राविशं ।। ५० ।। ५१ ।। सर्वरात्रं सर्वां रात्रिं अल्पशेषायां रात्रावशोकवनिकायां दर्शनादेव मुक्तिः ।। ५२ ।। उपलक्षये उ
पालक्ष्ये ।। ५३

346

विकृष्टेन विप्रकृष्टोर्ध्वभागेन अनुच्चेनेतियावत् तादृशेन प्रासादेनावृतं किंचित्स्थानं मया दृष्टं ॥५४॥ ततः प्राकारमवप्लुत्य बहुपादपं गृहोपवनमुद्यानं
पश्यामि अपश्यं महान् पादपो दृष्टः इति शेषः ॥५५॥ पश्यामीति प्राग्वत् कांचनतरूणां अदूराच्छिंशपावृक्षात् शिंशपावृक्षस्य समीपे ॥५६॥ तदेकवा

शोचनाच मया दृष्टं प्राकारेणाभिसंवृतं ॥ कांचनेन विकृष्टेन गृहोपवनमुत्तमं ॥५४॥ सप्राकारमवप्लुत्य पश्यामि बहुपादपं ॥ अशोकवनि
कामध्ये शिंशपापादपो महान् ॥५५॥ तमारुह्य च पश्यामि कांचनकदलीवनं ॥ अदूराच्छिंशपावृक्षात्पश्यामि वरवर्णिनीं ॥५६॥ श्यामां कमल
पत्राक्षीमुपवासकृशाननां ॥ तदेकवासःसंवीतां रजोध्वस्तशिरोरुहां ॥५७॥ शोकसंतापदीनांगीं सीतां भर्तृहिते स्थितां ॥ राक्षसीभिर्विरूपा
भिः क्रूराभिरभिसंवृतां ॥५८॥ मांसशोणितभक्ष्याभिर्व्याघ्रीभिर्हरिणीं यथा ॥ सा मया राक्षसीमध्ये तर्ज्यमाना मुहुर्मुहुः ॥५९॥ एकवेणीध
रा दीना भर्तृचिंतापरायणा ॥ भूमिशय्या विवर्णांगी पद्मिनीव हिमागमे ॥६०॥ रावणाद्विनिवृत्तार्था मर्तव्यकृतनिश्चया ॥ कथंचिन्मृगशावाक्षी
तूर्णमासादिता मया ॥६१॥ तां दृष्ट्वा तादृशीं नारीं रामपत्नीं यशस्विनीं ॥ तत्रैव शिंशपावृक्षे पश्यन्नहमवस्थितः ॥६२॥ ततो हलहलाशब्दं कां
चीनूपुरमिश्रितं ॥ शृणोम्यधिकगंभीरं रावणस्य निवेशने ॥६३॥ ततोऽहं परमोद्विग्नः स्वरूपं प्रत्यसंहरं ॥ अहं च शिंशपावृक्षे पक्षीव गहने स्थितः

सः संवीतां तेन हरणकाले किष्किंधायां पूर्वं दृष्टेनैवैकवाससा संवीतां ॥५७॥५८॥ व्याघ्रीपरिवृतां हरिणीमिव तामपश्यमिति संबंधः राक्षसीमध्ये ता
भिरेव तर्ज्यमाना सा सदुःखा मया कथंचिदासादिता इत्यन्वयः ॥५९॥६०॥ रावणाद्विनिवृत्तो विनिवर्तितोऽर्थः सुखभोगरूपो मया मर्तव्ये मरणे ॥६१॥६
शृणोमि श्रुतवान् रावणस्य निवेशने ॥ तत्समीपे यद्वा निवेशने सीतासमीपे प्रवेशनकाले ॥६३॥ प्रत्यसंहरं सूक्ष्ममकरवं गहने स्थितः पर्णसमू

हनु ठप्रदेशे ॥६४॥

६५॥परिरभ्यचेति वित्रस्तेववभूवेतिशेषः॥६६॥६७॥६८॥६९॥७०॥७१॥किंस्वित्उक्तिनमित्यर्थः॥७२॥नदसन्निधौअपहृत्यतेनाऽदृष्टइतिलंका
मागतः अन्यथानदैवनेहननंस्यादित्यर्थः सादृश्यसंभावनापिदूरापास्तेत्याह दास्येपीति॥७३॥७४॥चितास्थपावकत्वेनास्यरूपतासूचिता॥७५

ततोरावणदाराश्चरावणाश्चमहावलः॥तंदेशमनुसंप्राप्तायत्रसीताभवत्स्थिता॥६५॥तंदृष्ट्वाथवरारोहासीतारक्षोगणेश्वरं॥सं
रुध्योरुस्तनौपीनौवाहुभ्यांपरिरभ्यच॥६६॥वित्रस्तापरमोद्विग्नावीक्ष्यमाणामितस्ततः॥त्राणंकंचिदपश्यंतीवेपमानातपस्विनी
६७॥तामुवाचदशग्रीवःसीतांपरमदुःखितां॥अवाक्शिराःप्रपतितोवहुमन्यस्वमामिति॥६८॥यदिचेत्त्वंतुमांदर्पान्नाभिनंदसिगर्विते॥द्वि
मासानंतरंसीतेपास्यामिरुधिरंतव॥६९॥एतच्छ्रुत्वावचस्तस्यरावणस्यदुरात्मनः॥उवाचपरमक्रुद्धासीतावचनमुत्तमं॥७०॥राक्षसाधमराम
स्यभार्याममिततेजसः॥इक्ष्वाकुवंशनाथस्यस्नुषादशरथस्यच॥७१॥अवाच्यंवदतोजिह्वाकथंनपतितातव॥किंस्विद्वीर्यंतवानार्ययोमांभ
र्तुरसन्निधौ॥७२॥अपहृत्यागतःपापतेनादृष्टोमहात्मना॥नत्वंरामस्यसदृशोदास्येप्यस्यनयुज्यसे॥७३॥अजेयःसत्यवाक्शूरोरणश्लाघी
चराघवः॥जानक्यापरुषंवाक्यमेवमुक्तोदशाननः॥७४॥जज्वालसहसाकोपाच्चितास्थइवपावकः॥विवृत्यनयनेक्रूरेमुष्टिमुद्यम्यदक्षि
णं॥७५॥मैथिलींहंतुमारब्धःस्त्रीभिर्हाहाकृतंतदा॥ स्त्रीणांमध्यात्समुत्पत्यतस्यभार्यादुरात्मनः॥७६॥वरामंदोदरीनामतयासप्रतिषे
धितः॥उक्तश्चमधुरांवाणींतयासमदनार्दितः॥७७॥सीतयातवकिंकार्यंमहेंद्रसमविक्रम॥मयासहरमस्वाद्यमद्विशिष्टानजानकी॥७८॥

हाहाकृतंहाहेतिकृतं॥७६॥मंदोदरीनामेतिपूर्वंधान्यमालिन्याप्रतिषिद्धइत्युक्तं॥इदानींमंदोदर्येति अभिधानाद्उभाभ्यामपीतिकल्पनीयंयद्वामंदोदर्यारावणमातरंधान्यमालिनीतिइत्युक्तं॥७७॥७८॥

७९॥८०॥८१॥निरर्थकमासीदितिशेषः॥८२॥सीताव्यवसितंमहत्मन्तव्यंनत्वङ्गीकर्त्तव्यइत्येतद्रूपं॥८३॥विहताशाराक्षस्यस्तुल्यमस्माभिरव
श्यसंपाद्यमितितासामाशा॥अतएवतद्विषयेनिरुद्यमाःपरिक्लिश्यपूर्वव्यापारकृतःक्लेशः विलप्यप्रशुशोच विलापपूर्वकंशोकंचकार॥८५॥८६॥

देवगंधर्वकन्याभिर्यक्षकन्याभिरेवच॥साधर्वप्रभोरमस्वेतिसीतयाकिंकरिष्यसि॥७९॥ततस्ताभिःसमेताभिर्नारीभिःसमहाबलः॥उत्थायप्रस
हसानीतोभवनंस्वनिशाचरः॥८०॥यातेतस्मिन्दशग्रीवेराक्षस्योविकृताननाः॥सीतांनिर्भर्त्सयामासुर्वाक्यैःक्रूरैःसुदारुणैः॥८१॥तृणा
वद्भाषितंतासांगणयामाससजानकी॥गर्जितंचतथातासांसीतांप्राप्यनिरर्थकम्॥८२॥वृथागर्जितनिश्चेष्टाराक्षस्यःपिशिताशनाः॥रावणा
यशशंसुस्ताःसीताव्यवसितंमहत्॥८३॥ततस्ताःसहिताःसर्वाविहताशानिरुद्यमाः॥परिक्लिश्यसमस्तास्तानिद्रावशमुपागताः॥८४॥ता
सुचैवप्रसुप्तासुसीताभर्तृहितेरता॥विलप्यकरुणंदीनाप्रशुशोचसुदुःखिता॥८५॥तासांमध्यात्समुत्थायत्रिजटावाक्यमब्रवीत्॥आ
त्मानंखादतक्षिप्रंनसीतामसितेक्षणां॥८६॥जनकस्यात्मजांसाध्वींस्नुषांदशरथस्यच॥स्वप्नोह्यद्यमयादृष्टोदारुणोरोमहर्षणः॥८७॥
रक्षसांचविनाशायभर्तुरस्याजयायच॥अलमस्मान्परित्रातुंराघवाद्राक्षसीगणान्॥८८॥अभियाचामवैदेहीमेतद्धिममरोचते॥यदिह्ये
वंविधःस्वप्नोदुःखितायांप्रदृश्यते॥८९॥सादुःखैर्विविधैर्मुक्तासुखमाप्नोत्यनुत्तमं॥प्रणिपातप्रसन्नाहिमैथिलीजनकात्मजा॥९०॥अलमेषा
परित्रातुंराक्षस्योमहतोभयात्॥ततःसाह्रीमतीबालाभर्तुर्विजयहर्षिता॥९१॥

॥रक्षोविनाशकत्वाद्रोमहर्षणाः॥८७॥राक्षसीगणानस्मान्राक्षसीरू
पानस्मान् परित्रातुमलमेषासीतेतिशेषः॥८८॥अभियाचामस्त्वरक्षणामितिशेषः॥८९॥९०॥ततस्त्रिजटावाक्यानंतरंकैतवज्ञाप्यमितिलज्जिता
तत्कथितस्वप्नसूचितरामविजयहर्षिता॥९१॥

नतीत्रिजटावाक्यंयदितथ्यंतदावश्यंशरणंभवेयमित्येवोचदितिसंबंध ॥९२॥ चिंतयामासेति लिङुत्तमः ईदृश्याअपीदृशंदुःखमितिचिंतांकृतवानित्यर्थः मे
मनोनश्चनिर्वृतंनचिंतारहितंजातं विधिःप्रकारः ॥९३॥ ममसुतोमयासुतः ॥९४॥९५॥९६॥९७॥ तुभ्यंभर्त्तानतवभर्त्ता ॥९८॥९९॥ त्वयाज्ञप्तंत्वत्कर्तृक

348

अवोचद्यदितत्तथ्यंभवेयंशरणांहिवः ॥ तांचाहंतादृशींदृष्ट्वासीतायादारुणांदशां ॥९२॥ चिंतयामासविश्रांतोनचमेनिर्वृतंमनः ॥ संभाषणा
र्थंचमयाजानक्याश्चिंतितोविधिः ॥९३॥ इक्ष्वाकुकुलवंशस्तुततोममपुरस्कृतः ॥ श्रुत्वातुगदितांवाचंराजर्षिगणभूषितां ॥९४॥ प्रत्यभा
षतमांदेवीबाष्पैःपिहितलोचना ॥ कस्त्वंकेनकथंचेहप्राप्तोवानरपुंगव ॥९५॥ काचरामेणतेप्रीतिस्तन्मेशंसितुमर्हसि ॥ तस्यास्तद्वचनंश्रु
त्वाअहमप्यब्रुवंवचः ॥९६॥ देविरामस्यभर्त्तुस्तेसहायोभीमविक्रमः ॥ सुग्रीवोनामविक्रांतोवानरेंद्रोमहाबलः ॥९७॥ तस्यमांविद्धिभृत्यंत्वं
हनूमंतमिहागतं ॥ भर्त्रासंप्रहितस्तुभ्यंरामेणाक्लिष्टकर्मणा ॥९८॥ इदंतुपुरुषव्याघ्रःश्रीमान्दाशरथिःस्वयं ॥ अंगुलीयमभिज्ञानमदात्तुभ्यंय
शस्विनि ॥९९॥ तदिच्छामित्वयाज्ञप्तंदेविकिंकरवाण्यहं ॥ रामलक्ष्मणयोःपार्श्वंनयामित्वांकिमुत्तरं ॥१००॥ एतच्छ्रुत्वाविदित्वाचसीताजनक
नंदिनी ॥ आहरावणमुत्साद्यराघवोमांनयत्विति ॥१०१॥ प्रणम्यशिरसादेवीअहमार्यामनिंदितां ॥ राघवस्यमनोल्हादमभिज्ञानमयाचिषं ॥
॥१०२॥ अथमामब्रवीत्सीतागृह्यतामयमुत्तमं ॥ मणिर्येनमहाबाहूरामस्त्वांबहुमन्यते ॥३॥ इत्युक्त्वातुवरारोहामणिप्रवरमुत्तमं ॥ प्रायच्छत्पर
मोद्विग्नावाचामांसंदिदेशह ॥१०४॥ ततस्तस्यैप्रणम्याहंराजपुत्र्यैसमाहितः ॥ प्रदक्षिणंपरिक्रामन्निहाभ्युद्गतमानसः ॥५॥
क्र १ ॥मांतापनेउत्तरंमनुशे

त्तरकृलस्यं ॥ यद्वाकिमुत्तरंकिंब्रूहीतिशेषः ॥१००॥ उत्साद्यसमूलंनाशयित्वा ॥१॥२॥३॥ संदिदेशाकाकवृत्तांतंतिलकरणंचममान्यैकवेद्यंकथयामा सेति ॥१०६॥१०७॥

॥राम॥
॥१२५॥

ह ४

इहाभ्युपगतमानसः इहागंतुंनिश्चितमानसः ममवृत्तांतंतस्यतुभूतंमहिषयंरावणराक्षसीवृत्तांतं ॥ ६७ ॥ यतयस्मात्‌अन्यथाअनागमनेद्वौमासौममजी

उत्तरंपुनरेवाहनिश्चितमनसातदा ॥ हनूमन्ममवृत्तांतंवक्तुमर्हसिराघवे ॥ ६ ॥ यथाश्रुत्वैवनचिराद्राघवौरामलक्ष्मणौ ॥ सुग्रीवसहितौवीरावु
पेयातांतथाकुरु ॥ ७ ॥ यदन्यथाभवेदेतत्‌द्वौमासौजीवितंमम ॥ नमांद्रक्ष्यतिकाकुत्स्थोम्रियेसाहमनाथवत् ॥ ८ ॥ तच्छ्रुत्वाकरुणंवाक्यंक्रो
धोमामभ्यवर्त्तत ॥ उत्तरंचमयादृष्टंकार्यशेषमनंतरं ॥ ९ ॥ ततोवर्धतमेकायस्तदापर्वतसन्निभः ॥ युद्धाकांक्षीवनंतस्यविनाशयितुमारभे ॥
११० ॥ तद्भग्नंवनखंडंतुभ्रांतत्रस्तमृगद्विजं ॥ प्रतिबुध्यनिरीक्षंतेराक्षस्योविकृताननाः ॥ १११ ॥ मांचदृष्ट्वावनेतस्मिन्समागम्यततस्ततः ॥ ताःसम
भ्यागताःक्षिप्रंरावणायाचचक्षिरे ॥ ११२ ॥ राजन्वनमिदंदुर्गंतवभग्नंदुरात्मना ॥ वानरेणह्यविज्ञायतवबीर्यंमहाबल ॥ ११३ ॥ तस्यदुर्बुद्धितोरा
जन्तवविप्रियकारिणः ॥ वधमाज्ञापयक्षिप्रंयथासौनपुनर्व्रजेत् ॥ १४ ॥ तच्छ्रुत्वाराक्षसेंद्रेणविसृष्टाबहुदुर्जयाः ॥ राक्षसाःकिंकरानामराव
णस्यमनोनुगाः ॥ १५ ॥ तेषामशीतिसाहस्रंशूलमुद्गरपाणिनां ॥ मयातस्मिन्वनोद्देशेपरिघेणनिषूदितं ॥ १६ ॥ तेषांतुहतशिष्टायेतेगतालघुवि
क्रमाः ॥ निहतंचमयासैन्यंरावणायाचचक्षिरे ॥ १७ ॥ ततोमेबुद्धिरुत्पन्नाचैत्यप्रासादमुत्तमं ॥ तत्रस्थान्राक्षसान्हत्वाशतंस्तंभेनवैपुनः ॥ १८ ॥ ललाम
भूतोलंकायामयाविध्वंसितोरुषा ॥ ततःप्रहस्तस्यसुतंजंबुमालिनमादिशत् ॥ १९ ॥ राक्षसैर्बहुभिःसार्धंघोररूपैर्भयानकैः ॥ तमहंबलसंप
न्नंराक्षसंरणकोविदं ॥ १२० ॥

॥ वितंभवेत्‌अनाथवत्म्रियेराक्षसीकृतवधेनेतिभावः ॥ ८ ॥ उत्तरंकार्यशेषंलंकानाशनरूपं ॥ ९ ॥ ११० ॥ १११ ॥ समागम्य
मिलित्वा ॥ ११२ ॥ ११३ ॥ तस्यदुर्बुद्धितोनिवृत्तोब्रवीहेस्तत ॥ नपुनर्व्रजेत्स्वदेशमितिशेषः ॥ १४ ॥ १५ ॥ १६ ॥ चैत्यप्रासादविनाशयितुमितिशेषः ॥ १८ ॥ ललामभूत
श्चैत्यप्रासादइतिशेषः ॥ १९ ॥ २० ॥

॥१२१॥१२२॥१२३॥१२४॥१२५॥ द्वितीयं प्रेषितपुत्रापेक्षया द्वितीयं ॥१२७॥१२८॥ महता प्रत्ययेन विश्वासेन ॥१२९॥१३०॥ प्रवद्धा प्रवध्य राक्षसेभ्यो

परिघेणातिघोरेणासूदयामि सहानुगं ॥ तच्छ्रुत्वा राक्षसेंद्रस्तु मंत्रिपुत्रान्महावलान् ॥२१॥ पदातिवलसंपन्नान्प्रेषयामास रावणः ॥ परिघे
णैव तान्सर्वान्नयामि यमसादनं ॥२२॥ मंत्रिपुत्रान्हतान्श्रुत्वा समरे लघुविक्रमान् ॥ पंच सेनाग्रगान्शूरान्प्रेषयामास रावणः ॥२३॥ तानहं स
हसैन्यान्वै सर्वानेवाभ्यसूदयं ॥ ततः पुनर्दशग्रीवः पुत्रमक्षं महावलं ॥२४॥ वहुभी राक्षसैस्सार्धं प्रेषयामास संयुगे ॥ तं तु मंदोदरीपुत्रं कुमारं
रणपंडितं ॥२५॥ सहसा खं समुद्यंतं पादयोश्च गृहीतवान् ॥ चर्मासिनं शतगुणं भ्रामयित्वा व्यपेषयं ॥२६॥ तमक्षमागतं भग्नं निशम्य स दशान
नः ॥ ततश्चेंद्रजितं नाम द्वितीयं रावणः सुतं ॥२७॥ व्यादिदेश सुसंक्रुद्धो वलिनं युद्धदुर्मदं ॥ तच्चाप्यहं वलं सर्वं तं च राक्षसपुंगवं ॥२८॥ नष्टौजसं
रणे कृत्वा परं हर्षमुपागतः ॥ महतापि महावाहुः प्रत्ययेन महावल ॥२९॥ प्रहितो रावणेनैषः सह वीरैर्मदोत्कटैः ॥ सोऽविषह्यं हि मां बुद्ध्वा स्वसै
न्यं चावमर्दितं ॥३०॥ ब्रह्मणोऽस्त्रेण स तु मां प्रवध्नाचातिवेगितः ॥ रज्जुभिश्चापि वध्नंति ततो मां तत्र राक्षसाः ॥३१॥ रावणस्य समीपं च गृहीत्वा
मामुपागमन् ॥ दृष्ट्वा संभाषितश्चाहं रावणेन दुरात्मना ॥३२॥ पृष्टश्च लंकागमनं राक्षसानां च तं वधं ॥ तत्सर्वं च रणे तत्र सीतार्थमुपजल्पितं
॥३३॥ तस्यास्तु दर्शनाकांक्षी प्राप्तस्त्वद्भवनं विभो ॥ मारुतस्यौरसः पुत्रो वानरो हनुमानहं ॥३४॥ रामदूतं च मां विद्धि सुग्रीवसचिवं कपिं ॥ सोऽहं दौ
त्येन रामस्य त्वत्सकाशमिहागतः ॥३५॥ शृणु चापि समादेशं यदहं प्रब्रवीमि ते ॥ राक्षसेश हरीशस्त्वां वाक्यमाह समाहितं ॥३६॥ ॥

ऽपेयदिति शेषः वध्नंति अवध्नन् ॥३१॥ ३२॥ सीतार्थमिति कथितमित्यर्थः ॥३३॥ तस्याः सीतायाः ॥३४॥१३५॥ १३६॥ ६ ॥

349

२७।३८॥समयंप्रतिज्ञां॥३९।१४०॥सप्लवतांसम्यक्प्लवतांप्रभुरहमितिशेषः॥४१॥तस्यरामस्य॥तेनरामसाहाय्यस्यकर्तव्यत्वेनतुभ्यंसमीपंतवसमीपं
प्रस्थापितोहंतइतिशेषः॥हनुप्रेषणंविनाप्रथममेवएतद्रूपसाधर्म्यात्वादितिभावः॥४२॥सीतादानाभावेबाधकमाह यावदिति॥४३॥वानरराणामिति एवंवलंतं

सुग्रीवश्चमहाभागस्त्वांकौशलमब्रवीत्॥धर्मार्थकामसहितंहितंपथ्यमुवाचह॥३७॥वसतोऋष्यमूकेमेपर्वतेविपुलद्रुमे॥राघवोरणविक्रान्तोमि
त्रत्वंसमुपागतः॥३८॥तेनमेकथितंराजन्भार्यामेरक्षसाहृता॥तत्रसाहाय्यहेतोर्मेसमयंकर्तुमर्हसि॥१३९॥वालिनाहतराज्येनसुग्रीवेणसहप्र
भुः॥चक्रेग्निसाक्षिकंसख्यंराघवःसहलक्ष्मणः॥१४०॥तेनवालिनमाहत्यशरेणैकेनसंयुगे॥वानराणांमहाराजःकृतःसंप्लवतांप्रभुः॥४१॥त
स्यसाहाय्यमस्माभिःकार्यंसर्वात्मनात्विह॥तेनप्रस्थापितस्तुभ्यंसमीपमिहधर्मतः॥४२॥क्षिप्रमानीयतांसीतादीयतांराघवस्यच॥यावन्नहरयो
वीराविधमन्तिबलंतव॥१४३॥वानराणांप्रभावोयंनकेनविदितःपुरा॥देवतानांसकाशंचयेगच्छन्तिनिमन्त्रिताः॥४४॥इतिवानरराजस्त्वामाहेत्य
भिहितोमया॥मामैक्षततोरुष्टश्चक्षुषाप्रदहन्निव॥४५॥तेनवध्योहमाज्ञप्तोरक्षसारौद्रकर्मणा॥मत्प्रभावमविज्ञायरावणेनदुरात्मना॥४६॥
ततोविभीषणोनामतस्यभ्राता महामतिः॥तेनराक्षसराजश्चयाचितोममकारणात्॥४७॥नैवंराक्षसशार्दूलत्यज्यतामेषनिश्चयः॥राजशास्त्रव्य
पेतोहिमार्गःसंलक्ष्यतेत्वया॥४८॥दूतवध्यानदृष्टाहिराजशास्त्रेषुराक्षस॥दूतेनवेदितव्यंचयथाभिहितवादिना॥४९॥सुमहत्यपराधेपिदूतस्यातु
लविक्रम॥विरूपकरणंदृष्टंनवधोस्तीतिशास्त्रतः॥१५०॥

॥नाशनेवानराअसमर्थाइतिनमन्तव्यमितिभावः राघवाणामितिपाठेमनुष्याःसमर्थाइ
तिनमन्तव्यमितिभावः॥४४।४५॥मत्प्रभावंवरदानलब्धावध्यत्वरूपं॥४६।४७॥नैवंअयमवध्यइत्यर्थः एषनिश्चयः एतद्वधनिश्चयःसंलक्ष्यतेविचार्यते

॥४८॥वेदितव्यंनिवेदनीयंस्वचैवमुक्तिर्दूतस्यनापराधइत्यर्थः॥४९॥५०॥

५१ ५२ ॥ हंतेतोमामितिशेषःआर्षमेतत् ॥ ५३ ५४ ५५ ५६ ५७ ५८ ५९ १६० ६१ ॥ विस्मयकारीयउदंतोवृत्तांतस्तद्भाषिणांनेवदग्धा ॥ ६२ ॥ उपलक्षि

विभीषणेनैवमुक्तोरावणःसंदिदेशतान् ॥ राक्षसानेतदेवास्यलांगूलंदह्यतामिति ॥ ५१ ॥ ततस्तस्यवचःश्रुत्वाममपुच्छंसमंततः ॥ वेष्टितं
शणवल्कैश्चपटैःकार्पासकैस्तथा ॥ ५२ ॥ राक्षसाःसिद्धसन्नाहास्ततस्तेचंडविक्रमाः ॥ तदादीप्यंतमेपुच्छंहनंतःकाष्ठमुष्टिभिः ॥ ५३ ॥ बद्ध
स्यबहुभिःपाशैर्यंत्रितस्यचराक्षसैः ॥ नमेपीडाभवेत्काचिद्दिदृक्षोर्नगरींदिवा ॥ ५४ ॥ ततस्तेराक्षसाःशूराबद्धंमामग्निसंवृतं ॥ अघोष
यन्राजमार्गेनगरद्वारमागताः ॥ ५५ ॥ ततोहंसुमहद्रूपंसंक्षिप्यपुनरात्मनः ॥ विमोचयित्वातंबंधंप्रकृतिस्थःस्थितःपुनः ॥ ५६ ॥ आयसं
परिघंगृह्यतानिरक्षांस्यसूदयं ॥ ततस्तन्नगरद्वारंवेगेनाप्लुतवानहं ॥ ५७ ॥ पुच्छेनचप्रदीप्तेनतांपुरींसाट्टगोपुरां ॥ दहाम्यहमसं
भ्रांतोयुगांताग्निरिवप्रजाः ॥ ५८ ॥ विनष्टाजानकीव्यक्तंनह्यदग्धःप्रदृश्यते ॥ लंकायाःकश्चिदुद्देशःसर्वाभस्मीकृतापुरी ॥ ५९ ॥ दहता
चमयालंकांदग्धासीतानसंशयः ॥ रामस्यचमहत्कार्यंमयेदंविफलीकृतं ॥ १६० ॥ इतिशोकसमाविष्टश्चिंतामहमुपागतः ॥ ततोहंवाचम
श्रौषंचारणानांशुभाक्षरां ॥ ६१ ॥ जानकीनचदग्धेतिविस्मयोदंतभाषिणां ॥ ततोमेबुद्धिरुत्पन्नाश्रुत्वातामद्भुतांगिरं ॥ ६२ ॥ अदग्धाजा
नकीत्येवंनिमित्तैश्चोपलक्षितं ॥ दीप्यमानेतुलांगूलेनमांदहतिपावकः ॥ १६३ ॥ हृदयंचप्रहृष्टंमेवाताःसुरभिगंधिनः ॥ तैर्निमित्तैश्चदृ
ष्टार्थैःकारणैश्चमहागुणैः ॥ ६४ ॥ ऋषिवाक्यैश्चदृष्टार्थैरभवंहृष्टमानसः ॥ पुनर्दृष्ट्वाचवैदेहींविसृष्टश्चतयापुनः ॥ ६५ ॥ ॥

तंतद्दहनमितिशेषःनिमित्तैःशुभसूचकैःनिमित्तान्याहदीप्यमानेत्यादि ॥ १६३ ॥ दृष्टार्थैःदृष्टसंवादैःमहागुणैःकारणैःमत्प्रवृत्तिकारणैःसीताराम

सुं॥५४॥प

आरेभेलिङुत्तम ॥ ६६ ॥ ६७ ॥ ६८ ॥ १६९ ॥ जपकमानः ॥ इतिश्रीरामाभिरामेश्रीरा० सुं द० षट्पंचाशः सर्गः ॥ ५८ ॥ स नदिनितिउत्तरं पराक्रमयुक्तत्वात्सर्वेभ्योधि
कं ॥ १ ॥ संभ्रम आदरउत्साह इत्यर्थः सीतायाः शीलं सद्वृत्तं पातिव्रत्यं ॥ आसाद्य दृष्ट्वा राघवोद्योगादेः साफल्यप्राप्तानेन मम मनः प्रीणितं तुष्टं मम च प्र:
वरांमम इति पाठेपि ॥ प्रवरांसेनोपप्रवरामित्यर्थः ॥ २ ॥ सदृशं पतिव्रतानामरुंधत्यादीनां सदृशमित्यर्थः ॥ ३ ॥ नहिं रावणांकिमितिनादहृदिस्पतआ

ततः पर्वतमासाद्य तत्रारिष्टमहं पुनः ॥ प्रतिप्लवनमारेभे युष्मद्दर्शनकांक्षया ॥ ६६ ॥ ततः श्वसनचंद्रार्कसिद्धगंधर्वसेवितं ॥ पंथान
महमाक्रम्य भवतो दृष्टवानिह ॥ ६७ ॥ राघवस्य प्रसादेन भवतां चैव तेजसा ॥ सुग्रीवस्य च कार्यार्थं मया सर्वमनुष्ठितं ॥ ६८ ॥ एतत्स
र्वं मया तत्र यथावदुपपादितं ॥ अत्र यन्न कृतं शेषं तत्सर्वं क्रियतामिति ॥ १६९ ॥ इत्यार्षे श्रीमद्रामायणे वा० सुंदरकांडे षट्पंचाशः सर्गः
॥ ५८ ॥ एतदाख्याय तत्सर्वं हनूमान्मारुतात्मजः ॥ भूयः समुपचक्राम वचनं वक्तुमुत्तरं ॥ १ ॥ सफलो राघवोद्योगः सुग्रीवस्य च संभ्रमः
शीलमासाद्य सीताया मम च प्रीणितं मनः ॥ २ ॥ आर्यायाः सदृशं शीलं सीतायाः प्लवगर्षभाः ॥ तपसा धारयेल्लोकान्क्रुद्धा वा नि
र्दहेदपि ॥ ३ ॥ सर्वथातिप्रकृष्टोसौ रावणो राक्षसेश्वरः ॥ यस्य तां स्पृशतो गात्रं तपसा न विनाशितम् ॥ ४ ॥ न तदग्निशिखा कुर्यात्सं
स्पृष्टा पाणिना सती ॥ जनकस्य सुता कुर्याद्यत्क्रोधकलुषीकृता ॥ ५ ॥

॥ ह: सर्वथेति अतिप्रकृष्टः महातपःसंपन्न इत्यर्थः तां सीतां स्पृश
तोपि यस्य गात्रं तपसा न नाशितमिति वंधः ॥ ४ ॥ नैतावता सीताशीलं दुर्वलमित्याशंक्याभिप्राह नेति यत्क्रुद्धा सीता कुर्यात्तत्संस्पृष्टाग्निशिखापि
न कुर्यात् इयं तु भर्तुः पराक्रमकीर्त्येनाद्यापि कुप्यतीति भावः अक्रुद्धाया अपि स्पर्शमात्रेण प्राप्तो नाशस्तु रावणस्य तपसा निवारित इति ध्येयं ॥ ५ ॥

इदानीमन्यजयस्यापि स्वामिसंबंधित्वसत्त्वेन वयमेव सीतापातिव्रत्यं सहायमासाद्य रावणं जित्वा देव्या सह राघवौ द्रक्ष्याम इत्याह जांबवदिति जांबवदादीननुज्ञाप्यानुज्ञां कुर्वन्निति संप्रार्थ्य अस्मिन्कार्ये सीतान्वेषणारूपे ५ एवं गते उक्तप्रकारं प्राप्ते तत्प्रकारविशिष्टे एवं भवतां निवेदिते सति ॥ तौ पार्थिवात्मजौ वैदेह्या संद्रष्टुं न्याय्यमित्यब्रवीदिति शेषः ॥६॥ तया सह दर्शने उपपत्तिमाह अहमिति एवं च राक्षसान्हत्वा देव्यानयनं कृत्वा देव्या सहैव तौ द्रक्ष्याम इत्यर्थः ॥७॥

जांबवत्प्रमुखान्सर्वाननुज्ञाप्य महाकपीन् । अस्मिन्नेवं गते कार्ये भवतां च निवेदिते ॥ न्याय्यं स्म सह वैदेह्या द्रष्टुं तौ पार्थिवात्मजौ ॥६॥ अहमेकोपि पर्याप्तः सराक्षसगणां पुरीं ॥ तां लंकां तरसा हंतुं रावणं च सराक्षसं ॥७॥ किं पुनः सहितो वीरैर्बलवद्भिः कृतात्मभिः ॥ कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः ॥८॥ अहं तु रावणं युद्धे ससैन्यं सपुरःसरं ॥ सहपुत्रं वधिष्यामि सहोदरयुतं युधि ॥९॥ ब्राह्ममस्त्रं च रौद्रं च वायव्यं वारुणं तथा ॥१०॥ यदि शक्रजितोस्त्राणि दुर्निरीक्ष्याणि संयुगे ॥ तान्यहं निहनिष्यामि विधमिष्यामि राक्षसान् ॥११॥ भवतामभ्यनुज्ञातो विक्रमो मे रुणद्धि तं ॥ मयातुला विसृष्टा हि शैलवृष्टिर्निरंतरा ॥१२॥ देवानपि रणे हन्यात्किं पुनस्तान्निशाचरान् ॥ भवतामननुज्ञातो विक्रमो मे रुणद्धि माम् ॥१३॥ सागरोप्यतियाद्वेलां मंदरः प्रचलेदपि ॥ न जांबवंतं समरे कंपयेदरिवाहिनी ॥१४॥ सर्वराक्षससंघानां राक्षसा ये च पूर्वजाः ॥ अलमेकोपि नाशाय वीरो वालिसुतः कपिः ॥१५॥

कृतास्त्रैर्दैवांशत्वादस्त्रप्रयोगसमर्थैः ॥८॥ उक्तमेवार्थं संक्षेपेण पुनराह अहं त्विति अहमेवेत्यर्थः ॥९॥१०॥ यद्यपि दुर्निरीक्ष्याणि तथापि तान्यहं निहनिष्यामि ब्रह्मणो वरदानान्निवारयामि पराहतैस्तैरेव राक्षसान्विधमिष्यामि निहनिष्यामि ॥११॥ रुणद्धि रोत्स्यति ॥१२॥ भवतामननुज्ञातः अनुज्ञां विना मे विक्रमो राक्षसवधप्रवृत्तिर्मां रुणद्धीत्यर्थः अतः पूर्वमेव मया न पराक्रान्तमित्यर्थः ॥१३॥ इदानीं सर्वेपि भवंतस्तु ह्रवेन समर्था इत्याह सागरोपीति ॥१४॥ ये च पूर्वजा राक्षसास्तेषां नाशायैकोपीत्यन्वयः ॥१५॥

॥राम॥
॥१३८॥

351

पनरूस्पो २

१६॥१७॥१८॥मयैवनिहितानिहतप्राया एवंचसर्वैर्मिलित्वा द्रुतिभावः नामेतिसुग्रीवादेरितिशेषः॥१९॥नदेवाह जयतीति॥२०॥२१॥सीतादुःखविमर्शोपिसंप्र
त्यवसमानेनुसुचितेनाशयेनतद्दशां वर्णयति अशोकेत्यादि॥२२॥२३॥अचिंतयती योग्यत्वेनागणयंती अगणने हेतुः पतिव्रतेति॥ अगणनाच्चावष्टब्धानिरु

प्लवंगस्याहवेगेननीलस्यचमहात्मनः॥मंदरोप्यवशीर्येतकिंपुनर्युधिराक्षसाः॥१६॥सदेवासुरयक्षेषुगंधर्वोरगपक्षिषु॥मैंदस्यप्रतियोद्धारंशं
सतनद्विविदस्यवा॥१७॥अश्विपुत्रौमहावेगावेतौप्लवगसत्तमौ॥एतयोःप्रतियोद्धारंनपश्यामिरणाजिरे॥१८॥मयैवनिहतालंकादग्धाभस्मीकृता
पुरी॥राजमार्गेषुसर्वेषुनामविश्रावितंमया॥१९॥जयत्यतिबलोरामोलक्ष्मणश्चमहाबलः॥राजाजयतिसुग्रीवोराघवेणाभिपालितः॥२०॥अहं
कोसलराजस्यदासःपवनसंभवः॥हनुमानितिसर्वत्रनामविश्रावितंमया॥२१॥अशोकवनिकामध्येरावणस्यदुरात्मनः॥अधस्ताच्छिंशु
पामूलेसाध्वीकरुणमास्थिता॥२२॥राक्षसीभिःपरिवृताशोकसंतापकर्शिता॥मेघरेखापरिवृताचंद्ररेखेवनिष्प्रभा॥२३॥अचिंतयंतीवैदे
हीरावणंबलदर्पितं॥पतिव्रताचसुश्रोणीअवष्टब्धाचजानकी॥२४॥अनुरक्ताहिवैदेहीरामंसर्वात्मनाशुभा॥अनन्यचिंतारामेणपौलोमीव
पुरंदरे॥२५॥तदेकवासःसंवीतारजोध्वस्तातथैवच॥सामयाराक्षसीमध्येतर्ज्यमानामुहुर्मुहुः॥२६॥राक्षसीभिर्विरूपाभिर्दृष्टाहिप्रमदावने
एकवेणीधरादीनाभर्तृचिंतापरायणा॥२७॥अधःशय्याविवर्णांगीपद्मिनीवहिमोदये॥रावणाद्विनिवृत्तार्थामर्तव्यकृतनिश्चया॥२८॥
कथंचिन्मृगशावाक्षीविश्वासमुपपादिता॥ततःसंभाषिताचैवसर्वमर्थंप्रकाशिता॥२९॥

॥द्धा अस्तीतिशेषः॥२४॥रामेण रामप्रीत्या अनन्यचिंतापौ
लोमीव नहुषरूपापौलोमीव तदेकवास इतिव्याख्यातं राक्षसीभिस्तर्ज्यमाना दृष्टेत्युत्तरेणान्वयः॥२६॥२७॥२८॥कथंचिदादौतुश्रीरामकथाप्रस्तावे

न.सर्वमर्थेरामसुग्रीवहनुमता॥२८॥

जांबवत्प्रमुखान्मुख्याननुज्ञाप्य महाकपीन्॥ ५
मतयोः प्रतियोत्कारं नपश्यामि रणाजिरे॥ २१४

नदेवाहं रामसुग्रीवसख्यं वेत्ति॰ नियतः समुदाचारोत्र पातिव्रत्यं भर्तरि उत्तमाभक्तिश्चास्ति इयत्यापि सा मय्यायत्त शाननं शापादिना न हंति तत्तस दशाननस्तोम
हात्मा न पो वलेन शापाऽयोग्य इति भाव॥ ३०॥ अथापि सीतावरोधजन्यपापेन मृतप्राय एव स इत्याह॰ निमित्तमात्रमिति अतोस्माभिरपि सुशक्य वध्य एव स

रामसुग्रीवसख्यं च श्रुत्वा प्रीतिमुपागता॥ नियतः समुदाचारो भक्तिर्भर्तरि चोत्तमा॥ यन्न हंति दशग्रीवं स महात्मा दशाननः॥ ३०॥ निमित्तमात्रं राम
स्तु वधे तस्य भविष्यति॥ ३१॥ सा प्रकृत्यैव तन्वंगी तद्वियोगाच्च कर्षिता॥ प्रतिपत्पाठशीलस्य विद्येव तनुतां गता॥ ३२॥ एवमास्ते महाभागा सीता शो
कपरायणा॥ यदत्र प्रतिकर्तव्यं तत्सर्वमुपकल्प्यतां॥ ३३॥ इत्यार्षे श्रीमद्रामायणे सुंदरकांडे एकोनषष्टितमः सर्गः॥ ५९॥ तस्य तद्वचनं श्रुत्वा
वालिसूनुरभाषत॥ अश्विपुत्रौ महावेगौ वलवंतौ प्लवंगमौ॥ १॥ पितामहवरोत्सेकात्परमं दर्पमास्थितौ॥ अश्विनोर्माननार्थं हि सर्वलोकपिता
मह॥ २॥ सर्ववध्यत्वमतुलमनयोर्दत्तवान्पुरा॥ वरोत्सेकेन मत्तौ च प्रमथ्य महतीं चमूं॥ ३॥ सुराणाममृतं वीरौ पीतवंतौ महावलौ॥ एतावेव हि
संक्रुद्धौ सवाजिरथकुंजरां॥ ४॥ लंकां नाशयितुं शक्तौ सर्वे तिष्ठंतु वानराः॥ अहमेकोपि पर्याप्तः सराक्षसगणां पुरीं॥ ५॥ तां लंकां तरसा हंतुं रा
वणं च महावलं॥ किं पुनः सहितो वीरैर्वलवद्भिः कृतात्मभिः॥ ६॥ कृतास्त्रैः प्लवगैः शक्तैर्भवद्भिर्विजयैषिभिः॥ वायुसूनोर्वलेनैव दग्धा लंकेति
नः श्रुतं॥ ७॥ दृष्टा देवी न चानीता इति तत्र निवेदितुं॥ न युक्तमिव पश्यामि भवद्भिः ख्यातपौरुषैः॥ ८॥ न हि वः प्लवने कश्चिन्नापि कश्चित्परा
क्रमे॥ तुल्यः सामरदैत्येषु लोकेषु हरिसत्तमाः॥ ९॥

॥इति भाव॥ ३१॥ तत्रापकाररामाहु सेति॥ ३२॥ ३३॥ वलमान॥ इति रामाभिरामे श्रीरा॰सुंद॰ एको
नषष्टितमः सर्गः॥ ५९॥ तस्येति॥ १॥ २॥ ३॥ ४॥ ५॥ ६॥ ७॥ दृष्टा देवी नानीता इति तत्र राम समीपे निवेदितुं न युक्तमिव पश्यामि॥ ८॥ तुल्यास्त्वीतिशेषः॥ ९॥

352

१०॥अतत्कर्त्तव्यंकिमस्तिकाकुरत्रअपितुजानकीयहरणपूर्वकगमनादन्यत्किमपीत्यर्थः॥११॥न्यस्यामस्थापयाम तान् सर्वान्किष्किंधायामागतान्वानरान्व्यलीकैरप्रियैर्दुःखैर्योजयित्वेतिशेषः तथाकृत्वाकिंफलमितिशेषः किंपरिक्लेशफलमितिपाठान्तरं॥१२॥१३॥१४॥नैषावुद्धिर्युक्तेतिशेषः तत्रहेतुमाह

जित्वालंकांसरक्षौघांहत्वातंरावणंरणे॥सीतामादायगच्छामःसिद्धार्थाहृष्टमानसाः॥१०॥तेष्वेवंहतशेषेषुराक्षसेषुहनूमता॥किमन्यदत्रकर्त्तव्यंगृहीत्वायामजानकीं॥११॥रामलक्ष्मणयोर्मध्येन्यस्यामजनकात्मजां॥किंव्यलीकैस्तुतान्सर्वान्वानरान्वानरर्षभान्॥१२॥वयमेवहिगत्वातान्हत्वाराक्षसपुंगवान्॥राघवंद्रष्टुमर्हामःसुग्रीवंसहलक्ष्मणं॥१३॥तमेवंकृतसंकल्पंजाम्ववान्हरिसत्तमः॥उवाचपरमप्रीतोवाक्यमर्थमदर्थवित्॥१४॥नैषावुद्धिर्महावुद्धेयद्व्रवीषिमहाकपे॥विचेतुंवयमाज्ञप्तादक्षिणांदिशमुत्तमां॥१५॥नाज्ञप्तंकपिराजेननैवरामेणधीमता॥कथंचिन्निर्जितांसीतामस्माभिर्नाभिरोचयेत्॥१६॥राघवोनृपशार्दूलःकुलंव्यपदिशन्स्वकं॥प्रतिज्ञायस्वयंराजासीताविजयमग्रतः॥१७॥सर्वेषांकपिमुख्यानांकथंमिथ्याकरिष्यति॥विफलंकर्मचकृतंभवेत्तुष्टिर्नतस्यच॥१८॥वृथाचदर्शितंवीर्यंभवेद्वानरपुंगवाः॥तस्माद्गच्छामवैसर्वेयत्ररामःसलक्ष्मणः॥१९॥सुग्रीवश्चमहातेजाःकार्यस्यास्यनिवेदने॥१९॥नतावदेषामतिरक्षमानोयथाभवान्पश्यतिराजपुत्र॥यथातुरामस्यमतिर्निविष्टातथाभवान्पश्यतुकार्यसिद्धिं॥२०॥

॥विचेतुमिति॥१५॥प्रथमंजयस्यवदुर्लभःकथंचिज्जयेपियदिनरोचयेत्तदाकार्यनाशइतिभावः॥१६॥अरुचौहेतुःकुलंव्यपदिशन्निति प्रतिज्ञायेतिच अयतःकपिमुख्यानामित्यन्वयः॥१७॥अस्त्वेवंफलंवै परीत्य दर्शयतिफलमिति॥१८॥अस्यकार्यस्यनिवेदनेमतिंकृत्वेतिशेषः॥१९॥अथजाम्ववानंगदक्रोधपरिहारायतन्मतेनवहुमानसुहृद्भावेननिवर्त्तयतिनतावदिति हेराजपुत्रयथाभवान्पश्यतिविवरयतिएषामतिर्नोस्माकमक्षमानकिंतुशक्तैवयथारामस्यमतिर्निविष्टाअवस्थितातथाकार्यसिद्धिंभवान्पश्यत्वित्यर्थः॥२०॥

नरमानः॥ इति रामाभिरामे श्री० सुंद० षष्ठितमः सर्गः॥६०॥ अगृह्णंतु प्रक्रि प्रक्रान्तेनामन्यन्त॥१॥ प्लुप्लुवुः प्लवंतो जग्मुः॥२॥ आकाशं छादयंत इवेत्युत्प्रे-
क्षा॥३॥ सभाज्यमानं भूतैः सिद्धादिभिः दृष्टिभिर्वहंत इव प्रीतिपूर्वकानिमिषदर्शनाद्दृष्टीनां वाहकत्वोत्प्रेक्षा॥ ४॥ राघवे कार्यनिर्वृत्तिं कार्यसिद्धिं स

इत्यार्षे श्रीमद्रामायणे सुंदरकांडे षष्ठितमः सर्गः॥६०॥ ततो जांबवतो वाक्यमगृह्णंत वनौकसः॥ अंगदप्रमुखा वीरा हनूमांश्च महाकपि
:॥१॥ प्रीतिमंतस्ततः सर्वे वायुपुत्रपुरःसराः॥ महेंद्राग्रात्समुत्पत्य पुप्लुवुः प्लवगर्षभाः॥२॥ मेरुमंदरसंकाशा मत्ता इव महागजाः॥ छादयं
तमिवाकाशं महाकायं महावलाः॥३॥ सभाज्यमानं भूतैस्तमात्मवंतं महावलं॥ हनूमंतं महावेगं वहंत इव दृष्टिभिः॥४॥ राघवे चार्थनिर्वृ
त्तिं कर्तुं च परमं यशः॥ समाधाय समृद्धार्थाः कर्मसिद्धिभिरुन्नताः॥५॥ प्रियाख्यानोन्मुखाः सर्वे सर्वे युद्धाभिनंदिनः॥ सर्वे रामप्रतीकारे नि
श्चितार्था मनस्विनः॥६॥ प्लवमानाः खमाप्लुत्य ततस्ते काननौकसः॥ नंदनोपममासेदुर्वनं द्रुमशतायुतं॥७॥ यत्तन्मधुवनं नाम सुग्री
वस्याभिरक्षितं॥ अधृष्यं सर्वभूतानां सर्वभूतमनोहरं॥८॥ यद्रक्षति महावीरः सदा दधिमुखः कपिः॥ मातुलः कपिमुख्यस्य सुग्रीवस्य महा
त्मनः॥९॥ ते तद्वनमुपागम्य बभूवुः परमोत्कटाः॥ वानरा वानरेंद्रस्य मनःकांतं महावनं॥१०॥ ततस्ते वानरा हृष्टा दृष्ट्वा मधुवनं महत्
कुमारमभ्ययाचंत मधूनि मधुपिंगलाः॥११॥

॥ माधायेति निश्चित्य तस्यात्मनश्च परमं यशः कर्तुं च निश्चित्य प्रुप्लुवुरिति संबंधः कर्मसिद्धिभि
:सीतादर्शनलंकादहनकर्मभिरुन्नता उन्नतचित्ताः॥५॥ रामप्रतीकारे रामकर्तव्ये रावणप्रतीकारे निश्चितार्था अभूवन्निति शेषः॥६॥ वनं सुग्री
वस्य मधुवनं॥७॥८॥ दधिमुखस्तन्नामा॥९॥ परमोत्कटाः तत्रत्यमधुपानादावत्युत्कटोत्कंठावंतः महावनाख्यं वनमित्यर्थः॥१०॥ मधुपिंगलाः

मधुवनभंगः॥६१॥

353

[redacted]

अनुमान्य कृतानुमतिकान् कृत्वा निसर्गमाज्ञां ॥१२॥ निसृष्टाः कृताज्ञाः ॥१३॥ भक्षयंत अभक्षयन्नित्यर्थ ॥१४॥ अनुमताः मधुपानादौ कृतानुमतिकाः हर्षेमे

ततः कुमारस्तान्वृद्धान्जांववत्प्रमुखान्कपीन् ॥ अनुमान्य ददौ तेषांनिसर्गंमधुभक्षणे ॥१२॥ तेनिसृष्टाःकुमारेणधीमतावालिसूनुना ॥ हर
यःसमपद्यन्तद्रुमान्मधुकराकुलान् ॥१३॥ भक्षयंतःसुगंधीनिमूलानिचफलानिच ॥ जग्मुःप्रहर्षंतेसर्वेवभूवुश्चमदोत्कटाः ॥१४॥ तत
श्चानुमताःसर्वेसुसंहृष्टावनौकसः ॥ मुदिताश्चततस्तेचप्रनृत्यंतिततस्ततः ॥१५॥ गायंतिकेचित्प्रहसंतिकेचिन्नृत्यंतिकेचित्प्रणमंतिकेचि
त् ॥ पठंतिकेचित्प्रचरंतिकेचित्प्लवंतिकेचित्प्रलपंतिकेचित् ॥१६॥ परस्परंकेचिदुपाश्रयंतिपरस्परंकेचिदतिब्रुवंति ॥ द्रुमाद्द्रुमंकेचिदभिद्र
वंतिक्षितौनगाग्रान्निपतंतिकेचित् ॥१७॥ महीतलात्केचिदुदीर्णवेगामहाद्रुमाग्राण्यभिसंपतंति ॥ गायंतिमन्यःप्रहसन्नुपैतिरुदंतिमन्यःप्ररु
दन्नुपैति ॥१८॥ नुदंतमन्यःप्रणुदन्नुपैतिसमाकुलंतत्कपिसैन्यमासीत् ॥ नचात्रकश्चिन्नवभूवमत्तोनचात्रकश्चिन्नवभूवदृप्तः ॥१९॥ ततोवनंत
त्परिभक्ष्यमाणंद्रुमांश्चविध्वंसितपत्रपुष्पान् ॥ समीक्ष्यकोपाद्दधिवक्त्रनामानिवारयामासकपिःकपींस्तान् ॥२०॥ सतैःप्रवृद्धैःपरिभर्त्स्यमा
नोवनस्यगोप्ताहरिवृद्धवीरः ॥ चकारभूयोमतिमुग्रतेजावनस्यरक्षांप्रतिवानरेभ्यः ॥२१॥ उवाचकांश्चित्परुषाणिभीतमसक्तमन्यांश्चतले
जघान ॥ समेत्यकैश्चित्कलहंचकारतथैवसाम्नोपजगामकांश्चित् ॥२२॥ सतैर्मदादप्रतिवार्यवेगैर्वलाच्चतेनप्रतिवार्यमाणैः ॥ प्रधर्षितस्त्यक्त
भयैःसमेत्यप्रकृष्यतेचाप्यनवेक्ष्यदोषम् ॥२३॥ ॥दयोर्वाह्याभ्यंतरत्वकृतोभेद ॥१५॥ तत्रवाद्यमानंदसूचकमाह गायंतीति ॥१६॥ अतिब्रुवंति वि
वादंकुर्वंति नगाग्रात् वृक्षाग्रात् ॥१७॥ गानरोदनहासामधुपानमत्तधर्माः ॥१८॥ नुदंतंव्यथयंतं समाकुलंउत्कटमत्तचेष्टंदृप्तोगर्वितमत्तः ॥१९॥ २०॥

मदादप्रतिवार्यो निवारयितुमशक्योवेगोयेषांतैः तेनदधिमुखेन बलात्प्र
तिवार्यमाणैःप्रधर्षितोदोषराजदंडमनवेक्ष्य अतएवत्यक्तभयैःसमेत्यप्रकृ
ष्यतेस्म ॥२३॥

नदन्तमन्यःप्रनुदन्नुपैतिः प्लवन्तमन्यः प्रपतन्नुपैति पतन्तमन्यःप्रलपन्नुपैतिः १९ मधुप्रपानोत्कटस
त्वचेष्ट ५

समापयंतः मत्तकल्पं कुर्वंतः महावनं निर्विषयं निर्गतमधुफलादिभोज्यं २४ इति श्रीरामाभिरामे श्रीरा० सुं० द० एकषष्टितमः सर्गः ६१ पुनरुक्त
मेवविस्तरेणाहतानिति ॥१॥ आवर्जयिष्यामि निवारयिष्यामि ॥२॥३॥ ईदृशं एतन्मात्रार्थकं ॥४॥५॥ यत्र मधुवनं यत्र मार्गे गमने न मधुवनं प्राप्य

नखैस्तुदंतो दशनैर्दशंतस्तलैश्च पादैश्च समापयंतः ॥ मदात्कपिंते कपयः समंतान्महावनं निर्विषयं च चक्रुः ॥२४॥ इत्यार्षे श्रीमद्रामायणे वा॰
सुंदरकांडे एकषष्टितमः सर्गः ॥६१॥ तानुवाच हरिश्रेष्ठो हनूमान्वानरर्षभः ॥ अव्यग्रमनसो यूयं मधु सेवत वानराः ॥१॥ अहमावर्जयिष्या
मि युष्माकं परिपंथिनः ॥ श्रुत्वा हनूमतो वाक्यं हरीणां प्रवरोंगदः ॥२॥ प्रत्युवाच प्रसन्नात्मा पिवंतु हरयो मधु ॥ अवश्यं कृतकार्यस्य वाक्यं हनुम
तो मया ॥३॥ अकार्यमपि कर्त्तव्यं किमंग पुनरीदृशं ॥ अंगदस्य मुखाच्छ्रुत्वा वचनं वानरर्षभाः ॥४॥ साधु साध्विति संहृष्टा वानराः प्रत्यपूज
यन् ॥ पूजयित्वांगदं सर्वे वानरा वानरर्षभं ॥५॥ जग्मुर्मधुवनं यत्र नदीवेगइव द्रुमं ॥ ते प्रविष्टा मधुवनं पालानाक्रम्य शक्तितः ॥६॥ अतिस
र्गाच्च पटवो दृष्ट्वा श्रुत्वा च मैथिलीं ॥ पपुः सर्वे मधु तदा रसवत्फलमाददुः ॥७॥ उत्पत्य च ततः सर्वे वनपालान्समागतान् ॥ ते ताडयंतः शत
शः सक्ता मधुवने तदा ॥८॥ मधूनि द्रोणमात्राणि बाहुभिः परिगृह्य ते ॥ पिबंति कपयः केचित्संघशस्तत्र हृष्टवत् ॥९॥ घ्नंति स्म सहिताः
सर्वे भक्षयंति तथापरे ॥ केचित्पीत्वापविध्यंति मधूनि मधुपिंगलाः ॥१०॥ मधूच्छिष्टेन केचिच्च जघ्नुरन्योन्यमुत्कटाः ॥ अपरे वृक्षमूलेषु शाखां गृह्य
पर्यवस्थिताः ॥११॥

तेतेन मार्गेण जग्मुः ॥६॥ ते पटवो हनूमान् च मैथिलीं दृष्ट्वा अन्ये तच्छ्रुत्वा तत्कालं कास्थां श्रुत्वा महत्कार्यं करसोन भयराहित्यादतिसर्गादंगदानुज्ञानात् मधु
वनं प्रविष्टाः पालान्बलादाक्रम्य वध्वा मधू पपू रसवत्फलं चाददुः भृंगार्थमितिशेषः ॥७॥ मधुवने सक्ताः भक्षणार्थं लग्नाः ॥८॥९॥ अपविध्यंति प्र
क्षिपंति मधूनि मधुपटलानि ॥१०॥११॥

६२

354

उन्मत्तमत्तवेगाः उन्मत्तानांवेगोयेषांते यद्वा शायितवेगाइत्यर्थः ॥१२॥१३॥ इतरद्रोदनं ॥१४॥ केचिदन्यत्कृत्वाअन्यद्वदंति केचिदुक्तवचनार्थंविघ्रमानंपरित्यज्या
न्यमेवउच्यते ॥१५॥ प्रतिषिद्धाः ताडनादिनानिरस्ताः जानुभिःप्रघृष्टाः जानुषुगृहीत्वाआकृष्टाः देवमार्गंअपानद्वारमि[illegible]त्यर्थः देवमार्गंदर्शिताः पादोग्र

अत्यर्थंचमदग्लानाःपर्णान्यास्तीर्यशेरते ॥ उन्मत्तवेगाःप्लवगाःमधुमत्ताश्चहृष्टवत् ॥१२॥ क्षिपंत्यपितथान्योन्यंस्खलंतिचतथापरे ॥ केचित्क्ष्वे
डाम्प्रकुर्वंतिकेचित्कूजंतिहृष्टवत् ॥१३॥ हरयोमधुनामत्ताः केचित्सुप्तामहीतले ॥ धृष्टाःकेचिद्धसंत्यन्येकेचित्कुर्वंतिचेतरत् ॥१४॥ कृत्वाके
चिद्वदंत्यन्येकेचिद्बुध्यंतिचेतरत् ॥ येप्यत्रमधुपालाःस्युःप्रेष्याद्दधिमुखस्यतु ॥१५॥ तेपितैर्वानरैर्भीमैःप्रतिषिद्धादिशोगताः ॥ जानुभिश्चप्रघृष्टाश्चदे
वमार्गंचदर्शिताः ॥१६॥ अब्रुवन्परमोद्विग्नागत्वादधिमुखंवचः ॥ हनुमतादत्तवरैर्हतंमधुवनंवलात् ॥१७॥ वयंचजानुभिर्घृष्टादेवमार्गंचदर्शिताः
१८ ॥ ततोदधिमुखःक्रुद्धोवनपस्तत्रवानरः ॥ हतंमधुवनंदृष्ट्वासांत्वयामासतान्हरीन् ॥१९॥ एतगच्छतगच्छामोवानराननतिदर्पितान् ॥ वलेनावा
रयिष्यामिप्रभुंजानान्मधूत्तमं ॥२०॥ श्रुत्वादधिमुखस्येदंवचनंवानरर्षभाः ॥ पुनर्वीरामधुवनंतेनैवसहिताययुः ॥२१॥ मध्येचैषांदधिमुखःसु
प्रगृह्यमहातरुं ॥ समभ्यधावन्वेगेनसर्वेतेचप्लवंगमाः ॥२२॥ तेशिलाःपादपांश्चैवपाषाणानपिवानराः ॥ गृहीत्वाभ्यागमन्क्रुद्धायत्रतेकपिकुं
जराः ॥२३॥ वलान्निवारयंतश्चआसेदुर्हरयोहरीन् ॥ संदष्टौष्ठपुटाःक्रुद्धाभर्त्सयंतोमुहुर्मुहुः ॥२४॥ अथदृष्ट्वादधिमुखंक्रुद्धंवानरपुंगवाः
अभ्यधावंतवेगेनहनुमत्प्रमुखास्तदा ॥२५॥

॥ हीत्वोर्ध्वंप्रक्षिप्ताइत्यर्थः कर्णौअंगुलिभिर्धृत्वोर्ध्वीकृताइतिवार्थइत्यन्ये ॥१६॥१७॥१८॥ तान्सवं
वंधिनःपालान् ॥१९॥ एतआगच्छतअग्रेइतिशेषः गच्छामः वयमप्यागच्छामइत्यर्थः ॥१९॥२०॥२१॥ सर्वेतेचसमभ्यधावन्नितिशेषः ॥२२॥२३॥ हरयःपालाः हरीन्हनुमदादीन् ॥२४॥२५॥

तेस्वामिवचनंवीराह[illegible]पेष्वेवसज्यतत् त्वरयाचाभ्य‑भ्यवन्त सालतालशिलायुधाः २५ वृक्षस्थांश्चतलस्थांश्च
वानरान्वलदर्पिताः अ[illegible]ाक्रमंस्ततोवीराः पालास्तत्रसहस्रशः २५

२६ ॥ आर्यकःसुग्रीवमातुलत्वान्मान्यः ॥ २७ ॥ २८ ॥ २९ ॥ भर्त्ताराजा ॥ ३० ॥ ३१ ॥ ३२ ॥ नृपाज्ञापरिपंथिनःनराज्ञाविरुद्धकर्त्तारःअमर्षप्रभवोऽक्षमाजन्यः ॥ ३३ ॥ ३४ ॥ ३५ ॥

सवृक्षंतंमहावाहुमापतंतंमहावलं ॥ वेगवंतंविजग्राहवाहुभ्यांकपितेंगदः ॥ २६ ॥ मदांधोनकृपांचक्रेआर्यकोयंममेतिसः ॥ अथैनंनिष्पिपेषा
शुवेगेनवसुधातले ॥ २७ ॥ सभग्नवाहूरुमुखोविह्वलःशोणितोक्षितः ॥ प्रमुमोहमहावीरोमुहूर्त्तंकपिकुंजरः ॥ २८ ॥ सकथंचिद्विमुक्तस्तैर्वा
नरैर्वानरर्षभः ॥ उवाचैकांतमागम्यस्वान्भृत्यान्समुपागतान् ॥ २९ ॥ एतेगच्छंतुगच्छामोभर्त्तानोयत्रवानरः ॥ सुग्रीवोविपुलग्रीवःसहरामेणति
ष्ठति ॥ ३० ॥ सर्वंचैवांगदेदोषंश्रावयिष्यामपार्थिवे ॥ अमर्षीवचनंश्रुत्वाघातयिष्यतिवानरान् ॥ ३१ ॥ इष्टंमधुवनंह्येतत्सुग्रीवस्यमहात्मनः ॥ पितृ
पैतामहंदिव्यंदेवैरपिदुरासदं ॥ ३२ ॥ सवानरानिमान्सर्वान्मधुलुब्धान्गतायुषः ॥ घातयिष्यतिदंडेनसुग्रीवःससुहृज्जनान् ॥ वध्याह्येतेदु
रात्मानोनृपाज्ञापरिपंथिनः ॥ अमर्षप्रभवोरोषःसफलोमेभविष्यति ॥ ३३ ॥ एवमुक्त्वादधिमुखोवनपालान्महावलः ॥ जगामसहसोत्पत्य
वनपालैःसमन्वितः ॥ ३४ ॥ निमेषांतरमात्रेणसहिप्राप्तोवनालयः ॥ सहस्रांशुसुतोधीमान्सुग्रीवोयत्रवानरः ॥ ३५ ॥ रामंचलक्ष्मणंचैव
दृष्ट्वासुग्रीवमेवच ॥ समप्रतिष्ठांजगतीमाकाशान्निपपातह ॥ ३६ ॥ संनिपत्यमहावीरःसर्वैस्तैःपरिवारितः ॥ हरिर्दधिमुखःपालैःपालानांप
रमेश्वरः ॥ ३७ ॥ सदीनवदनोभूत्वाकृत्वाशिरसिचांजलिं ॥ सुग्रीवस्याशुतौमूर्ध्नाचरणौप्रत्यपीडयत् ॥ ३८ ॥ इत्यार्षेश्रीमद्रामायणेवा॰सुं
दरकांडेद्विषष्टितमःसर्गः ॥ ६२ ॥ ततोमूर्ध्नानिपतितंवानरंवानरर्षभः ॥ दृष्ट्वैवोद्विग्नहृदयोवाक्यमेतदुवाचह ॥ १ ॥

॥ समप्रतिष्ठांसमतलांजग
तीम्भूमिंदृष्ट्वेत्यनुकर्षः ॥ ३६ ॥ ३७ ॥ तौसर्ववानरमुख्यौचरणावित्यन्वयः ॥ ३८ ॥ नतमानः ॥ इतिरामाभिरामेश्रीरामीयेरा॰सुं॰द॰द्विषष्टितमःसर्गः ॥ ६२ ॥

355

॥ ७ ॥ ततत्रि

किं संभ्रमात्कस्य भयादिहागतोसीति शेषः यत्कृत्स्नं हितं तद्ब्रूहि यतस्त्वं सर्वमुचितमनुचितं च वक्तुमर्हसि ॥ ३ ४ ॥ नैव निसृष्टपूर्वं वानरेभ्यो यथेष्टभोगाय क

उत्तिष्ठोत्तिष्ठ कस्मात्त्वं पादयोः पतितो मम ॥ अभयं ते प्रदास्यामि सत्यमेवाभिधीयतां ॥ २ ॥ किं संभ्रमाद्धितं कृत्स्नं ब्रूहि यद्वक्तुमर्हसि ॥ कच्चिन्मधुवने
स्वस्ति श्रोतुमिच्छामि वानर ॥ ३ ॥ स समाश्वासितस्तेन सुग्रीवेण महात्मना ॥ उत्थाय स महाप्राज्ञो वाक्यं दधिमुखोब्रवीत् ॥ ४ ॥ नैवर्क्षरजसा राजन्न त
यान्त्वया वालिना ॥ वनं विसृष्टपूर्वं तन्नाशितं तत्तु वानरैः ॥ ५ ॥ न्यवारयमहं सर्वान्सहैभिर्वनचारिभिः ॥ अचिंतयित्वा मां हृष्टा भक्षयंति पिबंति च ॥ ६ ॥
एभिः प्रधर्षणायां च वारितं वनपालकैः ॥ मामप्यचिंतयन्देव भक्षयंति वनौकसः ॥ ७ ॥ शिष्टमत्रापविध्यंति भक्षयंति तथा परे ॥ निवार्यमाणास्ते
सर्वे भ्रुकुटिं दर्शयंति हि ॥ ८ ॥ इमे हि संरब्धतरास्तदा तैः संप्रधर्षिताः ॥ निवार्यंते वनात्तस्मात्क्रुद्धैर्वानरपुंगवैः ॥ ९ ॥ ततस्तैर्बहुभिर्वीरैर्वानरैर्वा
नरर्षभाः ॥ संरक्तनयनैः क्रोधाद्धरयः संप्रधर्षिताः ॥ १० ॥ पाणिभिर्निहताः केचित्केचिज्जानुभिराहताः ॥ प्रकृष्टाश्च यदाकामं देवमार्गं च दर्शिताः ॥ ११ ॥
एवमेते हताः शूरास्त्वयि तिष्ठति भर्तरि ॥ कृत्स्नं मधुवनं चैव प्रकामं तैश्च भक्ष्यते ॥ १२ ॥ एवं विज्ञाप्यमानं तं सुग्रीवं वानरर्षभं ॥ अपृच्छत्तं महाप्राज्ञो ल
क्ष्मणः परवीरहा ॥ १३ ॥ किमयं वानरो राजन्वनपः प्रत्युपस्थितः ॥ किं चार्थमभिनिर्दिश्य दुःखितो वाक्यमब्रवीत् ॥ १४ ॥ एवमुक्तस्तु सुग्रीवो लक्ष्मणे
न महात्मना ॥ लक्ष्मणं प्रत्युवाचेदं वाक्यं वाक्यविशारदः ॥ १५ ॥ आर्य लक्ष्मण संप्राह वीरो दधिमुखः कपिः ॥ अंगदप्रमुखैर्वीरैर्भक्षितं मधु वानरैः
॥ १६ ॥ नैषामकृतकार्याणामीदृशः स्याद्व्यतिक्रमः ॥ वनं यदभिपन्नास्ते साधितं कर्म तद्ध्रुवं ॥ १७ ॥ (दापिनानुज्ञातं ॥ ५ ६ ॥ एभिर्हनुमदाद्यैः प्रधर्षणाय

मारब्धायां वनपालकैर्वारितं मामपि ॥ अपि नेतरान्पालकान् अचिंतयन् अचिंतयंतः ॥ ७ ॥ भ्रुकुटिं वक्रे भ्रुवौ ॥ ८ ॥ इमे मदीयाः संरब्धतराः निवारणात्यातियत्नं

विचित्य दक्षिणामाशामागते हरिपुंगवैः आत्मेच्छातः प्रहृष्टैश्च हतं मधुवनं हितैः ७

तः ॥ ९ ॥ ४२ ॥ विज्ञाप्यमानं दधिमुखेनेति शेषः ॥ १३ ॥ १६ ॥ मन्यथावन
मभिपन्नाः नाशयितुं प्रवृत्ताः ॥ १७ ॥

वारयंतः हेतौ शता वारणाद्धेतोर्जानुभिराहताः पालाः प्राप्ताः ॥१८॥ देविहदृष्टेत्यत्र न संदेहस्तत्राप्यनेनेन नकिंतु हनूमतेत्यर्थः ॥१९॥ अन्यः हनूमतोन्य इत्यर्थः हरिपुंग

वारयंतो भृशं प्राप्ताः पाला जानुभिराहताः ॥ तथा नगरिणस्त्वायं कपिर्दधिमुखो बली ॥१८॥ पतिर्मम वनस्यायमस्माभिः स्थापितः स्वयं ॥ दृष्टा देवी न सं
देहो न चान्येन हनूमता ॥१९॥ न त्वन्यः साधने हेतुः कर्मणोस्य हनूमतः ॥ कार्यसिद्धिर्हनुमति मतिश्च हरिपुंगवे ॥२०॥ व्यवसायश्च वीर्यं च श्रुतं चापि प्र
तिष्ठितं ॥ जांबवान्यत्र नेता स्यादंगदस्य महाबलः ॥२१॥ हनूमांश्चाप्यधिष्ठाता न तत्र गतिरन्यथा ॥ अंगदप्रमुखैर्वीरैर्हतं मधुवनं किल ॥२२॥ विचि
त्य दक्षिणामाशामागतैर्हरिपुंगवैः ॥ आगतैश्च प्रविष्टं तद्यथा मधुवनं हि तैः ॥२३॥ धर्षितं च वनं कृत्स्नमुपयुक्तं तु वानरैः ॥ पातिता वनपालास्ते
तद्दजानुभिराहताः ॥२४॥ एतदर्थमयं प्राप्तो वक्तुं मधुरवागिह ॥ नाम्ना दधिमुखो नाम हरिः प्रख्यातविक्रमः ॥२५॥ दृष्टा सीता महाबाहो सौमित्रे
पश्य तत्त्वतः ॥ अभिगम्य यथा सर्वे पिबंति मधु वानराः ॥२६॥ न चाप्यदृष्ट्वा वैदेहीं विश्रुताः पुरुषर्षभ ॥ वनं दत्तवरं दिव्यं धर्षयेयुर्वनौकसः ॥
२७॥ ततः प्रहृष्टो धर्मात्मा लक्ष्मणः सहराघवः ॥ श्रुत्वा कर्णसुखां वाणीं सुग्रीववदनाच्छुभां ॥२८॥ प्राहृष्यत भृशं रामो लक्ष्मणश्च महायशाः ॥
श्रुत्वा दधिमुखस्यैवं सुग्रीवस्तु प्रहृष्य च ॥२९॥ वनपालं पुनर्वाक्यं सुग्रीवः प्रत्यभाषत ॥ प्रीतोस्मि सोहं यद्भुक्तं वनं तैः कृतकर्मभिः ॥३०॥ धर्षितं म
र्षणीयं च चेष्टितं कृतकर्मणां ॥ गच्छ शीघ्रं मधुवनं संरक्षस्व त्वमेव हि ॥ शीघ्रं प्रेषय सर्वांस्तान्हनूमत्प्रमुखान्कपीन् ॥३१॥ इच्छामि शीघ्रं हनुम
त्प्रधानान् शाखामृगांस्तान्मृगराजदर्पान् ॥ प्रष्टुं कृतार्थान्सह राघवाभ्यां श्रोतुं च सीताधिगमे प्रयत्नं ॥३२॥

॥वे हनूमति कार्यसिद्धिर्मतिश्च ॥२०॥२३
उपयुक्तं भुक्तं ॥२४॥२५॥ यथा मधु पिबंति तथा सीता दृष्टेत्यन्वयः ॥२६॥ दत्तवरं वरत्वेन देवैरस्माकं दत्तं ॥२७॥२८॥ एकः सुग्रीवशब्दः शोभनग्रीवपरः ॥२९॥

कृतकर्मभिः साधितकृत्यैः ॥३०॥३१॥ नान्द्रष्टुमिच्छामि सीताधिगमे
तत्प्राप्तौ कृतप्रयत्नं वक्तुमिच्छामि ॥३२॥

अथसुग्रीवःस्वोद्योगसाफल्यदर्शनात्भृशंननंदेत्याह प्रीतीति प्रीत्यासंतोषेणास्फीताक्षौविकसितनेत्रौ संप्रहृष्टौपुलकितगात्रौ सिद्धार्थाविवदृष्ट्वासंप्रहृष्टैः
पुलकितैरंगैरुपलक्षितःकार्यसिद्धिंबाह्वोरासन्नां हस्त प्राप्तामिवविदित्वाननंद ॥३३॥ गंडमानः ॥ इतिश्रीरामाभिरामेश्रीरा० सुंद० त्रिषष्टितमःसर्गः ॥६३॥

प्रीतिस्फीताक्षौसंप्रहृष्टौकुमारौदृष्ट्वासिद्धार्थौवानराणांचराजा ॥ अंगैःप्रहृष्टैःकार्यसिद्धिंविदित्वाबाह्वोरासन्नामतिमात्रंननंद ॥३३॥ इति
श्रीमद्रामायणेवा० सुं० त्रिषष्टितमःसर्गः ॥६३॥ सुग्रीवेणैवमुक्तस्तुहृष्टोदधिमुखःकपिः ॥ राघवंलक्ष्मणंचैवसुग्रीवंचाभ्यवादयत् ॥१॥ सप्र
णम्यचसुग्रीवंराघवौचमहाबलौ ॥ वानरैःसहितःशूरैर्दिवमेवोत्पपातह ॥२॥ सयथैवागतःपूर्वंतथैवत्वरितंगतः ॥ निपत्यगगनाद्भूमौतद्व
नंप्रविवेशह ॥३॥ सप्रविष्टोमधुवनंददर्शहरियूथपान् ॥ विमदानुद्धतान्सर्वान्मेहमानान्मधूदकं ॥४॥ सतानुपागमद्वीरोबध्वाकरपुटांजलिं
उवाचवचनंश्लक्ष्णमिदंहृष्टवदंगदं ॥५॥ सौम्यरोषोनकर्त्तव्योयदेभिःपरिवारणं ॥ अज्ञानाद्रक्षिभिःक्रोधाद्भवंतःप्रतिषेधिताः ॥६॥ श्रांतोदूराद्दु
प्राप्तोभक्षयस्वस्वकंमधु ॥ युवराजस्त्वमीशश्चवनस्यास्यमहाबल ॥७॥ मौर्ख्यात्पूर्वंकृतोरोषस्तद्भवान्क्षंतुमर्हति ॥ यथैवहिपितातेभूत्पूर्वं
हरिगणेश्वरः ॥८॥ तथात्वमपिसुग्रीवोनान्यस्तुहरिसत्तम ॥ आख्यातंहिमयागत्वापितृव्यस्यतवानघ ॥९॥ इहोपयानंसर्वेषामेतेषांवनचारिणां
भवदागमनंश्रुत्वासहैभिर्वनचारिभिः ॥१०॥ प्रहृष्टोनतुरुष्टोसौवनंश्रुत्वाप्रधर्षितं ॥ प्रहृष्टोमांपितृव्यस्तेसुग्रीवोवानरेश्वरः ॥११॥
॥सुग्रीवेनेति

॥२॥३॥ विमदत्वसूचकं मेहमानान्मधूदकमिति मेहमानान्मूत्रयतः मधुपरिणामभूतमुदकंमधूदकं एवंमूत्रणान्मधूनांजीर्णताबोधिता अतएववि
मदात् ॥४॥५॥ एभिःरक्षिभिरज्ञानात्क्रोधाच्चभवंतःप्रतिषेधिताइतियत्एतत्परिवारणंप्रतिरोषोनकर्तव्यइत्यर्थः ॥६॥७॥ रोषःकृतोमदीयैरितिशेषः ॥

॥८॥ तथासुग्रीवत्वमपितंहरीश्वरः ॥१०॥११॥

१२॥ शंकेदधिमुखस्यपराहत्यागमनात्॥१२॥ किंवायंहर्षादाख्यातिसुग्रीवसंदेशमितिशेषः येनचहेतुनाजानामि· रामेणश्रुतोयंवृत्तांतइति· तत्तस्मादकार्यंवनविध्वंसनरूपेकृतेसतीहस्यात्तन्नोस्माकंनक्षमंनयुक्तं॥१४॥ किंशेषंनकिमपिशिष्टमित्यर्थः॥ गमनमुचितमितिशेषः॥१५॥ कर्तव्येकर्तव्यार्थेभवद्भिःपरवानहंभव

शीघ्रंप्रेषयसर्वांस्तानितिहोवाचपार्थिवः॥ श्रुत्वादधिमुखस्येमंवचनंश्लक्ष्णमंगदः॥१२॥ अब्रवीत्तान्हरिश्रेष्ठोवाक्यंवाक्यविशारदः॥ शंकेश्रुतोयंवृत्तांतो
रामेणहरियूथपाः॥१३॥ अयंवहर्षादाख्यातितेनजानामिहेतुना॥ तत्क्षमंवेहनःस्थातुंकृतेकार्येपरंतपाः॥१४॥ पीत्वामधुयथाकामंविश्रांतावनचारि
णः॥ किंशेषंगमनंतत्रसुग्रीवोयत्रवानरः॥१५॥ सर्वेयथामांवक्ष्यंतिसमेत्यहरिपुंगवाः॥ तथास्मिकर्ताकर्तव्येभवद्भिःपरवानहं॥१६॥ नाज्ञापयितुमी
शोहंयुवराजोस्मियद्यपि॥ अयुक्तंकृतकर्माणोयूयंधर्षयितुंबलात्॥१७ ब्रुवतश्चांगदस्यैवंश्रुत्वावचनमुत्तमं॥ प्रहृष्टमनसोवाक्यमिदमूचुर्व
नौकसः॥१८॥ एवंवक्ष्यतिकोराजन्प्रभुःसन्वानरर्षभ॥ ऐश्वर्यमदमत्तोहिसर्वोहमितिमन्यते॥१९॥ तवचेदंसुसदृशंवाक्यंनान्यस्यकस्यचित्
सन्नतिर्हितवाख्यातिभविष्यच्छुभयोग्यतां॥ २०॥ सर्वेवयमपिप्राप्तास्तत्रगंतुंकृतक्षणाः॥ सयत्रहरिवीराणांसुग्रीवःपतिरव्ययः॥२१॥ त्वयाह्यनुक्तै
र्हरिभिर्नैवशक्यंपदात्पदं॥ क्वचिद्गंतुंहरिश्रेष्ठब्रूमःसत्यमिदंतुते॥२२॥ एवंतुवदतांतेषामंगदःप्रत्यभाषत॥ साधुगच्छामइत्युक्त्वाखमुत्पेतुर्महाबलाः

दधीनइत्यर्थः॥१६॥ यद्यपिअहंयुवराजोस्मियुष्मानाज्ञापयितुंनेशस्तत्रहेतुःकृतकर्माणोयूयंकृतकर्मणोयुष्मान्इत्यर्थेआर्षमिदंतथापि॥ अतःपरं
बलात्धर्षयितुंनयुक्तं॥१७॥१८॥ अहंप्रभुरितिशेषः॥१९॥ सन्नतिर्विनयःभविष्यच्छुभयोग्यतां भाविनींभाग्योन्नतिं आख्यातिसूचयति॥२०॥ अत्र
दिशेप्राप्तावयंयत्रसुग्रीवस्तत्रगंतुंकृतक्षणाःकृतोत्साहाः॥२१॥२२॥ महाबलास्तेगच्छामइत्युक्त्वाखमुत्पेतुरित्यन्वयः॥२३॥ ॥ छ ॥ ॥

357

तत्रक्रममाह उत्पतंतमिति ॥ निराकाशं निरवकाशं यंत्रेत्यादिना दूरोत्पातेन शीघ्रगमनं सूचितं ॥ २४ ॥ सहसोत्पत्य वातेरितघना इव विनदंतो जग्मुरिति शेषः शीघ्रग
त्यासादृश्यं ॥ २५ ॥ समनुप्राप्ते निकटमागते सुग्रीवो राममब्रवाचेत्यन्वयः ॥ २६ ॥ २७ ॥ दृष्टत्वे हेतुर्नेति ॥ अंगदप्रहर्षश्च हेत्वंतरं ॥ २८ ॥ विनिपातिते असाधिते र
यद्यपीति ॥ अकृतकृत्यानामस्मेषां वानराणां कपिस्वभावत्वांचल्यादीदृशमधुवनभंगादिरूप उपक्रमो व्यापारो यद्यपि स्यात्तथाप्यंगदो दीनवदनत्वादि

उत्पतंतमनूत्पेतुः सर्वे ते हरियूथपाः ॥ कृत्वाकाशं निराकाशं यंत्रोत्क्षिप्ता इवोपलाः ॥ २४ ॥ अंगदं पुरतः कृत्वा हनूमंतं च वानरं ॥ तेवरं सहसोत्पत्य
वेगवंतः प्लवंगमाः ॥ २५ ॥ विनदंतो महानादं घना वातेरिता यथा ॥ अंगदे समनुप्राप्ते सुग्रीवो वानरेश्वरः ॥ २६ ॥ उवाच शोकसंतप्तं रामं कमललो
चनं ॥ समाश्वसिहि भद्रं ते दृष्टा देवी न संशयः ॥ २७ ॥ नागंतुमिह शक्यं तैरतीतसमयेरिह ॥ अंगदस्य प्रहर्षाच्च जानामि शुभदर्शन ॥ २८ ॥ न मत्सकाशमा
गच्छेत्कृत्ये हि विनिपातिते ॥ युवराजो महाबाहुः प्लवतामंगदो वरः ॥ २९ ॥ यद्यप्यकृतकृत्यानामीदृशः स्यादुपक्रमः ॥ भवेत्तु दीनवदनो भ्रांतविप्लु
तमानसः ॥ ३० ॥ पितृपैतामहं चैतत्पूर्वकैरभिरक्षितं ॥ न मे मधुवनं हन्याददृष्ट्वा जनकात्मजां ॥ ३१ ॥ कौसल्यासुप्रजा राम समाश्वसिहि सुव्रत ॥ द
ष्टा देवी न संदेहो न चान्येन हनूमता ॥ ३२ ॥ न ह्यस्य कर्मणो हेतुः साधने तद्विधो भवेत् ॥ हनूमति हि सिद्धिश्च मतिश्च मतिसत्तम ॥ ३३ ॥ व्यवसायश्च शौर्यं
च श्रुतं चापि प्रतिष्ठितं ॥ जांबवान्यत्र नेता स्यादंगदश्च हरीश्वरः ॥ ३४ ॥

॥ गुराको भवेत् ॥ ३० ॥ अतस्तत्राह पितृपैतामहं पितृपितामहक्रमागतं
३१ ॥ कौसल्यासुप्रजाः सीतास्थितिपरिज्ञानेन भवतो जीवनलाभादिदानीं कौसल्या पुत्रवत्यभूदिति भावः तत्रापि हनूमतैव नतु ततोऽन्येनेत्यर्थः ॥ ३२ ॥ अस्य
कर्मणः साधने तद्विधो हेतुरपरो न भवेत् नास्ति इह हनूमति यतस्तत्कार्यसाधिका सिद्धिर्बलवरजन्या मतिश्चास्ति हि यतः ॥ ३३ ॥ व्यवसाय उद्यमः नेता प्रधानः ॥ ३४

अधिष्ठाताकार्यकरणोद्योगवान् ॥३५॥ यदाहियतइत्यर्थः ॥३६॥३७॥३८॥ आयतांचितलांगूलइतिस्वभावोक्त्यलंकारः ॥३९॥४०॥४१॥ नियतांपातिव्रत्यसंप

हनूमांश्चाप्यधिष्ठाता न तत्र गतिरन्यथा माभूश्चिंतासमायुक्तः संप्रत्यमितविक्रम ॥३५॥ यदाहि दर्पितोदग्राः संगताः काननौकसः ॥ नैषामकृतका
र्याणामीदृशः स्यादुपक्रमः ॥३६॥ वनभंगेन जानामि मधूनां भक्षणेन च ॥ ततः किलकिलाशब्दं शुश्रावासन्नमंबरे ॥३७॥ हनूमत्कर्मदृप्तानां न
र्दतां काननौकसां ॥ किष्किंधामुपयातानां सिद्धिं कथयतामिव ॥३८॥ ततः श्रुत्वा निनादं तं कपीनां कपिसत्तमः ॥ आयतांचितलांगूलः सोभव
द्धृष्टमानसः ॥३९॥ आजग्मुस्तेपि हरयो रामदर्शनकांक्षिणः ॥ अंगदं पुरतः कृत्वा हनूमंतं च वानरं ॥४०॥ तेंगदप्रमुखा वीराः प्रहृष्टाश्च मदान्वि
ताः ॥ निपेतुर्हरिराजस्य समीपे राघवस्य च ॥४१॥ हनूमांश्च महाबाहुः प्रणम्य शिरसा ततः ॥ नियतामक्षतां देवीं राघवाय न्यवेदयत् ॥४२॥
दृष्टा देवीति हनुमद्वदनादमृतोपमं ॥ आकर्ण्य वचनं रामो हर्षमाप सलक्ष्मणः ॥४३॥ निश्चितार्थं ततस्तस्मिन् सुग्रीवं पवनात्मजे ॥ लक्ष्मणः
प्रीतिमान् प्रीतो बहुमानादवैक्षत ॥४४॥ प्रीत्या च परयोपेतो राघवः परवीरहा ॥ बहुमानेन महता हनूमंतमवैक्षत ॥४५॥ इत्यार्षे श्रीमद्रामाय
णे वा० सुंदरकांडे० चतुःषष्टितमः सर्गः ॥६४॥ ततः प्रस्रवणं शैलं ते गत्वा चित्रकाननं ॥ प्रणम्य शिरसा रामं लक्ष्मणं च महाबलं ॥१॥ युवराजं पुर
स्कृत्य सुग्रीवमभिवाद्य च ॥ प्रवृत्तिमथ सीतायाः प्रवक्तुमुपचक्रमे ॥२॥ रावणांतःपुरे रोधं राक्षसीभिश्च तर्जनं ॥ रामे समनुरागं च यथा च निय
मः कृतः ॥३॥ एतदाख्याय ते सर्वं हरयो रामसन्निधौ ॥ वैदेहीमक्षतां श्रुत्वा रामस्तूत्तरमब्रवीत् ॥४॥

॥न्नांअक्षतांशरीरेराक्षशलिनीं ॥४२॥४५॥ अ
रांभमानः ॥ इतिरामाभिरामेश्रीरा०रा०सुंद०चतुःषष्टितमःसर्गः ॥६४॥ ततइति ॥१॥२॥ नियमोरावणाकृतः अवधिरूपो दशमोवर्ततेमासौद्वौतुशेषौ

प्लवंगमेतिसीतोक्तेः तंचेतिशेषः ॥४॥

५ चोदयंतिप्रेरयंतिस्म ॥ ६ ॥ सीतायैप्रणाम्य तांदिशंप्रतिचप्रणामेनाकर्षः यथायेनप्रकारेणसीतायादर्शनंजातंतत्परंवाक्यमुवाचेत्यर्थः ॥ ८ ॥ ९ ॥ देवा
दिदृक्षया तांमार्गमाणोऽगच्छं ॥ १० ॥ तीरेदक्षिणासमुद्रसंवधिद्वीपसन्नद्धतीरे ॥ ११ ॥ हेरामरामासासीतात्वयिमनोरथंसम्यक्न्यस्य त्वदतिरिक्तविषयमनोर

क्वसीतावर्ततेदेवीकथंचमयिवर्त्तते । एतन्मेसर्वमाख्यातवैदेहींप्रतिवानराः ॥ ५ ॥ रामस्यगदितंश्रुत्वाहरयोरामसन्निधौ । चोदयंतिहनूमंतंसीतावृ
त्तांतकोविदं ॥ ६ ॥ श्रुत्वातुवचनंतेषांहनूमान्मारुतात्मजः ॥ प्रणम्यशिरसादेव्यैसीतायैतांदिशंप्रति ॥ ७ ॥ उवाचवाक्यंवाक्यज्ञः सीतायादर्शनंयथा
तंमणिंकांचनंदिव्यंदीप्यमानंस्वतेजसा ॥ ८ ॥ दत्वारामायहनुमांस्ततःप्रांजलिरब्रवीत् ॥ समुद्रंलंघयित्वाहंशतयोजनमायतं ॥ ९ ॥ अगच्छंजानकी
सीतांमार्गमाणोदिदृक्षया । तत्रलंकेतिनगरीरावणस्यदुरात्मनः ॥ १० ॥ दक्षिणस्यसमुद्रस्यतीरेवसतिदक्षिणे । तत्रसीतामयादृष्टारावणांतःपुरे
सती ॥ ११ ॥ त्वयिसंन्यस्यजीवंतीरामारामममनोरथं । दृष्टामेराक्षसीमध्येतर्ज्जमानामुहुर्मुहुः ॥ १२ ॥ राक्षसीभिर्विरूपाभीरक्षिताप्रमदावने । दुः
खमापद्यतेदेवीत्वयावीरसुखोचिता ॥ १३ ॥ रावणांतःपुरेरुद्धाराक्षसीभिःसुरक्षिता । एकवेणीधरादीनात्वयिचिंतापरायणा ॥ १४ ॥ अधःश
य्याविवर्णांगीपद्मिनीवहिमागमे । रावणाद्विनिवृत्तार्थामर्त्तव्यकृतनिश्चया ॥ १५ ॥ देवीकथंचित्काकुत्स्थत्वन्मनामार्गितामया । इक्ष्वाकुवंशविख्या
तिंशनैःकीर्त्तयतानघ ॥ १६ ॥ सामयानरशार्दूलशनैर्विश्वासितातदा ॥ ततःसंभाषितादेवीसर्वमर्थंचदर्शिता ॥ १७ ॥ रामसुग्रीवसख्यंचश्रुत्वाहर्ष
मुपागता । नियतःसमुदाचारोभक्तिश्चास्याःसदात्वयि ॥ १८ ॥

॥ थाः भाववतीभूत्वाजीवंतीरुतप्रारामामयादृष्टा ॥ १२ ॥ सुखोचितादेवीत्वयाविनादुःखमा
पद्यतइत्यन्वयः ॥ १३ ॥ १४ ॥ अधःशय्याभूशयना ॥ १५ ॥ सर्वमर्थंरामसुग्रीवसख्यादिदर्शिताज्ञापिता ॥ १७ ॥ नियतइतिसमुदाचारःगात्रास्खलनादिव्यवहा
रोभक्तिश्चत्वयित्वय्येवसदानियतोनान्यत्रेत्यर्थः ॥ १८ ॥

२६ दृष्ट्वा त्वां दृष्टेस्म वसने प्रमोदिष्य इति संबंधः
य२

उग्रेणातपसात्वभक्त्याचयुक्ता॥१९॥२०॥यथादृष्टंराक्षसीतर्जनादितद्विज्ञाप्य इत्यन्वयः २१॥उपस्थावतःसुग्रीवस्यसमक्षंदातव्य इत्यब्रवीदितिशेषः॥२२॥ए
षइति दत्तस्थं पश्यन्मनःशिलायास्तिलकंत्वयाकृतंतत्स्मरस्वेतिचाब्रवीत्॥२३॥एषवारिसंभवोमणिर्निर्यातितःप्रेषितःए॥नतत्त्वेप्रेषितमंगुलीकं २४

एवंमयामहाभागदृष्टाजनकनंदिनी॥उग्रेणतपसायुक्तात्वद्भक्त्यापुरुषर्षभ॥१९॥अभिज्ञानंचमेदत्तंयथावृत्तंतवांतिके॥चित्रकूटेमहाप्राज्ञवा
यसंप्रतिराघव॥२०॥विज्ञाप्यःपुनरप्येषरामोवायुसुतत्वया॥अखिलेनयथादृष्टमितिमामाहजानकी॥२१॥अयंचास्मैप्रदातव्योयत्नात्सुपरिर
क्षितः॥ब्रुवतावचनान्येवंसुग्रीवस्योपशृण्वतः॥२२॥एषचूडामणिःश्रीमान्मयातेयत्नरक्षितः॥मनःशिलायास्तिलकंतत्स्मरस्वेतिचाब्रवीत्॥
२३॥एषनिर्यातितःश्रीमान्मयातेवारिसंभवः॥एतंदृष्ट्वाप्रमोदिष्येव्यसनेत्वामिवानघ॥२४॥जीवितंधारयिष्यामिमासंदशरथात्मज॥ऊर्ध्वंमासा
न्नजीवेयंरक्षसांवशमागता॥२५॥इतिमामब्रवीत्सीताकृशांगीधर्मचारिणी॥रावणांतःपुरेरुद्धामृगीवोत्फुल्ललोचना॥२६॥एतदेवमयाख्या
तंसर्वंराघवयद्यथा॥सर्वथासागरजलेसंतारःप्रविधीयतां॥२७॥तौजाताश्वासौराजपुत्रौविदित्वातच्चाभिज्ञानंराघवायप्रदाय॥देव्याचाख्या
तंसर्वमेवानुपूर्व्यात्वाचासंपूर्णंवायुपुत्रःशशंस॥२८॥इत्यार्षेश्रीमद्रामायणेवा॰सुंदरकांडेपंचषष्टितमःसर्गः॥६५॥एवमुक्तोहनुमतारा
मोदशरथात्मजः॥तंमणिंहृदयेकृत्वारुरोदसहलक्ष्मणः॥१॥तंतुदृष्ट्वामणिश्रेष्ठंराघवःशोककर्षितः॥नेत्राभ्यामश्रुपूर्णाभ्यांसुग्रीवमिदमब्र
वीत्॥२॥यथैवधेनुःस्रवतिस्नेहाद्वत्सस्यवत्सला॥तथाममापिहृदयंमणिश्रेष्ठस्यदर्शनात्॥२॥

॥मासाद्विद्यमानादशमाद्दूर्ध्वमित्यर्थः॥२५॥२६॥संतारःसं
तारोपायःप्रविधीयतांप्रविचार्यतां॥२७॥२८॥जरमाणाः इतिरामाभिरामेश्रीरा॰सुं॰पंचषष्टितमःसर्गः॥६५॥एवमिति॥१॥२॥वत्सस्येत्यत्रापिदर्शनादितिसं
बध्येतगणावेहा नस्तवनीमजकर्षः॥६॥

मिश्वशुरेणजनकेनवधूकालेवधूत्वसंपादिकेकाले· विवाहकालेवैदेह्याः शिरोभूषणाय· सीतामातृहस्तात्गृहीत्वादशरथहस्तेदत्तंतस्मिन्कालेयथाऽधिकंशोभतेथामूर्ध्निबद्धमित्यर्थः॥४॥जनकस्याप्यनेनदानगमः कृतस्तत्राह अयं हीतिप्रवरैः श्रेष्ठैः देवैः पूजितः॥५॥तथायथासीतादर्शनंअवगतःप्राप्तस्तथातातस्यदशरथस्यप्राप्तः तद्वज्जनकेनदानात्तस्यस्मरणंतथावैदेहस्यराज्ञोजनकस्यसपत्नीकस्यदर्शनंप्राप्तइत्यर्थः॥६॥७॥परासुंमूर्छि

मणिरत्नमिदंदत्तंवैदेह्याश्वशुरेणमे॥ वधूकालेयथाबद्धमधिकंमूर्ध्निशोभते॥४॥अयंहिजलसंभूतोमणिःप्रवरपूजितः॥ यज्ञेपरमतुष्टेनदत्तःशक्रेणधीमता॥५॥इमंदृष्ट्वामणिश्रेष्ठंतथातातस्यदर्शनं॥अद्यास्म्यवगतःसौम्यवैदेहस्यतथाविभो॥६॥अयंहिशोभतेतस्याःप्रियायामूर्ध्निमेमणिः॥अद्यास्यदर्शनेनाहंप्राप्तांतामिवचिंतये॥७॥किमाहसीतावैदेहीब्रूहिसौम्यपुनःपुनः॥परासुमिवतोयेनसिंचंतीवाक्यवारिणा॥८॥इतस्तुकिंदुःखतरंयदिमंवारिसंभवं॥मणिंपश्यामिसौमित्रेवैदेहीमागतंविना॥९॥चिरंजीवतिवैदेहीयदिमासंधरिष्यति॥क्षणंवीरनजीवेयंविनातामसितेक्षणां॥१०॥नयमामपितंदेशंयत्रदृष्टाममप्रिया॥नतिष्ठेयंक्षणमपिप्रवृत्तिमुपलभ्यच॥११॥कथंसाममसुश्रोणीभीरुभीरुःसतीसदा॥भयावहानांघोराणांमध्येतिष्ठतिरक्षसां॥१२॥शारदस्तिमिरोन्मुक्तोनूनंचंद्रइवांबुदैः॥आवृतोवदनंतस्यानविराजतिसांप्रतं॥१३॥किमाहसीताहनुमंस्तत्त्वतःकथयस्वमे॥एतेनखलुजीविष्येभेषजेनातुरोयथा॥१४॥

॥तस्माजीवनायवाक्यवारिणासिंचंतीकिमाहतद्ब्रूहि॥८॥ वैदेहींविनाऽगतंमणिंपश्यामिइतःकिंदुःखतरं॥९॥ यदिमासंधरिष्यतिजीविष्यतितदाचिरंजीवतिजीविष्यतीत्यर्थः तांविनायथाहंनजीवेयं॥तथामांविनासापिनजीविष्यतीत्यर्थः॥१०॥प्रवृत्तिमुपलभ्यक्षणमपिनतिष्ठेयंस्थातुंनशक्यमित्यर्थः॥११॥भीरुभीरुःअत्यंतभीरु॥१२॥अंबुदैरावृतस्तिमिरोन्मुक्तःशारदश्चंद्रइवतस्यावदनंनराजति॥१३॥एतेनतद्वाक्यश्रवणरूपेण [illegible]॥१४॥

मधुरां मधुरालापा किमाह मम भामिनी ॥ अद्दिशीमावरा ना हनुमन् कथयस्व मे ॥ दुःखाद् दुःखतरं प्राप्य कथं जीवति जानकी ॥ १४ ॥ इत्यार्षे श्रीमद्रामा
यणे सुन्दरकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥ एवमुक्तस्तु हनुमान् राघवेण महात्मना ॥ सीताया भाषितं सर्वं न्यवेदयत राघवे ॥ १ ॥ इदमुक्तवती देवी
जानकी पुरुषर्षभ ॥ पूर्ववृत्तमभिज्ञानं चित्रकूटे यथातथम् ॥ २ ॥ सुखसुप्ता त्वया सार्द्धं जानकी पूर्वमुत्थिता ॥ वायसः सहसोत्पत्य विददार स्तनान्तरम् ॥
॥ ३ ॥ पर्यायेण च सुप्तस्त्वं देव्यङ्के भरताग्रज ॥ पुनश्च किल पक्षी स देव्या जनयति व्यथाम् ॥ ४ ॥ + १

मधुरा मधुराकारा १५ आगतकमानः इति श्रीरामाभिरामे श्रीरा॰ रा॰ सुंदरकांडे पट्षष्टितमः सर्गः ६६ यथातथं यथापूर्वं वृत्तं तथोक्तवती २ ३ ४

ततः पुनरुपागम्य विददार भृशं किल ॥ ततस्त्वं बोधितस्तस्याः शोणितेन समुक्षितः ५ वायसेन च तेनैवं सततं बाध्यमानया बोधितः किल दे
व्या त्वं सुखसुप्तः परंतप ६ तां च दृष्ट्वा महाबाहो दारितां च स्तनांतरे आशीविष इव क्रुद्धस्ततो वाक्यं त्वमूचिवान् ७ नखाग्रैः केन ते भीरु
दारितं वै स्तनांतरं कः क्रीडति सरोषेण पंचवक्त्रेण भोगिना ८ निरीक्षमाणः सहसा वायसं समुदैक्षथाः नखैः सरुधिरैस्तीक्ष्णैस्तामेवा
भिमुखं स्थितं ९ सुतः किल स शक्रस्य वायसः पततां वरः धरांतरगतः शीघ्रं पवनस्य गतौ समः १० ततस्तस्मिन्महाबाहो कोपसंवर्तितेक्ष
णः वायसे त्वं कृथाः क्रूरां मतिं मतिमतां वर ११ स दर्भं संस्तराद्गृह्य ब्राह्मेणास्त्रेण योजयः स दीप्त इव कालाग्निर्जज्वालाभिमुखं खगं १२
स त्वं प्रदीप्तं चिक्षेप दर्भं तं वायसं प्रति ततस्तु वायसं दीप्तः स दर्भोऽनुजगाम ह १३ भीतैश्च संपरित्यक्तः सुरैः सर्वैश्च वायसः त्रीन्लोका
न् संपरिक्रम्य त्रातारं नाधिगच्छति १४ पुनरप्यागतस्तत्र त्वत्सकाशमरिंदम त्वं तं निपतितं भूमौ शरण्यः शरणागतं १५ वधार्हमपि
काकुत्स्थ कृपया परिपालयः मोघमस्त्रं न शक्यं तु कर्तुमित्येव राघव १६ ततस्तस्याक्षि काकस्य हिनस्ति स्म स दक्षिणं वायसस्त्वां नमस्कृत्य
राज्ञो दशरथस्य च १७ विसृष्टस्तु तदा काकः प्रतिपेदे स्वमालयं एवमस्त्रविदां श्रेष्ठः सत्ववाञ्छीलवानपि १८ किमर्थमस्त्रं रक्षःसु न योजयसि
राघव न दानवा न गंधर्वा नासुरा न मरुद्गणाः १९

५ ७ दारितं दारितमित्यर्थः ८ ९ धरांतरगतः पातालस्थः १० कृथाः अकृथाः ११
दर्भं संस्तरादेकं कुशं गृह्य गृहीत्वेत्यर्थः १२ चिक्षेप चिक्षेपिथ आर्षप्रयोगः १३ १४ १५ परिपालयः पर्यपालयः शरीरावधेनेति भावः इत्येवेति हे
तोः १६ ततस्तदागमनेत्रं हिनस्ति स्म अहिनत् १७ १८ १९

श्री१

हेरामरणेनत्वांप्रतिसमासितुंनशक्ताः नथानन्वत्काकवदित्यर्थः संभ्रमः आदरः॥२०॥२१॥२२॥२३॥२४॥ त्वच्छोकविमुखः त्वच्छोकेनकार्यान्तरविमुखः॥२५॥

नवरामरणेशक्तास्तथाप्रतिसमासितुं॥ नववीर्यवतःकच्चिन्मयियद्यस्तिसंभ्रमः॥२०॥ क्षिप्रंसुनियतैर्बाणैर्हन्यतांयुधिरावणः भ्रातुरादेशमा
ज्ञायलक्ष्मणोवापरंतपः॥२१॥ सकिमर्थंनरवरोनमांरक्षतिराघवः॥ शक्तौतौपुरुषव्याघ्रौवाय्वग्निसमतेजसौ॥२२॥ सुराणामपिदुर्धर्षौकिम
र्थंमामुपेक्षतः॥ ममैवदुष्कृतंकिंचिन्महदस्तिनसंशयः॥२३॥ समर्थौसहितौयन्मांनरक्षेतेपरंतपौ॥ वैदेह्यावचनंश्रुत्वाकरुणंसाश्रुभाषितं
॥२४॥ पुनरप्यहमार्यांतामिदंवचनमब्रुवं॥ त्वच्छोकविमुखोरामोदेविसत्येननेशपे॥२५॥ रामेदुःखाभिभूतेचलक्ष्मणःपरितप्यते॥ कथंचि
द्भवतीदृष्टानकालःपरिशोचितुं॥२६॥ इदंमुहूर्त्तंदुःखानामंतंद्रक्ष्यसिभामिनि॥ तावुभौनरशार्दूलौराजपुत्रौपरंतपौ॥२७॥ त्वद्दर्शनकृतो
त्साहौलंकांभस्मीकरिष्यतः॥ हत्वाचसमरेरौद्रंरावणंसहबांधवं॥२८॥ राघवस्त्वांवरारोहेस्वपुरींनयिताध्रुवं॥ यत्तुरामोविजानीयादभिज्ञान
मनिंदिते॥२९॥ प्रीतिसंजननंतस्यप्रदातुंतत्त्वमर्हसि॥ साभिवीक्ष्यदिशःसर्वावेण्युद्ग्रथनमुत्तमं॥३०॥ मुक्त्वावस्त्राद्ददौमह्यंमणिमेतंमहाब
ल॥ प्रतिगृह्यमणिंदोर्भ्यांतवहेतोरघुप्रिय॥३१॥ शिरसासंप्रणम्यैनामहमागमनेत्वरे॥ गमनेचकृतोत्साहमवेक्ष्यवरवर्णिनी॥३२॥ विवर्ध
मानंचहिमामुवाचजनकात्मजा॥ अश्रुपूर्णमुखीदीनाबाष्पगद्गदभाषिणी॥३३॥

॥भवतीमयादृष्टाअतःपरं॥ परिशोचितुंनकालस्तवयोग्य
इतिशेषः चिरंलंकायांआसितुंनकालोयोग्यइतिपाठांतरेऽर्थः॥२६॥ इदंमुहूर्त्तंअस्मिन्नेवमुहूर्त्तेइत्यर्थः॥२७॥२८॥ वेण्युद्ग्रथनंवेणग्रथनयोग्यं॥३०

॥ ३१ त्वरेत्वरावान्जातइत्यर्थः ३२ विवर्धमानंमन्युङ्जनराणांपीतिशेषः ३३ ॥

३४॥३७॥३८॥कालेनोपनिपीडिता परायत्तेन्निशेष॥३९॥४०॥४३॥४४॥अघवमानः॥इति श्रीरामाभिरामे श्रीरा॰ सुंद॰ सप्तषष्टितमः सर्गः॥६७॥तव

६८

ममोत्पतनसंभ्रांता शोकवेगसमाहता॥मामुवाच ततः सीता सभाग्योसि महाकपे॥३४॥यद्रक्षसि महाबाहुं रामं कमललोचनं॥लक्ष्मणं च म
हाबाहुं देवरं मे यशस्विनं॥३५॥सीतयाप्येवमुक्तोहमब्रुवं मैथिलीं तथा॥पृष्ठमारोह मे देवि क्षिप्रं जनकनंदिनि॥३६॥यावत्ते दर्शयाम्यद्य स
सुग्रीवं सलक्ष्मणं॥राघवं च महाभागे भर्त्तारमसितेक्षणे॥३७॥साब्रवीन्मां ततो देवी नैष धर्मो महाकपे॥यत्ते पृष्ठं सिषेवेहं स्ववशा हरिपुंग
व॥३८॥उवाच यदहं वीरस्पृष्टा गात्रेषु रक्षसा॥तत्राहं किं करिष्यामि कालेनोपनिपीडिता॥३९॥गच्छ त्वं कपिशार्दूल यत्र तौ नृपतेः सुतौ
इत्येवं सा समाभाष्य भूयः संदेष्टुमास्थिता॥४०॥हनुमन्सिंहसंकाशौ तावुभौ रामलक्ष्मणौ॥सुग्रीवं च सहामात्यं सर्वान्ब्रूया अनामयं
॥४१॥यथा च स महाबाहुर्मां तारयति राघवः॥अस्माद्दुःखांबुसंरोधात्त्वं समाधातुमर्हसि॥४२॥इदं च तीव्रं मम शोकवेगं रक्षोभिरेभिः परि
भर्त्सनं च॥ब्रूयास्तु रामस्य गतः समीपं शिवश्च तेध्वास्तु हरिप्रवीर॥४३॥एतत्तवार्यानृपसंयता सा सीता वचः प्राह विषादपूर्वं॥एतच्च बुद्ध्वा
गदितो यथा त्वं श्रद्धत्स्व सीतां कुशलां समग्रां॥४४॥इत्यार्षे श्रीमद्रामायणे वा॰ सुंदरकांडे सप्तषष्टितमः सर्गः॥६७॥अथाहमुत्तरं देव्या पुन
रुक्तः ससंभ्रमं॥तव स्नेहान्नरव्याघ्र सौहार्द्दादनुमान्य च॥१॥एवं बहुविधं वाच्यो रामो दाशरथिस्त्वया॥यथा मां प्राप्नुयाच्छीघ्रं हत्वा रावणमासा

स्नेहान्मयि सौहृद्यात्सुहृदो भावात् मामन्त्र्य मामुसंमान्य ससंभ्रमो गंतुं सत्वरोहमुत्तरं कार्य्यप्रति पुनः पुनरुक्तः॥१॥यथा मां प्राप्नुयात्तथा यतस्वेति शेषः॥२॥

॥ ३ ॥ एकदिनवासफलमाह ममचेति तवसान्निध्यादल्पभाग्यायाः ममास्य महतः शोकविपाकस्य शोकरूपस्य पापफलस्य मुहूर्त्तं मोक्षणं स्यादित्यन्वयः
॥ ४ ॥ पुनरागमनाय प्रतीक्षमाणाया मम प्राणानामपि संदेहः स्यादिति योजना ॥ ५ ॥ ६ ॥ उत्तरकार्यविषयामुक्तिमाह ॥ अयंचेति असंशयः वाधकसं

यदि वा मन्यसे वीर वसैकाहमरिंदम ॥ कस्मिंश्चित्संवृते देशे विश्रांतः श्वो गमिष्यसि ॥ ३ ॥ ममचाप्यल्पभाग्यायाः सान्निध्यात्तव वानर ॥ अस्य शोक
विपाकस्य मुहूर्त्तं स्याद्विमोक्षणं ॥ ४ ॥ गते हि त्वयि विक्रांत पुनरागमनाय वै ॥ प्राणानामपि संदेहो मम स्यान्नात्र संशयः ॥ ५ ॥ तवादर्शनजं
वापि भयं मां परितापयेत् ॥ दुःखाद्दुःखपराभूतां दुर्गतां दुःखभागिनी ॥ ६ ॥ अयंच वीर संदेहस्तिष्ठतीव ममाग्रतः ॥ सुमहांस्त्वत्सहायेन हर्यृ
क्षेषु असंशयः ॥ ७ ॥ कथं नु खलु दुष्पारं तरिष्यन्ति महोदधिं ॥ तानि हर्यृक्षसैन्यानि तौ वा नरवरात्मजौ ॥ ८ ॥ त्रयाणामेव भूतानां सागरस्येह लंघ
ने ॥ शक्तिः स्याद्वैनतेयस्य वायोर्वा तव चानघ ॥ ९ ॥ तदस्मिन्कार्यनियोगे वीरैवं दुरतिक्रमे ॥ किं पश्यसि समाधानं ब्रूहि वाक्यविदांवर ॥ १० ॥ काम
मस्य त्वमेवैकः कार्यस्य परिसाधने ॥ पर्याप्तः परवीरघ्न यशस्यस्ते वलोदयः ॥ ११ ॥ वलैः समग्रैर्यदि मां हत्वा रावणमाहवे ॥ विजयी स्वपुरीं रामो नये
त्तत्स्याद्यशस्करं ॥ १२ ॥ यथाहं तस्य वीरस्य वनादुपाधिना हृता ॥ रक्षसा तद्भयादेव तथा नार्हति राघवः ॥ १३ ॥ वलैस्तु संकुलां कृत्वा लंकां परवलार्द
नः ॥ मां नयेद्यदि काकुत्स्थस्तत्तस्य सदृशं भवेत् ॥ १४ ॥

॥ शयरहितः ॥ ७ ॥ संदेहमेवाह कथं न्विति ॥ ७ ॥ ८ ॥ १० ॥ यद्यपि त्वमेव पर्याप्तः सकलराक्षसवध
पूर्वं मन्मोचने इति शेषः तथापि ईदृशो वलोदयस्तवैव यशस्यो यशोवर्द्धकः स्यात् ॥ १० ॥ यदि तु रामो रावणं हत्वा मां नयेत् तदा तन्नयनं तस्य यशस्करं स्यात्

अतस्तेनैवागम्य मोचनं युक्तमिति भावः ॥ १२ ॥ उपाधिना छलेन ॥ १३ ॥ १४ ॥

यथातस्यानुरूपंविक्रांतंभवति तथात्वमेवोपपादय॥१५॥शेषंशिष्टं॥१६॥१७॥१८॥१९॥२०॥२१॥२२॥मन्युर्दैन्यं॥२३॥२४॥२५॥२६॥२७॥

तद्यथातस्यविक्रांतमनुरूपंमहात्मनः॥भवत्याहवशूरस्यतथात्वमुपपादय॥१५॥तदर्थोपहितंवाक्यंप्रश्रितंहेतुसंहितं॥निशा
म्याहंनतःशेषंवाक्यमुत्तरमब्रुवं॥१६॥देविहर्यृक्षसैन्यानामीश्वरःप्लवतांवरः॥सुग्रीवःसत्वसंपन्नस्त्वदर्थेकृतनिश्चयः॥१७॥त
स्यविक्रमसंपन्नाःसत्ववंतोमहावलाः॥मनःसंकल्पसदृशानिदेशेहरयःस्थिताः॥१८॥येषांनोपरिनाधस्तान्नतिर्यक्सज्जतेगतिः
नचकर्मसुसीदंतिमहत्स्वमिततेजसः॥१९॥असकृत्तैर्महाभागैर्वानरैर्बलसंयुतैः॥प्रदक्षिणीकृताभूमिर्वायुमार्गानुसारिभिः॥२०॥
मद्विशिष्टाश्चतुल्याश्चसंतितत्रवनौकसः॥मत्तःप्रत्यवरःकश्चिन्नास्तिसुग्रीवसंनिधौ॥२१॥अहंतावदिहप्राप्तःकिंपुनस्तेमहा
बलाः॥नहिप्रकृष्टाःप्रेष्यंतेप्रेष्यंतेहीतरेजनाः॥२२॥तदलंपरितापेनदेविमन्युरपैतुते॥एकोत्पातेनतेलंकामेष्यंतिहरियू
थपाः॥२३॥ममपृष्ठगतौतौचचंद्रसूर्याविवोदितौ॥त्वत्सकाशंमहाभागौनृसिंहावागमिष्यतः॥२४॥अरिघ्नंसिंहसंकाशंक्षि
प्रंद्रक्ष्यसिराघवं॥लक्ष्मणंचधनुष्पाणिंलंकाद्वारमुपागतम्॥२५॥नखदंष्ट्रायुधान्वीरान्सिंहशार्दूलविक्रमान्॥वानरान्वा
नगेंद्राभांक्षिप्रंद्रक्ष्यसिसंगतान्॥२६॥शैलांबुदनिकाशानांलंकामलयसानुषु॥नर्दतांकपिमुख्यानामचिराच्छ्रोष्यसेस्वनं
॥२७॥निवृत्तवनवासंचत्वयासार्द्धमरिंदमं॥अभिषिक्तमयोध्यायांक्षिप्रंद्रक्ष्यसिराघवं॥२८॥ ॥छ॥ ॥

॥ ३८ ॥

362

पूर्वंतुत्वयामद्वृत्ताश्रुतेनतच्छोकेनातिपीडिताप्यदीनभाषिणी सामयाशिवाभिर्वाग्भिरभिप्रसादिताशांतिंदुःखनिवृत्तिंउवाहप्रापेत्यर्थं

ततोमयावाग्भिरदीनभाषिणीशिवाभिरिष्टाभिरभिप्रसादिता ॥ उवाहशांतिंममैथिलात्मजातवातिशोकेनतथा
तिपीडिता ॥ २९ ॥ ॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकीयेसुंदरकांडेचतुर्विंशत्सहस्रिकायांसंहि
तायांआदिकाव्येऽष्टषष्टितमःसर्गः ॥ ६८ ॥ इतिसुंदरकांडसंपूर्णमस्तु ॥ ॥ अतःपरंयुद्धकां
डंभविष्यतितस्यायमाद्यश्लोकः ॥ श्रुत्वाहनूमतोवाक्यंयथावदभिभाषितं ॥ रामःप्रीतिसमायुक्तोवाक्यमुत्तरमब्रवीत् ॥

॥ २९ ॥ इतिश्रीरामाभिरामेश्रीरामीयेरामायणतिलकेसुंदरकांडेऽष्टषष्टितमःसर्गः ॥ ६८ ॥ समाप्तेयंसुंदरकांडटीकासंपूर्णा

श्रीमान